श्रीमद्भागवतम् ।

एकादशस्कन्धः ।

प्रथमोऽध्यायः ।

॥ ॐ नमो भगवते वासुदेवाय ॥

श्रीबादरायणिरुवाच ।

कृत्वा दैत्यवधं कृष्णः सरामो यदुभिर्वृतः ।
भुवोऽवतारयद्भारं (१) जविष्ठं जनयन् कलिम् ॥ १ ॥
ये कोपिताः सुबहु पाण्डुसुताः सपत्नैर्दुर्द्यूतहेलनकचग्रहणादिभिस्तान् ।
कृत्वा निमित्तमितरेतरतः समेतान् हत्वा (२) नृपान्निरहरत्क्षितिभारमीशः ॥ २ ॥
भूभारराजपृतना यदुभिर्निरस्य गुप्तैः स्वबाहुभिरचिन्तयदप्रमेयः ।
मन्येऽवनेर्ननु (३) गतोऽप्यगतं हि भारं यद्यादवं कुलमहो अविषह्यमास्ते ॥ ३ ॥
नैवान्यतः परिभवोऽस्य भवेत्कथञ्चिन्मत्संश्रयस्य विभवोन्नहनस्य नित्यम् ।
अन्तः कलिं यदुकुलस्य विधाय (४) वेणुस्तम्बस्य वह्निमिव शान्तिमुपैमि धाम ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

श्रीकृष्णाय नमः ॥
श्रीगणेशाय नमः ॥

श्रीपरमहंसास्वादितचरणकमलचिन्मकरन्दाय भक्तजन-
मानसनिवासाय श्रीरामचन्द्राय ॥

विजयन्ते परानन्दकृष्णपादरजःस्रजः ।
या धृत्वा मूर्ध्नि जायन्ते महेन्द्रादिमहःस्रजः ॥
...कैकत्रिंशताऽध्यायैर्मुक्तिरेकादशे ततः ।
...यत्र ...हासाद्यैः समासव्यासरूपतः ॥
...ध्याये समासेन न्यवर्णयत् ।
...याश्च विस्तरेणोपपत्तिभिः ॥
...ध्याये यदुवंशस्य सङ्क्षयः ।
...य मौसलव्यपदेशतः ॥

प्रवृत्तितः परानन्दकृष्णक्रीडाऽनुवर्णिता ।
तन्निवृत्त्या परानन्दपदारोहोऽनुवर्ण्यते ॥

एवं तावद्दशमस्कन्धे भूभारावतारणाय निजविभूतिविभूषितयदुवंशस्य यदुवंशावतारितसकलसुरांशस्य भगवतः श्रीकृष्णस्य तदुचितप्रवृत्तिविडम्बनेन तच्छ्रवणस्मरणादिपराणां परेषामानन्दकारिणी क्रीडा निरूपिता, अथेदानीमपरिमितयोगमायावैभवस्य भक्तानामात्मतत्त्वोपदेशपूर्वकं क्रीडार्थं भूतलेऽवतारितानां चाधिकारिणां सुरांशानां मौसलापदेशेन तत्तदधिकारपदप्रापणपूर्वकं च ब्रह्माद्यनुग्रहाय निजपदारोहो निरूप्यते; तत्र कुरुक्षेत्रयात्रायामविरक्तस्य वसुदेवस्य "कर्मणा कर्मनिर्हारो यथा स्यान्नस्तदुच्यताम्" इत्येवं कर्मयोगं पृष्टवतो नारदादिभिः कर्मयोगो निरूपितः—

"कर्मणा कर्मनिर्हार एष साधु निरूपितः ।
यच्छ्रद्धयाप्तवित्तेन शुक्लेनेज्येत पूरुषः" ॥

...र । (३) गतोऽप्यगतोऽपि सारः । (४) वेणुसङ्घर्षजातमिव विज० पाठाः ।

श्रीधरस्वामिकृतभावार्थदीपिका ।

इत्यादिना तेन च विशुद्धसत्त्वस्य श्रीकृष्णरामौ परमेश्वरत्वे ज्ञातवतः षड्भर्मानयनाध्याये श्रीकृष्णेनात्मतत्त्वमुपदिष्टम्—

"वचो वः समवेतार्थं तातैतदुपमन्महे ।
यन्नः पुत्रान् समुद्दिश्य तत्त्वग्राम उदाहृतः" ॥

इत्यादिना तस्य विषयभोगातिशयेन पुनस्तिरोहितमासीत्तदेव इदानीं नारदमुखेन प्रथमं पञ्चाध्याय्या निरूप्यते; तत्र प्रथमेऽध्याये वैराग्योत्पादनाय यदुकुलस्य ब्रह्मशापापदेशेनात्युन्नतविषयसुखानामप्यनित्यता प्रतिपाद्यते, ततश्चतुर्भिर्निमिजायन्तेयसम्वादेन सपरिकरं परमतत्त्वनिरूपणम । ततः षष्ठे भगवदुद्धवसम्वादप्रस्तावः ततस्त्रयोविंशत्या उद्धवं प्रति भगवतस्तत्त्वनिरूपणम । ततो द्वाभ्यां मौसलक्रीडत्येवमेकत्रिंशताऽध्यायैरेकादशस्कन्धस्य प्रवृत्तिः तस्य च यथामति व्याख्यानमारभ्यते, तत्र मौसलप्रसङ्गार्थं पूर्वस्कन्धार्थमनुवदति श्लोकद्वयेन, कृत्वेति । अवतारयदवातारयदित्यडागमो द्रष्टव्यः जविष्ठं वेगवत्तरमतिशीघ्रम हिंसापर्यवसायिनमित्यर्थः । कलिं कलहम ॥ १ ॥

एतद्विवृणोति—ये कोपिता इति । सपत्नैर्दुर्योधनादिभिः कोपिताः कोपं कारिताः सुबहु यथा भवति तथा बहुवारानित्यर्थः । तदेवाऽऽह—दुर्द्यूतहेलनकचग्रहणादिभिरिति । दुर्द्यूतं कपटद्यूतम हेलनमवज्ञा कचग्रहणं दुःशासनेन द्रौपद्याः केशाकर्षणम एतान्यादिर्येषां गरदानजतुगृहदाहादीनां तैः कृत्वा ये कोपितास्तान् पाण्डुसुतान्निमित्तं कृत्वा इतरेतरत उभयोः पक्षयोः समेतान् मिलितान्नृपान् हत्वा क्षितेर्भारं निरहरज्जहार यद्वा, ये कोपिताः यैश्च कोपितास्तानितरेतरतः परस्परं निमित्तं कृत्वेत्यन्वयः । ये तावत्प्रकटदैत्याः पूतनादयस्तान्स्वयमेव हतवान् ये तु दैत्या बान्धवच्छद्मना स्थितास्तान्परस्परं निमित्तं विधाय हत्वा भूभारमपाकृतवानित्यर्थः ॥ २ ॥

अपि च भूभारेत्यादि अन्याश्च भुवो भारभूता राजपृतनाः राज्ञां पृतनाः सेनाः राज्ञः नस्तेषां पृतनाश्चेति वा स्वबाहुभिर्गुप्तैः परिरक्षितैर्यदुभिर्विवाहादिच्छलेन निरस्य हत्वा बाहुभिरिति बहुवचनं वस्तुतश्चतुर्भुजाभिप्रायेण नन्वेवं कृष्णश्चिकीर्षतीति ज्ञात्वा कथं तस्मै यादवान् न द्रुह्यन्ति स्म तत्राऽऽह—अप्रमेयः प्रमातुमशक्यः चिन्तामाह—मन्य इति । नन्विति वितर्के यवनेर्भूमेर्भारो यद्यपि लोकप्रतीत्यागतस्तथाऽप्यहमगतमेव मन्ये हि निश्चितम यद्यस्मादविषह्यं सोढुमशक्यं यादवं कुलमित्यनेनैव स्ववंशत्वात्स्वयं हननमनुचितमिति सूचितम ॥ ३ ॥

तर्हीदमप्यन्यैर्घात्यतां तत्राऽऽह—नैवेति । अन्यतो देवादिभ्योऽपि यादवकुलस्य परिभवास्तिरस्कारो न भवेत् कुतः मत्संश्रयस्य मां संश्रयत इति मत्संश्रयं कुलं तस्य । किञ्च, नित्यं विभवोद्वहनस्य विभवैर्गजतुरगादिभिरुच्छृङ्खलस्य । यद्वा, तर्हीदं किमिति संहर्तव्यम? तत्राऽऽह—विभवोन्नहनस्येति । तस्मादेवं करिष्यामीत्याह—अन्तःकलिमिति । शान्तिमुपशममुपैमि "वर्तमानसामीप्ये वर्तमानवद्वा" (३।३।१३१) उपैष्यामि तदनन्तरं धाम च वैकुण्ठाख्यमुपैष्यामीत्यर्थः ॥ ४ ॥

श्रीराधारमणदासगोस्वामिकृतदीपिकादीपिनी टिप्पणी ।

श्री श्रीराधारमणो जयति ।

श्रीचैतन्यं प्रपद्येऽहं साद्वैतं च सनित्यकम ।
श्रीमद्गोपालभट्टञ्च षट्सन्दर्भप्रकाशकम ॥
श्रीमद्भागवतं वन्दे सर्वशास्त्रप्रकाशकम ।
तद्व्याख्यातॄन् गुरून् वन्दे श्रीधरस्वामिपादकान् ॥
गोस्वामि पितरं वन्दे श्रीगोवर्द्धनलालकम ।
किशोरीमातरं वन्दे वृषभानुपुरोद्भवाम ॥
पितुश्च पितरं वन्दे श्रीमज्जीवनलालकम ।
मन्त्रराजोपदेशेन येन निस्तारितोऽस्म्यहम् ॥
पितामहीं प्रपद्येऽहं श्रीकृष्णाकुवराभिधाम ।
गीतगोविन्दकाव्यं हि यस्याः कण्ठे विराजते ॥

अथ भगवद्वाक्यत्वेन परमप्रामाण्यापन्नमेकादशस्क
व्याकुर्वन् श्रीश्रीधरनामा यतीन्द्रः स्वोपास्यपादकमल
श्रीरघुनन्दनस्य प्रणतिलक्षणं मङ्गलं प्रत्यूहनिकरनिर्मूलकं शिष
शिक्षार्थं निबध्नाति—ओं नम इति । श्रिया प्रेमसम्पत्त्या यु
ये भागवतपरमहंसास्तैरास्वादितश्चरणकमलयोश्चिद्रूपो म
रन्दो यस्य तस्मै चिद्घनानन्दापरपर्यायमनुकूलज्ञानं
भक्तजनानां मानसमेव निवासो गृहं यस्य तस्मै श्रीराम
नमः । श्रीभागवते परमप्रतिपाद्यस्य श्रीकृष्णस्य पादर
सौभाग्यं वर्णयति—विजयन्त इति । "सच्चिदानन्दरूपाय कृष्णा
इति श्रुतेः । परानन्दविग्रहो रूपं यः श्रीकृष्णस्तस्य प
रजसां सम्बन्धिन्यो याः स्रजो मालाः श्रेण्यो वा ता विजय
सर्वोत्कर्षेण वर्त्तन्ते, कीदृशः? यास्तादृशस्रजः महेन्द्रादि
मूर्द्धि धृताः सत्यस्तेषां महेन्द्रादीनां महसामुत्सवानां स्र
समूहाः जायन्ते तेभ्यस्तत्तत्पादोत्सवान् ददतीत्यर्थः । "
उद्धव उत्सवः" इत्यमरः । पक्षे परानन्दस्तन्नामा स्वगुरुरेव कृ
स्तस्य अन्यत् सर्वं पूर्ववत् ॥ अथैकादशार्थं सामस्त्येन द
यति—उक्तेति । ततः प्रायिकक्रममनुसृत्य दशमे दृष्टे भूभुङ्गिरो
वर्णानानन्तरम् एकादशे एकत्रिंशताध्यायैः शुकेन मुक्तिः समा
व्यासरूपतः सङ्क्षेपविस्तारप्रकारेणोक्ता वर्णिता केहे
जायन्तेयाः जयन्तीनन्दन्य ये नव योगेश्वरास्तेषां य इतिहा
पुरावृत्तं स आद्यो येषां तैरितिहासैद्वारभूतैः सङ्ग्रहवाक
मुक्त्वा विवृतिवाक्यमाह—नारद इति । समासेन सङ्क्षेपेण मु
न्यवर्णयत् अथ नारदवर्णानान्तरम उपपत्तिभिर्युक्तिभिः नवैकत्रि
दध्यायमध्ये यः प्रथमोऽध्यायस्तत्र तु उपक्षिप्तः
आरब्धः विरागाय विरागं जनयितुं प्रवृत्तिनः प्रवृत्ति
करणं कृत्वा परानन्दविग्रहस्य कृष्णस्य क्रीडा द
वर्णिता इदानीमेकादशे कामान् निषेवे द्वारवत्यामसक्तः स
माश्रितः इत्युक्तेस्तस्याः प्रवृत्तेः सकाशान्निवृत्त्या प
परे द्वारकायाम् अप्रकटप्रकाशे कृष्णस्यारोहो निरूप्यते
नेति शेषः । एवं श्लोकैर्वर्णयित्वा प्रघट्टकेन
एनमिति । निजविभूतिभिरैश्वर्यादिभिः विभू
यदुवंशो येन तस्य तत्र हेतुः यदुवंशो
सकलसुरांशाः येन तस्य एतेन सुरां
व्यञ्जितं तदुक्तं पाद्मे कृष्णेन सत्यभा
मद्रूपा एव भामिनि । मत्तुल्यगुण

श्रीराधारमणदासगोस्वामिकृतदीपिकादीपिनीटिप्पणी ।

इति तदुचितप्रवृत्तिविडम्बनेन यदुवंशोचितप्रवृत्त्यनुकरणेन तच्छ्रवणोऽति तस्याः क्रीडायाः श्रवणादिपराणां श्रीकृष्णस्य तदुचित प्रवृत्तिविडम्बनेन परेषां ब्रह्मादीनामानन्दकारणां क्रीडा दशमस्कन्धे श्रीशुकेन निरूपिता इत्यन्वयः तदुक्तं दशमे ।

"प्रपञ्चं निष्प्रपञ्चोऽपि विडम्बयासि भूतले ।
प्रपन्नजनतानन्दसन्दोहं प्रथितुं प्रभो" । इति.

अथ दशमस्कन्धवर्णनानन्तरम् उपरमितेति उपरमितम् अन्तर्धापितं योगमायायाः स्वाचिन्त्यशक्तेर्वैभवं येन तस्य भगवतः निजपुरे द्वारकाख्याप्रकटप्रकाशे आरोहः शुकेन निरूप्यते, कथम् ? उद्धवोपलक्षितभक्तानामात्मतत्त्वोपदेशपूर्वकं यथा स्यात् तथा एवं क्रियार्थमित्यादिकमपि क्रियाविशेषणं तत्र सामान्यतस्तात्पर्यनिर्णये सति विशेषतः पूर्वस्कन्धेन प्रसङ्गसङ्गतिमाह—कुरुत्त्वेति । नेन च कर्मयोगेन तथात्मतत्त्वं तत्र पञ्चाध्याय्यां मध्ये ततः प्रथमाध्यायानन्तरं सपरिकरेति ससाधनेत्यर्थः । ततः पञ्चाध्यायानन्तरं पुनस्ततः षष्ठाध्यायानन्तरं ततः ऊनत्रिंशदध्यानन्तरं प्रवृत्तिः प्रचारः तस्य च एकादशस्कन्धस्य तत्र आरम्भे अथ कृतिः प्रारम्भः ॥ १ ॥

एतद्धिंसापर्यवसानेन भारावतरणं तदेवं बहुवारप्रकोपनमेव पूर्वार्थे परस्परार्थवाचकेतरेतरस्योभयपदवाचकत्वं लक्षणिकं किञ्च द्वयोरपि निमित्तत्वे वाच्ये पाण्डवानामेव त्वप्रोक्तमित्यरुचौ यद्वेति नैमित्तिकसंहारे पूतनादौ व्यभिचारमाशङ्क्य व्यञ्जनया तदपि संगृह्णन् व्याचष्टे एतावदिति अत एवेत्यर्थ इत्युक्तम् ॥ २ ॥

चतुर्भुजाभिप्रायेण गोपनकाले चतुर्भुजत्वप्रकाशनाभिप्रायेणेत्यर्थः । एवं सर्वसंहारेऽस्मत्संहारमपि चिकीर्षति अत्र तेषामधार्मिकतया भूभारत्वं नाभ्युपेयं "ब्रह्मण्यानां वदान्यानां नित्यं वृद्धोपसेविनाम्" इत्यादौ "शय्यासनाटनालापक्रीडास्नानाशनादिषु" इत्यादौ च तेषां परमैकान्तित्वप्रसिद्धेः न च व्यक्तिबाहुल्यमात्रं भारत्वप्रयोजकमिति वाच्यम् अनन्तानां पर्वतादीनां सत्त्वेऽपि भाराप्रसिद्धेः तस्माद्भगवदन्तर्धाने तद्वियोगेनातिक्षोभाद्उन्मत्ततया लुठद्भिस्तैः पृथिवी चूर्णिता स्यादिति भारत्वमारोपितं तत एव तेषां प्रथममन्तर्धापनमिति ज्ञेयम् ॥ ३ ॥

यद्यविषह्यं तर्हि इदं यादवकुलं पूर्वार्थे किञ्चेत्युक्त्वा विभवेत्यादिविशेषणस्य पूर्वसम्बन्धार्थता प्रतीताऽतो यद्वेति तस्मादन्यैर्घात्यतासम्भवात् तदनन्तरं शान्तिप्राप्त्यनन्तरम् उपैमीत्यावृत्तिचकाराध्याहारगौरवादित्यर्थ इत्युक्तम् ॥ ४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

श्रीमते रामानुजाय नमः ॥

कल[illegible]—३ ॥

विभवोन्नहनस्य विभवोन्नद्धस्य शान्तम् ऊर्मिषट्करहितम् ॥ ४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

श्रीमते रामानुजाय नमः ॥

इत्थं ब्रह्मादिभिरभ्यर्थितस्य भूभारापजिहीर्षयाऽवतीर्णस्य भगवतः(कृ)ति)दैवमानुषाणि चेष्टितानि भूभारापहारधर्मसंस्थापनसाधुपरित्राणादिगर्भाणि बाल्ययौवनक्रीडाद्यात्मकान्यनुवर्णितानि अथ भूभारावशेष(भूत)यदुकुलस्य जिहीर्षानिदानविप्रशापापनोदनव्याजेन प्रभासं प्रस्थितवतः स्वकुलक्षपणसमस्ततत्त्वोपदेशस्वपदारोहणात्मकं चेष्टितमनुवर्णयत्येकादशस्कन्धेन-कृत्वा दैत्यवधं कृष्ण इत्यादिना । तत्र तावद्वृत्तवर्त्तिष्यमाणयोः सङ्गतिसूचनाय वृत्तमनुवदति श्लोकद्वयेन—कृत्वेति । दैत्यवधं पूतनाशकटयमलार्जुनधेनुकारिष्टचाणूरतोसलकंसादिदैत्ययोनिवधं कृत्वा सराम इत्यनेन कांश्चिद्रामेण घातयित्वेत्यभिप्रेतम् एवं यदुभिर्वृत इत्यनेनापि जरासन्धं बलवत्तरम् आशु हिंसापर्यवसायिनमित्यर्थः । तं कलिं कलह जनयन् कुरुपाण्डवादीष्वतिशेषः। तेष्वपि कलहापादनेनाधर्मिष्ठान् घातयित्वेति भावः । इत्थं भुवो भारमवतारयत् अडभाव आर्षः अवतारयामासेत्यर्थः ॥ १ ॥

तदेव प्रपञ्चयति—ये कोपिता इति । सुबहु बहुवारं यथा तथा दुर्द्यूतादिभिः साधनैः सपत्नैर्दुर्योधनादिभिः कर्तृभिर्ये पाण्डुपुत्राः [सुता]कोपिताः कोपं प्रापितास्तान् पाण्डुसुतान्निमित्तं द्वारं कृत्वा "मयैवैते निहताः पूर्वमेव निमित्तमात्रं भव सव्यसाचिन् !" इति भगवदुक्तेरिति भावः । समुदितान् नृपानितरेतरतः अन्योन्यैर्निमित्तभूतैः हत्वा इत्थम् ईशो भगवान् क्षितेर्भारं निरहरत् जहार तत्र दुर्द्यूतं कपटद्यूतं हेलनमवज्ञा कचग्रहणं दुश्शासनेन द्रौपद्याः केशग्रहणम् आदिशब्देन गरलदानजतुगृहदाहादिसङ्ग्रहः ॥ २ ॥

एवं वृत्तमनूद्य तेन सह वर्त्तिष्यमाणस्य सन्दर्भं वदन् वर्त्तिष्यमाणप्रश्नावसर प्रदा[प्रदर्श]नाय तत्सङ्गृह्णाति—भूभारस्यादिभिः पञ्चभिः श्लोकैः । स्वस्य बाहुभिर्गुप्तैः रक्षितैर्यदुभिर्निमित्तभूतैर्भुवो भारभूतानां राजन्यानां पृतनाः सेनाः निरस्य हत्वा स्वबाहुभिरिति बहुवचनं स्वासाधारणचतुर्भुजत्वाभिप्रायकम् अप्रमेयः अपरिच्छेद्यस्वरूपस्वभावः अनवगम्यस्वरूपस्वभावो वा भगवानचिन्तयत्, चिन्ताप्रकारमेवाह— मन्य इत्यादिना उपैमि धामेत्यन्तेन । नन्विति वितर्के अवनेर्भूमेर्भारो गतोऽप्यगत इत्येव मन्ये भारैकदेशस्य गतत्वेऽपि कार्त्स्न्येनागतत्वादगत इत्येव मन्ये मम निश्शेषभूभारक्षपणायावतीर्णत्वादिति भावः । अगतत्वं कुत इत्यत आह—यद्यस्मादहो अविषह्यं सोढुमशक्यमन्यैरिति शेषः । यादवं कुलमास्ते तस्मादगत इति भावः ॥ ३ ॥

नन्वास्तां तदपि केनचिन्निरसिष्यत एवेत्यत आह—नैवेति अस्य यादवबलस्यान्यतः पुरुषान्तरात्परिभवः कथञ्चिदपि न भवेत्ताशङ्कतु न भवेदेव पराजयोपि न कथञ्चिद्भवेदित्यभिप्रायेण परिभव इत्युक्तम्, तत्र हेतुं वदन् विशिनष्टि—मत्संश्रयस्याऽहमव

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

नित्यम् आश्रयो यस्य तस्य नहि मामाश्रितस्य कश्चित्कदाचि-दभद्रं दृष्टमितिभावः। अत एव नित्यं विभवैर्वीर्यशौर्यादिभिरुन्नद्धस्य उत्तरोत्तरोत्कर्षवतः कस्तर्हि तत्त्वपरोपायस्ततः किंवा करिष्यसी-त्यत आह-अन्तरिति । यदुकुलस्यान्तः कालमन्तः कलहं वेणु-स्तम्बस्य वेणुगुल्मस्य वह्निमिव नाशकं विधाय शान्तम् ऊर्मिषट्क-रहितं धाम श्रीवैकुण्ठाख्यं स्थानमुपैमि गच्छामि वर्त्तमानसामीप्ये भविष्यति वर्त्तमानवद्वानाल्लट् शान्तिमिति पाठे तावन्निःशेषभू-भारापहारेण चित्तस्य शान्तिमव्याकुलतामुपैमि ततो धामोपैमी-त्यर्थः ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

श्रीवायुसुताय नमोनमः ।

जयति जगति जन्माद्यस्य विश्वस्य यस्मा—
दमलनिगममुख्यानेकमाहात्म्यधाम ॥
द्रुहिणनलय ऊचे शौरये यत्स्वरूपम्—
यदुपतिरपि वाक्यस्तुत्स्थाय स्वधाम ॥
वेदव्यासमहं वन्दे वेदव्यासैकवेदिनम् ।
वेदव्यासजनाराति वेदव्यासमुनीनपि ॥
रत्नानामम्बुधिः पात्रं तेजसामुष्णदीधितिः ।
एवमेकादशस्कन्धो वेदान्तैकार्थसन्निधिः ॥
दशमस्कन्धरथ्याया गत्वान्तं सार्थवित्पुनः ।
गाह एकादशस्कन्धतीर्थं विष्णुपदीमिव ॥

इह नानाव्यसनराशिभारावभुग्नशिरसां कलिमलावकुण्ठित-मनसां दुःखपरिहारसुखावाप्तीच्छाकाङ्क्षमाणानां तदुपायमजानतां पुंसामुपकाराय करुणाकरेण बादरायणेन कृतभागवतपुराण-कल्पतरोरनेकस्कन्धपुष्पराशेर्मकरन्दभूत एकादशस्कन्ध आर-भ्यते; तत्र एकादशस्कन्धमुत्थापयितुं वृत्तमनुवदति—कृत्वेति । अविष्ठमिति पाठे बृहत्तममित्यर्थः । भारविशेषणं यविष्ठमिति नीचमित्यर्थः । कलिविशेषणं स्वगोत्रकलहस्य निन्दितत्वात् अव-तारयन् अवतारयितुकामः तच्छीलिकार्थे शतृप्रत्ययः भुवो भारं निरहरदिति शेषेणान्वयः कथमित्यत उक्तं दैत्यवधं कृत्वेति अनेन न स्वप्रयोजनार्थं किन्तु परार्थम् इति ज्ञातव्यम् ॥ १ ॥

एतदेव विवृणोति-ये कोपिता इति । ईशः क्षितिभारं निर-हरदित्यन्वयः इदं निर्हरणमपि स्वैश्वर्यद्योतकमिति ज्ञापनाय ईशेति पदं ये सपत्नैः कृतैर्दुर्वादादिभिः सुबहुकोपिताः पाण्डु-सुतास्तान्निमित्तं कृत्वा इतरेतरतः समेतान् परान् शत्रून् हत्वा ॥ २ ॥

भूभारनिर्हरणप्रकारं वक्ति-भूभारेति। किमचिन्तयदत्राह-मन्य इति। अवनेर्भारो गतोपि अगतो ननु इति मन्ये तत्र हेतु-र्यदिति ॥ ३ ॥

नन्विदमप्यन्यतः प्राप्तपरिभवं किं न स्यादत्राह-नैवेति । विभ-वेनोन्नद्धस्य समृद्धिर्यस्य तत्तथा तस्य तस्मादयमुपायः इत्याह, अन्तः कलिमिति वेणुसङ्घस्यान्तः कलिमित्यर्थः। सङ्घर्षलक्षणः तस्मा-ज्जातं वह्निं शान्तिमङ्गलं धाम "शान्तिः प्रशममङ्गलं" इति यादवः यद्वा अन्तः कलिं शान्तिं यदुकुलस्य नाशहेतुम् ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

श्रीराधादामोदरो जयति ।

श्रीकृष्णचैतन्यदेवो जयति ।

अथैकादशसन्दर्भे सन्दर्भाणां समाहृतिः ।
क्रियते चात्र्येवदत्र स मे ऽनन्यगतेर्गतिः ॥
जयेतां मथुराभूमौ शीलरूपसनातनौ ।
यौ विलेखयतस्तत्त्वं ज्ञापकौ पुस्तिकामिमाम् ॥

अथैकादशस्कन्धस्य क्रमसन्दर्भः । तत्र प्रथमतस्तावदिदं विवे-चनीयं पूर्वं श्रीमति दशमस्कन्धे श्रीकृष्णलीला वर्णिता तस्या फलं साधारणानामपि तद्भक्तिलाभपूर्विका तत्प्राप्तिरेवेत्य निर्दिष्टम्—

"इत्थं परस्य निजधर्मविवक्षयात्त—
लीलातनोस्तदनुरूपविडम्बनानि ॥
कर्माणि कर्मकषणानि यदूत्तमस्य—
श्रूयादमुष्य पदयोरनुवृत्तिमिच्छन् ॥
मर्त्यस्तया ननु समेधितया मुकुन्द—
श्रीमत्कथाश्रवणकीर्तनचिन्तयेति ॥
तद्धाम दुस्तरकृतान्तजवापवर्ग—
ग्रामाद्वनं क्षितिभुजोऽपि ययुर्यदर्थाः" ॥

इति द्वयेन । तच्च तत्पदं भुवि प्रकाशमानानां द्वारकादीनां लौकि-कत्वानुकरणेनान्यथा प्रतीतानामपि नित्यसिद्धा लौकिकप्रकाश-विशेष एव यथाऽस्यैव स्कन्धस्यान्ते वक्ष्यते—

"द्वारकां हरिणा त्यक्तां समुद्रोऽप्लावयत् क्षणात् ।
वर्जयित्वा महाराजश्रीमद्भगवदालयम् ॥
नित्यं सन्निहितस्तत्र भगवान् मधुसूदनः ।
स्मृत्याऽशेषाशुभहरं सर्वमङ्गलमङ्गलम्" ॥

इति द्वयेन । अतोऽत्र स्कन्धे तज्ज्ञापनार्थं सपरिकरस्य श्रीभग-वतस्तत्र प्रवेशो वर्ण्यते, मौसलादिकन्त्वनुकरणमात्रमेव अथैव दर्शितं श्रीकृष्णसन्दर्भे प्रथमतृतीयक्रमसन्दर्भयोश्च यत्रा श्रीवसुदेवनारदसम्वादेन श्रीभगवदुद्धवसम्वादेन च तत् निरूपयिष्यते तत् खलु तद्द्वारा बहिर्मुखानामन्यावेशत्याज नेन तल्लीलाप्रवेशनार्थमेव श्रीवसुदेवोद्धवौ च तन्मतादरा तत्रोपलक्षणावेव कृतौ नतूद्देश्यौ—

"शय्यासनाटनालापक्रीडास्नानाशनादिषु ।
न विदुः सन्तमात्मानं वृष्णयः कृष्णचेतसः" ॥

इत्यादि सामान्यतः "वसुदेवं हरेः स्थानं वदन्त्यानकदुन्दुभिम्" इति-

"नोद्धवोऽण्वपि मन्न्यूनो यद्गुणैर्नार्दितः प्रभुः ।
अतो मद्वयुनं लोकं ग्राहयन्निह तिष्ठति" ॥ इति ।

विशेषतश्च तन्माहात्म्यात् अतस्तादृशानां तत्तत्पृच्छा लीलामात्रमन्येषामुपकाराय कल्पते यथैव भगवत इति तदे तद्दर्शयितुमुपक्रमते-कृत्वेति ॥ १ ॥

निरहरत् प्रायः स्वहतभारान्ते निःशेषेणाहरदित्यर्थः । तदे टीकायाः प्रथमपक्षस्य सङ्गतिः स्यात् द्वितीयपक्षे तस्यां प्राप्ति कत्वं ज्ञेयं शिशुपालादौ व्यभिचारात् ॥ २ ॥

भूभारेत्यादि। यादवानां च नित्यपरिकरत्वात्तत्त्यागेन स्वयं वत एवान्तर्धाने तैरतिक्षोभेणोन्मत्तचेष्टैरुप ता पृ मह्येदिति प्रथमं तेषामन्तर्धापनं तदेवाह, ति व

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

त्र चतुर्भुजत्वप्रकाशनाभिप्रायेण नैतावानेतस्याऽभिप्रायः कन्त्वन्योऽप्यन्योऽपि भवेदिति भावः। अत्र तेषामधार्मिकतया तु पृथिवीभारत्वं न मन्तव्यम्—

"ब्रह्मण्यानां वदान्यानां नित्यं वृद्धोपसेविनाम् ।
विप्रशापः कथमभूद्वृष्णीनां कृष्णचेतसाम् ॥"

इत्यादौ शय्यासनाटनालापेत्यादौ च परमसाधुत्वप्रसिद्धेः पृथ्व्या- भारश्च व्यक्तिबाहुल्यमात्रेणोच्यते पर्वतसमुद्रादीनामनन्तानां विद्यमानत्वात् ॥ ३ ॥

नैवेति अन्यतः परिभवोऽपि न भवेत् किन्तु स्वस्य एव नाशस्तु स्वतोऽपि न भवेदित्यर्थः। तत्र हेतुः नित्यं मत्संश्रयस्यैव सतो विभवोऽनहनस्य निरवधिविभवस्येति अतः परिभवोऽत्र भुवि प्रकाशा- न्निमुखीकरणं धाम निजानित्यद्वारकाख्यं दृष्टान्तश्च नाशानुकरण- नाशयोः साऽप्रतीतिः तथान्तर्नाशानुकरणं च न स्यात् कालान्- रे बहिश्च प्राकट्यं भावीत्येतदंशेनैकप्रायत्वाद्धट्यामामे विवर्त्त दिभिरपि लोहादिदृष्टान्तः परिणामपरिहारायैकदेशेनैव मन्यन्ते परिणामवादिभिरपि मूलानुच्छेदेनैवेति वह्निं मिथः सङ्घट्टनेनोत्था- पितमग्निम् ॥ ४ ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

श्रीकृष्णचैतन्यचन्द्रचरणारविन्दभृङ्गेभ्यो नमः ।
गोवर्द्धनधराधारं श्रीमद्गोवर्द्धनं प्रभुम् ।
गोवर्द्धनधराधारं श्रीगोवर्द्धनमाश्रये ॥
प्रणम्य श्रीगुरुं भूयः श्रीकृष्णं करुणार्णवम् ।
लोकनाथं जगच्चक्षुः श्रीशुकं तमुपाश्रये ॥
गोपरामाजनप्राणप्रेयसेतिप्रभूष्णवे ।
तदीयप्रियदास्याय मां मदीयमहं ददे ॥
एकेन मौशलारम्भो जायन्तेयकथा ततः ।
चतुर्भिः स्तुतिरेकेन ब्रह्मेशादिदिवौकसाम् ॥
श्रीकृष्णोद्धवसंवादो विंशत्या त्रियुजा ततः ।
एकेन कुलसंहार एकेनान्तर्द्धिरीशितुः ॥
एवमेकोत्तरत्रिंशदध्यायैस्तत्त्वबोधकैः ।
मुक्तिरेकादशस्कन्धे कीर्त्तिता पूर्वलक्षिता ॥
तत्र तु प्रथमेऽध्याये स्वकुलक्षयचिन्तनम् ।
हरिणा ब्रह्मशापोऽभूत् मौसलव्यपदेशतः ॥

तदेवं दशमे स्कन्धे दशमाश्रयतत्त्वं विचित्रचरितामृत- तरङ्गविस्मापितप्रीणितस्वभक्तसुमनसं स्वयं भगवन्तम् श्रीकृष्णं निरूप्य तच्चरणपरिचरणाश्रितां मुक्तिमेकादशेऽत्र स्कन्धे निरूपयन् किञ्चिदवशिष्टं तच्चरित्रं वक्तुं पूर्वोक्तानुवाद- पूर्वकमते कृत्वेत्यादिना। अवतारयदित्यत्राडागमाभाव आर्षः …ष्टं वेगवत्तरं कलिं कुरुपाण्डवादिकलहम् ॥ १ ॥

कलिमेव विवृणोति, ये पाण्डुसुताः सपत्नैर्दुर्योधनादिभिः दुरवहु अत्यधिकम् यथा स्यात्तथा दुर्द्यूतादिभिः करणैः कोपिता- तान्… …दीन् निमित्तं कृत्वा परस्परतः समेतान् उभयोः पक्षयोर्मिलितान् नृपान् हत्वा क्षितेर्भारं निरहरत् जहार ॥ २ ॥

यदुभिः कीदृशैः स्वबाहुभिर्गुप्तैः भुजबलपालितैः अचि- न्तयत् परामर्श तच्चिन्तनस्य तत्रत्यैर्ज्ञातुमशक्यत्वादप्रमेयः चिन्तनमाह—मन्य इति। नन्विति वितर्के यद्यपि लोकप्रतीत्या भारो गतस्तदप्यहं भारमगतमेव मन्ये, कुतः ? इत्यत आह, यदिति। यादवकुलस्य परमधार्मिकस्यापि भारत्वप्रकारः प्रथमस्कन्धे व्याख्यातः ॥ ३ ॥

तर्हीदमप्यन्यैर्घातयतां तत्राह—नैवेति। परिभवस्तिरस्कारोऽपि न सम्भवेत् किमुत हननमिति भावः। तत्र हेतुर्मदिति अतः स्वेनापि हननमनुचितमिति भावः। तर्हि कोऽत्र समाधिस्तत्राह अन्तरिति। यदुकुलस्य प्रभासं गमितस्य काले लोकप्रतीतं कलहं विधाय तेनैव तस्य शान्तिं नाशं विधाय धाम वैकुण्ठम् उपाम नारायणस्वरूपेण स्वांशेन यास्यामि वेणुस्तम्बस्य वंश- सङ्घस्य मथनोत्थं वह्निं विधाय तेनैव वंशसङ्घस्य नाशं विधाय पवनो यथा धाम अन्तर्धानं याति तथा ॥ ४ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

श्रीमते मङ्गलमूर्त्तये भगवन्निम्बार्काय नमः ।
श्रीकृष्णं तस्य शिष्यांश्च कुमारान्नारदं प्रभुम् ।
निम्बार्कं च नमस्कृत्य स्कन्धे त्वेकादशेऽधुना ॥
सिद्धान्तद्योतकः सम्यक् सम्प्रदायानुसारतः ।
श्रीकृष्णपदलाभाय प्रदीपोऽयं विरच्यते ॥
आश्रयं मुक्तिदं प्रोक्त्वा पूर्वत्रेह तु विस्तरात् ।
सोपाया वर्ण्यते मुक्तिस्तद्भावापत्तिलक्षणा ॥

एवं तावदतिक्रान्तस्कन्धे स्वभावतोऽपास्तसमस्तदोषस्य समस्तकल्याणगुणैकसिन्धोः सर्ववेदैकवेद्यस्य परब्रह्मणः श्रीकृष्ण- स्योपासकानां भुक्तिमुक्तिप्रदानि चरित्राणि निरूपितान्यधुना अस्मिन्नेकत्रिंशदध्यायात्मके एकादशे स्कन्धे महात्मनां यादवानां विप्रशापव्याजेन परलोकप्रयाणः हरेर्मुमुक्षुजनानुग्रहार्थं समस्त- श्रुतिसिद्धान्तोपदेशपूर्वकनिजलोकारोहोऽनुवर्ण्यते—

"देहादौ प्रथमेऽध्याये विरागोत्पादनाय तु ।
स्मर्य्यते यदुसंहारः कृष्णभक्तिविवृद्धये" ॥

तत्रादौ वृत्तवर्त्तिष्यमाणसङ्गत्यै वृत्तमनुवदति भगवान् शुकः— कृत्वेति श्लोकद्वयेन। कृष्णो दैत्यवधं प्रकटदैत्यानां बकीबक- प्रभृतीनां राजन्यच्छद्मना स्थितानां कंसचैद्यादीनां च वधं कृत्वा अविष्टं वेगवत्तरं सद्यो नाशकरं कलिं कलहं जनयन् भुवो भारमवतारयत् सराम इत्यनेन भुवो भारं भूधरप्रीत्यर्थं निरहरत् यदुभिर्वृत इत्यनेन च दैत्यवधं दैत्यशत्रुभूतदेवांश- रूपयादवप्रीत्यर्थं कृतवानतु स्वप्रयोजनार्थमिति भक्तवश्यत्वं भगवतः सूचितम् ॥ १ ॥

उक्तार्थं विवृणोति—ये कोपिता इति। दुर्द्यूतहेलनकचग्रह- णादिभिः दुर्द्यूतं कपटद्यूतम् यथा मार्जारः आत्मनः साधुतां ख्यापयित्वा कृतविश्वासान् मूषकान् भक्षितवान् तथा धार्मिको भूत्वा युधिष्ठिरोऽस्मान् घातयितुं प्रवृत्तः इत्याद्यवज्ञा कच- ग्रहणं केशाकर्षणम् एतानि आदिर्येषां गरदानजतुगृहदाहद्रौपदी-

एवं व्यवसितो राजन्! सत्यसङ्कल्प ईश्वरः।
शापव्याजेन विप्राणां सञ्जह्रे स्वकुलं विभुः ॥ ५ ॥
स्वमूर्त्या लोकलावण्यनिर्मुक्त्या लोचनं नृणाम्।
गीर्भिस्ताः स्मरतां चित्तं पदैस्तानीक्षतां क्रियाः ॥ ६ ॥
आच्छिद्य कीर्तिं सुश्लोकां [1]वितत्य ह्यञ्जसा नु कौ।
तमोऽनया तरिष्यन्तीत्यगात्स्वं पदमीश्वरः ॥ ७ ॥

राजोवाच।

ब्रह्मण्यानां वदान्यानां नित्यं वृद्धोपसेविनाम्।
विप्रशापः कथमभूद्वृष्णीनां कृष्णचेतसाम् ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

हरणमुनिप्रेषणादीनान्तैरुपायैः सुबहु ये पाण्डुसुताः दुर्योधनशकुन्युलूकदुःशासनजयद्रथादिभिः सपत्नैः कोपिताः तान् निमित्तं कृत्वा समेतान् नृपानितरेतरतो हत्वा ईशः क्षितिभारं निरहरत् जहार ईश इति पदं भगवतः स्वातन्त्र्यं सर्वस्य तदायत्तत्वं च द्योतयति ॥ २ ॥

क्षितिभारनिर्हरणानन्तरं किं कृतवानित्यपेक्षायामाह--भूभारेति। अप्रमेयः साकल्येन प्रमातुमशक्यः अनन्तस्वरूपगुण इत्यर्थः। स्वबाहुभिर्गुप्तैः परिरक्षितैः यदुभिः भूभारभूतानां राज्ञां पृतनाः निरस्य सुरांशैर्यादवैः असुरांशानां क्षत्रियाणां समूहान्विनाश्यित्वेत्यर्थः। अचिन्तयत् चिन्तामेवाह—मन्ये इति, अवनेर्भारः गत इत्यहं मन्ये। ननु शङ्कायां यतः अहो यादवं कुलमविषह्यमास्ते अतो अवनेर्भारमगतमपि मन्ये अवनौ यदुकुलं प्रवरं दृष्ट्वा तद्द्वेषवशात्पुनरप्यवनिभारभूता असुरा आपतेयुरितिभावः। अतो यादवं कुलं भूमेर्भूषणमप्यसुरापतनशङ्काजनकत्वात् कृतकार्यत्वाच्चोपसंहर्त्तव्यमिति ॥ ३ ॥

तत्संहारचिन्ताप्रकारमप्याह--नेति। अस्य यदुकुलस्य अन्यतोऽन्येभ्यः प्रतिभटेभ्यः किञ्चिदपि परिभवस्तिरस्कारः पराजयो नैव भवेत् तत्र हेतुमाह-विभवोन्नहनस्य विभवैर्विभवशस्त्रास्त्रादिभिः उन्नहनस्य समृद्धस्य तत्रापि हेतुं वदन् स्वकीयतया स्वयमपि हननमयुक्तमिति च सूचयन् यदुकुलं विशिनष्टि-मत्संश्रयस्येति। मां संश्रयते इति मत्संश्रयं तस्य अतोऽयमुपाय इत्याह-अन्तः कलिमिति। वेणुस्तम्बस्य अन्तर्मध्ये वह्निं तन्नाशहेतुमिव यदुकुलस्य मध्ये कलिं कलहं तत्संहारहेतुं विधाय शान्तिं प्रशमं "शान्तिः प्रशममङ्गले" इति यादवः। उपैमीति वर्त्तमानसामीप्ये वर्त्तमानवन्निर्देशः। उपैष्यामीत्यर्थः। तदनन्तरं धाम निर्ज्जलोकमुपैष्यामीत्यर्थः। यद्वा, शान्तम् मङ्गलं धामेति योज्यम् ॥ ४ ॥

भाषा टीका।

श्रीरुक्मिणीदेवीसमेतश्रीद्वारकाधीशाय नमः।
यो वेदान्त रहस्यस्य वेत्ता वेद्यः स्वयं हरिः।
तमुद्धवोपदेष्टारं रुक्मिणीशमहं भजे ॥
एकादशस्कन्धभावबोधिनीं भक्ततोषिणीम्।
भाषां भागवताचार्यः कुरुते हि यथामति ॥

श्रीबादरायणिरुवाच।

श्रीशुकदेव जी बोले, कि—हे राजन्! यदु लोग और बलदेव जी सहित श्रीकृष्णचन्द्र ने दैत्यों को मारकर भूमि के भार को उतारा, परंच ऐसा उपाय रचा कि—जिसमें थोडे ही काल में बडा हिंसा पर्यवसायी कलह पैदा हो ॥१॥ क्योंकि? वैरी दुर्योधनादिकों नें कपट की द्यूत क्रीडा, तिरस्कार, द्रौपदी के केश ग्रहण, इत्यादि दुष्ट चेष्टाओं से जिन पांडवों को कुपित किये रहे। उन्हीं पांडवों को निमित्त बनाकर चारों तरफ से परस्पर में इकट्ठे होनेवाले राजाओं को मरवाकर श्रीकृष्णचन्द्र परमात्मा ने भूमि के भार को दूर किया ॥२॥

सो किस प्रकार? कि—भूमि के भार रूप राजा लोगों की सेनाओं को अपने बाहु बल से रक्षित जो यदु लोग उन के द्वारा नष्ट कराकर, अप्रमेय श्रीकृष्ण महाराज विचार करते हुए, कि—अब मैं ऐसा समुझता हूं कि-भूमि का भार दूर होगया तौ भी नहीं दूर होने के ही सदृश है क्योंकि? यह बडा असह्य यदुकुल तौ बनाही है ॥ ३ ॥

और सदा वैभव से उच्छृंखल और मेरे आश्रय रहने वाले इस यदुकुल का अन्य किसी से पराभव नहीं होसक्ता है, इस लिये इसी कुलके बीच में कलह कराकर जैसे कि स्तम्ब (तृणविशेष) में अग्नि को डाल कर नष्ट कर देते हैं इसी प्रकार इस कुल का संहार कर मैं अपने शांत धाम को प्राप्त होऊं ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

व्यवसितः कृतनिश्चयः सञ्जह्रे उपसंहृतवान् ॥ ५ ॥
तदेवमवतारप्रयोजनं सर्वं सम्पाद्य स्वं लोकं जगामेत्याह

(१) वितन्वन्नञ्जसेति विज० पा०।

श्रीधरस्वामिकृतभावार्थदीपिका ।

श्लोकद्वयेन—स्वमूर्त्येति । लोकानां लावण्यस्य निर्मुक्तिस्त्यागो यया यामपेक्ष्य लोकेषु लावण्यं नास्तीत्यर्थः । यद्वा, लोकेभ्यो लावण्यस्य निर्मुक्तिर्दानं यतः यत्सम्पर्केण लोका लावण्यवन्तो भवन्तीत्यर्थः । तया स्वमूर्त्या नृणां लोचनमाच्छिद्याऽऽकृष्य ततोऽन्यस्यावलोकने लोचनस्याप्रवृत्तेः तथा स्वगीर्भिस्ता गिरः स्मरतां चित्तं चाऽऽच्छिद्य तथा पदैस्तत्र तत्राङ्कितैस्तानि पदानीक्षतामीक्षमाणानामन्यतो गमनादिकाः क्रियाश्चाऽऽच्छिद्य तदानीन्तनानां सर्वेषां चक्षुरादिप्रवृत्तीः स्वैकनिष्ठाः कृत्वेत्यर्थः ॥ ६ ॥

किञ्च, इत उपरि जनिष्यमाणानां संसारतरणाय कौ पृथिव्यां शोभनाः श्लोकाः सुश्लोकाः कवीनां यस्यां तां स्वकीर्तिं वितत्य विस्तार्यानया कीर्त्या अञ्जसा सुखेनैव नु निश्चितं तमस्तरिष्यन्तीत्यभिप्रेत्येश्वरः स्वं पदं स्थानमगादिति ॥ ७ ॥

अब्रह्मण्येभ्योऽदातृभ्यो वा असेवकेभ्यो वा विप्राः कुप्यन्ति वृष्णयस्तु न तथेत्याह, ब्रह्मण्यानामित्यादिना । किञ्च, कोपे जातेऽपि कृष्णचेतसां कथमभूत्कथं प्रादुरभूदित्यर्थः ॥ ८ ॥

———

श्रीराधारमणदासगोस्वामिकृतदीपिकादीपिनीटिप्पणी ।

तेषु शापासम्भवाच्छापव्याजेनेत्युक्तम् उपसंहृतवान् अन्तर्द्धापितवान् ॥ ५ ॥

स्वमूर्त्येति युग्मकम् । त्यागशब्दस्य मुख्यार्थासम्भवादामपेक्ष्यादिगौरवमत इत्यर्थं इत्युक्तम् एतादृशगौरवादेव यद्वेति यत् सम्पर्केण यस्या मूर्त्तेरवलोकनादिसम्बन्धेन तदुक्तं श्रीदशमे "तत्र प्रवयसोऽप्यासन् युवानोऽतिबलौजसः । पिबन्तोऽक्षैर्मुकुन्दस्य मुखाम्बुजसुधां मुहुः" इति ततः श्रीमूर्त्तेः तत्र तत्र गोकुलमथुराद्वारकादिस्थानेषु तदानीन्तनानाम् अवतारकालीनानां चक्षुरादिवृत्तीः दर्शनाद्याकाराः तात्पर्यार्थत्वादित्यर्थं इत्युक्तं यदि तटस्थानामपि भविष्यतां कीर्त्तिश्रवणमात्रेण तत्पदप्राप्तिस्तदा परिकराणां यदूनां सुतरामेवेति पूर्वसिद्धान्त एव व्यञ्जितः ॥ ६ ॥ ७ ॥

न तथाऽब्रह्मण्यादयो न किन्तु ब्रह्मण्यादय एवेत्यर्थः । प्रथमं तादृशेषु कोप एव न स्यात् कथञ्चिज्जातेऽपि कोपे इत्यपेरर्थः ॥ ८ ॥

———

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

॥ ५ ॥

स्वमूर्त्या लोकलावण्यमिति आच्छिद्येत्यन्वयः । निर्मुक्त्या कटाक्षमोक्षेण नृणां लोचनमाच्छिद्य पुंसां हृदयपहारी तत्कटाक्ष इत्यर्थः । ताः गिरः स्मरतां चित्तं गिरो मनोहारिण्य इत्यर्थः । पदैः पदन्यासैः मनोहारिभिः क्रियाः इतरविषयप्रवृत्तीराच्छिद्येत्यर्थः । सुश्लोकयां श्लाघनीयां कीर्त्तिं वितत्य विस्तार्य अनया कीर्त्या ॥ ६—८ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवमिति। हे राजन्! इत्थं व्यवसितः निश्चयवानीश्वरः अन्तःप्रविश्य निर——स्वकुलपश्चेति द्वयं हेतुगर्भम् मतो विप्राणामन्तरात्म-

यन्निमित्तं

तया शापमुत्पादितवानिति भावः । विप्राणां कर्तॄणां .यः शापस्तेन व्याजेन स्वकुलं यदुकुलं सञ्जह्रे विनाशितवान् ॥ ५ ॥

तदेवमवतारप्रयोजनं सर्वं सम्पाद्य स्वं लोकं जगामेत्याह द्वाभ्याम् स्वमूर्त्येति । निरतिशयलावण्यवत्या स्वमूर्त्या स्वादिव्यविग्रहेण लोकलावण्यमाच्छिद्य आकृष्यापहृत्येति यावत् त्रिलोक्यन्तर्गतस्य कृत्स्नस्य लावण्यस्य समुद्रे गोष्पदस्येवैतन्मूर्त्तिलावण्येऽन्तर्भूतत्वात्तन्मूर्त्तिदर्शनानन्तरं क्वापि लावण्यानवभासादिति भावः । तथा निर्मुक्त्या कटाक्षमोक्षेण नृणामालोकनमाच्छिद्य तत्कटाक्षमोक्षस्येतरकटाक्षमोक्षाभिभावुकत्वादिति भावः । गीर्भिर्वाग्भिस्ता गिरः स्मरतां चित्तमाच्छिद्येत्यर्थः । तच्चेष्टितानां चित्तापहारित्वादिति भावः । पदैस्तत्रतत्राङ्कितैः पदैस्तानि पदानीक्षताम् ईक्षमाणानां क्रियाः अन्यतो गमनादिक्रियाश्चापहृत्येत्यर्थः । तदानीन्तनानां चक्षुरादिप्रवृत्तीः स्वैकनिष्ठाः कृत्वेति समुदायार्थः ॥ ६ ॥

किञ्च इत उपरि जनिष्यमाणानां संसारतरणाय कौ पृथिव्य सुश्लोकयां सुगेयां सच्छ्लोकयामिति पाठे सद्भिर्गेयां कीर्त्तिं वितत्य विस्तार्य अनया कीर्त्या श्रवणस्मरणादिविषयया अञ्जसा सुखेनैव नु निश्चितं तमः तमःकार्यं संसारं तरिष्यन्तीत्यभिप्रेत्येश्वरः स्वपदं स्थानमगात् ॥ ७ ॥

शापव्याजेन विप्राणामित्युक्तं तत्र पृच्छति राजा—ब्रह्मण्यानामिति द्वाभ्याम् । वृष्णीनां ब्रह्म (विप्र) शापः कथमभूत्तेषां विप्रशाप इत्येतदत्यन्तासम्भावितमिति भावः । तत्र हेतुत्वेन तान् विशिनष्टि, ब्रह्मण्यानां ब्रह्मणि ब्रह्मकुले साधवो ब्रह्मण्या नित्यं ब्राह्मणसम्मानशीलानां कथं विप्रशाप इति भावः । ननु, ब्रह्मण्यानामपि लुब्धानां स सम्भाव्यतां तत्राह वदान्यानामिति नन्वेवमपि सत्सङ्गत्यभावप्रयुक्तमहदतिक्रमात्सम्भाव्यतां तत्राह नित्यं वृद्धोपसेविनामिति आस्तामेते गुणाः अयमेक एव तदसम्भावनायामलमित्याशयेन विशिनष्टि—कृष्णचेतसामिति । कृष्णे चेतो येषां तेषां "न वासुदेवभक्तानामशुभं विद्यते क्वचित्" इत्याद्यभियुक्तोक्तेरिति भावः ॥ ८ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

चिन्ताफलमाह—एवमिति ॥ ५ ॥

पुनर्हरिणा किमकारीत्यत्राह—स्वमूर्त्येति । ईश्वरः स्वपदमगादित्यन्वयः किं कृत्वेति लोकलावण्येषु समुदितेषु या बहुमानबुद्धिः तस्या निर्मुक्तिर्यया सा तथा तया स्वमूर्त्या नृणां लोचनम् आच्छिद्य आकृष्य गीर्भिः सह तां मूर्तिं स्मरतां नृणां चित्तमाच्छिद्य पदैः पादन्यासैः तां पश्यतां जनानां क्रियाः कर्माण्याच्छिद्य यद्वा, पादसौन्दर्यादिगुणनिमग्नानाम् अन्यक्रियासु मनो न चलतीति तामीक्षतां पदैराच्छिद्य ॥ ६ ॥

कौ भूमौ सुष्टुश्लोकः स्तुतिर्यस्याः सा सुश्लोका तां कीर्तिम् अञ्जसा तत्त्वेन वितन्वन् विस्तारयन् किं प्रयोजनमत्राह,—तम इति । अनया कीर्त्या तमस्तरिष्यन्तीति कृत्वा ॥ ७ ॥

श्रुतविप्रशापो राजा यदूनां असम्भावितोयमिति भावेन पृच्छति—ब्रह्मण्यानामित्यादिना । शापासम्भवे ब्रह्मण्यादित्रयो हेतवः ॥ ८ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

विप्राणां शापव्याजेनेति ब्राह्मणमाहात्म्यदर्शनमप्यत्र प्रयोजनमिति भावः । सञ्जह्रे पूर्वोक्तस्वपदे सामस्त्येन नीतवान् प्रवेशितवानित्यर्थः ॥ ५ ॥

तदीदृशं यत्पदं तदेव श्रीदशमस्कन्धोक्तलीला महाश(भ)क्ति-प्राप्तिपूर्वकं फलमित्याह–स्वमूर्त्येति युग्मकेन । तमस्तदज्ञानमयः संसारः तरिष्यन्ति तीर्त्वा तत्पदस्प्राप्स्यन्तीत्यर्थः । तदेवं तत्-स्थानामप्येवमवस्थाचेत्तर्हि सुतरां यादवानामभवादिति भूभारेत्यत्र दर्शित एव सिद्धान्तः स्थापितः ॥ ६ ॥ ७ ॥

अथ यो विप्रशापव्याजः कृतः स एव न सम्भवति दोषा-सम्भवादित्याह ·ब्रह्मण्यानामिति । विप्राणां विदुषां तत्तया श्रीभग-वदात्मीयजनपरिभवदोषमपि जानतां तेषां शापः कथमभूदि-त्यर्थः । तदात्मीयत्वमेवाह–वृष्णीनां कृष्णचेतसामिति । तच्छापा-प्रभुत्वेपि हेतुरयम् ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

एवमेव व्यवसितं मनोनिश्चयो यस्य सः शापव्याजेन विप्राणामिति ब्राह्मणमाहात्म्यप्रख्यापनमप्येकमेव प्रयोजनमिति भावः ॥ ५ ॥

तदेवं स्वाविर्भावप्रयोजनं सर्वं सम्पाद्यान्तरधादित्याह, लोकेभ्यो लावण्यस्य निर्मुक्तिस्त्यागो दानं यतस्तथा मूर्त्या पश्यतां लोचनमाच्छिद्येति ततोऽन्यस्यावलोकने लोचनस्याप्रवृत्त्या लोचनेन्द्रियमपहृत्येत्यर्थः । तथा स्वगीर्भिस्ता गिर आच्छिद्येति वागि-न्द्रियापहार उक्तः वागिन्द्रियरहितानां च कर्णेन्द्रियाभावदर्श-नात् गीर्भिः कर्णेन्द्रियं वागिन्द्रियं चापहृत्येत्यर्थः । तथा स्मरतां चित्तम् आच्छिद्य तथैव पदैश्चरणचिन्हैस्तानि ईक्षतामीक्षमाणानां अन्यतो गमनादिकाः क्रियाश्चाच्छिद्याकृष्य गृहीत्वा अगात् (अगमत्) कृष्णोऽवतीर्य नृणां चक्षुरादिसर्वस्वं हृत्वा तानन्धमूक-बधिरोन्मत्तजडानेवाकरोदित्यतः कस्तं दयालुं वदेन्महाचौर एव स इति व्याजस्तुतिः । वस्तुतस्तु दैत्येभ्योपि संहृत्य मुक्तिं ददौ तदन्येभ्यस्तु स्वसौन्दर्य्यादिलावण्यसिन्धौ निमज्य प्रेमाण-मेव ददावित्येतावान् निरुपाधिर्दयालुर्नास्ति कोपीति भावः । किञ्च शोभनाः श्लोकाः कवीनां यत्र तां वितत्य विस्तार्य अतः परं कौ पृथिव्यां जनिष्यमाणा जनाः तमः संसारसमुद्रम् अनया नौकयेव सुखेन तरिष्यन्तीति मत्वैवागादिति भविष्यज्जनेष्व-प्येतावती दयेति भावः । स्वम्पदं स्वीयं व्यवसायम् अगात् "पदं व्यवसितित्राणस्थानलक्ष्माङ्घ्रिवस्तुषु" इत्यमरः । सपादशत-वर्षान्ते सर्वस्मिन्नेव स्वीयचिकीर्षिते निष्पन्ने सति साम्प्रतं प्रापञ्चिकलोकादृश्यो भविष्यामीत्युपस्थितो यः स्वव्यवसायस्तं प्रापेत्यर्थः । ननु सर्वांशेनैव स्वीयं पदं प्रसिद्धवैकुण्ठम् अगादिति व्याख्यातुं शक्यं तस्य द्वारकादिधामत्रयनित्यविहारित्वस्य पूर्वस्कन्धान्ते व्याख्यातत्वादेतत्स्कन्धान्ते च श्रुतिस्मृत्यादि प्रमाणतो व्याख्यास्यमानत्वाच्च तृतीयादावुद्धवोक्तौ च कृष्ण-द्युमणि निम्लोच इत्यत्राजोपि जातो भगवान् यथाग्निरित्यत्र च द्युमण्यादिदृष्टान्तेन तस्य द्वारकादिस्वधामत्यागाभावस्य दृढी-कृतत्वाच्च ॥ ६ ॥ ७ ॥

एकात्मनाम् एकमनसां तेषां भेदः संहारहेतुः कलहः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

'एवमुक्तप्रकारेण व्यवसितः कृतनिश्चयः सत्यसङ्कल्पः विप्राणां शापव्याजेन शापार्थं विप्रप्रेरणे सामर्थ्यं द्योतयति, विभुः सर्वगः ईश्वरः सर्वनियन्ता स्वकुलं सञ्जह्रे उपसंहृतवान् ॥ ५ ॥

स्वाविर्भावप्रयोजनं विधाय निजलोकं गतवानित्याह, स्व-मूर्त्येति श्लोकयुग्मेन । लोचनवद्भ्यो लोकेभ्यो लावण्यसौन्दर्य्यस्य निर्मुक्तिर्वृष्टिर्यस्याः सकाशात्तया स्वीयया स्वासाधारणया मूर्त्या "यदात्मको भगवांस्तदात्मिका व्यक्तिः" इत्यादिश्रुतिप्रसिद्धया तामीक्षमाणानां नृणां लोचनं लोचनानि स्वासाधारणाभि-र्गीर्भिः तास्तदीयाः गिरः स्मरतां चित्तं च पदैस्तत्र तत्र विलि-खितैः ईक्षतां क्रियाः गतयश्च ॥ ६ ॥

आच्छिद्य आकृष्य श्रावयितारः श्रोतारश्च अनया मदीयया कीर्त्या अञ्जसा सुखेनैव नु निश्चितं तमः संसारं तरिष्य-न्तीति सङ्कल्प्य सुष्ठु श्लोकाः मुनीनां यस्यां तां कीर्तिं च कौ भूमौ वितत्य विस्तार्य ईश्वरः सर्वनियन्ता स्वपदं स्वकीयं स्थान-मगात् ॥ ७ ॥

"शापव्याजेन विप्राणां सञ्जह्रे स्वकुलं विभुः" इत्युक्तम् तत्र अब्रह्मण्यानामवदान्यानामवृद्धसेविनां कृष्णपराङ्मुखानां च विप्र-शापः प्रादुर्भवति तद्विपरीतानां वृष्णीनां विप्रशापः कथमभूदिति पृच्छति–ब्रह्मण्यानामित्यादिना । ब्रह्मण्यानां ब्राह्मणेभ्यः हितकृतां वदान्यानामत्युदाराणां वृद्धाः ज्ञानेन वयसा तपसा च श्रीनारदादयः तदुपसेविनां मुख्यं तेषां शापाविषयत्वं दर्शयितुं तान्विशिनष्टि–कृष्णचेतसां वृष्णीनां विप्रशापः कथमभूत् ? ॥ ८ ॥

भाषा टीका ।

हे राजन् ! सत्यसंकल्प ईश्वर श्रीकृष्णचन्द्र ने इस प्रकार विचार कर ब्राह्मणों के शाप के मिष से अपने यदु कुल का संहार किया ॥ ५ ॥

लोकोत्कृष्टलावण्य वाली अपनी श्रीमूर्त्ति से मनुष्यों के नेत्रों को, तथा, अपनी मधुर वाणी से उन वाणियों के स्मरण करने वाले मनुष्यों के चित्त को, तथा अपने चरणों से अथवा चरण चिन्हों से उनके दर्शन करने वालों की गमनादि क्रियाओं को छीनकर, तथा कविजनों से प्रशंसनीय उत्तम कीर्त्ति का भूमि में सुख पूर्वक विस्तार कर, इस हमारी कीर्त्ति से हमारे अनुरक्त भक्तजन संसार को तर जावेंगे इस प्रकार विचार कर श्रीकृष्ण भगवान् अपने निजधाम को जाते हुए ॥ ६—७ ॥

(१)यन्निमित्तः स वै शापो यादृशो द्विजसत्तम ! ।
कथमेकात्मनां भेद एतत्सर्वं वदस्व मे ॥ ९ ॥

श्रीशुक उवाच ।

बिभ्रद्वपुः सकलसुन्दरसन्निवेशं कर्माचरन् भुवि सुमङ्गलमाप्तकामः ।
आस्थाय धाम रममाण उदारकीर्तिः संहर्तुमैच्छत कुलं स्थितकृत्यशेषः ॥१०॥
कर्माणि पुण्यनिवहानि सुमङ्गलानि गायज्जगत्कलिमलापहराणि कृत्वा ।
कालात्मना निवसता यदुदेवगेहे पिण्डारकं समगमन् मुनयो निसृष्टाः ॥ ११ ॥
विश्वामित्रोऽसितः कण्वो दुर्वासा भृगुरङ्गिराः ।
कश्यपो वामदेवोऽत्रिर्वसिष्ठो नारदादयः ॥ १२ ॥
क्रीडन्तस्तानुपव्रज्य कुमारा यदुनन्दनाः ।
उपसंगृह्य पप्रच्छुरविनीता विनीतवत् ॥ १३ ॥
ते वेषयित्वा स्त्रीवेषैः साम्बं जाम्बवतीसुतम् ।
एषा पृच्छति वो विप्रा अन्तर्वत्न्यसितेक्षणा ॥ १४ ॥
प्रष्टुं विलज्जती साक्षात् प्रब्रूताऽमोघदर्शनाः ! ।
प्रसोष्यन्ती पुत्रकामा किंस्वित्सञ्जनयिष्यति ॥ १५ ॥
एवं प्रलुब्धा मुनयस्तानूचुः कुपिता नृप ! ।
जनयिष्यति वो मन्दाः ! मुसलं कुलनाशनम् ॥ १६ ॥

भाषा टीका ।

राजो वाच ॥

राजा परीक्षित् बोले, कि—हे ब्रह्मन् ! ब्राह्मणों का सत्कार करने वाले, वदान्य और सदा वृद्धों की सेवा करने वाले, तथा श्रीकृष्ण में चित्त लगाने वाले, ऐसे यदु लोगों को ब्राह्मणों का शाप कैसे हुआ ? ॥ ८ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

अतः स्पष्टस्य निमित्तस्याभावान्निमित्तान्तरं पृच्छति–यन्निमित्त इति । एकात्मनामेकचित्तानां कथं भेदः कलहः ॥ ९ ॥

ईश्वरेच्छैवात्र निमित्तमिति परिहरति–बिभ्रदिति । सकलानां सुन्दरवस्तूनां सन्निवेशो विन्यासविशेषो यस्मिंस्तद्वपुर्बिभ्रत् तर्हि किमिति सौन्दर्याद्विषयपरः ? न सुमङ्गलं कर्माचरन् तत्किं कयापि कामनया ? न आप्तकामः तर्हि किमिति कर्माचरति ? धाम द्वारवत्याख्यं गृहमास्थाय रममाणः गृहे रममाणान्कर्म ग्राहयितुमित्यर्थः । ननु, किमाप्तकामस्य गृहरत्या कर्मभिर्वा तत्राऽऽह, उदारकीर्तिः उदारा बहुफलप्रदा कीर्तिर्यस्य सः कीर्तिवितानार्थमित्यर्थः । एवं परमैश्वर्येण वर्तमान एव कुलं संहर्तुमैच्छत् तत्कस्य हेतोः ? स्थितः कृत्ये भूभारहरणे शेषो यस्य सः ॥ १० ॥

ईश्वरेच्छयोत्थितं ब्रह्मशापनिमित्तं वक्तुमाह—कर्माणीति । कर्मार्थमाहूताः कर्माणि कृत्वा विसृष्टा मुनयः पिण्डारकं समगमन्नित्यन्वयः । निसृष्टाः प्रस्थापिताः पूर्वोक्तामुदारकीर्तितां विवृण्वन्कर्माणि विशिनष्टि—पुण्यनिवहानीत्यादिभिस्त्रिभिःपदैः । कानिचिदश्वमेधादिकर्माणि पुण्यमेव जनयन्ति पुत्रोपलालनादीनि तु तत्काले सुखमेव कुर्वन्ति प्रायश्चित्तादीनि तु पापमेव हरन्ति एतानि तु सर्वतोमुखानीत्याह-पुण्यनिवहानि कीर्तनादिना पुण्यानि निवहन्ति प्रापयन्तीति तथा सुमङ्गलानि अतिसुखात्मकानि गायतो जगतः कलिमलापहराणि कृत्वा मुनिप्रस्थापने हेतुः कालात्मना संहाररूपेण यदुदेवगेहे वसुदेवगृहे निवसता स्वकुलं संजिहीर्षतेत्यर्थः । पिण्डारकं ततो नातिदूरं तीर्थविशेषम् ॥ ११—१२ ॥

उपसंगृह्य पादग्रहणं कृत्वा ॥ १३ ॥

प्रश्नप्रकारमाह–ते वेषयित्वेति, द्वयेन । हे अमोघदर्शना विप्राः ! एषा अन्तर्वत्नी गर्भिणी ॥ १४ ॥

(१) यन्निमित्तो यदोः शाप इति विज० पा० ।

श्रीधरस्वामिकृतभावार्थदीपिका ।

यो युष्मान् साक्षात्प्रष्टुं विलज्जती लज्जमानाऽस्मन्मुखेन पृच्छति प्रसोष्यन्ती आसन्नप्रसवा किंस्वित्सञ्जनयिष्यति ? कन्यां वा पुत्रं वा तत् प्रब्रूत ॥ १५ ॥

प्रलब्धा वञ्चिताः ॥ १६ ॥

———

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी ।

अतः ब्रह्मण्यत्वादेः स्पष्टस्य निमित्तस्य दुराचारादेः ॥ ९ ॥

अत्र विप्रशापे ईश्वरस्य कृष्णस्येच्छैव परम्परया निमित्तमिति परिहरति—परीक्षिदाक्षेपं समाधत्ते—बिभ्रत् प्रकटयन् तत्सुमङ्गलकर्माचरणं तत् संहरणेच्छुत्वम् ॥ १० ॥

निमित्तं ब्राह्मणानां परीक्षार्थं कापट्येन प्रश्नरूपं कर्मार्थं यागाद्यर्थं कर्माणि दर्शनस्पर्शनसंलापादि चरित्राणि तैर्विप्रैः सह कृत्वेति व्याख्येयम् अन्यथा विशेषणासङ्गतिः स्यात् वैदिककर्मभ्यो वैलक्षण्यं द्योतयितुं स्वैरचरित्रात्मकानि कर्माणि विशिनष्टि—विशेषणैर्वर्णयति एतानि कृष्णकर्माणि सर्वतोमुखानि त्रिभिरपि विशेषणैर्विशिष्टानि ॥ ११ ॥

विश्वामित्र इति युग्मकम् । अविनीता इति कृष्णेच्छयैव तदानीमेव तथाभूता इति ज्ञेयम् । स्त्रीवेषैः स्त्र्युचितवस्त्रालङ्कारादिपरिधापनैः ॥ १२—१४ ॥

अमोघदर्शनाः ! यथार्थज्ञानाः तत् कन्याजननं पुत्रजननम् ॥ १५ ॥

कुपिता इत्यत्रापि भगवदिच्छैव मुख्या हेतुरन्यथा कृष्णनन्दनेषु महाभागवतानां तेषां कोपासम्भवात् हे नृपेत्याश्चर्येण सम्बोधनम् ॥ १६ ॥

———

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

एकात्मनाम् अन्योन्यमैकमत्यं प्राप्तानां भेदः अन्तरभेदः ॥ ९–१० ॥

निसृष्टाः भगवत्सङ्कल्पप्रेरिताः ॥ ११—२३ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यदि कथञ्चित्प्राप्तः स तर्हि विप्रशापः यन्निमित्तः यन्निमित्तं कारणं यस्य सः हे द्विजसत्तम ! एकात्मनामन्योन्यमैकमत्यं प्राप्तानां वृष्णीनां कथं भेदः कलहः प्रवृत्तः । यद्वा, एकात्मनामित्यस्य विप्राणामिति विशेष्याध्याहारः एकात्मनां सार्वात्म्यब्रह्मोपासनेन सर्वत्र समचित्तानाम् ऋषीणां कथं भेदः यदुषु निग्रहनिदानभूतभेददृष्टिः कथमभूदित्यर्थः । एतत्सर्वमेतस्मिन्मत्पृष्टे सर्वं प्रतिवक्तुमर्हं मह्यं वदस्व ॥ ९ ॥

स्वकुलं सञ्जिहीर्षोः सर्वान्तरात्मनो भगवतः श्रीकृष्णस्य सङ्कल्पादेव विप्रशापोऽभूदित्याह श्रीशुकः—कृत्वेति । सुन्दरेति भावप्रधानो निर्देशः सकलस्य सुन्दरस्य सौन्दर्यस्य सन्निवेशो यस्मिँस्तत्सुमङ्गलं वपुः कृत्वा धृत्वा बिभ्रदिति पाठान्तरं तदा विप्राणाः कर्म अदैवममानुषं च चेष्टितमाचरन् कुर्वन् सुमङ्गलमिति कर्मविशेषणं च स्मरतां सुमङ्गलावहमित्यर्थः । अत एवोदारा विपुला कीर्तिर्यस्य सः धाम द्वारवत्याख्यं स्थानमास्थायाऽधिष्ठाय आप्तकामोऽपि रममाणः स्थितः कृत्यस्य भूभारापहरणात्मकस्य शेषो यस्य सः कुलं यदुकुलं संहर्तुमैच्छत् ॥ १० ॥

कर्माणीति पुण्यनिवहानि पुण्यानि निवहन्ति प्रापयन्तीति तथा न केवलं तथा भूतान्येवापितु गायतां जगतां सत्कालिमलं कलियुगप्रयुक्तं पापं तदपहरन्तीति तथाऽत एव सुमङ्गलानि केवलसुखैकनिदानानि कर्माणि चेष्टितानि कृत्वा वसुदेवस्य गेहे निवसता कालात्मना कालशरीरकतया संहारकेण भगवता विसृष्टाः प्रचोदिताः भगवत्सङ्कल्पप्रेरिता इत्यर्थः । मुनयः पिण्डारकं तीर्थविशेषं द्वारवतीसमीपस्थं समगमन् सम्यग्भगवद्दर्शनजहर्षयुक्ताः ययुरित्यर्थः ॥ ११ ॥

के ते ? इत्यत्राह–विश्वामित्र इति । नारदादयोऽन्ये च ॥ १२ ॥

क्रीडन्त इति तत्र पिण्डारकान्तिके क्रीडन्तः तान् मुनीन् उपव्रज्य समीपमेत्य उपसङ्गृह्य पादसङ्ग्रहणं कृत्वा स्वयमविनीता अपि विनीतवत्पप्रच्छुः ॥ १३ ॥

ते वेषयित्वेत्याद्यर्थमर्थक्रमादुपसङ्गृह्येत्यतः प्राग्योज्यम् ते प्रसिद्धाः प्रश्नमेवाह—एषेति । हे विप्राः ! एषाऽसितेक्षणाऽङ्गना अन्तर्वत्नी गर्भिणी पुत्रकामा प्रसोष्यन्ती प्रसविष्यमाणा च स्वयम् साक्षाद्युष्मान् प्रष्टुं विलज्जन्त्यस्मन्मुखेन पृच्छति यूयं त्वमोघदर्शनाः अमोघं सत्यं दर्शनं येषां ते सर्वज्ञा इत्यर्थः । अतः किंस्विज्जनयिष्यति किं कन्यामुत पुत्रं वा तत् प्रब्रूत ॥ १४ ॥ १५ ॥

एवं प्रलुब्धाः वञ्चिताः अवहेलिता इति यावत् अत एव कुपितास्तान् यदुकुमारानूचुः किमिति, ? हे मन्दाः वो युष्माकं कुलं नाशयतीति तथा तं मुसलं जनयिष्यतीति ॥ १६ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यदोः कुलस्य यन्निमित्तः किन्निमित्तः यादृशः कीदृशः एकात्मनाम् एकमनस्कानां भेदो मिथो वैलक्षण्यः ॥ ९ ॥

शुकः प्रश्नं प्रवदन् पुनरुक्तं करोति–बिभ्रदित्यादिना । सकल सुन्दरगुणानां सन्निवेशं धाम निधानस्थानं गृहमास्थाय गृहे स्थित्वेत्यर्थः ॥ १० ॥

प्रश्नं परिहरति–कर्माणीति । पुण्यनिवहानि पुण्यकारणानि वसुदेव उग्रसेनस्तस्य गेहे उग्रसेनाधिकृतद्वारवत्यां निवसता कालात्मना कृष्णेन निसृष्टाः प्रेरिताः पिण्डारकम् क्षेत्रं प्राप्ता इत्यन्वयः ॥ ११ ॥ १२ ॥

उपसंगृह्य साञ्जलिमिति शेषः ॥ १३ ॥

अन्तर्वत्नी गर्भिणी असितेक्षणा नीलनेत्रा ॥ १४ ॥ १५ ॥

प्रलब्धाः वञ्चिताः " सद्यार्थे सहसा हेतुशून्ये युक्तेऽपि साम्प्रतम् " इति यादवः । हे मन्दाः ! निर्भाग्याः ॥ १६ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

कथमिति यथाचेत्यर्थः । एकः कृष्ण एवात्मा परमप्रेष्ठः परम-प्रवर्त्तकश्च येषाम् ॥ ९ ॥

सर्वत्र कारणं भगवदिच्छैवेति यद्यपि तदिच्छायाः कारणान्तर-मप्याह—बिभ्रदिति । सकलानां सुन्दरवस्तूनां सन्निवेशो यस्मिन् तादृशं वपुर्भुवि बिभ्रत् प्रकटयन् समङ्गलं च कर्म भुव्याचरन् आप्त कामः तेन तेन निजभक्तजनानामभीष्टदानात्सिद्धमनोरथो जातः तदनन्तरं च धाम प्रपञ्चान्तिप्रकाशतत्तन्निजधामैवावस्थायाधिष्ठाय रमणहेतोः कुलं संहर्तुं तत्रैव सम्यङ्मेनुमैच्छत् नन्वाप्तकामश्चे-त्पुनः किमन्यत्कांक्षितव्यम्? तत्राह—स्थितः सर्वदा स्थायी कृष्णशेषः स्वप्रेष्ठजनैः सह लीलाविशेषो यस्य सः अवतारगतलीलेच्छेव पूर्णा ननु सर्वैरेवेत्यर्थः । अत एवोदारा भक्तसुखदस्वभाव-मयी कीर्तिर्यस्य सः ॥ १० ॥

कालोऽन्तर्यामी आत्मा रूपं यस्येति सर्वस्य तदिच्छाधीनत्वं दर्शितम् ॥ ११ ॥

विश्वामित्रेति युग्मकम् । प्रविनीता इति तदिच्छयैव तदानीं तथाभूता इत्यर्थः ॥ ११—१५ ॥

कुपिता इति, कुपिता इव सत्य च नदिच्छयैव हेतुः मुसलं जनयिष्यति असम्भवमपि तदुत्पादयिष्यति ॥ १६ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

॥ ९-१० ॥

ततश्च प्रभुः प्रथमं ब्रह्मशापप्रकारं समर्जेत्याह—कर्माणि अश्वमेधादिकानि कृत्वा तदर्थमाहूता मुनयो दक्षिणादिभिः प्रीणयित्वा पिण्डारकं तत्समीपवर्तितीर्थविशेषं निसृष्टाः प्रस्थापिताः कालात्मना एषां यादवानामुपसंहारे प्रथमेव प्रकार इति कालस्वरूपेण स्वकुलं सञ्जिहीर्षुणा ॥ ११ ॥ १२ ॥

उपसंगृह्य पादग्रहणं कृत्वा ॥ १३ ॥ १४ ॥

किंस्वित् कन्यां पुत्रं वा ॥ १५ ॥

प्रलुब्धा ज्ञानपरीक्षया उपहसिताः ॥ १६—१८ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तस्माच्छापानर्हाणां वृष्णीनां स्फुटं शापनिमित्तं शापस्वरूपं यथोक्तम् "अन्तःकलिं यदुकुलस्य विधाय" इति तत्रैकमनस्कानां कथं कलिरिति च पृच्छति—यन्निमित्तमिति । एकात्मनामेकमनस्कानां भेदः कलिः ॥ ९ ॥

श्रीकृष्णेच्छैव शापे एकात्मनां भेदे च निमित्तमिति "जन-यिष्यति वो मन्दाः ! मुसलं कुलनाशनम्" इति शापस्वरूपं चाह, बिभ्रदित्यादिना । ध्यातृणां शोभनानि मङ्गलानि यस्मात्तत्सुमङ्गलं सकलं सुन्दराणां साङ्गोपाङ्गरूपाणां श्रीमत्पादादीनाम् अव-यवानां सन्निवेशो यस्मिन् तद्वपुः ध्यातृणामुपकाराय बिभ्रत् उदारा श्रोतृश्रावयितॄणां निरतिशयफलप्रदा कीर्तिर्यस्य सः स्वय-माप्तकामः कर्मतत्फलनिरपेक्षोऽपि भुवि कर्माणि लोके धाम गृह-मास्थाय लोकसङ्ग्रहाय कर्माचरन् यथोचितं रममाणः स्वानन्य-शरणैर्विहरन् स्थितः कृत्येषु मदनुग्रहामन्निग्रहादिषु स्वकुल-संहाररूपः शेषो यस्य सः कुलं स्वकृतं संहर्तुमैच्छत् अने-नैवैकात्मनां कुलविनाशहेतुर्भेदोऽपि भगवदिच्छयैवेति सूचि-तम् ॥ १० ॥

वसुदेवगेहे वसुदेवः उग्रसेनः तस्य गेहे तदधिकृतायां द्वार-कायाम् वसुदेवगृहे वा निवसता भगवता कर्मार्थमाहूताः मुनयः कर्माणि कृत्वा निसृष्टाः प्रस्थापिताः पिण्डारकं तत्रैव तीर्थ-विशेषं समगमन् भगवल्लीलायाङ्कालस्याकिञ्चित्करत्वं द्योतयितुं भगवन्तं विशिनष्टि—कालात्मना कालस्य शक्तिभूतस्यात्माश्रयः तेन कालस्वशक्तिमतेत्यर्थः । भगवत्कर्मणां भुक्तिमुक्तिप्रदत्वं भुक्ति-मुक्तिविरोधिकलिमलापहरत्वं च दर्शयितुं तानि विशिनष्टि—गायतो जगतः उपश्रण्वतोऽपि भगवत्कर्मकीर्तना-दिना प्राणिमात्रस्य कृतकृत्यता न केवलं वर्णाश्रमधर्मनिष्ठस्यै-वेति द्योतयितुं जगदित्युक्तं कलिमलानि अपहरन्तीति कलिमला-पहराणि कीर्तनादिना पुण्यानि भक्तिमुक्तिबीजभूतानि निवहन्ति प्रापयन्तीति पुण्यनिवहानि कीर्तनादिपराणां सुष्ठु मङ्गलानि येभ्यः तानि सुमङ्गलानि ॥ ११—१२ ॥

उपसङ्गृह्य साम्बमिति शेषः उपगम्य मुनीनां समीपे गत्वा तान् पप्रच्छुः प्रश्नमेवाह—ते इति द्वाभ्याम् । हे अमोघदर्शनाः! हे सफलदर्शनाः एषा असितचक्षुः कृष्णनेत्रा अन्तर्वत्नी गर्भिणी तथापि प्रजोष्यन्ती आसन्नप्रसवा वः युष्मान् साक्षात्प्रष्टुं विल-ज्जतीति विशेषतो लज्जां कुर्वाणा अतः अस्मद्द्वारा पृच्छति—किंस्वि-त्सञ्जनयिष्यति सद्भूताति द्वयोरन्वयः ॥ १३—१५ ॥

प्रलुब्धा वञ्चिताः हे मन्दाः! अल्पमतयः वः युष्माकं कुलनाशनं मुसलं जनयिष्यति ॥ १६ ॥

———

भाषा टीका ।

हे द्विज श्रेष्ठ ! जिस निमित्त से और जैसा वह शाप हुआ, सो आप कहिये । तथा एक चित्त वाले यदु लोगों का परस्पर में भेद भाव अर्थात् कलह कैसे भया ? ॥ ९ ॥

श्रीशुक उवाच ।

श्रीशुकदेवजी बोले, कि—सम्पूर्ण अङ्ग प्रत्यङ्ग सौष्ठव वाले शोभा की खानि ऐसे अपने श्रीविग्रह को धारण करते हुए, तथा अवाप्तसमस्तकाम होकर भी पृथिवी में मंगल रूप कर्मों का आचरण करते हुए, श्रीद्वारका धाम में स्थित होकर परम उदार कीर्ति वाले श्रीकृष्ण, रमण करते २ अपने कुल के संहार की इच्छा करते हुए. क्योंकि ? कुछ अभी देवताओं का कार्य अवशिष्ट रहा है जिसके लिये आप का प्रादुर्भाव हुआ है ॥ १० ॥

गान करने वालों के कलिमल को हरने वाले पुण्य को प्राप्त करने वाले ऐसे मांगलिक कर्मों का आचरण कर, कालात्मक होकर वसुदेवजी के घर में रहने वाले, ऐसे श्रीकृष्ण-चन्द्र भगवान् की प्रेरणा से मुनि लोग द्वारिका के समीप वर्त्ति पिंडारक क्षेत्र को जाते हुए ॥ ११ ॥

कौन २ मुनि लोग रहे, कि—विश्वामित्र असित कण्व

तच्छ्रुत्वा तेऽतिसन्त्रस्ता विमुच्य सहसोदरम् ।
साम्बस्य ददृशुस्तस्मिन् मुसलं खल्वयस्मयम् ॥ १७ ॥
किं कृतं मन्दभाग्यैर्नः किम्वदिष्यन्ति नो जनाः ।
इति विह्वलिता गेहानाऽऽदाय मुसलं ययुः ॥ १८ ॥
तच्चोपनीय सदसि परिम्लानमुखश्रियः ।
राज्ञ आवेदयाञ्चक्रुः सर्वयादवसन्निधौ ॥ १९ ॥
श्रुत्वाऽमोघं विप्रशापं दृष्ट्वा च मुशलं नृप !
विस्मिता भयसन्त्रस्ता बभूवुर्द्वारकौकसः ॥ २० ॥

भाषा टीका ।

दुर्वासा भृगु अंगिरा कश्यप वामदेव अत्रि वसिष्ठ और नारदादिक बहुत से रहे ॥ १२ ॥

यदु लोगों के कुमार खेलते २ मुनि लोगों के समीप जाकर चरण छूकर अविनीत होकर भी बड़े नम्र सरी के बनकर मुनि लोगों से पूंछते हुए ॥ १३ ॥

ये सब यदु कुमार जाम्बवती के पुत्र साम्ब को स्त्री के वसन भूषण पहिनाकर, स्त्री का वेष बनाकर मुनि लोगों के समीप जाकर बोले, कि—हे विप्रो ! यह कृष्ण कटाक्ष वाली स्त्री गर्भवती है, और आप लोगों से पूँछती है ॥१४॥

परंच साक्षात् आप लोगों से पूँछने में लज्जा करती है, इससे आप दिव्यदृष्टि वाले हैं आप लोग कहिये तौ कि—यह पुत्र की कामना वाली है पर क्या जनैंगी सो आप लोग कथन कीजिये ॥ १५ ॥

हे राजन् ! इस प्रकार जब यदु कुमारों ने उन को बहँकाये तब वे मुनि लोग कुपित होकर बोले, कि—हे मन्द हो ! यह तुमारे कुल के नाश करने वाले मूसल को पैदा करेगी ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तस्मिन्नुदरे अयस्मयं लोहमयम् ॥ १७ ॥

मन्दभाग्यैर्नोऽस्माभिः किमेतत्कृतम् ? नोऽस्मान् किम्वदिष्यन्तीति विह्वलिताः सन्तो मुसलमादाय गेहान् ययुः ॥ १८ ॥

राज्ञे उग्रसेनाय न तु श्रीकृष्णाय ॥ १९—२० ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी ।

तच्छ्रापात्मकं वाक्यं विमुच्य उच्छूनवस्त्रसङ्घात् पृथक्कृत्य साम्बस्य सभारत्वेन ससंशयवचनत्वादिति भावः । तस्मिन् मुसलाभाववति उदरे खल्विति विस्मये अयस्मयं व्याप्यशक्त्या लोहमयम् ॥ १७ ॥

किं कर्तास्मीति भीतानां पश्चात्तापवाक्यम् ॥ १८ ॥

उग्रसेनायेत्यपि श्रीकृष्णोपलक्षणमेव ॥ १९ ॥

अमोघमव्यर्थं तादृशापकार्यं मुसलञ्च दृष्ट्वा ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तच्छ्रुत्वेति । तन्मुनिवचः श्रुत्वा ते यदुकुमारा अतीव सन्त्रस्ताः सहसा आशु साम्बस्योदरं विमुच्य तस्मिन्नुदरे अयस्मयम् लोहमयं मुसलं ददृशुः ॥ १७ ॥

मन्दभाग्यैरस्माभिः किम् एतत्कृतं नोऽस्माकं जनाः नोऽस्मान् प्रति किं वदिष्यन्तीत्येवं विह्वलिताः विशकलितचित्ताः सन्तो मुसलमादाय गेहान् ययुः ॥ १८ ॥

ततस्तं मुसलं सदसि राजसभायाम् उपनीय परिम्लाना मुखश्रीर्येषां ते सर्वेषां यादवानां सन्निधौ राज्ञे उग्रसेनायाऽऽवेदयाञ्चक्रुः स्वकृतं सर्वं विज्ञापयामासुः ॥ १९ ॥

श्रुत्वेति अमोघमप्रतिहतं विप्रशापं श्रुत्वा मुसलं च दृष्ट्वा तावद्विस्मितास्ततो भयसंत्रस्ता भयेन कम्पितगात्राश्च बभूवुरित्यर्थः "त्रसी उद्वेगे" "ओविजी भयचलनयोः" इत्यनुशासनात् अन्यथा पौनरुक्त्यात् ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तस्मिन्नुदरे ॥ १७ ॥

किं दुष्कृतम् ॥ १८-२१ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

विमुच्य उच्छूनवस्त्रसङ्घात्पृथक्कृत्य सांबस्य सभारतया ससंशयवचनतयेति भावः ॥ १७—२४ ॥

तच्चूर्णयित्वा मुसलं यदुराजः स आहुकः ।
समुद्रसलिले प्रास्यल्लोहं चास्यावशेषितम् ॥ २१ ॥
कश्चिन्मत्स्योऽग्रसील्लोहं चूर्णानि तरलैस्ततः ।
उह्यमानानि वेलायां लग्नान्यासन् किलैरकाः ॥ २२ ॥
मत्स्यो गृहीतो मत्स्यघ्नैर्जालेनान्यैः सहार्णवे ।
तस्योदरगतं लोहं [1]सशल्ये लुब्धकोऽकरोत् ॥ २३ ॥
भगवान् ज्ञातसर्वार्थ ईश्वरोऽपि तदन्यथा ।
कर्तुं नैच्छद्विप्रशापं कालरूप्यन्वमोदत ॥ २४ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
वैयासिक्याम् एकादशस्कन्धे विप्रशापो नाम
प्रथमोऽध्यायः ॥ १ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

राज्ञे उग्रसेनायैव न तु श्रीकृष्णाय लज्जाभयाभ्यामिति भावः ॥ १९ ॥ २० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सहसा सद्यः "सद्योऽर्थे सहसा हेतुशून्ये युक्तेऽपि साम्प्रतम्" इति यादवः । उदरं कल्पतं विमुच्य तस्मिन्नुदरे अयस्मयं लोहमयं मुसलं ददृशुः ॥ १७ ॥

मन्दभाग्यैर्नोऽस्माभिः किं कृतम् ? नोऽस्मान् किं वदिष्यन्तीति विह्वलिताः सन्तो मुसलमादाय गेहान् ययुः ॥ १८—२० ॥

भाषा टीका ।

बस इतना सुनकर यदु कुमार घबडाये, और जल्दी से साम्ब के उदर को खोलकर क्या देखते हैं, कि—उसमें एक लोह का मूसल निकला ॥ १७ ॥

तब तो बालक लोग पछताने लगे, कि—हम मन्द भागियों ने यह क्या किया ? और लोग हमसे क्या कहेंगे ? इस प्रकार बडे विह्वल होकर उस मूसल को लेकर घर गये ॥१८ ॥

मुख जिनका सूख रहा ऐसे वे यदु बालक, उग्रसेन महाराज की सभा में उस मूसल को लेजाकर सब यादव लोगों के सन्मुख उस वृत्तान्त को राजा से निवेदन करते हुए ॥१९॥

हे नृप ! उस अमोघ ब्राह्मणों के शाप को सुनकर, और उस मूसल को देखकर द्वारका वासी बडे विस्मय को प्राप्त होकर भय भीत होते हुए ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

आहुक उग्रसेनः सोऽपि श्रीकृष्णमपृष्ट्वैव प्रास्यत प्रक्षिप्तवान् अस्य मुसलस्य चूर्णीक्रियमाणस्यावशेषितं लोहं च प्रास्यत् ॥ २१ ॥

तरलैस्तरङ्गैः ॥ २२ ॥

अन्यैर्मत्स्यैः सह शल्ये शराग्रे ॥ २३ ॥

ज्ञाताः सर्वेऽर्था येन सः ईश्वरोऽपि समर्थोऽपि सन्नन्यथा कर्तुं नैच्छत किन्त्वन्वमोदत यतः कालरूपी ॥ २४ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
प्रथमोऽध्यायः ॥ १ ॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

स आवेदितः ॥ २१ ॥

उह्यमानानि इतस्ततः प्रक्षिप्यमाणानि तत एव हेतोः वेलायां तटे लग्नानि एरकाः पटेरेति ख्यातास्तृणविशेषाः ॥ २२ ॥

स जरेति प्रसिद्धः ॥ २३ ॥

ईश्वरोऽपि अन्यथा कर्तुं समर्थोऽपि तदित्यव्ययं तन्मित्यर्थः ॥ २४ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे
श्रीराधारमणदासगोस्वामिविरचितायां दीपिकादीपिन्यां
टिप्पण्यां प्रथमोऽध्यायः ॥ १॥

---

(१) शल्येषुर्णामिति विज० पा० ।

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

ईश्वरोऽपि अन्यथा कर्तुं समर्थोऽपि ॥ २४ ॥

इति श्रीमद्भागवतव्याख्याने एकादशस्कन्धीये
श्रीसुदर्शनसूरिकृतशुकपक्षीये
प्रथमोऽध्यायः ॥ १ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

स यदूनां राजा आहुकः उग्रसेनः मुसलं सम्यक् चूर्णी कारयित्वा समुद्रसलिले प्रास्यत् प्राक्षिपत् अस्य मुसलस्य चूर्णीक्रियमाणस्यावशेषितं लोहशकलञ्च प्रास्यत ॥ २१ ॥

तस्मिन्निति । तस्मिन् समुद्रसलिले कश्चिन्मत्स्यः लोहं पातितं लोहशकलमग्रसीत् चूर्णानि तु तरङ्गैस्तरङ्गैस्तत्र तत्र वेलायां तीरे ऊह्यमानानि प्राप्यमाणानि अत एव लग्नान्यरकाख्या दीर्घाः स्थूलाश्च धाराग्रधारोपेतास्तृणविशेषा आसन् ॥ २२ ॥

मत्स्य इति । योऽग्रसील्लोहं स मत्स्यः अन्यैर्मत्स्यैः सह जालेन मत्स्यघ्नैर्गृहीतः लुब्धकस्तेषां मत्स्यघ्नानां मध्ये कश्चिल्लुब्धक इत्यर्थः । तस्य मत्स्यस्योदरगतं लोहं शल्यं शराग्रेऽकरोच्छराग्र कारितवानित्यर्थः ॥ २३ ॥

भगवानिति । ज्ञाताः सर्वेऽर्थाः कालत्रयगोचराः येन स तं विप्र-शापमन्यथाकर्तुं विफलीकर्तुमीश्वरः समर्थोऽपि तदन्यथा कर्तुं नेच्छत् किन्तु कालरूपी हेतुगर्भमिदं कालरूपेण संहर्तुं कृत-सङ्कल्पत्वादन्वमोदत ॥ २४ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
प्रथमोऽध्यायः ॥ १ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तरङ्गैस्तरङ्गैः वेलायां तीरे लग्नानि संसक्तानि एरकाः दीर्घसूचीमुखतृणविशेषाः ॥ २२ ॥

शल्येषु शल्याख्यशरं लुब्धको व्याधः ॥ २३ ॥

सर्वेषामर्थः पुरुषार्थो यस्मात्स तथा सर्वैरर्थ्यत इति वा ॥२४॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
प्रथमोऽध्यायः ॥ १ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धीये
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
प्रथमोऽध्यायः ॥ १ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

सा यदूनां लज्जा भवेन्मा भूतामिति सोऽप्याहुकः कृष्णमपृ-ष्ट्वैव तन्मुसलं चूर्णयित्वा अवशेषितं लोहं च किञ्चिन्मात्र-मतस्तु अकिञ्चित्करमिति मत्वा सलिले प्रास्यत ॥ २१ ॥

तरङ्गैस्तरङ्गैः ॥ २२ ॥

अन्यैर्मत्स्यैः सह शल्ये शराग्रे स प्रसिद्धो लुब्धकः ॥ २३ ॥ २४ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
एकादशस्य प्रथमः सङ्गतः सङ्गतः सताम् ॥ १ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

स आहुकः उग्रसेनः मुसलं चूर्णयित्वा समुद्रसलिले प्रास्यत प्राक्षिपत् अस्य मुसलस्य अवशेषितं लोहं च प्रास्यत ॥ २१ ॥

तत्र लोहं मुसलशेषं मत्स्योऽग्रसीत् चूर्णानि तु तरङ्गैस्तरङ्गैः तत-स्तस्मादेशात् ऊह्यमानानि वेलायां समुद्रतीरे लग्नानि एरका आसन् दीर्घसूचीमुखानिग्रंथितृणविशेषाः बभूवुः ॥ २२ ॥

स मत्स्यः अन्यैर्मत्स्यैः सह मत्स्यघ्नैः गृहीतः तस्य मत्स्य-स्योदरगतं निर्गतं लोहं शल्ये शराग्रे अकरोत्संयोजितवान् स प्रसिद्धः जराभिधः लुब्धको व्याधः ॥ २३ ॥

ईश्वरोऽपि सर्वं कर्तुं समर्थोऽपि ॥ २४ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
प्रथमोऽध्यायार्थप्रकाशः ॥ १ ॥

———

भाषा टीका ।

राजा श्रीउग्रसेन महाराज ने भी उस मूसल का चूर्ण कराकर समुद्र में डलवा दिया और उसका कुछ लोह अव-शिष्ट रहा उसको भी समुद्र में डलवा दिया ॥ २१ ॥

उस लोह के टुकडे को तो कोई मत्स्य निगल गया, और जो चूर्ण रहा सो तरंगों की टक्करों से किनारे पर लगकर एरका अर्थात् जिसकी चटाई बिनी जाती है वह पटेरे नामक तृण विशेष होगया ॥ २२ ॥

जिस मच्छ ने वह लोह निगला रहा, उस मच्छ को अन्य मत्स्यों के साथ मत्स्य मारने वालों ने जाल डालकर पकडा, और उसके पेट में निकला जो लोह तिसको लुब्धक ने अपने बाण के अग्र भाग में लगा लिया ॥ २३ ॥

श्रीकृष्ण भगवान् इन सब बातों को जानकर चुप लगा गये, और उन ब्राह्मणों के शाप को अन्यथा कर देने में आप समर्थ भी रहे तो भी आपने उलटने की इच्छा नहीं करी किन्तु आप स्वयं कालरूप भी तो हैं इस लिये अपने मनमें अनुमोदन किया ॥ २४ ॥

इति श्रीमद्भागवत एकादशस्कन्ध में प्रथम अध्याय की,
श्रीवृन्दावनस्थ पं० भागवताचार्यकृत
भाषाटीका समाप्ता ॥ १ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे प्रथमोऽध्यायः ॥ १ ॥

द्वितीयोऽध्यायः ।

—:०:—

श्रीशुक उवाच ।

गोविन्दभुजगुप्तायां द्वारवत्यां कुरूद्वह ! ।
अवात्सीन्नारदोऽभीक्ष्णं कृष्णोपासनलालसः ॥ १ ॥
को नु राजन्निन्द्रियवान् मुकुन्दचरणाम्बुजम् ।
न भजेत्सर्वतो मृत्युरुपास्यममरोत्तमैः ॥ २ ॥
तमेकदा तु देवर्षिं वसुदेवो गृहागतम् ।
अर्चितं सुखमासीनमभिवाद्येदमब्रवीत् ॥ ३ ॥

वसुदेव उवाच ।

भगवन् ! भवतो यात्रा स्वस्तये सर्वदेहिनाम् ।
कृपणानां यथा पित्रोरुत्तमश्लोक(१)वर्त्मनाम् ॥ ४ ॥
भूतानां देवचरितं दुःखाय च सुखाय च ।
सुखायैव हि साधूनां त्वादृशामच्युतात्मनाम् ॥ ५ ॥
भजन्ति ये यथा देवान् देवा अपि तथैव तान् ।
छायेव कर्मसचिवाः साधवो दीनवत्सलाः ॥६॥
ब्रह्मंस्तथाऽपि पृच्छामो धर्मान् भागवतांस्तव ।
यान् श्रुत्वा श्रद्धया मर्त्यो मुच्यते सर्वतो भयात् ॥ ७ ॥
अहं किल पुराऽनन्तं प्रजार्थो भुवि मुक्तिदम् ।
अपूजयं न मोक्षाय मोहितो देवमायया ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

द्वितीये निमिजायन्तसंवादेनाऽऽह नारदः ।
धर्मान् भागवतान् भक्त्या वसुदेवाय पृच्छते ॥

अभीक्ष्णं प्रस्थापितोऽपि पुनः पुनरवात्सीदित्यर्थः । ननु, नारदस्य दक्षादिशापान्नैकत्र वासः सम्भवतीत्याशङ्क्याह—गोविन्दभुजगुप्तायामिति । न तस्यां शापादेः प्रभाव इत्यर्थः । कृष्णोपासने लालसा औत्कण्ठ्यम् यस्य सः ॥ १ ॥

यद्भजते मुक्तानामपीदृशमौत्सुक्यं तं को नाम न भजेदित्याह—कोन्विति । इन्द्रियवानिति इन्द्रियवत्त्वमात्रमेव यत्राधिकारिविशेषणमित्यर्थः । सर्वतः सर्वेष्वपि लोकेषु मृत्युर्यस्य सः ॥ २-३ ॥

यथा पित्रोर्यात्रा आगमनमपत्यानां स्वस्तये मङ्गलाय यथा चोत्तमश्लोकस्य वर्त्मभूतानां महतां यात्रा कृपणानां स्वस्तये तथा भगवद्रूपस्य भवतो यात्रा सर्वदेहिनां स्वस्तय इति ॥४॥

देवैरपि महतामुपमानमनुचितमित्याह—भूतानामिति । देवानां चरितमनावृष्ट्यादिना भूतानां दुःखायाऽपि भवति त्वादृशां त्वया सदृशानाम् अच्युते आत्मा येषां तेषाम् ॥ ५ ॥

किञ्च, सुखं कुर्वन्तोऽपि देवा भजनानुसारेण कुर्वन्ति न तथा साधव इत्याह—भजन्तीति । छायेव यथा पुरुषो यावत्कर्मेङ्गति तावदेव तस्य छायाऽपि तथा कर्मसचिवाः कर्मसहायाः ॥ ६ ॥

तदेव यद्यपि भवत आगमनमात्रेणैव वयं कृतार्थास्तथाऽपि पृच्छामः तथेति तव यैर्धर्मैः प्रसन्नो भगवांस्तानित्यर्थः ॥ ७॥

---

१ वर्ष्मणाम् इति शुक० पाठः ।

श्रीधरस्वामिकृतभावार्थदीपिका।

ननु, त्वत्तोऽपि किमन्यो भगवत्प्रसादपात्रमस्ति तत्राऽऽह अहं किलेति। भुवि प्रजार्थोऽपूजयं पुत्रलाभप्रयोजनः सन् पूजितवान् किलेति सूतीगृहे भगवदुक्तमनुस्मरति ॥ ८ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी।

निमेर्जायन्तनां जयन्तीनन्दनानां नवयोगेश्वराणाञ्च सम्वादेन प्रश्नोत्तररूपेण पुनः पुनरित्यस्य प्रख्यापितोऽपीति व्यङ्ग्योऽर्थः अतएवेत्यर्थः इत्युक्तं प्रख्यापने च लोकवृत्तान्तजिज्ञासादिलीलैव कारणं कृष्णस्योपासने दर्शनादिना भजने यद्वा कृष्णस्य उपसमीपे आसने स्थितौ लालसा यस्य सः तथा ॥ १ ॥

यद्भजने यस्य चरणाम्बुजस्य भजने सेवने तच्चरणारविन्दम् इन्द्रियवत्त्वमात्रमेवाति वर्णाश्रमाद्यपेक्षापि निरस्ता अधिकारिविशेषणमिति यथा "स्वाराज्यकामो राजा राजसूयेन यजेत"इत्यत्र स्वाराज्यकामस्य राज्ञः सतो राजसूयेऽधिकारो नान्यस्य तथा इन्द्रियवतः सर्वस्यापि तद्भजनेऽधिकार इत्यर्थः। तदुक्तं पाद्मे माघमाहात्म्ये "सर्वेऽधिकारिणोह्यत्र हरिभक्तौ यथा नृप"इति। भागवते च "सर्वेषां मदुपासनम्" इति अमरोत्तमैरिन्द्रादिभिरपि तदेवं विषयिमुमुक्षुमुक्तानामपि तद्भजनीयमिति स्थिते महाभक्तराजो नारदो वा कथं तन्न भजेदिति भावः ॥ २ ॥

अभिवाद्य नमस्कृत्य ॥ ३ ॥

कृपणानां सर्वसाधनहीनानां भगवद्रूपस्य भगवदावेशावतारस्य देवर्षित्वमुपेत्य स इति अवतारमध्ये तत्परिग्रहादेनञ्चे यथा महतामित्युपमानोपमेययोर्न साङ्कर्यामति ज्ञेयम् ॥ ४ ॥

उपमानं सादृश्यम् ॥ ५ ॥

साधवस्तु कर्मानुगता न भवन्ति प्रत्युत दीनेषु तद्दीनेष्वेव वत्सला दयालवः ॥ ६ ॥

तदेवं साधूनां दीनवत्सलत्वाभिधानप्रकारेण तथापीति बलादेव यद्यपीत्याद्यध्याहृतं तव सम्बन्धिनो धर्मानुसम्बन्धित्वञ्च भगवत्प्रसादजनकत्वेनेत्यभिप्रेत्य तव वैधैरित्यादिव्याख्यानमिति प्रतिपत्तिगौरवादित्यर्थः इत्युक्तम्। ननु कृतार्थस्य तव मद्धर्मप्रश्ने किं प्रयोजनमित्याशङ्कायामाह—यानिति। मत्प्रसङ्गेन श्रुत्वा मर्त्योऽपि ॥ ७ ॥

न मोहयेति ब्रह्मशापभवणेन श्रीकृष्णवियोगभ्रमव्यग्रतया निर्वेदोक्तिः भगवदुक्तमिति "न बध्नायेऽपवर्गे मे मोहितौ मम मायया"इति ॥ ८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्।

॥ १ ॥

इन्द्रियवान् चक्षुष्मान् ॥ २—३ ॥

उत्तमश्लोकवर्त्मणः भगवच्छरीरभूतस्य तवागमनं पित्रोरागमनमिव कृपणानां देहिनां स्वस्तये भवति ॥ ४—५ ॥

छायेवेत्युपकारकत्वात्संश्रयणीयत्वं विवक्षितम् ॥ ६—८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

शापमन्यथाकर्तुं समर्थोपीत्युक्तं किं क्वचिदन्यथाकरणं प्रसिद्धमित्यपेक्षायां तद्दर्शयंस्तत्प्रसङ्गादितिहासान्तरं प्रस्तोतुमाह, गोविन्देत्यादिना—हे कुरूद्वह! अभीक्ष्णं प्रस्थापितोपि नारदः पुनः पुनः द्वारकायामवात्सीदुषितवान्। ननु, नारदस्य दक्षशापान्नैकत्र वाससम्भव इत्याशङ्कामपनुदन् द्वारकां विशिनष्टि—गोविन्दभुजगुप्तायामिति। न तस्यां शापादेः प्रभाव इति भावः। किमर्थमवात्सीदित्यत्र नारदं विशिनष्टि—कृष्णोपासनलालस इति। कृष्णोपासनायां लालसा औत्सुक्यं यस्य सः ॥ १ ॥

ननु, नित्यं ज्ञानाधिकस्य देवर्षेः कृष्णोपासनायामौत्सुक्यं कथ(किमर्थं)मित्यत्राह—कोन्विति। हे राजन्। इन्द्रियवान् चक्षुष्मान् को वा पुमान् मुकुन्दस्य श्रीकृष्णस्य चरणाम्बुजं न सेवेत सेवमानो नावतिष्ठेत ज्ञानविभागमन्तरेण सर्वोपीन्द्रियवान् सेवेतैवेत्यर्थः। तत्र हेतुत्वेन तत्पादाम्बुजं विशिनष्टि—सर्वतः अमृत्युम् इतिच्छेदः सर्वेष्वपि भजत्सु न विद्यते मृत्युर्यस्मात्सेव्यमानात्तथाभूतं सर्वेषामपि विदुषामविदुषाञ्च मुकुन्दचरणाम्बुजसेवयैव संसृतिनिवृत्तिरित्यर्थः। अत एवामरोत्तमैर्ज्ञानाधिकैर्ब्रह्मरुद्रादिभिरुपास्यं सर्वतो मृत्युरिति पाठे सर्वेष्वपि लोकेषु मृत्युर्यस्य स चक्षुष्मान् कोवा न सेवेतेत्यर्थः ॥ २ ॥

ननु, परावरतत्त्वविदो देवर्षेस्तत्रावस्थितावश्यमध्यात्मवादः समभावि न तत्र संशयः किन्तु कोवा पृष्टेत्यत्राह तमिति। गृहागतं स्वगृहं प्रत्यागतम् अभिवाद्य प्रणम्येदं वक्ष्यमाणम् अब्रवीत् ॥ ३ ॥

तदेवाह—भगवन्नित्यादिभिः षड्भिः। किञ्च तत् पृष्टुकामस्तावत् तदागमनमभिनन्दति—भगवन्निति। हे भगवन्! भवतो यात्रा सञ्चारः सर्वेषां देहिनां मादृशां स्वस्तये मङ्गलाय सुखायेति यावत्, तथा हि यथा पित्रोरागमनं पुत्राणां सुखायैव तथा उत्तमश्लोकवर्त्मभूतानां तत्स्वरूपस्वभावादिज्ञानद्वारभूतानां महात्मनां यात्रा कृपणानां तापत्रयपीडितानां स्वस्तय एव, उत्तमश्लोकवर्त्मणा इति पाठान्तरं तदा भगवच्छरीरभूतस्य भवतः आगमनं पित्रोरागमनमिव कृपणानां देहिनां स्वस्तय एव भवतीत्यर्थः ॥ ४ ॥

ननु, किं विशेषेण मादृशामेव यात्रा कृपणानां स्वस्तये इति ब्रूषे? यतो देवादीनामपि यात्रादि कर्म लोकानां स्वस्तये भवतीत्यत आह—भूतानामिति। देवानां पर्जन्यादीनां चरितं भूतानां दुःखाय (सुखाय) च भवत्यतिवृष्ट्यादिना दुःखजननदर्शनादिति भावः। त्वादृशां त्वद्विधानां साधूनान्तु चरितं सुखायैव तत्र हेतुत्वेन विशिनष्टि—अच्युतात्मनामिति। अच्युते आत्मा मनो येषां तेषां नित्यमच्युतैकचित्तत्वादितरवार्त्तामपोह्याच्युतवार्त्तया तापत्रयनिरसनशीलत्वात्सुखायैवेति भावः ॥ ५ ॥

किञ्च, सुखं कुर्वन्तोपि देवा भजनानुसारेण कुर्वन्ति साधवस्तु न तथेत्याह—भजन्तीति। ये देवान् यथा भजन्ति

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

तान् देवा अपि तथैव भजन्ति भजनानुगुणमेव सुखं यच्छन्ति नतु, निरवधिकमित्यर्थः। कुतः? यतः छायेव कर्मसचिवाः कर्मसहायास्ते यथा छायावृद्धिह्रासाभ्यां विना (स्वयं) वर्द्धते ह्रासते च तद्वद्देवा अपि स्वसेवा(कर्म)तारतम्यरूपं कर्मैव तरतमफलभावेन सहायो येषां तथाभूता इत्यर्थः। साधवस्त्वादृशास्तु दीनवत्सला दीनेषु तापत्रयाभिभूतेषु वत्सलाः निरवशेषदुःखनिराचिकीर्षवः। यद्वा, छायेव परोपकाररूपकर्मसचिवाः अतः संश्रयणीयाः साधव इत्यर्थः ॥ ६ ॥

ब्रह्मन्निति। तदेवं यद्यपि तवागमनमात्रेण वयं कृतार्थास्तथापि पृच्छामः, किं तत्? भागवतान् धर्मान् तव यैर्द्धर्मैर्भगवान् प्रसन्नः तानित्यर्थः। किञ्च, यान् धर्मान् श्रुत्वा सर्वतः सर्वस्माद्भयात्संसृतिभयान्मुच्यते ॥ ७ ॥

ननु, पुत्रीकृतपरमपुरुषस्त्वमितर इव किं निर्विद्यसे इत्यत आह—अहमिति। मुक्तिदमप्यनन्तं केवलं पुत्रकामोऽहमपूजयमाराधितवानस्मि नतु मोक्षाय पूजयम् तत्र हेतुत्वेनात्मानं विशिनष्टि, देवस्य भगवतो मायया मोहितः (प्रतारितः) किलेति सूतिकागृह भगवदुक्तिमनुस्मरति ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

अतः कतिपयैरध्यायैर्वसुदेवनारदसंवादच्छलेन हरेस्तत्त्वं तदवाप्तिसाधनं तदधिकारिलक्षणञ्चेत्यादि निरूपयति; तत्र यादृच्छिकस्य नारदस्यान्तःपुरवासिना वसुदेवेन सह सङ्गमः कथं सञ्जाघटीतीति शङ्कां परिहर्तुमाह—गोविन्देति। वनवासिनो नारदस्य जनसङ्कुलपुरनिवासहेतुः कृष्णेति ॥ १ ॥

श्रोत्रादीन्द्रियशक्तिमतः पुंसोऽपि हरिश्रवणादिश्रद्धातिशयो जायते किं पुनः सम्यक् विज्ञाततत्त्वस्य नारदस्येति भावेनाह, को न्विति। सर्वतो मृत्युः मरणं यस्य स तथा ॥ २ ॥

अस्तूक्तं प्रकृते किमत्राह—नमेकदेति ॥ ३ ॥

स्तुत्या सन्तोषोद्रेकात् श्रोतव्यार्थकथने बुद्ध्युल्लासो भवतीत्याशयेन नारदं स्तौति—भगवन्नित्यादिना। स्वस्तये इति चिरायेत्यादिप्रयोगवत्। यात्रा सञ्चरणं पित्रोर्यात्रा शिशूनाम् उत्तमश्लोकः हरिः स एव वर्त्म यस्य स तथा। यद्वा, उत्तमो हरिस्तस्य श्लोक इव श्लोको येषां ते तथा महान्तस्तेषां वर्त्म यस्य स तथा महन्मार्गानुवर्तीत्यर्थः। तस्य ॥ ४ ॥

ननु, सर्वभूतसुहृत्त्वे सात्त्विकत्वं प्रयोजकं तद्देवानामप्यस्त्यतः किं विशेषतः स्तूयत इति तत्राह—भूतानामिति। भूतानि त्रिविधानि सात्त्विकराजसतामसाभिधानानि; तत्र देवानां चरितं सात्त्विकभूतानां सुखायैव आत्मभजने बुद्धिमुत्पाद्य सुखलक्षणफलदानं तामसानां दुःखाय तद्विपर्ययबुद्धिमुत्पाद्य दुःखलक्षणफलदानं राजसानां सुखदुःखलक्षणमिश्रफलाय मिश्रकर्मबुद्धिमुत्पाद्य सुखादिमिश्रफलदानम् इदञ्च शब्दगृहीतं द्वितीयचशब्दः समुच्चयार्थः भवादृशानां चरितं न तथेत्याह—सुखायेति। एवशब्देन दुःखं व्यावर्तयति, अच्युतात्मनामित्यनेन व्यापारान्तरं निवारयति, हिशब्देन तेषां तदस्तीति सूचयति ॥ ५ ॥

देवानामात्मभजने बुद्धिमुत्पाद्यानुत्पाद्य च सुखादिफलदातृत्वमस्तीत्युक्तं तत्स्पष्टयति—भजन्तीति। ये पुरुषाः यथा येन प्रकारेण देवान् भजन्ति ते देवा अपि तथा कृतकर्मानुसारेण तान् पुरुषान् भजन्ति फलदानेन सम्बद्धा भवन्ति, न च देवेषु वैषम्यादिकमाशङ्कनीयमित्येतन्निदर्शनेन दर्शयति—छायेति। कर्मसचिवाः छायावत् पुरुषकृतकर्माधीना छाया यथा पुरुषानुकृता तथेत्यर्थः। भवादृशा न तथेत्याह, साधव इति—

> आत्मनो भजने बुद्धिमुत्पाद्य फलदाः सुराः।
> उत्तमानां जनानाञ्च निकृष्टानां विपर्ययः॥
> शुभाशुभफलानान्तु कर्मणां विबुधाः सदा।
> प्रवर्त्तका यथायोग्यमृषयः करुणां सदा॥
> सुखमिच्छन्ति भूतानां प्रायो दुःखाऽसहा नृणाम्।
> तथापि तेभ्यः प्रवरा देवा एव हरेः प्रियाः॥

इत्येतदस्मिन्नर्थे प्रमाणम् ॥ ६ ॥

ननु, साधुभ्यो देवानामुत्तमत्वे अभीष्टार्थप्रश्नस्तान् प्रति स्याद्यावत् प्रश्नपरिहारवक्तृत्वसामर्थ्यादिति तत्राह—ब्रह्मन्निति। यद्यपि देवाः प्रशस्ता निश्चितार्थास्तथापि मानुषत्वेनास्मद्दृष्ट्यगोचरत्वाद्युष्माकं तन्निश्चितार्थज्ञानसामर्थ्यात्तत्सन्निधानपात्रत्वाच्च वयं तु तव त्वां धर्मान् पृच्छाम इत्यन्वयः। ननु, किमत्राहिंसालक्षणो धर्म उत न्यायाचाराद्यन्यतम इत्यत्राह—भागवतानिति। अवश्यवक्तव्यत्वे तद्गुणमाह—यानिति। अनेन यद्धर्मश्रवणमपि सर्वभयमोचकं किमुत तदनुष्ठानमिति दर्शितम् ॥७॥

भवता भगवद्विषयधर्माचरणं कृतं किमधुना तद्विषयप्रश्न इति तत्राह—अहमिति ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

अथ तदानन्तर्यप्राप्तं श्रीवसुदेवनारदसम्वादं वक्तुं श्रीभगवदिच्छया तादृशानर्थसहकारित्वेऽपि श्रीनारदस्य द्वारकायामेव वास आसीदिति सहेतुकमाह—गोविन्देति। अभीक्ष्णं लोकवृत्तान्तजिज्ञासादिलीलया श्रीभगवता मुहुस्तत्र प्रस्थापितोऽपि पुनः पुनरवात्सीदित्यर्थः। कृष्णस्य उप समीपे आसने स्थितौ लालसा यस्य तादृशः तद्भजगुप्तायामिति स्थानमौख्यमपि दर्शितम् ॥१॥

अत्र तस्य वासे कैमुत्यं कोऽन्विति। अन्योऽपि कः इन्द्रियवानित्यनिन्द्रियवत्सु तरुगुल्मादिष्वपि तद्भजनसौख्यं वर्णितम् ततः सेन्द्रियो वा को न भजेदिति स्वभावत एव तद्योग्यं सर्वेषामित्यर्थः। विचारतः सर्वतो मृत्युरिति नचैवं साधारणजनानामेव तद्भजनीयमित्यायातम् अपि तु मुक्तानामपीत्याह—उपास्यमिति। तदेवं विषयिमुमुक्षुमुक्तानामपि तद्भजनीयमिति स्थिते महाभक्तराजः श्रीनारदो वा कथं न भजेदिति भावः ॥ २—३ ॥

सर्वदेहिनां साधारणानां कृपणानाम् सर्वनिकृष्टानाम् उत्तमश्लोकवर्त्मनां सर्वोत्कृष्टानामपि स्वस्तये भवतो यात्रा भवति। यथा पित्रोरागमनं त्रिविधानामपि पुत्राणां स्वस्तये भवति ॥४॥

तथैवाह—भूतानामिति ॥ ५ ॥

कर्म चात्र भगवद्भजनमेव साधवस्तु न कर्मानुगताः प्रत्युत स्वानन्देन तदीनेष्वेव दयालव इत्याह, साधव इति ॥ ६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

ननु, कृतार्थस्य तव तत्पृच्छायां नास्ति प्रयोजनमित्याशङ्क्याह—यानिति । मत्प्रसङ्गेन श्रुत्वा मर्त्योऽपि ॥ ७ ॥

अथ ब्रह्मशापश्रवणेन श्रीकृष्णान्तरायभ्रमः व्यग्रः स्वप्रयोजनमपि निवेदयति—अहमिति द्वाभ्याम् । देवस्य भगवतो मायया कृपया मोहितस्तन्माधुरीवशीभूतो मोक्षायापि नापूजयं किमु तान्यस्मै किन्तु प्रजार्थं तद्रूपपुत्रप्राप्तये एव ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

द्वितीये वसुदेवेन पृष्टोऽभून्नारदो निमेः ।
प्रश्ने कविहरी धर्मान् वैष्णवान् प्रोचतुः क्रमात् ॥

अभीक्ष्णमवात्सीदिति कृष्णप्रभावादेव न तत्र दक्षशापः प्रभवतीति भावः ॥ १ ॥

यद्भजने मुक्तानामपीदृशौत्सुक्यं तं वद्धः खलु को नु न भजेदित्याह—कोन्विति । इन्द्रियवानिति श्रोत्रादीन्द्रियवतैव एव तद्भजनेऽधिकार इति भावः । न केवलमीश्वरज्ञा जीवा एव तं भजन्ति किन्त्वमरोत्तमैः रुद्राद्यैरपि ॥ २—३ ॥

सर्वदेहिनां साधारणानां कृपणानां सर्वनिकृष्टानाम् उत्तमश्लोकवर्त्मनां सर्वोत्कृष्टानां भक्तानामपि स्वस्तये भवतो यात्रा आगमनं भवति यथा पित्रोर्यात्रा त्रिविधानामपि पुत्राणामिति सर्वभूतवात्सल्यं नारदस्य दर्शितम् ॥ ४ ॥

देवैरपि साधूनामुपमानमनुचितमित्याह—भूतानामिति । देवचरितमतिवृष्ट्यादिना दुःखायापि भवति ॥ ५ ॥

किञ्च, देवाः स्वार्थपरतयैव सुखयन्ति साधवस्तु न तथेत्याह—भजन्तीति । छायेवेति यथा पुरुषो यावत्करोति छायापि तस्य तथा, कर्मसचिवाः कर्मसहायाः ॥ ६ ॥

तथापीति यद्यपि तव दर्शनमात्रेणैव कृतार्था अभूमैव तदपीत्यर्थः । यान् श्रुत्वेति त्वद्दर्शनसम्भावनारहितोऽपि मर्त्यो यान् श्रुत्वापि किमुताचर्य ॥ ७ ॥

ननु, त्वं तु कृतार्थ एवाऽसि तत्राह—अहं किलेति । प्रजार्थं एव नतु मुक्त्यर्थः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

मुमुक्षुजनोपकाराय भगवत्प्राप्त्युपायभक्तलक्षणतद्गुणस्वरूपादिकञ्च वसुदेवनारदसम्वादेन चतुरध्याय्या दर्शयति—तत्र तावत्पूर्वाध्यायान्ते यदुक्तम् "भगवान् ज्ञातसर्वार्थ ईश्वरोऽपि तदन्यथा । कर्तुं नैच्छद्विप्रशापम्" इति तद्दक्षादिशापवैयर्थ्यसूचनेन दृढयति—गोविन्देति । यद्यपि दक्षादिशापान्नारदस्य नैकत्र वासस्तथापि नारदः अभीक्ष्णं गोविन्दभुजगुप्तायामवात्सीत् गोविन्दभुजगुप्तायां तस्यां शापादेः प्रवृत्तिर्नास्तीति भावः । नारदस्य तत्र वासे हेतुमाह—कृष्णोपासनलालस इति । कृष्णोपासने लालसा प्रीत्यतिशयो यस्य सः ॥ १ ॥

यद्भजने भगवदवताराणां नारदादीनामपि लालसा तच्चरणं को नाम न भजेदित्याह—क इति । अमरा देवास्तदुत्तमाः ब्रह्मशिवनारदादयः तैरपि मुकुन्दस्य मुक्तिदस्य चरणाम्बुजमुपास्यं सर्वतो मृत्युर्यस्य स इन्द्रियवान् इन्द्रियोपलक्षितज्ञानवान् को नु न भजेत् अपि तु (सर्वोऽप) भजेदेवेत्यर्थः ॥ २ ॥

तं प्रीत्यतिशयेन कृष्णोपासनार्थं द्वारवत्यां निवसन्तम् एकदा तु गृहागतं तत्रार्चितं तदनन्तरं सुखमासीनं प्रश्नार्थं पुनरभिवाद्येदं वक्ष्यमाणमब्रवीत् ॥ ३ ॥

हे भगवन् ! पित्रोः जननिजनकयोः यात्रा आगमनं यथा अपत्यानां स्वस्तये मङ्गलाय भवति तथा भवतः सम्वन्धिना भवदुपदिष्टानामुत्तमश्लोकवर्त्मनाम् उत्तमकीर्त्तेर्हरेः वर्त्मभूतानां तत्प्रापकानाम् उत्तमश्लोको हरिर्वा उत्तमाः श्लोकाः प्रतिपादकाः यस्य भक्तियोगस्य स वा वर्त्म येषां तेषां यात्रा सर्वदेहिनां सर्वेषां स्थिरचरदेहवतां तथापि कृपणानां स्वस्तये भवति किमुत भवद्यात्रा तेषां स्वस्तये भवतीति वक्तव्यम् ॥ ४ ॥

यद्यपि महतां स्वार्थनैरपेक्ष्येणागमनं पित्रोस्तु न तथातोऽनुपमं महदागमनं तथापि स्वस्तिजनकत्वसादृश्यात्सोपमं तदुक्तमधुना तु महच्चेष्टितस्य देवचेष्टितमप्युपमानं नास्तीत्याह, भूतानामिति । त्रिगुणकर्मभेदात् त्रिविधानां भूतानां सुखाय दुःखाय चशब्दात्तदुभयमिश्रीभावाय देवानां चरितं चेष्टितं भवति देवानां तत्तत्कर्मसापेक्षत्वात् साधूनाम् आगमेन हितोपदेशादि चरितं तु सर्वेषां भूतानां सुखायैव तत्र हेतुगर्भं विशेषणम् अच्युतात्मनामिति अच्युते हरौ आत्मा बुद्धिर्येषां तेषाम् ॥ ५ ॥

एतदेव विवृणोति—भजन्तीति । ये यथा येन सात्त्विकेन राजसेन तामसेन वा प्रकारेण देवान् भजन्ति तान् फलदानकाले देवा अपि तथैव भजन्ति तत्र हेतुगर्भं विशेषणं कर्मसचिवा इति तत्तत्कर्मसापेक्षा इत्यर्थः । तत्र दृष्टान्तमाह, छायेव छाया यथा स्वाश्रयापेक्षा तद्वत् साधवस्तु दीनवत्सलाः दीनाऽनुकम्पिनः नतु कर्मानुसारेण निग्रहानुग्रहपरा इत्यर्थः ॥ ६ ॥

एवं हि वदीयशिष्याद्यागमनमात्रेणास्मदादिकृतार्थतासिद्धौ धर्मप्रश्नाद्यपेक्षा नास्ति किं पुनस्तस्य भवत एवागमनमात्रेण कृतार्थतासिद्धौ धर्मप्रश्नाद्यपेक्षा नास्तीति वक्तव्यं तथापि हे ब्रह्मन् ! तव त्वां भागवतान् भगवद्धर्मान् प्रच्छामः मर्त्यः जन्ममरणप्रवाहपतितः यान् धर्मान् श्रुत्वैव सर्वतो भयम् यस्मिन् तस्मात्संसाराज्जन्ममरणप्रवाहात् मुच्यते मुक्तो भवति किमुत तेषां धर्माणामनुष्ठाने मुच्यते इति वक्तव्यम् ॥ ७ ॥

ननु, भवता भागवता धर्माः अनुष्ठिता एव यतो भवत्पुत्रत्वेन भगवान् तव गृहेऽवतीर्णोऽतः किमर्थो धर्मप्रश्न इत्यत्राह—अहमिति द्वयेन । अहं भुवि प्रजार्थः पुत्रप्रयोजनः सन् अनन्तं त्रिविधपरिच्छेदशून्यं भगवन्तम् अपूजयम् पूजितवान् नतु मोक्षाय निःशेषकार्यकारणरूपप्रकृतिमण्डलपरित्यागपूर्वकभगवत्प्राप्तये तत्र हेतुमाह—मोहित इति देवमाययेति । देवस्य भगवतः मायया सङ्कल्परूपया मां पुत्रभावेन भजतोऽस्य मुक्तिः नायात्विति सिद्धान्तः प्रजार्थो मां तावद्भजतु न मुक्तिकामनया इत्येवंभूतया मोहित मुक्त्युपायाच्चालितः ॥ ८ ॥

यथा विचित्रव्यसनाद्भवद्भिर्विश्वतो भयात् ।
मुच्येमह्यञ्जसैवाद्धा तथा नः शाधि सुव्रत ! ॥ ९ ॥

श्रीशुक उवाच ।

राजन्नेवं कृतप्रश्नो वसुदेवेन धीमता ।
प्रीतस्तमाह देवर्षिर्हरेः संस्मारितो गुणैः ॥ १० ॥

नारद उवाच ।

सम्यगेतद्व्यवसितं भवता सात्वतर्षभ! ।
यत्पृच्छसे भागवतान् धर्मांस्त्वं विश्वभावनान् ॥ ११ ॥
श्रुतोऽनुपठितो ध्यात आदृतो वाऽनुमोदितः ।
सद्यः पुनाति सद्धर्मो देवविश्वद्रुहोऽपि हि ॥ १२ ॥
त्वया परमकल्याणः पुण्यश्रवणकीर्तनः ।
स्मारितो भगवानद्य देवो नारायणो मम ॥ १३ ॥
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
आर्षभाणां च सम्वादं विदेहस्य महात्मनः ॥ १४ ॥
प्रियव्रतो नाम सुतो मनोः स्वायम्भुवस्य यः ।
तस्याग्नीध्रस्ततो नाभिर्ऋषभस्तत्सुतः स्मृतः ॥ १५ ॥

भाषा टीका ।

श्रीभागवतधर्मेभ्यो नमः ।

श्रीशुक उवाच ॥

श्रीशुकदेवजी बोले, कि—हे कुरूद्वह, हे राजन् ! श्रीकृष्ण की भुजाओं से रक्षित श्रीद्वारका पुरी में श्रीकृष्ण की उपासना की लालसा से नारदजी निरंतर वास करते हुए ॥ १ ॥

हे राजन्, सर्व लोकों में मृत्यु जिसके पीछे लगी है फिर ऐसा पुरुष कौन है, कि—जो इन्द्रियों को प्राप्त होकर ब्रह्मरुद्रादि देवताओं से उपास्य ऐसे मुकुन्द के चरणारविन्द का न भजन करै ॥ २ ॥

एक समय अपने महलों में आये हुए नारदजी का वसुदेवजी ने पूजन किया, और आसन पर बैठाये, और नारदजी को वन्दना कर वसुदेवजी इस प्रकार बोलते हुए ॥ ३ ॥

वसुदेव उवाच ॥

वसुदेवजी बोले, कि—हे भगवन् ! जैसे माता पिता का आगमन अपनी संतान के मंगल के लिये होता है, और जैसे, परमेश्वर के मार्ग रूप महान् लोगों का आगमन विचारे कृपणों के मंगल के लिये होता है। इसी प्रकार यह आपका शुभागमन सर्व प्राणियों के मंगलार्थ है ॥ ४ ॥

देवताओं का चरित प्राणियों को सुख देने वाला है और दुःखदेने वाला भी है, परन्तु आप सदृश अच्युत में चित्त लगाने वाले साधुओं का चरित तो सदा सुख ही के देने वाला है ॥ ५ ॥

जो लोग देवताओं को जिस प्रकार भजते हैं, वे देवलोग भी उनको उसी प्रकार भजते हैं। जैसे, कि—पुरुष जितनी चेष्टा करता है छाया भी उतनी ही चेष्टा करती है इसी प्रकार पुरुष जितना कर्म करता है, देवता भी उतनीही सहाय करते हैं। ऐसे साधु लोग नहीं होते हैं, किन्तु वे लोग तो विना उपकार भी दीन मात्र को देखकर दया करते हैं ॥ ६ ॥

हे भगवन् ! इस रीति से हम तो आपके आगमन मात्र से ही कृतार्थ हुए, तो भी हे ब्रह्मन् ! मैं आप से भागवत धर्मों को पूछता हूं कि—जिनके सुनने मात्र से ही पुरुष सर्व भय से छूटजाता है ॥ ७ ॥

हे श्रीनारदजी ! मैंने तो पूर्व जन्म में इस पृथिवी पर मुक्ति देने वाले श्रीअनन्त भगवान् को संतान केही अर्थ पूजा, मोक्ष के लिये नहीं, क्योंकि ? मैं देवमाया से मोहित होगया ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अतो यथा मुच्येमहि तथा नोऽस्मान् शाधि शिक्षय विचित्राणि व्यसनानि यस्मिन् संसारे तस्मात् संसारात् तथा विश्वतः सर्वतो भयं यस्मिंस्तस्मात् भवद्भिर्हेतुभूतैः अञ्जसाऽनायासेन अद्धा साक्षात् ॥ ९ ॥

तमाहुर्वासुदेवांशं मोक्षधर्मविवक्षया ।
अवतीर्णं सुतशतं तस्याऽऽसीद्ब्रह्मपारगम् ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

हरेर्गुणैर्वर्णनीयत्वेन प्रस्तुतैर्हरिः संस्मारित इत्यर्थः ॥ १० ॥

प्रीतिमाविष्करोति–सम्यगिति त्रिभिः । पृच्छसे पृच्छसि विश्वभावनान् सर्वशोधकान् ॥ ११ ॥

आद्दतः आस्तिक्येन गृहीतः अनुमोदितः परैः क्रियमाणः संस्तुतः सद्धर्मो भागवतो धर्मः देव ! हे वसुदेवेत्यर्थः । यद्वा, देवेभ्यो विश्वस्मै च द्रुह्यन्ति ये तानपि ॥ १२ ॥

किञ्च, त्वया महानुपकारः कृत इत्याह–त्वयेति । पुण्ये श्रवणकीर्तने यस्य सः ॥ १३ ॥

अत्रापि भगवद्धर्मनिर्णयेऽपि विदेहस्य जनकस्य ॥ १४ ॥

आर्षभाणामुत्पत्तिं सान्वयां विविच्य कथयति, प्रियव्रत इति सप्तभिः ॥ १५ ॥

मोक्षधर्मविवक्षया मोक्षधर्माणां प्रवर्तनेच्छया अवतीर्णं वासुदेवांशमाहुः तस्य च वेदपारगं सुतशतमासीत् ॥ १६ ॥

———

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

यतोऽहं मोक्षाय नापूजयमतः तस्मात् संसारात् साक्षात् "तस्य तावदेव चिरं यावन्नविमोक्ष्येऽथ सम्पत्स्ये" इति श्रुतेः विदेहमुक्तिं प्राप्तुम इत्यर्थः ॥ ९ ॥

वर्णनीयत्वेन वक्तव्यत्वेन प्रस्तुतैः प्रकरणप्राप्तैर्गुणैः कर्तृभिः हरिं प्रति संस्मारितः ॥ १० ॥

प्रीतिमनुमोदनात्मकप्रसादं भागवतान् धर्मान् पृच्छसे इति यत् एतद्गता सम्यक् व्यवसितं निश्चितमित्यन्वयः ॥ ११ ॥

पूर्वार्थे नामैकदेशस्य भामादिशब्दवत् नास्ति लक्षणेत्यरुचौ यद्वेति विश्वस्मै सर्वस्मै जीवमात्रायेत्यर्थः ॥ १२ ॥

नारायणो भागवतधर्मोपदेशे मम गुरुर्बदरीपतिर्नारायणर्षिः मां प्रति स्मारितः यतः कृष्णोपासनावेशेन तस्यापि विस्मृतिर्जाता ॥ १३ ॥

संवादं संवादरूपमितिहासम् ॥ १४ ॥

सान्वयां सवंशां सुतोऽन्वय इति च पाठद्वयं तस्य प्रियव्रतस्य ॥ १५ ॥

तम् ऋषभं तस्य ऋषभस्य ॥ १६ ॥

———

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

अञ्जसा मुच्येम तथा नः अद्धा शाधि अञ्जसा शाधि ॥ ९—११ ॥

देवविश्वद्रुहोऽपि ॥ १२—१८ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अतो यथा विचित्राणि व्यसनानि दुःखानि यस्मिंस्तस्मात् सर्वतो भयावहात्संसारार्णवात् अञ्जसा सुखेनाद्धा स्फुटम् मुच्ये मुक्तो भवेयं (मुच्येम मुक्ता भवेम) तथा हे सुव्रत ! नोऽस्मांच्छाधि शिक्षय ॥ ९ ॥

राजोवाचेति । हे राजन्नेवं श्रीमता वसुदेवेन कृतः प्रश्नो यस्य स देवर्षिः हरेर्गुणैर्वर्णनीयैः संस्मारितः " यदनन्तानुस्मरतेः कर्मणि कः " तत एव प्रीतस्तं वसुदेवमाह ॥ १० ॥

तावत्प्रश्नमभिनन्दति– सम्यगित्यादिभिः त्रिभिः । हे सात्वतर्षभ ! तवैतत्सम्यग्व्यवसितं निश्चितं परमार्थविषयनिश्चयात्मकबुद्धिमांस्त्वमित्यर्थः । कुतः ? यद्यस्माद्भागवतान् धर्मान् पृच्छसे भागवतधर्मप्रश्नेन लिङ्गेन त्वां परमार्थविदमनुमनोमीति भावः तत्र हेतुत्वेन तान्विशिनष्टि—विश्वभावनान् जगदभ्युदयकरान् ॥ ११ ॥

किञ्च, श्रवणादिविषयः सन् सद्धर्मो भागवतधर्मः हे देव विश्वद्रुहः विश्वेभ्यो भूतेभ्यो द्रुह्यन्तीति तथा तानपि सद्य एव पुनाति ॥ १२ ॥

किञ्च, महानुपकारस्त्वया कृत इत्याह–त्वयेति । पुण्यावहं श्रवणं कीर्तनं च यस्य सः परमकल्याणः निःशेषमङ्गलदो भगवान्नारायणोऽधुना मम स्मारितः ॥ १३ ॥

इत्थं प्रश्नमभिनन्द्य तस्य विदेहार्षभसंवादात्मकम् उत्तरं वक्ष्यन् प्रस्तौति—अत्रापीति । अत्रापि त्वत्प्रश्ने महात्मनो विदेहस्य जनकस्यार्षभाणां च संवादं तद्रूपम् इतिहासम् उदाहरन्त्युत्तरत्वेन उदाहरन्ति (वदन्ति) त्वत्प्रश्नस्य विदेहप्रश्नतुल्यत्वात्तत्र यदुत्तरं तदेव त्वत्प्रश्नेऽप्युत्तरम् इत्यभिप्रायेणोदाहरन्तीत्युक्तम् ॥ १४ ॥

के ते आर्षभाः ? इत्यत्रान्वयकथनेन तान् वर्णयति—प्रियव्रत इति सप्तभिः । स्वायम्भुवस्य स्वयम्भुवो ब्रह्मणः पुत्रस्य मनोः यः सुतः प्रियव्रतो नामासीत्तस्याग्नीध्रः सुत इति सम्बन्धः ॥ १५ ॥

तमृषभं मोक्षधर्मान् वक्तुमिच्छयाऽवतीर्णं वासुदेवांशमाहुः तस्यर्षभस्य सुतशतमासीत् कथम्भूतं ब्रह्मपारगं ब्रह्मशब्दस्तन्त्रेण वेदपरः परब्रह्मपरश्च पारशब्दस्तु यथावस्थितस्वरूपपरः उभयोरप्यानन्त्यात्तत्र केचिद्वेदपारगाः केचित्तूभयपारगाश्चेति ज्ञेयम् ॥ १६ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

वन्ध्यपुत्रस्य जीवत्पुत्रमुखदर्शनाल्लोकावाप्तिः श्रूयते अतः कथं प्रजार्थं इति निन्दाध्वनिरिति तत्राह—यथेति । अस्मिन् भवे जन्मनि विचित्रव्यसनात् नानाक्लेशात् विश्वतो भयाद्यथाऽञ्जसा क्षिप्रं मुञ्चेमहि तथा पुनरद्धा प्रत्यक्षं शाधीत्यन्वयः " अद्धा प्रत्यक्षसत्ययोः " इति यादवः । अनेन वसुदेवस्य पुत्रीभूतश्रीकृष्णमुखेन्दुदर्शनादशेषव्यसनाकुलसंसारान्मुक्तेर्निश्चि-

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तत्त्वेपि विशेषप्रश्नो लोकहितायेति ज्ञातव्यम् ॥ ९ ॥

वसुदेवेन पृष्टो नारदः किञ्चित्तगुणोभूदिति राज्ञो हार्दं चोद्यं परिहरति-राजन्निति । हरेर्गुणैः संस्मारितो हरिरिति शेषः ॥ १० ॥

बुद्धेर्विकासाय प्रष्टारं स्तौति—सम्यगिति । विश्वस्याभीष्टस्य भावनमुत्पादनं येऽपस्ते तथा तान् ॥ ११ ॥

एतदेव विवृणोति—श्रुत इति । देवशब्दस्य विश्वान्तर्भावेपि पृथक् ग्रहणमनिवर्त्यं दोषपरिहारसामर्थ्यसूचनार्थं कृतम् एतदेवापिशब्देनासूचयत्—

"ब्रह्महत्यासहस्रस्य पापं शाम्येत्कथञ्चन ।
न पुनस्त्वदवज्ञाने कल्पकोटिशतैरपि" ॥

इममर्थं हिशब्देन सूचयति ॥ १२ ॥

ममाप्यनेन पुण्यबुद्धिरभूदित्याशयेनाह-त्वयेति । नित्यं स्मृतोपि इदानीं विशेषतः स्मारिता गुणकथनप्रश्नेन ॥ १३ ॥

धीमत्त्वेन वसुदेवस्य नारदोक्तौ विस्रम्भेपि स्वकपोलकल्पितत्वेन न श्रद्धेयमिति मन्दाशङ्कापनोदाय तत्प्रश्नपरिहारत्वेन जनकार्षभसम्वादमितिहासं वक्ति अत्रेति ॥ १४ ॥

निश्चयजननायान्वयशुद्धिं कथयति-प्रियव्रत इत्यादिना ॥१५॥

अवतारप्रयोजनमाह—मोक्षेति ॥ १६ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

विश्वतोभयात् सर्वतोपि भयहेतोरपि ब्रह्मशापात् ॥ ९ ॥

हरेर्गुणैस्तत्किन्नवतीर्णत्वात्तद्दर्शने प्रकाशितैः ॥ १० ॥

तत्र तदीयस्वप्रयोजनस्योत्तरं सर्वान्ते दास्यति भगवद्धर्मस्योत्तरमाह सम्यगिति ॥ ११—१२ ॥

नारायणस्तादृशधर्मो मदीयगुरुरूपो नारायणर्षिः स्मारित इति कृष्णोपासनावेशेन तस्यापि विस्मरणात् ॥ १३ ॥

अत्र श्रीनारायणोपदिष्टधर्मेष्युदाहरन्ति स्मरन्ति तच्छिष्या इति माहात्म्यविशेषायोक्तम् ॥ १४—२१ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

विश्वतो भयात् संसारात् ॥ ९ ॥

हरेरिति "अधीगर्थदयेशां कर्मणि"(२।३।५२) इति षष्ठी गुणैः सहितं हरिं संस्मारित इत्यर्थः ॥ १०—१४ ॥

आर्षभाणामित्युक्तं तत्र ऋषभ एव क इत्यत आह-प्रियव्रत इति ॥ १५—१८ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अतो विचित्रव्यसनात् विचित्राणि नानाविधानि व्यसनानि क्लेशानि यस्मिन् तस्मात् विश्वतः सर्वतो भयं यस्मिन् तस्मात्संसारात् भवद्भिर्हेतुभूतैः अञ्जसा अनायासेन यथा मुच्येमहि तथा नोऽस्मान् अद्धा प्रत्यक्षं सत्यं वा शाधि शिक्षय "अद्धा प्रत्यक्षसत्ययोः" इति यादवः ॥ ६ ॥

हे राजन् ! हे परीक्षित् कृताः प्रश्नाः येन स कृतप्रश्नः स चासौ वसुदेवश्च तेन हरेर्गुणैर्वर्णनीयत्वेन प्रस्तुतैर्हरिः देवर्षिं प्रति संस्मारितः यतः अतः प्रीतः देवर्षिस्तं वसुदेवं प्रत्याह ॥ १० ॥

तत्र तावत्प्रीतिमेवाह—सम्यगिति त्रिभिः । हे सात्वतर्षभ सात्वतमुख्य ! भवता एतत्सम्यक् व्यवसितं चिन्तितं यत् यस्माद्विश्वं सर्वं भावयन्ति शोधयन्तीति विश्वभावनान् सर्वशोधकान् भागवतान् धर्मान् पृच्छसे पृच्छसि ॥ ११ ॥

भागवताः धर्माः सर्वशोधका इत्युक्तमेव विवृणोति—श्रुत इति । धर्मानिति बहुवचनेन भगवद्धर्माणां बाहुल्यं दर्शितं तत्रैकैकोपि सद्धर्मो भगवद्धर्मः श्रवणाद्येकतमेन यत्नेनापि हि निश्चयेन सद्य एव नतु विलम्बेन देवविश्वद्रुहोपि पुनाति किम्पुनर्निर्दोषान् साधून् पुनातीति वक्तव्यम् किं पुनः सर्वे भगवद्धर्माः सर्वैर्यत्नैः पुनन्तीति वक्तव्यं देवाय विश्वस्मै च द्रुह्यन्तीति देवविश्वद्रुहः देवस्य विश्वविलक्षणत्वेन पृथग्ग्रहणम् अतिदोषवतो देवद्रुहोपि पुनाति किम्पुनर्विश्वद्रुह इति कैमुतिकन्यायप्रदर्शनार्थं तत्र श्रुतः श्रवणमात्रेण गृहीतः अनुपठितः वाङ्मात्रेण गृहीतः ध्यातः मनसा चिन्तितः आदृतः स्वधर्मतया स्वीकृतः अनुमोदितः सस्तुतः ॥ १२ ॥

भागवतधर्मप्रश्नेन ममाप्युपकारो भवता कृत इत्याह—त्वयेति । मम साम्प्रतं त्वया अद्य भगवान् स्मारितः । ननु, नित्यं साक्षाद्भगवान् श्रीकृष्णस्तव दृष्टिगोचर इह वर्तते एव पुनरद्य स्मारित इति तव वचनं किम्विषयमत्राह, परमकल्याण पुण्यश्रवणकीर्तन इति हे परमकल्याण ! परमपुरुषवात्सल्यरसभागित्वेनोत्कृष्टमङ्गलरूप ! पुण्ये श्रोतृभावयितृपरमफलदे श्रवणकीर्तने अध्ययनाध्यापने यस्य शास्त्रविचारलक्ष्यस्य स तथा चक्षुर्दृश्यकृष्णासक्त्या शास्त्रचिन्त्यांशेन स विस्मृतः । पुनस्तेनांशेनापि भागवतान् पृच्छता भवता शास्त्राध्ययनाध्यापनाभ्यासेन सुविज्ञेयोऽयं श्रीकृष्ण इत्येवं स्मारित इत्यर्थः । यद्वा, परमं भगवत्प्राप्तिरूपं कल्याणं याभ्यां ते पुण्यश्रवणकीर्तने यस्येत्येकं पदम् ॥ १३ ॥

उपदिश्यमानस्यार्थस्य स्वोत्प्रेक्षितत्वदोषापनोदनापाशिष्टनिर्णीतत्वेन प्राशस्त्यद्योतनाय च जनकार्षभसम्वादमाह—अत्रापीति । त्वत्सम्पृष्टभगवद्धर्मनिर्णयेऽपि ऋषभस्यापत्यान्यार्षभास्तेषाम् ॥ १४ ॥

आर्षभाः कस्य वंशे जाताः ? कीदृशं च तेषां चरित्रमित्याकाङ्क्षायां तेषां मनुवंशे उत्पत्तिं पारमहंस्यं चरित्रञ्चाह—प्रियव्रत इत्यादिनवभिः ॥ १५ ॥

तमृषभं वासुदेवांशमवतीर्णमाहुः अवतारप्रयोजनमाह—मोक्षधर्मविवक्षयेति । मोक्षोपायभूतानां भगवद्धर्माणां प्रवर्तनेच्छयेत्यर्थः ॥ १६ ॥

———

भाषा टीका ।

हे सुन्दर व्रत धारण करने वाले हे नारदजी ! आपकी कृपा से जैसें हम लोग इस विचित्र दुख वाले संसार से छूट जावैं आप हमको उसी प्रकार की शिक्षा दीजिये ॥६॥

तेषां वै भरतो ज्येष्ठो नारायणपरायणः ।
विख्यातं वर्षमेतद्यन्नाम्ना भारतमद्भुतम् ॥ १७ ॥
स भुक्तभोगां त्यक्त्वेमां निर्गतस्तपसा हरिम् ।
उपासीनस्तत्पदवीं लेभे वै जन्मभिस्त्रिभिः ॥ १८ ॥
तेषां नव नवद्वीपपतयोऽस्य समन्ततः ।
कर्मतन्त्रप्रणेतार एकाशीतिर्द्विजातयः ॥ १९ ॥
नवाऽभवन् महाभागा मुनयो[1] ह्यर्थशंसिनः ।
श्रमणा वातरशना आत्मविद्याविशारदाः ॥ २० ॥
कविर्हरिरन्तरिक्षः प्रबुद्धः पिप्पलायनः ।
आविर्होत्रोऽथ द्रुमिलश्चमसः करभाजनः ॥ २१ ॥
त एते भगवद्रूपं विश्वं सदसदात्मकम् ।
आत्मनोऽव्यतिरेकेण पश्यन्तो व्यचरन् महीम् ॥ २२ ॥
अव्याहतेष्टगतयः सुरसिद्धसाध्यगन्धर्वयक्षनरकिन्नरनागलोकान् ।
मुक्ताश्चरन्ति मुनिचारणभूतनाथविद्याधरद्विजगवां भुवनानि कामम् ॥ २३ ॥
त एकदा निमेः सत्रमुपजग्मुर्यदृच्छया ।
वितायमानमृषिभि[2] रजनाभे महात्मनः ॥ २४ ॥

भाषा टीका ।

श्रीशुक उवाच ।

श्रीशुकदेवजी बोले, कि—हे राजन् ! बड़े बुद्धिशाली वसुदेवजी ने जब ऐसा प्रश्न किया, तब देवर्षि श्रीनारदजी को श्रीहरि के गुणों का स्मरण हो आया, और नारदजी प्रसन्न होकर वसुदेवजी से कहने लगे ॥ १० ॥

नारद उवाच ।

श्रीनारदजी बोले, कि—हे यदुश्रेष्ठ ! हे वसुदेवजी ! यह तुमने बहुत ही अच्छा विचार किया, कि—जो विश्व को पवित्र करने वाले भागवत धर्मों का प्रश्न किया ॥ ११ ॥

हे वसुदेवजी ! वह सद्धर्म अर्थात् भागवत धर्म कैसा है, कि—इसका श्रवण किया हो, पठन किया हो, ध्यान किया हो, आदर किया हो, अथवा अनुमोदन किया हो, आचर करै तब तो कहना ही क्या है, परंच श्रवणादि से भी यह भागवत धर्म विश्व के द्रोह करने वालों को भी तत्काल पवित्र करता है ॥ १२ ॥

हे वसुदेवजी ! तुम धन्य हो, तुमने भागवत धर्मों के प्रश्न करने से, पवित्र करने वाला श्रवण कीर्त्तन जिनका ऐसे परमकल्याण रूप भगवान् जो श्रीनारायण देव हैं, तिनका मुझको स्मरण करा दिया ॥ १३ ॥

इस भागवत धर्म के विषय में भी लोग इस प्राचीन इतिहास का उदाहरण देते हैं। इस इतिहास में श्रीऋषभदेव के पुत्र नव योगेश्वर और महात्मा श्रीविदेहराज राजा निमि का संवाद है ॥ १४ ॥

स्वायंभुव मनु के जो प्रियव्रत पुत्र हुए, तिनके आग्नीध्र हुए, तिन से नाभि महाराज, तिन नाभि महाराज के पुत्र श्रीऋषभ देवजी हुए हैं ॥ १५ ॥

उनको मोक्ष धर्म के प्रवर्त्तन करने की इच्छा से अवतार लेने वाले श्रीवासुदेव भगवान् के अंश रूप कहते हैं। उनके सौ १०० पुत्र वेद में पारंगत होते हुए ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तेषामृषभसुतानां मध्ये नवयोगीश्वराणां चरितं वक्तुमितरेषां चरितं ततो विविच्याऽऽह—तेषामिति । एतदजनाभं नाम वर्षं यस्य नाम्ना भारतमित्यद्भुतं विख्यातमासीत् एतेन तस्य धर्मातिरेको निरूपितः ॥ १७ ॥

इमां पृथ्वीं गृहान्निर्गतः हरिमुपासीनः सेवमानः सन् ॥ १८ ॥

नव सुताः नवद्वीपपतयो नवानां ब्रह्मावर्त्तादिभूखण्डानां

(१) ह्यूर्द्धमन्थिनः (२) राजनाभा इति विज० पा० ।

श्रीधरस्वामिकृतभावार्थदीपिका ।

पतयः अस्य भारतस्य वर्षस्य एकाशीतिसुताः कर्ममार्गप्रवर्त्तका ब्राह्मणा अभूवन् ॥ १६ ॥

अर्थशंसिनः परमार्थनिरूपकाः श्रमणाः श्रमवन्तः आत्माभ्यासे कृतश्रमा इत्यर्थः । वातरशना दिगम्बराः आत्मविद्यायां विशारदा निष्णाताः ॥ २० ॥ २१ ॥

तेषां पारमहंस्यचरितमाह—त एत इति द्वाभ्याम् । भगवद्रूपं विश्वं पश्यन्तः सदसदात्मकं स्थूलसूक्ष्मरूपम् तच्च स्वाऽव्यतिरेकेण पश्यन्तः ॥ २२ ॥

अव्याहता अप्रतिहता इष्टा अभिप्रेता गतिर्येषां ते मुक्ताः अनासक्ताः ॥ २३ ॥

महात्मनो निमेः वितायमानमनुष्ठीयमानम् अजनाभे भारतवर्षे ॥ २४ ॥

———

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी ।

तेषां भरतादीनाम् एकोत्तरनवतिसमानां तेभ्यो नवयोगेश्वरेभ्यः विविच्य पृथक्कृत्य एतेन स्वनाम्ना वर्षप्रख्यापनेन तस्य भरतस्य धर्मातिरेको धर्माधिक्यम् ॥ १७ ॥

तपसा ध्यानलक्षणेन "तप आलोचने" इत्यस्मात् "यस्य ज्ञानमयं तपः" इति श्रुतेः । मन इन्द्रियैकाग्र्येणेति वा "मनसश्चेन्द्रियाणाञ्च ह्यैकाग्र्यं परमं तपः" इति स्मृतेः ॥ १८ ॥

तेषाम् ऋषभसुतानां मध्ये ये नवसुतास्ते अस्य भारतवर्षस्य समन्ततो ये नव द्वीपाः ब्रह्मावर्तादिभूखण्डास्तेषां पतयो बभूवुरित्यन्वयः ॥ १९ ॥

ह्रित्र पादपूरणे रसनाशब्दस्य वस्त्रे लक्षणा "श्यामो हिरण्यवसनोऽर्ककिरीटजुष्टः" इत्यत्र चतुर्थे स्वामिभिरेव तथा व्याख्यानात् वातवसना इति गौडीय एव पाठो न तु स्वामिसम्मतः ॥ २० ॥

द्रुमिल इत्येव पाठः नतु द्रविड इति निरर्थकत्वेन वक्ष्यमाणानुपयोगित्वात् ॥ २१ ॥

भगवान् परं ब्रह्मैवाधिष्ठानतया रूपं यस्य तादृशं पश्यन्तः कल्पितस्याधिष्ठानरूपमन्तरा स्वतोऽनिरूप्यत्वात् तच्च ब्रह्मस्वरूपमपि स्वाऽव्यतिरेकेण स्वं पदार्थभेदेन स्थूलसूक्ष्मरूपं महदाद्याकाशादिरूपम् ॥ २२ ॥

मुन्यादीनां भुवनानि च कामं यथेच्छम् ॥ २३ ॥

महात्मनो विमुक्तचित्तस्य "यदृच्छया क्षेरितया" इति भक्तकृपाया यादृच्छिकत्वमभिप्रेतम् ऋषिभिःऽनुष्ठीयमानम् ॥ २४ ॥

———

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

नव पुत्राः नवानां द्वीपानां पतयः ॥ १९—२१ ॥

सदसदात्मकम् आत्मनः परमात्मनः अव्यतिरेकेण शरीरतया नित्यसम्बन्धत्वेन ॥ २२-२६ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तेषां शतसङ्ख्यानां ज्येष्ठो भरतः स च नारायणः परायणं परं प्राप्यम् उपायश्च यस्य सः एतदजनाभं नाम वर्षं यस्य नाम्ना भारतमित्यद्भुतं विख्यातमासीत् स भरत इति सम्बन्धः अनेन तस्य धर्मानतिक्रम उक्तः ॥ १७ ॥

स भरतः भुक्ताः भोगाः यस्यां ताम् इमां स्ववशां पृथ्वीं त्यक्त्वा गृहान्निर्गतस्तपसा वर्णाश्रमोचितधर्मेण हरिमुपासीनस्त्रिभिर्जन्मभिस्तस्य हरेः पदवीं प्रकारं साधर्म्यमिति यावत् लेभे प्राप्तवान् वा (वै) इत्यनेन प्रसिद्धिः सूच्यते ॥ १८ ॥

तेषां भरतानुजानामेकोनशतसङ्ख्यानां मध्ये नव इलावर्त्तब्रह्मावर्त्तार्यावर्तमलयकेतुभद्रसेनेन्द्रस्पृग्विदर्भकीटकनामानो नव समन्ततः समन्तादस्य भारतवर्षस्य ये नव द्वीपाः खण्डाः स्वतुल्यनामानः तेषामधिपतयः बभूवुरित्यर्थः । एकाशीतिसङ्ख्यास्तु द्विजातयः कर्मतन्त्रप्रवर्त्तका बभूवुः ॥ १९ ॥

अवशिष्टा नव तु मुनयो बभूवुः तानेव विशिनष्टि—महाभागा ज्ञानवैराग्यादिभाग्ययुक्ताः अर्थशंसिनः परमार्थनिरूपकाः श्रमणाः श्रमवन्तः अध्यात्मविद्यापरिश्रमयुक्ता इत्यर्थः । अत एवात्मविद्यायां विशारदाः प्रवीणाः वातरशना दिगम्बरा नग्नाः ॥ २० ॥

नामभिस्तान्निर्दिशति—कविरिति ॥ २१ ॥

तेषां पारमहंस्यं चरितमाह—त इति द्वाभ्याम् । भगवच्छरीरभूतं चिदचिदात्मकं विश्वं परमात्मनोऽपृथग्भावेन पश्यन्तो व्यचरन् । २२॥

अव्याहता अप्रतिहता इष्टा अभिमता गतिर्येषां ते मुक्ताः काम्यनासक्ताः सुरादीनां लोकान् मुनिप्रभृतीनां भुवनानि स्थानानि च कामं यथेष्टं चरन्ति चेरुरद्यापि चरन्तीत्यभिप्रायेण वर्तमाननिर्देशः अनेन तेषां जनकस्य च कथं सङ्गोऽभूदित्याशङ्का शमिता ॥ २३ ॥

तदेवाभिप्रेत्याह—त एकदेति । ते कव्यादयस्तत्र तत्र सञ्चरन्तः एकदा अजनाभे भारतवर्षे ऋषिभिर्वितायमानमनुष्ठीयमानं महात्मनो निमेर्जनकस्य सत्रं यदृच्छयोपजग्मुः ॥ २४ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यन्नाम्ना भारतमिति यस्य नाम्ना एतद्वर्षं भारतमिति विख्यातम् अद्भुतं पुण्यसाधननिमित्तत्वेन ॥ १७ ॥

तत्पदवीं तस्य हरेः पदवीम् अयनं लोकमित्यर्थः ॥ १८ ॥

तेषां मध्ये नवास्य भूमण्डलस्य नवद्वीपपतयः अभवन् तेषां मध्ये एकाशीतिसङ्ख्याता द्विजातयो बभूवुः किं कर्माण इत्यत्राह—कर्मेति । कर्मतन्त्रप्रणेतारः कर्मकाण्डप्रणेतारः ॥ १९ ॥

तेषां मध्ये नव सङ्ख्याता मुनयोऽभवन् तत्रापि विशेषमाह, ऊर्ध्वमन्थिन इति । ऊर्ध्वं मन्था रेत एषामस्तीति ऊर्ध्वमन्थिनः ऊर्ध्वरेतसः सन्न्यासव्रतधारिण इत्यर्थः । स्पष्टमाह—श्रमणा इति, श्रमणा भिक्षवः तत्रापि विशेषमाह—वातरशना इति । वात एव रशना कटिसूत्रं येषान्ते तथा दिगम्बराः परमहंसा इत्यर्थः । आत्मविद्यायां वेदान्तशास्त्रे विशारदाः पटवः ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

एतन्नामनिरुक्तिज्ञानादयमर्थः स्फुट इति तन्नामान्याह—कवि रित्यादिना । द्रुतं मिलं मिथो मेलनं वेदार्थानामेकीकरणं येन स तथा चाम्यन्ति वेदतीर्थम् इति चमा वेदतीर्थपायिनः तेषु सारश्रमसः "स्रु गतौ" इति धातोः डप्रत्ययः करे मान्तजनयति प्रकाशयतीति करभाजनः हस्तामलकवत् प्रतिभातवेदार्थ इत्यर्थः ॥ २१ ॥

आत्मविद्यावैशारद्यञ्चात्मभेदज्ञानेनेति भावेनाह—त एत इति । ये मुनित्वेनोक्तास्त एते महीं व्यचरन्नित्यन्वयः । किं विशिष्टाः विश्वं पूर्णं सदसदात्मकं कार्यकारणव्यापिभगवद्रूपम् आत्मना जीवाद्व्यतिरेकेण वैलक्षण्येन पश्यन्त इति. यद्वा, सदसदात्मकं भगवद्रूपं भगवतो मूर्त्तं प्रतिमास्थानीयं विश्वं प्रपञ्चमात्मनो हरेर्व्यतिरेकेण पश्यन्त इति यद्वा, विश्वमन्तः प्रविश्य वर्त्तमानं सदसदात्मकं बहिश्च जगत् व्याप्य वर्त्तमानं भगवद्रूपं ब्रह्मसंज्ञमात्मनोन्तर्यामिणो हरेर्व्यतिरेकेणाभेदेन पश्यन्तः "अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः" इति श्रुत्यर्थं समनुभवन्त इत्यर्थः । विश्वस्य परमात्मनोऽभेददर्शनं सदसदात्मकमिति विशेषणेन विरुद्धमनङ्गीकारात् जहदजहल्लक्षणाप्यप्रामाणिकीत्युपेक्षणीयं तन्मतमिति ॥ २२ ॥

महीसञ्चरणं चारकाणामप्यस्ति किं विशेषमाहात्म्यमेषामत्राह—अव्याहतेति । मुक्ताः जीवन्मुक्ताः मुनिचारणादीनां भुवनानि लोकांश्चेति सुरसिद्धादीनां लोकांश्चरन्तीति किं कर्मवशान्नेति आह, काममिति । बलवता प्रतिबन्धे कामतोपि सञ्चरणं दुःशकं स्यादित्यत उक्तम् अव्याहतेति ॥ २३ ॥

किमनेन प्रकृत इति तत्राह—त एकदेति । अजनाभस्य हरेः पुत्राः भाजनाभाः ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

भगवतो रूपं स्फूर्त्तिर्यत्र तादृशं पश्यन्तः सदसदात्मकं स्थूलसूक्ष्मरूपं तच्चात्मनो व्यतिरेकेण आत्मानमपि तदनुगतं पश्यन्त इत्यर्थः ॥ २२ ॥

मुन्यादीनां भुवनानि च ॥ २३—२७ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तेषाम् ऋषभपुत्राणां मध्ये नवद्वीपपतयो नवानां ब्रह्मावर्त्तादिभूखण्डानां पतयः अस्य भारतवर्षस्य एकाशीतिपुत्राः कर्ममार्गप्रवर्त्तका ब्राह्मणा अभवन् ॥ १९ ॥

अर्थशंसिनः परमार्थनिरूपकाः श्रमणा आत्माभ्यासे कृतश्रमा इत्यर्थः । वातरशना इति वसनापदेन वसनं लक्ष्यते दिगम्बरा इत्यर्थः ॥ २० ॥ २१ ॥

आत्मनः परमात्मनः सकाशादव्यतिरेकेण विश्वस्य तच्छक्तिमयत्वादिति भावः ॥ २२—२५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

प्रस्तुतानां नवार्षभाणां चरितं वक्तुमन्येषां चरितानि तेभ्यो विविच्याऽऽह—तेषामिति । तेषां शतसङ्ख्याकानामृषभसुतानां मध्ये भरतो ज्येष्ठः जन्मनेति शेषः । गुणतोपि स ज्येष्ठ इत्याशयेन तं विशिनष्टि—नारायणपरायण इति । एतदजनाभं नाम वर्षं यद्यस्य नाम्ना भारतमिति विख्यातम् सर्वेषां वर्षाणांमध्ये भगवत्प्राप्तिसाधनस्थानत्वेन भारतस्य श्रैष्ठ्यं दर्शयितुं तद्विशिनष्टि—अद्भुतमिति ॥ १७ ॥

स भरतः इमां वसुधां त्यक्त्वा निर्गतः गृहादिति शेषः तपसा हरिमुपासीनः सेवमानस्सन् तत्पदवीं हरिभावापत्तिं त्रिभिर्जन्मभिर्लेभे प्राप ॥ १८ ॥

तेषांमध्ये नव अस्य भारतस्य वर्षस्य समन्ततः नवानां द्वीपानां ब्रह्मावर्तादिभूखण्डानां पतयोऽभवन् एकाशीति च कर्मतन्त्रस्य कर्मकाण्डस्य प्रणेतारः प्रवर्तकाः द्विजातयोऽभवन् ॥ १९ ॥

नव तु महाभागाः अतो मुनयोऽभवन् तत्रापि विशेषमाह—वात एव रशना कटिसूत्रं येषां ते तथा दिगम्बरा इत्यर्थः । अर्थशंसिनः वेदान्तार्थभूतभगवत्तत्त्वोपदेष्टारः यतः श्रमणाः वेदान्तेषु कृतश्रमाः तत्रापि आत्मविद्यायां वेदान्तशास्त्रे विशारदाः पटवः ॥ २० ॥

तेषां नामान्याह—कविरिति ॥ २१ ॥

आत्मविद्याविशारदा इत्युक्तं तच्चात्मविद्यावैशारद्यं विश्वभिन्नब्रह्मज्ञानेन भवत्यतस्तेषां विश्वभिन्नाभिन्नब्रह्मज्ञानकौशलमाह—त एते इति । ते च मुनयः सदसदात्मकं स्थूलसूक्ष्मरूपं विश्वं चिदचिदात्मकं सर्वं कार्यजातं भगवद्रूपं भगवतः चिदचिच्छक्तेः विश्वकारणस्य रूपम् अवस्थाविशेषं तदव्यतिरिक्तं पश्यन्तः आत्मनः भगवतो विश्वकारणात् व्यतिरेकेण च पश्यन्तो महीं व्यचरन्नित्यन्वयः । तथाह भगवान् सूत्रकारः "उभयव्यपदेशात्त्वहिकुण्डलवत्" (३।२।२७) इति अस्यार्थो वेदान्तकौस्तुभे द्रष्टव्यः ॥ २२ ॥

अव्याहता अनिवार्या इष्टगतिर्येषां ते मुक्तास्तत्र तत्रासक्तिरहिताः कामं यथेष्टं सुरादिलोकान् मुन्यादिभुवनानि च चरन्ति ॥ २३ ॥

एवं सर्वत्र चरमानाः एकदा अजनाभे भारतवर्षे ऋषिभिर्वितायमानमनुष्ठीयमानं निमेः सत्रं बहूपकारकं यज्ञं यदृच्छया उपजग्मुः न तु पाण्डित्यख्यापनादिप्रयोजनाय महात्मन इत्यनेन निमिभाग्यमेव तेषां तत्समीपगमने हेतुरिति द्योतयति ॥ २४ ॥

भाषा टीका ।

तिन सबो के मध्य में जेष्ठ पुत्र बडे नारायण परायण महाराज भरत हुए, जिनके नाम से यह अद्भुत भारतखण्ड विख्यात हुआ है ॥ १७ ॥

वे भरत महाराज इस प्रथिवी के भोगों को भोगकर इस पृथिवी को त्यागकर गृह से निकल गये, वन में जाकर

तान् दृष्ट्वा सूर्यसङ्काशान् महाभागवतान् नृप ! ।
यजमानोऽग्नयो विप्राः सर्व एवोपतस्थिरे ॥ २५ ॥
विदेहस्तानभिप्रेत्य नारायणपरायणान् ।
प्रीतः सम्पूजयाञ्चक्र आसनस्थान् यथाऽर्हतः ॥ २६ ॥
तान्रोचमानान् स्वरुचा ब्रह्मपुत्रोपमान्नव ।
पप्रच्छ परमप्रीतः प्रश्रयावनतो नृपः ॥ २७ ॥

विदेह उवाच ।

मन्ये भगवतः साक्षात्पार्षदान् वो मधुद्विषः ।
विष्णोर्भूतानि लोकानां पावनाय चरन्ति हि ॥ २८ ॥
दुर्लभो मानुषो देहो देहिनां क्षणभङ्गुरः ।
तत्रापि दुर्लभं मन्ये वैकुण्ठप्रियदर्शनम् ॥ २९ ॥
अत आत्यन्तिकं क्षेमं पृच्छामो भवतोऽनघाः ! ।
संसारेऽस्मिन् क्षणार्द्धोऽपि सत्सङ्गः शेवधिर्नृणाम् ॥ ३० ॥
धर्मान् भागवतान् ब्रूत यदि नः श्रुतये क्षमम् ।
यैः प्रसन्नः प्रपन्नाय दास्यत्यात्मानमप्यजः ॥ ३१ ॥

नारद उवाच ।

एवं ते निमिना पृष्टा वसुदेव ! महत्तमाः ।
प्रतिपूज्याब्रुवन् प्रीत्या ससदस्यर्त्विजं नृपम् ॥ ३२ ॥

भाषा टीका ।

तप से श्रीहरि की उपासना करते हुए तीन जन्मों में श्रीहरि की पदवी को प्राप्त होते हुए ॥ १८ ॥

अवशिष्ट जो रहे निन्यानवे (९९) पुत्र तिन में नव पुत्र इस भारत वर्ष के नवद्वीपों (खडों) के पति हुए, और इकयाशी ८१ पुत्र कोई महदनुग्रहाविरूप कारण से कर्ममार्ग के प्रवृत्त करने वाले ब्राह्मण होते हुए ॥ १९ ॥

और भी शिष्ट रहे जो बड़ भागी नव पुत्र वे नव योगेश्वर होते हुए, तथा परमार्थ के निरूपण करने वाले, आत्माभ्यास के विषै परिश्रम शाली, दिगंबर और वेदान्त विद्या में निष्णात होते हुए ॥ २० ॥

वे नव योगेश्वर ये हैं—कवि, हरि, अन्तरिक्ष, प्रबुद्ध, पिप्पलायन, आविर्होत्र, द्रुमिल, चमस, और करभाजन, ॥२१॥

ये नव योगेश्वर भगवद्रूप स्थूल सूक्ष्म इस विश्व को परमात्मा से अपृथक् सिद्ध देखते हुए, इस पृथिवी पर विचरते हुए ॥ २२ ॥

और इन योगेश्वर लोगों की अभीष्ट गति कहीं भी प्रतिहत नहीं होती है, ये योगेश्वर लोग, सुर सिद्ध साध्य गन्धर्व यक्ष नर किन्नर नाग इनके लोकों में; तथा मुनि चारण भूतनाथ श्रीमहादेवजी तथा विद्याधर द्विज और सुरभि प्रभृति गायें, इनके भुवनों में यथेष्ट विचरते रहते हैं, कहीं भी रुक नहीं सक्ते हैं ॥ २३ ॥

वे ही योगेश्वर एक समय इसी भारतवर्ष में विदेहराज महात्मा राजानिमि के यज्ञ में जिसमें कि—बहुत से ऋषि लोग अनुष्ठान कर रहे थे उसमें हरीच्छा से पहुंच गये ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

यजमानो निमिः अग्नय आहवनीयादयः विप्रा ऋत्विगादयः ॥ २५ ॥

अभिप्रेत्य ज्ञात्वा ॥ २६ ॥

स्वरुचैव रोचमानाजन्वाभरणादिप्रकाशैः ब्रह्मपुत्रोपमान् सनत्कुमारादिसदृशान् ॥ २७ ॥

परमप्रीत्या तद्दर्शनमभिनन्दति द्वाभ्याम्—मन्य इति । ननु, भगवतः पार्षदानां कथमत्रोपलब्धिस्तत्राऽह, विष्णोरिति । विष्णुभक्ता लोकपावनार्थं सर्वत्र पर्यटन्तीत्यर्थः ॥ २८ ॥

श्रीवल्लभाचार्यकृतभावार्थदीपिका ।

मया दुर्लभं लब्धमहो भाग्यमित्याह—दुर्लभमिति । बहवो देहा भवन्ति येषां ते देहिनो जीवास्तेषां क्षणभङ्गुरोऽपि मानुषो देहो दुर्लभः परमपुरुषार्थसाधनत्वात् वैकुण्ठः प्रियो येषां वैकुण्ठस्य वा प्रियास्तेषां दर्शनम् ॥ २९ ॥

हे अनघाः ! निरवद्याः भवतो युष्मानात्यन्तिकं क्षेमं पृच्छामः यतः क्षणार्धकालभवोऽपि सत्सङ्गः शेवधिर्निधिः निधिलाभे यथाऽऽनन्दो भवति तथाऽत्र परमानन्द इत्यर्थः ॥ ३० ॥

तदर्थं च भागवतान्धर्मान् ब्रूत यदि नोऽस्माकं श्रुतये श्रवणाय क्षमं योग्यं भवति कथम्भूतान् यैर्धर्मैः प्रपन्नाय भक्तायाजो हरिरात्मानमपि दास्यति तान् ॥ ३१ ॥

सहस्रदस्यैर्ऋत्विग्भिश्च वर्तमानं तेऽपि भगवद्धर्मश्रवणपरा बभूवुरित्यर्थः–

"भगवद्धर्मतद्भक्तमायातत्तरणानि च ।
ब्रह्म कर्मावतारेहा भक्तपात्य युगक्रमान् ॥
ज्ञातुं क्रमेण कृतवान्नव प्रश्नान्निमिर्नव ।
एकैकस्योत्तरं प्रोचुः कविमुख्या मुनीश्वराः ॥ ३२ ॥

———

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

तान् कव्यादीन् महाभागवतानां प्रभावं शृणिवत्वाश्रयेण सम्बोधनं नृपेति आहवनीयादयः कुण्डस्थाः आदिना गार्हपत्यदक्षिणाग्न्योः परिग्रहः ॥ २५ ॥

नारायणपरायणान् महाभागवतत्वेन परमदुर्लभान् मुक्तानामपीत्यादौ नारायणपरायणः "सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामुने" इति षष्ठोक्तेः आसनस्थान् कृत्वा यथार्हतः मानितविप्रभ्यो वैशिष्ट्येन ॥ २६ ॥

स्वरुचैव स्वकान्त्यैव एवकारार्थमाह–नत्विति । प्रश्रयेणान्तःस्थविनयेनावनतः कायेनापि नम्रः ॥ २७ ॥

तद्दर्शनं नवयोगेश्वराणां दर्शनं साक्षादिति स्तुतिमात्रव्यावृत्तिः अत्र त्वदीयपक्षे सर्वत्र मध्याहनेष्पत्तिरत्वात रूपान्तरेणापि पर्यटन्त्येव सर्वत्रेत्यध्याहारात् इत्यर्थः । इत्युक्तम् ॥ २८ ॥

दुर्लभं दर्शनं लब्धं परमेति पञ्चमपुरुषार्थपर्यन्तपुरुषार्थप्रदत्वादित्यर्थः । भक्तेः पञ्चमपुरुषार्थत्वं गौतमीये श्रीनारदेनोक्तम्–

"भद्रमुक्तं भवद्भिस्तु मुक्तिस्तुर्या परात्परा ।
निवर्हं यत्र चित्सत्ता तुर्या सा मुक्तिरुच्यते ॥
पूर्णाहंतामयी भक्तिस्तुर्यातीता निगद्यते " ।

इति श्रुतिश्च "सर्वैनमुपासीत" "मुक्तानामपि भक्तिर्हि परमानन्दरूपिणी" इत्यादिका ॥ २९ ॥

मूलेऽतः दुर्लभदर्शनस्य लब्धत्वात् आत्यन्तिकं निरवधिकं अस्मिन् क्षेमे सति भयमात्रं न स्पृशतीत्यर्थः । निधिः सर्वाभीष्टदः अत्र सत्सङ्गे गौणया वृत्त्या व्याख्यातत्वादित्यर्थ इत्युक्तम् ॥ ३० ॥

भगवद्धर्माणां तादृशक्षेमपर्यवसानात्तदर्थम् आत्यन्तिकक्षेमार्थं क्षमं कर्णेन्द्रियं योग्यं भवति आत्मानमपि किमुत स्वर्गादि दास्यतीति वर्तमानसामीप्यप्रयोगात् अनवरतं तदर्थं कुर्यादित्यर्थः ॥ ३१ ॥

ननु, राज्ञा स्पृष्टत्वात् कथं सदस्यादिसाहित्यमुक्तं तत्राह– नेऽपीति । अब्रुवन् क्रमेण सर्वेऽपि भगवद्धर्मप्रश्नः प्रथमः (१) तद्भक्तप्रश्नो द्वितीयः (२) मायाप्रश्नस्तृतीयः (३) तत्तरणप्रश्नश्चतुर्थः (४) ब्रह्मप्रश्नः पञ्चमः (५) कर्मप्रश्नः षष्ठः (६म) अवतारचेष्टाप्रश्नः सप्तमः (७) अभक्तपात्यप्रश्नोऽष्टमः (८) युगक्रमप्रश्नो नवमः (९) इति क्रमेण नव प्रश्नान्निमिर्नृपः योगेश्वरान् प्रति कृतवान् नवेत्यत्र नृप इति क्वचित् पाठः ॥ ३२ ॥

———

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

ब्रह्मपुत्रोपमान् भृग्वादितुल्यान् ॥ २७ ॥
पार्षदान् पार्षदतुल्यान् ॥ २८—२९ ॥
शेवधिः अपरिमितपुरुषार्थावहः ॥ ३० ॥
यैः प्रसन्न इति भवदुपदेशः भगवत्प्रसादचिह्नमित्यर्थः ॥
॥ ३१—३२ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तानिति । हे नृप ! वसुदेव ! सूर्यतुल्यांस्तान् कव्यादीन् महाभागवतान् दृष्ट्वा यजमानो निमिः विप्रा ऋत्विजः अग्नय आहवनीयादयः मूर्त्तिधराश्चेत्येते सर्वे उपतस्थिरे प्रत्युत्थितवन्तः ॥ २५ ॥

तान्नारायणपरायणानभिप्रेत्य चिह्नैर्विज्ञाय तावत्तदाऽऽसनस्थान् कृत्वा यथायोग्यं पूजयाञ्चक्रे ॥ २६ ॥

तानिति । तान् ब्रह्मपुत्रोपमान् भृग्वादितुल्यानितरां प्रीत नृपो विदेहः विनयेनावनतो नम्रः पप्रच्छ उवाचेत्यर्थः ॥ २७ ॥

तावत्तद्दर्शनेनात्मनः कृतार्थतां वक्तुं नानभिप्रैति–मन्य इति । वो युष्मान् साक्षाद्भगवतः मधुसूदनस्य मधुद्विषः पार्षदान् मन्ये तादात्म्यनिर्देशस्तु तुल्यत्वाभिप्रायात् अत्यन्तसादृश्यात्स एवायं गौरिति व्यपदेशवद्दर्शनात्सादृश्यं चात्र निरन्तरानुभवविषयतयावस्थितभगवत्स्वरूपस्वभावत्वं नन्वेवम्भूतानां कथमिहागमनं लोके सञ्चारस्तत्राह—विष्णोरिति । विष्णोर्भूतानि भक्ताः लोकपावनार्थं चरन्ति सर्वत्र पर्यटन्ति हि इत्यर्थः ॥ २८ ॥

अहो मम भाग्यं यतो दुर्लभमिदं प्राप्तमित्याह–दुर्लभ इति, देहिनाम् उच्चावचदेहधारिणां जीवानां ये देहास्तेषां मध्ये मानुषो देहो दुर्लभः सोऽपि क्षणभङ्गुरः सुकृतातिशयलभ्यत्वात्सर्वथा भगवदाराधनोपयुक्तत्वाच्च श्रेष्ठत्वात् दुर्लभ इत्यर्थः । तत्रापि तस्मिन् दुर्लभे मनुष्यजन्मन्यपि वैकुण्ठप्रियाणां वैकुण्ठो भगवानेव प्रियो येषां तेषां त्वादृशां भक्तानां दर्शनमत्यन्तदुर्लभं मन्य इत्यर्थः ॥ २९ ॥

अत इति । इह संसारे यतः क्षणार्धोऽपि क्षणस्यार्धे यस्मिंस्तथाभूतोऽपि सत्सङ्गः नृणां शेवधिरपरिमितपुरुषार्थावहः शेवं शिवं कल्याणं तद्दाति आदधातीति तथा अतो हे अनघाः योगेश्वराः! भवतो युष्मानात्यन्तिकं निरतिशयं क्षेमम् इदं तत्साध-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तस्याप्युपलक्षणं तदुभयं पृच्छामः, क आत्यन्तिकः क्षेमः ? किं वा तत्साधनम् ? इति पृच्छाम इत्यर्थः ॥ ३० ॥

भगवत्प्राप्तिरेव क्षेमः तत्साधनञ्च भागवतधर्मा एवेति चेत्तर्हि तान् ब्रूतेत्यभिप्रेत्याह—धर्मानिति । यदि नोऽस्माकं श्रुतये श्रवणाय क्षमा योग्या भवन्ति यदि तान् श्रोतुं वयं योग्यास्तर्हि ब्रूतेत्यर्थः । यैरात्यन्तिकक्षेमभगवत्प्राप्तिसाधनभूतैः प्रसन्नोऽपि भगवान् प्रपन्नाय शरणागतायात्मानं दास्यति आत्मसाम्यं साधर्म्यं दास्यतीत्यर्थः । आत्मानमपि तद्वशीकरोतीति वा ॥ ३१ ॥

इत्थमापृष्टास्ते क्रमेणोत्तरोत्तरं विपृच्छिषामुत्सादयन्तः प्रश्नाना मुत्तरायथाहुरित्याह देवर्षिः—एवमिति । हे वसुदेव ! सदस्यैः सभ्यैः ऋत्विग्भिश्च सह वर्तमानं नृपं निमिं प्रतिपूज्य प्रत्यभिनन्द्य प्रीत्या अब्रुवन् ॥ ३२ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इदमुपगमनं न द्वेषजनकं निमित्ताभावात् किन्तु सम्प्रीतिजनकं तल्लक्षणादर्शनादित्याह—तानिति । उपतस्थिरे साञ्जलिपुटा उत्थायाऽसेवन्त ॥ २५ ॥

तत्र विदेहेन इतरेभ्यः किं विशेषेण सेवितमत्राह—विदेह इति । अभिप्रेत्य सम्यक् ज्ञात्वा ॥ २६ ॥

ब्रह्मपुत्रोपमान् सनकादितुल्यान् तांस्तुवन् पप्रच्छ अभीष्टमिति शेषः ॥ २७ ॥

स्तुतिप्रकारः कथ्यते—मन्य इत्यादिना ॥ २८—२९ ॥

किमभीष्टमपाक्षीरत्राह—अत इति । यतो वैकुण्ठप्रियदर्शनं दुर्लभमतः करतलप्राप्तरत्नत्वात् भवतो येन निःश्रेयो नः स्यात् तदात्यन्तिकं क्षेमं मङ्गलसाधनमिति मोक्षसाधनं पृच्छाम इत्यर्थः । कार्येण कारणमुपलक्ष्यत इति न्यायोपपत्तेः । न केवलं प्रश्नप्रतिवचनाभ्यां तत्परिहारलक्षणं प्रयोजनं लभ्यते अपितु तयोश्चिरकालापेक्षितत्वेन प्रष्टृवक्तृपुरुषयोश्च तावत्कालं स्थितिपोक्तित्वेन लब्धेन तत्सङ्गेन सुखनिधिलक्षणं प्रयोजनं चेत्यभिप्रेत्य तत्सङ्ग इतीति, संसार इति शेवधिः सुखनिधिः ॥ ३० ॥

प्रधानसाधने साधनान्यपि वक्तव्यानीत्याह—धर्मानिति । श्रुतये श्रवणाय क्षमं योग्यं "कल्याणी ऋक् दक्षसञ्ज्ञा योग्या युक्ता हिता क्षमा" इति यादवः ॥ ३१—३२ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

विष्णोर्भूतानि पार्षदा एव रूपान्तरेणेति भावः ॥ २८-२९॥

आत्यन्तिकं क्षेममिति यस्मिन् सति भयमात्रं न स्पृशतीत्यर्थः । यतः संसार इति शेवधिः सर्वाभीष्टदः ॥३०॥

तादृशक्षेमपर्यवसानात् धर्मांश्च ब्रूत ननु, सर्व एव धर्माः क्रमेण तत्पर्यवसानास्तत्राह—भागवतानेव किमन्यैर्व्यवहितैरित्यर्थः । आत्यन्तिकं क्षेममित्येव निर्दिशन्ति, यैरिति । दास्यतीति वर्तमानसामीप्यप्रयोगात् शीघ्रमेवात्मानमनवरतस्फूर्त्यादिवशं कुर्यादित्यर्थः ॥ ३१ ॥

क्रमेण सर्वेऽप्यब्रुवन् तत्र प्रथमं कविरुवाचेत्यर्थः ॥ ३२ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

यथार्हतः यथोचितमित्यर्थः ॥ २६—२७ ॥

तेषां दर्शनमभिनन्दति द्वाभ्याम—मन्ये इति । ननु विष्णुपार्षदत्वे किमर्थमत्रागमनं तत्राह—विष्णोर्भूतानि जनाः पावनानि कृपया पवित्रीकर्त्तुमित्यर्थः ॥ २८ ॥

अतोऽद्य मया स्वभाग्यमेव प्रत्यक्षीकृतमित्याह—दुर्लभो मोक्षसाधनत्वात् तत्रापीति वैकुण्ठप्रियाणां मोक्षादप्यधिकस्य भक्तियोगस्य प्रदायकत्वात् ॥ २९ ॥

अत आत्यन्तिकमित्ययं भावः अतिथिष्वायातेषु कुशलप्रश्न आवश्यकः स च भवत्स्वात्मरामेषु साक्षात् कुशलस्वरूपेऽनुचितः स्वस्यापि व्यावहारिककुशलप्रश्नो भवत्स्वव्यर्थः अत आत्यन्तिकं पारमार्थिकमेव हे अनघाः ! न विद्यन्ते अघानि यत इति दर्शनदानमात्रेणैव मदघानि दूरीकृतान्येव किन्त्वभीष्टलाभोऽस्मदपेक्षितो वर्त्तत इत्यतः पृच्छामः । ननु, विलम्ब्य पृच्छतां तत्रातिशैघ्र्यं किमर्थमित्यत आह, क्षणार्द्धोऽपि क्षणार्द्धकालपरिमितोऽपि शेवधिर्निधिरत आकस्मिकं निधिं प्राप्य स्वाभीप्सितप्रार्थने कः खलु सोत्कण्ठो विलम्बेत भावः । मम तु कुतस्तावान् भाग्यविशेषो येन भवन्तोऽत्र चिरं स्थास्यन्तीति भावः ॥ ३० ॥

तर्हि पृच्छतां किं तवाभीष्टमत आह—धर्मानिति । श्रुतये तेषां धर्माणां श्रवणाय यदि नोऽस्माकं क्षमं योग्यं कर्णेन्द्रियमिति शेषः । ते च धर्मास्सारभूता एव वक्तव्या इत्याह यैरिति ॥ ३१—३२ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सूर्यसङ्काशान् ब्रह्मवर्चसयुक्तान् महाभागवतान् भगवदीयत्वेनान्तरीयप्रभावयुक्तान् दृष्ट्वा यजमानो निमिः अग्नयः आहवनीयाद्याः विप्रा ऋत्विगादयः सर्वे अन्ये च तत्रस्थाः उपतस्थिरे कृताञ्जलय उत्थायासेवन्त ॥ २५ ॥

तत्र निमिना विशेषतः पूजा कृतेत्याह—विदेह इति । अभिप्रेत्य ज्ञात्वा ॥ २६ ॥

तान् मुनीन् स्वरुचा रोचमानान् अलङ्कारादिनैरपेक्ष्येण स्वकान्त्यैव देदीप्यमानान् ब्रह्मपुत्रोपमान् सनकादितुल्यान् उद्दर्शनाभिनन्दनपूर्वकं पप्रच्छ अभीष्टमिति शेषः ॥ २७ ॥

तत्र तद्दर्शनमभिनन्दति—मन्ये इति द्वाभ्याम् । वो युष्मान् भगवतः पार्षदान्मन्ये । ननु, तत्पार्षदानामिहाऽटने किं प्रयोजनमत्राह—विष्णोर्भूतानि लोकानां पावनाय चरन्तिहीति । हि निश्चितं सर्वगस्य सर्वलोकस्वामिनः पार्षदाः सर्वत्र लोकपावनार्थं चरन्तीत्यर्थः ॥ २८ ॥

देहिनां नामादेहवतां जीवानां क्षणभङ्गुरोऽपि प्रतिक्षणं मनुष्य

कविरुवाच ।

मन्येऽकुतश्चिद्भयमच्युतस्य पादाम्बुजोपासनमत्र नित्यम् ।
उद्विग्नबुद्धेरसदात्मभावाद्विश्वात्मना यत्र निवर्तते भीः ॥ ३३ ॥
ये वै भगवता प्रोक्ता उपाया ह्यात्मलब्धये ।
अञ्जः पुंसामविदुषां विद्धि भागवतान् हि तान् ॥ ३४ ॥
यानास्थाय नरो राजन्! न प्रमाद्येत कर्हिचित् ।
धावन्निमील्य वा नेत्रे न स्खलेन्न पतेदिह ॥ ३५ ॥
कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वाऽनुसृतस्वभावात् ।
करोति यद्यत्सकलं परस्मै नारायणायेति समर्पयेत्तत् ॥ ३६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

मानोऽपि मानुषो देहो दुर्लभः दुष्प्रापः वैकुण्ठप्रियदर्शनयोग्यत्वात् भवतां दर्शनं महद्भाग्येनाद्य मया लब्धमिति भावः ॥ २९ ॥

अभीष्टं पृच्छति-अत इति द्वाभ्याम् । हे अनघाः ! निरवद्याः! यतः क्षणार्द्धोऽपि सत्सङ्गः शेवधिर्निधिः मोक्षसुखदः अतः भवतः युष्मान् आत्यन्तिकं क्षेमं मोक्षोपायं मुख्यं भागवतधर्मं पृच्छामः ॥ ३० ॥

तत्राऽत्रान्तरोपायानपि ब्रूतेत्याह-धर्मानिति । यदि नोऽस्माकं श्रुतये श्रवणाय क्षमं योग्यं भवति तर्हि भागवतान् यैः धर्मैः प्रसन्नः अजो नित्यमूर्त्तिः भगवान् प्रपन्नाय स्वशरणागताय "ष्ट्द गतौ" इत्यस्य रूपम् आत्मानमपि दास्यति तान् ब्रूत ॥ ३१ ॥

ते सर्वे एव निमिना पृष्टाः सदस्यैः ऋत्विग्भिश्च सह वर्त्तमानं निमिं प्रतिपूज्य अभिनन्द्य प्रीत्या अब्रुवन् कविमुखेनेति शेषः ॥ ३२ ॥

भाषाटीका ।

हे वसुदेवजी ! उन सूर्य सदृश कान्ति वाले महाभागवतों को देखकर यजमान (राजा निमि) अग्नि और ब्राह्मण ये सबही उठ खड़े हुए ॥ २५ ॥

और विदेह राजा उनों को नारायण परायण जानकर बड़े प्रसन्न हुए, और उनको आसनों पर विराजमान कराकर यथा योग्य पूजा करते भये ॥ २६ ॥

अपनी कांति से भ्राजमान भृगु सनकादिकों के सदृश उन योगेश्वरों से प्रसन्न और बड़े विनीत हो कर निमि राजा प्रश्न करते हुए ॥ २७ ॥

विदेह उवाच ॥

राजा निमि बोले, कि—मैं आप लोगों को साक्षात् मधुसूदन भगवान् के पार्षद जानता हूं । क्योंकि ? विष्णुभक्त लोग लोकों के पवित्र करने के लिये सर्वत्र विचरते रहते हैं ॥ २८ ॥

जीवों को क्षण भंगुर भी यह मनुष्य देह बड़ा दुर्लभ है, परंच उस मनुष्य देह में भी वैकुंठप्रिय जो आप सदृश भागवत जन हैं तिनका दर्शन और भी दुर्लभ है ॥ २९ ॥

हे अनघ हो ! हे योगेश्वर हो ! इसी से हम आप लोगों से अत्यन्तिक क्षेम पूछते हैं, क्योंकि इस संसार में मनुष्यों को अर्द्धक्षण भी सत्पुरुषों का संग मिलना एक निधि मिलने तुल्य है ॥ ३० ॥

तस्मात् यदि हमारे श्रवण करने के योग्य होवें तो आप भागवत धर्मों का वर्णन कीजिये, क्योंकि—जिन धर्मों से प्रसन्न होकर गोविन्द अपने प्रपन्नजन को अपने आत्मा (आप) को भी देदेते हैं, अर्थात् आप भी अपने भक्तजन के होजाते हैं ॥ ३१ ॥

नारद उवाच ॥

नारदजी बोले, कि—हे वसुदेवजी ! उन महत्तम भागवतों से जब राजा निमिने इस प्रकार पूछा, तब वे भी राजा के वचन की प्रसंशा कर बड़ी प्रीति पूर्वक सभ्य लोग और ऋत्विज लोगों के सहित राजा निमि से बोलते हुए ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

प्रथममात्यन्तिकं क्षेमं कथयति—मन्य इति । न कुतश्चिद्भयं यस्मात्तदकुतश्चिद्भयम् अत्र संसारेऽसदात्मभावादसति देहादावात्मभावनातो नित्यं सर्वदोद्विग्नबुद्धेः विश्वात्मना सर्वथा निःशेषं यत्र पादाम्बुजोपासने भीर्निवर्त्तते तत् ॥ ३३ ॥

भागवतधर्मलक्षणमाह—ये वै इति । मन्वादिमुखेन वर्णाश्रमादिधर्मादिधर्माननुक्त्वाऽतिरहस्यत्वात्स्वमुखेनैव भगवताऽविदुषामपि पुंसामञ्जः सुखेनैवाऽऽत्मलब्धये ये वै उपायाः प्रोक्तास्तान् भागवतान्धर्मान्विद्धि ॥ ३४ ॥

अञ्जःपदेनोक्तं सुकरत्वं विवृणोति-यानिति । यानास्थायाश्रित्य योगादिष्विव न प्रमाद्येत विघ्नैर्न विहन्येत किञ्च,

श्रीधरस्वामिकृतभावार्थदीपिका ।

निमील्य नेत्रे धावन्नपि इह एषु भागवतधर्मेषु न स्खलेत् निमीलनं नामाज्ञानम् यथाऽऽहुः ।

"श्रुतिस्मृती उभे नेत्रे विप्राणां परिकीर्त्तिते ।
एकेन विकलः काणो द्वाभ्यामन्धः प्रकीर्तितः" ॥ इति

अज्ञात्वापीत्यर्थः यथा पदन्यासस्थानमनतिक्रम्य शीघ्र परतः पदन्यासेन गतिर्धावनं तद्वदत्रापि किञ्चित् किञ्चिदतिक्रम्य (अतिशीघ्रं परस्यानुष्ठानं) अतिशीघ्रानुष्ठानं धावनम् तथा अनुतिष्ठन्नपि न स्खलेन्न प्रत्यवायी स्यात्तथा न पतेत् फलान्न भ्रश्येत् ब्राह्मणादीनामुक्तानपि धर्मान् कश्चिदकुर्वाणो भागवतान्धर्मान् श्रवणकीर्त्तनादीन् कुर्वाणस्तत्फलं प्राप्नुयादित्यर्थः ॥ ३५ ॥

ननु, केते भागवता धर्मा ईश्वरार्पितानि सर्वकर्माण्यपीत्याह—कायेनेति । आत्मना चित्तेनाहङ्कारेण वा अनुसृतो यः स्वभावस्तस्मात् अयमर्थः न केवलं विधितः कृतमेवेति नियमः स्वभावानुसारिलौकिकमपीति तथा च भगवद्गीतासु—

"यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यसि कौन्तेय ! तत्कुरुष्व मदर्पणम्" ॥ इति

यद्वा । ननु, कायादीनामेव कर्म नात्मन इत्याशङ्क्याऽह-अध्यासेनानुसृताद्ब्राह्मणत्वादि स्वभावाद्यत्करोतीत्यर्थः । तत्सकलं परस्मै परमेश्वराय नारायणायेति समर्पयेत् तथा सति सकलमपि कर्म भागवतो धर्मो भवतीति भावः ॥ ३६ ॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

ननु, प्रथमप्रश्नस्य कविनैव किमित्युत्तरं दत्तं न हर्यादिनेति चेदुच्यते कवेः प्रथमत्वात् प्रश्नस्यापि तत्त्वात् प्रथमस्य साम्येन तेनैव तदुत्तरम् एवं हर्यादिष्वपि तत्तत् साम्यं ज्ञेयं वृत्तिवैविध्येन तु "कविः कलयो निपुणदृक्" इत्यत्र सप्तमे स्वामिभिरेव कविर्विद्वान् इति व्याख्यातत्वाद्विदुषश्चैतदेव वैदुष्यं यद्भागवतधर्मवर्णनेनात्यन्तिकक्षेमापादनम् "एषा बुद्धिमतां बुद्धिः मनीषा च मनीषिणाम्"इति न्यायात् तस्मात् कविरेवैतत् प्रश्नोत्तरं कृतवान् तथैव पर परत्र व्याख्यास्यते अत्रासदात्मभावादित्यमुद्विग्नबुद्धेः पुंसः यत्र पादाम्बुजोपासने सर्वथा भीर्निवर्त्तते तदच्युतस्य पादाम्बुजोपासनमेवाह—न कुतश्चिद्भयमात्यन्तिकं क्षेमं मन्य इत्यन्वयः । उपासनं तद्रूपलीलास्फूर्त्यादिकमेव निःशेषमित्यनेन तादृशोपासनासाधनावस्थायामपि क्रमशो भयनिवृत्तिर्दर्शिता ॥ ३३ ॥

स्वमुखेनैवेति "कालेन नष्टा प्रलये वाणीयं वेदसंज्ञिता । मयादौ ब्रह्मणे प्रोक्ता धर्मो यत्र मदात्मकः" इत्यनुसारात् "श्रद्धामृतकथायां मे शश्वन्मदनुकीर्त्तनम्"इत्यादि वचनैः "यत् करोषि यदश्नासि"इत्यादि वचनैः स्वमुखेनैव भगवता श्रीकृष्णेनोपाया ये प्रोक्तास्तान् भागवतान् धर्मान् विद्धि अविदुषां पुंसामिति कर्त्तरि षष्ठ्यौ आत्मलब्धये आत्मनः स्वस्य कर्मभूतस्य लब्धये प्राप्तये उपाया इति स्वरूपलक्षणं भगवत्प्रोक्तत्वन्तु तटस्थलक्षणमिति ज्ञेयम् ॥ ३४ ॥

नर इति नृमात्रस्य तत्राधिकारिता निर्दिष्टा योगादिविलक्षणादिना कर्मतपःसाङ्ख्यज्ञानवैराग्यादिपरिग्रहः तत्र योगे सिद्धय एव विघ्नाः "अन्तरायान् वदन्त्येतान् युञ्जतो योगमुत्तमम्" इत्यादि वक्ष्यमाणत्वात् । कर्मणि तु मन्त्रादौ स्वरादिवैगुण्यमेव विघ्नः "इन्द्रशत्रुः"इत्यादिवत् तपसि तु गर्व एव सः "अधर्मांशैस्त्रयो भग्नाः स्मयसङ्गमदैस्तव"इत्युक्तेः । साङ्ख्ये तु ईश्वराऽमननात् माहात्म्याभाव एव सः "सर्वं वेदविरुद्धं च कपिलोऽन्यो जगाद ह"इत्युक्तेः यथावदात्मानात्मविवेकासम्पत्तेः ज्ञाने तु भगवदपराध एव सः "जीवन्मुक्ता अपि पुनर्बन्धनं यान्ति कर्मभिः । यद्यचिन्त्यमहाशक्तौ भगवत्यपराधिनः" इति वासनाभाष्योक्तेऽपि भगवत्पारिशिष्टवचनात् "नानुव्रजति यो मोहाद्व्रजन्तं जगदीश्वरम् । ज्ञानाग्निदग्धकर्मापि स भवेद्ब्रह्मराक्षसः" इत्यादि भारतादिस्मृतेश्च. वैराग्ये तु प्रसादाग्रहणमेव सः "प्रसादाग्रहणं विष्णोः"इति सेवापराधान्तर्गतत्वात् तदुक्तमभियुक्तैः "प्रापञ्चिकतया बुद्ध्या हरिसम्बन्धिवस्तुनः । मुमुक्षुभिः परित्यागो वैराग्यं फल्गु कथ्यते" इति अत्रापि भगवद्धर्मेऽपि पूजनस्तवपाठादौ व्युत्क्रमादिनानुष्ठानमेव धावनं तथानुतिष्ठन्नपि व्युत्क्रमादिना कुर्वन्नपि प्रत्यवायी प्रायश्चित्तभाक् न स्यात् फलात् भगवत्प्रसादलक्षणात् ॥ ३५ ॥

नन्विति शङ्का समाधानाभासः धर्मा इत्येतत्पर्यन्ता शङ्का ईश्वरेत्यादिसमाधानं सर्वकर्माण्यपि किं पुनः श्रवणादीनीति तेषां मुख्यतद्धर्मत्वम् अर्पितकर्मणान्तु तद्द्वारत्वेन तत्त्वमिति व्यञ्जितं तदुक्तं पद्मे "कुर्वाणा यत्र कर्माणि भगवच्छिक्षया सकृत् । गृणन्ति गुणनामानि कृष्णस्यानुस्मरन्ति च" इति पूर्वार्थे आत्मनोऽकर्त्तृत्वात् कथं कायादिकृतकर्मार्पणं सम्भवेत् परकृतस्य परेण समर्पणायोगादित्याशङ्का तदस्वस्थैवेत्यरुचौ यद्वेति तथा सति समर्पिते सति इति भावः इति वाक्योत्थाव्यङ्ग्योऽर्थः तत्र पापकर्मसमर्पणान्तु "मत्तुल्यो नास्ति पापात्मा नापराधी च कश्चन । परिहारेऽपि लज्जा मे किं ब्रुवे परमेश्वर"इति दैन्येन तन्निवेदनमेव ॥ ३६ ।

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

असदात्मभावात् असद्देहः देहात्माभिमानात् उद्विग्नबुद्धेः अच्युतपादाम्भोजोपासनमकुतश्चित् भयं मन्ये सर्वभयनिवारकं मन्ये यत्र उपासने कृते विश्वात्मना सर्वप्रकारेण भयं निवर्त्तते ॥ ३३ ॥

न प्रमाद्येत् भगवद्धर्मनिष्ठानां न प्रमादोऽस्तीत्यर्थः । धावन्निमील्य नयने इति सर्वदा भगवानेव रक्षक इति तात्पर्यः ॥ ॥ ३४—३५ ॥

अनुसृतस्वभावः अनुभूतसं[illegible]ासनः यद्यत्करोतीति शास्त्राविरुद्धं लौकिकं च यद्यत्करोतीत्यर्थः ॥ ३६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

उत्तरमाह-मन्य इत्यादिना । तदर्थोदित इत्यन्तेन तत्र तावदात्यन्तिकं क्षेमं तत्साधनं चाह कविः—मन्य इति । अत्र

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

जीवदशायां नित्यमच्युतस्य यत्पादाम्बुजोपासनं तदकुतश्चिद्भयं मन्ये न कुतश्चिद्भयं यस्मात्तत्तथा आगामिदुःख(हेतु) दर्शनजं प्रतिकूलं ज्ञानं भयं कुतश्चिदपि तदभावस्तु मुक्तावेव सा चाच्युतपादाम्बुजोपासनादेवेत्युक्तं भवति । अनेनात्यन्तिकक्षेमो मुक्तिरेव तत्साधनं तु भगवत्पदाम्बुजोपासनमेव तदेव भागवतो धर्म इति च फलितम् । एतदेवोपपादयति असति प्रकृतिपरिणामरूपे देहे आत्मभावादात्माभिमानाद्धेतोरुद्विग्ना भययुक्ता बुद्धिर्यस्य तस्य पुंसः एवं पूर्वावस्था कथिता यत्र यस्मिन्नच्युतस्य पादाम्बुजोपासने कृते सति सर्वात्मना सर्वप्रकारेण भीर्भयं निवर्त्तते निश्शेषभयनिवृत्तिमान् मोक्षः स्यादित्यर्थः। यद्वा, कीदृशं तदुपासनमित्यत्राह–विश्वात्मना यत्रेति विश्वात्मनेति भावप्रधानो निर्देशः। विश्वस्य कृत्स्नस्य चिदचिदात्मकस्य जगत आत्मत्वेनान्तरात्मतया यत्रोपासने कृते सति इत्यर्थः। सर्वत्र ब्रह्मभावाज्जीवदशायामपि भीर्भयं निवर्त्तते इति भावः ॥ ३३ ॥

ननु, सत्यं भगवदुपासनमेवात्यन्तिकक्षेमसाधनो भगवद्धर्म इति के के वा तदुपासनानुग्राहका भागवता धर्मा इत्यत आह–ये वा इति। अविदुषां पुंसामञ्जः सुखेनात्मलब्धये परमात्मप्राप्तये ये उपायाः श्रवणकीर्त्तनस्मरणपादसेवनार्चनवन्दनदास्यसख्यात्मनिवेदनादयः प्रोक्ताः पञ्चरात्रादिमुखेन कथितास्तानेव हि भागवतान् धर्मान् विद्धि । यद्वा, हि तान् उपासनानुग्राहकान् तानित्यध्याह्रियते तान् भागवतान् विद्धीत्यर्थः ॥ ३४ ॥

तान् विशिनष्टि–यानिति । यान् भगवता प्रोक्तान् उपायानधिष्ठाय सम्यक्ताननुतिष्ठन्नित्यर्थः हे राजन् ! कर्हिचिदपि न प्रमाद्येत उपायान्तरनिष्ठानामिव भगवद्धर्मनिष्ठानां प्रमादो नास्तीत्यर्थः विघ्नोपहतिर्नास्तीति भावः। तथा चोक्तम् भगवता "नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते" इति किञ्चेह भागवतधर्मेषु नेत्रे निमील्य धावन्नपि अयथावदाश्वनुतिष्ठन्नपीत्यर्थः न स्खलेत् इतस्ततो न सञ्चरेत् फलाद्विनाभूतः स्यात् न पतेन्न संसरेच्च महाराजपथे यथेत्यत्र दृष्टान्तो अभिसंहितः यथा तस्मिन्नेत्रे निमील्य धावन्नपि न स्खलेन्न पतेच्च तद्वदित्यर्थः। तथा च स्मर्यते—

"याः क्रियाः सम्प्रयुक्ताः स्युरेकान्तगतमानसैः ।
ताः सर्वाः शिरसा देवः प्रतिगृह्णाति वै स्वयम् " ॥

इति इतरोपायनिष्ठानां त्वयथावदनुष्ठितेभ्यस्तेभ्यः स्खलनं ततः पतनं चावश्यं भावीति सूचितम् ॥ ३५ ॥

कुतस्तस्य स्खलनादिशङ्कापि यतः सर्वशरीरेन्द्रियव्यापाराणां स्वान्तरात्मभूतपरमात्मप्रयोज्यस्वकर्तृकत्वानुसन्धानेनात्मनि कर्त्तृत्वानभिमानिनस्तदभिमानप्रयुक्तस्खलनादिदुराप इत्यभिप्रेत्याह—कायेनेति । वाचा वागिन्द्रियेणेन्द्रियैर्वागिन्द्रियव्यतिरिक्तैर्ज्ञानकर्मेन्द्रियैरात्मना चित्तेनानुसृतः स्वभावः संसारवासना येन स तथाभूतोऽपीत्यर्थः। अनुसृतस्वभावादिति पाठे भावप्रधानो निर्देशः अनुसृतस्वप्रकृतिजगुणत्वादवश्यं कायादिभिः किञ्चित्करोति मनआदिभिः किञ्चित्सङ्कल्पयति अध्यापति चेत्यर्थः। तथाचोक्तं भगवता—

"नहि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत् ।
कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः" ॥

इति एवं च कायादिभिर्यद्विहितमविहितमप्रतिषिद्धञ्च कर्म करोति तत्सर्वं नारायणायेति समर्पयेत्तादर्थ्यचतुर्थ्यन्तनारायणपदोच्चारणेन तदर्थतामनुसन्दधीतेत्यर्थः—

"मयि सर्वाणि कर्माणि सन्न्यस्याध्यात्मचेतसा ।
निराशीर्निर्ममो भूत्वा युद्धस्व विगतज्वरः ॥
यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यसि कौन्तेय ! तत्कुरुष्व मदर्पणम्" ॥

इत्युक्तं सर्वकर्मणामीश्वरार्पणं नामेदमेव यत्स्वान्तरात्मभूतपरमात्मार्थत्वानुसन्धानमिति आचार्यास्तु यद्यत्करोतीत्यस्य शास्त्राविरुद्धं लौकिकं वैदिकञ्च यद्यत् करोतीत्यर्थ इति व्याचख्युः ॥ ३६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अबुधानिति बहुवचनात् यद्भयमुत्पन्नं तदल्पबुद्धेरेकस्य बहुभिर्विचक्षणैर्युगपदुच्यमानवचनार्थावधारणं दुःशकमिति निवारयति अत्र संसारे असत्यमङ्गले देहादावहमित्याद्यात्मभावाद्बुद्धिप्रबुद्धेः पुरुषस्य नित्यमच्युतस्य हेयोपादेयांशरहितस्य हरेः श्रीपादपद्मोपासनमकुतश्चिद्भयं न कुतश्चिद्भयं यस्मात्तत्तथा तदहं मन्य इति मम राद्धान्त इत्यर्थः। विशिनष्टि विश्वात्मनेति यत्र यस्मिन्नुपासने कृते विश्वात्मना सर्वात्मना संसाभीतिर्निवर्तते तदेवानुष्ठेयं पुरुषेणेति ॥ ३३ ॥

हरेरङ्घ्रिनिषेवणमेव मुख्यो भागवतो धर्म इति मनसि निधाय तदङ्गत्वेनोच्यमना योगा अपि भागवतधर्मा इत्याह–ये वा इति। आत्मलब्धये परमात्मज्ञानाय भागवतान् धर्मानिति शेषः ॥ ३४ ॥

न प्रमाद्येत अनवधानवान्न भवति "प्रमादोऽनवधानता" इत्यभिधानात् आत्मानात्मविवेकज्ञानवान् स्यादित्यर्थः। कथमिवेत्याशिन्नर्थे लुप्तोपमामाह धावन्निति । यथा नेत्रे उन्मील्य धावन्निह शर्करावति स्थले न स्खलेन्न पतेत्तथा भागवतधर्मरथाधिरूढ ॥३१

भगवत्कथितोपायविधिः कीदृश इति तत्राह—कायेनेति । स्वभावं योग्यतामनुसृतोऽनुगतः मनसा सङ्कल्पाद्यधिकरणेन बुद्ध्या निश्चयज्ञानाधिकरणेन आत्मना मत्या मननलक्षणज्ञानाधिकरणेन अहं हरिमर्चयामीत्यादिलक्षणेनाहङ्कारेण वा कायादिना यदर्चनादिकं करोति सर्वक्रियासु स्वस्यास्वात्न्त्र्यज्ञानेन तत्सर्वं परस्मै नारायणायास्त्विति समर्पयेत् सोयमात्मप्रसादजनकत्वेन तज्ज्ञानोपाय इति भावः ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तन्मतमेव मन्यमान आह–मन्य इत्यादिभिः । न कुतश्चिद्भयं यस्मात्तदकुतश्चिद्भयम् आत्यन्तिकं क्षेमं नित्यं पादाम्बुजोपासनमनवरतस्फूर्त्यादि विश्वात्मनेति तत्साधनावस्थायामपि क्रमशो भवनिवृत्तिर्दर्शिता ॥ ३३ ॥

भागवतधर्मलक्षणमाह–ये वै इति । स्वयं भगवता "कालेन

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

नष्टा प्रलये वाणायम्" इत्याद्यनुसारेण अविदुषां पुसां तन्माहात्म्यमविद्भिरपि कर्त्तृभिः आत्मनो ब्रह्म परमात्मभगवानित्याविर्भाववभेदवतः स्वस्य कर्म्मभूतस्य अञ्जः अव्यवधानेनैव लब्धये लाभाय ये उपायाः साधनानि प्रोक्ताः तानुपायान् भागवतान् धर्मान् विद्धि हि प्रसिद्धौ तत्र साक्षाद्भक्तेरपि भागवतधर्माख्यत्वम् "एतावानेव लोकेऽस्मिन्" इत्यादौ परधर्मत्वख्यापनाय दर्शितम् तत्रात्मलब्धये प्रोक्ता इति तटस्थलक्षणम् अन्येन तदलाभादव्यभिचारि आत्मलब्धये ये उपाया इति तु स्वरूपलक्षणं तल्लाभोपायो हि तदनुगतिरेव ॥ ३४-३५ ॥

एते च श्रीप्रबुद्धेनापि विविच्य वक्ष्यन्ते स्वयमपि संक्षेपेणेत्यभिप्रेत्य प्रथमतस्तत्राप्यलसानां तद्द्वारमाह, कायेनेति ॥ ३६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

भो राजन् ! सर्वे धर्मा एव सभया इष्टाः किन्तु भागवतधर्म एव निर्भय इत्याह–मन्ये इति । अत्र संसारे न कुतश्चिदपि कालकर्मविघ्नादिभ्यो भयं यतस्तत्पादाम्बुजोपासनं तत्र मुख्यमधिकारिणमाह—असति असाधौ देहे गृहकुटुम्बादौ च आत्मा इति आत्मीय इति यो भावः भावना दुरुत्यजा तत एव उद्विग्ना धीर्यस्य तस्य भक्तिप्रतिकूलदेहगेहादिष्वासक्तिं त्यक्तुकामस्येत्यर्थः । यत्रोपासने सति विश्वात्मना सर्वात्मनैव भीर्निवर्त्तते ॥ ३३ ॥

भागवतधर्मलक्षणमाह–ये वै इति । मन्वादिमुखेन वर्णाश्रमादिधर्मानुक्त्वा अतिरहस्यत्वात् स्वमुखेनैव भगवता अविदुषामपि पुंसाम् अञ्जः शीघ्रमेव आत्मलब्धये स्वप्राप्त्यै ये उपायाः प्रोक्तास्तान् भागवतान् धर्मान् विद्धि ॥ ३४ ॥

तेषां प्रभावमाह–यान् आस्थाय आश्रित्य यद्वा आस्था विश्वासः यान् धर्मानास्तिकयेन विश्वासविषयीकृत्यापि किं पुनराचर्येत्यर्थः न प्रकर्षेण माद्येत मदो गर्वस्तद्वान् कर्मीव योगीव न भवेदित्यर्थः । यद्वा प्रमादोऽनवधानता असावधानो न भवेदित्यर्थः । अतोऽत्र विघ्नानां न प्रभविष्णुतेति भावः किञ्च, यान् भगवन्मार्गभूतान् धर्मानाश्रित्य नेत्रे निमील्य उन्मील्य वा धावन् न स्खलेत् न वा पतेत् यथा केनापि कश्चिदतिसमीचीनमतिसुगमं मार्गमानीतो जन उच्यते मदुपदिष्टेनानेन मार्गेण नेत्रे मुद्रयित्वा सुखेनाभिद्रवन्नेव याहि न कश्चिदपि ते संशय इति यथा पदन्यासस्थानगतिक्रमस्य परतः पादन्यासेन गतिर्धावनं तस्याल्पत्वे स्खलनं बहुतरत्वे पतनमपि सम्भवेत् अत्र तु भक्तिमार्गे भजनधर्मस्याङ्गिनो विहिताङ्गानाम् अल्पतरातिक्रमे बहुतरातिक्रमे वा कर्ममार्ग इव न प्रत्यवायी भवेत् अतः फलान्न भ्रश्येत् तत्रापि नेत्रे निमील्येति वर्त्तमाने अपि नेत्रे मुद्रयित्वेत्यनेन शास्त्राण्यतिक्रमे न दोषः किमुताज्ञात्वेति ज्ञापितम् यान् धर्मानास्थायेत्युक्तत्वादङ्गिनस्त्वतिक्रमो दोष एव तथा सति मार्गच्युत एव स्यात् भगवत्प्राप्त्यर्थं पृथङ्मार्गकरणस्त्वातिदूषणावहमेव "श्रुतिस्मृतिपुराणादिपञ्चरात्रविधिं विना । ऐकान्तिकी हरेर्भक्तिरुत्पातायैव कल्पते" ॥ इत्युक्तेः अत्र भागवतधर्मे प्रवर्तमानस्य वर्णाश्रमधर्मेऽधिकार एव नास्तीति तदनुष्ठानाननुष्ठानविचारो नात्र प्रवेशयितव्यः–

"तावत् कर्माणि कुर्वीत न निर्विद्येत यावता ।
मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायते" ॥

इति भगवदुक्तेः "भक्त्यैकयेशं गुरुदेवतात्मा" इत्यग्रिमवाक्ये भक्त्येत्यस्य एकयेति विशेषणोपन्यासात् कर्मादिमिश्रा भक्तिर्नात्र प्रस्तुतेत्यवसीयते ॥ ३५ ॥

शृण्वन् सुभद्राणीत्युपरिष्टाद्वर्णयितव्येषु भागवतधर्मेषु प्रवर्तमानेन सुधिया जनेन कायिकादिव्यापारा अपि भगवद्धर्मान्तरे प्रवेशनीया इत्याह–कायेनेति । अयमर्थः, यथा विषयिभिः प्रातरारभ्य मूत्रपुरीषोत्सर्गमुखक्षालनदन्तधावनस्नानदर्शनश्रवणकथनादिव्यापाराः विषयसुखभोगार्थमेव कर्मिभिस्तु देवपित्रादिपूजार्थमेव क्रियन्ते तथैव भगवद्भक्तेन तेते भगवत्सेवार्थमेव कर्तव्या इति ते तेऽपि तेषां भक्त्यङ्गानि भवेयुरिति अनुसृतस्वभावात् देहाध्यासेन अनादिनैव योऽनुसृतः अनुवृत्तः स्वभावस्तस्मात् वर्णाश्रमधर्मादिकामित्यर्थः । कायादिभिर्यत् यद्यत्करोति तत् सर्वं नारायणार्थमेव नारायणं स्वांचितुमेवेति वा समर्पयेत् विनियोजयेत् तादर्थ्ये क्रियार्थोपपदत्वेन वा चतुर्थी ॥ ३६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अत एव मुख्यं मोक्षसाधनं सर्वसम्मत्या कविः कथयति, मन्ये इति । अत्र संसारे यत्र यस्मिन्पादाम्बुजोपासने कृते असदात्मभावात् असति देहादावनात्मनि स्वात्मभावना अनीश्वरे जीवे परमात्मभावना वा ततो नित्यमुद्विग्नबुद्धेः विश्वात्मना सर्वप्रकारेण भीर्निवर्त्तते अनात्मनि आत्मभ्रान्त्या अनीश्वरे ईश्वरभ्रान्त्या वा उद्विग्नबुद्धिरपि यस्मिन् कृते संसारात् मुक्तो भवति किमुत तत्त्ववित् न विद्यते कुतश्चिद्भयं यस्मादेवम्भूतमात्यन्तिकं क्षेममच्युतस्याप्रच्युतगुणस्वरूपस्य भगवतः पादाम्बुजोपासनमहं मन्ये ॥ ३३ ॥

अवान्तरोपायानाह-येवै इत्यादिना । भगवद्गीतापञ्चरात्रागमादिषु भगवतैव श्रीमन्मुखेन हि निश्चये अविदुषामपि पुंसां किमुत विदुषाम् अञ्जसा सुखेनैव आत्मलब्धये भगवल्लब्धये ये प्रोक्तास्तान् हि निश्चये भागवतान् धर्मान् उपायान् मुख्योपाये चरणोपासनेऽवान्तरोपायान्विद्धि ॥ ३४ ॥

यान् भागवतान् धर्मान् आस्थाय आश्रित्य नरः कर्हिचिदपि न प्रमाद्येत अनवधानतां न गच्छेत प्रमादोऽनवधानतेत्यभिधानात् अनवधानतात्र पुरुषार्थहीनता भगवद्धर्मनिष्ठः पुरुषार्थहीनो न भवेदपि तु सर्वपुरुषार्थभागी भवेतेत्यर्थः । नरः इत्यनेन सर्वेषां नराणां भागवतधर्माधिकारित्वं द्योतितम् । ननु—

"वर्णाश्रमाचारवता पुरुषेण परः पुमान् ।
विष्णुराराध्यते पन्था नान्यत्तत्तोषकारणम्" ॥

इति विष्णुपुराणवाक्यविरोध इति चेन्न अदृष्टवर्णाश्रमधर्मस्यापि

भयं द्वितीयाभिनिवेशतः स्यादीशादपेतस्य विपर्ययोऽस्मृतिः ।
तन्मायायाऽतो बुध आभजेत्तं भक्त्यैकयेशं गुरुदेवतात्मा ॥ ३७ ॥
अविद्यमानोऽप्यवभाति हि द्वयो ध्यातुर्धिया स्वप्नमनोरथौ यथा ।
तत्कर्म सङ्कल्पविकल्पकं मनो बुधो निरुन्ध्यादभयं ततः स्यात् ॥ ३८ ॥
शृण्वन्सुभद्राणि रथाङ्गपाणेर्जन्मानि कर्माणि च यानि लोके ।
गीतानि नामानि तदर्थकानि गायन् विलज्जो विचरेदसङ्गः ॥ ३९ ॥
एवं व्रतः स्वप्रियनामकीर्त्या जातानुरागो द्रुतचित्त उच्चैः ।
हसत्यथो रोदिति रौति गायत्युन्मादवन्नृत्यति लोकबाह्यः ॥ ४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

"अनेकजन्मसंसिद्धस्ततो याति परांगतिम्"इति भगवदुक्त्या कथनेन जन्मान्तरीयवर्णाश्रमधर्मनिष्ठासम्भवात् भागवतधर्मानुष्ठानेन सर्वपुरुषार्थसिद्धेः किञ्च राजमार्गे प्रसिद्धे नेत्रे निमील्य धावन्नपि न स्खलेन्न पतेत् यथा तथा इहास्मिन् भागवते धर्मे—

"श्रुतिस्मृती उभे नेत्रे विप्राणां परिकीर्त्तिते ।
एकेन विकलः काणः द्वाभ्यामन्धः प्रकीर्त्तितः" ॥

इति स्मृत्युक्तेः । नेत्रे निमील्य श्रुतिस्मृत्युक्तं विधिं सङ्कोच्यापि धावन् अनुष्ठानक्रमे किञ्चित्किञ्चिदुल्लङ्घयन्नपि न स्खलेत् न प्रत्यवायी स्यात् न पतेत् न भ्रश्येत् अत्र इवार्थवाचकेन वाशब्देन यथेति लभ्यते लुप्तोपमालङ्कारमाश्रित्य राजमार्गे इत्याक्षिप्यते ॥ ३५ ॥

के ते भागवता धर्मा इत्याकाङ्क्षायां शास्त्राचार्याज्ञया यथाशक्त्यनुष्ठितं भगवत्यर्पितं सर्वं कर्म भागवतो धर्म इत्याह–कायेनेति । अनुसृतः शास्त्राचार्याऽनुगतो यः स्वभावस्तस्मात् कायेन वाचा वागिन्द्रियेण अन्यैरिन्द्रियैश्च मनसा वा मनसा हेतुभूतेन करणेन बुद्ध्या बोधनहेतुभूतेन करणेन आत्मना चिन्तनहेतुभूतेन करणेन वा यद्यदर्चनादिकं करोति तत्सर्वं परस्मै नारायणाय परब्रह्मणे सर्वनरसमूहनिकेतायास्त्विति समर्पयेत्—

"यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यसि कौन्तेय ! तत्कुरुष्व मदर्पणम्" ॥

इति श्रीमुखवचनाच्च एवं सति परस्मिन्नर्पितं शास्त्रीयं सर्वं कृत्यं भागवतो धर्म इति भावः ॥ ३६ ॥

———

भाषा टीका ।

कविरुवाच ॥

कवि नामक योगेश्वर बोले, कि—हे निमिराज ! हम तो इसी को आत्यन्तिक क्षेम मानते हैं, कि—इस संसार में सदा निर्भय अच्युत चरणाम्बुज की उपासना करना, जिस उपासना के करने से असत् देहादिक में आत्माभिमान होने से उद्विग्न बुद्धिवाले पुरुष की सर्व प्रकार भय की निवृत्ति होजाती है ॥ ३३ ॥

जो उपाय भगवान् ने अपनी प्राप्ति के लिये स्वयं आपने कहे हैं, कि—जिनसे अविद्वान् पुरुष भी सुख पूर्वक आपको प्राप्त होसकै उनहीं उपायों को आप भागवत धर्म समुझो ॥ ३४ ॥

हे राजन् ! वे भागवत धर्म कैसे है ? कि—जिनका अनुष्ठान करता हुआ पुरुष कभी भी प्रमाद को नहीं प्राप्त हो सकता है । अर्थात् उपायान्तर निष्ठों की तरह भागवत धर्म निष्ठ पुरुषों का प्रमाद से कार्य प्रतिहत नहीं होता है, अन्य उपाय में लगने से तो किञ्चित् चूकने पर भी पतन होजाता है, परंच राज मार्ग में जैसे नेत्र निमीलन कर दौडने से भी नहीं गिरता है इसी प्रकार भागवत धर्मों के अनुष्ठान करने में नेत्र बंद कर दौडने पर भी पतन नहीं होता है । यहां पर श्रुति स्मृति दोनों का ज्ञान होना ही दोनों नेत्रों का खोलना है, और वर्णाश्रम के विहित धर्मों का नहीं उल्लंघन करना ही मार्ग में चलना है, किंतु भागवत धर्मनिष्ठ होकर श्रुति स्मृति का ज्ञान भी न करैं तब मानों नेत्र बंद करना भया, और विहित धर्मों का बीच २ में उल्लंघन करना ही मानों दौडना भया, तथापि भागवत धर्म निष्ठको पतन का भय नहीं है क्योंकि—वह राज मार्ग का प्रभाव है ॥ ३५ ॥

काय वाणी मन इन्द्रिय बुद्धि चित्त अथवा अपने स्वभाव से जो २ कुछ शास्त्रविरुद्ध लौकिक और वैदिक कर्म करै, तिसको परम पुरुष श्रीनारायण को समर्पण करता जावै, अपने शरीरादि के व्यापारों को ऐसा मानें कि—मैं प्रयोज्य कर्त्ता हूं नारायण की प्रेरणा से इन कार्यों को करता हूं इस प्रकार स्वतंत्र कर्तृत्व का अनुसंधान न होने से तत्प्रयुक्त पतनादि इसको नहीं होगा । और कुत्सित कर्म से निवृत्ति तो स्वरूपानुसंधान से ही सिद्ध है ॥ ३६ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु, किमेवं परमेश्वरभजनेन अज्ञानकल्पितभयस्य ज्ञानैकनिवर्त्यत्वादित्याशङ्क्याह–भयमिति । यतो भयं तन्मायया भवेदतो बुधो बुद्धिमांस्तमेवाऽऽभजेत् ननु, भयं देहाद्यभिनिवेशतो भवति स च देहाहङ्कारतः सच स्वरूपास्मरणात्किमत्र तस्य

श्रीधरस्वामिकृतभावार्थदीपिका।

माया करोत्यत आह, ईशादपेतस्येति। ईशविमुखस्य तन्मायया ऽस्मृतिर्भगवतः स्वरूपास्फूर्तिस्ततो विपर्ययो देहोऽस्मीति ततो द्वितीयाभिनिवेशाद्भयं भवति एवं हि प्रसिद्धं लौकिकेष्वपि मायासु उक्तं च भगवता—

"दैवी ह्येषा गुणमयी मम माया दुरत्यया।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते" ॥ इति।

एकयाऽव्यभिचारिण्या भक्त्या भजेत् किञ्च, गुरुदेवतात्मा गुरुरेव देवता ईश्वर आत्मा प्रेष्ठश्च यस्य तथाभूतः सन्नित्यर्थः ॥ ३७ ॥

ननु, विषयविक्षिप्तचित्तस्य कुतोऽव्यभिचारिणी भक्तिः सम्भवति?कुतस्तरामभयम्? तत्र न तावद्विषयो नाम वास्तवोऽस्ति किन्तु मनोविलासमात्रमतो मनो नियमनेन भजनादभयं स्यादित्याह-अविद्यमानोपीति। द्वयः द्वैतप्रपञ्चः ध्यातुः पुंसो धिया मनसा स्वप्नश्च मनोरथश्च यथेत्यर्थः। तत्तस्मात्कर्माणि सङ्कल्पयति विकल्पयति च यन्मनस्तन्निरुन्ध्यान्नियच्छेत् ततश्च एकया भक्त्या भजनादभयं स्यादित्यर्थः ॥ ३८ ॥

एतदत्यन्ताशक्यमित्याशङ्क्य सुगमं मार्गमाह—शृण्वन्निति। तदर्थकानि तान्येव जन्मानि कर्माणि चार्थो येषां तानि एतान्यपि साकल्येन ज्ञातुमशक्यानीत्याशङ्क्याऽऽह, यानि लोके गीतानि प्रसिद्धानि तानि शृण्वन् गायंश्च विचरेत् असङ्गो निःस्पृहः ॥ ३९ ॥

एवं च भजतः सम्प्राप्तप्रेमलक्षणभक्तियोगस्य संसारधर्मातीतां गतिमाह-एवमिति। एवं व्रतं वृत्तं यस्य सः स्वप्रियस्य हरेर्नामकीर्त्या जातोऽनुरागः प्रेम यस्य सः अत एव द्रुतचित्तः श्लथहृदयः कदाचिद्भक्तपराजितं भगवन्तमाकलय्योच्चैर्हसति एतावन्तं कालमुपेक्षितोऽस्मीति रोदिति अत्यौत्सुक्याद्रौति क्रोशति हे हरे! मामनुगृहाणेति अतिहर्षेण गायति जितं जितमिति नृत्यति, किं दाम्भिकवत्पराञ्जति प्रकाशयितुम्? न, उन्मादवद्ग्रहगृहीतवत लोकबाह्यः विवशः ॥ ४० ॥

———

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी।

ज्ञानैकनिवर्त्यत्वात् रज्ज्वां भुजङ्गबुद्ध्या जातस्य भयस्य यथा रज्जुस्वरूपज्ञानेन निवृत्तिः स्यात् तथा स्वरूपाज्ञानकल्पितभयस्य स्वरूपज्ञानमात्रेण निरास्यत्वात् परमेश्वरभजनेन किमित्याक्षेपः स च देहाद्यभिनिवेशः स च देहाहङ्कारः स्वरूपास्फुरणात् स्वस्वरूपाज्ञानात् अत्र भयादिषु मध्ये माया किं कार्यं करोति तन्मायया तस्य भगवतो जगदधिकारिण्या यमवदभक्तदण्डकारिण्या कर्त्र्या स्वरूपास्फूर्त्तिः जीवस्वरूपविस्मृतिः कार्यते ततः स्वरूपाऽस्फूर्तेः ततो विपर्ययात् गीतायां मामेव ये प्रपद्यन्ते इति स्वप्रपत्तेरेव मायानिवारकत्वेनाभिप्रेता नतु ज्ञानमात्रं तस्माद्भक्त्यैव ज्ञानं न वाक्यमात्रात्"रहूगणैतत्तपसा न याति चेज्यया निर्वपणाद्गृहाद्वा"इत्याद्युक्तेः सर्वभयादिरोगस्य वैमुख्यनिदानत्वाच्चेति ॥३७॥

नन्विति शङ्कासमाधानाभासस्तत्र नन्वित्यारभ्य कुतस्तरामभयमित्येतत्पर्यन्तः शङ्काग्रन्थोऽन्यत् समाधानमिति अव्यभिचारिणी सन्तता यदि भक्त्यभावे मायोपशान्तिपूर्वकस्वरूपज्ञानादिकमेव न स्यात्तदा कुतस्तरामभयमित्यर्थः। तत्र तस्यामाशङ्कायाम् अतः विषयस्य मनोविलासमात्रत्वात् भजनात् मायादिनिवृत्तिद्वारा भयं स्यादित्यर्थः। अविद्यमानोऽपि वस्तुतोऽसन्नपि स्वप्नमनोरथौ यथेति अनतोऽपि मनसा भाने दृष्टान्तः स्वप्नश्च मनोरथश्चेति विग्रहवाक्यं स्वप्नमनोरथौ यथेति पाठे सर्वोऽपि द्वन्द्वो विभाषयैकवद्भवतीति न्यायात् "ऊकालोऽज्झ्रस्वदीर्घप्लुतः" इति वदेकवचनं पुंस्त्वञ्च अत एवेत्यर्थः इत्युक्तं तस्माद्द्वैतप्रपञ्चस्य मनोविलासमात्रत्वात् सङ्कल्पविकल्पयोः सामान्यविशेषचिन्तनत्वेन भेदो ज्ञेयः। ततश्च मनोनिरोधे सति एकया अव्यभिचारिण्या मूले तच्छब्देन मनोनिरोध एव वाच्यः स्यादेकयेत्यादिकन्तु आर्थिकमेवाकृष्टमत इत्यर्थ इत्युक्तम् ॥ ३८ ॥

एतन्मनोनिरोधेन भजनम् अत्यन्ताशक्यं दुष्कराष्टाङ्गमयत्वात् "अज्ञः पुंसामविदुषाम्"इत्युक्तेः सुगममार्गमाह—अर्थो वाच्यार्थः "नागृहीतविशेषणा" इति न्यायेन तत्तन्नामभिर्जन्मकर्मार्थकानि वाच्यानि तत्र जन्मार्थकानि नामानि देवकीनन्दनो यशोदानन्दन इत्यादीनि कर्मार्थकानि तु कंसारिमुरारिमधुसूदन इत्यादीनीति ज्ञेयम् ॥ ३९ ॥

एवञ्च श्रवणकीर्त्तनादिप्रकारेण वृत्तं जन्मकर्मनामश्रवणगानाद्याचरणम् अत एव जातानुरागत्वादेव कदाचिद्दामबन्धनादिवेलायां नामकीर्त्त्येति तृतीया श्रुत्या सर्वाङ्गभूतो नामकीर्त्तनस्यैवानुरागजनने साधकतमत्वं व्यञ्जितम् ॥ ४० ॥

———

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्।

भयं द्वितीयेति। द्वितीयाभिनिवेशात् अब्रह्मात्मकस्वतन्त्राभिनिवेशतः लोके सद्वितीयव्यवहारो हि स्वरसतः शरीरव्यतिरिक्तद्वितीयपरः यथा देवदत्तः सद्वितीय आगत इत्युक्तेः शरीरमन्तरेण सद्वितीयत्वमुक्तं स्यान्न तु स्वशरीरेण "यस्यात्मा शरीरम्" इति श्रुतिश्च जीवानां परमात्मशरीरव्यतिरिक्तस्वतन्त्राभिमान उक्तः अत एव ईशादपेतस्य भगवद्विमुखस्य विपर्ययस्मृतिः विपर्ययः देहात्माभिमानः तद्विषयस्मृतिः तन्मायया भगवदधीनया प्रकृत्या देहात्मभ्रान्तिरब्रह्मात्मकस्वतन्त्रात्मप्रतीतिश्चेत्युभयविधापि भ्रान्तिः भगवन्मायायत्ता तस्मात्तन्निवृत्तये भगवन्तं भजेदित्यर्थः। गुरुदेवतात्मा गुरुरेव देवतेति बुद्धिर्यस्य सः ॥ ३७ ॥

अविद्यमानोऽपि द्वितीयः द्वयः स्वतन्त्रात्मभ्रमश्चेत्युभयमविद्यमानमप्रामाणिकम् उभयविभ्रमोपि मानसः अतस्तदुभयनिवृत्तये कर्माधीनं सङ्कल्पविकल्पकं सङ्कल्पो देहादिरक्षार्थाचिन्ता विकल्पः स्रक्चन्दनादिचिन्ताविस्तारः एतत्सर्वं मनःकृतं तस्मात् मनो निरुन्ध्यादित्यर्थः। तत अभयं स्यात् भगवान्नित्यशरीरभूतोऽस्मीति बुद्धिः स्यादित्यर्थः ॥ ३८—३९ ॥

एवंव्रत इति बहुव्रीहिः स्वप्रियस्य स्वस्य प्रीतिविषयो भगवान् तस्य नामकीर्तिनादित्यर्थः ॥ ४० ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

"विश्वात्मना यत्र निवर्तते भीः" इति सर्वात्मकब्रह्मोपासनेन भयनिवृत्तिकथनेन तदभावे तदनुवृत्तिः सूचिता तदेव सहेतुकमुपपादयति—भयमिति । द्वितीयाभिनिवेशतः भयं स्यात् अब्रह्मात्मकस्वतन्त्रवस्त्वभिमानो द्वितीयाभिनिवेशस्तस्मात् लोके हि सद्वितीयत्वव्यवहारः स्वरसतः शरीरव्यतिरिक्तस्वतन्त्रे वस्तुनि सत्येव दृष्टः सद्वितीय आगत उक्ते हि शरीर्यन्तरेण हि सद्वितीयत्वमुक्तं स्यात् नतु स्वशरीरेण "यस्यात्मा शरीरम्" इतिश्रुतिश्च जीवानां परमात्मशरीरत्वमाह अतः परमात्मशरीरव्यतिरिक्तस्वतन्त्रत्वाभिमानाद्भयं स्यादित्युक्तं भवति अत एवेशादपेतस्य भगवद्विमुखस्य विपर्ययः स्मृतिः विपर्ययः देहात्माभिमानः तद्विषयस्मृतिः देहात्मभ्रमरूपस्मरणं वा विपर्ययोऽस्मृतिरितिपाठेऽस्मृतिः परमात्मशरीरभूतत्वेन स्वात्मस्मरणाभावः द्वितीयाभिनिवेशविपर्ययादयः किं निबन्धना इत्यत्राह-तन्माययेति । तन्मायया भगवदधीनया मायया प्रकृत्या देहात्मभ्रान्तिरब्रह्मात्मकभ्रान्तिश्चेत्युभयविधा भ्रान्तिस्तन्मूला स्मृतिश्च भगवन्मायायत्तेत्यर्थः । अतः यत एवमतस्तस्मादबुधः अधीतवेदान्तजन्यज्ञानः गुरुरेव देवतेति आत्मा बुद्धिर्यस्य तथाभूतस्सन्नेकयाऽव्यभिचारिण्या ऽनन्यप्रयोजनयेति यावत् भक्त्या तमेवेशं भजेत तन्माया निवृत्तये सर्वशरीरकं परमपुरुषमेव भजेदित्यर्थः ॥ ३७ ॥

नन्वनात्मनो देहस्यात्मत्वेनास्वतन्त्रस्यात्मनः स्वतन्त्रतया च प्रतीतिर्भगवन्माययापि कथमित्यत आह-अविद्यमानोपीति आत्मतया स्वतन्त्रतया चाविद्यमानोपि देह आत्मा च ध्यातुर्धिया मनसा द्वयोर्द्वयत्वेनावभात्यात्मतया स्वतन्त्रतया च प्रतीयत इत्यर्थः । द्वयोरिति पाठे द्वयोर्देहात्मनोरविद्यमानोपि आत्मताकारः स्वतन्त्रताकारश्च ध्यातुर्धिया ऽवभातीत्यर्थः । यद्वा द्वयोरात्माकारस्वतन्त्राकारयोर्ध्यातुर्मनसाऽविद्यमानो ऽपि आत्माकारं स्वतन्त्राकारश्च प्रतीयत इत्यर्थः । धियेत्यनेन प्रकृतिपरिणामात्मकस्य मनसोऽतथाभूतस्य तथात्वेन प्रतीतौ कारणत्वमुक्तं यथा स्वप्नमनोरथः यथा स आस्थिरोपि स्थिरत्वेनावभासते तद्वदित्यर्थः हि यस्मादेवं तस्मात्कर्मसङ्कल्पविकल्पकं कर्मणा निमित्तभूतेन सङ्कल्पयति विकल्पयतीति तथा तन्मनो निरुन्ध्यात् तज्जीवनादि कर्मानुगुणं सङ्कल्पयति सम्मित्येकीकारे "ईश्वरोहमहं भोगी" इत्याद्युक्तविधं देहात्मानावेकीकृत्यानुसन्धापयति तयोस्तादात्म्यभ्रमं जनयतीति तथा विकल्पयति परमात्मपरतन्त्रैकस्वरूपमात्मानं विकल्पयति विरुद्धं कल्पयति तस्मिन् तत्पारतन्त्र्यविरुद्धस्वातन्त्र्यभ्रमं जनयतीति तथा तन्मनः "एषानेभिहिता साङ्ख्ये" इत्युक्तया बुद्ध्या देहात्मयाथात्म्यनिश्चयात्मिकया निरुध्यान्नियच्छेदित्यर्थः ततो मनोनिरोधादभयं स्यान्मोक्षः स्यादिति निरोधस्य फलमुक्तम् ॥ ३८ ॥

नन्वतिचञ्चलं मनः कथं निरुन्ध्यादित्यत्रोपायमाह-शृण्वन्निति । रथाङ्गं चक्रं पाणौ यस्य तस्य भगवतो यानि लोके जन्मान्यवताराः कर्माणि चेष्टितानि सुभद्राणि शृण्वतां मङ्गलावहानि शृण्वंस्तथा स रथाङ्गपाणिः अर्थः प्रतिपाद्यो येषु तानि गीतानि नामानि च निर्मुक्तलज्जो गायन्नसङ्गः कान्त्यासक्तिरहितो विचरेत् एवंचेद्भगवत्प्रवणं सन्मनः शनैस्तन्निरुद्धं भवतीत्यर्थः ॥ ३९ ॥

एतदेवोपपादयन्निरुद्धमनसोऽवस्थामाह-एवं व्रत इति । एवम् इत्थम्भूतं भगवज्जन्मकर्मगीतनामादिश्रवणगानाद्यात्मकं व्रतं यस्य स इति बहुव्रीहिः स्वकीयांप्रियो भगवाँस्तस्य नाम्नां कीर्त्यां कीर्तनेन जात अनुरागस्तस्मिन्प्रेम यस्य स अत एव द्रुतचित्तः श्लथहृदयः कदाचिद्भक्तपराजितं भगवन्तमाकलय्य उच्चैर्हसति कदाचिद्विच्छेदे सत्यतावन्तं कालं उपेक्षितवानस्मीति रोदिति क्वचिदत्यौत्सुक्याद्रौति क्रोशति तथातिहर्षेण गायति जितं जितमिति नृत्यति किन्दाम्भिकवत्परानवञ्चयितुं नेत्याह उन्मादवदुग्रहगृहीत इव लोकबाह्यः लोकविलक्षणः ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

विपक्षे बाधकतर्कमुद्भाव्य विपर्ययेऽवसानमाह-भयमिति । अस्मृतिरज्ञानं विपर्ययोऽन्यथाज्ञानम् एते ईशादपेतस्य ईशानुग्रहरहितस्य प्रकृतिबद्धस्य पुंसो यस्य हरेर्माययेच्छया स्तः ताभ्याम् अज्ञानान्यथाज्ञानाभ्यां द्वितीयाभिनिवेशतः द्वितीये देहगेहादौ अहं ममेत्यभिनिवेशनाद्दुरभिमानः स्यात्तस्माद्भयं संसारलक्षणं स्यादिति यस्मात् अतो गुरौ परमात्मदेवतायां च आत्मा मनो यस्य स तथा तस्मात्तज्ज्ञानवान् यथायोग्यं गुरुपरमपुरुषयोर्भक्तिं कुर्वाणो बुधस्तं हरिमाभजेत् सर्वसमर्पणपूर्वकमुपासीतेत्यर्थः ॥ ३७ ॥

एतदेव सोदाहरणं विवृणोति—अविद्यमान इति । धिया ध्यातुर्विषयानिति शेषः "ध्यायतो विषयानस्य" इति स्मृतेः । पुंस ईशाधीनत्वेन स्वस्याविद्यमानोपि द्वयो देहगेहादिः स्वकीयत्वेनावभाति हि यस्मात् कथमिव यथा स्वप्नयुतमनोरथः स्वप्नजाग्रत्त्वेन निधिमास्थाय कोशमापाद्य प्रकृतिवर्गमाबध्य राज्यं करिष्यामीति मनोरथः सत्त्वेन प्रतीयते तथा देहादावीशाधीने स्वाधीनताबुद्धिः संसारः तस्मात्तादृशसंसारनिवृत्तये तत्कर्मतद्देहादिकर्मविषयो यस्य तत्तथा तत्सङ्कल्पविकल्पवृत्तियुक्तं मनः श्रीनारायणे निदध्यात् ततो हरिप्रसादादभयं संसारनिवृत्तिलक्षणो मोक्षः स्यादित्यन्वयः । सर्वसमर्पणलक्षणोपासनाभावे ब्रह्मज्ञानं न स्यात्तदभावे संसारनिवृत्तिर्न स्यात् अतस्तदर्थं सर्वसमर्पणलक्षणमुपासनं कर्तव्यमिति भावः

> आत्मना देहगेहादिद्वयशब्देन भण्यते ।
> अविद्यमानं जीवस्य प्रतिभाति नदीयवत् ॥
> जाग्रद्वत् यथा स्वप्नः प्रतिभाति मनोरथः ।
> विद्यमानवदेवैवं देहादीशवशे स्थितम् ॥
> विभाति स्ववशत्वेन सैषा संसृतिरुच्यते ।
> तस्मात्तद्विषयं त्यक्त्वा मनो विष्णौ निवेशयेत् ॥

इत्येतन्मानासिद्धमेतदर्थजातम् । नन्वत्र देहादेरसत्त्वाभिप्रायेण स्वप्नादिदृष्टान्तः किं न स्यादिति चेन्न, उदाहृतस्मृतिविरोधात् तस्मात्स्वातन्त्र्यस्यैव निषेधः क्रियत इति द्वयशब्देन भेदमनूद्य तन्निषेधः क्रियत इत्यर्थोऽप्युक्तप्रमाणविरुद्ध इत्युक्तमनाकुलमिति ॥ ३८ ॥

अयमपि भागवतो धर्म इत्याह—शृण्वन्निति । एवमात्मज्ञानोत्पादनसमर्थभगवदुपासनाङ्गभूतसमर्पणाख्यभागवतधर्ममनुतिष्ठतो देहाद्यभिमानविधुरस्य भगवदेकस्वातन्त्र्यज्ञानिनो निरं-

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

तरं हरौ मनो नियुञ्जमानस्य इयं प्रवृत्तिरित्यतो वाह–शृण्वन्निति । तदर्थकानि जन्मकर्मविषयाणि ॥ ॥ ३९ ॥

एवं भवस्याचरतो परोक्षज्ञानजननी भक्तिः स्यादित्याह, एवं व्रत इति । प्रियस्य हरेर्नामकीर्त्या जातानुरागः संवर्धितभक्त्युद्रेकः अनेन भक्त्युद्रेकोऽनुमन्तव्य इति भावेनाह–हसतीति । लोकबाह्य इत्यनेन भक्तबाहुविध्य दर्शयति—कश्चिल्लोकबाह्यो लोकविलक्षणः कश्चिल्लोकवत् बाह्यलिङ्गप्रदर्शकः कश्चिल्लोकवत् बाह्यवदुभयलक्षणोपेतश्च तदुक्तम्—

"केचिदुन्मादवद्भक्ता बाह्यलिङ्गप्रदर्शकाः ।
केचिदान्तरभक्ताः स्युः केचिच्चैवोभयात्मकाः ॥
मुखप्रसादाद्दृढ्यां भक्तिर्ज्ञेया न चान्यतः" ॥

हसनादिलक्षणमुन्मादादावतिव्याप्तमित्यत उक्तं मुखप्रसादादिति, नन्वयमर्थो मुखेन नोक्त इत्यत उक्तमथो इति अथोशब्द अप्यर्थः हसनादेरतिव्याप्तत्वान्मुखप्रसादाद्यपेक्षितमित्यर्थः । विकल्पार्थो वा स च लोकबाह्य इत्यनेन स्पष्टीकृत इति ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अन्ये कुतश्चिदित्येव स्थापयन् क्रमेण तत्रैव निष्ठापयति—भयमिति । यतो भयं तन्मायया भवेत् अतो बुधो बुद्धिमान् तमेवाभजेत् प्रथमतः कायेनेत्याद्युक्तप्रकारेण ईषदपि भजेत् ततो गुरुदेवतात्मा सन् भक्त्या साक्षाद्भागवतधर्मरूपया तत एकया नित्यस्पादाम्बुजोपासनरूपयेति विशेषतोऽर्थः ॥ ३७ ॥

अथ साक्षात्तद्धर्मरूपामेव ग्राहयन् मनोनिरोधोक्त्या कायेनेत्याद्युक्तमतिक्रमयति—अविद्यमेति द्वाभ्याम् ॥ ३८ ॥

मनोनिरोधश्चायं यदि पृथक् स्यात्तर्हि दुष्करोऽष्टाङ्गयोगमयश्चेत्यञ्जस्त्वहानिरित्याशङ्क्य अत एव मनोनिरोधश्च परमोपयुक्तोऽयमिति साक्षाद्भगवद्धर्ममेवाह—शृण्वन्निति । यानि शास्त्रद्वारा सत्परम्पराद्वारा च लोके गीतानि जन्मानि कर्माणि च तानि शृण्वन् गायंश्च तथा तदर्थकानि तानि जन्मानि कर्माणि च अर्थो येषां तानि नामानि च गायन् विचरेदित्यन्वयः ॥ ३९ ॥

ततोऽञ्जसा तृतीया फलरूपा भक्तिः स्यादित्याह—एवं व्रत इति । अत्र नामकीर्त्येति तृतीयाश्रुत्या तत्राप्यतिशयः साधकतमत्वव्यञ्जनात् तत एवं शृण्वन्नित्यादिप्रकारं व्रतं यस्य तथाभूतोऽपि सन् स्वप्रियाणि तन्नामरूपसङ्कुचेषु मध्ये यानि स्ववासनापोषकाणि तेषां कीर्त्या कीर्तनेन मुख्येन कारणेन जातानुराग आविर्भूतमहाप्रेमेत्यर्थः । हासादीनां कारणानि भक्तिभेदानन्त्यादनन्तान्येव ज्ञेयानि ॥ ४० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

किञ्चात्र भक्तैः संसारबन्धान्न भेतव्यं स हि भक्तौ प्रवर्त्तमानस्य स्वत एवापयातीत्याह—भयमिति । द्वितीये इहगेहस्रक्चन्दनवनितादिभोगप्रपञ्चेऽभिनिवेशात् ईशादपेतस्य ईशविमुखस्य जीवस्य भयं संसारः स्यात् नत्वीशोन्मुखस्य—

"तावद्रागादयस्तेनास्तावत्कारागृहं गृहम् ।
तावन्मोहोऽङ्घ्रिनिगडो यावत्कृष्ण ! न ते जनाः" ।

इति ब्रह्मोक्तेः । तच्च भयं द्विविधं विपर्ययोऽस्मृतिश्च विपर्ययरूपमस्मृतिरूपं चेत्यर्थः । तत्र विपर्ययः आत्मभिन्ने देहादौ आत्मबुद्धिः अस्मृतिः आत्मनि स्मृतिभ्रंशः कोऽहं किङ्करोमि पूर्वं कीदृश आसमग्रे वा कीदृशो भविष्यामीति पूर्वापरानुसन्धानराहित्यम् एतदेव तस्य भगवतो मायया भयं यदुक्तं "स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात् प्रणश्यति" इति अत एव हेतोर्बुधः श्रीगुरुचरणप्रसादाल्लब्धविवेकः तमेव आ सम्यक् कामनान्तरराहित्येन एकया केवलयैव नतु ज्ञानकर्मादिमिश्रया भक्त्या भजेत् गुरुरेव देवता ईश्वरः आत्मा प्रेष्ठश्च यस्य तथादृष्टिः सन्नित्यर्थः ॥ ३७ ॥

ननु, स्रक्चन्दनवनितादिभोगप्रपञ्चो यस्य नैव विद्यते विद्यमानमपि तं परित्यज्य यो वा वने वसति तस्य भयं न भवेदिति चेन्नैवं नावैरित्याह—अविद्यमान इति । द्वयो, भोग्यप्रपञ्चो ह्यविद्यमानोऽपि ध्यातुः पुंसोऽवभाति मानसप्रत्यक्षो भवति धिया मनसा स्वप्नश्च मनोरथश्च यथेत्यर्थः । सर्वो द्वन्द्वो विभाषयैकवद्भवतीत्येकत्वं तत्तस्मात् कर्माणि सङ्कल्पयति विकल्पयति च यन्मनस्तन्निरुन्ध्यात् स च मनोनिरोधो गुरुचरणभक्त्या विना प्रकारान्तरेण न भवेत् यदुक्तं श्रुतिभिः "विजितहृषीकवायुभिरदान्तमनस्तुरगम्" इत्यत्र समवहाय गुरोश्चरणमिति सप्तमे च "सर्वं चैतद्गुरौ भक्त्या पुरुषो ह्यञ्जसा जयेत्" इति अतः एव गुरुदेवतात्मेत्यत्राप्युक्तम् ॥ ३८ ॥

एकया भक्त्या तमाभजेदित्युक्तं सैव भक्तिः का भवेदित्यत आह—शृण्वन्निति । यानि शास्त्रद्वारा सत्परम्पराद्वारा च जन्मानि कर्माणि वर्तन्ते यानि च लोके लोकमात्रे गीतानि अपभ्रंशभाषयापि निबद्धानि तथा नामान्यपि तदर्थकानि नानादेशभाषाभेदेनापि वार्थो वाच्यो येषां तानि कान्हा इति कानड इति कान इत्येवमादीन्यपि गायन् असङ्गः वस्त्वन्तरासक्तिशून्यः ॥ ३९ ॥

एवं भजतः सम्प्राप्तफलभूतप्रेमभक्तियोगस्य तस्य संसारधर्मातीतां चेष्टामाह—एवमेव व्रतं नियमो यस्य सः भक्तेष्वपि मध्ये नामकीर्त्तनस्य सर्वोत्कर्षमाह स्वप्रियस्य कृष्णस्य नामकीर्त्या स्वप्रियं वा यद्भगवन्नाम तस्य कीर्त्या कीर्तनेन जातोऽनुरागः प्रेमा यस्य सः दर्शनोत्कण्ठाद्रुतीकृतचित्तः जाम्बूनदः अये हैयङ्गवीनं चोरयितुं यशोदासुतश्चौरो गृहं प्रविष्टस्तदयन्धिप्यतां मा नियतामिति बहिर्जरतीगिरमाकर्ण्य पलायितुं प्रवृत्तं कृष्णं स्फूर्तिप्राप्तमालक्ष्य हसति स्फूर्तिभङ्गे सत्यहो प्राप्तो महानिधिर्मे हस्ततश्च्युत इति निर्विदन् रोदिति हे प्रभो क्वासि क्वासि देहि मे प्रत्युत्तरमिति फूत्कृत्य रौति भो भक्त त्वत्फूत्कारं श्रुत्वैवायातोऽस्मीति पुनः स्फूर्तिप्राप्तं तमालक्ष्य गायति अद्याहं कृतार्थोऽस्मीत्यानन्देन उन्मत्तवन्नृत्यति लोकबाह्यः लोकानां हास्यप्रशंसासम्मानावमानादिष्ववधानशून्यः ॥ ४० ॥

**खं वायुमग्निं सलिलं महीं च ज्योतींषि सत्त्वानि दिशो द्रुमादीन्।
सरित्समुद्रांश्च हरेः शरीरं यत्किञ्च भूतं प्रणमेदनन्यः ॥ ४१ ॥**

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

ननु, स्वकृत्यार्पणादिनेश्वरभजने को हेतुरित्यत्राह–भयमिति। "मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्" इति श्रुतिप्रोक्तया मायया अनादिरूपया त्रिगुणया ईशादपेतस्य भगवत्पराङ्मुखस्य अस्मृतिः एष परस्यांशः "ममैवांशो जीवलोके" इति श्रुतिस्मृतिप्रसिद्ध-भवदीयत्वस्मृत्यभावः अभगवदीयत्वाभिमान इत्यर्थः। ततो विपर्ययः देहात्माभिमानः ततो द्वितीयाभिनिवेशतः द्वितीये अनात्मनि आत्मत्वाभिमानस्ततः भयं पुनः पुनः जन्ममरणलक्षणसंसारभयं स्यात् अतो हेतोः स्वकृतार्पणादिना एकया अव्यभिचारिण्या भक्त्या तमीशं भयनिवृत्तये आभजेत्। ननु, संसारस्तु हरिमायया भवति तद्भजनरुचिः कुतः स्यादित्राह, गुरुदेवतात्मा बुध इति गुरौ उपदेशकर्तरि देवतायां उपदेश्ये उपास्ये भगवति आत्मा तद्भजन-रुचिप्रार्थना परा बुद्धिर्यस्य सः तयोः कृपया बुधः अत ईशादप-तत्त्वहेतुभूतायाः मायया उपास्योपासकयोश्च स्वरूपादिवित्सन् तमाभजेदित्यर्थः ॥ ३७ ॥

अभिमानद्वये हेतुभूतस्य मायाकार्यस्य मनसो नियमनं तन्नि-यमनफलञ्चाह–अविद्यमान इति। यथा स्वप्नमनोरथौ मर्त्यस्यामर-भावरूपौ जागरस्वप्नावस्थयोः अविद्यमानावपि कर्मविशेषफल-सिद्धये परमेश्वरेण प्रवर्त्तितौ प्रतीयेते तथोक्ताभिमानयोर्द्वयः ज्ञानेऽर्थे विद्यमानोपि ध्यातुरभिमन्तुर्द्धिया मनसा यतो अवभाति प्रतीयते तत्तस्मात् कर्माणि सङ्कल्पयति विकल्पयति च यन्मनस्त-द्बुधः निरुन्ध्यात् शास्त्रोक्तात्मानात्मपरमात्मतत्त्वनिष्ठं कृत्वोक्ता-भिमानद्वयान्निवारयेत् ततस्तत्त्वज्ञाने जाते भगवद्भजनेनाभयं स्यात् ॥ ३८ ॥

शास्त्रोक्ततत्त्वत्रयविवेकवतो निवृत्ताभिमानद्वयस्य कर्तव्य-विशेषमवस्थाविशेषञ्चाह—शृण्वन्निति त्रिभिः। रथाङ्गपाणेः चक्रहस्तस्य विष्णोः सुभद्राणि शृण्वतां कल्याणावहानि जन्मानि कर्माणि शृण्वन् कथयन् च तदर्थकानि जन्म-कर्मविषयाणि गीतानि नामानि गायन् शृण्वन् च असङ्गः अन्यत्रासक्तिरहितो बुधो विचरेत् रथाङ्गपाणिजन्मादीना-मानन्त्यं सूचयितुं तानि विशिनष्टि यानि लोके इति ॥ ३९ ॥

एवमिति। एवम्भूतं रथाङ्गपाणिजन्मादिश्रवणाद्यात्मकं व्रतं यस्य सः बुधः स्वप्रियस्य हरेर्नामनाम् अन्तिजेनापि जिह्वया गृह्यमाणानां या कीर्तिः सकलतपोयज्ञतीर्थस्नानादिफलदं पराः तया जातानुरागः उत्पन्नप्रेमोद्रेकः अत एव द्रुतचित्त-उत्कलितस्वान्तः अत एव लोकविलक्षणः उन्मादवत् ग्रहा-दिष्टवत् मानापमानव्यवहारातीत इत्यर्थः। आत्मानं भगव-दीयत्वेन सनाथं ज्ञात्वोच्चैर्हसति अनादिकालतो माया-मोहिततया भगवत्पराङ्मुखमात्मानं संस्मृत्य संस्मृत्य कदा-चित्कृतापराधवत् रोदिति कदाचिद्रौति क्रोशति भक्ति-कण्टकं प्रति आक्रोशं करोतीत्यर्थः। प्रेमातिशयेन गायति नृत्यति च ॥ ४० ॥

भाषा टीका।

द्वितीय के अभिनिवेश से अर्थात् अपने आत्माको पर-मात्मा परतंत्र शरीर रूप न मानकर तत् व्यतिरिक्त स्वतन्त्रा त्माभिमान से भय होता है, अत एव श्रीहरि से विमुख पुरुष का देह में आत्माभिमान रूप विपर्यय होजाता है, तब पर-मात्मा का शरीर रूप यह मेरा आत्मा है इसका विस्मरण होजाता है, ये सब भी उनहीं की माया से होता है इसी हेतु से बुद्धिमान् पुरुष गुरु में देव बुद्धि रखकर एक भक्ति से उसी परमेश्वर को भजै, कि—जिससे माया दूर रहे ॥३७॥

भलाँ ईश्वर की माया से भी देह में आत्म बुद्धि और भग-वत्परतंत्र आत्मा में स्वतन्त्रात्म बुद्धि कैसे होसक्ती है ? तहां कहते हैं, कि—अनात्मभूत शरीर में आत्माभिमान और अस्वतंत्र आत्मा में स्वातंत्र्याभिमान ये दोनों अविद्यमान भी हैं, तौ भी ध्याता पुरुष के मन से भान होते हैं। जैसे कि—स्वप्न का मनोरथ अस्थिर है, तौ भी स्थिर सरी का भान होता है। तस्मात् बुद्धिमान् पुरुष कर्मों का सङ्कल्पविकल्प करने वाले मनही का निरोध करै तब आपही अभय होजायगा ॥ ३८ ॥

यदि विचारो कि मन तौ बडा चंचल है उसका निरोध कैसे होगा ? तहां उपाय बतलाते हैं, कि—श्रीचक्रपाणि भगवान् के सुन्दर मंगलरूप जन्म और कर्मों की कथाओं का श्रवण करता हुआ, और लोक में जो आपके तदर्थक नाम महात्माओं ने गाये हैं, उन नामों का गान करताहुआ, निःसंग और निलंज्ज होकर संसार में विचरैं ॥ ३९ ॥

इस प्रकार के व्रत को धारण कर अपने परम प्रेष्ठ परमानन्द के नाम संकीर्तन से जब अनुराग उत्पन्न हो जाता है, तब उसी चित्त से कभी भगवान् को भक्तों से पराजित समझकर ऊंचे स्वर से हंसने लगता है, कभी उत्कंठा बढनेपर चिल्लाने लगता है, कभी हर्ष होने से गाने लगता है, कभी अब मैं जीत गया ऐसा विचार कर नाचनें लगता है, तौ क्या ये सब औरों को दिखाने के लिये करता है ? नहीं, जैसे कोई उन्माद से विवश होजावे उसी प्रकार यह भक्त भी विवश होकर चेष्टा करता है ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

किञ्च खमिति सत्त्वानि भूतानि आकाशादि यत्किञ्चिद्भूत-मात्रं हरेः शरीरमिति नत्वा प्रणमेत् सम्भावनायां लिङ् ॥ ४१ ॥

भक्तिः परेशानुभवो विरक्तिरन्यत्र चैष त्रिक एककालः ।
प्रपद्यमानस्य यथाऽश्नतः स्युस्तुष्टिः पुष्टिः क्षुदपायोऽनुघासम् ॥ ४२ ॥
इत्यच्युताङ्घ्रिं भजतोऽनुवृत्त्या भक्तिर्विरक्तिर्भगवत्प्रबोधः ।
भवन्ति वै भागवतस्य राजंस्ततः परां शान्तिमुपैति साक्षात् ॥ ४३ ॥
(सन्न्यस्तदण्डः कृतभूतमैत्रो विगाढचेता भगवत्यधोक्षजे ।
पुनाति लोकत्रयमङ्घ्रिरेणुभिः शुद्धस्वभावस्तरणिर्यथोदितः ॥ ० ॥) इति वीर० म० पाठः ।

राजोवाच ।

अथ भागवतं ब्रूत यद्धर्मो यादृशो नृणाम् ।
यथा चरति यद्ब्रूते यैर्लिङ्गैर्भगवत्प्रियः ॥ ४४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

नन्वियमारूढयोगानामपि बहुजन्मभिर्दुर्लभा गतिः कथं नामकीर्तनमात्रेणैकस्मिन्नेव जन्मनि भवेदित्याशङ्क्य सदृष्टान्तमाह, भक्तिरिति । प्रपद्यमानस्य हरिं भजतः पुंसो भक्तिः प्रेमलक्षणा परेशानुभवः प्रेमास्पदभगवद्रूपस्फूर्तिः तथा निर्वृतस्य ततोऽन्यत्र गृहादिषु विरक्तिरित्येष त्रिक एककालो भजनसमकाल एव स्यात् यथाऽश्नतो भुञ्जानस्य तुष्टिः सुखं पुष्टिरुदरभरणं क्षुन्निवृत्तिश्च प्रतिघासं स्युः उपलक्षणमेतत् प्रतिसिक्थमपि यथा स्युस्तद्वत् एवमेकैकस्मिन् भजने किञ्चित्प्रेमादित्रिके जायमाने अनुवृत्त्या भजतः परमप्रेमादि जायते बहुग्रासभोजिन इव परमतुष्ट्यादि ॥ ४२ ॥

ततश्च भगवत्प्रसादेन कृतार्थो भवतीत्याह—इत्यच्युताङ्घ्रिमिति ॥ ४३ ॥

भागवतस्य भवन्तीत्युक्ते तस्य लक्षणं पृच्छति—अथेति । यद्धर्मो यस्मिन् धर्मे परिनिष्ठितः यादृशो यत्स्वभावः यथा चरति वर्तते ब्रूते वा यैश्च लिङ्गैर्भगवतः प्रियो भवति ॥ ४४ ॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

हरेः शरीरं श्यामसुन्दरपीतवसनादिरूपं सम्भावनायां लिङिति अनुरागेण सर्वत्र तत्स्फूर्त्या तत्प्रणामः सम्भवत्येवेत्यर्थः । सर्वभूतेषु यः पश्येदिति वक्ष्यमाणत्वात् तत्र हेतुः अनन्यः स्फूर्त्यन्तरशून्य इत्यर्थः । "या निशा सर्वभूतानाम्" इत्यादेः "नारायणमयं धीराः पश्यन्ति परमार्थिनः जगद्धनमयं लुब्धाः कामुकाः कामिनीमयम्" इत्यादेश्च ॥ ४१ ॥

इयं गतिः सर्वत्र तत्स्फूर्त्तिलक्षणा सदृष्टान्तामिति सदृष्टान्तं यथा स्यात्तथा प्रेमस्फूर्तिविरक्तीनां यौगपद्यमाह, तत्र जातानुराग इत्यनेन प्रेमोक्तं खं वायुमित्यनेन स्फूर्तिः लोकबाह्य इत्यनेन च विरक्तिरिति अत्र तु तत् त्रयमुद्दिश्यैककालत्वमात्रं विधीयते 'अप्राप्ते शास्त्रमर्थवत्' इति न्यायात् "प्राप्ते कर्मणि नानेको विधातुं शक्यते गुणः । अप्राप्ते तु विधीयन्ते बहवोऽप्येकयत्नतः" इत्युक्तेश्च । तया स्फूर्त्या ततो भगवद्रूपादन्यत्र अत्र भक्तितुष्ट्योः सुखरूपत्वात् साम्यम् परेशानुभवपुष्ट्योरात्मभरणरूपत्वात् साम्यम् विरक्तिक्षुदपाययोश्चान्यत्र वैतृष्ण्यरूपत्वात् साम्यमिति ज्ञेयम् ॥ ४२ ॥

ततश्च भक्त्यादित्रिकोत्पत्त्यनन्तरम् अनुवृत्त्याऽभ्यासेन परां शान्तिमात्यन्तिकं क्षेमम् ॥ ४३ ॥

तस्य भागवतस्य अथ तज्ज्ञानार्थम् अनन्तरमेव भागवतं ब्रूत यस्मिन् धर्मे परिनिष्ठितस्तं धर्मं ब्रूत यत्स्वभावस्तं स्वभावं ब्रूत यथा वर्त्तते तद्वर्त्तनं ब्रूत यद्ब्रूते तद्वचनं ब्रूत यैर्लिङ्गैस्तानि लिङ्गानि ब्रूत ॥ ४४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

सत्त्वानि जन्तूनि ॥ ४१ ॥

परेशानुभवः ईश्वरस्वरूपगुणादिविषयं तत्त्वज्ञानम् अन्यत्र शब्दादौ विरक्तिः तुष्टिः अलम्बुद्धिः पुष्टिः शरीरपोषणं क्षुदपायः जाठराग्निना शरीरगतास्थ्यादिदाहः क्षुत्तन्निवृत्तिः अनुघासं प्रतिग्रासम् ॥ ४२ ॥

शान्तिम् अशनायापिपासाशोकमोहजरामरणाख्योर्मिषट्कप्रशमम् ॥ ४३ ॥

भागवतं भगवद्भक्तं यद्धर्म इति श्रीभगवति सर्वकर्मार्पणरूपन्यासधर्मयुक्तः यादृशवासनायुक्तः चरतीति यद्भक्षयति यज्जानाति श्रीभगवत्प्रसादं तत्त्वत्रयं च मन्त्रं श्रीभगद्गुणान् लिङ्गानि च शङ्खचक्रधारणोर्ध्वपुण्ड्रयुगलमालिकादीनि पञ्चरात्रादिप्रसिद्धानि अन्यानि चेति प्रश्नार्थः ॥ ४४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

उपायान्तरमप्याह—खमिति । खमाकाशं सत्त्वानि जन्तून् आकाशादीनि यत् किञ्चिद्भूतमात्रं च हरेः शरीरमिति मत्वा प्रणमेत्, कथम्भूतः ? अनन्यः स्वयमप्यपृथक्सिद्धः स्वात्मन्यपि भगवच्छरीरतां भावयन्नित्यर्थः । इत्थं जगच्छरीरकब्रह्मभावनया शान्तं सन्मनोनिरुद्धं भवतीति भावः ॥ ४१ ॥

ननु, मनोनिरोधोपायानुष्ठानेनैवायुरल्पमुपैति कदा वा मनोनिरोधः ? कदा वा भगवद्भक्तिश्च स्यात् ? इत्यत आह—भक्तिरिति । परेशानुभवः ईश्वरस्वरूपरूपगुणादिविषयं तत्त्वज्ञानं भक्तिः प्रीतिरूपं ध्यानमन्यत्र शब्दादिविषयेषु विरक्तिश्चेत्येतत्त्रिकं प्रपद्यमानस्यैककालं युगपदेव भवतीत्यर्थः । प्रपद्यमानस्येत्यनेन युगपद्भक्त्यादि(त्रिक)साधनतया तावद्भगवच्छरणागतिरत्रोपदिश्यते नन्वेकया प्रपत्त्यापि कथमेतत्त्रिकं युगपत् स्यादित्यत्र (तदू) दृष्टान्तमुखेनोपपादयति—तथाऽश्नत इत्यादिना भवन्ति वै भागवतस्येत्यन्तेन । तुष्टिरलम्बुद्धिः पुष्टिः शरीरपोषः क्षुदपायः जाठराग्निना शरीरगतास्थ्यादिदाहः क्षुत् तन्निवृत्तिश्चेतत् त्रिकमनुघासं प्रति ग्रासमश्नतः भुञ्जानस्य युगपदेव भवतीति ॥ ४२ ॥

इतीत्थं तथेत्यर्थः । भागवतस्य भगवत्प्रपन्नस्यानुवृत्त्या शनैरच्युताङ्घ्रिं भजतः पुंसः भक्तिर्विरक्तिर्भगवत्प्रबोधः परेशानुभवश्च भवन्ति, भवन्तु. ततः किमत आह—राजन्नित्यादि । हे राजन् ! ततो भक्त्यादिभ्यः साक्षात्परां शान्तिमशनायापिपासाशोकमोहजरामरणाख्योर्मिषट्कप्रशमं मोक्षमिति यावत् उपैति प्राप्नोति परं शान्तमितिपाठे अशनायाद्यूर्मिषट्करहितं परं परमात्मानम् उपैति ॥ ४३ ॥

न केवलमित्थंभूतः स्वयमेवोपैत्यपितु अन्यानपि तत्प्राप्तियोग्यान् करोतीत्यभिप्रेत्याह—सन्न्यस्तदण्ड इति । सन्न्यस्तदण्डः भूतद्रोहरहितः भगवत्पदाम्बुजे विगाढं निमग्नं चेतो यस्य सः अत एव शुद्धस्वभावोऽङ्घ्रिरेणुभिर्लोकत्रयं पुनाति तत्र दृष्टान्तः यथोदितस्तरणिः सूर्यस्तद्वदित्यर्थः ॥ ० ॥

भवन्ति वै भागवतस्येत्युक्तं तस्य लक्षणं पृच्छति—अथेति । भागवतं भगवत्प्रपन्नं ब्रूत यद्धर्मः यो मोक्षधर्मो यस्य स इति बहुव्रीहिः नृणां मध्ये यादृशः यत्स्वभावः यथा चरति तस्याचारः कीदृश इति प्रश्नः यैर्लिङ्गैर्भगवत्प्रियः लक्ष्यत इति शेषः ॥४४॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इदानीमेवंविधोपासकस्य हरेरुपासनार्थमधिष्ठानविशेषमाह—खं वायुमित्यादिना । खादीनां यानि यानि शब्दप्रवृत्तिनिमित्तानि तानि सर्वाणि हरेरधीनत्वेन तदेकनिष्ठगुणावेदकानि उपासकानां च तत्तद्योग्यतावशात् तत्तदधिष्ठानबाहुल्यं चोपयुज्यते. हरेरावासस्थानत्वाद्येषु तदुपासनाविधानमिति भावेनाह—हरेरिति । यत्किञ्च भूतमुत्पन्नं तत्सर्वं हरेः शरीरं विषयभोगायतनत्वादावासस्थानं "यः पृथिव्यां तिष्ठन् पृथिव्या" इत्यादिश्रुतेः । प्रकर्षेण मनस्तन्नतं कुर्यात् किं तदभेदेन ? नेत्याह, अनन्यमिति । अन्यः स्वामी न विद्यते यस्य सोऽनन्यः तं ब्रह्मपरिणामत्वेन सर्वस्य तच्छरीरत्वात्तदभेदेन उपासनोच्यते चेतिचेन्न "सर्वं हरेर्वशत्वेन शरीरं तस्य भण्यते" इत्यादिविरोधात् ॥ ४१ ॥

एवं खाद्यधिष्ठानेषु सन्निहितस्य हरेस्ततो भिन्नत्वेन न तत्स्वामित्वेन चोपासनाभक्त्यादिपुष्टिं करोति नान्यथेति सोदाहरणमाह, भक्तिरिति । खादिषु स्थितं हरिं प्रपद्यमानस्योपासीनस्य तथा परे परमात्मनि भक्तिः स्वे स्वस्मिन्ननुभवो स्वातन्त्र्यज्ञानम् अन्यत्र संसारे विरक्तिरित्येष त्रिकः त्रिकत्वसङ्ख्यां प्राप्त एककालः स्यादिति शेषः । यथा बुभुक्षोरश्नतः पुंसोऽनुघासं प्रतिकवलं क्षुदपायः पुष्टिरुदरपूर्तिलक्षणा तुष्टिरलम्बुद्धिश्चेत्येतत्त्रयं स्यात् ॥ ४२ ॥

पूर्वोक्तार्थमनूद्य तत्फलमाह—इतीति । प्रीत्या भजतोऽन्वनन्तरं भगवत्प्रबोधः भगवदपरोक्षज्ञानमनन्तरं पूर्वस्मादधिका संसारविरक्तिरनन्तरम् अधिका भक्तिरित्येतानि साधनानि भागवतस्य भवन्तीति यस्मात्ततोऽनन्तरं साक्षात्तुर्यावस्थालक्षणां परामुत्तमां शान्तिं स्वयोग्यां मुक्तिमुपैतीन्वयः । अत्र पूर्वाधिक्यविवक्षया प्रबोधादीनां हेतुमद्भावकथनं न विरुद्धमिति ज्ञातव्यम् ॥ ४३ ॥

भगवत्सम्बन्धी भागवत इति सामान्यतो ज्ञातवतोऽपि विशेषविवक्षया लोकोपकाराय पृच्छति—अथेति । अथ प्राप्तावसरः पृच्छामीति शेषः । किं तत्राह, भागवतमिति । भागवतमुत्तममध्यमाधमसंज्ञं यद्धर्मः किं धर्मः यादृशः कीदृशः यथा कथम् ॥ ४४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

ततः श्रीभगवतः सर्वत्र स्फूर्तेः खं वायुमिति सत्त्वानि भूतानि आकाशादिकं यत्पश्यति तत्तदनुरागातिशयेन "जगद्धनमयं लुब्धाः कामुकाः कामिनीमयम्" इतिवद्धरेः शरीरं श्यामसुन्दरपीतवसनादिरूपमेव पश्यन् प्रणमेत् तत्र तत्र भक्त्या नम्रात्मा भवतीत्यर्थः । तत्र हेतुः अनन्यः स्फूर्त्यन्तररहित इत्यर्थः । "या निशा सर्वभूतानाम्" इत्यादेः ॥ ४१ ॥

ननु, पूर्वं पादाम्बुजोपासनमित्यादिना तादृशतत्स्फूर्तिमयं फलमुद्दिष्टम् एवं व्रत इत्यादिना तत्प्रेम, लोकबाह्य इत्यनेन वैराग्यं चेति क्रमो गम्यते । स च न सम्भवति मिथः सापेक्षत्वात् यौगपद्ये च परस्पराश्रयो दोषः स्यात् तदेतदाशङ्क्य यौगपद्यमेव दृष्टान्तेन साधयति—भक्तिरिति । तत्र भक्तितुष्ट्योः सुखरूपत्वात् परेशानुभवपुष्ट्योरात्मभरणरूपत्वात् विरक्तिक्षुदपाययोरन्यत्र वैतृष्ण्यरूपत्वात्साम्यम् ॥ ४२ ॥

परां शान्तिम् आत्यन्तिकं क्षेममित्यर्थः ॥ ४३ ॥

अथेति । अथानन्तरं भागवतं ब्रूत तज्ज्ञानार्थं स च नृणां मध्ये यद्धर्मो यः स्वभावस्तं स्वभावं ब्रूत यथा च स आचरति अनुतिष्ठति तदनुष्ठानं ब्रूत यद्ब्रूते तद्वचनं च ब्रूतेति मानसकायिकवाचिकलिङ्गपृच्छा । ननु, पूर्वं "शृण्वन् सुभद्राणि रथाङ्गपाणेः" इत्यादिग्रन्थेन तत्तल्लिङ्गं श्रीकविनैवोक्तम् सत्यं तथापि पुनस्तत्तदनुवादेन तेषु लिङ्गेषु यैर्लिङ्गैः स भगवत्प्रियो यादृश उत्तममध्यमतादिभेदो विविक्तो भवति तानि लिङ्गानि विविच्य ब्रूतेत्यर्थः ॥ ४४ ॥

हरिरुवाच ।

सर्वभूतेषु यः पश्येद्भगवद्भावमात्मनः ।
भूतानि भगवत्यात्मन्येष भागवतोत्तमः ॥ ४५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ततश्च—

"नारायणमयं धीराः पश्यन्ति परमार्थिनः ।
जगद्धनमयं लुब्धाः कामुकाः कामिनीमयम्" ॥

इति पौराणिकयाक्यस्योदाहरणी भवतीत्याह—खमिति । प्रणमेदिति सम्भावनायां लिङ् खवाय्वादिषु यत्र यत्र दृष्टिः पतेत्तत्र हरेः शरीरं श्यामसुन्दराकारमेव स्फुरितं पश्यतीत्यर्थः । यद्वा, भक्तस्य फलप्राप्तिदशां निर्वर्ण्य पुनः साधनदशायां किञ्चिद्विश्वाति, खमिति । हरेः शरीरमधिष्ठानं ज्ञात्वा प्रणमेत् प्रणम्रो भवेत् न विद्यतेऽन्यः कृष्णं विना सेव्यो यस्य सः ॥ ४१ ॥

भक्तिमार्गेऽभिमतिसुखं साधनदशायामपि फलप्राप्ति सदृष्टान्तमाह-भक्तिः श्रवणकीर्तनादिः परेशस्येष्टदेवस्य कृष्णस्य यदा भवेत्तदैव अनुभवो माधुर्यास्वादोऽपि तदनुरूपो भवेत् तदैव अन्यत्र मायिकविषयसुखे विरक्तिरपि तदनुरूपा भवेदेवेत्येष त्रिक एक कालः समकालोत्पन्न एव प्रपद्यमानस्य कृष्णं भजतो जनस्य भवति यथाऽश्नतो भुञ्जानस्य जनस्य तुष्टिः सुखं पुष्टिरुदरभरणं क्षुन्निवृत्तिश्च अनुघासं प्रतिग्रासं स्युः उपलक्षणमेतत् प्रतिसिक्थमपि यथा स्युस्तद्वत् यथा भुञ्जानस्य किञ्चिन्मात्र्यां तुष्टौ सत्यां किञ्चिन्मात्री पुष्टिः किञ्चिन्मात्र एव क्षुदपायस्तथैव भजतो जनस्य किञ्चिन्मात्रे श्रवणकीर्त्तनादिभजने वृत्ते किञ्चिन्मात्र एव परेशानुभवः किञ्चिन्मात्र्येव विरक्तिश्च भवेत् यथैव च बहुभोजिनः सम्पूर्णा एव पुष्टितुष्टिक्षुदपायः तथैव बहुभजतः सम्पूर्णा एव भक्तिपरमेश्वरानुभवविरक्तय इति किन्तु बहुभोजनासामर्थ्यं भवति बहु भजतस्तु भजनसामर्थ्यातिशयो भवतीति विशेषो द्रष्टव्यः ॥ ४२ ॥

उक्तमर्थमेव पुष्टीकुर्वन्नाह-इतीति । परां शान्तिमात्यन्तिकं सुखम् ॥ ४३ ॥

भागवतस्य भवन्तीत्युक्ते तस्य लक्षणं पृच्छति—अथेति, यद्धर्मो यत्स्वभाव इति मानसलिङ्गप्रश्नः यादृश इति तस्यैव तारतम्यप्रश्नः यथा आचरतीति कायिकलिङ्गप्रश्नः यद्ब्रूते इति वाचिकलिङ्गप्रश्नः किमेतैः प्रश्नैरिति चेदत आह, यैर्मानसादिलिङ्गैर्भगवत्प्रियोऽनुमीयते ॥ ४४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

खादिकं हरेः सर्वव्यापकस्य शरीरम् आवासस्थानमिति मत्वा अनन्यः हर्य्येकशरणः सन् प्रणमेत् ॥ ४१ ॥

एवं व्रतस्य भक्तिः भगवत्साक्षात्कारलक्षणं परमं ज्ञानं संसारात् परमं वैराग्यं च भवतीत्याह-भक्तिरिति । प्रपद्यमानस्य भक्त्यादित्रिकासद्वये भगवन्तं शरणं गच्छतः भक्तिः परेशानुभवः अन्यत्र संसारे विरक्तिरित्येष त्रिकः एककालः शरणागतिसमकालः जायते यथा अनुघासं प्रतिग्रासम् अश्नतः भुञ्जानस्य तुष्टिः पुष्टिः क्षुदपायाः स्युः ॥ ४२ ॥

साधनत्रिकसम्पन्नस्य भगवत्प्राप्तिमाह-इतीति । परां शान्ति भगवत्साधर्म्यलक्षणां मुक्तिमुपैति प्राप्नोति ॥ ४३ ॥

भक्त्युपायं श्रुत्वा मुक्त्यधिकारिणं पृच्छति—अथेति, भक्त्यादयो मुक्त्युपायाः भागवतस्य भवन्तीति भवद्भिरुक्तम् अथ नृणां मध्ये मुक्त्यधिकारिणं भागवतं ब्रूत यद्धर्मः य उत्तमत्वादिलक्षणो धर्मो यस्य सः यादृशः यत्स्वभावः यथाऽऽचरति वर्त्तते यद्ब्रूते च यैर्लिङ्गैः भगवत्प्रियो भवति ॥ ४४ ॥

भाषा टीका ।

और वह भागवत धर्मनिष्ठ क्या करता है, कि—आकाश वायु अग्नि जल पृथिवी तारागण और सब प्राणी तथा दिशायें द्रुमादिक एवं सरित् समुद्रादिकों को अथवा और जो कोई भूत प्राणी हैं तिन सबों को श्रीहरि का शरीर मानकर प्रणाम करता है, और सबों को प्रणाम करने पर भी भाव की शुद्धि होने से सर्वत्र भगवत्स्फूर्त्ति होने के कारण अनन्य ही रहता है ॥ ४१ ॥

जो पुरुष श्रीहरि के शरणागत होता है, उसको भक्ति, परमेश्वर का अनुभव, और अन्यत्र वैराग्य, ये तीनों बातें एक समय में होने लगती हैं । जैसे कि—भोजन करने वाले पुरुष को भोजन करते २ ही ग्रास २ में तुष्टि पुष्टि और क्षुधा की निवृत्ति ये तीनों बातें साथ ही साथ होती जाती हैं ॥ ४२ ॥

हे राजन्! इस प्रकार श्री अच्युत भगवान् के चरणारविन्द भजन करने वाले भागवत को श्रीहरि की अनुवृत्ति करने से भक्ति वैराग्य और भगवद्विषयक ज्ञान ये सब साथही साथ होजाते हैं, तदनन्तर साक्षात् परम शान्ति [मोक्ष]को को प्राप्त होजाता है ॥ ४३ ॥

राजोवाच ।

राजा निमि बोले, कि—हे प्रभो! अब आप भागवतों के लक्षण कहो, कि भागवतों के कैसे धर्म होते हैं ? और भागवत लोग कैसे होते हैं ? और वे कैसे आचरण करते हैं ? और वे क्या बोलते हैं ? एवं वे भगवत् के प्यारे कौनसे चिह्नों से जाने जाते हैं ॥ ४४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

यद्धर्म इत्यस्योत्तरमाह त्रयेण—सर्वभूतेष्विति । आत्मनः स्वस्य सर्वभूतेषु ब्रह्मभावेन सान्वयं पश्येत् तथा ब्रह्मरूपे आत्मनि

ईश्वरे तदधीनेषु बालिशेषु द्विषत्सु च ।
प्रेममैत्रीकृपोपेक्षा यः करोति स मध्यमः ॥ ४६ ॥
अर्चायामेव हरये पूजां यः श्रद्धयेहते ।
न तद्भक्तेषु चान्येषु स भक्तः प्राकृतः स्मृतः ॥ ४७ ॥
गृहीत्वापीन्द्रियैरर्थान् यो न द्वेष्टि न हृष्यति ।
विष्णोर्मायामिदं पश्यन् स वै भागवतोत्तमः ॥ ४८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अधिष्ठाने भूतानि च यः पश्येत् यद्वा "आततत्वात्प्रमातृत्वादात्मा हि परमो हरिः" इति तन्त्रोक्तेरात्मनो हरेः सर्वभूतेषु मशकादिष्वपि नियन्तृत्वेन वर्त्तमानस्य भगवद्भावं निरतिशयैश्वर्यमेव यः पश्येन्नतु तस्य तारतम्यम् तथाऽऽत्मनि हरावेव भूतानि च यः पश्येत् कथम्भूते भगवति अप्रच्युतैश्वर्यादिरूपे न पुनर्जडमलिनभूताश्रयत्वेन जाड्यादिप्रसक्त्या ऐश्वर्यादिप्रच्युतिं पश्येत् स सर्वत्र परिपूर्णं भगवत्तत्त्वं पश्यन् भागवतोत्तम इत्यर्थः ॥ ४५ ॥

प्रेम च मैत्री च कृपा च उपेक्षा च ता ईश्वरादिषु चतुर्षु यः करोति स मध्यमो भागवतः एवम्भूतस्य भेदस्य दर्शनात् ॥ ४६ ॥

अर्चायां प्रतिमायां पूजामीहते करोति न तद्भक्तेष्वन्येषु च सुतरां न करोति प्राकृतः प्रकृतप्रारम्भः अधुनैव प्रारब्धभक्तिः शनैरुत्तमो भविष्यतीत्यर्थः ॥ ४७ ॥

पुनरष्टभिः श्लोकैरभ्यर्हितत्वादुत्तमभागवतस्यैव लक्षणान्याह—गृहीत्वाऽपीति । श्रीवासुदेवाविष्टचेता न गृह्णाति तावदिन्द्रियैरर्थान् गृहीत्वाऽपीत्यपिशब्दार्थः इदं विश्वम् ॥ ४८ ॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

तत्र "हरिर्हरति पापानि" इति स्मृतेः हरिशब्दस्य परममुख्यावृत्तिः श्रीभगवत्येवेति भागवतलक्षणं च भगवतैव वक्तव्यं नतु स्वमुखेन स्वलक्षणं भागवतेन वक्तव्यमन्यथाऽऽत्मसम्भावनाप्रसङ्ग इति तन्नामत्वाद्धरिरेवोवाचेति ज्ञेयं तत्र मानसधर्मोत्तरमाह—स्वस्य त्वं पदार्थस्य ब्रह्मभावेन ब्रह्माऽस्मीति भावनया सर्वभूतेषु कल्पितेषु अधिष्ठानत्वेन समन्वयमनुस्यूतत्वम् अधिष्ठाने कल्पितानि नतु वास्तवानीति यः पश्येत् स भागवतोत्तम इत्यर्थः । पूर्वार्थे ब्रह्मज्ञानिलक्षणमुक्तं नतु भागवतलक्षणमिति भ्रान्तिस्वप्रश्नोत्तरन्यायापत्तिरित्यरुचौ यद्वेति आततत्वात् सर्वव्यापकत्वात् मातृत्वात् सर्वज्ञातृत्वाच्चेत्यक्षरसाम्यान्निरुक्तिः तस्य भगवद्भावस्य हरावेव भूतानि चेति "मत्स्थानि सर्वभूतानि" इति भगवदुक्तेः सर्वाश्रये भगवत्येवाश्रितानि भूतानि यः पश्येत् इति सर्वस्य तद्व्याप्यत्वात्तदायत्तवृत्तिकत्वान्न कस्यापि स्वातन्त्र्येण सत्तां यः पश्येदित्यर्थः जडानि मलिनानि च यानि भूतानि चराचरशरीराणि तान्याश्रयो यस्य तेषां चाश्रयस्तस्य भावस्तत्ता तया या जाड्यमालिन्यादिप्रसक्तिस्तयैश्वर्यादीनां प्रच्युतिं न पश्येत् स्वाभाविकचिच्छक्त्या मायाभिभावकत्वादिति भावः । "मायां व्युदस्य चिच्छक्त्या कैवल्ये स्थित आत्मनि" इति श्रीमदर्जुनवाक्यात् प्रेमविलासमयमर्थान्तरं तु सन्दर्भे द्रष्टव्यम् ॥ ४५ ॥

ईश्वरे परमेश्वरे यः प्रेमभक्तिं करोति तथा तदधीनेषु भक्तेषु च मैत्रीं बन्धुभावं "वैष्णवे बन्धुसत्कृत्या" इति भगवता वक्ष्यमाणत्वात् बालिशेषु भक्तिमजानत्सु कृपां "शोचे ततो विमुखचेतस इन्द्रियार्थमायासुखाय भरमुद्वहतो विमूढान्" इति श्रीप्रह्लादोक्तेः स्वस्य द्विषत्सु उपेक्षां चित्ताक्षोभेणौदासीन्यं भक्तभगवद्द्वेषिषु तु चित्तक्षोभस्यावश्यकत्वादुपेक्षां तत्सामीप्यत्यागं "निन्दां भगवतः शृण्वन् तत्परस्य जनस्य वा । ततो नापैति यः सोऽपि यात्यधः सुकृताच्च्युतः" इति श्रीशुकोक्तेः । मध्यमत्वे हेतुमाह—एवम्भूतस्येति । मैत्रीकृपोपेक्षारूपस्य भेदस्य दर्शनात् नतु पूर्ववत् सर्वत्र तत्स्फूर्त्तिरिति मध्यमत्वम् ॥ ४६ ॥

मूले अर्चायामेवेति विशेषासङ्गत्या एवकारस्यान्ययोगव्यवच्छेदार्थमाह—न तद्भक्तेष्विति । श्रद्धया लोकपरम्पराप्राप्तयैव नतु शास्त्रार्थविश्वासमय्या तस्यां यस्यात्मबुद्धिः कुणपे इत्यादि तथा "अर्चयित्वा तु गोविन्दं तदीयान्नार्चयेत्तु यः । न स भागवतो ज्ञेयः केवलं दाम्भिकः स्मृतः ॥" इति शास्त्रज्ञानसम्भवे तद्भक्तपूजाया आवश्यकत्वान्न तद्भक्तेष्विति कथं प्रयुज्येत तस्माद्भक्ताभासो गौणः कनिष्ठोऽयं जातप्रेमा शास्त्रीयश्रद्धावान् साधकस्तु मुख्यः कनिष्ठो ज्ञेयः ॥ ४७ ॥

अभ्यर्हितत्वात् परमपूज्यत्वात् मायां मायिकत्वाद्धेयं पश्यन् जानन् ॥ ४८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

पञ्चरात्रादिप्रसिद्धान्येतानि रहस्यानीति हृदि निधाय तेषां प्राप्त्यर्थम् अन्तराण्येवैतदुपायभूतानि लक्षणानि वर्णयति, हरिः जीवस्य भगवच्छरीरत्वं भगवति आत्मनि भूतानि सजीवशरीराणि इति वैशिष्ट्यज्ञानवानित्यर्थः ॥ ४५ ॥

ईश्वरादिषु प्रेमादीनां क्रमेणान्वयः ॥ ४६ ॥

अर्चायामेव अन्येषु सूर्यादिषु स्थानेषु तद्भक्तेषु च श्रद्धया

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

नाति पूजाम् एवं न सेवारूपं कैङ्कर्यम् ईहते स प्राकृतः प्रकृतिसम्बन्धवशगो भवति भक्त इवेति ॥ ४७ ॥

एवं भागवतमुक्त्वा अन्तरलक्षणाविन्यासविद्योपयोगीन्याह—गृहीत्वेत्यादिना । विष्णोः सम्बन्धीदं शरीरं विश्वं मायां तादिच्छावशं पश्यन् ॥ ४८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

कवेरनन्तरो हरिराह—सर्वभूतेष्विति । सर्वेष्वाब्रह्मस्तम्बपर्यन्तेषु[भूतेषु]आत्मनः स्वस्य च औपश्लेषिकस्याधारस्य शेषत्वविवक्षया षष्ठी आत्मनि चेत्यर्थः । भगवद्भावं भगवतः सद्भावं पश्येत् अनेन व्याप्तिरुक्ता आत्मनि परमात्मनि भगवति च भूतानि च पश्येदिति भगवत आधारत्वमुक्तं वासुदेवार्थमनुसन्दधदुत्तमभागवत इत्यर्थः । यद्वा, सर्वभूतेष्वात्मनश्च भगवद्भावं भावः प्रकारः भगवत्प्रकारतां भगवच्छरीरतया तदपृथक्सिद्धधर्मतां पश्येदित्यर्थः । उत्तरार्द्धन्तु यथोक्तार्थमेव ॥ ४५ ॥

अनेन यद्धर्म इत्यस्योत्तरमुक्तं भवति भागवतोत्तम इत्युक्तं तर्हि मध्यमाधमौ कीदृशौ ? इत्यतस्तावाह द्वाभ्याम्—ईश्वर इति । ईश्वरे प्रेम ईश्वरस्य सर्वव्यापितया सर्वशरीरत्वमजानन् केवलं देवतेति बुद्धि भक्त्या यः करोति स मध्यम इत्यर्थः । तदधीनेष्वीश्वराधीनेषु भागवतेषु बालिशेष्वज्ञेषु भागवतेषु ईश्वरादिषु क्रमेण प्रेममैत्रीकृपोपेक्षाः यः करोति स मध्यम इत्यर्थः ॥ ४६ ॥

अर्चायामेवेति ग्रन्थो नार्चावताराचनापकर्षपरः किन्तु भागवतभक्तिरहितभगवदर्चाभ्यर्चनस्य मन्दफलत्वपरः अर्चायां प्रतिमायामेव हरये पूजामीहते करोति तद्भक्तेषु हरिभक्तेषु नेहते अन्येषु च गोब्राह्मणाग्न्यादिषु च सुतरां न करोति स प्राकृतः भक्त अधमभक्त इत्यर्थः । प्राकृतोऽधुनैव प्रारब्धभक्तिरिति केचिद्व्याचक्षते ॥ ४७ ॥

पुनरष्टभिः श्लोकैरभ्यर्हितत्वादुत्तमभागवतलक्षणान्येवाह, गृहीत्वेति । अर्थानिष्टानिष्टरूपान् विषयान् गृहीत्वा न मुह्यति मोहं न प्राप्नोति नाऽऽसक्तो भवतीति यावत. तत्र हेतुत्वेन विशिनष्टि-इदम् इष्टानिष्टजातं विष्णोर्मायां प्रकृतिपरिणामात्मकं पश्यन् अनिष्टविषयवदिष्टविषयस्यापि बन्धकत्वेन तस्य हेयत्वादिति भावः ॥ ४८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तत्र प्रथमप्रश्नं परिहरति—सर्वभूतेष्विति । सर्वभूतेषु स्थितस्यात्मनः पूर्णस्य हरेः भगवान् सर्वगुणपूर्णः तस्य भावो भगवद्भावः सर्वगुणपूर्णताम् आत्मन्यात्मनि भगवति भूतानि च पश्येत् पश्यति सर्वभूतेष्वात्मनः स्वस्य भगवद्भावं ब्रह्मत्वं पश्यन् भागवतोत्तम इत्यर्थस्य पूर्णत्वादात्मशब्द उक्तः कश्चित्सर्वनरोत्तम इति वाक्यविरुद्धत्वादनादर्त्तव्यम् ॥ ४५ ॥

मध्यमभागवतमाह-ईश्वर इति । ईश्वरे प्रेम तदधीनेषु सत्सु

मैत्रीं बालिशेषु अज्ञेषु कृपां द्विषत्सु उपेक्षां चशब्दात् सर्वस्य जगतस्तद्वशत्वं न जानाति ॥ ४६ ॥

अधमभागवतमाह—अर्चायामिति । एवशब्देनार्चाया अन्यत्र स्थितविष्णुज्ञानं तत्पूजां च व्यावर्तयति तद्भक्तेषु न केवलं पूजां नेहते अपितु तारतम्यं न जानाति अन्येषूपेक्षकेषु शत्रुषु द्वेषप्रकारं न जानाति विष्णुज्ञानं च किञ्चिदुक्तत्वेन प्राकृतः प्रकृतिनिर्मितं स्वर्गादिकं प्राप्यातोऽधोलोकं याति मध्यमभक्तस्यापि स्वर्ग एव निरयो नैव ॥ ४७ ॥

यथाचरतीत्येतं प्रश्नं परिहरति—गृहीत्वेति । इमां लोकयात्रां विष्णोर्मायाम् इच्छाधीनाम् पश्यन्निन्द्रियैरर्थाञ्छब्दादीन् विषयान् गृहीत्वापि योग्यतातिरेकेणाधिकं न द्वेष्टि न हृष्यति अयमेव यद्धर्म इत्यस्य परिहारः सदसत्सु यथायोग्यं हर्षद्वेषौ सदसतां वृद्धिह्रासकरो धर्मः—

“सर्वं हरेर्वशत्वेन शरीरं तस्य भण्यते ।
अनन्याधिपतित्वाच्च तदनन्यमुदीर्यते ॥
नचाप्यभेदो जगता विष्णोः पूर्णगुणस्य तु” ॥

इति एतद्धरेः शरीरं यत्किञ्च भूतं प्रणमेदनन्यमित्यत्र प्रमाणं—

“पूर्णत्वादात्मशब्दोक्तः कश्चित्सर्वनरोत्तमः ।
सोपि नारायणो नान्यः स च सर्वेषु संस्थितः ॥
तद्वशा इतरे सर्वे श्रीब्रह्मेशपुरस्सराः ।
स एव तु स्वभक्तेषु स्थित्वाऽनुग्रहकारकः ॥
अज्ञेष्वज्ञानयन्ता च द्विषत्सु द्वेषकारकः ।
तत्प्रेरितास्तदन्ये तु प्रियद्वेषादिकारिणः ॥
अतस्तत्प्रेरणादेव प्रेमाद्या मम जज्ञिरे ।
इति पश्यति यो बुद्ध्या स तु भागवतोत्तमः ॥
सर्वाधिकं पृथग्विष्णुं क्षीरसागरवासिनम् ।
ज्ञात्वा तत्र प्रेमयुक्तस्तद्भक्तेषु च मैत्रयुक् ॥
कृपावांश्च तदज्ञेषु तद्द्वेषीणामुपेक्षकः ।
तद्वशत्वं न जानाति सर्वस्य जगतोऽपि तु ॥
तामाहुर्मध्यमं भक्तमर्चायामेव संस्थितम् ।
विष्णुं ज्ञात्वा तदन्यत्र नैव जानाति यः पुमान् ॥
तारतम्यं च तद्भक्तेर्न जानाति कथञ्चन ।
अवजानंश्च तद्भक्तानात्मनो भक्तिदर्पतः ॥
उपेक्षकोपि वा तेषु न स्मरेदथवापि तान् ।
मानुषेषु यथाकश्चित्किञ्चिदुच्चः प्रदृश्यते ॥
एवमेवोच्चतां विष्णोरल्पां पश्यति चान्यतः ।
ते तु भक्ताधमाः प्रोक्ताः स्वर्गादिफलभोगिनः ॥
ते विघ्निता अधो यान्ति तद्भक्तानामुपेक्षकाः ।
कुर्युर्विष्णावपि द्वेषं देवा देवावमानिनः ॥
पूजिता विष्णुभक्तिं च नावज्ञयास्ततः सुराः ।
उपेक्षकेषु देवानां भक्तिनाशं स्वयं हरिः ॥
करोति तेन विभ्रष्टाः संसरन्ति पुनः पुनः ।
अधो वा यान्ति विद्वेषात्पूज्या देवास्ततः सदा ॥
यस्तान्द्वेष्टि स तं द्वेष्टि यस्ताननु सचानु तम् ।
एकात्म्यमागतं विद्धि देवैस्तद्भक्तिपूजितैः ॥
उपेक्षकस्तु देवानां यदैव निरयोपमः ।
तदा तु किमु वक्तव्यमुपेक्षायां जनार्दने ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

विष्णोरुपेक्षकं सर्वं विद्विषन्त्यधिकं सुराः ।
पतत्यवश्यं तमसि हरिणा तैश्च पातितः ॥
भुङ्क्ते स्वर्गफलं नित्यं निरयं नैव गच्छति ।
विष्णोस्तु मध्यमो भक्तो जायते मानुषेषु च ॥
अस्मरन्देवता यस्तु भजते पुरुषोत्तमम् ।
योग्यः संस्मरते देवा न योग्यो द्वेष्टि केशवम् ॥
यस्तूत्तमो भागवतः स मुक्तिं परमां व्रजेत् ।
विष्णुना सर्वदेवैश्च मोदते स हि नित्यदा ॥

इति समाख्यानबलात्सिद्धोऽयं सर्वभूतेष्वित्याद्युक्तार्थं इति विष्णुमायां विविच्याभिधीनाम्—

"विष्णोरिच्छानुसार्यैतज्ज्ञात्वा योग्यांश्च चाधिकम् ।
हृष्यति द्वेष्टि वा यस्तु स वै भागवतोत्तमः" ॥

इत्येतद्गृहीत्वापीन्द्रियैरर्थानित्यर्थे मानम्—

"सतां वृद्धिकरो धर्मस्त्वसतां ह्रासकारणः ।
अयं तु निश्चितो धर्मो ह्यधर्मोऽन्यो विनिश्चितः ॥
हर्षः सत्सु तथा सत्सु धर्मो धर्मविपर्ययः ।
तेषां वृद्धौ तथा हानौ सर्वं श्रेयमशेषतः ॥
एतदर्थेच धर्माणां मर्यादा वैदिकादिका ।
मूलधर्मविरुद्धा तु सा न ग्राह्या कथञ्चन" ॥

इत्येतदपि गृहीत्वापीत्यत्र मानम् ॥ ४८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तत्रोत्तरं तत्तदनुभवद्वारा गम्येन मानसलिङ्गेन महाभागवतं लक्षयति—सर्वभूतेष्विति । "एवं व्रतः स्वप्रियनामकीर्त्या जातानुरागः" इति श्रीकविवाक्योक्तरीत्या यश्चित्तद्रवहासरोदनाद्यनुभावकानुरागवशात् खं वायुमग्निमित्यादि तदुक्तप्रकारेणैव चेतनाचेतनेषु सर्वभूतेषु आत्मनो भगवद्भावम् आत्माभीष्टो यो भगवदाविर्भावस्तं पश्येदनुभवति अतस्तानि च भूतानि आत्मनि स्वचित्ते स्फुरति यो भगवान् तस्मिन्नेव तदाश्रितत्वेनैवानुभवति एष भागवतोत्तमो भवति इत्थमेव श्रीव्रजदेवीभिरुक्तम् "वनलतास्तरव आत्मनि विष्णुं व्यञ्जयन्त्य इव पुष्पफलाढ्याः" इत्यादि यद्वा आत्मनो यो भगवति भावः प्रेमा तमेव चेतनाचेतनेषु भूतेषु पश्यति शेषं पूर्ववत् अत एव भक्तरूपतदधिष्ठानबुद्धिजातभक्त्या तानि नमस्करोतीति खं वायुमित्यादौ पूर्वमुक्तमिति भावः । तथैव चोक्तं ताभिरेव "नद्यस्तदा तदुपधार्य मुकुन्दगीतमावर्तलक्षितमनोभवभग्नवेगाः" इत्यादि श्रीपट्टमहिषीभिरपि "कुररि विलपसि त्वम्" इत्यादि अत्र न ब्रह्मज्ञानमभिधीयते भागवतैस्तज्ज्ञानस्य तत्फलस्य च हेयत्वेन जीवभगवद्विभागाभावेन च भागवतत्वविरोधात् "अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे" इत्यादिकात्यन्तिकभक्तिलक्षणानुसारेण सुतरामुत्तमत्वविरोधाच्च नच निराकारेश्वरज्ञानं "प्रणयरसनया धृताङ्घ्रिपद्म" इत्युपसंहारगतलक्षणपरमकाष्ठाविरोधादेवेति विवेचनीयम् ॥ ४५ ॥

अथ मानसलिङ्गविशेषेणैव मध्यमभागवतं लक्षयति, ईश्वर इति । परमेश्वरे प्रेम करोति तस्मिन् भक्तियुक्तो भवतीत्यर्थः । तथा तदधीनेषु भक्तेषु च मैत्रीं बन्धुभावं बालिशेषु तद्भक्तिमजानत्सु उदासीनेषु कृपां यथोक्तं श्रीप्रह्लादेन "शोचे ततो विमुखचेतस इन्द्रियार्थमायासुखाय भरमुद्वहतो विमूढान्" इति आत्मनो द्विषत्सु उपेक्षां तदीयद्वेषेन चित्तक्षोभेणौदासीन्यमित्यर्थः । तेष्वपि बालिशत्वेन कृपांशसद्भावात् यथैव श्रीप्रह्लादो हिरण्यकशिपौ भगवतो भागवतस्य वा द्विषत्सु तु सत्यपि चित्तक्षोभे तत्रानभिनिवेशमित्यर्थः । अस्य बालिशेषु कृपाया एव स्फुरणं द्विषत्सूपेक्षाया एव नतु प्रागवत्सर्वत्र तस्य तत्प्रेम्णो वा स्फुरणं ततो मध्यमत्वम् ॥ ४६ ॥

अथ भगवद्धर्माचरणरूपेण कायिकेन किञ्चिन्मानसेन च लिङ्गेन कनिष्ठं लक्षयति—अर्चायामिति । अर्चायां प्रतिमायामेव न तद्भक्तेषु अन्येषु च सुतरां न भगवत्प्रेमाभावात् भक्तमाहात्म्यज्ञानाभावात्सर्वादरलक्षणभक्तगुणानुदयाच्च स प्राकृतः प्रकृतिप्रारम्भः अधुनैव प्रारब्धभक्तिरित्यर्थः । इयञ्च श्रद्धा न शास्त्रार्थावधारणजाता "यस्यात्मबुद्धिः कुणपे" इत्यादिशास्त्राज्ञानात् तस्माल्लोकपरम्पराप्राप्तैवेति पूर्ववत् अतश्चाज्ञातप्रेमा शास्त्रीयश्रद्धायुक्तः साधकस्तु मुख्यः कनिष्ठो ज्ञेयः ॥ ४७ ॥

पूर्वोक्तप्रकारेण मायां बहिरङ्गशक्तिविलासत्वाद्धेयमित्यर्थः । अत्रापि कायिकमानसयोः साङ्कर्यम् ॥ ४८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

आत्मनः स्वस्य उपास्यो यो भगवांस्तस्य भावं विद्यमानतां सर्वभूतेषु यः पश्येत् यथा स क इति हिरण्यकशिपुना पृष्टः प्रह्लादः सर्वत्रैवेत्युक्त्वा स्तम्भेऽपि मत्प्रभुर्दृश्यते इति स्वोपास्यं भगवन्तं दृष्टवानेवेत्यर्थः । तथा आत्मन्यात्मीये आत्मोपास्ये भगवति च भूतानि पश्येत् यथा श्रीयशोदा कृष्णस्य जठरे एव सर्वभूतान्यपश्यत् । यद्वा, आत्मनि स्वमनसि स्फुरति यो भगवांस्तस्मिन्नेव भूतानि तद्विषयकप्रेमवन्ति यः पश्येत् यथा "वनलतास्तरव आत्मनि विष्णुं व्यञ्जयन्त्य इव पुष्पफलाढ्याः" इति "नद्यस्तदा तदुपधार्य मुकुन्दगीतम्" इत्यादिकं व्रजसुन्दर्यः । "कुररि विलपसि त्वम्" इति "क्षितिधर ! चिन्तयसे स्तनैर्विधर्तुम्" इत्यादिकं पट्टमहिष्यश्चोक्तवत्यः । अत एव आत्मनो भगवद्भावं सर्वभूतेषु यः पश्यति भाववन्ति च भूतानीत्यस्यार्थः सम्मतः सतामिति श्रीसनातनगोस्वामिचरणानां कारिका प्रसिद्धा अत्र पश्येदिति तथा दर्शनयोग्यतैव विवक्षिता "शकि लिङ्च" ३।३।१।७२ इति लिङ् नतु तथा दर्शनस्य सार्वकालिकता तथात्वे नारदव्यासशुकादावप्यव्याप्तिः स्यात्रहि ते सर्वदैव सर्वत्र भगवन्तं पश्यन्ति किन्तु तद्दिदृक्षाधिक्य एवाऽतस्तद्दर्शनोत्कण्ठ्यमत्याधिक्यं यदा वर्द्धेत तदैव कामुकाः कामिनीमयमिति न्यायेन सर्वं जगदेव भगवन्मयं पश्येत् तथैव "आत्मवन्मन्यते जगत्" इति न्यायेन सर्वभूतान्येव प्रेमोत्कण्ठव्याकुलान्येव पश्येदिति ज्ञेयम् । अत्र दर्शनार्थत्वे व्याख्याते भगवतः सर्वभूताधेयत्वाधारत्वज्ञानवतः शास्त्रज्ञमात्रस्यैव भागवतोत्तमत्वं स्यादिति तन्न व्याख्यातम् ॥ ४५॥

देहेन्द्रियप्राणमनोधियां यो जन्माऽप्ययक्षुद्भयतर्षकृच्छ्रैः।
संसारधर्मैरविमुह्यमानः स्मृत्या हरेर्भागवतप्रधानः ॥ ४९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ईश्वरे स्वोपास्ये भगवति प्रेम करोति तस्मिन्नासक्तो भवतीत्यर्थः। तदधीनेषु स अधीनो येषां तेषु भक्तेषु मैत्रीं बन्धुभावं बालिशेषु तद्भक्तिमजानत्सु कृपामिति भरतव्यासशुकादीनामपि कृपायाः सार्वत्रिकत्वाद्दर्शनात् येषु बालिशेषु कृपा स्वयमुदेति तेष्विति व्याख्येयम् "गिरयो मुमुचुस्तोयं क्वचिन्न मुमुचुः शिवम्" इति गिरिदृष्टान्तात् भगवन्तं द्विषत्सु उपेक्षां अत्र कृपाया वैफल्यदर्शनादिति भावः। आत्मानं द्विषत्सु तु बालिशत्वमननात् दूरतः स्थित्वैव तच्छुभानुध्यानमात्रमिति सदाचारः अत्र सर्वभूतेषु भगवद्दर्शनयोग्यता यस्य कदाचिदपि न दृष्टा तस्यैवैतल्लक्षणचतुष्टयवत्त्वे मध्यमत्वं यस्य तु सा दृष्टा तस्य तूत्तमत्वमेवेति विवेचनीयम् अत एव भागवतोत्तमेषु नारदादिष्वपि प्रेममैत्रीकृपोपेक्षा दृश्यन्ते एव ॥ ४६ ॥

अर्चायां प्रतिमायां हरये हरिं प्रीणयितुं न तद्भक्तेष्वपि अन्येषु च सुतरां प्राकृतः प्रकृतिप्रारम्भः अधुनैव प्रारब्धभक्तिः क्रमेणोत्तमो भविष्यतीत्यर्थः इति श्रीस्वामिचरणाः तदेवं त्रिभिर्वैष्णवो याहश इति प्रश्नस्योत्तरमुक्तम् ॥ ४७ ॥

लक्षितस्योत्तमभागवतस्य जातिभेदादन्यान्यपि लक्षणानि सम्भवन्तीत्याह पुनरष्टभिः—गृहीत्वेति ॥ ४८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

एवं पृष्टा मुनयः हरिमुखेनोत्तरमाहुः—सर्वभूतेष्वित्यादिभिरेकादशभिः श्लोकैः। तत्र प्रथमं प्रश्नस्योत्तरं त्रिभिः "एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च। खं वायुर्ज्योतिरापश्च पृथ्वी विश्वस्य धारिणी" इत्यादिश्रुतिप्रसिद्धस्यात्मनः सर्वभूतकारणस्य भगवतः सम्बन्धिषु कार्यरूपेषु चराचरेषु यः भगवद्भावं पश्येत् स्वासाधारणैश्चेतनत्वाचेतनत्वपरिच्छिन्नत्वादिभिर्धर्मैर्भिन्नेष्वपि कार्येषु कारणात्कार्यभूतानां पृथक्स्थितिप्रवृत्त्याद्यभावात् कारणाभिन्नत्वं पश्येत् "सर्वं खल्विदं ब्रह्म" इति श्रुतेः "तदनन्यत्वमारम्भणशब्दादिभ्यः"(२।१।१५) इति न्यायाच्च अतः सर्वभूतेषु भगवद्दृष्ट्या भगवति तु विशेषतः सप्रेममात्रं परमशान्तिहेतुं करोति केवलाभेदभ्रान्तिवारणायाह—भूतानीति। आत्मनि जगदात्मनि भगवति स्वासाधारणैर्धर्मैः सृष्टेः पूर्वं सृष्ट्यनन्तरं च सूक्ष्मरूपेण स्थूलरूपेण च भूतानि पश्येत् "सदेव सौम्येदमग्र आसीत्" "एतस्मिन् द्यावापृथिव्यौ विधृतौ तिष्ठतः" इत्यादिश्रुतिभ्यः एष कार्यकारणयोर्जगद्ब्रह्मणोर्भेदाभेदसम्बन्धवित् भागवतोत्तमः जगद्ब्रह्मणोः केवलभेदस्वीकारे अभेदशास्त्रव्याकोपः केवलाभेदस्वीकारे च भेदशास्त्रव्याकोप इत्यलं विस्तरेण ॥ ४५ ॥

यस्तु यथार्थशास्त्रार्थज्ञानाभावात् यथा सङ्ख्यमीश्वरादिषु प्रेम च मैत्री च कृपा च उपेक्षा च प्रेममैत्रीकृपोपेक्षाः करोति स मध्यमः भागवतः ॥ ४६ ॥

यस्तु मध्यमादप्यल्पज्ञानः आचार्यादिभ्यः अर्चापूजनमाहात्म्यं श्रुत्वा श्रद्धया अर्चायामेव हरये पूजामीहते तद्भक्तेषु हरिभक्तेषु तु नेहते अन्येषु भूतेषु च नेहते इति किं वक्तव्यम् स भक्तः प्राकृतः प्रकृतिप्रारम्भस्तत्र भवः कृतभजनारम्भ इत्यर्थः। एवकारेण सर्वगतत्वभक्तप्रियत्वादिभगवद्गुणान् स न जानातीति सूचितम्, अर्चायामेव हरये पूजामीहते इत्यनेन पतिमेव सेवते कामुकी न तत्परिकरमितिवत्प्राकृतभक्तस्वभावापकर्षः वर्णितः न त्वर्चापूजापकर्ष इति ज्ञेयम् ॥ ४७ ॥

प्रशस्तत्वादुत्तमभागवतस्य गुणान् पुनराहाष्टाभिः तत्र तावत् कथं चरतीत्यस्य प्रश्नस्य हरिभजनावेशेन द्वेषहर्षमोहकामादिरहितश्चरतीत्युत्तरं चाह—गृहीत्वापीति त्रिभिः। प्रथमतस्तु हरिणामादिपरैः श्रोत्रादिभिरिन्द्रियैः शब्दाद्यर्थान् गृह्णाति अथ कदाचिदसाधून् साधूंश्चार्थान् शब्दादीन् विषयान् गृहीत्वापि इदं सर्वं जगत् मायां प्रकृतिपरिणामात्मना वर्तमानां पश्यन् न द्वेष्टि न हृष्यति असाधूनामिव साधूनामपि विषयाणां बन्धकत्वादुपेक्षा युक्तैवेति भावः ॥ ४८ ॥

भाषा टीका।

हरिरुवाच।

हरि नामक योगेश्वर बोले, कि—सर्व भूत प्राणियों के विषें तथा अपने विषें भी भगवद्भाव देखे अर्थात् भगवान् का यह प्रकार है भगवान् प्रकारी है, ऐसे देखे, तथा सम्पूर्ण भूत प्राणियों को परमात्मा श्रीभगवान् के विषय में देखे अर्थात् सब का आधार परमात्मा को समुझे वही भागवतोत्तम है ॥ ४५ ॥

और जो ईश्वर में प्रेम, भक्तों में मित्रता, मूर्खों पर कृपा, और द्वेषियों पर उपेक्षा करनेवाला है वह मध्यम भागवत है ॥४६॥

जो अर्चा मूर्त्ति मात्र में श्रद्धा से हरि का पूजन करता है, अन्य हरि भक्तों के विषें नहीं करता वह प्राकृत भक्त है, अर्थात् अज्ञ भक्त है, पूर्णभक्त वही है जो भागवतों में प्रीति पुरःसर भगवत्सेवा करता है ॥ ४७ ॥

भागवत धर्मनिष्ठ अधिकारी इन्द्रियों से विषयों का सेवन नहीं करता है, यदि विषयों को ग्रहण भी करै तौ प्रिय अप्रिय विषयों में राग द्वेष जो नहीं करता है, और इस विश्व को भगवान् की माया समुझता है, वह भागवतोत्तम है ॥ ४८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

किञ्च देहादीनां संसारधर्मैर्जन्माप्ययादिभिर्यो हरेः स्मृत्याऽविमुह्यमानः सः भागवतप्रधानः तत्र देहस्य जन्माप्ययौ प्राणस्य क्षुत्पिपासे मनसो भयम् बुद्धेस्तर्षस्तृष्णा इन्द्रियाणां कृच्छ्रं श्रमस्तैः ॥ ४९ ॥

न कामकर्मबीजानां यस्य चेतसि सम्भवः।
वासुदेवैकनिलयः स वै भागवतोत्तमः॥ ५०॥
न यस्य जन्मकर्मभ्यां न वर्णाश्रमजातिभिः।
सज्जतेऽस्मिन्नहं भावो देहे वै स हरेः प्रियः॥ ५१॥
न यस्य स्वः पर इति वित्तेष्वात्मनि वा भिदा।
सर्वभूतसमः शान्तः स वै भागवतोत्तमः॥ ५२॥

श्रीधरस्वामिकृतभावार्थदीपिका।

कामश्च कर्माणि च बीजानि च वासनास्तेषाम्। वासुदेव एवैकनिलय आश्रयो यस्य सः एतेन गृहीत्वापीत्यादिश्लोकत्रयेण द्वेषहर्षमोहकामादिरहितश्चरतीति यथा चरतीत्यस्योत्तरमुक्तम्॥ ५०॥

यैर्लिङ्गैर्भगवत्प्रिय इत्यस्योत्तरमाह—न यस्येति। जन्म सत्कुलम् कर्म तप आदि जातयोऽनुलोमप्रतिलोमजा मूर्धावसिक्तादयः अस्मिन् देहे अहङ्काररहितैः सत्कुलकर्मादिलिङ्गैर्हरेः प्रियो भवतीत्यर्थः॥ ५१॥

वित्तेषु स्वीयं परकीयमिति आत्मनि स्वः पर इति॥ ५२॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी।

संसारः जीवस्य जन्माद्यभिमानस्तज्जनकैर्देहादीनां धर्मैर्जन्माप्ययादिभिरित्यर्थः। तत्र देहादिमध्ये॥ ४९॥

काम्यन्त इति कामाः विषयाः चरति वर्त्तत इति व्यवहारात्मकवर्त्तनस्योत्तरम्॥ ५०॥

मूर्धावसिक्तो क्षत्रियजातीयस्त्रियां ब्राह्मणाज्जातः अम्बष्ठो वैश्यात् क्षत्रियायां जातः अहङ्काररहिताः सत्कुलधर्मादय एव लिङ्गानीति तात्पर्यार्थविवक्षेत्यर्थः इत्युक्तम्॥ ५१॥

आत्मनि स्व इति अहमन्योऽसावन्य इति॥ ५२॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्।

देहस्य जन्माप्ययौ प्राणस्य क्षुत् इन्द्रियाणां कृच्छ्राणि मनसो भयं तर्षः तृष्णा बुद्धेः एवम्भूतैः संसारधर्मैः सर्वथा देहात्माभिमानरहित इत्यर्थः॥ ४९॥

कामकर्मवासनानामुत्पत्तिः यस्य चेतसि मनसि, न भवेत् श्रीवासुदेवाश्रयः अन्तर्यामिदृष्टिबलेन तदेव वसति॥ ५०॥

सत्कुलजन्म श्रौतस्मार्त्तकर्मभ्यां वर्णाश्रमविशिष्टजातिभिश्च देहनिष्ठाभिः अहम्भावो यस्य नास्ति देहनिष्ठक्षुद्भयादिकर्मवत् अवर्जनीयशास्त्रीयकर्माण्यपि कुर्वन् तत्कृताऽहङ्कारविवशः आत्मनि देहपुत्रदारादिके भिदा अब्रह्मात्मकस्वतन्त्रदृष्टिः॥ ५१-५२॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

देहेन्द्रियेति। यो हरेः स्मृत्या देहादीनां जन्मादिभिः संसारधर्मैरविमुह्यमानः सः प्रधान उत्तमो भागवत इति सम्बन्धः तत्र देहस्य जन्माप्ययौ उत्पत्तिविनाशौ प्राणस्य क्षुत् मनसो भयं बुद्धेस्तर्षः तृष्णा इन्द्रियाणां कृच्छ्रं श्रम इति योज्यम्॥ ४९॥

यस्य चेतसि कामकर्मबीजानां काममूलकर्माण्येव बीजानि तेषां कामाश्च कर्माणि च बीजानि वासनाश्च तेषां वा कामकर्माणि काम्यकर्माणि तान्येव बीजानि संसृतिहेतुत्वात्तेषामिति वा न सम्भवः वासुदेव एक एव निलय आश्रयो यस्य सः॥ ५०॥

एवं गृहीत्वेत्यादिश्लोकत्रयेण द्वेषहर्षमोहकामादिरहितश्चरतीति यथा चरतीत्यस्योत्तरमुक्तं भवति। यैर्लिङ्गैर्भगवत्प्रिय इत्यस्योत्तरमाह—न यस्येति द्वाभ्याम्। तत्राद्योऽहङ्कारनिवृत्तिपरः द्वितीयस्तु ममकारनिवृत्तिपर इति विवेकः तत्र जन्म त्रिविधं यौनं सावित्रं [शौक्ल] याज्ञिकं चेति. कर्म गर्भाधानादिचौलान्तं वर्णो ब्राह्मणत्वादिः आश्रमो ब्रह्मचर्यादिः जातिर्देवत्वमनुष्यत्वादिः आभिर्देहगताभिर्निमित्तभूताभिर्यस्य देहेऽहम्भावो न सज्जते नासक्तो भवति नास्तीति यावत् स हरेः प्रियः प्रियतमः॥ ५१॥

स्वो बन्धुः परः शत्रुः इति वा भिदा तथा वित्तेष्वात्मनि देहे च भिदा ममेदं धनमन्यस्येदं मम शरीरमन्यस्येदं शरीरम् इति वा भिदा भेदः तत्प्रयुक्तं हिताहिताचरणं च यस्य नास्ति स भागवतोत्तम इति सम्बन्धः तदभावे हेतुत्वेन विशिनष्टि सर्वभूतसमः ब्रह्मात्मकत्वेनात्मनां ज्ञानैकाकारत्वेन देहानां प्रकृतिपरिणामरूपत्वेन सर्वभूतेषु समबुद्धिरित्यर्थः। तत्रापि हेतुः शान्तः जितान्तःकरणः समत्वेन शिक्षितमना इत्यर्थः। अहम्ममाभिमानादिभिर्लिङ्गैर्लक्ष्यत इति कैर्लिङ्गैरित्यस्योत्तरमुक्तं भवति वित्तेष्वात्मनि च भिदा नास्तीत्यनेन धनशरीरादावपि कालुष्यादिवत्प्रतिपत्तिरभिप्रेता न त्वात्मभेदनिषेधः तथा सति सर्वभूतसम इत्यनन्तरोक्तिविरोधात् भूतशब्दो देहविशिष्टात्मपरः सर्वशब्देनापि बहुत्वमवगम्यते॥ ५२॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

कैर्लिङ्गैरित्येतं प्रश्नं परिहरति—देहेन्द्रियप्राणधियामिति। संसारधर्मः संसारस्वभावैः देहादिनां जन्मादिकृच्छ्रैरविमुह्यमानः

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तत्तद्वस्तु मत्तत्त्वं यथावज्जानन् यो मन्यते स भागवतप्रधान इत्यन्वयः । तत्र हेतुमाह—स्मृत्येति । देहादीनामचेतनत्वेन जन्मादिकृच्छ्रनुगवोऽनुपपन्न इत्यतस्तात्पर्यार्थोऽन्यो युक्तो वक्तव्यः स क इत्याशङ्का—

"देहेन्द्रियप्राणधियां त्रिधैव त्वभिमानिनः ।
तत्रोत्तमा देवतास्ताः सर्वदोषविवर्जिताः ॥
गुणैः सर्वैः सुसम्पन्ना विरिञ्चादुत्तरोत्तरम् ।
मध्यमागुणादाचैता अधमा असुरा मताः ॥
ते सर्वे दोषसंयुक्ता आचित्तादुत्तरोत्तरम् ।
तेभ्योऽन्यो मानुषो जीवस्ताभ्यां देवासुरावपि ॥
जीवाभिमानिनश्चैव त्रिविधाः सम्प्रकीर्त्तिताः ।
जीवमान्युत्तमो ब्रह्मा मध्यमः स्वयमेव तु ॥
अधमः कलिरुद्दिष्टस्तत्र मध्यमनीचयोः ।
मृतिजन्मक्षुधादुःखप्रभृत्यखिलमेव तु ॥
नोत्तमस्य तु जीवस्य देहादेश्च कथञ्चन ।
जन्मादिकृतदुःखन्तु देहमान्यसुरस्य ह ॥
क्षुत्स्वाद्यद्भवजं दुःखमसुरेन्द्रियमानिनः ।
क्षुन्निमित्तं तु यद्दुःखं प्राणमान्यसुरस्य तत् ॥
भयतर्षादिजं दुःखं मनोमान्यसुरस्य च ।
केवलञ्चान्तरं दुःखं बुद्धिमान्यसुरस्य तत् ॥
नीचोऽस्मीति तु यद्दुःखमहमान्यसुरस्य तत् ।
अतीतादेः स्मृतेर्दुःखं चित्तमान्यसुरस्य च ॥
जीवमान्यसुरस्य स्यात्सर्वं तत्समुदायतः ।
एवमेव सुखं देवपूर्वं मध्यमेषु च ॥
असुराणामधर्मस्य वृद्ध्या सुखमपीष्यते ।
देवानां नैव केनापि दुःखं प्रीतिस्तु धर्मतः ॥
अधर्मोऽपि प्रीतये स्यादसुराणां तमोगतेः ।
देवानां पुण्यपापाभ्यां सुखमेवोत्तरोत्तरम् ॥
तेषां दुःखादिकं किञ्चिदसुरावेशतो भवेत् ।
प्राणस्य नासुरावेशो हरिणा स समो हि सः ॥
सम्पूर्णानुग्रहाद्विष्णोः प्रायः पूर्णगुणो मतः ।
असुराणां सुखाद्याश्च देवावेशादुदीरिताः ॥
स्वतस्तु निर्गुणाः सर्वे सर्वदोषात्मका मताः ।
त्रिविधैवं जगत्सर्वं स्वात्मानं च पृथक् स्थितम् ॥
सर्वतश्च पृथक् सन्तं विष्णुं सर्वोत्तमोत्तमम् ।
जानन्ति ये भागवतास्त उक्ता उत्तमोत्तमाः" ॥

इत्यनेन परिहृतेति ज्ञातव्यम् ॥ ४९ ॥

कामकर्मबीजान्यविद्याप्रकृत्यादीनि एषां कामादीनाम् ॥ ५० ॥

जन्मकर्मभ्यां ब्राह्मणादिजन्मना गुरुकुलवासादिकर्मणा ब्राह्मणादिवर्णैः ब्रह्मचर्याद्याश्रमैः ब्राह्मणत्वादिजातिभिश्च संज्ञिते सङ्केतिते यः कामकर्मबीजैरुत्पन्नस्तस्मिन्देहे यस्याहम्भावो ब्राह्मणोऽहमित्यादि लक्षणो नास्ति स भागवतोत्तम इति ॥ ५१ ॥

इदमप्येकं लक्षणमित्याह—न यस्येति । यस्य भागवतस्य चित्ते प्राकृतान्तःकरणे विद्यमाने संसारे स्वात्मनि केवलात्मभावे स्वरूपावस्थाने मोक्षे वा यः स्वो जीवः परः परमात्मेति जीवपरयोरभिदा अभेदो नास्ति अभेदज्ञानं नास्तीत्यर्थः । यश्च * सर्वभूतसमः ब्रह्मादिमानुषान्तानि भूतानि यथावत् तारतम्येन पश्यति स भागवतोत्तमः—

"न क्वापि जीवं विष्णुत्वे संसृतौ मोक्ष एव वा ।
यः पश्यति सुरांश्चैव यथोत्कर्षं प्रपश्यति ॥
स सर्वभूतसमदृग्विष्णुं सर्वोत्तमं स्मरन्" ।

इत्यतः—

"नैवं त्वयाऽनुमन्तव्यं इष्टो जीवो मयेति ह ।
सर्वभूतगुणैर्युक्तं देवं त्वं ज्ञातुमर्हसि" ॥

इत्यतश्च—

"नैवं त्वयाऽनुमन्तव्यं जीवात्माहमिति क्वचित् ।
सर्वैर्गुणैः सुसम्पन्नं दैवं मां ज्ञातुमर्हसि" ॥

इत्यतश्च प्रमाणाद्यस्य स्वकीयपरकीयबुद्धिभेदो नास्तीत्यर्थो नोपपन्नः । किन्तूक्त इति शान्तो भगवन्निष्ठायुक्तः ॥ ५२ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अथ केवलमानसलिङ्गेनाह यावत्प्रकरणम्—यो हरेः स्मृत्या देहादीनां संसारधर्मैर्जन्माप्ययादिभिर्विमुह्यमानो न भवति स भागवतप्रधानः उक्तं च श्रीगीतासु—

"येषां त्वन्तगतं पापं जनानां पुण्यकर्मणाम् ।
ते द्वन्द्वमोहनिर्मुक्ता भजन्ते मां दृढव्रताः" ॥

इति ॥ ४९ ॥ ५० ॥

एतादृशस्य अस्मिन् देहे अहम्भावो न सज्जते किन्तु भगवत्सम्बन्धौपयिके साध्ये देह एव सज्जत इत्यर्थः । स हरेः प्रियो भागवतोत्तम इति पूर्वेणैवान्वयः । प्रकरणार्थत्वात् हरेः प्रिय इति हि भागवतमात्रवाचिभागवतत्वादेव ॥ ५१ ॥

तथा वित्तेषु ममतास्पदमात्रेषु अत्र वित्तवदात्मनि च स्वपक्षपातमात्रं निषिध्यते न व्यक्तिभेदः ॥ ५२ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

देहादीनां जन्मादिभिः संसारधर्मैरविमुह्यमानः तत्र देहस्य जन्माप्ययौ प्राणस्य क्षुत्पिपासे मनसो भयं बुद्धेस्तर्षः तृष्णा इन्द्रियाणां कृच्छ्रं श्रमस्तैः ॥ ४९ ॥

न कामेति चेतस्यादौ बीजानि वासना उत्पद्यन्ते ततः स्त्र्यादिविषयकः कामस्ततः कर्म इन्द्रियद्वारा तत्तद्व्यापारः एतत्त्रितयस्य यश्चेतसि न सम्भवः तदेवं गृहीत्वापीत्यादिभिर्द्वेषहर्षमोहकामादिरहितश्च भवतीति यथा चरमोक्तस्योत्तरमुक्तम् अतःपरमध्यायसमाप्तिपर्यन्तं यद्धर्म इत्यस्योत्तरमेव प्रपञ्चितम् ॥ ५० ॥

जन्म सत्कुलोद्भवत्वं कर्म तपस्तानादि जातयोऽम्बष्ठाद्याः एताभिर्यस्य देहे अहम्भावोऽहङ्कारो न भवति ॥ ५१ ॥

स्वः स्वपक्षः परो विपक्षः विशेषेऽपि स्वस्यैवेदं वित्तं न परस्येति आत्मनि स्वशरीरे एव प्रीतिर्न परशरीरे इति ॥ ५२ ॥

* शत्रुषु शत्रुत्वेन मित्रेषु मित्रत्वेन उदासीनेषु उदासीनत्वेन ज्ञानं समत्वम् एतद्विपरीतं असमत्वम् ।

त्रिभुवनविभवहेतवेऽप्यकुण्ठस्मृतिरजितात्मसुरादिभिर्विमृग्यात्।
न चलति भगवत्पदारविन्दाल्लवनिमिषार्धमपि यः स वैष्णवाग्र्यः ॥ ५३ ॥
भगवत उरुविक्रमाङ्घ्रिशाखानखमणिचन्द्रिकया निरस्ततापे।
हृदि कथमुपसीदतां पुनः सः प्रभवति चन्द्र इवोदितेऽर्कतापः ॥ ५४ ॥
विसृजति हृदयं न यस्य साक्षाद्धरिरवशाभिहितोऽप्यघौघनाशः।
प्रणयरशनया धृताङ्घ्रिपद्मः स भवति भागवतप्रधान उक्तः ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्याम्
एकादशस्कन्धे वसुदेवनारदसम्वादे जायन्तेयोपाख्याने
द्वितीयोऽध्यायः ॥ २ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

देहादीनां जन्मादिभिः अन्यैश्च संसारधर्मैः संयोगवियोगादिभिः विमोहकैः यो हरेः स्मृत्या सर्वमोहध्वान्तचन्द्रिकया अविमुह्यमानः स भागवतप्रधानः। तत्र देहस्य जन्माप्ययाभ्यां प्राणस्य क्षुत्पिपासाभ्यां मनसो भयेन बुद्धेस्तर्षेण तृष्णया इन्द्रियाणां कृच्छ्रैः श्रमैः ॥ ४९ ॥

यस्य चेतसि कामस्य कर्मणां वासुदेवाराधनविरुद्धक्रियाणां बीजस्य अविद्यायाः वासनाया वा सम्भवो न यतः वासुदेवस्य एको निलयः वासस्थानभूतः वासुदेवाधिष्ठितः चेतसश्चेतसि कामादेरवकाशाभाव इत्यर्थः। स भागवतोत्तमः ॥ ५० ॥

यैर्लिङ्गैर्भगवत्प्रिय इत्यस्योत्तरमाह—नेति। अस्मिन् पाञ्चभौतिके प्रसिद्धे देहे जन्मादिभिः उत्कृष्टैर्निकृष्टैर्वा उत्कृष्टोस्मीत्युत्कृष्टः निकृष्टोस्मीति निकृष्टो वा यस्याहम्भावो न सज्जते वैशब्दात् भक्तिहीनानां जन्मादीनामुत्कृष्टानामपकृष्टानामपि—

> "किं जन्मभिस्त्रिभिर्वेह शौक्लसावित्रयाज्ञिकैः।
> कर्मभिर्वा त्रयीप्रोक्तैः पुंसोपि विबुधायुषा ॥
> किं वा साङ्ख्येन योगेन न्यासस्वाध्याययोरपि।
> श्रेयोभिर्विविधैर्वापि न यत्रात्मप्रदो हरिः" ॥

इत्यादिप्रमाणादकिञ्चित्करत्वमाकलय्य भक्त्यनुगुणानामुत्कृष्टानां निकृष्टानां च तेषां तज्जन्म तानि कर्माणि तदायुष्मद्बहुज्ञतातोऽप्येते येन सर्वात्मा भगवान् हरिरीश्वरः इत्यादिप्रमाणात्पुरुषार्थप्रदत्वमाकलय्य सर्वत्राहङ्कारशून्यतया दृढविश्वासेन हरिं यो भजते स एवम्भूतैर्लिङ्गैर्हरेः प्रियो भवति जातयः अनुलोमप्रतिलोमजाः मूर्द्धावसिक्तादयः अन्त्यन्तपर्यन्तम् अत्रान्तलिङ्गान्युक्तानि ऊर्द्ध्वपुण्ड्रादीनि बाह्यलिङ्गानि तु "धृतोर्द्ध्वपुण्ड्रः कृतचक्रधारी" इत्यादिश्रुत्युक्तानि अतिप्रसिद्धत्वान्नोक्तानि ॥ ५१ ॥

याहृश इत्यस्योत्तरमाह—न यस्येति त्रिभिः। वित्तेषु भोग्यपदार्थेषु आत्मनि भोक्तरि च असौ स्वः स्वाधीनः भोग्यपदार्थः आत्मा भोक्ता च असौ परः परकीयः परभोग्यपदार्थः परमात्मा च इति यस्य भिदा भेदः नास्ति सर्वस्य भोग्यभोक्तृरूपस्य ब्रह्माधीनत्वात् "यदासीत्तदधीनमेवासीत्" इति श्रुतेः अत एव सर्वभूतसमः स भागवतोत्तमः ॥ ५२ ॥

भाषा टीका।

जो निरन्तर श्रीहरि की स्मृति से देह इन्द्रिय मन प्राण और बुद्धि के जन्म नाश क्षुधा भय तृष्णा दुःख इत्यादिक धर्म है, तिनसे तथा अन्य संसार के धर्मों से कभी मोह को नहीं प्राप्त होता है वह भागवत प्रधान है ॥ ४९ ॥

जिसके चित्त में काम कर्म और वासनाओं की कदापि उत्पत्ति नहीं होती, और सदा एक श्रीवासुदेव के आश्रय लेकर रहने वाला है वह भागवतों में उत्तम है ॥ ५० ॥

जिसका जन्म कर्मों से तथा वर्ण आश्रम जाति से इस शरीर में अहंभाव (अहङ्कार) नहीं होता है, वह श्रीहरि का प्रिय है ॥ ५१ ॥

जिसका वित्तादि में तथा देह में यह अपना है, यह पराया है यह भेद बुद्धि नहीं है, किन्तु सब भगवान् का पदार्थ है ऐसा ज्ञान है, और सर्वभूतप्राणियों में सम और शांत होकर रहता है वह भागवतों में उत्तम हैं ॥ ५२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

किंच, त्रिभुवनविभवहेतवेऽपि त्रैलोक्यराज्यार्थमपि लवार्द्धमपि निमिषार्द्धमपि भगवत्पदारविन्दभजनाद्यो न चलति स वैष्णवाग्र्यः। ननु, लवार्द्धमात्रभजनापगमे कस्तावाँल्लाभो भवेत्कुतो न चलेत्? तत्राऽऽह—अकुण्ठस्मृतिः भगवत्पदतोऽन्यत्सारं नास्तीत्येवंरूपाऽकुण्ठाऽनपगता स्मृतिर्यस्य सः भगवत्पदारविन्दादन्यत्सारं नास्तीति कुतोऽत आह—अजितेति। हरावेवाऽऽत्मा येषां तथाभूतैः सुरादिभिरपि दुर्लभात् किन्तु केवलं विमृग्यात् तदपेक्षया सर्वस्य तुच्छत्वं स्मरन् यो न चलतीत्यर्थः ॥ ५३ ॥

अपि च विषयाभिलाषिणा चलनं कामनातिसन्तापे सति भवेत्स तु भगवत्सेवानिर्वृतौ न सम्भवतीत्याह—भगवत इति। उरुविक्रमौ च तावङ्घ्री च तयोः शाखा अङ्गुलयस्तासु नखानि च तानि मणयश्च तेषां चन्द्रिका शीतला दीप्तिस्तया निरस्तः कामादितापो यस्मिंस्तस्मिन्नुपसीदतां भजतां हृदि कथं

श्रीधरस्वामिकृतभावार्थदीपिका ।

सन्तापः प्रभवति चन्द्रे उदिते सत्यर्कस्य ताप इव "न स्वयं स्वः परः" इत्यादिना श्लोकत्रयेण याद्दश इत्यस्योत्तरमुक्तं वेदितव्यम । यद्ब्रूते इत्यस्य च हरिनामानीति ज्ञातव्यम ॥ ५४ ॥

उक्तसमस्तलक्षणसारमाह–विसृजतीति । हरिरेव स्वयं साक्षादस्य हृदयं न विसृजति न मुञ्चति कथम्भूतः अवशेनाप्यभिहितमात्रोऽप्यघौघं नाशयति यः सः तत्किं न विसृजति ? यतः प्रणयरशनया धृतं हृदये निबद्धमङ्घ्रिपद्मं यस्य स भागवतप्रधान उक्तो भवति ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम
द्वितीयोऽध्यायः ॥ २ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी ।

तदपेक्षया भगवदपेक्षया ॥ ५३ ॥

विषयाभिसन्धिना विषयेच्छया सतु तापः भगवत्सेवानिर्वृतौ भगवद्भजनानन्दे सति चन्द्रिका शीतला दीप्तिः याद्दश इत्यस्योत्तरमिति स्वनन्यतया भेददर्शनाभावपूर्वकाविरततत्पदारविन्दभजनानन्दनिमग्नमेव तत्स्वभाव इत्यर्थः । एवं वा: स्वप्रियनामकीर्त्यैति गीतानि नामानि गायन्तीतिचोक्तत्वाद्धरिनामानि ब्रूते इति ज्ञातव्यम ॥ ५४ ॥

भक्तो न विसृजतीति किं वक्तव्यं हरिरेव स्वयमित्येवकारार्थः साक्षादिति भक्तस्यानवरतस्फूर्तिविषयः सन्न अन्यादृशस्तु न कस्यापि हृदयं विसृजति सर्वान्तर्यामित्वात इति साक्षात्पदमितरव्यावर्त्तकम अवशेनापि किं पुनः सावधानतया अभिहितमात्रेऽपि किं पुनर्ध्यातः सन् तत्भक्तहृदयं किं कुतः उक्तो भवति भागवतप्रधानशब्देन मुख्यतया वाच्यो भवति निरुक्तलक्षणानां सामस्त्येनात्र समन्वयादिति भावः ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे
श्रीराधारमणदासगोस्वामिविरचितायां दीपिकादीपन्यां
टिप्पण्याम द्वितीयोऽध्यायः ॥ २॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम ।

सन्त्यक्त इति दयालुत्वेन जीवहिंसारहितः ॥ ० ॥

त्रिभुवनवैभव कारणाय भगवत्पादारविन्दाल्लवनिमिषार्द्धं कालमपि न चलति ॥ ५३ ॥

एवमेतत्पद्यपर्यन्तं आन्तरवृत्त्युपवर्णनेन याद्दश इति प्रश्नोत्तरमुक्त्वा इदानीं उपसीदताम इत्यनेन यद्धर्म इत्यस्योत्तरमाह—भगवत इति । उपसीदतां न्यासविद्यया श्रीभगवदुपसन्नानां आचार्यदत्तयेति रहस्यम अनेन यैर्लिङ्गैरित्यस्याप्युत्तरमुक्तं वेदितव्यम । आचार्यैर्दत्तैः लिङ्गानां श्रीवैष्णवचिह्नानां तप्तशङ्खचक्राङ्कनयुगलमालीढ्रपुण्ड्रकौपीनकटिसूत्रवस्त्रद्वयधारणादि श्रीमद्द्वयमन्त्रार्थानुसन्धानेन मपञ्चिज्ञानादीनां दानात यद्ब्रूते इत्यस्याप्युत्तरमुक्तम । "सन्त्यक्तदण्डोऽखिलजीववत्सल न यस्य स्वपर इति त्रिभुवनविभवहेतवे इत्यादिभिर्बहुभिः पद्यैर्यथा चरति इत्युत्तरमुक्तं वेदितव्यम ॥ ५४ ॥

विसृजतीति कृतकृत्यत्वमुच्यते हरति संसारमिति हरिः अवशाभिहितोपि इत्यनेन मरणदशायां मन्त्रानुसन्धानेऽननुसन्धानेपि अघौघं स्वप्राप्तिविरोधिनं नाशयतीति प्रपत्तेः पूर्वकाले प्रणयरशनया बद्धाङ्घ्रिपद्मः यस्य हृदयं न विसृजतीति ॥ ५५ ॥

इति श्रीमद्भागवतव्याख्याने एकादशस्कन्धीये
श्रीसुदर्शनसूरिकृतशुकपक्षीये
द्वितीयोऽध्यायः ॥ २ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

किञ्च त्रिभुवनेति । त्रिभुवनभवहेतवे विभवहेतवेऽप्यकुण्ठस्मृतिरिति पाठान्तरं त्रिभुवनविभवहेतवेऽपि त्रैलोक्यैश्वर्यार्थमपि "त्रैलोक्यैश्वर्यं प्रयच्छामि" इत्युक्तेऽपीत्यर्थः । अकुण्ठस्मृतिरकुण्ठा भगवत्पादारविन्दादन्यत्सारं नास्तीत्येवंरूपा अकुण्ठा ऽनपगता स्मृतिर्यस्य सः भगवत्पादारविन्दादन्यत सारं नास्तीत्येतदपि कुतः तत्राह–अजितात्मभिर्विमृग्यादिति । अजिते भगवति श्रीकृष्णे हरावेव आत्मा मनः [चित्तं] येषां तैः सुरादिभिः ब्रह्मादिभिरपि दुर्लभमात किन्तु केवलं विमृग्यात्तु इत्याद्भगवत्पादारविन्दात्तद्भजनादित्यर्थः । यो न चलति स वैष्णवाग्र्य इत्यर्थः॥५३॥

किञ्च चलनं हि विषयान्तराभिलाषात् तच्च कामैः सन्तापे सति भवति स ताप एव न सम्भाव्यत इत्यभिप्रेत्याह–भगवत इति । भगवत उरवो विपुलाः विक्रमाः पादविन्यासाः यस्य तस्याङ्घ्रिः शाखानां तत्सदृशानामङ्गुलीनां ये नखास्त एव मणयस्तेषां चन्द्रिकया शीतलदीप्त्या निरस्तः तापः कामसन्तापो यस्मिन् तस्मिन् उपसीदतां प्रपन्नानां हृदि कथं पुनः स सन्तापः प्रभवति चन्द्रे उदिते सत्यर्कस्य ताप इव चन्द्र इत्यनेन नखानां चन्द्रत्वरूपणमप्यभिप्रेतम अत एव दीप्त्येत्यनुक्त्वा चन्द्रिकयेत्युक्तम ॥ ५४ ॥

अनेन श्लोकद्वयेन याद्दश इत्यस्योत्तरमुक्तं भवति यद्ब्रूत इत्यस्य तु हरिनामानीत्युत्तरस्य स्पष्टत्वान्नोक्तम उक्तसमस्तलक्षणमाह–विसृजतीति । यद्वा यद्ब्रूत इत्यस्योत्तरमाह–विसृजतीति । अवशाभिहितोऽवशेनाप्यभिहितमात्रोऽप्यघौघं पापसमुदायं नाशयतीति तथा स हरिः साक्षादस्य हृदयं न विसृजति स भागवतप्रधान इत्युक्तो भवति ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम
द्वितीयोऽध्यायः ॥ २ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

विकुण्ठस्य स्मृतिर्येषां ते तथा तैः त्रिभुवनविभवहेतुभिः कारणभूतैरजेशसुरादिभिर्ब्रह्मरुद्रपूर्वैर्देवादिभिर्विमृग्यादन्वेषणीयात भगवत्पदारविन्दात् यो लवनिमिषार्धमपि न चलति स वैष्णवाग्र्यः स्मृत इत्यन्वयः ॥ ५३ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

उरुविक्रमः पदन्यासविशेषः ययोस्तौ उरुविक्रमौ तावङ्घ्री तयोः शाखा अङ्गुलयस्तासां नखमणयः नखा एव मणयः तेषां चन्द्रिकया ज्योत्स्नया निरस्ततापे उपसीदतां सेवमानानां हृदये ऽनुपसीददतां हृदि प्रभवति सः तापः कथं पुनः प्रभवतीत्यन्वयः ॥ ५४ ॥

स्खलनादिना अवशेनाभिहितः कथितः प्रणयरशनया भक्तिलक्षणपाशेन धृताङ्घ्रिपद्मः बद्धपादपद्मः यादृशो भवन्तु इत्यनयोः प्रश्नयोः परिहारौ धृतोर्ध्वपुण्ड्रत्वादिकं अनन्तगुणनामसङ्कीर्तनत्वञ्चेति "ये शङ्खचक्राङ्कितबाहुमूलाः" इत्यादिषु प्रसिद्धत्वादनुक्तावित्ति ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
द्वितीयोऽध्यायः ॥ २ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

किञ्च, त्रिभुवनेति । त्रिभुवनविभवाय किमुत तद्धेतवे इत्यर्थः "सर्वोऽपि द्वन्द्वो विभाषयैकवद्भवति" इति न्यायादेकवचनं कथं विचारात् न किन्त्वावेशादेवेत्याह—अकुण्ठा सङ्कोचमात्ररहिता स्मृतिर्यस्य सः तच्च तस्य युक्तमेवेत्याह, अजिते हरावेव आत्मा येषां तैर्ब्रह्मप्रभृतिभिः सुरादिभिरपि विमृग्यात् दुर्लभादित्यर्थः ॥ ५३ ॥

तदेव दृष्टान्तमुपपादयति—भगवत इति । चन्द्रिका आतापहारिणी दीप्तिः ॥ ५४ ॥

अत्र हरिः स्वयं न विसृजति तेन धृताङ्घ्रिपद्मश्चेति परस्परासक्तिर्दर्शिता सर्वत्र तत्प्रेमस्फूर्तिपक्षे तु तादृशगुणे तत्र भगवति को न रज्येदिति तदभिप्राय इति भावः । अत्र विशेषजिज्ञासायां भक्तिसन्दर्भोऽन्वेषणीयः ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धीये
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
द्वितीयोऽध्यायः ॥ २ ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

त्रिभुवनविभवहेतवेऽपि त्रिलोकपराज्यप्रयोजनायापि न कुण्ठा प्रलोभयितुमशक्या स्मृतिर्यस्य स. "न पारमेष्ठ्यं न महेन्द्रधिष्ण्यम्" इत्यादौ "वाञ्छन्ति यत्पादरजः प्रपन्नाः" इत्यादिवचनात् अत एव लवार्द्धमपि निमिषार्द्धमपि भगवच्चरणारविन्दादन्यत्र न चलति कीदृशात् अजिते हरावेवात्मा येषां तथाभूतैरपि सुरादिभिर्दुर्लभात् किन्तु केवलं विमृग्यात् । यद्वा, अजितात्मानोऽजितेन्द्रिया ये सुरादयस्तैस्तु त्रिभुवनराज्यार्थं विमृग्यात् ॥ ५३ ॥

अपि च विषयाभिसन्धिना चलनं कामसन्तापे सति भवेत् स च कामसन्तापो महाभागवतानां न सम्भवेदित्याह—भगवत इति । उरुविक्रमौ च तौ अङ्घ्री च तयोः शाखा अङ्गुलयस्तासु नखानि तान्येव मणयस्तेषां चन्द्रिका शीतला दीप्तिस्तया निरस्तः कामादितापो यस्मिन् तस्मिन्नुपसीदतां जनानां हृदि कथं पुनः स तापः प्रभवति चन्द्रे उदिते अर्कस्य ताप इव ॥ ५४ ॥

उक्तसमस्तलक्षणसारमाह—विसृजतीति । हरिरेव स्वयं साक्षात् यस्य हृदयकमलं न विसृजति न मुञ्चति तत्र कल्मषकुञ्जराणां कुतो वार्त्तेत्याह यः स्खलद्वशेनापि कदाचिदभिहितमात्रोऽपि अघौघं नाशयति किं पुनः सत्यासावं तेन प्रतिक्षणमभिभाषित इति भावः । एतेन यद्ब्रूत इत्यस्योत्तरमभिव्यञ्जितम् ननु, कथं तदीयहृदयमन्दिरान्न निर्गच्छति ? तत्राह—प्रणयरशनया धृतं हृदये बद्धम् अङ्घ्रिपद्मं यस्य सः यथा प्रेम वशीकृत्य यशोदया उदूखले बद्धस्तथा सर्वजीवान्मायाशृङ्खलया निबध्नन् स्वभक्तजीवैः प्रेमशृङ्खलया निबद्ध्यत इति भावः ॥ ५५ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
एकादशे द्वितीयोऽयं सङ्गतः सङ्गतः सताम् ॥ २ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यः त्रिभुवनविभवहेतवे लोकत्रयैश्वर्यप्रयोजनायापि अजितात्मसुरादिभिः अजितः कामादिभिरनभिभूतः आत्मा मनो येषाम् अजिते अच्युते वा आत्मा येषां तैः सुरासुरैः विमृग्यादन्वेषणीयात् भगवत्पदारविन्दात् भजनीयात् लवार्द्धमपि निमिषार्द्धमपि न चलति स वैष्णवाग्र्यः तत्र हेतुं दर्शयति, अकुण्ठस्मृतिः लोकत्रयसुखमनित्यं भगवत्प्राप्तिसुखं नित्यमित्येवंरूपा अकुण्ठा अनपगता स्मृतिर्यस्य सः तथोक्तं भगवता—

"आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन ! ।
मामुपेत्य तु कौन्तेय ! पुनर्जन्म न विद्यते" ॥

इति ॥ ५३ ॥

न च कामादिसन्तप्तान्तःकरणतया भजनीयपदारविन्दात् चलनं शक्यमित्याह—भगवतः उरुः विस्तृतः विक्रमः विन्यासः ययोस्तौ उरुविक्रमौ तौ च अङ्घ्री च उरुविक्रमाङ्घ्री तयोः शाखा अङ्गुलयः तासु नखान्येव मणयः तच्चन्द्रिका शीतला दीप्तिः तया निरस्तः कामादितापो यस्मिन् तस्मिन् उपसीदताम् उपसन्नानां भागवतोत्तमानां हृदि सः कामादितापः कथं सम्भवति न कथमपीत्यर्थः । तत्र दृष्टान्तमाह—चन्द्र इवोदितेऽर्कताप इति ॥ ५४ ॥

यद्ब्रूते य इत्यस्योत्तरं दर्शयन् उक्तसमस्तलक्षणान्तरमाह, विसृजतीति । प्रणयरशनया दैन्यपाशेन धृताङ्घ्रिपद्मः दीनानां शरणागतानाम् अघौघं पापसमूहं नाशयतीति स तथा स्खलनजृम्भणादौ अवशेन "कमलनयन वासुदेव विष्णो भव शरणम्" इत्येवमभिहितः कथितः हरिः यस्य हृदयं साक्षात्स्वयमेव न विसृजति न मुञ्चति स भागवतप्रधान उक्तो भवति ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
द्वितीयाऽध्यायार्थप्रकाशः ॥ २ ॥

———

भाषा टीका।

भगवान् के विषय में चित्त लगाकर देवादिक जिनको ढूढते हैं ऐसे भगवत चरणारविन्द का अखंडित स्मरण करने वाला जो भागवत त्रिलोकी के राज्य के लिये भी अर्द्ध लव और अर्द्ध निमिष भी चलायमान नहीं होता है वह वैष्णवों में अग्रगण्य है ॥ ५३ ॥

श्रीत्रिविक्रम भगवान् के चरण की शाखा रूप जो अंगुली हैं तिनके नख रूप मणियों की चांदिनी से कामादि ताप दूर भया है जिसका, ऐसे भजन करने वालों के हृदय में संताप कैसे होसका है? जैसे, कि—रात्रि में चन्द्र के उदय होने पर सूर्य के संताप का संभव ही नहीं ॥ ५४ ॥

जिसके हृदय को साक्षात् श्रीहरि नहीं छोडते हैं, किन्तु अवश होकर नामोच्चारण करने मात्र से भी संपूर्ण पापों के पुंज को नाश कर देते हैं और जिसके प्रेम रूपी रस्सी से आपका श्रीचरण कमल बांधा गया है, ऐसा जो अधिकारी है वह भागवतों में प्रधान कहा गया है ॥ ५५ ॥

इति श्रीमद्भागवत एकादशस्कन्ध में द्वितीय अध्याय की,
श्रीवृन्दावनस्थ पं० भागवताचार्यकृत
भाषा टीका समाप्त ॥ २ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे द्वितीयोऽध्यायः ॥ २ ॥

तृतीयोऽध्यायः ।

—:०:—

राजोवाच ।

परस्य विष्णोरीशस्य मायिनामपि मोहिनीम् ।
मायां वेदितुमिच्छामो भगवन्तो ब्रुवन्तु नः ॥ १ ॥
नानुतृप्ये जुषन् युष्मद्वचो हरिकथामृतम् ।
संसारतापनिस्तप्तो मर्त्यस्तत्तापभेषजम् ॥ २ ॥

अन्तरिक्ष उवाच ।

शुकपक्षीय वीरराघवीययोः पाठः (निर्गुणे केवले साक्षादात्मनो यद्विपर्ययः ।
सैषा भगवतो माया ययेदं निर्ममे विभुः ॥ क ॥
इन्द्रियार्थभ्रमो जाग्रत्स्वप्नोऽन्तःकरणभ्रमः ।
सुप्तं तद्वासनाबीजं तुर्योऽमूर्त्तिस्तदन्वयः ॥ ख ॥
विशुद्धं ज्ञानमेवैकं मायया भासते त्रिधा ।
ग्राहकाद्यैर्यथा स्वप्ने यत्तत्संवित्क्रियाफलम् ॥ ग ॥
वैतथ्याद्व्यभिचाराच्च मायात्रैविध्यमात्मनि ।
यथा मनोरथः स्वप्न इत्यामृश्योपशाम्यति ॥ घ ॥)
एभिर्भूतानि भूतात्मा महाभूतैर्महाभुजः ।
ससर्जोच्चावचान्याद्यः(१) स्वमात्रात्मप्रसिद्धये ॥ ३ ॥
एवं सृष्टानि भूतानि प्रविष्टः पञ्चधातुभिः ।
एकधा दशधाऽऽत्मानं विभजन् जुषते गुणान् ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

मायातत्तरणब्रह्मकर्मप्रश्नचतुष्टये ।
तृतीये तूत्तरं दत्तमार्षभैर्मुनिभिः पृथक् ॥

विष्णोर्मायामिदं पश्यन्नित्युक्तमतो मायां पृच्छति—परस्येति । हे भगवन्तः ! ॥ १ ॥

ननूकलक्षणो भागवतो भूत्वा कृतार्थः स्यात् किं बहुप्रश्नैरत आह-नानुतृप्य इति । संसारतापैर्नितरां तप्तोऽहं तस्य तापस्य भेषजं हरिकथामृतरूपं युष्मद्वचो जुषमाणो नानुतृप्यामि ॥२॥

मायायाः स्वरूपतो निरूपणासम्भवात्सृष्ट्यादिकार्यद्वारेण निरूपयितुमाह-एभिरिति । आद्यः पुरुषो यया शक्त्या भूतानामात्मा कारणभूतः एभिः स्वसृष्टैर्महाभूतैरुच्चावचानि भूतानि ससर्ज "एषा माया भगवतः" इति चरमश्लोकपादस्य प्रतिश्लोकमनुषङ्गः, किमर्थं ससर्ज ? स्वमात्रात्मप्रसिद्धये स्वं मिमीते प्रमिमीते उपास्ते यः स स्वमाता तस्याऽऽत्मनो जीवस्य प्रकृष्टायै सिद्धये । यद्वा, स्वांशभूतानां जीवानां मात्राप्रसिद्धये विषयभोगाय आत्मप्रसिद्धये मोक्षाय चेत्यर्थः । तदुक्तं वेदस्तुतौ—

"बुद्धीन्द्रियमनःप्राणान् जनानामसृजत्प्रभुः ।
मात्राऽर्थं च भवार्थं च आत्मने कल्पनाय च" ॥

इति ॥ ३ ॥

एवं जीवोपकरणार्थं पञ्चधातुभिर्महाभूतैः सृष्टानि भूतानि

---

(१) स्वयमात्म प्रसिद्धये इति विज० पाठः ।

श्रीधरस्वामिकृतभावार्थदीपिका ।

न्तर्यामिरूपेण प्रविष्टः एकधा मनसा दशधा बाह्येन्द्रियरूपेण ात्मानं विभजन् गुणांस्तत्तद्विषयान् जुषते जोषयतीत्यर्थः । द्वा, तमात्मानं प्रति गुणान्विभजन् जुषते प्रीयत इत्यर्थः ॥ ४ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपनी टिप्पणी ।

माया च तस्या मायायास्तरणञ्च ब्रह्म च कर्म च तेषां े प्रश्नास्तेषां चतुष्टयं तस्मिन् ईशस्य मायानियन्तुत एव मायातः परस्य मायिनां मायया स्वशक्त्यान्यजीवोहकानां ब्रह्मादीनामपि मोहिनीं मायां वयं वेदितुमिच्छामः ॥ १ ॥

हरिकथामृतरूपमिति तत्स्वभावत्वान्मायावर्णनेऽपि तत्प्रधानमेव तव वचो भवेदिति भावः ॥ २ ॥

अन्तरीक्ष इति अन्तरीक्षशब्दस्योर्ध्वाधोलोकमध्यवर्त्तिस्थानवाचित्वात् तथा मायान्तःपतितस्य तदभिभाव्यत्वेन तद्वर्णाऽसम्भवात् सिद्धस्यापि ब्रह्ममात्रानुभवित्वेन तदसम्भवात् ध्यस्थस्यैव तन्निरूपणकर्त्तृत्वमित्यन्तरीक्ष एवोवाचेत्युक्तं स्वरूपत इति मायाया निरूपत्वेन स्वरूपतो निरूपणं न सम्भवतीति सृष्ट्यादिलक्षणं यन्मायाकार्यं तद्द्वारेण मायां निरूपयितुं सृष्ट्यादिकार्यमाहेत्यर्थः । पूर्वार्थे स्वमात्रशब्दस्य जीववाचकत्वमप्रसिद्धं सृष्टेः पुरुषार्थचतुष्टयार्थत्वाभावश्चातो यद्वेति स्वशब्देन जीवपरामर्शः तस्य स्वीयत्वेन स्वांशत्वात् आत्मप्रसिद्धिः आत्मसाक्षात्कारः "द्वन्द्वान्ते श्रूयमाणस्य प्रत्येकमभिसम्बन्धः" इति प्रतिपत्तिगौरवादित्यर्थं इत्युक्तम् ॥ ३ ॥

जीवोपकरणार्थं जीवभोगसाधनार्थं भूतानि शरीराणि आत्मानं जीवं मन आदितादात्म्याध्यासेन तत्तद्रूपत्वेन विभजन् भेदविशिष्टं कुर्वन् तत्तद्विषयान् सुखदुःखशब्दस्पर्शादीन् जोषयति भोजयति तदुक्तं प्रथमे " असौ गुणमयैर्भावैर्भूतसूक्ष्मेन्द्रियात्मभिः " इत्यादि. पूर्वार्थे अन्तर्भूतणिजर्थकल्पनागौरवमतो यद्वेति, तं मनोबाह्येन्द्रियरूपेणैकधा दशधा सन्तम् आत्मानं जीवं प्रति गुणान् सुखादिशब्दादिविषयान् विभजद्दत् प्रीयते प्रसन्नो भवतीत्यर्थः ॥ ४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

परस्य चिदचिद्विलक्षणस्य मायां विचित्रामचेतनशक्तिम् ॥१॥

संसारतापैः आध्यात्मिकादिभिः मर्त्योऽहमिति शेषः ॥ २ ॥

उत्तरयति——निर्गुणो स्वरूपतः त्रिगुणासम्बन्धिनि केवलदेवादिनामरूपरहिते साक्षात् विपर्ययः धर्मभूतज्ञाने यः देहोऽहमस्मीति भावः । सा मायेति यया जीवब्रह्म समष्टिरूपेण शरीरभूतया इदं व्यष्टिभूतजातं निर्ममे विभुरित्यत्र विभोः प्रवेशकथनं स्वसङ्कल्पेनैवेति ज्ञेयम् ॥ क ॥

कथं जीवस्वरूपत्वं निर्विकारत्वम् ? तदाह—विषयेषु भ्रमणं जाग्रत् अन्तःकरणभ्रमः मनोभ्रमणं स्वप्नः वासनाबीजम् वासना एव बीजं यस्यां सा गुणसंसर्गशेषा सुषुप्तिः तुर्यां मूर्त्तः जीवशरीरिपरस्वरूपं तास्ववस्थास्वन्वेति ॥ ख ॥

ननु, तस्य सुषुप्तौ कथमन्वयोऽत आह—विशुद्धमिति । ज्ञानैकाकारत्वेन विशुद्धं ज्ञानमेव परमात्मवस्तु अणुजीवस्वरूपं समष्टिव्यष्टिभूतं मायया समष्टिव्यष्टिरूपया आद्यकाद्यैः बहिरन्तःकरणधर्मभूतज्ञानरूपैः त्रिधा भासते यथा स्वप्ने स्वतः इन्द्रियेषु सन्निवृत् अन्तरिन्द्रिये बुद्धयादिविशिष्टधर्मज्ञाने क्रियाफलं तत्रैव ॥ ग ॥

अत आत्मनि जीवे त्रैविध्यं मायात्रिगुणकार्यं मायेति कुतः वैयर्थ्यात् वृथात्वात् अव्यभिचाराच्चानैकान्तिकत्वात् योगस्वस्वरूपानुभवे त्रैविध्या स्फूर्तेः " या निशा सर्वभूतानाम् " इत्यादि प्रामाण्यात् अत्र दृष्टान्तौ उभयत्र मनोरथे यथा वृथात्वात् मायात्वं स्वप्ने च यथा व्यभिचारान्मायात्वम् ईश्वरसङ्कल्पप्राप्तत्वं इति विचार्य उपशाम्यति स्वस्वरूपानुभवतृप्तः देहस्वतन्त्रात्मोभयभ्रमान्निवृत्तो भवतीति ॥ घ ॥

त्रैविध्यमेव प्रपञ्चयति—ईश्वरसृष्टत्वेन एभिरिति । प्रत्यक्षैः त्रिवृत् कृतैः पञ्चीकृतैः वा महाभूतैः त्रिगुणं तज्जगद्योनिरित्युक्तकार्यैः समजीवब्रह्मशरीरक आद्यः भूतानि तानि देवतीर्यङ्मनुष्यस्थावरशरीरविशिष्टव्यष्टिजीवान् ससर्ज एतेषां जीव भोगापवर्गार्थत्वञ्चाह, स्वमात्रात्मप्रसिद्ध्ये मोक्षार्थं च ॥ ३ ॥

प्रविष्ट इति स्वसङ्कल्पेन एवेति पञ्चधातुभिः सृष्टानि भूतानि सजीवशरीराणि प्रविष्टः सन्नेकधा दशधा एकादशेन्द्रियरूपेण आत्मानं जीवं सधर्मभूतज्ञानं विभजन् विभक्तं देवादिरूपं कर्मभिः कुर्वन् विषयान् जुषते जीवं जोषयतीति ॥ ४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

"तन्मायायाऽतो बुधः" इति "विष्णोर्मायामिदं पश्यन्" इति चोक्तम् अतो मायां तत्कार्यं च पृच्छति निमिः—परस्येति द्वाभ्याम् । मायाशब्दस्तत्कार्यपरश्च मायां तत्कार्यञ्च वेदितुमिच्छाम इत्यर्थः । भगवन्तो भवन्तः नोऽस्मभ्यं ब्रुवन्तु ॥ १ ॥

यद्यपि "भयं द्वितीयाभिनिवेशतः" इत्यादिना देहात्मभ्रमस्वतन्त्रात्मभ्रमादिकं मायाकार्यमुक्तमेव तथापि तद्विस्तरबुभुत्सया अत्र पृच्छाभीत्यभिप्रेत्याह—नानुतृप्य इति । हरिकथामृतरूपं युष्मद्वचः जुषन् सेवमानोऽहं नानुतृप्ये न तृप्तोऽस्मि अतृप्तौ हेतुत्वेन आत्मानं वचश्च विशिनष्टि—संसारे ये तापा आध्यात्मिकादयस्त्रयस्तैर्नितरां तप्तः मर्त्यो मरणशीलश्च तत्तापानां संसारतापानां भेषजमौषधम् अतोऽस्मत्संसारनिवृत्तये केवलं कृपयैव कथयन्त्विति भावः ॥ २ ॥

तत्रान्तरिक्षो योगीश्वर उत्तरमाह—निर्गुण इत्यादिना । यद्यपि निर्गुण इत्यादिश्लोकचतुष्टयं परैः परित्यक्तं तथाप्यार्यैः परिगृहीतत्वात् सङ्ग्रहेण व्याख्यानत्वात्तद्व्याख्यायते परपरित्यागः क्वचित् पाठाभावात्प्रातिकूल्याद्वेति विशिष्य न विद्मः ॥ विभुर्जगद्रूपेण विविधं भवितुम् इच्छुः परमपुरुषः यया प्रकृत्या इदं जगन्निर्मम सा भगवतो माया आत्मनो जीवस्य

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

निर्गुणे सत्त्वादिगुणत्रयरहिते केवले विशुद्धे शरीरसम्बन्ध-रहिते साक्षात्स्वयंप्रकाशस्वरूपे विपर्ययः शरीरसम्बन्धगुणावश्यत्व-देहात्मभ्रमादिरूपो यो विपर्ययस्तन्माया मायाकार्यमिति योजना कार्यकारणभावादौपचारिकं सामानाधिकरण्यं निर्गुण इत्यनेन मायायास्त्रिगुणात्मकत्वं सूचितम् । केवल इत्यनेन देहेन्द्रि-यादिरूपेण परिणतत्वं स्वात्मादित्यनेन जडत्वम् अनेन माया-स्वरूपमुक्तं विपर्यय इत्यनेन च मायाकार्यम् उक्तम् इदं निर्मम इत्यनेन महदादिपृथिव्यन्तस्य जगतस्तत्कार्यत्वसूचनात् आत्मनो विपर्ययः "सा वै भगवतो माया" इत्यनेन देहात्माभिमानादिरूपस्य जीवभ्रमस्य तत्कार्यत्वसूचनात् (क)

तत्र भ्रमरूपकार्यं प्रपञ्चयितुं प्रकृतिकार्यदेहेन्द्रियादिसम्बन्ध-विनिर्मुक्ते जीवस्वरूपे भ्रमासम्भवात्तत्सम्बन्धं तत्प्रयुक्तजाग्रत-स्वप्नसुषुप्तिरूपावस्थात्रयसम्बन्धं च वदन् भ्रमं प्रपञ्चयति, इन्द्रियार्थेनेति । जाग्रत्स्वप्नशब्दाभ्यां तदवस्थाभाज लक्ष्यते तदा अयमर्थः जाग्रज्जाग्रदवस्थायाम् इन्द्रियार्थभ्रमः इन्द्रियैर्मनस्संयुक्तै-रर्थेष्वनात्मास्थिररूपेषु देहादिष्वात्मत्वस्थिरत्वोपादेयत्वादिभ्रमः स्यात् स्वप्नेऽन्तःकरणभ्रमः स्वप्नेऽन्तःकरणेन बाह्येन्द्रियाऽ-संयुक्तेन भ्रमः सोऽप्यस्थिरस्वाप्नशरीरादिषु स्थिरत्वादिबुद्धि-रूपः इन्द्रियान्तःकरणपदाभ्यां तत्सम्बन्धस्तयोर्निराश्रययो-रसम्भवात्तदाश्रयभूतदेहसम्बन्धस्तत्प्रयुक्तजाग्रदाद्यवस्थान्वयश्च फलितः सुप्तस्तद्वासनाबीजं वासनारूपबीजमात्रावशेषितं विलुप्त-बाह्याभ्यन्तरग्राह्यग्राहकत्वादिसुखित्वदुःखित्वादिज्ञानं सुप्तं सुषुप्ति-रित्युच्यते तत्तदपि प्रकृतिसम्बन्धप्रयुक्तं तत्कार्यमेवेत्यर्थः तदन्वयः इत्थं तेनावस्थात्रयेणान्वयो यस्य तथाभूतः प्रत्यगात्मा तर्हि कदाऽवस्थात्रयान्वयविनिर्मुक्तिरित्यत्राह, तुर्योऽमूर्त्तिरिति । अत्राऽमूर्त्तिः प्रकृतिपरिणामात्मकशरीराभावः मुक्त्यवस्था इति यावत् सा तुरीया देहसम्बन्धप्रयोज्यावस्थात्रयविनिर्मुक्त्यव-स्थेत्यर्थः । अनेनावस्थात्रयान्वयस्य प्राकृतशरीरसम्बन्धप्रयुक्तत्वे-नौपाधिकत्वादस्थिरत्वं सूचितं तस्मिन् स्थिरत्वप्रतीतिभ्रान्ति-रूपा चेति (ख)

एतदेव स्वप्नदृष्टान्तेनोपपादयन् प्राकृतशरीरसम्बन्धेऽपि कारण-माह—विशुद्धम् इति । यद्यपि जीवस्य स्वरूपं विशुद्धं रागाद्य-कलुषितम् एकं जाग्रदाद्यवस्थाभेदरहितं ज्ञानं ज्ञानैकरसं तथापि तन्मायया प्रकृतिपरिणामरूपदेहसम्बन्धेन निमित्तभूतेन ग्राह-काद्यैस्त्रिधा जाग्रत्स्वप्नसुषुप्तिरूपावस्थात्रययुक्तमवभासते यथा स्वप्ने गजतुरगादिरस्थिरोऽपि स्थिरवदवभासते तद्वत् ग्राहकाद्यै-रित्यत्र ग्राहकमिन्द्रियम् आदिशब्देनान्तःकरणवासनाबीजरूपयोः सङ्ग्रहः यदेनामत्रयावभासतन्मूलदेहेन्द्रियान्तःकरणान्वयादिकं सर्वं तस्य विरक्तिफलं संविद्विज्ञानस्वरूपे प्रत्यगात्मनि क्रियायाः अनादिपुण्यपापा (त्म) दिकायाः फलमित्यर्थः (ग)

एतदेवोपपादयति वैतथ्यादिति । वैतथ्यादनित्यत्वात् मुक्त्य-वस्थायामनुवृत्त्यभावाद्व्यभिचारादिदानीमपि कस्याश्चिदवस्थाया-मवस्थान्तरस्यान्वयस्य व्यभिचाराच्चात्मनि मायात्रैविध्यं माया-कार्यमवस्थात्रैविध्यं क्रियाफलमित्यनुषज्यते नतु स्वाभाविक-मित्यर्थः । कर्मफलत्वे दृष्टान्तमाह, यथा मनोरथः स्वप्ने इति । मनोरथशब्देन मनोरथविषयीभूतं सुखं लक्ष्यते यथा स्वाप्नं सुखम् अनित्यं क्रियाफलं तद्वदित्यर्थः । इत्यामृश्य एवं विमर्शं कृत्वा यति उपशामयति बहिः क्षुद्रसुखार्थव्यापारान्निवृत्तो भव-तीति (घ)

एवं प्रकृतिकार्यभ्रमं विस्तरेण उक्त्वाऽथ जगतस्तत्कार्यत्वं प्रपञ्चयति—एभिरिति । आद्यः सर्वकारणतया स्वयमादावेव वर्त्त-मानः महाभुजः परमपुरुषः भूतात्मा व्यष्टिसमष्ट्युभयविध-भूतान्तरात्मा स्वशोभिः प्रत्यक्षादिप्रमाणसिद्धैर्महाभूतैः पृथिव्या-दिभिर्मायाकार्यभूतैः समष्टिभिर्भूतानि उच्चावचानि उत्कृष्टान्य-पकृष्टानि च ससर्ज सृष्टेः प्रयोजनमाह, स्वमात्रात्मप्रसिद्धये इति । स्वस्य मात्राभूतानां शरीरभूतानाम् (आत्मनां) जीवानां प्रसिद्धये पुरुषार्थसिद्धये भगवदाराधनोपयुक्तकरणकलेवरादीनि लब्ध्वा भगवन्तमाराध्य निःश्रेयसं प्राप्तुमित्यर्थः ॥ ३ ॥

एवं तर्हि लब्धकरणकलेवराः सर्वेऽपि तमाराध्य निःश्रेयसं कुतो न प्रापुरित्यत आह—एवमिति । यद्यप्येवं स्वमात्रात्मप्रसिद्ध-तया पञ्चभिर्धातुभिर्महाभूतैः सृष्टान्यपि भूतानि शरीराणि प्रविष्टः प्रत्यगात्मा एकधा दशधा आत्मानं विभजन् ज्ञानकर्मेन्द्रियान्तः-करणैरात्मानं ज्ञानं विभजन् गुणान् शब्दादिविषयानेव भुंक्ते नतु परमपुरुषमाराधयतीति भावः ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

परस्य पूर्णस्य मायिनां ज्ञानिनां मोहिनीं मायां सृष्ट्यादिषु प्रवर्तमानाम् इच्छाशक्तिं जडप्रकृतिवैभवञ्च ॥ १ ॥

तत्रतत्र भागवते मायाविषयप्रश्नपरिहारावनेकशः कृतावि-त्यत्राशङ्कयमिदं नेति भावेनाह—नानुतृप्ये इति । हरेः कथामृतं यस्मिंस्तत्तथा तद्भेषजं संसारतापशान्तिकरम् औषधम् ॥ २ ॥

परिहारमवेक्ष्य प्रश्नः सङ्गच्छत इत्यतः परिहारोऽपि मायाद्वैविध्य-विषय एवेति भावेनोपोद्घातं रचयति—एभिरित्यादिना । अत्रायं भावः आदौ स्वयं परमात्मा स्वेच्छोद्बोधितया प्रकृत्या मह-दहङ्कारादिक्रमेण चतुर्विंशतितत्त्वानि सृष्ट्वा पुनस्तैरसमेतैः स्तुतः तान्यनुप्रविश्य संयोज्य तदुपादानत्वेन ब्रह्माण्डमुत्पाद्यान्तस्तैः सह प्रविश्य ब्रह्मादिपृथिव्यन्तानां तत्त्वानां रूपान्तराणि सृष्टैर्-महाभूतैः पञ्चभिरुच्चावचानि शरीराणि ससर्ज त्रिविधान् जीवांस्त्रिविधैः शरीरैः संयोजयामास किं प्रयोजनमुद्दिश्येत्यत उक्तम् आत्मप्रसिद्धय इति आत्मनो हरेः प्रसिद्धिः ख्यातिः प्रतीतिः ज्ञानमिति यावत्तदर्थं परमात्मतत्त्वज्ञानायेत्यर्थः ॥ ३ ॥

जीवकलया ब्रह्मैव भोगायतने शरीरे स्थित्वा कर्मफलं भुङ्क्त इत्यद्वैतमतं प्रत्याह—एवं सृष्टेति । स परमात्मोक्तविधया स्वविष्टैः पुनः सृष्ट्या स्थूलभावं प्राप्तैः पञ्चधातुभिर्महाभूतैः भूतानि शरीराणि सृष्ट्वा तत्तददृष्टानुसारेण जीवेन सह तान्यनुप्रवि-श्यात्मानं स्वम् एकधा मनोनियन्तृरूपेण दशधा दशेन्द्रियनियाम-करूपेण विभजन् विभक्तं कुर्वन् गुणान् विषयसारानानन्दा-नेव जुषत इत्यन्वयः । विभजन्नित्यनेन जीवात्मनामल्पशक्तित्वेन स्वात्मनो भिन्नत्वमवशत्वेन कर्मफलभोक्तृत्वं स्वस्य पूर्णशक्ति-त्वेन स्वातन्त्र्यं च ध्वनयति ॥ ४ ॥

गुणैर्गुणान् स भुञ्जान आत्मप्रद्योतितैः प्रभुः ।
मन्यमान इदं सृष्टमात्मानमिह सज्जते ॥ ५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

हरिकथामृतमिति तत्स्वभावत्वान्मायावर्णनेऽपि तत्प्रधानमेव तव वचो भवेदिति भावः ॥ १—२ ॥

तत्र एषा माया भगवत इत्युत्तरयिष्यमाणस्य सोपानमाह—एभिरित्यादि । एभिर्महदादिभिः क्रमेण सृष्टौ स्वमात्रेत्यस्य टीकायां भक्तार्थ एव सृष्टौ मुख्यः प्रयत्न इति प्रथमार्थे दर्शितम् एतदेव च वास्तवं प्रयत्नान्तरस्याऽऽनुषङ्गिकत्वात् ॥ ३ ॥

अत एव जुषते गुणानिति—

"गुणदोषदृशिर्दोषो गुणस्तूभयवर्जितः ।
न मय्येकान्तभक्तानां गुणदोषोद्भवा गुणाः" ॥

इत्यादि न्यायेन तादृशभक्तानां स्वप्रेमतद्विलासरूपानयेव प्रीत्या सेवत इत्यर्थः ॥ ४ ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

मायातत्तरणाविर्शब्रिङ्ककर्माणि पृच्छ्यते ।
राज्ञ प्रत्युत्तराण्येषां तृतीये ददुरार्षभाः ॥

विष्णोर्मायामिदं पश्यन्नित्युक्तमतो मायां पृच्छति, परस्येति ॥ १ ॥

नानुतृप्ये इति युष्मत्सङ्गार्थिनो मे युष्मद्वचोऽमृतपानलोभस्य दुर्वारत्वमेव प्रश्ने कारणं ज्ञेयमिति भावः ॥ २ ॥

गुणकार्याणां सृष्टिस्थितिसंहाराणां निरूपणेनैव गुणा निरूपिताः स्युर्गुणैश्च निरूपितैः स्वत एव गुणमयी माया निरूपिता स्यादित्यभिप्रायेणाह—एभिरिति । भूतात्मा परमेश्वरः उच्चावचानि भूतानि देवतिर्यगादीनि ससर्ज किमर्थं स्वमात्रात्मप्रसिद्धये स्वीयानां जीवानां मात्राणां विषयप्राप्तीनाम् आत्मनः स्वप्राप्तेश्च या प्रकृष्टा सिद्धिस्तदर्थं यदुक्तं वेदस्तुतौ—

" बुद्धीन्द्रियमनःप्राणान् जनानामसृजत्प्रभुः ।
मात्रार्थं च भवार्थं च आत्मने कल्पनाय च" ॥

इति ॥ ३ ॥

सृष्टिमुक्त्वा स्थितिमाह—एवमिति त्रिभिः। पञ्चधातुभिर्महाभूतैः सृष्टानि भूतान्यन्तर्यामितया प्रविष्टः सन् एकधा मनसा दशधा बाह्येन्द्रियरूपेण आत्मानं विभजन् गुणान् तत्तद्विषयान् जुषते जीवं जोषयति भोजयतीत्यर्थः ॥ ४ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एवं भगवत्प्राप्तौ साधनं भगवद्भजनाधिकारिणं भागवतं च श्रुत्वा अथ भगवत्प्राप्तौ प्रतिबन्धकभूतां मायां पृच्छति—हे भगवन्तः ! सर्वज्ञाः विष्णोर्मायामिदमिति प्रागुदाहृतां विष्णोर्मायां मायिनां बद्धजीवानामपि निश्चयेन मोहिनीम् अनेन बद्धजीवमपि वेदितुमिच्छाम अतो नोऽस्मभ्यं ब्रुवन्तु ॥ १ ॥

उक्तवक्ष्यमाणबहुविधप्रश्ने हेतुमाह—नानुतृप्ये इति । संसारतापैर्नितरां तप्तोऽहं तेषां तापानां भेषजम् औषधं हरिकथारूपममृतं यस्मिन् तद्युष्मद्वचो जुषमाणो नानुतृप्ये न तृप्यामि ॥ २ ॥

सृष्टिसंहारद्वारेण मायामाह—एभिरित्यादिना । तत्र सृष्टिं बद्धजीवञ्चाह पञ्चभिः । आद्यः विश्वहेतुः भूतानामात्मान्तर्यामी यस्याः स्वशक्तिभूतायाः परिणामभूतैरेभिः स्वसृष्टैर्महाभूतैः उच्चावचानि भूतानि ससर्ज, एषा माया भगवत इत्यन्तिमेनान्वयः । भूतसृष्टिप्रयोजनमाह, स्वमात्रात्मप्रसिद्धये इति । स्वः स्वकीयः अंशभूतो जीवस्तस्य मात्रात्मप्रसिद्धये तत्र बुभुक्षोः मात्राप्रसिद्धये विषयभोगाय मुमुक्षोः आत्मप्रसिद्धये मोक्षाय ॥ ३ ॥

मुमुक्षुस्वभावः पूर्वाध्याये वर्णितः अत्र बुभुक्षुस्वभावमाह, एवमिति चतुर्भिः । एवं पञ्चधातुभिर्महाभूतैः सृष्टानि शरीराणि प्रविष्टः मायामोहितः बुभुक्षुः आत्मानम् एकधा मनसा मननशीलोऽस्मीत्येवं दशधा श्रोत्रादिभिः श्रोतृत्वादिधर्मैर्विभजन् गुणान् विषयान् जुषते भुङ्क्ते नतु मुमुक्षुवद्भगवन्तं भजते ॥ ४ ॥

———

भाषाटीका ।

राजोवाच ।

राजा निमि बोले, कि—हे विप्रो ! अखिल नियन्ता परम पुरुष श्रीविष्णु की माया के जानने की मैं इच्छा करता हूं आप लोग मेरे लिये कथन कीजिये ॥ १ ॥

हरिकथा ऽमृत रूप आपके वचनों को सेवन करता हुआ मैं तृप्त नहीं होता हूं क्योंकि ? संसार के तापों से तप्त हुआ हूं और आपके वचन संसारताप की औषध रूप हैं ॥ २ ॥

अन्तरिक्ष उवाच ।

अन्तरिक्ष नामक योगेश्वर बोले, कि—हे महाभुज ! इन पञ्च महाभूतों से जगत्कारण परमात्मा ने देव मनुष्यादि रूप ऊंचे नीचे शरीरों को रचा, किस प्रयोजन के लिये, कि—केवल अपने शरीर भूत जीवों की प्रकृष्ट सिद्धि (मोक्ष) के लिये अर्थात् परमात्मा ने जीवों को निज आराधन द्वारा अपनी प्राप्ति के लिये जिस प्रकृति के विकार पञ्चभूतों से करण कलेवरादि प्रदान किये उस प्रकृति को ही माया जानो ॥ ३ ॥

इस प्रकार पञ्चभूतों से परमात्माके रचे हुए इन शरीरों में प्रविष्ट होकर यह जीव मन के द्वारा और इन्द्रियों के द्वारा ज्ञानका विभाग करता हुआ विषयों का सेवन करने लगा और परमात्मा के आराधन को भूल गया ॥ ४ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

स च जीव आत्मनाऽन्तर्यामिणा प्रद्योतितैर्गुणैरिन्द्रियैर्गुणान्विषयान् भुञ्जान इदं सृष्टं शरीरमात्मानं मन्यमान इह शरीरादौ सज्जते अत एव संसरतीति भावः ॥ ५ ॥

कर्माणि कर्मभिः कुर्वन् सनिमित्तानि देहभृत् ।
तत्तत्कर्मफलं गृह्णन् भ्रमतीह सुखेतरम् ॥ ६ ॥
इत्थं कर्मगतीर्गच्छन् बह्वभद्रवहाः पुमान् ।
आभूतसम्प्लवात्सर्गप्रलयावश्नुतेऽवशः ॥ ७ ॥
धातूपप्लव आसन्ने व्यक्तं द्रव्यगुणात्मकम् ।
अनादिनिधनः कालो ह्यव्यक्तायाऽपकर्षति ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु, भुञ्जानः कथं सज्जते ? भुञ्जानो भोगसमाप्तौ मुच्यत इति चेत्तत्राऽऽह–कर्मभिः कर्मेन्द्रियैश्च सनिमित्तानि सवासनानि कर्माणि कुर्वंस्तत्तत्पूर्वकर्मफलं च गृह्णन्नयं देहभृद्भ्रमतीह संसारे न तु मुच्यते कथम्भूतं कर्मफलम् ? सुखेतरं सुखदुःखात्मकम् ॥ ६ ॥

कियन्तं कालं भ्रमति ? तत्राह– इत्थमिति । बहून्यभद्राणि वहन्तीति तथा ताः सर्गप्रलयावुत्पत्तिमरणे ॥ ७ ॥

एवं मायामयीं सृष्टिमुक्त्वा प्रलयं दर्शयितुमारभते, धातूनां महाभूतानामुपप्लवे नाशहेतावासन्ने व्यक्तं कार्यं द्रव्यं स्थूलं गुणाः सूक्ष्मं तदात्मकमव्यक्तायाऽव्यक्तं प्रति नेतुमाकर्षति ॥ ८ ॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

स च सतु जीवः प्रभुः प्रत्र्वंशत्वात् यत्किञ्चिज्ज्ञानादिशक्तियुक्तोऽपि ॥ ५ ॥

अत एव मासक्तत्वादेव संसरति जन्ममरणादिना भ्रमति, इह जगति सुखेतरमिति कर्मफलस्य विशेषणं सुखञ्च तदितरच्चेति विशेषणयोः कर्मधारयः पुंस्त्वमार्षम् ॥ ६ ॥

आभूतसम्प्लवात् भूतसम्प्लवमभिव्याप्य महाप्रलयपर्यन्तमित्यर्थः । आहूतेति क्वचित् पाठः । तत्र भकारस्य हकारादेशश्छान्दसः अवशः प्रकृत्यधीनः ॥ ७ ॥

एवं मायामयीं सृष्टिमुक्त्वा तन्मयं प्रलयमाह–धात्विति । धारयन्ति शरीराणीति धातवो महाभूतानि तेषाम् आसन्ने सविधमाप्ते सति स्थूलमाकाशादिकं सूक्ष्मं महदादिकं तद्रूपम् अव्यक्तं प्रधानं प्रति ॥ ८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

एतदाह, गुणकार्येषु विषयेष्विन्द्रियेषु च बद्धया गुणपदस्य इवं सृष्टं देहादिकम् आत्मानं मन्यमानः आत्मना चिदचिन्निबन्धा प्रकाशितैर्गुणैरिन्द्रियैः स जीवः प्रभुरकर्मवश्योऽपि सज्जते ॥ ५ ॥

कर्मभिः पूर्वतद्वासनाभिः स्वनिमित्तानि आत्महेतुकानि ईश्वरप्रेरितानि कर्माणि कुर्वन् जीवोऽयं सुखेतरं दुःखं तत्तत्कर्मफलं गृह्णन् तत्र तत्र भ्रमति ॥ ६ ॥

कर्मगतीर्देवादिगतीः गच्छन् पुमान् जीव आभूतसम्प्लवात् प्रलयम् अभिव्याप्य जन्ममृत्यू अश्नुते अवशः गुणमयप्रकृतिवशः ॥ ७ ॥

एवञ्च व्यामोहापादिकां तां प्रतिपाद्य प्रलये तस्याः सूक्ष्मरूपेणाऽवस्थानं प्रपञ्चयति—धातूनामुपप्लवे नाशे आसन्ने प्राप्ते व्यक्तं स्थूलं कार्यं कालशरीरकः परमात्मा अव्यक्ताय अव्यक्तावस्थां सूक्ष्मावस्थां प्रत्याकर्षति द्रव्यं जीवसमष्टि गुणाः दशसङ्ख्याकाः तदात्मकं चिदचित्परिणामरूपम् इत्यर्थः ॥ ८—१० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तत्र हेतुं वदन्नुपपादयति—गुणैरिति । स प्रभुर्जीवः भगवता सृष्टमिदं शरीरमात्मानं मन्यमानः अत एवात्मनान्तर्यामिणा परमपुरुषेण प्रद्योतितैरापादितप्रवृत्तिधर्मैर्गुणैः गुणपरिणामभूतैरिन्द्रियैर्गुणान् शब्दादिविषयान् भुञ्जानः इह विषयेष्वेव सज्जते देहात्माभिमानस्तन्मूलः पूर्वपूर्वविषयानुभवश्चोत्तरोत्तरविषयासक्तिहेतुरिति भावः ॥ ५ ॥

केवलमेवं न सज्जते किन्तु न मुच्यतीत्याह–कर्माणीति । इह संसारे देहभृज्जीवः कर्मभिः पूर्वपूर्वदेहार्जितकर्मवासनाभिः निमित्तभूताभिः सनिमित्तानि उत्तरोत्तरदेहनिमित्तभूतवासनासहितानि कर्माणि पुण्यपापात्मकानि कुर्वन् तत्तत्कर्मणां फलं सुखं दुःखं च गृह्णन्ननुभवन् सुखेतरं दुःखोदर्कं यथा भवति तथा भ्रमति ॥ ६ ॥

इत्थं कियत्पर्यन्तं भ्रमतीत्यत आह—इत्थमिति । पुमान् जीवः इत्थं कर्मगतीः कर्मसम्पादितदेहान् गतिशब्दः प्रकारपरः देहस्याऽपृथक्सिद्धप्रकारत्वात् गच्छन् प्राप्नुवन् बहून्यभद्राणि दुःखानि वहतीति तथा अवशः प्रकृतिपरवशः आभूतसम्प्लवान्महाभूतप्रलयपर्यन्तं सर्गप्रलयौ उत्पत्तिमरणे तत्परम्परामित्यर्थः । अश्नुते प्राप्नोति ॥ ७ ॥

तर्हि कीदृशो भूतसम्प्लवः ? इति तस्य बुभुत्सामाकाङ्क्ष्य तमुपपादयति—सार्धैरष्टाभिर्धातूपप्लव इति । धातूपप्लव पञ्चमहा-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

भूतोपसंहारे महाप्रलये आसन्ने सत्यनादिनिधनः आद्यन्तशून्यः कालः कालशरीरकः परमपुरुषः द्रव्यगुणात्मकं पञ्चभूतशब्दादिगुणात्मकं गुणयुक्तभूतपरिणामात्मकं व्यक्तं स्थूलं विश्वमव्यक्तात्ऽपकर्षति अव्यक्तं नामरूपविभागरहितं तमःशब्दवाच्यं सूक्ष्ममचिद्द्रव्यं तत्प्रति नेतुमाकर्षति ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

नन्विन्द्रियाणामशुभेषु विषयेष्वपि प्रवृत्तेः तत्स्थस्याशुभभोगोऽपि प्रसज्येत अतः कथं गुणानेव जुषते ? इत्यत्राह—गुणैरिति । यो गुणानेव जुषत इति प्रस्तुतः परमात्मात्मना प्रद्योतितैर्विषयाभिमुखत्वेन प्रेरितैर्गुणैरिन्द्रियैर्गुणान् भुञ्जानो वर्त्तत इत्यन्वयः । लडर्थवाचिशानचा शुभमेव भुङ्क्ते कदापि नाशुभमिति ध्वनयति, "नाशुभं स हरिः पिबेत्" इति स्मृतेः । एकस्मिन्नेव भोगायतने स्थितयोरनयोरेकस्य हरेर्गुणैकभोक्तृत्वे को हेतुरित्यत्राह-प्रभुरिति "समर्थेऽधिपतौ प्रभुः" इति वचनात् सामर्थ्यमाधिपत्यं च निमित्तमित्यर्थः । स्वतन्त्रास्वतन्त्रयोः अमितभेदानङ्गीकारे बाधकमाह, मन्यमान इति । इदमित्यव्ययम् "आत्मा वा इदम्" इति श्रुतेः । सर्वाधिकत्वेन वर्तमानं तं परमात्मानम् इदं सृष्टं देहयोगेनोत्पन्नम् इदं जीवाख्यं वस्त्विति मन्यमानो जीव इह संसारे सज्जते मृतः परत्र तमसि मज्जत इत्यन्वयः ॥ ५ ॥

एतदेव विवृणोति—कर्माणीति । सनिमित्तानि पूर्वकर्मप्रयत्नसंस्काराख्यबीजसहितानि कर्मभिर्व्यापारैः कर्मेन्द्रियैर्वा कुर्वन् सुखेतरं दुःखं प्रति भ्रमतीत्यन्वयः ।

"शरीरे दोषहानेन गुणभोक्तारमीश्वरम् ।
शरीरस्थतया जीवं मन्यमानः पतत्यधः ॥
तत्सृष्टा हि सदा जीवा देहादेर्जनिमत्त्वतः ।
नित्यानन्दैकदेहोऽसौ विष्णुस्तत्त्वैकतानयोः" ॥

इत्यनेन प्रमितोयमर्थः ॥ ६ ॥

जीवपरयोरभेददर्शिनः पुंसः कदा नु तमःप्रवेश इत्यतः प्रलयपर्यन्तमेव देहयोगवियोगलक्षणौ जन्ममृत्यू ततः परं तमःप्रवेश इत्याशयेनाह-इत्थमिति । कर्मगतीः कर्मनिर्मितयोनिलक्षणफलानि बहून्यभद्राणि पापान्यावहत्यात्मन्याधत्त इति बह्वभद्रवहः आभूतसम्प्लवात् जगत्प्रलयपर्यन्तं सर्गप्रलयौ जन्ममरणे योगिवत्स्वच्छन्दतया स्यातामित्यत उक्तम् अवश इति—

"आभूतसम्प्लवाज्जन्मजीवेशत्वं विजानतः ।
ततः पतत्यधो यस्मादुत्थानं नैव तु क्वचित्" ॥

इतिवचनात् अवशः पश्चादन्धे तमसि पततीत्यर्थः ॥ ७ ॥

एवमीश्वरमायानियतादव्यक्तात् सृष्टिं समासतोऽभिधाय प्रलयं सङ्क्षिप्याह—धातूपप्लव इति । धातूनां पृथिव्यादिपञ्चभूतानाम् उपप्लवे प्रलये द्रव्यगुणात्मकं पञ्चभूतशब्दादिगुणमयं व्यक्तं ब्रह्माण्डम् अनादिनिधनः कालो विष्णुः अव्यक्ताय मूलप्रकृतये विकर्षति प्रकृत्यवशेषं करोतीच्छतीत्यर्थः । "कालाख्यः कलनाद्विष्णुर्व्यक्तमव्यक्तगं नयन्" इति वचनात् विष्णुरेव कालशब्देनोक्तः विकर्षतीत्यनेन कालशब्दोऽपि निरुक्तः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

सतु जीवः प्रभुः प्रभ्वंशत्वाद्यत्किञ्चिज्ज्ञानादिशक्तियुक्तोऽपीत्यर्थः । तत्र कारणं तु "भयं द्वितीयाभिनिवेशतः" इत्यादावेव दर्शितम् । यद्वा, स आद्यः पुरुषः आत्मना प्रकाशितैर्गुणैः कारुण्यादिभिर्हेतुभिरुदितान् गुणान् भक्तप्रेमतद्विलासान् भुञ्जान आस्वादयन् इदं सृष्टं भक्तशरीरम् आत्मानमात्मदेहमेव मन्यमान इह भक्तशरीरे सज्जते "साधवो हृदयं मह्यम्" इत्यादेः ॥ ५ ॥

साधारणजीवानां गतिमाह—कर्माणीति ॥ ६—१० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

सच जीवः आत्मना अन्तर्यामिणा प्रद्योतितैर्गुणैरिन्द्रियैर्गुणान् विषयान् भुञ्जान इदं सृष्टं शरीरम् आत्मानं मन्यमान इह शरीरादौ सज्जते प्रभुः प्रकर्षेण देवतिर्यगादिषु भवतीति सः ॥ ५ ॥

ततश्च संसरतीत्याह—कर्मभिः कर्मेन्द्रियैः सनिमित्तानि सवासनानि कर्माणि कुर्वन् सुखेतरं सुखदुःखात्मकं कर्मफलं प्राप्नुवन् रमते इति नारकयोनावपि रमणदर्शनात् ॥ ६ ॥

भूतानामुद्भूतवस्तूनां सम्प्लवः प्रलयस्तत्पर्यन्तम् ॥ ७ ॥

संहारमाह—सार्द्धैरष्टभिः । धातूनां महाभूतानाम् उपप्लवे नाशहेतौ प्रलये आसन्ने सति व्यक्तं कार्यं द्रव्यगुणात्मकं द्रव्यं स्थूलं गुणः सूक्ष्मं तदात्मकम् अव्यक्तायाऽव्यक्तं कारणं प्रति नेतुमाकर्षति ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

स बुभुक्षुः प्रभुः शरीरस्वामी आत्मप्रद्योतितैः स्वप्रकाशितैः गुणैः हेतुभूतैः कर्मभिः । यद्वा, भगवत्प्रद्योतितैर्गुणैरिन्द्रियैः गुणान् विषयान्भुञ्जानः इदं भगवत्सृष्टं शरीरमात्मानं मन्यमानः इह देहादौ सज्जते ॥ ५ ॥

कर्मभिः पूर्वकृतैः हेतुभूतैः पुनः शुभाशुभानि सनिमित्तानि सवासनानि कुर्वन् सुखेतरं सुखं च तदितरं दुःखं च तत्तत्कर्मफलं तेषां तेषां शुभानामशुभानां च कर्मणां फलं गृह्णन् देहभृत् इह संसारे भ्रमति ॥ ६ ॥

बहूनि अभद्राणि वहन्तीति तथा ताः सर्गप्रलयौ जन्ममरणे ॥ ७ ॥

अथ संहारं दर्शयितुमारभते—धातूपप्लव इत्यादिना । धातूनां महाभूतानामुपप्लवे विनाशहेतावासन्ने उपस्थिते अनादिनिधनः आद्यन्तशून्यः कालः द्रव्यगुणात्मकं प्रकृतिगुणपरिणामं व्यक्तं कार्यं चिदचिद्रूपं जगत् अव्यक्ताय कारणमायाय अपकर्षति ॥ ८ ॥

भाषा टीका ।

वह जीवात्मा समर्थ होकर भी अन्तर्यामि से प्रकाशित

शतवर्षा ह्यनावृष्टिर्भविष्यत्युल्बणा भुवि ।
तत्कालोपचितोष्णाऽर्को लोकांस्त्रीन् प्रतपिष्यति ॥ ९ ॥
पातालतलमारभ्य सङ्कर्षणमुखाऽनलः ।
दहन्नूर्ध्वशिखो विष्वग्वर्द्धते वायुनेरितः ॥ १० ॥
साम्वर्तको मेघगणो वर्षति स्म शतं समाः ।
धाराभिर्हस्तिहस्ताभिर्लीयते सलिले विराट् ॥ ११ ॥
ततो विराजमुत्सृज्य वैराजः पुरुषो नृप ! ।
अव्यक्तं विशते सूक्ष्मं निरिन्धन इवाऽनलः ॥ १२ ॥

भाषा टीका ।

इन्द्रियों के विषयों को भोगता हुआ, इस परमात्मा के रचे हुए शरीर को ही आत्मा मानकर इसमें आसक्त होजाता है ॥५॥

कर्मेन्द्रियों से वासना प्राप्त कर्मों को करता हुआ, पूर्व किये हुये कर्मों के दुःखरूप फल को भोगता हुआ, यह देह धारी संसारी जीव इस संसार ही में देव मनुष्यादि योनियों में भ्रमता है मुक्त नहीं होता ॥ ६ ॥

इस प्रकार यह जीव बहुत अशुभ को प्राप्त करने वाली गति (देहों) को प्राप्त होता हुआ प्रकृति के वश होकर प्रलय पर्यंत वार २ जन्म मरण को प्राप्त होता रहता है ॥ ७ ॥

पञ्च महाभूतों का जब प्रलय काल में नाश होना समीप आजाता है तब द्रव्य गुणात्मक जो कार्य है तिसको अनादि निधन (आद्यन्त रहित) कालतत्त्व, नामरूप विभाग के अयोग्य सूक्ष्म अचित् द्रव्य जो अव्यक्त है तिसके प्रति आकर्षित करने लगता है ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

नाशहेतूनाह—शतवर्षेति । तस्मिन्काले उपचितश्चासावुष्णाश्चासावर्कश्च । यद्वा, तेन कालेनोपचितमुष्णत्वं यस्य सः ॥९॥

ऊर्ध्वशिख ऊर्ध्वज्वालः विष्वक्परितः ॥ १० ॥

सांवर्तकः प्रलयकर्त्ता धाराभिर्नतु बिन्दुभिः हस्तिहस्ताभिस्तत्प्रमाणाभिः ॥ ११ ॥

तत उपाधिलयाद्वैराजः पुरुषोऽव्यक्तं कारणं प्रविशति ननु—

"ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे ।
परस्यान्ते कृतात्मानः प्रविशन्ति परम्पदम् ॥"

इति स्मृतेः "यावदधिकारमवस्थितिराधिकारिणाम्" इति न्यायाच्च वैराजशब्दाभिधेयस्य च ब्रह्मणः परमभागवतत्वान्मोक्ष एव सङ्गच्छते नान्येषामिव कारणमात्रप्रवेशः ? सत्यम, अश्वमेधादिना सत्यलोकं गतानामल्पभक्तानामावृत्तिश्रवणादभक्तत्वे च ब्रह्मणोऽपि प्रकृतौ लयः पुनरुत्पत्तिश्चेति मोक्षवैलक्ष्यसूचनायैवमुक्तमित्यविरोधः । यद्वा, केनापि प्रमाणेन न व्यज्यत इत्यव्यक्तं ब्रह्मैव तत्प्रवेशेन च मोक्ष एवोक्त इति द्रष्टव्यम् ॥ १२ ॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

नाशहेतूननावृष्ट्यादीन् पूर्वार्थे "कर्मभिर्वर्धते तेजो ह्रसते च यथा रवेः" इत्युक्तेरर्कस्योपचितत्वासम्भवाद्यद्वेति उष्णमिति भावप्रधानो निर्देशः अत एवोष्णत्वमिति व्याख्यातम् ॥ ९ ॥

ईरितः प्रेरितः ॥ १० ॥

तत्प्रमाणाभिः हस्तिशुण्डाकाराभिः ॥ ११ ॥

व्यष्टिजीवैः सहोपाधिलयात् व्यष्टिजीवानामपि लयो वैराज एव ज्ञेयः वैराजः समष्टिजीवः अव्यक्तं प्रकृतिं ते सर्वे ब्रह्मोपासकाः प्रतिसञ्चरे प्रलये परस्य द्वितीयपरार्द्धस्य कृतात्मानः शुद्धचित्ताः "यावदधिकारम" इति ब्रह्मसूत्रं तस्यायमर्थः आधिकारिकाणां लोकस्थितिहेतुषु वेदप्रवर्त्तनचराचरसृष्ट्याद्यधिकारेषु नियुक्तानाम अपान्तरतमो ब्रह्मादीनां यावदधिकारं लोकव्यवस्थासु स्वामित्वमधिकारस्तमनतिक्रम्य तत्प्रापकं प्रारब्धं यावदस्ति तावत्कालं जीवन्मुक्तत्वेनावस्थितिः प्रारब्धक्षये तु प्रतिबन्धकाभावाद्विदेहमुक्तिरित्यर्थः । अन्येषां कारणमिव सत्यमित्यङ्गीकारे एवमुक्तं ब्रह्मणोऽपि प्रकृतिप्रविष्टत्वमुक्तं इत्यविरोधः अन्तरित्युवाक्यस्य श्रुतिसूत्रयोश्च विरोधो नास्तीत्यर्थः पूर्वार्थे मोक्षवैलक्ष्यस्य सूचनलक्षणस्य प्रयोजनस्य कल्पनागौरवमतो यद्वेति यदि अव्यक्तशब्देन ब्रह्मैवोच्यते तदा तत्प्रवेशेन ब्रह्मप्रवेशेन मोक्षस्यैवाभिहितत्वाच्छ्रुतिसूत्राभ्यां विरोध एव नास्तीति न कल्पनागौरवमिति स्वारस्यम् ॥ १२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

वैराजोऽन्तर्यामी अनिरुद्धमूर्त्तिः स्थूलदेवतस्तस्यैवात्र लयोक्तिः देहदेहिनोरभेदात् तद्देहस्य सूक्ष्मे लय उक्तः ॥ ११ ॥

सार्द्धद्वाभ्यां भूतानां तामसाहङ्कारे लयः ॥ १२—१४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

प्राकर्षणप्रकारमेवाह—शतवर्षेत्यादिना। तदाऽत्युल्बणाऽति दुःसहा तत्कालेन शतवर्षपरिमिताऽनावृष्टिकालेनोपचितं वर्द्धितमुष्णं यस्य सः। यद्वा, तस्मिन्काले उपचितश्चासावुष्णश्चार्कश्च स इति समस्तपाठेऽर्थः॥ ९॥

पातालेति। ऊर्ध्वशिख ऊर्ध्वज्वालः वायुना ईरितः सहकृतः विष्वक् परितो वहन् वर्द्धते॥ १०॥

ततः सांवर्तकाख्यः प्रलयकृन्मेघगणः हस्तिहस्ताभिर्गजशुण्डोपमाभिर्धाराभिः शतवर्षाणि वर्षिष्यति ततो विराट् ब्रह्माण्डं सलिले लीयते॥ ११॥

ततो वैराजो विराडन्तर्वर्त्तिपुरुषो जीवः एकवचनम् एको व्रीहिरितिवत् जात्यभिप्रायकं जीववर्ग इत्यर्थः। विराजं लीनं ब्रह्माण्डं विसृज्य सूक्ष्मं सूक्ष्मावस्थम् अव्यक्तं "तम आसीत्" इति तमः शब्दवाच्यं प्रधानं विशते इति संसर्गविशेषः उक्तः नतु लयः चेतनं प्रत्यचेतनस्य कारणत्वाभावादयमेव संसर्गविशेषो "अक्षरं तमसि लीयते" इति श्रुतावप्युच्यते निरिन्धन "इवानल" इति ज्ञानसङ्कोचोऽभिप्रेतः यथा निरिन्धनः काष्ठरहितोऽग्निः सङ्कुचितो भवति तद्वत्सङ्कुचितज्ञान इत्यर्थः॥ १२॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

सङ्क्षिप्योक्तं प्रलयमावितो वक्ति—शतवर्षमिति। तत्कालेन तेन प्रलयकालेन उपचितः संवर्धितः उष्णो गुणो यस्य स तथा सचाऽसावर्कश्च स तत्कालोपचितोष्णार्कः॥ ९—१०॥

विराट् ब्रह्माण्डम्॥ ११॥

सलिले विलीनं ब्रह्माण्डमुत्सृज्य वैराजो ब्रह्माण्डान्तर्वर्ती पुरुषो ब्रह्मा अव्यक्तं परमात्मानं विशते अव्यक्तशब्दार्थं स्पष्टीकुर्वन् तं विशिनष्टि, सूक्ष्ममिति। यद्वा, निरिन्धनोऽनलः सूक्ष्मं व्याप्तमग्निमिवेति॥ १२॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

सम्वर्त्तकः तदग्निधूमाऽभ्रं सूर्यांशुकर्षरसेन च जातः॥ ११॥

तत इति पूर्वं तु व्यष्टिजीवानामपि वैराज एव लयो ज्ञेयः वैराजोऽत्र समष्टिजीवः॥ १२॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

उपचितः प्रवृद्धः उष्णोऽत्युष्णः॥ ९॥ १०॥

संवर्त्तकः प्रलयकर्त्ता हस्तिशुण्डप्रमाणाभिः॥ ११॥

ततश्चोपाधिलयात् वैराजः समष्टिजीवो ब्रह्मा व्यष्टिजीवानां तु वैराज एव पूर्वं लयो ज्ञेयः। अव्यक्तं प्रकृतिम् अत्र ब्रह्मणोऽपि कर्मिज्ञानिभक्तत्वेन त्रैविध्यात् कस्यचित् पुनरावृत्तिः कस्यचिन्मुक्तिः कस्यचित्प्रेमवत्पार्षदत्वप्राप्तिश्चेति द्रष्टव्यम् "आब्रह्मभुवनाल्लोकाः पुनरावृत्तिनोऽर्जुन!" इति विपर्ययश्च भवति ब्रह्मत्वस्थावरत्वयोरिति—

"ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे।
परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम्"॥

इत्यादि वचनेभ्यः॥ १२॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

विनाशहेतूनाह—शतवर्षेति। तत्कालेन प्रलयकालेनोपचितः संवर्द्धितः उष्णो गुणो यस्य स तत्कालोपचितोष्णः सचासावर्कश्च॥ ९॥

सांवर्तकः प्रलयहेतुः विष्वक् परितः॥ १०॥

हस्तिहस्ताभिः हस्तिहस्ताकाराभिः विराट् चतुराननशरीरं सप्तावरणसंयुतं सलिले लीयते निश्चेष्टं पतति॥ ११॥

ततः पतनानन्तरं वैराजो विराट्शरीराऽभिमानी पुरुषः चतुराननः निरिन्धनोऽनलः सूक्ष्मं कारणभूतमनलमिव अव्यक्तं प्रधानं विशते तेन सह सर्वेषां बद्धजीवानां प्रधाने प्रवेशोर्थादुक्तः तस्य भगवत्पुत्रत्वेन मुक्त्यधिकारित्वेऽपि यावत्तादृशोऽन्यो नोपलभ्यते तावत्स एव पुनःपुनः सृष्ट्यर्थमुत्पत्तिसंहारौ भजते इति भावः। अत एव द्वितीये स्कन्धे—

"एवं पुरा धारणयात्मयोनिर्नष्टां स्मृतिं प्रत्यवरुध्य तुष्टात्।
तथा ससर्जेदममोघदृष्टिर्यथाप्ययात्प्राक् व्यवसायबुद्धिः"॥

इति श्रीशुकेनोक्तम् अनेन तादृशपुरुषस्य दौर्लभ्यमप्युक्तम् तादृशपुरुषप्राप्तौ तु—

"ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे।
परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम्"॥

इति स्मृत्युक्तश्चतुराननमोक्षः सङ्गच्छते॥ १२॥

भाषा टीका।

वह काल किस प्रकार कार्यों को अव्यक्त के प्रति खींचता है, कि—प्रथम तो भूमि में सौ १०० वर्ष पर्यंत बडी घोर अनावृष्टि होती है, उस काल में तेजकी वृद्धि को प्राप्त होने वाले सूर्य तीनों लोकों को तपा देते हैं॥ ९॥

उस समय में सङ्कर्षण भगवान् के मुख से जो अग्नि निकलता है उसकी ज्वालायें ऊपर को भकभकाती रहती हैं, और वह अग्नि पाताल के नीचे से लेकर वायु से प्रेरित होकर चारों तरफ जलाता हुआ बढता है॥ १०॥

तदनन्तर सौ१०० वर्ष पर्यन्त सांवर्त्तक नामक मेघों का गण हस्ति की शुंडा के बराबर स्थूल धाराओं से वर्षा करते हैं, उस समय विराट् ब्रह्माके शरीर रूप जो त्रिलोकी है, वह जल में डूब जाती है॥ ११॥

हे राजन्! उस समय वैराज पुरुष अपने विराज शरीर को छोडकर, सूक्ष्म अव्यक्त में प्रवेश करता है, जैसे निरिन्धन अग्नि अपने कारण में अन्तर्हित हो जाती है॥ १२॥

---

(१)वायुना हृतगन्धाः भूः सलिलत्वाय कल्पते ।
सलिलं तद्धृतरसं ज्योतिष्ट्वायोपकल्पते ॥ १३ ॥
हृतरूपं तु तमसा वायौ ज्योतिः प्रलीयते ।
हृतस्पर्शोऽवकाशेन वायुर्नभसि लीयते ।
कालात्मना हृतगुणं नभ आत्मनि लीयते ॥ १४ ॥
इन्द्रियाणि मनोबुद्धिः सह वैकारिकैर्नृप ! ।
प्रविशन्ति ह्यहङ्कारं स्वगुणैरहमात्मनि ॥ १५ ॥
(यदान्यदात्मनः पश्यत्सतो निष्टमसज्जनः ।
इयामेवात्मनो मोहः क्लेशात् क्लेशा भयाद्भयम् ॥ [क)
यदा हि जन्मसंसारभेदान् गच्छन्ति नैगमाः ।
स्वस्तये निगमो नैषां सूर्योदय इवाऽसताम् ॥ (ख)
छायाप्रत्यह्वयाभासा न सन्त्यविकृते सति ।
तत्रापि नास्ति सास्त्यर्थे भ्रान्त्या ज्ञानादृते स्वतः ॥ (ग)
ज्ञानावलम्बनं तस्मादन्याभावादनावृतम् ।
अर्थाऽभावो पृथक् सिद्धेः सतः स्वप्नार्थ धीर्यथा ॥ (घ)
एषा माया भगवतः सर्गस्थित्यन्तकारिणी ।
त्रिवर्णा वर्णिताऽऽस्माभिः किं भूयः श्रोतु मिच्छसि ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एवं विराजो लयमुक्त्वा तत्कारणानां महदादिपृथिव्यन्तानां प्रातिलोम्येन लयमाह-वायुनेति । वायोर्हि गन्धरसहारित्वं प्रसिद्धम् सांवर्त्तकेन वायुना हृतगन्धा अत एव गन्धस्य व्यावर्त्तकस्य गतत्वात्सलिलत्वाय कल्पते सलिले लीयत इत्यर्थः । तद्धृतरसं तेन वायुनैव हृतो रसो यस्य तत् ॥ १३ ॥

तमसश्च रूपतिरस्कारित्वं प्रसिद्धं सांवर्त्तकेन तमसा अव-काशेनाऽऽकाशेन स्वकारणेन कालात्मना शब्दस्य हि कालत एव नाशः प्रसिद्धस्तद्रूपेणाऽऽत्मना ईश्वरेण आत्मनि तामसाहङ्कारे॥१४॥

इन्द्रियाणि बुद्धिश्च राजसाहङ्कारं मनो वैकारिकैर्देवैः सह सात्त्विकाहङ्कारम् एवं त्रिविधैः स्वगुणैः स्वकार्यैः सहितोऽह-महङ्कार आत्मनि महति सच प्रकृताविति द्रष्टव्यम् ॥ १५ ॥

त्रिवर्णा त्रिगुणा माया श्रवणभीतं राजानं तन्निवृत्त्युपाय-श्रवणे स्वयं छन्दयति किम्भूय इति ॥ १६ ॥

———

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

सम्वर्त्तकेन प्रलयकर्त्रा वायुना तद्ग्राहिरावरणरूपेण अत एव गन्धस्य हृतत्वादेव व्यावर्त्तकस्य जलादिभ्यो भेदकस्य हृतगन्धेत्युपलक्षणं हृतस्पर्शा च काठिन्यस्य स्पर्शविशेष-रूपत्वेन वायुगुणत्वात् स्पर्शस्यापि वायावेव प्रवेश इत्यर्थः ॥ १३ ॥

सम्वर्त्तकेन प्रलयकर्त्रा तमसा वाय्वावरणमारभ्य प्रकृत्या-वरणव्यापकेन हृतं रूपं व्यावर्त्तकधर्मो यस्य तादृशं ज्योतिः स्वकारणेन स्वस्य वायोः कारणेनाऽऽकाशेन हृतः स्पर्शो यस्य स वायुः "चत्वारि स्पर्शवन्ति हि" इत्युक्तेः । आकाशे स्पर्शाभावा-दाकाशस्य स्पर्शहारित्वम् । कालात्मनेत्यद्धं कं हि यतः शब्दस्य क्षणत्रयरूपात् कालत एव नाशः प्रसिद्धः "शब्दबुद्धि-कर्मणां विरम्य व्यापाराभावात्" इति न्यायात् तस्मात्तद्रूपेण कालरूपेणात्मनेश्वरेण हृतो गुणः शब्दो यस्य तन्नभः १४ ॥

स्वकार्यैः स्वस्य त्रिविधाहङ्कारस्य कार्यैः भूतेन्द्रियबुद्धि-मनोदेवैः सहितस्त्रिविधोऽहङ्कारो महत्तत्त्वे प्रविशति ॥ १५ ॥

एषा सृष्ट्यादिकार्यरूपा यतः सर्गादिकर्त्री तन्निवृत्त्युपाय-श्रवणे तस्या मायाया निवृत्तिस्तरणं तस्मिन्नुपायो भक्तियोगस्तस्य श्रवणे स्वयमन्तरीक्षश्छन्दयति इच्छां कार-यति ॥ १६ ॥

(१) वारिणा हृतगन्धेति विज० पा० ।

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

इन्द्रियाणि मनः बुद्धिः बुद्धिशब्देन महान् एतानि वैकारिकाणि एतैः सह राजसोऽहङ्कारः तदुत्पत्तौ सहकारी अहङ्कारं प्रविशति स त्रिविधोऽहङ्कारश्चात्मनि (अनर्थात्मनि) तच्छरीरिणि परमात्मनीत्यर्थः ॥ १५ ॥

एवं स्थूलसूक्ष्मावस्थाविशिष्टां परमात्मशरीरभूतां तां प्रदर्श्य पूर्वं स्वस्वरूपतिरोधायकत्वेनोक्त्वा, परस्वरूपतिरोधायकत्वेनापि तां दर्शयितुम् एवम्भूतपरमात्मविज्ञानाभावादेव जीवस्य संसार इत्याह——चतुर्भिः । एवमुभयावस्थाविशिष्टचिदचिच्छरीरकादात्मनः सतः अन्यत् असत् अवर्त्तमानम् अन्यत्वेन भिन्नत्वेनावर्त्तमानम् अनिष्टम् अनिष्टत्वापादकं यद्यपि जनः जीवः अन्यत्पश्येत् अब्रह्मात्मकं पश्येदित्यर्थः तर्हि तावानेव आत्मनो मोहः धर्मभूतज्ञानावरणं क्लेशादनन्तरं क्लेशदं भयादनन्तरं भयम् उभयञ्चेदम् अनिष्टम् असद्विनाशस्वभावञ्चेति ॥ क ॥

ननु, वेदोक्तकर्मसु वर्त्तमानानाम् अब्रह्मात्मकत्वदर्शनं नैव, कथं मोहादिरित्यत्राह—यदाहीति । नैगमाः यदा यदि केवलवेदोक्तकर्मनिष्ठाः स्वकर्तृत्वफलसङ्गेन कर्मकृतः तर्हि जन्मसंसारभेदान् देवतिर्यङ्मनुष्यादिरूपाणि गच्छन्ति अत एषां देहात्मस्वतन्त्रात्ममानिनां निगमः स्वस्तये शोभनसत्तायै "असन्नेव स भवति असद्ब्रह्मेति वेद चेत" इति श्रुतेः । असतां चौरादीनां सूर्योदय इव स्वस्तये न भवतीत्यर्थः ॥ ख ॥

वेदोक्तकर्मणां ज्ञानाज्ञानकृतत्वेन मोक्षबन्धरूपानर्थकारित्वे दृष्टान्तमाह–छायेति । छाया स्तम्भे पिशाचादि भ्रमात्मिका प्रत्याह्वयः शून्यशिलागृहाद्र्यादौ प्रत्युत्तरकारी शब्दध्वनिः आभासः जलस्थसूर्यप्रतिबिम्बस्यान्तर्गृहे तेजःपुञ्जः एते अविकृते विकाररहिते भयाज्ञानादिरहिते सति श्रेष्ठे महापुरुषे यथा न सन्ति भयादिकार्यकरा न सन्ति, अथवा सति द्रष्टव्ये तदाश्रितत्वेन वर्त्तमाना न सन्तीति काकुः । किन्तु, भयादिकर्त्तारो नेति पूर्ववत् सत्या एव ते इत्यर्थः । तथा ऽत्रापि दार्ष्टान्तिके सत्यर्थे अस्तेरेवार्थो यस्मिन् तस्मिन् सर्वसत्यत्वप्रतिपादके वेदे अस्तीति सद्ब्रह्म इति वा तत्प्रतिपादके पुंसि वा सा अस्वास्तिरकल्याणरूपा स्वतः अज्ञानादृते धर्मभूतज्ञाननिष्ठा ज्ञानाद्विना नास्ति स्वहेतुकादज्ञानात्स्वस्वरूपपरस्वरूपाज्ञानादिति यावत् ऋते विना नास्ति न भवति यतः साऽस्वस्तिर्देहात्मभ्रमस्वतन्त्रात्मभ्रमरूपाया भ्रान्त्या एवास्ति वर्त्तत इति स्वतो ज्ञानात् भ्रान्त्या ऋते इति योजना ॥ ग ॥

नन्वज्ञानतत्कार्ययोरनिर्वचनीयत्वान्मिथ्यात्वाद्ब्रह्मैव सत्यं "नेह नानास्ति किञ्चन, इति श्रुत्युक्तम् इति चेदत आह, ज्ञानस्यावलम्बनम् आश्रयः परमात्मा अथवा ज्ञानं जीवोऽवलंब्यते व्याप्यते येन तदीश्वरस्वरूपम् अन्याभावादब्रह्मात्मकस्याभावादनावृतम् अव्याप्यम् । कथं तर्हि नानेति श्रुतिः? इत्यत्राह—अर्थाभावस्तु सतः ब्रह्मणः अपृथक्सिद्धविशेषणत्वेन श्रुत्योक्तः नतु मिथ्यात्वरूपः यथा स्वाप्नार्थविषयं ज्ञानं सत एव भवति ईश्वरसृष्टत्वात्सत्यमिति ॥ घ ॥

एवं प्रलयावस्थायां सूक्ष्मतया च मायां भगवच्छरीरतया वर्णयित्वा निगमयति—त्रिवर्णा त्रिगुणाश्रयद्रव्यरूपा भगवतो माया भगवच्छरीरभूता अत एव सर्गादिकारणी इति तस्या उपचर्यते कारणस्यासाधारणभगवल्लक्षणत्वात् ॥ १६ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं विराड्वैराजयोर्लयमभिधायाऽथ विराट्कारणानां महदादिपृथिव्यन्तानां प्रातिलोम्येन लयमाह—वायुनेति । वायोर्हि गन्धरसहारित्वं प्रसिद्धम् अतो वायुना सांवर्त्तकेन हृतो गन्धः पुण्यगन्धो यस्याः सा भूः पृथ्वी अत एव गन्धस्य व्यवस्थापकस्य गतत्वात्सलिलत्वाय कल्पते सलिलत्वमापद्यते सलिले लीयत इत्यर्थः । तद्धृतरसं तेन वायुनैव हृतो रसो यस्य तत्सलिलम् ॥ १३ ॥

तमसो रूपतिरस्कारित्वं प्रसिद्धम् अतः सांवर्त्तकेन तमसा हृतं रूपं यस्य तज्ज्योतिः अवकाशेन स्वकारणेनाऽऽसन्नलयेनाऽऽकाशेनेत्यर्थः । वायोर्ह्याकाशसञ्चारित्वं प्रसिद्धं हृतः स्पर्शो यस्य स वायुः नभस्याकाशे लीयते कालात्मना कालशरीरकेणेश्वरेण शब्दस्य कालत एव हि नाशः हृतः गुणः शब्दो यस्य तन्नभ आत्मनि लीयते आत्मशब्दः कारणपरः भूतादौ इत्यर्थः ॥ १४ ॥

इन्द्रियाणीति दशेन्द्रियाणि मनोबुद्धिश्च वैकारिकैरधिष्ठातृभिर्देवैः सहाऽहङ्कारं स्वकारणभूतं सात्त्विकाहङ्कारं प्रविशन्ति अहमहङ्कारस्त्रिविधोऽपि स्वगुणैः स्वकार्यैः सहितः आत्मनि कारणभूते महति प्रविशतीति वचनविपरिणामेन सम्बन्धः ॥ १५ ॥

एषेति, एषा भगवतो माया महत्तत्त्वस्यापि कारणभूतेति शेषः अतस्तस्यां विशतीति भावः । सर्गाद्युपयुक्ता त्रिवर्णा लोहितशुक्लकृष्णवर्णा रजःसत्त्वतमोरूपगुणत्रयमयीत्यर्थः।अस्माभिरित्थं कार्यतः स्वरूपतश्च वर्णिता कृतमायास्वरूपतत्कार्यश्रवणस्य तन्निस्तारोपायपिपृच्छिषामुत्पादयितुं चोदयति, किंपुनः श्रोतुमिच्छसीति ॥ १६ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

"सङ्क्षेपविस्तराभ्यां तु कथयन्ति मनीषिणः ।
बहुवारस्मृतेस्तस्य फलबाहुल्यकारणात्" ॥

इति वाक्यार्थं सफलं कुर्वन्नुक्तार्थं प्रपञ्चयति—वारिणेति । ज्योतिषा हृतरसं पीतरसं तमसा तमोगुणानुस्यूतेन वायुना अवकाशेन आकाशेन ॥ १३—१४ ॥

कालात्मना संहारमूर्त्तिना हरिणा हृतशब्दाख्यगुणाम् आत्मनि परमात्मनि पुनरपि विस्तारयति, इन्द्रियाणीति । अत्रेदं तात्पर्यं नभस्तामसाहङ्कारमाविशति तैजसानीन्द्रियाणि मनोबुद्धिश्च वैकारिकैः इन्द्रियाभिमानिभिर्देवैः सह वैकारिकं तैजसात्मकम् अहङ्कारं प्रविशति एवं त्रिविधोऽहमहङ्कारः स्वगुणैः स्वकार्यैः सहात्मानि महत्तत्त्वे लीयते तन्महत्तत्त्वमात्मनि व्याप्ते परमात्मनि प्रविष्टं भवति वैराजः पुरुषः पृथिव्यादीनि स्वकृतकार्याणि व्युत्क्रमेण स्वस्वकारणेषु स्वादिषु विलाप्य स्वयञ्च तत्कारण-

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

गतत्वेन तत्तत्कार्यप्रवर्तकः तत्तत्कारणगतरूपेणैकीभूय मूलरूपीसन्नाकाशवदतिसूक्ष्ममव्यक्तं प्रविशतीति ॥ १५ ॥

उपसंहरति, एषेति । भगवतः एषा माया प्रकृष्टेच्छा तदधीना प्रकृतिश्चास्माभिर्वर्णिता निमित्तोपादानत्वविवक्षयेति शेषः। कीदृशी त्रिवर्णा त्रयाणां गुणानां वर्णो वरणं यया हरेर्मत्या सृष्ट्यादौ सा तथा सत्त्वादित्रिगुणानां वर्णो लेपः स्वरूपत्वेन सम्बन्धो यस्याः सा तथा प्रकृतिः तदुक्तम्—

"त्रिवर्णा वरणादुक्ता त्रिगुणानां हरेर्मतिः ।
गुणात्मकत्वात्प्रकृतिस्त्रिवर्णेति प्रकीर्त्यते ।
तत्र तु प्रकृतिस्तार्या तारका तु हरेर्मतिः ।
उभयं विष्णुमायोक्तं ज्ञातव्यमुभयं तथा" ॥

इति बहूनां प्रस्तुतत्वादेषेत्यत्र किं परामृश्यत इति सन्देहपरिहारः कथमिति चेन्न—

"बहूनां सह निर्देश एकयाभिधयैव तु ।
तथैवाभिधया तेषां परामृश्यैकमुच्यते" ॥

इति तदुपपत्तेः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

वायुना तद्बहिरावरणरूपेण हृतगन्धेति काठिन्यस्य तु स्पर्शविशेषरूपत्वाद्वायुगुणत्वेन स्वच तत्रैव प्रविशतीति भावः ॥ १३ ॥

तमसेति वाय्वावरणमारभ्य प्रकृत्याऽऽवरणव्यापकेनेति ज्ञेयम् ॥ १४—१५ ॥

एषा ईदृशकार्यरूपेत्यर्थः ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

एवं कार्यस्य समष्टिविराजो लयमुक्त्वा तत्कारणानां महदादिपृथिव्यन्तानां तत्त्वानां प्रातिलोम्येन लयमाह-वायुनेति । वायोर्हि गन्धरसहारित्वं प्रसिद्धं संवर्त्तकेन वायुना हृतगन्धा भूः पृथिवी सलिलत्वाय कल्पते सलिले लीयते इत्यर्थः । तद्धृतरसं तेन वायुनैव हृतो रसो यस्य तत् सलिलं सर्वमेव ॥ १३ ॥

तमसा सम्वर्त्तकेन हृतरूपमिति तमसो रूपातिरस्कारित्वं प्रसिद्धमेवेति भावः । अवकाशेन आकाशेन स्वकारणेन कालात्मना कालरूपेणेति शब्दस्य कालत एव नाशः प्रसिद्धः आत्मनि तामसाहङ्कारे ॥ १४ ॥

इन्द्रियाणि बुद्धिश्च राजसाहङ्कारं मनो वैकारिकैर्देवैः सह सात्विकाहङ्कारम् एवं त्रिविधैः स्वगुणैः स्वकार्यैः सहितः अहमहङ्कारः आत्मनि महति सच महान् प्रकृताविति द्रष्टव्यम् ॥ १५ ॥

त्रिवर्णा त्रिगुणा माया प्रधानरूपा वर्णिता लक्षिता अविद्यारूपायास्तु तस्या लक्षणम् "ऋतेऽर्थम्" इत्यनेन द्वितीयस्कन्धे प्रोक्तम् ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

श्लोकाभ्यां विराट्शरीरलय उक्तः अथ तत्कारणभूतानां पृथिव्यादीनां लयमाह—वायुनेत्यादिना । वाति गच्छतीति वायुः सलिलं तेन सलिलेन हृतगन्धा भूः सलिलत्वाय स्वकारणभूतजलभावाय कल्पते तत् तेन ज्योतिषा हृतरसं सलिलम् ॥ १३ ॥

तमसा तेजोलयस्थानतया तमोभूतेन वायुना हृतरूपं ज्योतिः अवकाशेन नभसा ॥ १४ ॥

कालस्य प्रलयकालस्य शक्तिभूतस्य आत्मा आश्रयः भगवान् तेनेति सर्वत्र संयोजनीयम्, हृतगुणं स्वकारणेन तामसाहंकारेण हृतशब्दम् आत्मनि स्वकारणे तामसाहङ्कारे इन्द्रियाणि अहङ्कारं स्वकारणं राजसाहङ्कारम् मनो बुद्धिः वैकारिकैः देवैः सह स्वकारणं सात्त्विकाहङ्कारम् अहं त्रिविधोऽप्यहङ्कारः स्वगुणैः स्वकार्यैः सह आत्मनि स्वकारणे महति सच मायायामिति द्रष्टव्यम् । सलिलत्वाय प्रकल्पते इत्यादिना कार्यस्य कारणे प्रवेश उक्तो नतु स्वरूपाभावः एतेनापूर्वतयोत्पन्नस्य कार्यस्य प्रलयोऽपि स्वरूपाभावः इति पक्षोऽप्रामाणिक इति द्योतितम् ॥ १५ ॥

अब्रह्मात्मकप्रधानवादं निराकुर्वन्नुपसंहरति—एषा माया भगवतः नतु स्वाधीनेत्यर्थः । त्रिवर्णा त्रिगुणा वर्णितेत्यनेन अनिर्वचनीया विष्णुमायेति पक्षस्य निर्मूलत्वं ज्ञायते ॥ १६ ॥

भाषा टीका ।

अब जिनसे वह ब्रह्माण्ड बना रहा उन प्रत्येक महाभूतों के लय का प्रकार बतलाते हैं, कि—वायु जब भूमि के गन्ध को हरण कर लेता है तब गन्ध रूप असाधारण व्यावर्त्तक (औरों से पृथक् करने वाला) चिन्ह न रहने से वह भूमि जल में लीन होजाती है, इसी प्रकार जब जल के असाधारण रस रूप गुण को वायु हर लेता है तब वह जल भी ज्योति (तेज) में लीन हो जाता है ॥ १३ ॥

ऐसे ही प्रलयकालिकतम जब तेज के रूप को हर लेता है तब तेजभी वायु में लीन हो जाता है । और जब आकाश वायुके स्पर्श को हर लेता है तब वायु आकाश में लीन हो जाता है ॥१४॥

कालात्मक ईश्वर से जब आकाश का शब्द गुण हरण होताहै तब वह आकाश तामसाहंकार में लीन होजाता है । इन्द्रियों सहित बुद्धि राज साहंकार में, इन्द्रियाभिमानी देवतों के सहित मन सात्विकाहंकार में लीन हो जाता है, हे नृप ! इसप्रकार त्रिविध गुण अर्थात् अपने कार्यों सहित अहंकार महत्तत्त्व में लीन हो जाता है, वह महत्तत्त्व भी प्रकृति में लीन हो जाता है ॥ १५ ॥

हे राजन् ! माया शब्द वाच्य यह त्रिगुण युक्त प्रकृति ही सृष्टि स्थिति प्रलय में सहकारिणी है तिसको तुमारे आगे वर्णन करी, अब तुम क्या श्रवण की इच्छा करते हो ॥ १६ ॥

राजोवाच।

यथैतामैश्वरीं मायां दुस्तरामकृतात्मभिः।
तरन्त्यञ्जः स्थूलधियो महर्ष इदमुच्यताम् ॥ १७ ॥

प्रबुद्ध उवाच।

कर्माण्यारभमाणानां दुःखहत्यै सुखाय च।
पश्येत्पाकविपर्यासं मिथुनीचारिणां नृणाम् ॥ १८ ॥

नित्यार्तिदेन वित्तेन दुर्लभेनाऽऽत्ममृत्युना।
गृहापत्याप्तपशुभिः का प्रीतिः साधितैश्चलैः ॥ १९ ॥

एवं लोकं परं विद्यान्नश्वरं कर्मनिर्मितम्।
[1]सतुल्यातिशयध्वंसं यथा मण्डलवर्त्तिनाम् ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

एवमनुकम्पितस्तन्निवृत्त्युपायमेव पृच्छति-यथैतामिति। यद्यपि "तन्मायायाऽतो बुध आभजेत्तम्" इति भक्तिस्तत्तारकत्वेनोक्तैव तथापि किं भक्तिरेवान्योऽपि वा तत्रोपायोऽस्तीति ज्ञातुं पुनः प्रश्नः अकृतात्मभिरवशीकृतान्तःकरणैः स्थूलधियः स्थूले शरीरे अहं धीर्येषां ते ॥ १७ ॥

भक्तिव्यतिरेकेण नास्त्यन्य उपाय इत्यभिप्रेत्य भक्तिमेव ससाधनां निरूपयति, तत्र प्रथमं वैराग्यद्वारा गुरूपसत्तिमाह, चतुर्भिः कर्माणीति। दुःखहत्यै दुःखप्रतीकाराय पाकविपर्यासं फलवैपरीत्यम् मिथुनीचारिणां मिथुनीभूय प्रवर्त्तमानानाम् ॥१८॥

कर्मभिः साधिता अपि वित्तादयो न सुखहेतव इति च पश्येदित्याह-नित्यार्तिदेनेति। आत्मनः स्वस्य मृत्युरूपेण चलैरनित्यैरपायिभिश्च ॥ १९ ॥

एवं लोकं परमिति कर्मनिर्मितत्वान्नश्वरम् तथा च श्रुतिः "तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयते" इति। किञ्च, वर्तमानसमयेऽपि दुःखयुक्तं पश्येदित्याह, सतुल्यातिशयध्वंसं सह तुल्येनातिशयेन ध्वंसेन च वर्त्तमानम् अन्यतुल्ये स्पर्धाऽतिशयेऽसूया ध्वंसालोचनैर्भयादिकं च अपरिहार्यमित्यर्थः। यथा खण्डमण्डलपतीनां मिथः स्पर्धादि तद्वत् ॥ २० ॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी।

एवं छन्दनेन अनुकम्पितः अन्तरिक्षेण कृपाविषयीकृतः ननु, "शृण्वन् सुभद्राणि" इत्यादिना तदुपायस्तूक्त एवेत्याशङ्क्याह-यद्यपीति। तत्तारकत्वेन मायातारकत्वेन तत्र मायातरणे अज्ञस्तरन्तीति ज्ञानं व्यवच्छिद्यते "क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम्"इत्यादेः ॥ १७ ॥

प्रबुद्धो हि मायाशयनाद्बुद्ध इत्युच्यते मायातरणोपायवर्णनन्तु तस्यैव सम्भवतीति प्रबुद्ध एव मायातरणोपायमुवाच। ससाधनां गुरूपसत्त्यादिसाधनसहितां भक्तिं प्रेमलक्षणां तत्र तेषु साधनेषु मध्ये ॥ १८ ॥

चलैरित्यस्य व्याख्यानं द्विविधं तत्राऽनित्यैर्नश्वरैः अपायिभिः विश्लेषवद्भिः ॥ १९ ॥

एवं ऐहिकलोकवत् कर्मनिर्मितमिति हेतुगर्भं विशेषणं तथाच नश्वरत्वे प्रमाणं लोको भोगः वर्त्तमानसमये भोगसमये भयादिकमित्यादिना चिन्तादैन्यपरिग्रहः ॥ २० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्।

ऐश्वरीं श्रीभगवच्छरीरभूतां स्थूलधियः शरीरात्मबुद्धयः ॥१७॥
पाकविपर्यासं फलवैपरीत्यम् ॥ १८ ॥
कर्मफलवैपरीत्यमुक्त्वा वित्तस्यापि गृहादिसाधकस्य तदाह—वित्तेन साधितैः का प्रीतिरिति योजना चलैर्नश्वरैः एवं नश्वरम् "नश् अदर्शने" इति धातोः

"आविर्भावतिरोभावधर्मिकेष्वनपायि यत्।
आविर्भावतिरोभावजन्मनाशविकल्पवत्" ॥

इत्युक्तं धर्मिणः संस्थानधर्मवतो द्रव्यस्य आविस्तरो भावरूपं शास्त्रीयं सत्यत्वमेवोक्तम् ॥ १९-२० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

तन्निस्तारोपायमेवेत्यभिप्रेत्य पृच्छति निमिः—यथैतामिति। यथा येन प्रकारेण येनोपायेनेति यावत् अकृतात्मभिरजितेन्द्रियैर्दुस्तरां स्थूलधियो मादृशा अज्ञः सुखेन तरन्ति तदिदमुच्यतां यद्यपि "बुध आभजेत्तं भक्त्यैकयेशम्" इति तन्निस्तारोपायः पुरस्तादेवोक्तस्तथापि स्थूलधियां भगवति हठाद्भक्तिर्नोदेतीति कथाचित्

(१) अतुल्यातिशयध्वंसाद्यर्थेति विज० पा०।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

प्रणाड्यैव सम्पाद्या अतस्तत्प्रणाडीबुभुत्सयाऽत्र पुनः प्रश्न इत्यवगन्तव्यम् ॥ १७ ॥

इममभिप्रायमालक्ष्य लोकान् कर्मचितानित्यादि श्रुत्युक्तविधां प्रणाडीमाह, प्रबुद्धः—कर्माणीत्यादिना । तावन्निर्वेदं विधत्ते कर्माणीति त्रिभिः । मिथुनीभूय वर्त्तमानानां नृणां दुःखहत्यै दुःखापाकरणाय सुखाय च कर्माण्यारभमाणानामपि पाकविपर्यासं पश्येदनिष्टपरिहारायेष्टप्राप्तये चारब्धेभ्यः कर्मभ्यो दुःखप्राप्तिमेव पश्येदित्यर्थः ॥ १८ ॥

कर्मभिः साधिता अपि वित्तादयो न सुखहेतव इति च पश्येदित्याह-नित्यार्त्तिदेनेति । दुर्लभेनात एवात्मनः स्वस्य मृत्युरूपेण मरणान्तसाहसकर्मसम्पाद्यत्वादिति भावः । अत एव नित्यमार्त्तिदेन स्वसम्पादनार्थदुःखदेन वित्तेन चलैरनित्यैर्गृहापत्यादिभिश्च साधितैरपि का प्रीतिः स्यान्न किञ्चित्सुखमित्यर्थः ॥ १९ ॥

एवमिति यथास्मिन् लोके वित्तगृहादिजन्यं सुखमनित्यमन्ततो दुःखनिमित्तमेवं परं लोकं नश्वरं विद्यात्पारलौकिकमप्यनित्यं पश्येदित्यर्थः । तत्र हेतुत्वेन विशिनष्टि, कर्मणा निर्मितं सम्पादितं तथा च श्रुतिः “तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते”इति । किञ्च, विद्यमानदशायामपि दुःखात्मकं पश्येदित्याह-सतुल्यातिशयध्वंसम् इति । सह तुल्येनातिशयेन ध्वंसेन वर्त्तमानं तत्र सतुल्यत्वालोचनेनादराभावः सातिशयत्वालोचनेन तु निहीनता तत्प्रयुक्तमनौन्मुख्यं च ध्वंसालोचनेनत्वपरिहार्यं भयम् इत्यर्थः । यथा मण्डलवर्त्तिनां मण्डलेश्वराणां सुखं तद्वदिति ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

श्रुतमायाविभवो राजा मायाशब्दवाच्यबन्धकशक्तिजयोपायं पृच्छति-यथेति । ईश्वरस्येयमैश्वरी तां मायां बन्धकशक्तिमञ्जस्तरसा तरन्त्येनं जीवं न संसारयामीत्यनुग्रहोन्मुखीं कारयन्ति अन्यस्या अतितरां लङ्घनमेव कुर्वन्तीत्यर्थः ॥ १७ ॥

मायासन्तरणेच्छोः प्रथमसाधनं विरक्तिरिति ज्ञापयन् प्रबुद्धः प्रश्नं परिहर्तुमुपक्रमते—कर्माणीति । पाकविपर्यासो नाम कर्मफलवैपरीत्यं दुःखानिवृत्तिं सुखानवाप्तिश्च मिथुनीचारिणां स्त्रीपुंसाम् ॥ १८ ॥

वित्तादिसमृद्ध्या सुखोन्नतिः स्यादित्यत्राह-नित्येति ॥ १९ ॥

अनित्यफलत्वात्स्वर्गादयो हेया इत्याह-एवमिति । * अतुल्यातिशयैरैश्वर्यमादधःपातनात् मण्डलवर्त्तिनां युद्धरङ्गे वर्तमानानां यथा प्रध्वंसः ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

वयं तावत् शृण्वन् सुभद्राणीत्यादिना तदुपायं ज्ञातवन्त एव स्थूलधियः स्थूले कर्मण्यश्वमेधादावेव धीः प्रतीतिर्येषां ते यथा अञ्जस्तरन्तीत्यर्थः ॥ १७ ॥

अथ प्रथमतस्तेषां तत्र कर्मण्यनादरं जनयति—कर्माणीति त्रिभिः । तत्र दृष्टान्तो द्वाभ्यां दार्ष्टान्तिकमेकेनेति ॥ १८—२० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

यद्यपि “तन्मायया तो बुध आभजेत्तम्”इत्युक्तं भक्त्यैव मायां तरन्तीति राज्ञा निश्चितमेव तदपि तत्रत्यान् विद्वन्मानिनः कर्मिणो दृष्ट्वा पृच्छति—यथेति । अकृतात्मभिरिति, “युगपर्याप्तयोः कृतम्” इति “पर्याप्तिः परिपूर्णता” इत्यमरोक्तेरपूर्णत्वं मन्दत्वमतो मन्दधीभिर्दुस्तरामपि स्थूलधियः कर्मिप्रभृतयोऽञ्जः सुखेनैव यथा तरन्ति इदमुच्यतामिति शुनः पुच्छमालम्ब्य दुस्तरमपि समुद्रं सुखेन यथा तरन्ति तदुच्यतामिति कश्चित् कमपि यथा पृच्छति तथैव तत्रत्यान् कर्मिणः प्रति सकटाक्षभङ्गीकः प्रश्नोऽयं राज्ञो ज्ञेयः ॥ १७ ॥

कर्मिणो नैव मायां तरन्तीति साक्षादेव विवेकेन पश्येदित्याह-कर्माणीति त्रिभिः । पाकविपर्यासं फलविपर्ययम् ॥ १८ ॥

वित्तेन का प्रीतिर्न कापीत्यर्थः । तथैव तेन वित्तेनापि साधितैर्गृहादिभिश्च का प्रीतिर्यतश्चलैः ॥ १९ ॥

एवं लोकं परमिति तथा च श्रुतिः “तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते” इति किञ्च, भोगसमयेऽपि दुःखयुक्तं पश्येदित्याह, सतुल्यातिशयध्वंसं तुल्येनातिशयेन ध्वंसेन च सह वर्त्तमानं तत्र तुल्ये स्पर्द्धा अतिशये असूया ध्वंसे शोकः यथा मण्डलेश्वराणां मिथः स्पर्द्धादिदुःखम् ॥ ॥ २० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अथ भगवत्प्राप्तौ प्रतिबन्धकभूताया मायायाः प्रभावं श्रुत्वा राजर्षिस्तत्तरणोपायं पृच्छति—यथेति । ईश्वरस्य श्रीविष्णोः इयमैश्वरी ताम् अकृतात्मभिः अनात्मविद्भिः अञ्जः सुखेन स्थूलधियोऽपि स्थूले मायापरिणामे शरीरादौ धीर्येषां तेऽपि यथा तरन्ति तथेदं तरणोपायमुच्यताम् ॥ १७ ॥

“मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते” इति श्रीमुखोक्तं मायातरणोपायं भक्तियोगमाह-कर्माण्यारभमाणानामित्यादिद्वादशभिः । प्रथममस्मात्परस्माच्च कर्मचिताल्लोकान्निर्वेदं कुर्यादित्याह-त्रिभिः । स्त्रीभिर्मिथुनीभूय प्रवर्त्तमानानां पाकेषु कर्मफलेषु विपर्यासं वैपरीत्यं पश्येत् ॥ १८ ॥

दैवाद्यथासङ्कल्पं सिद्धेष्वपि वित्तादिरूपेषु कर्मफलेषु नाना दोषान्पश्येदित्याह-नित्यार्त्तिदेनेति ॥ १९ ॥

एवं परं लोकमपि नश्वरं विद्यात् नश्वरत्वे हेतुगर्भं विशेषणं कर्मनिर्मितमिति तथाच श्रुतिः “तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते” इति नश्वरत्वेऽपि बहुदोषयुक्तमित्याह, तुल्येन अतिशयेन ध्वंसेन च सह वर्त्तमानम् स्पर्द्धासूयाभयजनकमित्यर्थः । यथामण्डलेश्वराणामितरेतरं स्पर्द्धादि तद्वत् ॥ २० ॥

---

* मानुषेषु स्वापेक्षया तुल्यातिशयशून्यैः ।

तस्माद्गुरुं प्रपद्येत जिज्ञासुः श्रेय उत्तमम् ।
शाब्दे परे च निष्णातं ब्रह्मण्युपशमाश्रयम् ॥ २१ ॥
तत्र भागवतान्धर्मान् शिक्षेद्गुर्वात्मदैवतः ।
अमाययाऽनुवृत्त्या यैस्तुष्येदात्मात्मदो हरिः ॥ २२ ॥
सर्वतो मनसोऽसङ्गमादौ सङ्गं च साधुषु ।
दयां मैत्रीं प्रश्रयं च भूतेष्वद्धा यथोचितम् ॥ २३ ॥
शौचं तपस्तितिक्षां च मौनं स्वाध्यायमार्जवम् ।
ब्रह्मचर्यमहिंसां च समत्वं द्वन्द्वसञ्ज्ञयोः ॥ २४ ॥

भाषा टीका ।

राजो उवाच ।

राजा निमि बोले, कि—हे महर्षे ! अब आप कृपा कर कहैं कि—जिन्होंने मन वश नहीं किया है ऐसे लोगों से दुस्तर इस ईश्वर की माया को जैसे स्थूलबुद्धि वाले भी अनायास तर जावैं सो आप कथन करैं ॥ १७ ॥

प्रबुद्ध उवाच ।

प्रबुद्ध नामक योगेश्वर बोले, कि—माया को तरने वाला पुरुष, दुःखनिवृत्ति और सुखकी प्राप्ति करने के लिये कर्मों के आरम्भ करने वाले तथा स्त्री पुरुष रूप मिथुन भाव को प्राप्त होकर प्रवृत्त होने वाले मनुष्यों के कर्मों के फलों के विपरीतपने को देखै, कि—कर्मों से दुःख की निवृत्ति या सुख की प्राप्ति होती है, कि नहीं ॥ १८ ॥

हे राजन् ! नित्य ही दुःखदायी आत्मा का नाश करने वाला तिस पर भी दुर्लभ इस प्रकार के इस द्रव्य से क्या प्रयोजन है, इसी तरह गृह अपत्य आप्त पशु इत्यादि चल पदार्थों के साधन करने से आत्मा को क्या प्रीति होती है ? कुछ भी नहीं इस प्रकार का तो यह लौकिक वैभव है, ॥ १९ ॥

अब इसी प्रकार परलोक के वैभव को कर्म निर्मित होने से नश्वर (नाशवान) जानैं, और जैसे यहां खंडमंडलेश्वर राजाओं के लोकों में बराबरपन अधिकपन और अनित्यता लगी है इसी प्रकार लोकांतरों में स्पर्धादि का दुःख है कहीं भी अनपायी सुख नहीं है ॥ २० ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

उत्तमं श्रेयो ज्ञातुमिच्छुः शाब्दे ब्रह्मणि वेदाख्ये न्यायतो निष्णातं तत्त्वज्ञम अन्यथा संशयनिरासकत्वायोगात् परे च ब्रह्मण्यपरोक्षानुभवेन निष्णातमन्यथा बोधसञ्चारायोगात् परब्रह्मनिष्णातं तत्त्वद्योतकमाह—उपशमाश्रयमिति ॥ २१ ॥

गुरुरेवाऽऽत्मा दैवतं च यस्य सः अनुवृत्त्या सेवया यैर्धर्मैः वस्तुत आत्मा आत्मप्रदश्चोपासकानां यथा बलिप्रभृतीनाम् ॥ २२ ॥

यथोचितमिति हीनेषु दयां समेषु मैत्रीमुत्तमेषु प्रश्रयं च शिक्षेदित्यर्थः ॥ २३ ॥

शौचं बाह्यं मृज्जलादिभिः आभ्यन्तरं चादम्भमानादि शिक्षेत तपः स्वधर्माचरणम तितिक्षां क्षमाम मौनं वृथावाचामनुच्चारणम, स्वाध्यायमधिकारानुरूपं वेदपाठादिकम आर्जवं स्वच्छतां ब्रह्मचर्यं यस्य यादृगुचितमृतुकाले स्वदारनियमादि अहिंसां भूतेष्वद्रोहम् द्वन्द्वसञ्ज्ञयोः शीतोष्णसुखदुःखादिरूपयोः समत्वं हर्षविषादराहित्यम ॥ २४ ॥

———

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

तस्माद्विषयभोगस्याऽसारत्वात्ततो विरज्य गुरुं प्रपद्येतेति वैराग्यद्वारा गुरूपसत्तिः प्रोक्ता न्यायतो विचारतः तत्त्वज्ञ याथार्थ्यतो वेत्तारम् अन्यथा शब्दब्रह्मणि निष्णातत्वाभावे पुनरन्यथा परब्रह्मणि निष्णातत्वाभावे सम्बोधसञ्चारः शिष्ये उपदिष्टज्ञानसङ्क्रमणं शब्दब्रह्मणि निष्णातत्वद्योतकं व्याख्यानोपपत्त्यादिना संशयखण्डनमेव ॥ २१ ॥

तत्रेत्यष्टकं बहुवाक्यैकवाक्यत्वान्मध्येऽङ्का बोद्धव्याः तत्र गुरूपसत्तौ सत्यां गुरोः सकाशात् अमायया निष्कपटया ॥ २२ ॥

तत्रादौ श्रद्धाहेतुभूतान् साक्षाद्भागवतधर्मानाह—सर्वत इति । चतुर्भिः । भूतेष्वित्यस्य विशिष्यव्याख्यानादित्यर्थ इत्युक्तम् ॥२३॥

अदम्भमानादिभिः दम्भमानाद्यभावैः बस्य गृहस्थादेः ॥ २४ ॥

———

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

एतत् षट् एतन्मनुष्यरूपादीनां पुनरनुदयात् वैराग्यं विवक्षितम, एवं वैराग्यमुपदिश्य निगमयति । यस्मात् एवं तस्मात् गुरुं प्रपद्येतेति विधिः अयं च जन्मकालजातश्रीभगवत्कटाक्षात्मकहेतुनिष्पन्नवैराग्यद्वाराचार्यसम्बन्धात्मकाप्राप्तार्थविधाय इति उत्तमं श्रेयः भक्तिरूपं प्रपत्तिरूपं वा ज्ञानं ज्ञानहेतुमाह—शाब्दे ब्रह्मणि वेदे ज्ञानेन परे च योगेन निष्णातमिति ॥ २१ ॥

गुर्वात्मदैवत इति पञ्चमोपायस्यात्यन्तहितत्वमभिप्रैति,, आत्मद इति । ज्ञानिनामात्मत्वेन तेषामात्मानं वशीकारयतीति यैस्तुष्येदिति उक्ताद्यान्तरान् धर्मानाह—सर्वत इति । बाह्यानाह—शौचमिति । नामपुण्ड्रमन्त्रतापयागरूपपञ्चसंस्काराः शौचम्

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

आचाररूपा वृत्तिरित्युक्तम् भारद्वाजेन, ताप इति तापः शङ्खचक्राङ्कः मौनमात्मविचारः स्वाध्यायो मन्त्ररत्नानुसन्धानम् आर्जवं देवतान्तरपरित्यागेऽपि तदनिन्दनम् ब्रह्मचर्य्यं ब्रह्मविचारः अहिंसा चाशास्त्रीयहिंसान्तरवर्जनम्, शास्त्रीयकर्माद्याचरणोऽवर्जनीयद्वन्द्वसहनम् ॥ २२—२४ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

तस्मादिति । तस्मादैहलौकिकपारलौकिकसुखयोरेवंविधत्वात्तत्र सञ्जातनिर्वेदः उत्तमं श्रेयः तत्साधनं च ज्ञातुम् इच्छुर्गुरुं प्रपद्येत अभिगच्छेत् कथम्भूतम् ? शाब्दे परे च ब्रह्मणि निष्णातमागमयोगजन्यज्ञानवन्तमित्यर्थः। "भिन्ननावाश्रितः स्तब्धो यथा पारं न गच्छति। ज्ञानहीनं गुरुं प्राप्य कुतो मोक्षमवाप्नुयात्" इति भावः उभयनिष्ठत्वसूचकेन लिङ्गेन विशिनष्टि, उपशमाश्रयमिति । उपशमो रागद्वेषाद्यभावः तस्याश्रयमनेन 'श्रोत्रियं ब्रह्मनिष्ठम्" इति श्रौतं पदद्वयं व्याख्यातम् ॥ २१ ॥

तत्रेति । तत्र गुरुसन्निधौ गुरुरेवात्मनः स्वस्य दैवतं यस्य सः अमायया निष्कपटयाऽनुवृत्त्या आचार्यसेवया भागवतधर्मान् शिक्षेदभ्यसेदित्यर्थः । तान्विशिनष्टि—यैर्धर्मैरात्मा सर्वान्तरात्माऽऽत्मदः आत्मपर्यन्तप्रदाता हरिस्तुष्येत् ॥ २२ ॥

के ते धर्मा इत्यतस्तानाह—सर्वत इत्यादिना । आदौ तावत्सर्वतः सर्वत्र देहतदनुबन्धिषु च मनसोऽसङ्गमनासक्तिं द्वितीयान्तानाम्, इति भागवतान् धर्मान् शिक्षन्, इत्युपरिष्टात्सम्बन्धः । भूतेषु यथोचितं दयां मैत्रीं प्रश्रयं च तत्र दीनेषु दयां समेषु मैत्रीम् उत्तमेषु प्रश्रयं विनयं चेति योज्यम् ॥ २३ ॥

शौचं द्विविधं तत्र मृज्जलादिभिर्बाह्यमान्तरं विष्णुचिन्तनं तपः स्ववर्णाश्रमोचितधर्मानुष्ठानमनशनादिरूपं वा तितिक्षां द्वन्द्वसहिष्णुतां स्वाध्यायमध्ययनमार्जवं मनोवाक्कायानामैक्यरूप्यं ब्रह्मचर्यमृतिवितरकालेषु स्त्रीसङ्गराहित्यम् अहिंसां भूतद्रोहराहित्यं द्वन्द्वसञ्ज्ञयोः शीतोष्णसुखदुःखादिषु समत्वमविकृतस्वभावत्वम् ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

इहामुत्र विरक्तेन पुरुषेण किं कार्यमत्राह—तस्मादिति ॥ २१ ॥

गुरुकुले किमनुष्ठेयमत्राह—तत्रेति । गुरुश्च आत्मा च दैवतं यस्य स तथा आत्मा विष्णुः मिथुनीचारिणामित्यनेनाऽमिथुनानामेव श्रेयो मोक्षो न मिथुनानामित्याक्षेपः—

"देवाः सजाया मुच्यन्ते मानुषा उभयात्मकाः ।
विजया एव योगेशास्तेषां यथैव योग्यता ॥
तथा तथैव मुच्यन्ते नान्यथा तु कथञ्चन" ॥

इति वचनेन परिहृत इति हरिगुरुप्रसादसाधनमाह—अमाययेति ॥ २२ ॥

भागवतान्धर्मानाह—सर्वत इति । शिक्षेदित्यनुवर्तते साधव एकविधा उत बहुविधाः एषु सङ्गः कर्त्तव्यः इति विधीयते इति अस्यानेकविधा इत्युत्तरं तर्हि कतिविधा इत्यस्य त्रिविधा इति तत्रापि विशेषो बहुलः स एव ग्रन्थान्तरे विस्तृतः—

"सन्तस्तु त्रिविधाः प्रोक्ता उत्तमाधममध्यमाः ।
उत्तमा देवतास्तत्र ऋष्याद्या मध्यमा मताः ॥
अधमा मानुषोत्कृष्टास्ते चापि त्रिविधा मताः ।
तत्राधमेषु येषां तु सङ्गो विघ्नाय वै भवेत् ॥
येषामुत्तमसङ्गः स्यात्तेषां सङ्गं परित्यजेत् ।
आदौ च तेषामपि च सङ्ग उत्तमसङ्गतेः ॥
साधनत्वान्न तु त्याज्यो यदि त्यक्तुं न शक्यते ।
तदा तेऽपि तथा नेया यथा विघ्नो न वै भवेत् ॥
तदुच्चसङ्गतेः क्वापि तदा दोषो न जायते ।
प्रयोजनाय तेषां तु सङ्गः सर्वात्मनेष्यते ॥
सर्वथा चैव देवेषु सङ्गो मुनिगणेषु च ।
भाव्यो हितं विना नैव पुरुषार्थः क्वचिद्भवेत् ॥
विशेषतः स्वोत्तमेषु विना सङ्गं न मुच्यते ।
स्वनीचेषु तु देवेषु विना सङ्गं न पूर्यते ॥
तस्मात्सत्सूत्तमेष्वेषु सङ्गः कार्यो विशेषतः ।
अनाद्यनन्तकालेषु न च हाप्यः कथञ्चन ।
सतां तदुत्तमशेषे किमु विष्णौ परायणे" ॥

इति । किञ्च, ज्ञानोत्पत्तावन्तरङ्गं सत्सेवैव यामन्तरेण विवक्षितार्थज्ञानसिद्धिर्न स्यात् अतो दुर्बलेनापि सा कार्या तदुक्तम्—

"बह्वपेक्षो हि जिज्ञासुरतो देहादिवृत्तये ।
किञ्चित्सत्स्वपि सङ्गी स्यादशक्ये सति वर्तते ॥
कृतकृत्यस्त्यजेत्सङ्गं सदा गुरुसुरादिषु ।
सङ्गी स्यान्नहि तत्सङ्गं विना स सुखभाग्भवेत् ॥
तस्मादनाद्यनन्तैव भक्तिर्गुरुसुरादिषु ।
अन्यत्र कृत्यापेक्षा स्यादिति सङ्गविनिर्णयः" ॥

इति ॥ २३—२४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

ततः एवमेव कुर्वीतेत्याह—तस्मादित्यादिना ॥ २१ ॥

तत्र भागवतानित्यष्टकम् आत्मा सर्वमूलस्वरूपत्वादसमोर्द्ध्वानन्दरूपः "आनन्दाद्धीमानि भूतानि जायन्ते" इति श्रुतेः । तस्यापि दाता भक्तसात्कर्त्ता काम्यकर्माधिकारविषयमिदं प्रकरणम् इत्यापाततोऽश्रद्धामाशङ्क्य श्रद्धाद्वारभूतानाह, सर्वत इत्यादिना । ततः श्रद्धान्तःकरणतया जातश्रद्धांस्तान् प्रति साक्षाद्भक्तिरूपानाह, श्रवणमित्यादिना । तत्र श्रवणमित्यादियुग्मकम् । ननु, पूर्वं यद्यज्ञादि कर्म कृतं यच्च दारादिकं द्रव्यं सञ्चितं तत्तत्किं कर्त्तव्यं तत्राह, इष्टमिति । एवं पूर्वरीत्यावस्थायां स्थावरजङ्गमयोः परिचर्यां तत उत्कर्षेण नृषु ततः साधुषु ततः श्रीभागवतमात्रेषु यथार्हं शिक्षेत् कृष्ण एवात्मा नाथः परमप्रेमास्पदं येषां तेषु श्रीभागवतविशेषेषु तु सौहृदं शिक्षेत् तत्तद्विशेषानुसन्धानेन कर्मणा मनस्यानयेदित्यर्थः ॥ २२—३० ॥

सर्वत्राऽऽत्मेश्वरान्वीक्षां[१] कैवल्यमनिकेतताम् ।
विविक्तचीरवसनं सन्तोषं येन केनचित् ॥ २५ ॥
श्रद्धां भागवते शास्त्रेऽनिन्दामन्यत्र चापि हि ।
[२]मनोवाक्कर्मदण्डं च सत्यं शमदमावपि ॥ २६ ॥
श्रवणं कीर्त्तनं ध्यानं हरेरद्भुतकर्मणः ।
जन्मकर्मगुणानां च तदर्थेऽखिलचेष्टितम् ॥ २७ ॥
इष्टं दत्तं*तपो जप्तं वृत्तं[३] यच्चाऽऽत्मनः प्रियम् ।
दारान्सुतान् गृहान् प्राणान्[४] *यत्परस्मै निवेदनम् ॥ २८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अतः पूर्वप्रोक्ता भक्तिरेव संसारतारिणी सैव विवियते शृणिव-त्याह–तस्मादिति । शाब्दे ब्रह्मणि वेदे वेदतात्पर्यज्ञापके शास्त्रान्तरे च निष्णातं निपुणम् अन्यथा शिष्यस्य संशयच्छेदाभावे वैमनस्ये च सति कस्यचित् श्रद्धाशैथिल्यमपि सम्भवेत, परे ब्रह्मणि च निष्णातम् अपरोक्षानुभवसमर्थम् अन्यथा तत्कृपा सम्यक् फल-वती न स्यात् परब्रह्मनिष्णातत्वद्योतकमाह, उपसमाश्रयं क्रोध-लोभाद्यवशीभूतम् ॥ २१ ॥

तुष्येदित्यस्य द्योतकमाह–आत्माऽऽत्मदः आत्मनः स्वस्य आत्मानं श्रीविग्रहं ददाति द्रष्टुं स्प्रष्टुं साक्षात् परिचर्तुं चेति भावः ॥ २२ ॥

यथोचितमिति हीनेषु दयां समेषु मैत्रीम् उत्तमेषु विनयं शिक्षे-दित्यर्थः ॥ २३ ॥

शौचं बाह्यं मृज्जलादिभिः आभ्यन्तरं चादम्भमानादिभिः शिक्षेत् तपः कामक्रोधादिवेगधारणं तितिक्षां क्षमां मौनं वृथा-वागप्रयोगः स्वाध्यायं भक्तिविधायकश्रीगोपालतापन्यादिपाठम् आर्जवं सारल्यं ब्रह्मचर्यं स्त्रीसङ्गत्यागम् अहिंसामद्रोहं द्वन्द्वसञ्ज्ञयो-र्मानावमानाद्योः समत्वं हर्षविषादराहित्यम् ॥ २४ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एवमिहामुत्र निर्विण्णः किंकुर्यादित्याकाङ्क्षायामाह–तस्मादिति । तस्माल्लोकद्वयस्य हेयत्वादुपादेयतया उत्तमं श्रेयः ज्ञातुमिच्छुः शब्दे वेदाख्ये परे तद्वेद्ये च ब्रह्मणि निष्णातम् अत एव उपशमः आश्रयो यस्य तं गुरुं प्रपद्येत तथा च श्रुतिः"स गुरु-मेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्" इति ॥ २१ ॥

तत्र गुरुसन्निधौ गुरुरेवात्मा दैवतं च यस्य सः अमायया ऽनुवृत्त्या दम्भवर्जितया सेवया यैरात्मप्रदः भगवद्भावाप्तिलक्षण-मोक्षप्रदः हरिः संसारक्लेशहरस्तुष्येत्तान् भागवतान् धर्मान् ॥२२॥

भागवतान्धर्मानाह—सर्वत इत्यादिना । सर्वतः सर्वत्र इहा-मुत्र मनसोऽसङ्गं शिक्षेत यथोचितमिति कनिष्ठेषु दयां तुल्येषु मैत्रीं श्रेष्ठेषु प्रश्रयं च शिक्षेदित्यर्थः । स्वाध्यायं यथाधिकारं वेद-पाठादिकम् द्वन्द्वसञ्ज्ञयोः मानापमानादिरूपयोः समत्वं हर्षशो-कादिराहित्यम् ॥ २३—२४ ॥

भाषा टीका ।

तस्मात् उत्तम श्रेय के जानने की इच्छा वाला शब्दब्रह्म और परब्रह्म में निष्णात समाहितचित्त शांत गुरु अर्थात् सदाचार्य के शरण जावै ॥ २१ ॥

वहां गुरु के समीप रहकर गुरु को अपना परम पूज्य देवता समुझ कर उनकी निष्कपट अनुवृत्ति (सेवा) करके भागवत धर्मों को सीखे, जिन भागवत धर्मों से आप अपन को देने वाले श्रीहरि संतुष्ट होते हैं ॥ २२ ॥

आचार्य संनिधि में निवास कर क्या सीखे, कि—आदिमें तो सर्वत्र से मन को असङ्गी बनाकर साधुजनों में संग करावै, तथा प्राणियों में यथोचित हीन लोगों में दया सम लोगों में मैत्री तथा उत्तम लोगों में प्रश्रय (नम्रता) सीखे ॥ २३ ॥

और क्या सीखे, कि—मृत्तिका जल आदि से बाह्य शरीर की शुद्धि, भीतर की शुद्धि निर्दंभ निर्मान मत्सरादि-पना, इस प्रकार शौच तप तितिक्षा मौन स्वाध्याय आर्जव ब्रह्मचर्य अहिंसा तथा सुख दुःखादि द्वन्द्वों में सम रहना सीखे ॥ २४ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

आत्मेश्वरान्वीक्षां सच्चिद्रूपेणात्मान्वीक्षां नियन्तृरूपेणेश्व-रान्वीक्षां च कैवल्यमेकान्तशीलत्वम् अनिकेततां गृहाद्यभिमान-राहित्यम् विविक्तचीरवसनं विजनपतितानां वस्त्रखण्डानां शुद्धानां वा वल्कलानां परिधानम् ॥ २५ ॥

भागवते भगवत्प्रतिपादके अन्यत्र शास्त्रादौ वा अनिन्दा ताम् मनसः प्राणायामैर्वाचो मौनेन, कर्मणोऽनीहया, दण्डम् सत्यं यथार्थभाषणम्, शमदमावन्तःकरणबाह्येन्द्रियनिग्रहौ ॥२६॥

हरेर्जन्मकर्मगुणानां श्रवणादि तदर्थे हर्युद्देशेन सर्वं कर्म विशेष-तश्च यजनादियत्तदर्थे शिक्षेत् ॥ २७ ॥

इष्टं दत्तमित्यादयो भावे निष्ठाः वृत्तं सदाचारः आत्मनः प्रियं गन्धपुष्पादि दारादीनप्यालक्ष्य परस्मै परमेश्वराय निवे-दनं तत्सेवकतया समर्पणं यत्तच्छिक्षेत् ॥ २८ ॥

(१) कैवल्यमनिकेतनम् । (२) मनोवाक्कायदण्डं च । (३) पूर्त्तम् (४)। परस्मै तन्निवेदयेदिति विज० पा० ।
* तपः पूर्त्तम् । * परस्मै तन्निवेदनमिति वीर० पा० ।

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी ।

सच्चिद्रूपेणेति "अस्ति भाति प्रियं रूपं नामचेत्यर्थपञ्चकम् । आद्यं त्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम्" इत्युक्तेः घटोऽस्ति पटोऽनुभूयत इति सत्तानुभूतिरूपेणात्मेक्षां ब्रह्मविचारं शिक्षेत नियन्तृरूपेण तु ईश्वरस्यान्तर्यामिणोऽन्वीक्षां विचारं शिक्षेदित्यर्थः । विविक्तपदस्य एकान्तशुद्धार्थद्वयवाचकत्वात् विजनपतितानामित्यादिव्याख्यातं वाससामित्यत्र वस्त्रखण्डानामित्येव पाठः । चीरशब्दस्य तत्रैव शक्तेः वल्कलानामिति तु लक्षणया व्याख्यातम् ॥ २५ ॥

अन्यत्र शिवादिप्रतिपादकशास्त्रादौ आदिना तदन्यदेवतादिपरिग्रहः तदुक्तं "विष्णुरेव सदाराध्यः सर्वदेवेश्वरः पुमान् । इतरे ब्रह्मरुद्राद्याः नावज्ञेयाः कथञ्चन" इति कर्मणः कायिकव्यापारस्यानीहयाऽकामेन दण्डं तदुक्तमभिज्ञैः "नाऽकामस्य क्रिया काचिद्दृश्यते नेह कर्हिचित् । यद्यद्धि कुरुते जन्तुस्तत्तत् कामस्य चेष्टितम्" इति ॥ २६ ॥

जातश्रद्धानां साक्षाद्भक्तिरूपान् धर्मानाह—श्रवणमित्यादिचतुर्भिः । तत्रापि श्रवणमिति युग्मकम् इष्टादिकं तदर्थं शिक्षेत आत्मनः प्रियं गन्धादि तथा दारादीनप्यालक्ष्य परस्मै यन्निवेदनं तच्छिक्षेदित्यन्वयः ॥ २७—२८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

सर्वत्र भगवन्नियम्यत्वाऽन्वीक्षणम् ॥ २५ ॥

मनोवाक्कर्मदण्डं त्रिदण्डधारणम् आन्तरं बहिश्चेति ॥ २६ ॥

तदर्थेऽखिलचेष्टितम् इत्यनेन सङ्गकर्तृत्वफलानां श्रीभगवति समर्पणम् ॥ २७ ॥

उक्तसर्ववृत्तिनिदानम् श्रीभगवत्यात्माऽऽत्मीयभरन्यासरूपम् अङ्गिनमाह—इष्टमिति । प्राणानिति प्राणादिविशिष्टस्यात्मनः परस्मै परवासुदेवायेति विषयो दर्शितः एवमात्मनः आत्मीयस्य च भरन्यास एवाऽऽत्मनिक्षेपः प्रपत्तिन्यास इति पर्यायैरुक्तः ॥ २८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सर्वत्रैकात्मतान्वीक्षां चेतनेष्वचेतनेषु च परमात्मा एक एवेतीक्षणम् आत्मेश्वरान्वीक्षाम् इति पाठे सर्वत्राचित्परिणामरूपेषु देवमनुष्यादिशरीरेष्वात्मनां जीवानां तेषाम् ईश्वरस्य चान्वीक्षणं ज्ञानैकाकारतया जीवान्वीक्षणं तदन्तःप्रविश्य नियन्तृतया ईश्वरान्वीक्षणमित्यर्थः । कैवल्यमपरिग्रहत्वम् अनिकेततां गृहाद्यभिमानराहित्यं विविक्तचीरवसनं विशुद्धानां चीराणां वल्कलानां वसनं परिधानं येन केनचिद्दैवाल्लब्धेनाऽन्नादिना सन्तोषञ्च ॥ २५ ॥

भागवते भगवत्प्रतिपादके शास्त्रे श्रद्धामादरातिशयमन्यत्र देवतान्तरविषयकेऽनिन्दां निन्दावर्जनं मन आदीनां दण्डं तत्र मनसः प्राणायामैः वाचो मौनेनाऽनृतापरिभाषणेन कर्मणोऽनीहया दण्डं कायेति पाठे कायस्य कृच्छ्रोपवासादिभिः सत्यं भूतहितत्वं शमोऽन्तःकरणनिग्रहः दमो बाह्येन्द्रियनिग्रहः ॥ २६ ॥

अद्भुतं कर्म चेष्टितं यस्य तस्य हरेः जन्मादीनां श्रवणं कीर्त्तनं ध्यानं च तदर्थे भगवदर्थमखिलचेष्टितं तत्कायेन वाचेत्यादिना पुरस्तादेव दर्शितम् ॥ २७ ॥

इष्टादीनाऽऽलक्ष्य परमपुरुषाय तन्निवेदनं तेषां इष्टादीनां निवेदनं समर्पणं तत्रेष्टं यागः दत्तं दानं तपः स्ववर्णाश्रमोचितधर्मानुष्ठानं पूर्त्तं वापीकूपादिकं वृत्तं स्मार्त्तं कर्म यच्चात्मनः प्रियं तदपि ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सर्वत्र देशकालादिष्वात्मनः स्वामिन ईश्वरस्याऽन्वीक्षां माहात्म्यानुकूलनिरीक्षणं कैवल्यमेकान्तित्वं प्रकृतिप्राकृतादिभिरराहित्यं च चीरवसनं वल्कलं सन्तोषमलंबुद्धिम् ॥ २५ ॥

भागवतशास्त्रे वेदादितन्त्रे तदुक्तम्—

"श्रद्धां भागवते तन्त्रे वेदे भारतपञ्चमे ।
विष्णोरव्यवधानेन वक्तृत्वात्सर्वथा भवेत्" ॥

इति । अन्यत्र कलाविद्यासु ज्योतिःशास्त्रेषु अनिन्दां निन्दाराहित्यं यतीनामिति शेषः तदुक्तम्—

"कलाविद्यास्वनिन्दा च व्यवधानेन केशवे ।
प्रवेशाद्यतिभिः कार्या ह्यन्यथा निरयं व्रजेत्" ॥

इत्यादिना । श्रद्धातीति श्रद्धा सर्वसाधारणचेतनधर्मो गुणः श्रद्धाऽऽस्तिक्यबुद्धिः सा द्विविधा अत्रोक्तमस्तीत्येका ममात्र प्रयोजनमस्तीत्यन्या तत्र प्रथमा यतेरपि कलासु कार्या न द्वितीया प्रयोजनाभावात् उभयञ्च पञ्चरात्रादिभगवच्छास्त्रेषु कार्यं तद्विरोधिषु शास्त्रेषु सर्वैरविशेषेण सदा निन्दा कार्या तदभावेतम एव परायणम् अतः सुरा एव तन्निन्दनं कुर्वन्ति सदाऽभिज्ञातत्तात्पर्यार्थत्वात् तदुक्तं "श्रद्धात्वास्तिक्यबुद्धिः स्यात्" इत्यादि "प्रतिपाद्यं नचापरम्" इत्यन्तेन ।किञ्च, भगवच्छास्त्रविरोधिशास्त्राभ्यासेन अन्धं तमोऽपि श्रूयते "अन्धन्तमः प्रविशन्ति" इति श्रुतौ न केवलं यतेः कलाभ्यः प्रयोजनाभावः किन्त्वाल्पज्ञस्य गृहिणोऽपीतीममर्थं हिशब्देन ध्वनयति "गृहिणोऽप्यल्पबोधस्य" इति वाक्यात् ॥ २६ ॥

हरेर्जन्मादीनां श्रवणं तदर्थं श्रवणार्थं अखिलचेष्टितम् अखिलव्यापारः तदर्थं भक्तिजननार्थं हरेरखिलचेष्टितमिति वा ॥ २७ ॥

यदात्मनः प्रियं यद्देहादिकञ्च तत्सर्वं परस्मै परमात्मने निवेदयेत् ॥ २८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

आत्मेश्वरस्य क्षेत्रज्ञस्य अन्वीक्षामीक्षणाभ्यासं कैवल्यमेकान्तचारित्वम् अनिकेततां गृहाद्यभिमानराहित्यं विविक्तानां शुद्धानां चीरवल्कलादीनां वसनं परिधानम् ॥ २५ ॥

अन्यत्र शास्त्रादौ या अनिन्दा तां मनोवाक्कायदण्डं मानसवाचिककायिकविकर्मराहित्यं सत्यं यथार्थभाषणं शमदमौ अन्तःकरणबाह्येन्द्रियनिग्रहौ ॥ २६ ॥

एवं कृष्णात्मनाथेषु मनुष्येषु च सौहृदम् ।
परिचर्यां चोभयत्र महत्सु नृषु साधुषु ॥ २९ ॥
परस्परानुकथनं पावनं भगवद्यशः ।
मिथो रतिर्मिथस्तुष्टिर्निवृत्तिर्मिथ आत्मनः ॥ ३० ॥
स्मरन्तः स्मारयन्तश्च मिथोऽघौघहरं हरिम् ।
(१)भक्त्या सञ्जातया भक्त्या बिभ्रत्युत्पुलकां तनुम् ॥ ३१ ॥
क्वचिद्रुदन्त्यच्युतचिन्तया क्वचिद्धसन्ति नन्दन्ति वदन्त्यलौकिकाः ।
नृत्यन्ति गायन्त्यनुशीलयन्त्यजं भवन्ति तूष्णीं परमेत्य निर्वृताः ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

हरेर्जन्मकर्मगुणानां चकारान्नाम्नां तदर्थं तत्परिचर्य्यार्थमेव आत्मचेष्टितम् दन्तधावनादिराह्निकः सर्व एव व्यापारः ॥ २७ ॥

इष्टं विष्णुसम्प्रदानको यागः दत्तं विष्णुवैष्णवसम्प्रदानकं दानं तप एकादश्यादिकव्रतं जप्तं विष्णुमन्त्रजपः वृत्तं सदाचारः (इष्टादिकं) यच्च आत्मनः स्वस्य प्रियं वस्तु तस्य परस्मै परमेश्वराय निवेदनं तच्च निवेदनं दारानिति दारादीन् यत् व्याप्नुयत् इत्थः शब्दस्य रूपं दारादीनां तत्सेवार्थमेव विनियोजनं यत् तच्छिक्षेदित्यर्थः ॥ २८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

आत्मेश्वरयोर्जीवपरमेश्वरयोर्नियम्यनियन्त्रोः अन्वीक्षाम् अन्वीक्षणं कैवल्यमेकान्तित्वं विविक्तचीरवसनं विविक्तानां शुद्धानां वस्त्रखण्डानां वल्कलानां वा परिधानम् ॥ २५ ॥

अन्यत्राऽभागवते अनिन्दां मनोवाक्कायदण्डं मनसः प्राणायामेन वाचो मौनेन कायस्य अनीहया ॥ २६ ॥

हरेर्जन्मादीनां श्रवणादिकं शिक्षेत् तदर्थं इयर्थं अखिलचेष्टितं सर्वेषां मनोवाक्कायानां चेष्टितं च शिक्षेत ॥ २७ ॥

इष्टमित्यादयः भावे निष्ठा वृत्तं सदाचारः आत्मनः प्रियं गन्धरसादि दारादीनप्याऽऽलक्ष्य परस्मै भगवते निवेदनं यत्तत् शिक्षेत ॥ २८ ॥

भाषा टीका ।

सर्वत्र चेतना चेतन मात्र वस्तुओं के विषें अपने ईश्वर की दृष्टि करै, कि जो कुछ देखने सुनने में आता है उसके भीतर बाहर नारायण ही व्याप्त होकर स्थित हैं, एवं एकान्त शील होकर रहै, और गृहादिकों में अभिमान रहित होय, गिरे परे चीर या शुद्ध वल्कलों को पहिने, और जो कुछ प्राप्त होजावै उसी से संतोष करै ॥ २५ ॥

तथा भगवत्शास्त्र में श्रद्धा रखै, अन्य शास्त्र की निन्दा भी न करै, मन वाणी और कर्मों का प्राणायाम मौन और अनीहा से दंड रखे, यथार्थ भाषण करै, अन्तःकरण और बाह्य इन्द्रियों का निग्रह करै ॥ २६ ॥

अद्भुत कर्मा श्रीहरि के जन्म कर्म गुणों का श्रवण कीर्त्तन ध्यान करै, और अपने शरीर की समग्र चेष्टा श्रीहरि के निमित्त ही करै, ॥ २७ ॥

इष्ट दत्त तप जप वृत्त और भी जो गन्ध पुष्पादिक आपको प्रिय होय तिनको, एवं स्त्री पुत्र गृह प्राण और अन्य समस्त परिकर को परमात्मा के समर्पण करै, अर्थात् उन सबों में मदीयत्व बुद्धि को छोडकर भगदीयत्व बुद्धि करै और उनसबों को वैष्णव चिन्हों से भूषित करै॥ २८।

श्रीधरस्वामिकृतभावार्थदीपिका ।

कृष्ण एवाऽऽत्मा नाथश्च येषां कृष्णश्च आत्मनो जीवस्य नाथो येषामिति वा तेषु उभयत्र स्थावरे जङ्गमे च या परिचर्या ताम् विशेषतो नृषु तत्रापि साधुषु स्वधर्मशीलेषु ततोऽपि महत्सु श्रीभागवतेषु ॥ २९ ॥

तैश्च सह सङ्गम्य यत्पावनं भगवद्यशस्तस्य परस्परानुकथनं शिक्षेत । यद्वा, यशः प्रति तत्र संस्पर्धादिपरित्यागेन मिथो या रतिः रमणं या च तुष्टिः सुखं या च निवृत्तिः समस्त-दुःखनिवृत्तिस्तां च शिक्षेत् ॥ ३० ॥

एवं वर्त्तमानानां परमानन्दप्राप्तिमाह-स्मरन्त इति द्वयेन । भक्त्या साधनभक्त्या सञ्जातया प्रेमलक्षणया भक्त्या ॥ ३१ ॥

अजं हरिमनुशीलयन्ति तल्लीलामभिनयन्ति एवं परमेत्य प्राप्य निर्वृताः सन्तस्तूष्णीं भवन्ति ॥ ३२ ॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

देहनाथास्त्वन्येऽपि प्रतीयन्ते जीवतत्त्वस्य नाथस्तु कृष्ण एवेति द्वितीयपक्षाभिप्रायः एवं पूर्वरीत्या तथाभूतेषु मनुष्येषु भक्तेषु सौहृदं प्रीतिश्च शिक्षेत् तत्रापि नृष्वपि मध्ये तत्रापि स्वधर्मशीलेष्वपि महत् कृष्णात्मनाथयोश्च यथासङ्ख्यं साधन-साध्यभक्तिमत्त्वेन विशेषो ज्ञेयोऽन्यथा पौनरुक्त्यापत्तेः ॥२९॥

---

(१) भक्ता इति विजयध्वजपाठः ।

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी ।

तैः भागवतैः श्रवणादिनिरतैः भगवत्सम्बन्धमन्तरा मिथो रत्यादेर्भक्तित्वाऽसम्भवात् यत्तच्छब्दयोरध्याहारगौरवाच्च यद्वेति ॥ ३० ॥

एवं साधनभक्त्यनुष्ठानप्रकारेण परमानन्दस्वरूपस्य प्रेम्णः प्राप्तिम् ॥ ३१ ॥

क्वचित् स्फुर्त्तिभङ्गे अच्युतस्य चिन्तया कदा मिलिष्यतीति भावनया रुदन्ति भक्तपराजितमाकलय्य हसन्ति नन्दन्ति भक्तवात्सल्यादिगुणान् प्रशंसन्ति अलौकिकाः विवशाः तूष्णीं भवन्तीति रसास्वादोद्देशः ॥ ३२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

कृष्णात्मनाथेषु मनुष्येषु शास्त्रवश्येषु च सौहृदम् उभयत्र परिचर्यां सेवारूपाम् अद्वेषरूपाम् अनिन्दामन्यत्रेति पूर्वोक्तत्वात् महत्सु आचार्येषु कीदृशेषु साधुषु भागवतधर्मपरेषु नृषु शास्त्रवश्येषु ॥ २९ ॥

परस्परम् अनु अनुकथ्यते तत् तादृशं पावनं भगवद्यशः श्रुत्वा मिथः प्रीतिः मिथः सन्तोषः मिथः निर्वृतिरानन्दः आत्मनः जीवस्य आत्मनः हरेरिति वा ॥ ३० ॥

भक्त्या साधनभक्त्या सञ्जातया फलभक्त्या ॥ ३१ ॥

फलभक्तिमेवाह—क्वचिदिति । लोकरीतिमतिक्रान्ताः परं परमात्मानम् एत्य ध्यानेन निर्वृतास्तूष्णीं भवन्ति ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

कृष्ण एवात्मनाथो येषां तेषु मनुष्येषु सौहृदं तद्व्यतिरिक्तेषु उभयत्र चराचरात्मकेषु भूतेषु परिचर्यां बहुमतिं महत्सु साधुषु नृषु पावनं भगवद्यशः प्रति परस्परानुऽकथनं तत्र यशसि या मिथोरतिरनुरागः मिथस्तुष्टिः परस्परन्तदनुभवजा तुष्टिः तया मिथ आत्मनो मनसः निवृत्तिराध्यात्मिकादितापत्रयनिवृत्तिस्तां शिक्षेदिति सम्बन्धः ॥२९–३०॥

स्मरन्त इति" भक्त्या साधनभक्त्या सञ्जातया भक्त्या प्रेमलक्षणया भक्त्या उत्पुलकां रोमोद्गमयुक्तां तनुं बिभ्रतीति यत्तच्छेति यत्तच्छब्दाऽध्याहारेण सम्बन्धः एवमुत्तरश्लोकेऽपि ॥ ३१ ॥

अलौकिकाः लोकविलक्षणाः अजं भगवन्तमनुशीलयन्ति तत्स्वरूपस्वभावादिकं परिशीलयन्तीत्यर्थः । एवं परं परमपुरुषम् एत्य मनसा प्राप्य निर्वृताः सुखिताः तूष्णीं भवन्तीति ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कृष्णात्मैव नाथो येषां ते तथा मानुषेषु चापि सौहृदं शिक्षेत किमु देवादिषु उभयत्र भगवति भागवतेषु च महत्सु ब्रह्मादिदेवेषु च परिचर्यां नचैतावता पूर्यते साधुषु नृषु स्वोत्तमेष्वित्यर्थः ॥ २९ ॥

भगवद्यश उद्दिश्य परस्परानुकथनं रतिः सुखं तदाधिक्यं तुष्टिरन्यत्र निवृत्तिश्च ॥ ३० ॥

रत्यादीनां परिपाकमाह—स्मरन्त इति । उत्पुलकामुद्गतपुलकाम् ॥ ३१ ॥

भागवतानां प्रवृत्तिप्रकारमाह—क्वचिदिति । परं भगवन्तं मनसा शरणमेत्य निर्वृताः ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

साक्षाद्भक्तिफलमाह, स्मरन्त इति द्वयेन ॥ ३१—३२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

कृष्ण एवाऽऽत्मनाथः प्राणनाथो येषां तेषु मनुष्येषु सौहृदं स्नेहविशेषः उभयत्र श्रीभगवति तद्भक्तेषु च तेषु महत्सु स्वस्यादरणीयेषु तथा नृषु साधुषु साधुलोकेषु स्वतुल्येषु यथोचितं या परिचर्या तां शिक्षेदित्यर्थः ॥ २९ ॥

परस्परमेवानुकथनं यत्र तथाभूतं पावनं यत् भगवतो यशस्तद्रालम्ब्य मिथो रतिः संस्पर्शादिपरित्यागेन तत्रैव परस्परमणां मिथस्तुष्टिः परस्परसङ्गोत्थं सुखम् आत्मनो मिथो निवृत्तिरिति भक्तिप्रतिकूलविषयभोगात् स्वस्वस्त्रीसंभोगादिलक्षणात् त्वया चेन्निवृत्तं तर्हि मयाप्यद्यारभ्य निवृत्तमित्येवं या भोगनिवृत्तिस्तां च शिक्षेत ॥ ३० ॥

एवं साधनभक्त्या साध्यभक्तिप्राप्तिमाह—स्मरन्त इति । भक्त्या साधनभक्त्या सञ्जातया भक्त्या प्रेमभक्त्या ॥ ३१ ॥

अद्यापि कृष्णो न प्राप्तस्तर्हि किं करोमि क्व गच्छामि कं पृच्छामि को मां तं प्रापयेदित्येवं चिन्तया रुदन्ति क्वचिद्धसन्तीति गोपवधूचौर्यार्थं तामस्यां रात्रौ कस्यचिद्गोपस्य प्राङ्गणे कोणस्थतरुतले निन्हुत्य स्थितं कोऽसि त्वं रे कोऽसीति तस्या गुरुजनवाचा पलायितुं प्रवृत्तं कृष्णं स्फूर्त्तिप्राप्तमालक्ष्येत्यर्थः । नन्दन्ति तदपरोक्षानुभवेनानन्दं प्राप्नुवन्ति हा प्रभो ! एतावद्भिर्दिनैस्त्वामहं प्राप्तोऽस्मीति वदन्ति अलौकिकाः लोकातीताः अजं श्रीकृष्णम् अनुशीलयन्ति स्वीयश्रोत्रादीन्द्रियविषयीकुर्वन्ति एवं परं परमेश्वरम् एत्य प्राप्य निर्वृताः सन्तस्तूष्णीं भवन्ति ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

कृष्ण एव आत्मा स्नेहविषयः नाथश्च येषां कृष्णे आत्मा मनो यस्य स नाथो येषामिति वा तेषु सौहृदं शिक्षेत तत्रापि विशेषतो मनुष्येषु तत्रापि साधुषु नृषु स्वधर्मशीलेषु तत्रापि महत्सु अतिशिष्टेषु उभयत्र हृदि शालग्रामादौ च परिचर्यां च शिक्षेत ॥ २९ ॥

एवं श्रीगुरुप्रसादाल्लब्धभगवद्धर्माणां भजनानन्दमाह—परस्परानुकथनमिति त्रिभिः । पावनं भगवद्यश उद्दिश्य परस्परानुकथनं तत्रात्मनः मिथो रतिः प्रीत्यतिशयः मिथस्तुष्टिः सन्तोषातिशयः निवृत्तिः शोकमोहाद्यपगमश्च स्यात् ॥ ३० ॥

भक्त्या साधनरूपया भक्त्या प्रेमविशेषलक्षणया ॥ ३१ ॥

इति भागवतान्धर्मान् शिक्षन्भक्त्या तदुत्थया ।
नारायणपरो मायामञ्जस्तरति दुस्तराम् ॥ ३३ ॥

राजोवाच ।

नारायणाभिधानस्य ब्रह्मणः परमात्मनः ।
निष्ठामर्हथ नो वक्तुं यूयं हि ब्रह्मवित्तमाः ॥ ३४ ॥

पिप्पलायन उवाच ।

स्थित्युद्भवप्रलयहेतुरहेतुरस्य यत्स्वप्नजागरसुषुप्तिषु सद्बहिश्च ।
देहेन्द्रियासुहृदयानि चरन्ति येन सञ्जीवितानि (१) तदवेहि परं नरेन्द्र ! ॥ ३५ ॥
(२) नैतन्मनो विशति वागुत चक्षुरात्मा प्राणेन्द्रियाणि च यथाऽनलमर्चिषः स्वाः ।
(३) शब्दोऽपि बोधकनिषेधतयाऽऽत्ममूलमर्थोक्तमाह यदृते न (४) निषेधसिद्धिः ॥ ३६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

परं भगवन्तमेव ध्यानद्वारा प्राप्य निर्वृताः सुखिताः सन्तः तूष्णीं भवन्ति ॥ ३२ ॥

भाषा टीका ।

इस प्रकार कृष्णही जिनके आत्मा के नाथ है ऐसे मनुष्यों में सौहृद करै, तथा परिचर्या तौ उभयत्र स्थावर जंगम में करै, तत्रापि महान् पुरुषों में मनुष्यों में साधुजनों में विशेष रीति से करै ॥ २९ ॥

पवित्र भगवत् यश को परस्पर में कहै कहावै, भगवज्जनों में परस्पर में प्रीति परस्पर में सन्तोष परस्पर में अपने आत्मा के आनंद की प्राप्ति करै इन समस्त सीखने योग्य वस्तुओं के गुरु संनिधि में रह कर सीखै ॥ ३० ॥

पापों के समुदायों के रहने वाले श्रीहरि का आप स्मरण करै, और अन्य भक्तजनों को करावै, इस प्रकार की साधन भक्ति से उत्पन्न होने वाली जो सिद्धा प्रेम लक्षणा भक्ति है तिससे समय २ में रोमाञ्च जिसमें हो आये हैं ऐसे शरीर को धारण करै ॥ ३१ ॥

जब इस प्रकार की निष्ठा को प्राप्त होजाते हैं उस समय वे भागवत जन कभी रोदन करते हैं कभी अच्युत की चिन्ता से हंसते हैं आनन्द को प्राप्त होते, बोलते हैं, नृत्य करते हैं गाते हैं, परमात्मविषयक विचार करते हैं, और कभी वो अलौकिक भक्तजन परमात्मा के अनुभव को प्राप्त होकर अति सुखित होकर चुप चाप बैठ रहते हैं ॥३२॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

उपसंहरति-इतीति । भागवतधर्मोत्पन्नया भक्त्या ॥ ३३ ॥

नारायणपरो मायां तरतीत्युक्ते पृच्छति, नारायणाभिधानस्येति । निष्ठां स्वरूपम् । अयं भावः ब्रह्मैव तावन्नारायण इति भगवानिति परमात्मेति चोच्यते तदुक्तम्—

"वदन्ति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयम् ।
ब्रह्मेति परमात्मेति भगवानिति शब्द्यते:" ॥

इति । तथा—

"नारायणो भगवति तदिदं विश्वमाहितम् ।
गृहीतमायोरुगुणः सर्गादावगुणः स्वतः " ॥

इत्यादिषु तत्र किमेभिः शब्दैर्निर्विशेषं तदेव वस्तूच्यते अस्ति वा कोऽपि विशेषांश इति ॥ ३४ ॥

अत्रोत्तरम् स्थित्युद्भवेति । अयमर्थः अस्य विश्वस्य स्थित्युद्भवप्रलयानां हेतुः स्वयं चाहेतुर्हेतुरहितः स नारायण इति परमेव तत्त्वमवेहि स्वप्नजागरसुषुप्तिषु सदनुवर्तमानं यत् वक्ष्यति च तुरीयं त्रिषु सन्ततमिति बहिश्च समाध्यादौ यत्सत्तद् ब्रह्मेति परमेव तत्त्वमवेहि देहेन्द्रियप्राणमनांसि येन जीवितानि सन्ति चरन्ति प्रवर्तंते तत्परमात्मेति परमेव तत्त्वमवेहि एवं लक्षणभेदैर्नारायणादिनामभिरुच्यमानमपि परमेकमेव तत्त्वं जानीहि ॥ ३५ ॥

अवेहीत्यनेन विषयत्वं प्राप्तं निषेधति—नैतदिति । एतत्परं तत्त्वं मनो न विशति न विषयीकरोति वागुत वागपि चक्षुश्चाऽऽत्मा बुद्धिश्च प्राणश्च क्रियाशक्त्या न प्राप्नोत्यन्यानि चेन्द्रियाणि यथाऽनलं स्वाः स्वांशभूता अर्चिषो विस्फुलिङ्गादयो न प्रकाशयन्ति न दहन्ति च तथा जडासुमनआदिवृत्तिष्वभिव्यज्यमानस्याऽऽत्मप्रकाशस्य तत्तद्वृत्तिप्रकाशकस्य न तत्प्रकाशविषयत्वम् " प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रमन्नस्यान्नं मनसो ये मनो विदुः " इति तथा " यतो वाचो निवर्तन्ते अप्राप्य मनसा सह " इत्यादिश्रुतेः ननु " तं त्वौपनिषदं पुरुषं पृच्छामि " इति श्रुतेः । शब्दगोचरत्वं प्रतीयते तत्राऽऽह-शब्दोपीति । शब्दोप्यात्ममूलमात्मनि प्रमाणं सदर्थोक्तमर्थादुक्तं यथा भवति तथा आह न साक्षात् कुतः बोधकनिषेधतया स्वस्यैव बोधकस्य निषेधरूपत्वात् " यतो

(१) तदवेहि (२) नैनम् (३) शब्दोऽप्यबोधकनिषेधतया (४) निषेधस्यासिद्धिः । इत्येवमेव श्रीविजयध्वजपाठाः ।

श्रीधरस्वामिकृतभावार्थदीपिका ।

वाचो निवर्तन्ते अप्राप्य मनसा सह, यद्वाचाऽनभ्युदितं येन वागभ्युद्यते तदेव ब्रह्म त्वं विद्धि, यन्मनो न मनुते, न चक्षुषा पश्यति कश्चनैनम्" इत्यादिश्रुतेः । ननु, तर्हि नैवाह श्रुतिः किमिदमुच्यते अर्थोक्तमाहेति तत्राऽऽह—यदन इति । "अथात आदेशो नेति, अस्थूलमनणु, यतो वाचो निवर्तन्ते, यद्वाचाऽनभ्युदितम्" इत्यादिनिषेधस्य यदवधिभूतं ब्रह्म ऋते ऽविना सिद्धिर्नास्ति सर्वस्य निषेधस्य साऽवधित्वात् ॥ ३६ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी ।

उपसंहरति, आनुषङ्गिकं फलं कथयन् ससाध्यान् भागवतधर्मान् समापयति, भागवतधर्मोत्पन्नया भक्त्या नारायणपरः प्रेम्णा तदेकाविष्टः सन्नज्ञोऽनायासेनैव मायां तरतीत्यन्वयः ॥ ३३ ॥

नारायणाद्याविर्भावस्य तद्विभूत्याश्रयणमन्तरा निरूपकत्वायोगात् "अश्वत्थः सर्ववृक्षाणाम्" इति भगवदुक्तेः । पिप्पलं भगवद्विभूतिरयनमाश्रयो यस्य स तथेति तत्त्ववर्णने तस्यैवौचित्यात् स एवोवाचेत्युक्तं तत्तन्नामग्रहणे किं प्रयोजनमित्याशङ्क्य प्रयोजनीभूतं व्यङ्ग्यार्थं विशदयति—अयं भाव इति । निर्विशेषणां ब्रह्मैव यावच्छक्तिविशिष्टं चेत्तर्हि पूर्णाविर्भावान्नारायण इतिनामा भगवानुच्यते तदेव तत्त्वं मायाद्यन्तर्यामित्वमात्रशक्तिप्रकाशकं चेत् परमात्मेति चोच्यते तदुक्तं तत्त्वस्य त्रैविध्यमुक्तम् भगवतो नारायणनामत्वे मानमाह—तथेति । तत्र एकस्यैव तत्तन्नामत्वे सति विशेषांशस्तत्तन्नामप्रवृत्तिनिमित्तरूपो भेदांशः ॥ ३४ ॥

अत्र प्रश्ने प्रश्नक्रमेणैवोत्तरं वस्तुनोऽभेदेऽपि "यदस्तित्वषाभिरवधारितं पुरा ततः शरीरीति विभाविताऽऽकृतिम् । विभुर्विभक्तावयवं पुमानिति क्रमादमुं नारद इत्यबोधि सः" इतिवत् प्रवृत्तिनिमित्तरूपविशेषं स्फुटीकरोति—अयमर्थः इति । नारायण इति भगवानिति नारायणनामा भगवानित्यर्थः । परमेव पूर्णमेव तत्त्वम् अवेहि जानीहि अवैहीति पाठस्त्वसम्भवः वृद्धैरसाधुत्वात् अनुवर्तमानमनुगतं समाध्यादौ वृत्तिनिरोधः समाधिः आदिना मुक्त्यवस्थायाः परिग्रहः तत्तुरीयं तत्त्वं ब्रह्मेत्युच्यते तदपि परं परमार्थस्वरूपमेकमेव तत्त्वमवेहि येन परमात्मना कर्त्रा सञ्जीवितानि प्रवर्त्तितानि एवमिति स्वरूपशक्त्यैकविलासमयत्वे सति स्वांशद्वारा सृष्ट्यादिशक्तिमत्त्वं भगवत्त्वं निरुपाधिविशेष्यमात्रत्वं ब्रह्मत्वं मायातत्कार्यप्रेरकत्वलक्षणान्तर्यामित्वं परमात्मत्वम् इत्येवं लक्षणाभेदैरित्यर्थः ॥ ३५ ॥

न विषयीकरोति सङ्कल्पविकल्पविषयं न करोतीत्यर्थः वागपि वागिन्द्रियमपि न वचनविषयं करोति, बुद्धिश्च बुद्धिरपि न निश्चयविषयं करोति अन्यानि श्रोत्रत्वगादीनि मनआदिवृत्तिषु उपाधितयाऽभिव्यञ्जिकासु अभिव्यज्यमानस्य यथा करतलोपाधिना रविरश्मयः प्रकटीक्रियन्ते तथा प्रकटीक्रियमाणस्येत्यर्थः । आत्मप्रकाशस्य प्रकाशात्मनो ब्रह्मण इत्यर्थः । तत्तद्वृत्तिप्रकाशकस्य यथा रविरश्मयः करतलाभिव्यङ्ग्या अपि करतलं प्रकाशयन्ति तथा मनआद्यभिव्यङ्ग्यस्येऽपि मनोवागादिवृत्तिप्रकाशकस्येत्यर्थः । न तत्प्रकाशाविषयत्वं यथा रविरश्मीनां प्रकाशैकशीलानामप्रकाशमानकरतलादिप्रकाशाविषयत्वं न सङ्गच्छते तथा जडीभूतमनआदिप्रकाशाविषयत्वं ब्रह्मणो नास्तीत्यर्थः । तत्तद्वृत्तिप्रकाशकत्वे प्रमाणं श्रुतिः प्राणस्य प्राणं "प्राणस्य प्राणः क्रियाशक्तिप्रकाशकं चक्षुषश्चक्षुः रूपदर्शनशक्तिप्रकाशकम् अन्नस्याऽन्नशब्दवाच्यपृथिवीकार्यस्य घ्राणेन्द्रियस्येत्यर्थः । अन्नं गन्धज्ञानवृत्तिप्रकाशकं मनसो मनः सङ्कल्पविकल्पवृत्तिप्रकाशकं ब्रह्म ये विदुस्ते तत्त्वज्ञा इति शेषः । मनसा सह वाचो यमप्राप्य यतः सकाशान्निवर्तन्ते शङ्कते, नन्विति । तं त्विति ह शाकल्य तं सकारणसूत्रस्याधिष्ठानम् औपनिषदमुपनिषद्भिः प्रकाश्यं पुरुषं पूर्णं त्वा त्वां पृच्छामीत्यर्थः । शब्दगोचरत्वं शब्दप्रमाणविषयत्वं प्रतीयत इति कुतो वाक् न विशतीति प्रश्नीयं शब्दोऽपि उपनिषदाख्यवेदोऽपि आत्मनि परतत्त्वे अर्थात् निषेधमुखेन तात्पर्यात् न साक्षात् अभिधावृत्त्या विधिमुखेनाह—स्वस्यैव वेदस्यैव बोधकस्य तात्पर्यवृत्त्या निषेधमुखेन च ज्ञापकस्य निषेधरूपत्वात् ब्रह्मणो वाग्विषयत्वे निषेधकत्वात् निषेधात्मकं वेदं लिखति—यत इत्यादि । यद् ब्रह्म वाचा नाभ्युदितं न प्रकाशितं अभ्युद्यते प्रकाश्यते मनःकर्तृ यद्ब्रह्म न मनुते सङ्कल्पादिविषयं न करोति यर्हि वागाद्यविषयं तर्हि प्रमाणाभावात् खपुष्पादिवत्तुच्छतिर्ब्रह्म नैवाहेत्यर्थः । तत्र तस्यामाशङ्कायां तात्पर्यवृत्त्या ब्रह्मणि वेदस्य पर्यवसानमाह, अथेति । अथ मूर्त्तामूर्तस्थूलसूक्ष्मपुरुषरूपवर्णनानन्तरम् । अत आरोपस्य निषेधार्थत्वान्निषेधद्वारा आदेशो ब्रह्मकर्मक उपदेशो भवति कीदृश इत्यपेक्षायामाह, नेति नेतीति । नात्मा वपुः पार्थिवमिन्द्रियाण्यादि वक्ष्यमाणवदिदं ब्रह्म इदं ब्रह्म नेति अस्थूलमिति स्थूलादि द्वैतशून्यमित्यर्थः । तथा च परमर्षिसूत्रं "प्रकृतैतावत्त्वं प्रतिषेधति ततो ब्रवीति च भूयः" इति अस्यैव च विषयवाक्यमिदम् "अथात आदेशः" इत्यादि प्रकृतं प्रकरणप्राप्तमेतावत्त्वम् इयत्तापरिच्छिन्नं मूर्त्तामूर्त्तलक्षणं ब्रह्मणो रूपमध्यस्तम् अथात आदेश इत्यादिशब्दः प्रतिषेधति पुनः सर्वस्य निषेधस्य सावधित्वाच्छब्द एवाऽर्थतो ब्रह्म ब्रवीति चेति सूत्रार्थः शब्दोऽपि बोधकनिषेधतयात्ममूलमित्यर्द्धपद्येन सूचितो विशेषः अर्थोऽयं ब्रह्मसूत्राणामिति गारुडोक्तेरिति ॥ ३६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

एवं नारायणपरः मायां पूर्वोक्ताम् अज्ञः अनायासेन तरति ॥ ३३ ॥

ब्रह्मपरमात्मशब्दौ सदात्माऽऽकाशप्राणशिवशम्भ्वादिशब्दानामुपलक्षणभूतौ एतैः शब्दैर्वाच्यस्य सर्वशब्दैर्वाच्यस्य सर्वशब्दपर्यवसानभूतस्य नारायणाभिधानस्य निष्ठां स्वरूपरूपगुणविभूतिरूपाम् ॥ ३४ ॥

उत्तरयति, नारायणस्य मुख्यं जगत्कारणत्वमेवासाधारण-

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

लक्षणमाह—स्थित्युद्भवप्रलयहेतुरिति । अहेतुः स्वयंकारणरहितम् अस्य विश्वस्य यद्धेतुः एकवचनेन सहायान्तरनिरपेक्षं तच्चेतनाचेतनविलक्षणं नारायणाख्यं स्वपोक्तम् अवेहि यत्स्वप्नाद्यवस्थजीवेषु व्याप्य स्थितमित्यर्थः । देहादिसत्ताप्रवृत्त्योरपि परमात्माधीनत्वमाह देहेन्द्रियेति । जगत्कारणं सर्वजीवान्तरात्मभूतं सकलपदार्थसत्ताप्रवृत्तिहेतुभूतं परंब्रह्मत्यर्थः ॥ ३५ ॥

इन्द्रियाद्यगोचरत्वमाह—नैतदिति । न विशति न प्रकाशयति आत्मा जीवः । यद्वा, चक्षुरात्मा (चक्षुः स्वरूपं यस्य) चक्षुः शरीरमित्यादिप्रकारेण परमात्मनः शरीरतया विशेषणभूतानि चक्षुरादीनि न प्रकाशयन्ति यथाऽनलमर्चिषः स्वा इति अनलं तद्विशेषणभूता अर्चिष इवेत्यर्थः । शब्दोऽप्यात्ममूलं परमात्मनि प्रमाणं बोधकनिषेधतया "न चक्षुषा गृह्यते नापि वाचा" इति ग्राहकचक्षुराद्यगोचरत्वेन बोधयतीत्यर्थः । कथं बोधकनिषेधे कृते तत्प्रतिपादितं भवतीत्यत्राह—अर्थोक्तमाह अर्थवशादुक्तं भवति तदेवोपपादयति, यदृते न निषेधसिद्धिः यद्ब्रह्म ऋते विना चक्षुरादिनिषेधो न सिध्यति तद् ब्रह्म अर्थादुक्तं प्रतिपादयतीत्यर्थः ॥ ३६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इत्येवंविधान् भागवतान् धर्मान् शिक्षन्नश्यन्नारायणपरः नारायणाराधननिष्ठः तदुत्थया नारायणाऽऽराधनोत्थया भक्त्या प्रेमात्मिकया दुस्तरामपि मायामञ्जः सुखेन तरति ॥ ३३ ॥

तदेवं प्रकृतिस्वरूपतत्कार्यनिरूपणप्रसङ्गात्पुरुषस्वरूपप्रकृतिसम्बन्धनिस्तरणोपायावुपपादितौ अत्र नारायणपरो मायां तरतीत्युक्तम् अत्र प्रकृतिपुरुषविलक्षणेश्वरस्वरूपनिश्चिचीषया पृच्छति, नारायणाभिधानस्येति । निष्ठामन्तं विचारस्यावधारणं स्वरूपनिश्चयमिति यावत् नोऽस्मभ्यं वक्तुमर्हथ तत्र हेतुर्ब्रह्मवित्तमाः ब्रह्मविदग्रेसराः ब्रह्मविच्छब्दादतिशयार्थे तमप्प्रत्ययः ॥ ३४ ॥

यद्यपि सप्तर्षीणां वचान्याद्य इति सृष्ट्यादिकर्ता नारायण इत्यवगतमेव तथापि तस्य निमित्तकारणत्वमात्रमवगतमतस्तन्मात्रत्वाशङ्कानिराचिकीर्षयाऽभिन्नोपादानजगत्सृष्ट्यादिकारणत्वेन ब्रह्म लक्षयति—पिप्पलायनः, स्थितीति । स्थितिः रक्षा उद्भव उत्पत्तिः सृष्टिस्थितिप्रलयहेतुरिति पाठान्तरम् अस्य चिदचिदात्मकस्य जगतो यः सृष्ट्यादिहेतुः हेतुत्वं निमित्तोपादानसाधारणम् अहेतुः स्वस्य कारणान्तररहितः बहिःशब्देन स्वप्नाद्यवस्थाबहिर्भूतमुक्तावस्थोच्यते सह वर्तमानं सर्वावस्थास्वपि जीवेष्वन्तरात्मतया व्याप्य स्थित इत्यर्थः । देहादिसत्ताप्रवृत्त्योरपि परमात्माधीनत्वमाह—देहेन्द्रियेति । असुः प्राणः हृदयं मनः एतानि येन सञ्जीवितानि चरन्ति प्रवर्तन्ते तत्परमवेहि जानीहि जगत्कारणं सर्वदा जीवान्तरात्मभूतं सकलपदार्थसत्ताप्रवृत्तिहेतुभूतं परं ब्रह्मेत्यवेहीत्यर्थः ॥ ३५ ॥

देहेन्द्रियासुहृदयानि येन सञ्जीवितानि चरन्तीति तेषां तदधीनत्वोक्त्या इन्द्रियाद्यगोचरत्वं सूचितं तदेवोपपादितुमाह, नैतदिति । वाग्वागिन्द्रियम् एतत्कर्मेन्द्रियाणामुपलक्षणम् तद्ब्रह्म न विशति न विषयीकरोतीत्यर्थः । आत्मा जीवः । यद्वा, चक्षुरात्मा चक्षुः स्वरूपम् इन्द्रियाण्युपात्तेन्द्रियव्यतिरिक्तानि श्रोत्रत्वग्रसनाघ्राणानि यथाऽनलमर्चिषः स्वा इति । "यस्य चक्षुः शरीरम्" इत्यादिप्रकारेण परमात्मशरीरतया विशेषणभूतानि चक्षुरादीनि न प्रकाशयन्ति, अनलं तद्विशेषणभूता अर्चिष इवेत्यर्थः । शब्दोऽपि वेदान्तभागोऽप्यात्ममूलं परमात्मनि प्रमाणं बोधकनिषेधतया "न चक्षुषा दृश्यते नापि वाचा" इति ग्राहकचक्षुराद्यगोचरत्वेनावबोधयतीत्यर्थः । श्रुतौ चक्षुषेति ज्ञानेन्द्रियाणामुपलक्षणं वाचेति कर्मेन्द्रियाणां कथं बोधकनिषेधे कृते तत्प्रतिपादितं भवतीत्यत्राह—अर्थोक्तमिति । अर्थवशादुक्तं भवति तदेवोपपादयति—यदृते न निषेधसिद्धिरिति । यद्ब्रह्म ऋते विना चक्षुरादिनिषेधो न सिध्यति तद्ब्रह्मार्थादुक्तमाह प्रतिपादयतीत्यर्थः । यद्वा, पूर्वार्धेन प्रत्यक्षतन्मूलानुमानवेद्यत्वं प्रतिषिद्धम् एवं तर्हि तुच्छत्वापत्तिरत आह—शब्द इति । शब्दः प्रतिपादयतीत्यर्थः । अतो न तुच्छत्वशङ्केति भावः । "यद्वाचानभ्युदितं येन वागभ्युद्यते" इत्यनेन तु वागिन्द्रियाविषयत्वं तस्य तदधीनत्वं चोच्यते "यतो वाचो निवर्तन्ते" इत्यनेन त्वपरिच्छिन्नत्वादिमत्तया न प्रतिपाद्यते इति भावः । ननु, "न चक्षुषा गृह्यते" इत्यादिशब्दश्चक्षुरादीनां ब्रह्मबोधकत्वं निषेधति नतु स्वयं तत्प्रमापयति ततः कथं, शब्दः प्रमाणम् ? इत्यत आह—अपिबोधकनिषेधतयात्ममूलमर्थोक्तमाहेति । अपिशब्दो भिन्नक्रमः न चक्षुषा दृश्यत इत्यादेश्चक्षुरादिग्राहकान्तरनिषेधरूपतयाऽर्थोक्तम् पारिशेष्यादुक्तं पारिशेष्यन्यायसिद्धम् इत्यर्थः । तदात्ममूलं भावप्रधानो निर्देशः आत्मनः स्वस्य मूलत्वं ब्रह्मप्रमितिकारणत्वमपि आह प्रतिपादितवत्प्राय इत्यर्थः । यद्यपि "सत्यं ज्ञानमनन्तम्" इत्यादयो बहवः शब्दाः साक्षाद्ब्रह्मप्रतिपादकाः सन्त्येव तथापि यो ग्राहकान्तरनिषेधपरः शब्दः तस्यैव ब्रह्मप्रमापकत्वं पर्यवसाययितुमर्थोक्तमात्ममूलमाहेत्युक्तम् । ननु, व्युत्पत्तिग्रहस्य प्रत्यक्षादिमूलकत्वात् बोधकनिषेधस्य न चक्षुषेत्यादेरसङ्कोचात्स्वमूलत्वनिषेधपरतापि किं न स्यादित्यत आह—यदृते न निषेधसिद्धिरिति । यदृते यदात्ममूलं विना न निषेधसिद्धिः बोधकनिषेधो न सिध्यति । अयं भावः बोधकनिषेधोऽपि शब्दः स्वयं ब्रह्म विषयीकृत्यैव तत्र बोधकान्तराणि निषेधति—तत्रात्ममूलत्वस्यापि निषेधे त्वितिमिति विषयीकाराभावात् क्व बोधकान्तरनिषेधः अत आत्ममूलत्वाभावे निषेधस्यैवासिद्धेस्तत्सिद्ध्यन्यथानुपपत्त्या आत्ममूलत्वमप्याहेति ॥ ३६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

उपसंहरति—इतीति । तदुत्थया भागवतधर्माभ्यासोद्रेकोत्थया ॥ ३३ ॥

ब्रह्मवित्तमाः हि यस्मात्तस्मादूयं ब्रह्मणो निष्ठां ब्रह्मादिजीवराशेरुत्कर्षं वक्तुमर्हथ "निष्ठोत्कर्षे व्यवस्थायां नाशेऽन्त्ये व्रतयाच्ञयोः" इति यादवः ॥ ३४ ॥

तदुत्कर्षोऽपि जन्मादिकारणत्वेन स्वप्नाद्यवस्थाप्रवर्तकत्वेन तदनभिभूतशक्तित्वेन मनआदीन्द्रियाभिमानिदेवाक्षेपत्वेन हि

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

जननादिरहितत्वेन ज्ञातुं शक्यत इत्याशयेन प्रश्नं परिहरति, स्थितीत्यादिना।योऽस्य जगतः स्थित्यादिहेतुः स्वस्य हेतुरन्यो नास्तीत्यहेतुः स्वप्नादिषु सन्निरोधत्वेन स्थितः यश्च बहिः प्रलये मुक्तौ च वर्त्तमानः येन देहेन्द्रियादीनि चरन्ति वर्त्तन्ते हृदयं मनः सञ्जीवितानि यदधीनानि हे नरेन्द्र ! तत्तत्त्वं परं सर्वस्मादुत्कृष्टम् अवेहीत्यन्वयः ॥ ३५ ॥

इतोऽपि हरिः सर्वोत्कृष्टः यतोऽस्य प्रसादं विना रुद्रादिदेवैर्न ज्ञेय इत्याह—नैनमिति । विशतिरत्रज्ञानार्थः मनआदिशब्देन तदभिमानी लक्ष्यते अचेतनत्वेन ज्ञानक्रियासम्भवात् तथाचायमर्थः मनो रुद्रादिः एनं नारायणं न विशति न जानाति वागुत सरस्वत्यादिकमपि न विशतीत्यनुवर्तते चक्षुः सूर्यः आत्मा ब्रह्मा वायुश्चान्ये प्राणाद्यभिमानिनश्च न जानन्तीत्यर्थः। अपिशब्दात्तत्प्रसादेनैकदेशं जानन्तीति योज्यं तत्रोदाहरणमाह,यथेति। यथा स्वाः अर्चिषः प्रधानाग्नेः पुत्राः अनलं प्रधानाग्निं तदनुग्रहमन्तरेण न विशन्ति। ननु, नित्याऽवियोगित्वेन अनन्तवेदाद्यात्मत्वाच्च श्रीर्ज्ञातुमर्हतीति तत्राह—शब्द इति।निर्दोषः शब्द आगम इति निर्दोषशब्दराश्यभिमानिनी लक्ष्मीः बोधकादन्यत् अबोधकं परमेश्वरादितरल्लौकिकानन्दज्ञानादिकं यत्तस्य निषेधतया आनन्दो हरेर्नेहशानन्दो ज्ञानरूपः नेहशज्ञानरूप इत्यादि निषेधरूपेण आत्ममूलं स्वकारणं अर्थाकमर्थतः परिशेषतः सिद्धत्वेनोक्तमाह अर्थशब्देनात्र परिशेषप्रमाणमुच्यते न लक्षणावृत्तिः कथमत्राह, यहत इति। यत्सर्वविलक्षणानन्दादिकं विना निषेध्यस्यैतन्न भवतीति निषेधवचनार्थस्य लौकिकानन्दादेः सिद्धिर्न स्यात् प्रत्यक्षादिप्रमाणसिद्धत्वात् सास्ति अतः परिशेषप्रमाणसिद्धया प्रमितमेवेत्यर्थः। प्रतीतार्थं परित्यज्याप्रतीतार्थकल्पनायां किं प्रमाणमितीयं शङ्का—

"ब्रह्माद्या यं न जानन्ति करणाद्यभिमानिनः।
जानन्त्यनुग्रहाच्चास्य प्रधानाग्निं यथा ऽर्चिषः॥
अग्निपुत्रा नमस्तस्मै यमाह श्रीश्च न स्फुटम्।
वेदरूपा परं देवं वैलक्षण्यात्समस्तशः॥
आनन्दो नेहशानन्द इत्युक्तेर्लौकतः परम्।
प्रतिभाति न चाभाति यथावद्दर्शनं विना"॥

इत्यनेन परिहर्तव्येति "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति" इति च ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

तदानुषङ्गिकं फलमाह-इतीति ॥ ३३ ॥

नारायणाभिधानस्येति तैः तत्र नारायण इति भगवानितीति नारायण इतिनामा भगवानित्यर्थः। यद्वा, नारायणाभिधानस्य भगवतः ब्रह्मेति परमात्मेत्यादिप्रसिद्धतत्समुदायतृतीयतया पाठात् "नारायणे तुरीयाख्ये भगवच्छब्दशब्दिते" इत्यत्र स्पष्टीभावित्वाच्च निष्ठां तत्त्वम् ॥ ३४ ॥

प्रश्नक्रमेणैवोत्तरमाह—स्थितीति। यत् स्थित्यादिहेतुरहेतुश्च भवति यच्च जागरादिषु सद्बहिश्च भवति येन च देहादीनि सञ्जीवितानि सन्ति चरन्ति तदेकमेव परं तत्त्वं स्वप्रश्नक्रमेण नारायणादिरूपं विद्धीति योजनीयं तथापि ब्रह्मत्वस्पष्टीकरणाय विपर्ययेण व्याख्यायते तत्रैकस्यैव विशेषणभेदेन तद्विशिष्टत्वेन च प्रतिपादनात् तथैव तत्तदुपासकपुरुषानुभवभेदाच्चाविर्भावनाम्नोर्भेद इति तात्पर्यम् एतदुक्तं भवति स्वयमहेतुः स्वरूपशक्त्यैकविलासमयत्वेन तत्रोदासीनमपि प्रकृतिजीवप्रवर्त्तकावस्थपरमात्मा ऽपरपर्यायस्वांशलक्षणपुरुषद्वारा यदस्य सर्गस्थित्यादिहेतुर्भवति तद्भगवद्रूपं विद्धि पुनस्तेनैव येन हेतुकर्त्रा आत्मांशभूतजीवप्रवेशनद्वारा यदस्य सर्गस्थित्यादिहेतुर्भवति सञ्जीवितानि सन्ति देहादीनि तदुपलक्षणानि प्रधानानि सर्वाण्येव तत्त्वानि येनैव प्रेरितत्यैव चरन्ति स्वस्वकार्ये प्रवर्त्तन्ते तत्परमात्मरूपं विद्धि तथा च "तस्मै नमो भगवते ब्रह्मणे परमात्मने" इत्यत्र वरुणकृतश्रीकृष्णस्तुतौ टीका च परमात्मने सर्वजीवनियन्त्रे इत्येषा। जीवस्यात्मत्वं तदपेक्षया तस्य परमत्वमित्यतः परमात्मशब्देन तत्सहयोगी स एव व्यज्यत इति तत्तदविशिष्टत्वेन ब्रह्मत्वमात्रं चैवमुपतिष्ठतीत्याह-स्वप्नेति । यदेव तत्त्वं स्वप्नादौ यदन्वयेन स्थितं यच्च तद्बहिः शुद्धायां जीवाख्यशक्तौ तथास्थितं ततः परत्रापि व्यतिरेकेण स्थितं स्वयमवशिष्टं तद्ब्रह्मरूपं विद्धीति ॥ ३५ ॥

परत्वमेवाह—नैतदिति। वाक् लौकिकी शब्दो वेदोपि अर्थैः स्वाभिधादिवृत्तिभिरुक्ततया यदाह तदपि बोधकानां मन आदीनां निषेधो यत्र तत्तया तेषामविषयतयैवेत्यर्थः। अप्राकृतानन्तस्वरूपगुणत्वादिति भावः। ननु सर्वथैव निःस्वरूपं निर्गुणं वेत्याह, आत्मनः स्वस्य मूलं कारणमिति यदृत इति यदि च सर्वथैव वक्ति तदा निषेधो वा कुत्र कथं वा कुर्यादित्यर्थः ॥ ३६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

इति धर्मान् शिक्षन्निति स्मारयन्तश्चेत्येतदन्तानां धर्माणामनुष्ठानस्य शिक्षणं तदुत्तरेषां पुलकिततनुत्वरोदनादीनां त्वभिलाषस्य शिक्षणं कदाहमुत्पुलकिततनुर्भवेयमित्येतत्प्रकारकं तदुत्थया शिक्षित भक्तिजनितया भक्त्या लक्षणया प्रेमभक्त्या मायां तरतीत्यानुषङ्गिकं फलमुक्तम् ॥ ३३ ॥

नारायणपर इति श्रुत्वा नारायणस्य स्वरूपं पृच्छति—नारायणेति । "नारायणे तुरीयाख्ये भगवच्छब्दशब्दिते" इत्युक्तेर्नारायणाभिधानो यो भगवांस्तस्य निष्ठां स्वरूपम्। ननु, स तवेष्टदेव एव भगवति गुरूपदिष्टमार्गेण तत्स्वरूपं त्वं जानास्येवेति तत्राह—ब्रह्मण इति। स एव नारायणो ब्रह्म स एव परमात्मा अत एकस्वरूपस्यैव तस्य त्रितयत्वेन कथने कः प्रकारस्तमहं जिज्ञासे इति भावः ॥ ३४ ॥

प्रश्नक्रमेणैव प्रथमं नारायणं लक्षयति–स्थितीति। "जगृहे पौरुषं रूपं भगवान् महदादिभिः। सम्भूतं षोडशकलमादौ लोकसिसृक्षया" इत्याद्युक्तेः। पुरुषरूप एव अस्य विश्वस्य स्थित्युद्भवप्रलयानां हेतुः स्वयं अहेतुर्हेतुशून्यः श्यामसुन्दराकारश्चतुर्भुजाष्टभुजसहस्रभुज (द्विभुज) सच्चिदानन्दमूर्त्तिः परव्योमनाथभूमा-

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

वासुदेवमहाविष्णुक्षीरोदनाथनृसिंहरामकृष्णादिनामा नारायणो यो भगवच्छब्दवाच्यः स्वप्नजागरणसुषुप्तिषु सत् अनुवर्तमानं बहिश्च समाधौ सत् व्यापकं वस्तु यदेव ब्रह्मशब्दवाच्यं देहेन्द्रियप्राणमनांसि सञ्जीवितानि येन परमात्मशब्दवाच्येन तत् परं परमेश्वरमेकमेव तत्त्वमवेहि ॥ ३५ ॥

भगवत्तत्त्वं मयोपास्यं मदङ्ग्यस्तमेवास्ति किन्तु दुर्ज्ञेयं ब्रह्मतत्त्वं विस्तार्य कथयेत्यपेक्षायां ब्रह्मतत्त्वमाह—नैतदिति चतुर्भिः । तद् ब्रह्म मनो न विशति न विषयीकरोति वागुत वागपि चक्षुश्च आत्मा जीवश्च प्राणाश्च इन्द्रियाणि च यथा अनलं स्वाः स्वांशभूता अर्चिषो विस्फुलिङ्गादयो न प्रकाशयन्ति "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह" इत्यादि श्रुतेः ननु "तं त्वौपनिषदं पुरुषं पृच्छामि" इति श्रुतेः शब्दगोचरत्वं प्रतीयते तत्राह-शब्दोऽपि आत्मनः स्वस्य मूलं ब्रह्मबोधकनिषेधतश्चाह यस्य बोधकं किमपि नास्ति तद् ब्रह्मेत्येवं रीत्यैवार्थादुक्तमर्थं प्रवोक्तं न तु शब्दत इदं तदिति निर्देशनाहेत्यर्थः । "यद्वाचानभ्युदितं येन वागभ्युद्यते । तदेव ब्रह्म त्वं विद्धि यन्मनो न मनुते न चक्षुषा पश्यति कश्चनैन" मित्यादिश्रुतेः । ननु तर्हि नैवाह श्रुतिः किमिदमुच्यते अर्थोक्तमाहेति तत्राह-यहते इति । "अथात आदेशो नेति नेत्यस्थूलमनणु यतो वाचो निवर्तन्ते" इत्यादि निषेधस्य अवधिभूतं यद्ब्रह्म ऋते विना सिद्धिर्नास्ति सर्वस्य निषेधस्य सावधित्वादिति । ननु "तत्परं परमं ब्रह्म सर्वं विभजते जगत् । ममैव तद्घनं तेजो ज्ञातुमर्हसि भारत" इति हरिवंशोक्तेर्ब्रह्मज्योतिः सनातनमिति दशमोक्तेः "यस्य प्रभाप्रभवतो जगदण्डकोटिकोटिष्वशेषवसुधादिविभूतिभिन्नम् । तद्ब्रह्म" इति ब्रह्मसंहितोक्तेर्भगवदङ्गज्योतीरूपं चेद्ब्रह्म तर्हि कथं न मनआदिकं विषयीकरोतीति उच्यते भगवदङ्गज्योतिर्हि न मायिकं तृतीयं भूतं किन्तु मायातीतं सच्चिदानन्दरूपमेव वाङ्मनआदिकं तत् कथं स्वविषयीकर्तुं शक्नोतु "शब्दं ब्रह्म वपुर्दधदिति । यन्मित्रं परमानन्दं पूर्णं ब्रह्मेति तव ब्रह्ममयस्येश । किमुतेच्छाभिमर्शिण" इति सच्चिदानन्दविग्रह इत्याद्युक्तेर्भगवद्वपुरपि ब्रह्मैव यद्यपि तदपि तत्कृपाशक्त्या अतर्क्ययैव प्रापञ्चिकलोकगोचरीकृतम् अत एव नीलोत्पलदलश्यामादिशब्दवर्णितं यत्तदप्राकृतनीलोत्पलदलश्याममपि प्राकृतनीलोत्पलवर्णत्वेन भक्तैर्ध्यातमताद्दशमपि तद्वपुः केवलमतर्क्यया तत्करुणयैव भक्तनयनयोराविर्भवति अतः प्रापञ्चिकलोकैर्मनोवचोगोचरीकर्तुमशक्यं केवलं ब्रह्मोपासकैरेव साधनपरिपाके सत्यपि भगवदनुग्रहप्राप्त्यैव ब्रह्माकारेऽन्तःकरणेऽनुभूयत इत्यतो वेदोऽपि यन्मनो न मनुते इत्यादि दृश्यते स्वग्रन्थया बुद्धयेलाद्यप्याहेति विवेचनीयम् ॥ ३६ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

भगवद्भक्त्या मायां तीर्त्वा परमानन्दं प्राप्नोतीत्याह—इतीति । इत्येवम्भूतान् भागवतान् धर्मान् शिक्षन् अभ्यस्यन् नारायणपरः नारायणोपासकः तदुत्थया नारायणप्रवर्तितया भक्त्या अन्यैर्दुस्तरामपि मायामञ्जोऽनायासेन तरति ॥ ३३ ॥

नारायणपरो मायामञ्जस्तरति दुस्त्यजामित्युक्तं तमेव ज्ञातुं पृच्छति । नारायणाभिधानस्येति । यतः यूयं ब्रह्मवित्सु श्रेष्ठाः अतः ब्रह्मपरमात्मादिशब्दवाच्यस्य नारायणाभिधानस्य समस्तनरसमूहाधारस्य परमपुरुषस्य निष्ठां तदसाधारणस्वरूपादिवर्णनेनोत्कर्षं नोऽस्मभ्यं वक्तुमर्हथ "निष्ठोत्कर्षे व्यवस्थया" मिति यादवः ॥ ३४ ॥

विश्वहेतुत्वादिना भगवदुत्कर्षमाह—स्थित्युद्भवप्रलयहेतुरिति । अस्य चिदचिदात्मकस्य विश्वस्य स्थित्यादिहेतुः उपादानतया निमित्ततया च कारणं स्वयमहेतुः अन्यनिरपेक्षस्थितिप्रवृत्त्या-द्याश्रयः यत्स्वप्नादिषु तत्तज्जीवावस्थाप्रदत्वेन सत् बहिश्च सर्वाधारत्वादिना सत् येन देहादीनि सञ्जीवितानि सन्ति चरन्ति तत्परं पूर्णं सर्वोत्कृष्टं परमपुरुषतत्त्वं हे नरेन्द्राऽवेहि जानीहि ॥ ३५ ॥

चेतनाचेतनानवगाह्यत्वेयत्तानवच्छिन्नत्ववेदैकवेद्यत्वादिधर्मवत्स्वरूपनिरूपणेन भगवदुत्कर्षमाह—नैतदिति । एतत्परं तत्त्वं मनः अन्तःकरणेन्द्रियं न विशति न विषयीकरोति प्राणेन्द्रियाणि प्राणः सर्वेन्द्रियनायकः इन्द्रियाणि बाह्यानि ज्ञानेन्द्रियाणि च न विशन्ति वाक्शब्देन कर्मेन्द्रियदेवतागणः चक्षुःशब्देन ज्ञानेन्द्रियदेवतागणः आत्मा जीवश्च सर्वेषां मनआदीनां स्वामी न विशति यथा अनलं तदंशभूताः अर्चिषः न विषयीकुर्वन्ति तद्वत् शब्दोऽपि सर्वज्ञो वेदस्तु आत्ममूलम् "अस्य महतो भूतस्य निश्वसितमेव यदृग्वेदो यजुर्वेदः सामवेद" इति श्रुतेः उद्गमनस्थानं परं तत्त्वं "सर्वे वेदा यत्पदमामनन्ति सर्वे वेदा यत्रैकीभवन्ति तन्त्वौपनिषदं पुरुषं पृच्छामि यतो वा इमानि भूतानि जायन्ते सत्यं ज्ञानमनन्त" मित्यादिवाक्यैः अर्थोक्तम् अर्थत उक्तं यथाभवति तथा प्रतिपाद्यतया आह किञ्च यहते "यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सह यद्वाचानभ्युदितं येन वागभ्युद्यते यन्मनो न मनुते न चक्षुषा पश्यति कश्चनैनं यस्याऽमतं तस्य मतस्मतं यस्य न वेद स" इत्यादिशब्दं विना निषेधसिद्धिः परतत्त्वेयत्ताग्राहकनिराकरणसिद्धिर्न स्यादतस्तदियत्तानवच्छिन्नत्वसिद्धये तदियत्ताग्राहकनिराकरणतया चाहेत्यन्वयः । मनआदयो यन्न प्रकाशयन्ति वेदस्तु विषयतया इयत्ताग्राहकनिराकरणतया च यदाह तत्सर्वोत्कृष्टं परं तत्त्वमवेहीत्यर्थः ॥ ३६ ॥

———

भाषा टीका ।

इस प्रकार भागवत धर्मों को सीखता हुआ भागवत धर्मों से उत्पन्न होने वाली भक्ति से नारायण परायण होकर दुस्तर माया को भी पुरुष विना परिश्रम तर जाता है ॥ ३३ ॥

राजोवाच ।

राजा निमि बोले, कि—नारायण जिनका नाम ऐसे परमात्मा पद की निष्ठा अर्थात् स्वरूप को आप कथन करने को योग्य हैं क्योंकि ? आप लोग पूर्ण ब्रह्म ज्ञानी हैं ॥ ३४ ॥

पिप्पलायन उवाच ॥

पिप्पलायन नामक योगेश्वर बोले, कि—हे नरेन्द्रः !

सत्त्वं रजस्तम इति त्रिवृदेकमादौ सूत्रं महानहमिति प्रवदन्ति जीवम् ।
ज्ञानक्रियार्थफलरूपतयोरुशक्ति ब्रह्मैव भाति सदसच्च तयोः परं यत् ॥ ३७ ॥
नात्मा जजान न मरिष्यति नैधतेऽसौ न क्षीयते सवनविद्व्यभिचारिणां हि ।
सर्वत्र शश्वदनपाय्युपलब्धिमात्रं प्राणो यथेन्द्रियबलेन विकल्पितं सत् ॥ ३८ ॥
अण्डेषु पेषिषु तरुष्वविनिश्चितेषु प्राणो हि जीवमुपधावति तत्र तत्र ।
सन्ने यदिन्द्रियगणेऽहमि च प्रसुप्ते कूटस्थ आशयमृते तदनुस्मृतिर्नः ॥ ३९ ॥
यर्ह्यब्जनाभचरणैषणयोरुभक्त्या चेतोमलानि विधमेद्गुणकर्मजानि ।
तस्मिन्विशुद्ध उपलभ्यत आत्मतत्त्वं साक्षाद्यथाऽमलदृशोः सवितृप्रकाशः ॥४०॥

भाषा टीका ।

जो इस जगत् के सृष्टि स्थिति प्रलय का हेतु अर्थात् निमित्त और उपादान कारण है, और स्वयं अहेतु है अर्थात् जिसका अन्य कुछ कारण नहीं है, और जो जीव के सर्व अवस्थाओं में अन्तर्यामी होकर वर्त्तमान है तथा बाहर भी सर्वत्र व्याप्त है और जिसके चेताये हुए इन्द्रियें प्राण हृदय ये सब प्रवृत्त होरहे हैं वही नारायण है उसी को पर तत्त्व जानो ॥ ३५ ॥

फिर उन नारायणाख्य परब्रह्म का स्वरूप कैसा है, कि—जिसको मन नहीं जान सक्ता है, वागादि कर्मेन्द्रियों के द्वारा जो नहीं ज्ञात होवै, एवं चक्षु बुद्धि प्राण और इन्द्रियें जिसको विषय नहीं कर सक्तीं हैं जैसे, कि महान् अग्नि को अग्नि की चिनगारी नहीं प्रकाशित करतीं हैं । इस प्रकार प्रत्यक्ष और तन्मूलक अनुमान से ज्ञात होना परमात्मा का निषिद्ध किया, यदि वह ब्रह्म किसी प्रमाण का ही विषय न भया तो वह गगन कुसुम सदृश तुच्छ ही होजायगा इस लिये ब्रह्म के विषय में शब्द ही प्रमाण है इस बात को प्रति पादन करते हैं, कि—"न चक्षुषा गृह्यते नापि वाचा" न ब्रह्म चक्षु से गृहीत होता है, न वागिन्द्रिय से इत्यादिक शब्द चक्षुरादि ग्राहकान्तरों के निषेध पूर्वक अर्थोक्त नाम परिशेषन्याय सिद्ध ब्रह्म को आत्ममूलत्व अर्थात् शब्द मूलत्व कहता है । क्योंकि ? जिस शब्द मूलता के विना चक्षुराद्यग्राह्यत्वरूप निषेध की भी सिद्धि तौ नहीं होसक्ती है ॥ ३६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु तर्हि प्रमाणाविषयत्वान्नास्ति ब्रह्मेति प्रसज्येतात आह-सत्त्वमिति । सत्स्थूलं कार्यमसत्सूक्ष्मं कारणं तत्सर्वं ब्रह्मैव भाति कुतः यद्यस्मात्तयोः सदसतोः परं कारणम् ननु कथमेकं बहुविधस्य कारणं तत्राऽऽह उरुशक्ति अनेकशक्तिमत् उरुर्महती माया लक्षणा शक्तिर्यस्य तदिति वा बहुधा भानमेव दर्शयति आदौ यदेकं ब्रह्म तदेव सत्त्वरजस्तम इति त्रिवृत्प्रधानं प्रवदन्ति ततः क्रियाशक्त्या सूत्रं ज्ञानशक्त्या महानिति तदेव प्रवदन्ति ततः अहमिति जीवं जीवोपाधिमहङ्कारं च तदेव प्रवदन्ति ततश्च ज्ञानक्रियार्थफलरूपतया ज्ञानशब्देन देवताः क्रिया इन्द्रियाणि अर्था विषयाः फलं तत्प्रकाशः सुखादि वा तद्रूपतया ब्रह्मैव भाति नहि सर्वस्वरूपेण स्वतो भासमानस्य ब्रह्मणः स्वसिद्धौ प्रमाणापेक्षेति भावः ॥ ३७ ॥

ननु सर्वात्मकं चेद्ब्रह्म तर्हि सर्वस्य कार्यस्य जन्मादिविकारवत्त्वाद्ब्रह्मणोऽपि तत्प्रसङ्गः स्यादत आह–नात्मेति । आत्मा ब्रह्म न जजान न जातः जन्माभावादेव तदनन्तरास्तितालक्षणोऽपि विकारो नास्ति नैधते न वर्धते वृद्ध्यभावादेव विपरिणामोऽपि निरस्तः कुतः हि यस्माद्व्यभिचारिणामागमापायिनां बालयुवादिदेहानां सवनवित्तत्तत्कालद्रष्टा न ह्यवस्थावतां द्रष्टा तदवस्थो भवतीत्यर्थः । ननु निरवस्थः कोऽसावात्मा अत आह–उपलब्धिमात्रमिति नन्वायातं तर्हि क्षणिकत्वेनेत्यत आह सर्वत्रेति सर्वत्र देशे शश्वत्सर्वदा अनपाय्यनुवर्तमानम् ननु नीलज्ञानं जातं पीतज्ञानं नष्टमिति प्रतीतेर्न ज्ञानस्यानपायित्वमत आह–इन्द्रियबलेनेति । सदेव ज्ञानमिन्द्रियबलेन विविधं कल्पितम् नीलाद्याकारा वृत्तय एव जायन्ते नश्यन्ति च न ज्ञानमिति भावः । व्यभिचारिष्वव्यभिचारे दृष्टान्तः प्राणो यथेति ॥३८॥

दृष्टान्तं विवृण्वन्निन्द्रियादिलयेन निर्विकारात्मोपलब्धिं दर्शयति—अण्डेष्विति । पेशिषु जरायुजेषु तरुषु उद्भिज्जेष्वविनिश्चितेषु स्वेदजेषु उपधावत्यनुवर्तते एवं दृष्टान्ते निर्विकारत्वं प्रदर्श्य दार्ष्टान्तिकेऽपि दर्शयति कथम् तदैवाऽऽत्मा सविकार इव प्रतीयते यद्यदा जागरे इन्द्रियगणः यदाच स्वप्ने तत्संस्कारवानहङ्कारः यदातु प्रसुप्तं तदा तस्मिन् प्रसुप्ते इन्द्रियगणे लीने अहमि अहङ्कारे च सन्ने कूटस्थो निर्विकार एवात्मा कुतः आशयमृते लिङ्गशरीरमुपाधिं विना विकारहेतोरुपाधेरभावादित्यर्थः ननु अहङ्कारपर्यन्तस्य सर्वस्य लये शून्यमेवावशिष्येत तत्कथं तदा कूटस्थ आत्मा अत आह—तदनुस्मृतिर्नः । तस्य दर्शनस्पर्शनादिविशेषज्ञानशून्यस्य सुखात्मनः सुषुप्तिसाक्षिणः स्मृतिर्नोऽस्माकं भवति एतावन्तं कालं सुखमहं सुप्तो न किञ्चिदवेदिषमिति अतोऽननुभूतस्यास्मरणादस्त्येव सुषुप्तावात्मानुभवो विषयसम्बन्धाभावात्तु न स्पष्ट इति भावः । तथा च श्रुतिः "यद्वै-

श्रीधरस्वामिकृतभावार्थदीपिका।

तन्न पश्यति पश्यन्वैतद्द्रष्टव्यं न पश्यति नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यत" इति ॥ ३९ ॥

ननु यदि सुषुप्तौ कूटस्थात्मानुभवो भवेत्कथं पुनरपि संसारः स्यात् अविद्यातत्संस्काराणां विद्यमानत्वादिति चेत्कदा तर्हि तन्निवर्तकोऽनुभवो भवेदत आह—यर्हीति। वित्तैषणादिविहाय केवलमब्जनाभस्यैव चरणेच्छया या उरुभक्तिस्तया पुमांश्चेतसो मलानि विधमेन्नाशयेत् चेत एव वा कर्तृ स्वगतानि मलानि तया भक्त्या क्षालयेत् तदा तस्मिन्विशुद्धे चेतसि सति साक्षादव्यवधानेनाऽऽत्मतत्त्वमुपलभ्यते अमलयोर्दृशोः सत्योर्यथापूर्वमेव सिद्धः सवितृप्रकाश इति ॥ ४० ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी।

तर्हि यदि शब्देन निषेध एव पर्यवस्यन् इति शब्दस्य निषेध एव प्रामाण्यं न ब्रह्मणि तदा प्रमाणाविषयत्वान्निष्प्रमाणकत्वाद ब्रह्म नास्ति, यन्निष्प्रमाणकं तदसदिति व्याप्तेः। ततः प्रधानकल्पनानन्तरम्। तदेव ब्रह्मैव ततः महत्कल्पनानन्तरं ततश्चाहङ्कारकल्पनानन्तरं देवताः सात्त्विकाहङ्कारकार्याः इन्द्रियाणि राजसाहङ्कारकार्याणि विषयास्तामसाहङ्कारकार्याः तत्प्रकाशः विषयप्रकाशः सुखादि सुखं सात्त्विकम आदिना दुःखमोहयोः परिग्रहः सर्वस्वरूपेण प्रमाणप्रमेयादिरूपेण स्वतो भासमानस्य स्वप्रकाशस्य ॥ ३७ ॥

तत्प्रसङ्गः। जन्मादिविकारप्रसङ्गः तत्तत्कालद्रष्टा बालयुवाद्यवस्थासाक्षी अवस्थावतां देहानां तदवस्थः बालयुवाद्यवस्थः उपलब्धिमात्रं ज्ञानैकरसं क्षणिकविज्ञानवादी बौद्धः शङ्कते। नन्विति। सर्वदा सर्वस्मिन् काले अनुवर्त्तमानं नित्यत्वेनानुगतं पुनः शङ्कते नन्विति। अनपायित्वं नित्यत्वेनानुवर्त्तमानत्वं सदेव नित्यस्थिरमेव जायन्ते इति अध्यस्तानां वृत्तीनामेव जन्मनाशौ नाधिष्ठानत्वेनानुगतस्य ज्ञानस्येत्यर्थः। व्यभिचारिषु बालादिदेहेषु अत्रागमापायिदेहेभ्यस्तदवधिरूप आत्मा भिन्न इति प्रथमस्तर्कः तथा द्रष्टात्मा दृश्यदेहभिन्न इति द्वितीयोऽपि तर्क इति ज्ञेयम् ॥ ३८ ॥

निर्विकारात्मोपलब्धि सुषुप्तौ निर्विशेषात्मानुभवम अनुवर्त्तते उपाधित्वेनानुगच्छति दृष्टान्ते प्राणे निर्विकारित्वम् अण्डजादिवदनश्वरत्वं दार्ष्टान्तिके प्राणदृष्टान्तेनोपपादनीये शुद्धात्मनि कथमिति केन प्रकारेण निर्विकारत्वदर्शनमित्यर्थः प्रकारमेवाध्याहारेण व्याचष्टे—तदैवेति। मूले यदित्यव्ययं यदेत्यर्थः तस्यैव पुनर्मूले योजनार्थं यदा चेत्यावृत्तिः कृता तत्संस्कारवान् जागरवासनावान् एवमवस्थाद्वये विकारित्वप्रतीतिं मूलाद्बहिरेव संयोज्य निर्विकारत्वं मूलयोजनयाह—यदात्विति। प्रसुप्तमिति भावे क्तः जीवेन सुप्यते स्मेत्यर्थः। तस्मिन् जीवे प्रसुप्ते सति सर्वस्य स्थूलसूक्ष्मोपाधेः तदा सुषुप्त्यवस्थायां विशेषज्ञानशून्यस्य विशेषज्ञानं वृत्तिज्ञानं तेन शून्यस्याखण्डात्मन इत्यर्थः। नोऽस्माकं जाग्रद्द्रष्टॄणां स्मृतिमभिनयेन दर्शयति—एतावन्तमिति। अतः जागरे तथा स्मरणात् पूर्वं नानुभूतं यत्तस्य स्मरणासम्भवादनुभवस्मरणयोश्च सामानाधिकरण्यात् सुषुप्त्यवस्थायामज्ञानसाक्षिसुखात्मनोऽनुभवोऽस्त्येव विषयेति स्वरूपातिरिक्तस्य विषयस्य देहेन्द्रियाद्युपाधेः सम्बन्धाभावात् स्वरूपमात्रानुभवो जाग्रदाद्यनुभववन्न स्पष्ट इत्यर्थः। तथाच श्रुतिः सुषुप्तावात्मानुभवे प्रमाणं श्रुतिः यद्वैतदित्यादिका पश्यन्नलुप्तज्ञान एतात्मा तत्तदा सुषुप्तौ न पश्यतीति यत्तद्द्रष्टव्यं विषयं न पश्यतीत्यभिप्रायादेव सुषुप्तावप्यलुप्तज्ञानत्वे हेतुः। नहीति। हि यतः द्रष्टुः साक्षिणः दृष्टेः स्वरूपज्ञानस्य विपरिलोपो नाशो न विद्यते नाशायोग्यत्वादित्यर्थः। नहि प्रकाश्यनाशे सवितृप्रकाशो नश्यतीति भावः। तर्हि कुतो न पश्यति द्रष्टव्यस्य द्वितीयस्याभावादिति ज्ञेयं तदुक्तं भगवद्भाष्यकारैः अन्तरा चेति सूत्रव्याख्यानावसरे सुषुप्तं प्रकृत्य विषयाभावादियमचेतनता न चैतन्याभावादिति अयं साक्षिसाक्ष्यविभागेन तृतीयस्तर्कः सुखमात्रावशेषात् दुःखिप्रेमास्पदत्वविभागेन चतुर्थोऽपि तर्को ज्ञेयः। तदुक्तमभियुक्तैः "अन्वयव्यतिरेकाख्यस्तर्कः स्याच्चतुरात्मकः। आगमापायितदवधिभेदेन प्रथमो मतः। द्रष्टृदृश्यविभागेन द्वितीयोऽपि मतस्तथा। साक्षिसाक्ष्यविभागेन तृतीयः सम्मतः सताम्। दुःखिप्रेमास्पदत्वेन चतुर्थः सुखबोधक" इति ॥ ३९ ॥

नन्विति। शङ्कासमाधानाभासः अविद्या न किञ्चिदवेदिषमित्यनेनोक्तं मूलाज्ञानं तत्संस्कारा अज्ञानवासनाश्च तेषां विद्यमानत्वात् कूटस्थात्मानुभवेऽपि सुषुप्त्युपरमे पुनरपि संसारः स्यादिति योजना यर्हि पुनरपि संसारस्तर्हि तन्निवर्त्तकः अविद्यादिनाशकः वित्तैषणादीत्यादिना पुत्रैषणालोकैषणयोः परिग्रहः अव्यवधानेन सुषुप्तिवत् अविद्यादिव्यवधानाभावेन तथाच श्रुतिः "अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते" इति ॥ ४० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्।

सदसदात्मकसकलतत्त्वशरीरकं तद्विलक्षणं चेत्याह—सत्त्वं रज इति। त्रिवृत् गुणत्रयाश्रयम् एकं प्रधानतत्त्वं कार्याणामाधारत्वात् सूत्रस्थनीयमिति तत्त्वानि वदन्ति जीवं ज्ञानक्रियार्थफलरूपतया प्रवदन्तीत्यन्वयः। ज्ञानपूर्वकाक्रियया कर्मानुष्ठानेन साध्यः स्वर्गाद्यर्थो यस्य फलं सत्ता न क्रियार्थफलः तद्रूपतया भोक्तृत्वेन प्रवदन्ति सदसच्चेतनमचेतनं च अचिन्त्यशक्ति ब्रह्मैव भाति चिदचिच्छरीरकं भाति प्रमाणैरवगम्यते तयोः परं चिदचिद्विलक्षणमित्यर्थः। एवं परमात्मनोऽशेषचिदचिच्छरीरकस्य सर्वविलक्षणत्वमुक्तम् ॥ ३७ ॥

अथ तच्छरीरभूतस्य जीवस्य षड्भावविकारराहित्यमुच्यते नात्मेति। न मरिष्यति कालान्तरेऽपि न मरिष्यति अपक्षयो नाशात् पूर्वावस्था सर्वत्र देवादिशरीरेषु अनपायि आमोक्षात्प्रकृतिसम्बद्धमित्यर्थः। उपलब्धिमात्रं न कश्चिज्जडम् शरीरम् प्राणमतीति प्राणः प्राणसृष्टो वा यथेन्द्रियबलेन विकल्पितः सन् इन्द्रियव्यापारानुगुणं पश्यामि शृणोमीति चाक्षुषश्रावणादि विज्ञानविकल्पवान् ॥ ३८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

सर्वशरीरेषु प्रविशतोऽपि जीवस्यैकरूपत्वमाह—अण्डेष्विति । आण्डेषु पेशिषु मांसपिण्डेषु जरायुजशरीरेषु प्राणः सूक्ष्मशरीरधारकः जीवमुपधावति अहमिति अहङ्कारो मनोबुद्ध्यहङ्कारचित्तानामुपलक्षणम् अहङ्कारादिमनोवृत्तिषु उपरतास्वित्यर्थः । तदानीं सदा जीवो विद्यमानोऽपि अविद्यमान इव भवति न स्फुटतरः प्रकाशते इत्यर्थः । तत्र हेतुमाह । आशयमृते इति । तदनुस्मृतिर्नः जीवः अस्मिन्नासमन्तात् शेते इत्याशयः शरीरं शरीरावभासेन विना तदनुस्मृतिः जीवविषयप्रत्यभिज्ञा न प्रकाशो न स्थूलोऽहं कृशोऽहमिति देहादिविशिष्टतयैव जीवस्य स्फुटावभासः अतः सुषुप्तावविशदावभासं इत्यर्थः ॥ ३९ ॥

देहाद्युपाधिरहितं परिशुद्धं भगवदात्मकं यथावस्थितात्मकं स्वरूपं भक्तियोगनिर्मलेनैव मनसा साक्षात्क्रियत इत्याह—यर्हीति । एषणा इच्छा अन्वेषणा वा तस्मिन् चेतसि ॥४०–४२॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं प्रत्यक्षादिप्रमाणान्तरावेद्यं केवलं वेदान्तैकवेद्यं परं ब्रह्मेत्युक्तं यद्यपि "मनसा तु विशुद्धेन हृदा मनीषा मनसाभिक्लृप्त" इति योगपरिशुद्धमनसोऽपि प्रमाणत्वावगमान्न शब्दैकवेद्यं ब्रह्म तथापि तस्यापि तत्र प्रामाण्यं शब्देनावगम्यते इति शब्दैकवेद्यमेव परं ब्रह्म प्रत्यक्षावेद्यत्वोक्त्या तद्वेद्यचिदचिद्विलक्षणत्वं सूचितम् । अथ तद्विलक्षणत्वमेव निदर्शयंश्चिदचिदात्मकसकलतत्त्वशरीरकत्वमाह—सत्त्वमिति । सत्त्वं रजस्तम इति त्रयाणां गुणानां वृद्धत्तनम् यस्मिँस्तदेकं त्रिगुणात्मकं यदेकं प्रधानं तत्त्वमित्यर्थः कथंभूतं सूत्रं कार्याणामाधारत्वात्सूत्रस्थानीयं यश्च तत्कार्यभूतो महानहङ्कारश्चेत्येतानि प्रवदन्ति तत्त्वत्वेन निरूपयन्तीत्यर्थः अहंशब्दस्तत्कार्याणां सर्वेषामुपलक्षणार्थः तथा जीवं च ज्ञानक्रियार्थफलरूपतया प्रवदन्ति ज्ञानक्रिया ज्ञानपूर्वककर्मानुष्ठानं तस्यार्थः प्रयोजनं स्वर्गादिः स एव फलं यस्य तद्रूपतया भोक्तृत्वेन प्रवदन्ति यद्वा ज्ञानशब्देन ज्ञानेन्द्रियाणि क्रियाशब्देन कर्मेन्द्रियाणि अर्थास्तद्विषयास्तेभ्यः फलं सुखदुःखादि यस्य तद्रूपतया विषयेन्द्रियसम्बन्धजन्यसुखदुःखादिभोक्तृत्वेन प्रवदन्ति एवं रूपं सच्चेतनमसदचेतनं च उरुशक्ति अचिन्त्यशक्ति ब्रह्मैव भाति चिदचिच्छरीरकं भाति प्रमाणैरवगम्यत इत्यर्थः । शरीरात्मभावनिबन्धनमिदं सामानाधिकरण्यमत एवाह—तयोः परं चिदचिद्विलक्षणं चेति सदसच्छब्दौ चेतनाचेतनपरौ तत्र सच्छब्दस्य प्रवृत्तौ निमित्तं स्वरूपान्यथाभावरूपविकाररहितत्वम् असच्छब्दस्य तु तद्वत्त्वं चेति विवेकः ॥ ३७ ॥

तत्र तावत्परमात्मशरीरभूते चिदचिद्वस्तुनि सच्छब्दस्य प्रवृत्तौ निमित्तभूतं स्वरूपतः षड्भावविकाररहितत्वमुपपादयति—नात्मेति । आत्मा जीवो न जजान न जायते नोत्पद्यत इत्यर्थः जन्माभावादेव तदनन्तरास्तित्वलक्षणविकारोऽपि नास्ति नैधते न वर्धते वृद्ध्यभावादेव परिणामोऽपि निरस्तः न मरिष्यति कालान्तरेऽपि न मरिष्यतीदानीमपि न नश्यत्यसावात्मा न क्षीयते अपक्षयो नाशात्पूर्वावस्था कुतः हि यस्माद्व्यभिचारिणामागमापायिनां देहानां सवनवित् तत्तत्कालद्रष्टा न ह्यवस्थावतां द्रष्टा तदवस्थाभाग्भवतीत्यर्थः । सर्वत्र देवादिशरीरेषु शश्वत्सदाऽनपाय्यामोक्षात्प्रकृतिसम्बन्धवानित्यर्थः उपलब्धिमात्रं ज्ञानमात्रस्वरूपं मात्रशब्देन क्वचिदपि जडत्वव्यावृत्तिः प्राणः शरीरं प्राणयति प्रवृत्तिनिष्ठं करोतीति तथा प्राणसंसृष्टो वा यथेन्द्रियबलेन विकल्पितः सन् इन्द्रियव्यापारानुगुणं पश्यामि शृणोमीति चाक्षुषश्रावणादिविज्ञानविकल्पवान् विकल्पितं सदिति पाठान्तरं तदा आत्मा जन्मादिरहितः कुतः यस्माज्जन्मादयः व्यभिचारिणामनित्यानां देहानामेवात्मा तु सवनवित्सवनानि भूतभविष्यद्वर्तमानकालात्मकानि वेत्तीति तथा कालत्रयानुवर्ती नित्य इति यावत् सवनवित्त्वमेव सच्छब्दवाच्यात्मनः स्पष्टयति सर्वत्र सश्वदनपायीति सदात्मा सर्वत्र शश्वत्सर्वदाचानपायिस्वरूपं मूर्तिरहितं तत्र हेतुः उपलब्धिमात्रं ज्ञानैकस्वरूपं मात्रशब्देन जडव्यावृत्तिः जडमेव ह्यपायीति भावः । ननु ज्ञानादीनामपि चाक्षुषश्रावणादीनामपायित्वं दृष्टमत आह । इन्द्रियबलेन विकल्पितम् आत्मनो यद्धर्मभूतं ज्ञानं तच्चक्षुरादीन्द्रियव्यापारवशाद्विकल्पितं चाक्षुषश्रावणादिभेदभिन्नं सदपायि नतु स्वरूपभूतज्ञानमिति भावः यथा प्राणः स्वत एकोऽपि प्राणापानादिवृत्तिभेदाद्विकल्पितस्तद्वदिति ॥ ३८ ॥

सर्वत्र शश्वदनपायीत्युक्तं सर्वशरीरेषु धारकतया विशतो जीवस्वरूपस्यैकरूपत्वमेव प्रपञ्चयति । अण्डेष्विति । अण्डेषु पेशिषु मांसपिण्डेषु जरायुजशरीरेषु तरुष्वित्युद्भिज्जोपलक्षणम् अविनिश्चितेषु स्वेदजेषु किं बहुना तत्र तत्र शरीरेषु प्राणो देहधारकः जीवमुपधावत्यनुवर्तते सर्वेषु शरीरेषु प्राणद्वारा धारकतया जीवः प्रविशति इत्यर्थः । कूटस्थः अत्र यत्तच्छब्दाध्याहारेण सम्बन्धः यं हि जीवं प्राण उपधावति स कूटस्थो निर्विकारः सततमेकरूप इति किमेवंविध आत्मा सर्वेषामनुभवसिद्धः नेत्याह—सन्नइति । सन्नः विशीर्णः विकारी चेति यावत् निर्विकारतया विद्यमानोऽप्यविद्यमान इव भवति न स्फुटतरं प्रकाशते इत्यर्थः । कदा तर्हि स्फुटतरात्मप्रकाशः कश्च प्रकाशाभावहेतुरित्यत्राह । इन्द्रियगणः अहमि अहङ्कारे च प्रसुप्ते ऽहंकारादिमनोवृत्तिषूपरतास्वित्यर्थः । आशेतेऽस्मिन्नित्याशयः शरीरं तमृते शरीरावभासेन विनेत्यर्थः । नोऽस्माकं जीवानामित्यर्थः यथा यथा तत्तदनुस्मृतिः यथावस्थितजीवस्वरूपविषयप्रकाशो भवतीत्यर्थः । इन्द्रियगणोऽहमि प्रसुप्ते आशयमृते इत्यनेन मनोवृत्तिशरीरावभासयोः स्फुटतरात्मप्रकाशाभावहेतुत्वं सूचितं सन्न इति सप्तम्यन्तपाठश्च दृश्यते तदेन्द्रियगणे सन्ने शब्दादिविषयप्रावण्यरहिते सति अहम्यहङ्कारे प्रसुप्ते लीने देहात्माभिमाने निवृत्ते सत्यत एवाशयमृते देहावभासं विना यथावदात्मस्वरूपप्रकाशो भवतीत्यर्थः ॥ ३९ ॥

कदा महाहङ्कारादिमनोवृत्तिनिवृत्तिः केन वा यथावत्तदनुस्मृतिरित्यत्राह—यर्हीति । अब्जनाभस्य भगवतश्चरणयोरेषणया वित्तेषणादिपरित्यागपूर्वकं भगवच्चरणाब्जैकेषणया या उरुभक्तिस्तया भक्त्युरुत्वं नामाविच्छिन्नत्वं गुणकर्मजानि सत्त्वादिगुण-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

मूलकपुण्यापुण्यात्मककर्मजानि चेतसो मलानि रागद्वेषादीनि विधमेद्याशयेत्ततो विशुद्धे निर्मले तस्मिंश्चेतस्यात्मतत्त्वमात्मयाथात्म्यं साक्षादुपलभ्यते अमला हग्दोशुर्यस्य तस्य सवितृप्रकाश इव विशुद्धमिति पाठे देहाद्युपाधिरहितं परिशुद्धं भगवदात्मकं यथावस्थितमात्मस्वरूपं भक्तिनिर्मलेन मनसा साक्षात्क्रियत इत्यर्थः ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

मुमुक्षुणा विद्याविद्ये ज्ञातव्ये "विद्यां चाविद्यां च यस्तद्वेदोभयं सह । अविद्यया मृत्युं तीर्त्वा विद्यया मृतमश्नुते" इति श्रुतेस्तत्र विद्यां निरूप्य अविद्यां निरूपयति—सत्त्वमिति । जीवं हरे रूपमिति प्रवदन्त्यज्ञा इति शेषः । केचिदादौ स्थितमेकं त्रिवृत्त्रिगुणात्मकं प्रधानमिति सङ्गिरन्ते "प्रधानादिदमुत्पन्न"मिति श्रुतेः । सत्त्वं रजस्तम इति केचित् सूत्रं वायुर्महान् ब्रह्मा अहं रुद्र इत्येके हरेरूपमिति वदन्ति किं बहुना उरुशक्ति ब्रह्मैव ज्ञानक्रियार्थफलरूपतया ज्ञानक्रियाशब्देन ज्ञानकर्मेन्द्रियाण्यर्थशब्देन शब्दादिविषयाः फलशब्देन सुखदुःखे चोच्येते एषां रूपत्वेन भातीत्यपरे सदसत् कार्यकारणरूपत्वेनावभातीति । ननु 'सच्चत्यच्चाभव'दिति श्रुतेः कार्यकारणादिरूपदर्शनस्याविद्यात्वं कथमत्राह—तयोरिति । तयोः कार्यकारणयोः परं विलक्षणं भिन्नं ब्रह्मेति यद्यस्मात्तस्मात्तदात्मना दर्शनमविद्येत्यर्थः—

> त्रिगुणात्मकं प्रधानं च रजः सत्त्वं तमस्तथा ।
> प्राणो महानहङ्कारो जीवास्तदभिमानिनः ॥
> ज्ञानात्मकानीन्द्रियाणि तथा कर्मात्मकानि च ।
> शब्दाद्यर्थाः सुखं दुःखमिति प्रोक्तं द्विधा फलम् ॥
> एतत्सर्वं हरेरूपमित्याहुर्ज्ञानदुर्बलाः ।
> स एव बहुशक्तित्वाद्भाति चैषां तथा तथा ॥
> एवं कारणकार्याख्यं समस्तं हरिमेव तु ।
> केचित्पश्यन्ति च व्यक्तं केचिदाहुरपण्डिताः ॥
> एवं कारणकार्येभ्यः परमानन्दरूपिणम् ।
> अज्ञानाद्बहुधा प्राहुरेकं सन्तं सुदुर्जनाः ॥
> रूप्यत्वात्तद्वशत्वाच्च तद्रूपं चैतदीर्यते ।
> न तु तस्य स्वरूपत्वान्निर्दोषानन्दरूपिणः ॥
> तथा जडाजडैक्यं स्यात्कुतः पूर्णाल्पमोदयोः ।
> पूर्णाल्पज्ञानयोश्चैव पूर्णशक्त्यल्पशक्तयोः ॥
> निर्दुःखदुःखान्वितयोः स्वतन्त्रपरतन्त्रयोः ॥
> अतः सर्वगुणैर्युक्तं सर्वदोषविवर्जितम् ।
> अन्याभेदेन विज्ञाय तम एव प्रपद्यते ॥
> निष्कृष्टं सर्वतो विष्णुं सर्वतश्च विलक्षणम् ।
> ज्ञात्वा पूर्णगुणं यान्ति मुक्तिं नास्त्यत्र संशयः ॥

इति प्रमाणासिद्धत्वादुक्त पदार्थो ननु सदनुविद्धत्वात्सर्वस्य तद्रूपत्वमिति ॥ ३७ ॥

किञ्च कार्याद्यभिन्नत्वे तज्जन्मादिमत्त्वं प्रसज्यते न च तत्तथा तस्माद्भिन्नमेवेति युक्तिमाह—नात्माविति । कालत्रयसम्बन्धित्वान्नौपचारिकोऽयं निषेधः तथा जन्मादिमत्पदार्थस्थत्वेन तद्धर्मत्वं नौपचारिकं ब्रह्मण इत्यत्राह-सर्वत्रेति । सर्वेषु जन्मादिमत्सु पदार्थेषु शश्वदेकविधं न विकारि अत एवानपायि विनाशरहितं तत्र हेतुगर्भविशेषणमुपलब्धिमात्रमिति । प्रकृत्यादिमिश्ररहितज्ञानात्मकत्वादित्यर्थः । अदृष्टत्वादसत्कल्पमिदमत्राह—इन्द्रियेति । सद्ब्रह्म इन्द्रियेषु दृश्यमानं दर्शनादिबलेन विकल्पि विविधं कल्पितं दर्शनशक्तिदं श्रवणशक्तिदं ज्ञानशक्तिदमिति कथमिव यथेन्द्रियगतः प्राण इन्द्रियशक्त्या दर्शनादिशक्तिप्रदत्वेन विकल्पित इति तदुक्तम्—

> यथेन्द्रियगतः प्राणस्तेषां शक्त्या विकल्प्यते ।
> दृष्टिदः श्रुतिदश्चेति मतिदो ज्ञानदस्तथा ॥
> इत्यादिभेदतो वाच्य एक एव महाबलः ।
> दृष्ट्यादिशक्तिस्तस्यैव यतो नान्यस्य कस्यचित् ॥
> एवं सद्रूपकं ब्रह्म तत्तच्छक्त्या विकल्प्यते ।
> एकमेव महाशक्तिप्राणस्यापि बलप्रदम् ॥

इति "जीव प्राणधारणे" इति धातोः हरेः जीवशब्दवाच्यत्वं प्राणस्यापि शक्तिप्रदत्वं च युज्यते—

> अहं हि जीवसंज्ञो वै मयि जीवः समाहितः ।
> मैवं त्वयानुमन्तव्यं दृष्टो जीवो मयेति ह ॥
> अहं श्रेयो विधास्यामि यथाधिकारमीश्वरः ॥

इति प्रमाणाद्दह्यमानगृहान्तरस्थितयोगिवत् ब्रह्मणोऽपि तत्तत्पदार्थस्थत्वेऽपि तत्तद्दोषलेशसम्बन्धो नास्तीति युक्तम् ॥ ३८ ॥

नानायोनिषु वर्तमानस्य जीवस्य देहाद्देहान्तरप्राप्तौ सुप्तौ वा स्वातन्त्र्यप्रतीतेरस्यैकस्यानुपपत्त्या प्राणस्य क्षीरनीरवत्सहावस्थानेऽपि परमात्माधीनत्वाच्च हरेः सर्वोत्कृष्टत्वमप्रतिहतमिति भावेनाह । अण्डेष्विति—जीवस्तत्र तत्र तेषु तेषु अण्डेषु पक्ष्यादि कोशेषु तेषु तज्जन्येषु इत्युपलक्ष्यते पेशो जरायुस्तद्वत्सु पेशिषु जरायुजेष्वित्यर्थः—

> पेशो जरायुरुद्दिष्टः सुवर्णं पेश उच्यते ।
> मृदुपिण्डश्च पेशः स्यात्कांचिद्ध्रुद्रमपीष्यते ॥

इत्यभिधानं तरुषु उद्भिज्जेषु अवनिस्थितेषु स्वेदजेषु भूस्वेदेन जातमत्कुणादिशरीरेषु प्रवेक्ष्यन् पूर्वं देहं हित्वा प्राणं प्रविश्य परमात्मानं प्रविष्टेन प्राणेन परमात्मना सहोपधावति गच्छति प्रविशति—

> "देहाद्देहान्तरगतौ प्रविशेत्प्राणमेव तु ।
> जीवः प्राणः परात्मानमेवं सुप्तावपि स्फुटम् ॥
> तदन्या देवताः सर्वाः प्राणस्यैव वशे स्थिताः ।
> ईषच्च सुप्तवद्यान्ति नैव मानुषजीववत् ॥
> स्वर्गस्थानां नतु स्वापः प्रायो देहेऽपि नाशता ।
> मृतिसुप्तिप्रबोधादेर्नियन्ता हरिरेकराट् ।
> तस्मृते नैव चावस्था नावस्थावान्न च स्मृतिः ॥
> ततस्तु देवदेवेशः प्राणः प्राणेश्वरो हरिः ।
> न हरेरीशिता त्वन्यः स हि सर्वाधिको मत" ॥

इति उक्तार्थे मानं मतीन्द्रियगुणे बुद्धीन्द्रियाणां गुणे शब्दादिविषयवृत्तिलक्षणव्यापारे छन्ने सम्वृतेऽप्यहमिति वाहङ्कारे च प्रसुप्ते सर्वेन्द्रियप्रवृत्त्युपरमेण देहाभिमानाभावलक्षणायां सुप्तौ प्राणं प्रविश्य छन्नः प्राणेन कूटस्थे निर्विकारहृदयस्थे परमात्मन्यासः परमात्मानं विशिनष्टि । यमृत इति । यं परमात्मानमृते तदनुस्मृतिः तस्यानुस्मृतिरेव न स्यात् एतावन्तं कालं सुखमस्वाप्समिति सुख-

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

परामर्शो न स्यादित्यर्थः । तदा परमात्माकृष्टशक्तित्वेनाभिमानिदेवानां ज्ञानजनकशक्त्यभावो न दोषाय तदन्या देवताः सर्वा इत्युक्तत्वात् ॥ ३९ ॥

इदानीं सर्वोत्कृष्टत्वेन सर्वस्माद्भिन्नस्य सर्वोपकारकत्वेन प्रेष्ठस्य परमात्मतत्त्वस्यापरोक्ष्यं कदा नु स्यादिति सोदाहरणां तत्साधनमाह—यर्हीति । यर्हि यदा पद्मनाभचरणोषणया अनुदिनं प्रवृद्धयोर्व्या भक्त्या चेतसः सत्त्वादिगुणकर्मजातानि मलानि विधमेत्परिहरेत्तदा तस्मिन् चेतसि शुद्धे आत्मतत्त्वं परमात्मस्वरूपं साक्षादुपलक्ष्यते अपरोक्षीक्रियते कथमिव यथा सवितृप्रकाशोऽमलदृशौ निर्मले चक्षुषि दृश्यत इति ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

भक्तेस्तत्स्वाभाविकरूपत्वमाह—सत्त्वमिति । ब्रह्मैव उरुशक्ति अनेकात्मशक्तिमद्भाति एवकारेण ब्रह्मणा एव सा शक्तिर्न तु कल्पितेति स्वाभाविकरूपत्वं शक्तेर्बोधयति तत्र हेतुः यद्ब्रह्म सत्स्थूलं कार्यं पृथिव्यादिरूपम् असत्सूक्ष्मं कारणं प्रकृत्यादिरूपं तयोर्बहिरङ्गवैभवयोः परं स्वरूपवैभवं श्रीवैकुण्ठादिरूपं तटस्थवैभवं शुद्धजीवरूपं च अन्यथा तत्तद्भावासिद्धिः किंरूपतया तत्तद्रूपं ज्ञानक्रियार्थफलरूपतया महदादिलक्षणज्ञानशक्तिरूपत्वेन सूत्रादिलक्षणक्रियाशक्तिरूपत्वेन तन्मात्रादिलक्षणार्थरूपत्वेन प्रकृतिलक्षणतत्सर्वैक्यरूपत्वेन सदसद्रूपं फलरूपत्वेन तयोः परं तत्र फलं पुरुषार्थस्वरूपं सवैभवं भगवदाख्यं चिद्वस्तु तदनुगतत्वाच्छुद्धजीवाख्यं चिद्वस्तु च एतेन ज्ञानक्रियादिरूपेणोरुशक्तित्वं व्यञ्जितं शक्तेः स्वाभाविकरूपत्वं सप्रमाणं स्पष्टयति । आदौ यदेकं ब्रह्म तदेव सत्त्वं रजस्तम इति त्रिवृत् प्रधानं ततः क्रियाशक्त्या सूत्रं ज्ञानशक्त्या महानिति ततोऽहमहंकार इति तदेव च जीवं शुद्धस्वरूपं जीवात्मानं तदुपलक्षणकं वैकुण्ठादिवैभवं च प्रवदन्ति वेदाः ते च "सदेव सोम्येदमग्र आसी"दित्याद्याः आदावेकं ततस्तत्तद्रूपमिति शक्तेः स्वाभाविकत्वमायातम् अन्यस्यासद्भावेनौपाधिकत्वायोगात् स्वरूपवैभवस्याङ्गप्रत्यङ्गवान्नित्यसिद्धत्वेऽपि सूर्यसत्तया तद्रश्मिपरमाणुवृन्दस्येव तत्सत्तया लब्धसत्ताकत्वात्तदुपादानकत्वं तदादित्वं च स्यात् "यस्य भासा सर्वमिदं विभाति"इति श्रुतेः शक्तेरचिन्त्यत्वं स्वाभाविकत्वं चोक्तं विष्णुपुराणे—

"निर्गुणस्याप्रमेयस्य शुद्धस्याप्यमलात्मनः ।
कथं सर्गादिकर्तृत्वं ब्रह्मणोऽभ्युपगम्यते" ॥

इति मैत्रेयप्रश्नानन्तरं श्रीपराशरउवाच—

शक्तयः सर्वभावानामचिन्त्यज्ञानगोचराः ।
यतो ऽतो ब्रह्मणस्तास्तु सर्गाद्या भावशक्तयः ।
भवन्ति तपसां श्रेष्ठ ! पावकस्य यथोष्णता ॥

इति अत्र श्रीस्वामिटीका च तदेवं ब्रह्मणः सृष्ट्यादिकर्तृत्वमुक्तं तत्राशङ्कते निर्गुणस्येति सत्त्वादिगुणरहितस्य अप्रमेयस्य देशकालाद्यपरिच्छिन्नस्य शुद्धस्य सहकारिशून्यस्य अमलात्मनः रागादिशून्यस्य एवम्भूतस्य ब्रह्मणः कथं सर्गादिकर्तृत्वमिष्यते एतद्विलक्षणस्यैव लोके घटादिषु कर्तृत्वादिदर्शनादित्यर्थः । परिहरति । शक्तय इति सार्द्धेन । लोके हि सर्वेषां भावानां पावकस्योष्णताशक्तिवदचिन्त्यज्ञानगोचराः शक्तयः सन्त्येव अचिन्त्या भिन्नाभिन्नत्वादिविकल्पैश्चिन्तयितुमशक्याः केवलमर्थापत्तिज्ञानगोचराः सन्ति ब्रह्मणः पुनस्ताः स्वभावभूताः स्वरूपादभिन्नाः शक्तयः "परास्य शक्तिर्विविधैव श्रूयते" इति श्रुतेः अतो मणिमन्त्रादिभिरग्न्यौष्ण्यवन्न केनचिद्विहन्तुं शक्यन्ते अत एव निरङ्कुशमैश्वर्यं तथा च श्रुतिः "स वा अयमस्य सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपति"रित्यादिः यत एवमतो ब्रह्मणो हेतोः सर्गाद्याः भवन्ति नात्र काचिदनुपपत्तिरित्येषा । किञ्च ब्रह्मपदेन सर्वं खल्विदं ब्रह्मेति प्रसिद्धं व्यज्य सत्त्वादिगुणमयमायायास्तदनन्यत्वेऽपि निर्गुणस्येति प्राकृतगुणैरस्पृष्टत्वमङ्गीकृत्य तेषां बहिरङ्गत्वं स्वीकृतं तदेतदेव "मायान्तु प्रकृतिं विद्यान्मायिनन्तु महेश्वर"मित्येषा श्रुतिः स्वीचकार मायाञ्च तदपाश्रयामितिवन्महेश्वरत्वं मायाया बहिरङ्गाया आश्रय इति तां पराभूय स्थितमिति च लभ्यते तस्मात् पूर्ववदत्र शक्तेः स्वाभाविकत्वं मायादोषास्पृष्टत्वं च साधितम् अत एव श्रीगीतासु "ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वामृतमश्नुते अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते । सर्वतः पाणिपादं तदि"त्यादिना अत्र विशेषः श्रीभगवत्सन्दर्भे दृश्यः अयं प्रक्रिया एकमेव तत् परमं तत्त्वं स्वाभाविकाचिन्त्यशक्त्या सर्वदैव स्वरूपतद्रूपवैभवजीवप्रधानरूपेण चतुर्धावतिष्ठते सूर्यान्तर्मण्डलस्थतेज इव मण्डलतद्बहिर्गततद्रश्मितत्प्रतिच्छविरूपेण एवमेव श्रीविष्णुपुराणे—

एकदेशस्थितस्याग्नेर्ज्योत्स्ना विस्तारिणी यथा ।
परस्य ब्रह्मणः शक्तिस्तथेदमखिलं जगत् ॥

इति "यस्य भासा सर्वमिदं विभाती"ति श्रुतेः अत्र व्यापकत्वादिना तत्तत्समावेशाद्यनुपपत्तिश्च शक्तेरचिन्त्यत्वेनैव पराहता दुर्घटघटकत्वं ह्यचिन्त्यत्वं शक्तिश्च सा त्रिधा अन्तरङ्गा तटस्था बहिरङ्गा च तत्रान्तरङ्गया स्वरूपशक्त्याख्यया पूर्णेनैव स्वरूपेण वैकुण्ठादिरूपवैभवरूपेण च तद्वातिष्ठते तटस्थया रश्मिस्थानीयचिदेकात्मशुद्धजीवरूपेण बहिरङ्गया मायाख्यया प्रतिच्छविगतवर्णशावल्यस्थानीयतदीयबहिरङ्गवैभवजडात्मप्रधानरूपेण च चतुर्धात्वम् अत एव तदात्मकत्वेन जीवस्यैव तटस्थशक्तित्वं प्रधानस्य च मायान्तर्भूतत्वमभिप्रेत्य शक्तित्रयं विष्णुपुराणे गणितम्—

"विष्णुशक्तिः परा प्रोक्ता क्षेत्रज्ञाख्या तथापरा ।
अविद्याकर्मसञ्ज्ञान्या तृतीया शक्तिरिष्यते ॥
तया तिरोहितत्वाच्च शक्तिः क्षेत्रज्ञसंज्ञिता ।
सर्वभूतेषु भूपाल ! तारतम्येन वर्तते" ॥ इति

अविद्या कर्म कार्यं यस्याः सा तत्सञ्ज्ञा मायेत्यर्थः । यद्यपीयं बहिरङ्गा तथाप्यस्यास्तटस्थशक्तिमयमपि जीवमावरयितुं सामर्थ्यमस्तीत्याह—तयेति । तारतम्येन तत्कृतावरणस्य ब्रह्मादिस्थावरान्तेषु देहेषु लघुगुरुभावेन वर्तत इत्यर्थः । तदुक्तं "यया

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

सम्मोहितो जीव" इति यथैवाविद्यया मायया चिद्रूपतानिर्विकारतादिगुणरहितस्य प्रधानस्य विकारित्वं चेति ज्ञेयम् । अत्रान्तरङ्गत्वतटस्थत्वबहिरङ्गत्वादिनैव तेषामेकात्मकानां तत्तत्साम्यं नतु सर्वात्मनेति तत्तत्स्थानीयत्वमेवोक्तं नतु तत्तद्रूपत्वं ततस्तत्तद्दोषा अपि नावकाशं लभन्त इति अत्राविशेषः श्रीभगवत्सन्दर्भे दृश्यः ॥ ३७ ॥

अथ यदि त्वंपदार्थस्य जीवात्मनो ज्ञानत्वं नित्यत्वञ्च प्रथमतो विचारगोचरः स्यात् तदैव तत्पदार्थस्य तस्य तादृशत्वमपि सुबोधं स्यादिति तद्बोधयितुम् "अन्यार्थश्च परामर्श" इति न्यायेन जीवात्मनस्तद्रूपत्वमाह द्वाभ्याम्—नात्मेति। आत्मा शुद्धो जीवः उपलब्धिमात्रं ज्ञानैकरूपं कथम्भूतं सर्वत्र देहे शश्वत् सदानुवर्त्तमानम् अन्वयैः अत्र ज्ञानमिति भाव इत्यन्तेन आगमागमापायितदवधिभेदेन प्रथमस्तर्कः द्रष्टृदृश्यभेदेन द्वितीयोऽपि तर्को ज्ञेय इति ज्ञेयम् ॥ ३८ ॥

अण्डेष्विति । तदनुस्मृतिर्न इति तस्याखण्डात्मनः सुषुप्तिसाक्षिणः स्मृतिर्नोऽस्माकं जाग्रद्द्रष्टॄणां जायते अन्वयैः तत्र न स्पष्ट इति भाव इत्यन्ते अतः प्रकाशमात्रवस्तुनः सूर्यादेः प्रकाशवदुपलब्धिमात्रस्यात्मनः उपलब्धिः स्वाश्रयमस्त्येवेत्यायातमिति द्वयं विपरिलोपो विद्यत इत्यन्ते अयं साक्षिसाक्ष्यविभागेन तृतीयः सुखावशेषात् दुःखिप्रेमास्पदत्वाविभागेन च चतुर्थोऽपि तर्कोऽवगन्तव्यः तदुक्तम् "अन्वयव्यतिरेकाख्यस्तर्कस्याच्चतुरात्मकः । आगमापायितदवधिभेदेन प्रथमो मतः । द्रष्टृदृश्यविभागेन द्वितीयोऽपि मतस्तथा । साक्षिसाक्ष्यविभागेन तृतीयः सम्मतः सताम् । दुःखिप्रेमास्पदत्वेन चतुर्थः सुखबोधक" इति ज्ञेयम् ॥ ३९ ॥

ननु यदि सुषुप्तौ निर्विकारात्मानुभवो भवेत् कथं पुनरपि संसारः अविद्यातत्संस्काराणां विद्यमानत्वादिति चेत् भवतु नाम केवलज्ञानिनान्तु ज्ञानेनाहङ्कारपर्यन्तलये महत्तत्त्वप्रधानयोर्लयः कथं स्यात् सुषुप्तिवत् प्रयत्नान्तरासम्भवात् आश्रयाव्याघातश्च तदेवं सति शुद्धत्वंपदार्थस्य जीवस्याप्युपलब्धिसम्भवात् किमुत तत्पदार्थस्य श्रीभगवत इति सत्यं तत एवेदमुच्यते इत्याह—यर्हीति । यदा पुरुषार्थचतुष्टयेषणां विहाय अब्जनाभचरणैषणाप्राप्तीच्छा यस्यां तया भक्त्या भक्तिप्रभावेण चेतोमलानि विधमेत्तदा तस्मिन् चित्ते तत्प्रभावेणैवात्मनो जीवस्य तत्त्वमाश्रयः श्रीभगवानुपलभ्यते किमुतात्ममात्रमित्यर्थः ॥ ४० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

किञ्च ब्रह्मणः स्वरूपानुभव एव लोकैर्दुष्करस्तस्य प्रामाण्ये तु नास्ति कोऽपि संशयो "यतो ब्रह्मैवेदं सर्व" मिति यस्य भासा सर्वमिदं विभाती"ति श्रुत्युक्तं वस्तुमात्रमेव सर्वं ब्रह्मकार्यत्वाद्ब्रह्मैवेति यत्तदेव विवृणोति—सत्त्वमिति । यदेकं प्रसिद्धं ब्रह्म तदेवादौ मायाशक्तिरूपं सत्त्वं रजस्तम इति त्रिवृत् प्रधानं वदन्ति ततः क्रियाशक्तिरूपं सूत्रं ज्ञानशक्तिरूपं महानिति तदेव वदन्ति ततः अहमिति जीवं जीवोपाधिमहङ्कारं च तदेव प्रवदन्ति ततश्च ज्ञानक्रियार्थफलरूपतया ज्ञानशब्देन देवताः क्रिया इन्द्रियाणि अर्था विषयाः फलं सुखादि तद्रूपतया उरवः शक्तयोऽधिभूताध्यात्माधिदैवसंज्ञा यतस्तत् ब्रह्मैव वदन्ति तदेव सत्स्थूलं कार्यम् असत्सूक्ष्मं कारणं तत्सर्वं ब्रह्मैव भाति कुतः यद्यस्मात्तयोः सदसतोः परं कारणम् अत एव "तत्परं परमं ब्रह्म सर्वं विभजते जगत् । ममैव तद्घनं तेजो ज्ञातुमर्हसि भारते"ति हरिवंशवाक्यं तस्य चायमर्थः तत्परं सर्वस्मात्परं यत्परमं ब्रह्म सर्वं जगत् विभजते स्वत एव महदादिरूपेण विभक्तं करोति तत् ममैव तेजो ज्ञातुमर्हसीत्यनो "ब्रह्मणो हि प्रतिष्ठाह"मिति भगवदुक्तेः सूर्यस्य घनं तेज इति यत्तस्य वपुस्तेज एव ब्रह्मेत्यभ्युपगन्तव्यम् अत एव "यस्य भासा सर्वमिदं विभाती"ति श्रुतौ यस्य कृष्णस्येति व्याचक्षते ॥ ३७ ॥

तस्य ब्रह्मणस्तत्पदार्थस्यापरोक्षानुभवो न सर्वस्य किन्तु शुद्धत्वंपदार्थस्य जीवस्यापरोक्षानुभवानन्तरमेवेत्यतः शुद्धजीवमाह—नात्मेति त्रिभिः । आत्मा शुद्धो जीवो न जजान न जात इत्याद्यो विकारो निषिद्धः न मरिष्यतीत्यन्त्यः षष्ठः जन्माभावादेव तदनन्तरास्तितालक्षणोऽपि विकारो द्वितीयः नैधते वर्द्धत इति तृतीयः वृद्ध्यभावादेव परिणामोऽपि चतुर्थः न क्षीयत इत्यपक्षयः पञ्चमः हि यस्माद्व्यभिचारिणामागमापायिनां बालयुवादिदेहानां देवमनुष्यादिदेहानां वा सवनवित् तत्तत्कालद्रष्टा न ह्यवस्थावतां द्रष्टा तदवस्थो भवतीति भावः । तर्हि निरवस्थः कोऽसावात्मेत्यत आह—उपलब्धिमात्रम् । ज्ञानैकरूपं कथंभूतं सर्वत्र देहे शश्वदनपायि सदानुवर्त्तमानं ननु नीलज्ञानं जातं पीतज्ञानं नष्टमिति प्रतीतेर्न ज्ञानस्यानपायित्वं तत्राह—इन्द्रियबलेनेति । सदेव ज्ञानमेकमिन्द्रियवृत्तिबलेन विविधं कल्पितं नीलाद्याकारा वृत्तय एव जायन्ते नश्यन्ति च न ज्ञानमिति भावः । व्यभिचारिष्ववस्थितस्याप्यव्यभिचारे दृष्टान्तः प्राणो यथेति ॥ ३८ ॥

दृष्टान्तं विवृण्वन्निन्द्रियादिलयेन निर्विकारात्मोपलब्धिं दर्शयति—अण्डेष्विति । पेशिषु जरायुजेषु तरुषु उद्भिज्जेषु अविनिश्चितेषु स्वेदजेषु उपभावति॰ जीवमाददान एव जीवमनुवर्त्तते एव दृष्टान्तेन निर्विकारत्वं प्रदर्श्य दार्ष्टान्तिकेऽपि दर्शयति—सन्ने इति । अयमर्थः जागरे इन्द्रियगण एवात्मनः सविकारत्वप्रयोजकः स्वप्ने तु तत्संस्कारवानहङ्कार एव यदा तु सुषुप्तं तदा न कोऽप्यतस्तदा निर्विकार एवात्मेति प्रसुप्ते सुषुप्त्यवस्थायाम् इन्द्रियगणे सन्ने आशये लीने सति अहङ्कारे च सन्ने कूटस्थो निर्विकार एवात्मा कुतः आशयभूते लिङ्गशरीरमुपाधिं विना विकारहेतोरुपाधेरभावादित्यर्थः । नन्वहङ्कारपर्यन्तस्य सर्वस्य लये शून्यमेवावशिष्यते क तदा कूटस्थ आत्मा तत्राह—तदनुस्मृतिर्नः । तस्य विशेषज्ञानशून्यस्य सुखात्मनः सुषुप्तसाक्षिणः स्मृतिरस्माकं भवति एतावन्तं कालं सुखमहमस्वाप्सं न किञ्चिदवेदिषमिति अतोऽननुभूतस्यास्मरणादस्त्येव सुषुप्तावात्मानुभवः विषयसम्बन्धाभावात्तु न स्पष्ट इति भावः । तथा च श्रुतिः "यद्वै तं न पश्यति पश्यन् वै द्रष्टव्यं पश्यति नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते" इति ॥ ३९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

ननु यदि सुषुप्तौ निर्विकारात्मानुभवो भवेत् कथं पुनरपि संसारः स्यात् अविद्यातत्संस्काराणां विद्यमानत्वादिति चेत् कदा तर्हि तद्रहितशुद्धात्मानुभवो भवेत्तत्र भक्तिमिश्रज्ञानपरिपाकेन प्रथमं शुद्धजीवानुभवः स्यात् ततो—

ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति।
समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम्॥
भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः।
ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्॥

इति भगवदुक्त्या भक्त्युत्थज्ञानेन तत्पदार्थस्य ब्रह्मणोऽपरोक्षानुभवस्ततो ब्रह्मसायुज्यमिति क्रमः यदि तु "यत्कर्मभिर्यत्तपसा ज्ञानवैराग्यतश्च य"दिति वाक्यबलात् ब्रह्मानुबुभूषुः केवलामेव भक्तिं कुर्यात्तदा "सत्यं दिशत्यर्थितमर्थितो नृणा" मिति न्यायेन ब्रह्मानुभवं प्राप्य भगवदनुभवमपि प्राप्नोतीत्याह—यर्हीति। यदा यरुः केवला भक्तिस्तया चेतसो मलानि गुणकर्मजानि विधमेत् नाशयेत् त्रैगुण्यापगमे नैष्कर्म्यं यदा भवेदित्यर्थः। कीदृश्या अब्जनाभस्य चरणारणोपासनादेव ऐषणा कामना ध्रुवादीनामिवान्यकामनापि भवेत् यतः तदा तस्मिन् विशुद्धे चेतसि आत्मनस्तत्पदार्थस्य ब्रह्मणस्ततस्तत्प्रतिष्ठारूपस्य भगवतोऽपि तत्त्वमुपलभ्यते यथा अमलदृशोर्दृशोः पटलापगमे सति निर्मलयोः सत्योः सवितुः सूर्यस्य प्रकाशः साक्षादिति एवं भक्तिमहिम्ना तत्प्रतिष्ठारूपः सवितापि सवितृभक्तेन स्वदृग्भ्यां पाणिपादादिविशिष्टो वाहनादिपरिकरसहितोऽपि उपलभ्यते॥ ३६॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

अथ सर्वात्मत्वनिरूपणेन भगवदुत्कर्षमाह। सत्त्वमिति। यत् यस्य "प्रधानक्षेत्रज्ञपतिर्गुणेशः" इत्यादिश्रुतिवेद्यस्य ब्रह्मणः "एष परस्यांशः एष परस्य शक्ति" रित्याद्याः श्रुतयः चेतनशक्तिभूतं जीवं वदन्ति, सत्त्वं रजस्तम इति त्रयाणां गुणानां वृद् वृत्तिर्यत्र तदेकं कारणरूपमादौ पश्चाच्च किञ्चित् क्षुभितगुणं सूत्रं तदनन्तरं महानिति तदनन्तरमहं तदनन्तरं ज्ञानतया देवतारूपतया ज्ञानेन्द्रियरूपतया च कर्मेन्द्रियरूपेण क्रियारूपतया आकाशादिरूपेणार्थतया शब्दादिरूपेण फलतया अनेकरूपमचेतनशक्तिभूतं प्रधानम् "मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वर" मित्याद्याः श्रुतयो वदन्ति उरुशक्ति चिदचिद्रूपानन्तशक्ति ब्रह्मैव सदसच्च भाति सदसत्कार्यकारणरूपमचित्तत्त्वं चशब्दोदितं चित्तत्त्वञ्च ब्रह्मैवभाति एवकारेण अत्यन्तभेदवादिनो वेदार्थानभिज्ञा वैशेषिकादयः प्रत्युक्ताः नहि "सर्वं खल्विदं ब्रह्म" त्यादीनि महावाक्यान्यास्तिकेनान्यथा कर्तुं शक्यानि अतः चेतनमचेतनञ्च ब्रह्मशक्तिभूतं तत्त्वमुरुशक्तिमद्ब्रह्मपदार्थाद्धर्षशलैरपि विवदमानेनात्मत्वेनाप्यत्यन्तपृथक्तया वक्तुमशक्यम् यथा पुरुषात्केशलोमादयः पृथिव्याः ओषध्यादयः मणिद्युमण्यादेः प्रभादयो धर्माः केनाप्यत्यन्तभिन्नतया वक्तुमशक्याः। ननु तर्हि चेतनाचेतनगताः सर्वे दोषाः ब्रह्मण्येव स्युरित्यत्राह—तयोः परमिति। तयोः चेतनाचेतनयोः स्वासाधारणस्वरूपयोः स्वासाधारणेन स्वरूपेण परं विलक्षणं यथा केशलोमाद्यसाधारणाद्रूपात् पुरुषरूपम् ओषध्यादिस्वरूपात्पृथिव्यादिस्वरूपं प्रभादिस्वरूपान्मण्यादिस्वरूपं विलक्षणमेव एवं सर्वशक्ति सर्वभिन्नाभिन्नं ब्रह्मेति सिद्धान्तः। तथा च श्रुतयः "एकः सन् बहुधा विचचार एको देवो बहुधा सन्निविष्टः त्वमेकोऽसि बहुधा बहून् प्रविष्ट इत्याद्याः—

एकत्वे सति नानात्वं नानात्वे सति चैकता।
अचिन्त्यं ब्रह्मणो रूपं कस्तद्वेदितुमर्हति॥

इतिमनुवाक्यम्—

केचिद्बहुत्वेन वदन्ति देवमेकात्मना केचिदमुं पुरातनम्।
वदान्त्यसङ्ख्यापितसत्त्वयुक्तं द्रष्टुं तमीशं यतमुद्यताः स्मः॥
अनेकमेव बहुधा वदन्ति श्रुतिस्मृतिन्यायविनिविष्टचित्ताः।
आहुर्यमात्मानमजं पुराविदो द्रष्टुं तमीशं प्रतिसयताः स्मः॥

इति कैलाशयात्रायां हरिवंशे घण्टाकर्णवाक्यम् "एकत्वेन पृथक्त्वेन बहुधा विश्वतो मुख"मिति श्रीमुखवाक्यम्"अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके २। ३। ४२) उभयव्यपदेशात्त्वहिकुण्डलवत् [३। २। २६] इत्यादिसूत्राणि च विस्तरस्तु वेदान्तकौस्तुभादौ द्रष्टव्यः॥ ३७॥

सत्त्वं रजस्तम इति त्रिवृदेकमादौ सूत्रं महानहमित्यनेनोरुशक्तिनो ब्रह्मणः अचिच्छक्तेर्नित्यत्वपरिणामित्वादयो धर्मा दर्शिताः इदानीं तत्परिणामभूतानां देहादीनामागमापायित्वचिद्भोग्यत्वादीन् धर्मान् चिच्छक्तेर्जीवस्य नित्यत्वापरिणामित्वसुखदुःखभोक्तृत्वं भगवद्भक्तिविशोधितान्तःकरणोपलभ्यत्वं चाह—नात्मेत्यादि त्रिभिः। ननु सत्त्वरजस्तम इति त्रिवृदेकमादाविति प्रधानस्य नित्यत्वमिव जीवस्य नित्यत्वं नोक्तं लोकेऽपि देवदत्तो जातः मृतश्चेति प्रसिद्धिरतो जीवः किं मर्त्य इत्यत्राह—नेति। आत्मा जीवात्मा न जजान न जातः किन्तु देह एव जातः न मरिष्यति किन्तु देह एव मरिष्यति न वर्धते किन्तु देह एव वर्द्धते न क्षीयते किन्तु देह एव क्षीयते जीवस्य ज्ञातृत्वलक्षणं धर्मं वदन् देहविलक्षणत्वमाह-व्यभिचारिणां जन्ममरणवृद्धिक्षयशालिनां देहादीनां सवनवित् जन्मादिकालज्ञाता सर्वत्र सर्वेषु देहेषु शश्वत् सर्वदा अनपायी अविकारः सर्वत्र सश्वदुपलब्धिमात्रम् सर्वेषु देहेषु सदा ज्ञानमात्रम् अत्रोपलब्धिमात्रमितिपदेन स्वरूपभूतं ज्ञानं सवनविदित्यनेन तद्धर्मभूतं ज्ञानमुपपादितम् तत्र तार्किकाः स्वरूपत आत्मानं जडं स्वीकृत्य तत्र ज्ञानं गुणमुत्पत्तिविनाशवदिति स्वीकुर्वन्ति बौद्धाः स्वरूपतोऽपि क्षणिकमाहुः तन्मतं निर्मूलत्वेन निराकृत्य "प्रज्ञानघन एवायम् आत्मा न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते ऽविनाशित्वा" दिति वेदमूलं निजमतमाह—सदिति। देहेषु उपलब्धिमात्रं जीवाख्यं ज्ञानं स्वरूपतो धर्मतश्च सदेव नतु क्षणिकम् तद्धर्मभूतज्ञानस्यैकत्वेऽपि रूपज्ञानं शब्दज्ञानमित्येवं विषयभेदादनेकत्वप्रतीतिद्वारा धर्मिज्ञानमपि द्रष्टा श्रोतेत्येवं बहुधा प्रतीयते इत्याह—इन्द्रियबलेन विकल्पितमिति। तत्र दृष्टान्तः प्राणो यथेति यथा एक एव प्राणाख्यो वायुस्तत्तदिन्द्रियप्रवर्त्तकतया विकल्पितस्तद्वत् तस्माद्धर्मिज्ञानं धर्मभूतं ज्ञानं च नित्यमेवेति सिद्धान्तः। नीलज्ञानं जातं पीतज्ञानं नष्टमिति प्रतीतिस्तु विषयग्रहणत्यागनिबन्धना ज्ञाननाशाङ्गीकारे तु पुनः पीतपदार्थस्मरणाभावः स्यादिति दिक्॥ ३८॥

अण्डेषु पक्ष्यादिकोशेषु पेशिषु मांसपिण्डेषु जरायुजेषु

राजोवाच ।

कर्मयोगं वदत नः पुरुषो येन संस्कृतः ।
विधूयेहाशु कर्माणि नैष्कर्म्यं विन्दते परम् ॥ ४१ ॥
एवं प्रश्नमृषीन् पूर्वमपृच्छं पितुरन्तिके ।
नाब्रुवन् ब्रह्मणः पुत्रास्तत्र कारणमुच्यताम् ॥ ४२ ॥

आविर्होत्र उवाच ।

कर्माकर्मविकर्मेति वेदवादो न लौकिकः ।
वेदस्य चेश्वरात्मत्वात्तत्र मुह्यन्ति सूरयः ॥ ४३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

तरुषु तदुपलक्षितेषूद्भिज्जेषु गविनिश्चितेषु स्वेदजेषु यत्र यत्र यस्मिन् यस्मिन् कूटस्थः अपडपेइयादिविकारिपदार्थभिन्न एकरसः जीवः हि हेतौ कर्मफलभोगाख्येन हेतुना उपधावति तत्र तत्र प्राणः प्राणप्रधानः षोडशकलः लिङ्गदेहः जीवं कूटस्थमुपधावति लिङ्गदेहविशिष्टः कर्मफलभोगाय चतुर्विधेषु सविकारेषु देहेष्वविकारी एव जीवः भ्रमतीत्यर्थः । ननु देहविलक्षणो जीवः क इत्यत्राह—यदिति । इन्द्रियगणे सन्ने महति अहङ्कारे च प्रसुप्ते आशयं साहङ्कारं देहमृते तद्विलक्षणतया यत् प्रस्य जीवस्वरूपस्य अनुस्मृतिः एतावन्तं कालं सुखमहमस्वाप्सं न किञ्चिदवेदिषमिति प्रत्यभिज्ञानं नोऽस्माकं जायते ततः देहविलक्षणो जीव इत्यर्थः ॥ ३९ ॥

ननु अनुस्मृत्यैव निश्चीयते साक्षात्तदुपलब्धिहेतुर्नास्ति किमत्राह—यर्हीति । यर्हि यदा अब्जनाभचरणैषणया पद्मनाभपादपद्मसन्निधीच्छया उरुभक्तिर्बहुप्रकारा भक्तिस्तया गुणकर्मजानि सत्त्वादिगुणहेतुकशुभाशुभकर्मजानि चेतोमलानि मुमुक्षुर्विधमेत् निर्नाशयेत् तदा तस्मिन् चेतसि आत्मतत्त्वं जीवतत्त्वं साक्षादुपलभ्यते यथा अमलदृशः निर्मलदृष्टेः सवितृप्रकाशः ॥ ४० ॥

भाषा टीका।

सत्त्व रज और तम ये तीनों गुण सूक्ष्म रूप से जिसमें वर्त्तमान हैं उस प्रधान (प्रकृति) को कार्यों का आधार होने से आदि में सूत्र कहते हैं और जो उसके कार्य हैं उन्हों को महत्तत्व और अहङ्कार कहते हैं और उस त्रिविध अहंकार से भूतादिकों की सृष्टि को भी उपलक्षण रूप से जानना चाहिये, इस प्रकार तो यह असत् अर्थात् अचेतन तत्त्व हुआ, और ज्ञानेन्द्रिय कर्मेन्द्रियों के द्वारा जो कुछ विषय ग्रहण करता है और फलों को भोगता है ऐसे जीव को सत् अर्थात् चेतन तत्त्व कहते हैं यह चेतनाचेतनात्मक अनंत शक्ति वाला ब्रह्मही सर्वत्र प्रकाशित होरहा है और वह ब्रह्म चेतनाचेतन से विलक्षण भी है ॥ ३७ ॥

जो चेतन और अचेतन परमात्मा का शरीर है तिनों में चेतन तत्त्व का स्वरूप कहते हैं, कि—जीवात्मा न उत्पन्न होता है, न मरता है, न वृद्धि को प्राप्त होता है, न कभी क्षीण होता है, और आगमापायी देहादि कों की अवस्थाओं का जानने वाला है, एवं सर्वत्र देव मनुष्यादि शरीरों में सदा अनपायी होकर रहने वाला है और ज्ञान स्वरूप है, यदि जीवात्मा ज्ञान स्वरूप है तब ज्ञान तो चाक्षुष श्रावणादि अपायी होते हैं यह आत्मा अनपायी कैसे भया? तहां यह समाधान है, कि—इन्द्रियों के द्वारा ज्ञान का विकल्प है स्वरूप भूत ज्ञान में नहीं है जैसे कि प्राण का स्थानों के भेद होने से विकल्प है ॥३८॥

अंडज जरायुज उद्भिज और स्वेदज इन चतुर्विध शरीरों के मध्य में प्राण वायु जीव के पीछे गमन करता रहता है, अर्थात् प्राण वायु के द्वाराही जीवात्माधारवाले शरीरों में प्रवेश करता है और प्राण जीव का अनुवर्त्तन करता है जिस जीव का प्राण अनुवर्त्तन करता है वही कूटस्थनिर्विकार आत्मा है, क्या इस प्रकार का आत्मा सब के अनुभव सिद्ध है, तहां कहते हैं, कि—नहीं किन्तु जब इन्द्रिय गण शब्दादि विषय प्रावण्य रहित होजाता है और देहाभिमान निवृत्ति होजाता है अत एव अन्तःकरण के बिना जो शुद्ध आत्मा के स्वरूप का प्रकाश होता है उसी की हम जीव लोगों को स्मृति होती है ॥ ३९ ॥

तो फिर अहंकारादि अन्तःकरण की कब निवृत्ति हो सकती है और कब यथावत् उसकी स्मृति होती है, तहां कहते हैं कि—जब श्रीपद्मनाभ भगवान् के चरणारविन्द में प्रीतिवाली भक्ति से पुरुष गुण कर्मों से उत्पन्न होने वाले चित्त के मलों को दूर करता है उस समय उस विशुद्ध चित्त में आत्म तत्त्व साक्षात् उपलब्धि होता है, जैसे निर्मल दृष्टिवाले पुरुष को सूर्य का प्रकाश कार्यकारी होता है अन्ध पुरुष को नहीं तस्मात् ज्ञानरूप दृष्टि के आन्ध्य नाश के लिये अवश्य ही श्रीविष्णु भक्ति कर्त्तव्य है ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

भक्तेः कर्मयोगाधीनत्वात्तं पृच्छति—कर्मयोगमिति । नैष्कर्म्यं कर्मनिवृत्तिसाध्यं ज्ञानम् ॥ ४१ ॥

परोक्षवादो वेदोऽयं बालानामनुशासनम् ।
कर्ममोक्षाय कर्माणि विधत्ते ह्यगदं यथा ॥ ४४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

प्रश्नान्तरमाह—एवमिति । प्रश्नं प्रष्टव्यमर्थं पितुरिक्ष्वाकोः ब्रह्मणः पुत्राः सनकादयः सर्वज्ञाः अपि नाब्रुवन् ॥ ४२ ॥

गहनत्वद्योतनाय प्रथमं द्वितीयप्रश्नस्योत्तरमाह—कर्मेति । कर्म विहितम् अकर्म तद्विपरीतं निषिद्धम् विकर्म विगतं कर्म विहिताकरणम् एतत्त्रयं वेदवादो वेदैकगम्यम् न लौकिकः वेदस्येश्वरात्मत्वादीश्वराद्भूतत्वादपौरुषेयत्वादित्यर्थः । पुंवाक्ये हि वक्तुरभिप्रायतोऽर्थज्ञानं शक्यमपौरुषेये तु केवलं वाक्यपौर्वापर्येणैव तात्पर्यावधारणं तच्च दुष्करमिति तत्र कर्मादौ विद्वांसोऽपि मुह्यन्ति किमुतान्ये अतस्तव तदा बालत्वान्नैवाब्रुवन्निति ॥ ४३ ॥

दुर्ज्ञेयं वेदतात्पर्यमाह—परोक्षवाद इति । यत्रान्यथा स्थितोऽर्थः सङ्गोपयितुमन्यथा कृत्वोच्यते सपरोक्षवादः तथा च श्रुतिः "तं वा एतं चतुर्हूतं सन्तम् चतुर्होतेत्याचक्षते परोक्षेण परोक्षप्रिया इव हि देवा" इति परोक्षवादत्वमेवाऽऽह—कर्ममोक्षयेति । ननु स्वर्गाद्यर्थं कर्माणि विधत्ते न कर्ममोक्षार्थं तत्राह—बालानामनुशासनं यथा भवति तथा अत्र दृष्टान्तः अगदमौषधम् यथा पिता बालमगदं पाययन् खण्डलड्डुकादिभिः प्रलोभयन् पाययति ददाति च तानि नैतावताऽगदपानस्य तल्लाभः प्रयोजनमपि त्वारोग्यम् तथा वेदोऽप्यवान्तरफलैः प्रलोभयन् कर्ममोक्षायैव कर्माणि विधत्ते ॥ ४४ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी ।

भक्तेरिति । "कुर्वाणा यत्र कर्माणि भगवच्छिक्षये"त्यादेः "यदत्र क्रियते कर्म भगवत्परितोषणम् । ज्ञानं यत्तदधीनं हि भक्तियोगसमन्वित"मित्यादेश्च कर्माधीनत्वाद्भगवदर्पितकर्माधीनत्वादित्यर्थः । तं तादृशकर्मयोगं येन कर्मयोगेन संस्कृतः शुद्धचित्तः सन् कर्मनिवृत्तिः कर्मणि कर्तृत्वाभिनिवेशाभावस्तया साध्यं परं ज्ञानं तथाच श्रुतिः "अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुत" इति ॥ ४१ ॥

यथा युष्मान् पृच्छामि एवं प्रष्टव्यमर्थं कर्मरूपं नाब्रुवन् कर्मयोगमिति शेषः मूले तत्र उत्तरादाने ॥ ४२ ॥

गहनत्वद्योतनाय । कर्मतत्त्वस्य दुर्ज्ञेयत्वज्ञापनाय द्वितीयप्रश्नस्य उत्तरादाने कारणप्रश्नस्य विहितं सन्ध्यावन्दनादि अकर्मेत्यत्र विरोधे नञ् असुराधर्मवत् अत एव तद्विपरीतं निषिद्धमिति व्याख्यातं तच्च सुरापानादि विकर्मशब्दस्य विहिताकरणत्वरूपोऽर्थस्तु नाचरेदित्यादौ विकर्मणा ह्यधर्मेण मृत्योर्मृत्युमुपैति स इति वक्ष्यमाणमूलस्वारस्यादेव व्याख्यातः "शास्त्रयोनित्वात्" इति न्यायेनेश्वरएवात्मा कारणं यस्य तादृशत्वात् तत्र कर्मादिस्वरूपज्ञाने अपौरुषेयत्वस्य मोहे हेतुत्वमुपपादयति । पुंवाक्ये हीति । अपौरुषेये अजीवजाते स्वतः सिद्धे वेदे तु पुरुषाभावात् केवलमित्यादि योजनीय तदुक्तं शास्त्रैः "वेदस्याध्ययनं सर्वं गुर्वध्ययनपूर्वकम् । वेदाध्ययनसामान्यादधुनाध्ययनं यथे" ति तात्पर्यं वेदरहस्यम् अतः वेदतात्पर्यस्य दुर्ज्ञेयत्वात् तदा प्रश्नकाले बालत्वादिति पितुरन्तिके इति तदुक्त्यैवेत्यर्थः ॥ ४३ ॥

आविः प्रकटं सुज्ञेयं होत्रम् अग्निहोत्रोपलक्षितं कर्म यस्येति निरुक्त्या तद्वर्णने तस्यैव योग्यत्वात् स एवोवाचेति ज्ञेयं यत्र यस्मिन् वादे तथाच श्रुतिः परोक्षवादे प्रमाणं श्रुतिः तं वा एवं प्रसिद्धं मन्त्रं पृथिवी होता द्यौरध्वर्युरित्यादिकं चतुर्हूतं चत्वारो होत्रादयो हूयन्ते श्रूयन्ते यत्र तादृशं सन्तमपि नाम्ना चतुर्होतेत्याचक्षते अथवा तस्य मन्त्रस्याभिमाने तेनात्मभूतः कश्चित् पुरुषः प्रत्युत्तरमुवाचेति स पुरुषश्चतुर्हूतस्तदीयनाम्ना मन्त्रोऽपि चतुर्हूत इत्युच्यते पूज्यानां प्रत्यक्षनामग्रहणमयुक्तमित्यभिप्रायेण हूतशब्दस्थाने होतृशब्दः एवं यद्यपि चतुर्हूतमित्येव निरुक्त्या सङ्गच्छते नतु चतुर्होतेति तथापि परोक्षवदनस्वाभाव्याच्चतुर्होतेत्याचक्षते इत्यर्थः । विधिवाक्यन्तु प्रजाकामः चतुर्होता यजेतेति ज्ञेयं परोक्षवदने हेतुमाह—परोक्षप्रिया इवेति । "परोक्षं च मम प्रिय"मिति भगवदुक्तेः कर्ममोक्षाय अनाद्यदृष्टकर्मपरम्परानाशायैव किमुत काम्यकर्मत्यागाय शङ्कते । नन्विति । स्वर्गकामो यजेतेत्यादौ यागेन स्वर्गं भावयेदित्यर्थात्मभावनया स्वर्गाद्यर्थमेव कर्माणि विधत्ते परोक्षसिद्धान्तमाह—बालानामिति । बालानामशुद्धचित्तत्वेन स्वाभाविकप्रवृत्तिप्रतिबन्धार्थमेवैतानि कर्माणि न तुच्छस्वर्गाद्यर्थमित्यजानतामित्यर्थः । अनुशासनं स्वर्गादिभिः प्रलोभनं यथा स्यात्तथा अत्रानुशासने अवान्तरफलैः गौणफलैः ॥ ४४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

कर्म काम्यकर्म अकर्म कामनाराहित्यादफलं ज्ञानपूर्वकं कर्म विकर्म निषिद्धं वेदस्य चेश्वरात्मत्वात् आत्मीय इति ईश्वराभिप्रायरूपतया भगवत्त्वात् ॥ ४३ ॥

परोक्षम्वदतीति परोक्षवादः प्रत्यक्षाद्यगोचरार्थविषयः बालानामज्ञानामनुशासनं विविच्य ज्ञापनम् ॥ ४४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

नारायणपरस्तदुत्थया भक्त्या मायामञ्जस्तरति दुस्तरामित्युक्तं स कीदृशो भगवदाराधनात्मकः कर्मयोगो यदुत्थया भक्त्या मायां तरेदिति पृच्छति—कर्मयोगमिति । योऽस्मभ्यं वदत निरूपयत येन विज्ञातेनानुष्ठितेन च कर्मयोगेन संस्कृतः

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

कर्माणि पुण्यापुण्यात्मकानि भगवद्भक्तियोगोत्पत्तिविरोधीनि विधूय नैष्कर्म्यं नैष्कर्म्यहेतुभूतं बन्धकसकलकर्मनिवृत्तिहेतुभूतं परं परभक्तिपरज्ञानाख्यं ज्ञानं विन्दते लभते ॥ ४१ ॥

प्रसङ्गादन्यदपि पृच्छति–एवमिति । प्रश्नं प्रष्टव्यं कर्मयोगमत्रागत्य युष्मान्प्रति इव पितुरिक्ष्वाकोरन्तिके समीपे ऋषभात् सनकादीन्प्रति अपृच्छं पृष्टवानस्मि यद्वा पाकं पचतीतिवत्प्रश्नमपृच्छमिति निर्देशः प्रश्नमकरवमित्यर्थः । ब्रह्मणः पुत्रास्ते सनकादयः नाब्रुवन् कर्म योगं न निरूपयामासुस्तत्रानुक्तौ कारणमुच्यतां युष्माभिरिति शेषः ॥ ४२ ॥

तत्र कर्मयोगनिरूपणस्य बहुग्रन्थसाध्यत्वात् तावदनुक्तिः कारणप्रश्नस्योत्तरमाह–आविर्होत्र इति कर्मेति । कर्म काम्यं कर्म अकर्म काम्यकर्मेतरत्कामनारहितत्वादफलं ज्ञानपूर्वकं कर्मेत्यर्थः । विकर्म निषिद्धं कर्म यद्वा विकर्म विविधफलाय चोदितं कर्म काम्यकर्म आश्रमाङ्गकं नित्यं नैमित्तिकं च अकर्म ज्ञानपूर्वकं कर्मेति वेदवादः वदनं वादो भावे घञ् न लौकिको वादः ततः किमत आह—वेदस्येति । ईश्वरात्मत्वात् आत्मशब्दोऽभिप्रायात्मकज्ञानपरः ईश्वराभिप्रायत्वेन तेष्वपि बोद्धव्यांशानां बहुत्वेन गहनत्वात्तत्र सूरयोऽपि मुह्यन्ति अतस्त्वां बालमालक्ष्य तदा नाब्रुवन्निति भावः ॥ ४३ ॥

अथ पृष्टं कर्मयोगं निरूपयति—परोक्षवाद इत्यादिना यावदध्यायसमाप्ति । तदाराधनात्मककर्मयोगो हि द्विविधो वैदिकस्तान्त्रिकश्चेति तत्राद्यो नित्यनैमित्तिककाम्यरूपेण त्रिविधः तत्र स्वर्गाद्यर्थकाम्यकर्मणो मोक्षैकफलत्वं वक्तुं तावत्तेषामनानामपि मोक्षैकफलत्वे तात्पर्यमाह—परोक्षवाद इति । हिताहितज्ञापनरूपोऽप्ययं "यजेत स्वर्गकाम" इत्यादिरूपो वेदः परोक्षवादः प्रत्यक्षाद्यगोचरार्थविषयः अतस्तेषां तदभिप्रायो दुरवगम इति भावः । तर्हि किमभिप्रायेण यागादिकं विधत्ते इत्यत्राह–कर्ममोक्षायेति । कर्मभ्यः पुण्यापुण्यात्मकेभ्यः मोक्षाय मुक्तये कर्माणि यज्ञादिरूपकर्माणि विधत्ते भगवद्भक्तियोगद्वारा बन्धकसकलकर्मनिवृत्तये यज्ञादिरूपकर्माणि विदधातीत्यर्थः । अगदं यथेति यथा भिषग्बालानगदमौषधं पाययन् खण्डलड्डुकादिभिः प्रलोभयन्पाययति नैतावता ऽगदपानस्य तल्लाभः प्रयोजनमपि त्वारोग्यमेव तथा वेदोऽप्यवान्तरफलैः प्रलोभयन् कर्ममोक्षायैव कर्माणि विधत्ते एतेनावान्तरफलानि परित्यज्य मोक्षैकफलतया काम्यकर्माण्यनुष्ठेयमेवेत्युक्तं भवति ॥ ४४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

निमिर्ज्ञानयोगं श्रुत्वा कर्मयोगं पृच्छति—कर्मयोगमिति । येन केन प्रकारेण संस्कृतः शुद्धः ॥ ४१ ॥

ब्रह्मणः पुत्राः सनकादयः कारणं परिहारावचने निमित्तम् ॥ ४२ ॥

आविर्होत्रः—

जानन्तोऽपि हि दुर्ज्ञेयः प्रश्नोऽयं ज्ञानिनामपि ।
इति वेदयितुं ब्रह्मपुत्रा नोचुर्निमेः पुरः ॥

इति वाक्यत्वात् ज्ञानिनामपि दुर्ज्ञेयत्वं निमित्तमित्यभिप्रेत्य तैः प्रश्नपरिहारः आदौ न कृत इति सूचयन् प्रश्नं परिहरति–कर्मेति । इदं कर्म प्रशस्तम् इदं कर्म कर्तुमयोग्यम् इदं विकर्म विरुद्धं कर्मेति वेदगतो वादो विचारो न लौकिकः लोकविषयो वेदबहिर्मुखजनगोचरो न भवति किन्तु वेदविचारकुशलपुरुषविषय एवेत्यर्थः । कुतस्तत्राह—वेदस्येति । चशब्द एवार्थे ईश्वरात्मत्वादीश्वरविषयत्वादेव वैदिकानामपि तत्प्रसादं विना सुज्ञेयो नेति भावेनाह—तत्रेति । तत्र वेदार्थविचारे ॥ ४३ ॥

ननु वेदस्येश्वरविषयत्वं कथं युज्यते "स्वर्गकामो यजेत" इत्यादिकर्मविषयत्वप्रतीतेरत आह—परोक्षेति । परोक्षतो वादो वचनं यस्य स तथा अयं वेदो मुख्यया वृत्त्या साक्षाद्ब्रह्मवक्त्यमुख्यया कर्म च किमर्थमेवं कल्प्यते इत्यत्राह–बालानामिति । अल्पज्ञानिनामनुशासनं कुर्वन् वेदोऽन्तःकरणशुद्धये दुष्कर्ममोक्षाय ब्रह्मार्पणबुद्ध्या तदुद्दिश्य कर्माणि विधत्ते "कुर्वन्नेह कर्माणि जिजीविषेच्छतं समा" इत्यादिलक्षणो हि यस्मात्तस्मादुभयथापि ब्रह्मविषयत्वमविहतं वेदस्य एकस्योभयविषयत्वं कुत्र दृष्टम् अत्राह—अगदम् यथेति । यथा यथैकमेव द्रव्यमपथ्यजनकं तदेवौषधीकृतमपथ्यपरिहर्तृ भवति तथेत्यर्थः । यद्वैकं पर्पटकं चिकित्साभेदाज्ज्वरवातयोः परिहारायान्यत्र भवति प्रकृतेऽपि तथेति ॥ ४४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

पूर्वं कर्माण्यारभमाणानामित्यादिना श्रीप्रबुद्धेन काम्यकर्माण्येव त्याजितानि न तु नित्यनैमित्तिकानि फलस्यैव निन्दितत्वात् ततस्तेषां परमार्थोपयोगित्वं मनसि कृत्वाह–कर्मयोगमिति ॥४१॥

तत्रैव संशयान्तरमेवमिति । तत्र पितुरन्तिक इत्युक्त्या बालत्वाद्भवतः स्वल्पयोग्यत्वमेव ॥ ४२ ॥

ब्रह्मपुत्राणामदत्तोत्तरत्वे कारणमाह–कर्माकर्मेति । नाचरेद्यस्त्विति । वक्ष्यमाणाद्विकर्मणो विहिताकरणत्वमित्येवार्थः ।: वेदस्येश्वरात्मत्वादिति । शब्दरूपेण तदाविर्भावविशेषरूपत्वादित्यर्थः ।"शब्दब्रह्म परब्रह्म ममोभे शाश्वती तनू" इति वेदो नारायणः साक्षात्स्वयम्भूरिति शुश्रुम" इत्याद्युक्तेः यदि वास्य महतो भूतस्य निश्वसितमेतद्यदृग्वेद इत्यादिना तस्माद्यज्ञात्सर्वहुतः ऋचः सामानि जज्ञिरे छन्दांसि जज्ञिरे तस्मादित्यादिना च तदुद्भूतत्वं तथापि तत्रैव तात्पर्यम् अवतारान्तरवत् अपौरुषेयत्वं त्वजीवजातत्वमेव भ्रमादिदोषचतुष्टयनिरसनं हि तावतैव च स्यात् तदेवं तस्य परमाचिन्त्यस्यात्मत्वं परमपण्डितशिरोमणेर्वचनत्वं वा भवतु भवत्तदेवाभिप्रायत्वम् ॥ ४३ ॥

अथ तदेव व्यञ्जयन् क्रमेण नित्यनैमित्तिकान्यपि त्याजयित्वा श्रीभगवदर्चनं ग्राहयितुमाह–परोक्षेति । बालानां नातिप्रज्ञानामशान्तानां चानुशासनरूपोऽयं कर्मकाण्डलक्षणोऽपि वेदः कर्ममोक्षाय अनाद्यदृष्टपरंपराशान्तय एव कर्माणि सर्वाण्येव विधत्ते यतः परोक्षवादः स्वयमीश्वरात्मा वेदो हि यन्नित्यनैमित्तिकाकरणेऽन्यकरणे च लोकस्मीषयते यच्च नित्यादावानुषङ्गिकं फलं दिशते तत्तत्खलु तत्करणेन तदकरणेन च शोभमित्वानादि-

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

दुःखमयकर्ममोक्षार्थमेव प्रवर्त्तयितुं नतु भयमेव तादृशतुच्छफलमेव वा दातुमिति गम्यते परमसुहृत्त्वात्तस्येत्यर्थः । तत्र दृष्टान्तः बालानां तादृशस्वभावानामगदं पित्रा तद्दानं यथेति पिता च रोगशान्त्यर्थमौषधं पाययितुं तांस्तथा प्रवर्त्तयति नत्वौषधपानमेव तस्योद्देश्यमित्यर्थः ॥ ४४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

गुणकर्मजानि विधमेदिति श्रुत्वा भक्त्या ज्ञानेन च नैष्कर्म्यं स्यादिति मया ज्ञायत एव कर्मणापि नैष्कर्म्यं यथा स्यात्तथाहं जिज्ञासे इत्याह—कर्मयोगमिति ॥ ४१ ॥

प्रश्नं प्रष्टव्यमर्थं पितुः इक्ष्वाकोः ब्रह्मणः पुत्राः सनकादयः सर्वज्ञा अपि ॥ ४२ ॥

कर्म खलु शास्त्रविहिताचरणम् अकर्म शास्त्रविहितानाचरणं विकर्म तु शास्त्रनिषिद्धाचरणम् ईश्वरात्मत्वात् "शब्दब्रह्म परब्रह्म ममोभे शाश्वती तनू " इति भगवदुक्तेरपौरुषेयवाक्यत्वादित्यर्थः । तत्र मुह्यन्तीति । पुम्वाक्ये हि वक्तुरभिप्रायतोऽर्थज्ञानं सुशकम् अपौरुषेये हि केवलं वाक्यपौर्वापर्य्येणैव तात्पर्यावधारणं तच्च दुष्करमिति तत्र कर्मादौ विद्वांसोऽपि मुह्यन्ति किमुतान्ये अतस्तव बालत्वात्तदा ते नाब्रुवन् ॥ ४३ ॥

दुर्ज्ञेयं वेदतात्पर्यमित्याह—परोक्षवाद इति । यत्रान्यथा स्थितोऽर्थो भगवदभिप्रायज्ञैर्ऋषिभिः सङ्गोपयितुमन्यथा कृत्वोच्यते स परोक्षवादः यदुक्तं भगवता "परोक्षवादा ऋषयः परोक्षं च मम प्रिय" मिति परोक्षवादत्वमेवाह—कर्ममोक्षायेति । ननु स्वर्गाद्यर्थं कर्माणि विधत्ते न कर्ममोक्षार्थं तत्राह—यथा अगदमौषधं बालानामनुशासनमाज्ञापनं येन तत् तथाहि यद्येतदौषधं पिबसि तदा ते खण्डलड्डुकं दास्यामीति प्रलोभ्य पिता बालान् निम्बरसं पाययति लड्डुकं च तेभ्यो ददात्यन्यथा पुनस्तत्पायनाशक्तेः किं त्वगदपानस्य न तल्लाभ एव प्रयोजनम् अपि त्वारोग्यम् एवं वेदोऽपि फलैः प्रलोभयन् कर्ममोक्षायैव कर्माणि विधत्ते ॥ ४४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

उत्कोत्कर्षस्य सर्वात्मनः सर्वशक्तेः सर्वभिन्नाभिन्नस्य परब्रह्मपरमात्मनारायणादिपदवाच्यस्य भगवतो ज्ञानं कर्मयोगेन शुद्धान्तःकरणेनाप्यतेऽतः कर्मयोगं पृच्छति—कर्मयोगमिति-नोऽस्मभ्यं कर्मयोगं वदत निरूपयत येन कर्मयोगेन पुरुषः संस्कृतः शुद्धान्तःकरणः सन् कर्माणि भगवज्ज्ञानोत्पत्तिविरोधीनि विधूय परं परमेश्वरविषयं नैष्कर्म्यं निर्गतानि कर्माणि यतस्तन्निष्कर्मं तदेव नैष्कर्म्यं ज्ञानं स्वार्थे ष्यञ् विन्दते प्राप्नोति ॥ ४१ ॥

प्रसङ्गात् प्रश्नान्तरमाह—एवमिति । एवमेव प्रश्नं प्रष्टव्यं कर्मयोगं पितुरिक्ष्वाकोरन्तिके तत्कर्मकर्तॄन् ऋषीनपृच्छं पृष्टवानस्मि ते तु ब्रह्मणः पुत्राः प्रजापतयः इक्ष्वाकुयाजकाः नाब्रुवन् नैष्कर्म्यकर्मयोगस्वरूपं नोक्तवन्तः तत्रावचने कारणं निमित्तमुच्यताम् ॥ ४२ ॥

ईश्वरार्पितेन निष्कामकर्मानुष्ठानेन नैष्कर्म्यं जायते इति यत्तु तादृशं कर्म ईश्वरज्ञानवर्जिताः इक्ष्वाकुयाजकाः न जानन्तीत्याह—कर्मेति । कर्म विहितम् अकर्म विहिताकरणम् विकर्म निषिद्धम् इत्थं कर्माकर्मविकर्मेति त्रिविधो वेदवादो वेदनिर्णयः न तु लौकिकः तत्र तस्मिन्वेदवादे सूरयो मुह्यन्ति "स्वर्गकामो यजेत अक्षय्यं ह वै चातुर्मास्ययाजिनः" इत्यादिवेदः कर्मफलमक्षयमाहातो वेदः कर्मैकविषयः इत्येवं मोह प्राप्नुवन्ति तत्र हेतुमाह—वेदस्य चेश्वरात्मत्वादिति । ईश्वरः सर्वेश्वरः आत्मा आश्रयः मुख्यो विषयो यस्य स तथा तस्य भावस्तत्त्वं तस्मात् एवंभूतवेदार्थज्ञानाभावात् "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेने"ति श्रुत्युक्तरीत्या तद्विविदिषोत्पादनद्वारा कर्मणां नैष्कर्म्यं साधनत्वमनवधार्य इक्ष्वाकुयाजकाः भवत्प्रष्टव्यमर्थं नैवाब्रुवन्निति फलितोऽर्थः ॥ ४३ ॥

तर्हि "स्वर्गकामो यजेत अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवती"त्यादिवेदः किं विषय इत्यत्राह—परोक्षेति । परोक्षवादः परोक्षस्य लौकिकेन्द्रियाविषयस्य ब्रह्मणो वादः निर्णयो यस्मिन् स तथा ब्रह्मविषयः अयं वेदः बालानामज्ञानिनां विषयासक्तानामनुशासनं यथा भवति तथा कर्म मोक्षाय कर्मनिवृत्तये कर्मफलभूतसंसारनिवृत्तये कर्माणि विधत्ते स्वर्गादिना प्रलोभयन् निषिद्धाद्वारयितुं विहिते बालान्नियोजयतीत्यर्थः । यथा सद्वैद्यः खण्डलड्डुकादिषु प्रलुब्धं बालं तैरेव प्रलोभयन् अपथ्याद्वारयन् अगदं पाययति तद्वत् ॥ ४४ ॥

भाषा टीका ।

राजोवाच ।

हे महर्षिगण ! जिस कर्मयोग के करने से मनुष्य संस्कार वाला होने से इस जन्म में सब पापकर्मों को दूर करता है फिर परलोक में मोक्ष को प्राप्त होता है वही कर्मयोग हमको आप उपदेश करो ॥ ४१ ॥

इस प्रकार का प्रश्न मैंने पिता इक्ष्वाकु के सामने सनकादिक मुनियों से किया था उन ब्रह्म पुत्रों ने उत्तर नहीं दिया उसका कारण भी कहिये ॥ ४२ ॥

आविर्होत्र उवाच ।

हे राजन् ! कर्म विकर्म अकर्म ऐसे तीन प्रकार से वेद में कहा है यह बात लौकिक नहीं है वेद के ईश्वर रूप होने से तिस में बड़े ज्ञानियों को भी मोह होजाता है तिसमें शास्त्र विहित जो वह कर्म है जो निषिद्ध वह अकर्म है विहितका न करना विकर्म है ॥ ४३ ॥

यह वेद का कथन छिपा हुआ है अज्ञानि मनुष्यों के शिक्षा के लिये ऐसा कथन है लौकिक कर्मों के छुटाने के लिये काम्यादि कर्मों का विधान किया है जैसे औषध खवाने के लिये बालक को मिश्री लड्डू का लोभ देते हैं तैसे ॥ ४४ ॥

नाचरेद्यस्तु वेदोक्तं स्वयमज्ञोऽजितेन्द्रियः ।
विकर्मणा ह्यधर्मेण मृत्योर्मृत्युमुपैति सः ॥ ४५ ॥
वेदोक्तमेव कुर्वाणो निःसङ्गोऽर्पितमीश्वरे ।
नैष्कर्म्यां लभते सिद्धिं रोचनार्था फलश्रुतिः ॥ ४६ ॥
य आशु हृदयग्रन्थिं निर्जिहीर्षुः परात्मनः ।
विधिनोपचरेद्देवं तन्त्रोक्तेन च केशवम् ॥ ४७ ॥
लब्धानुग्रह आचार्यात्तेन सन्दर्शितागमः ।
महापुरुषमभ्यर्चेन्मूर्त्याऽभिमतयाऽऽत्मनः ॥ ४८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु कर्ममोक्षश्चेत्पुरुषार्थस्तर्हि प्रथममेव कर्मत्यज्यतां न तदकरणे प्रत्यवायोऽस्तीत्यत आह—नाचरेदिति-मजितेन्द्रियत्वादज्ञः स्वयं यदि नाचरेत्तर्हि विकर्मणा कर्मानाचरणलक्षणेनाधर्मेण मृत्योरनन्तरं मृत्युमेव प्राप्नोति तथा च श्रुतिः "मृत्वा पुनर्मृत्युमापद्यन्ते अद्यमानाः स्वकर्मभिरि"ति ॥ ४५ ॥

तस्माद्वेदोक्तमेव कुर्वाणो नतु निषिद्धम् । ननु कर्मणि क्रियमाणे तस्मिन्नासक्तिस्तत्फलं च स्यान्नतु नैष्कर्म्यरूपा सिद्धिरत आह-निःसंगोऽनभिनिवेशवान् ईश्वरेऽर्पितं नतु फलोद्देशेन ननु फलस्य श्रुतत्वात्कर्मणि कृते फलं भवेदेव न । रोचनार्थेति कर्मणि रुच्युत्पादनार्थमगदपाने खण्डलड्डुकादिवत् ततश्च कर्माभिरुच्या वेदार्थं सम्यग्विचारयति तदा च "यो वा एतदक्षरमविदित्वा गार्ग्यस्माल्लोकात्प्रैति स कृपण" इत्यनात्मज्ञस्यैव कृपणतां "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति ब्रह्मचर्येण तपसा श्रद्धया यज्ञेनानाशकेने"ति, यज्ञादीनां ज्ञानशेषतां चावधार्य निष्कामेषु कर्मसु प्रवर्त्तते ततश्च स्वर्गकामो यजेतेत्यादिभिः कामितस्यैव स्वर्गादेः फलत्वेनावगमादकामितोऽसौ न भवतीति नैष्कर्म्यसिद्धिर्भवतीति भावः ॥ ४६ ॥

वैदिकं कर्मयोगमुक्त्वा तान्त्रिकमाह—य आशिवति । परात्मनः परस्यैव सतः आत्मनो जीवस्य हृदयग्रन्थिमहंकारबन्धं निर्हर्तुमिच्छुः संस्तन्त्रोक्तेन च विधिना प्रकारेण भजेत् तन्त्रमागमः चकाराद्वैदिकेन सह समुच्चयमाह ॥ ४७ ॥

तमेव विधिमाह—लब्धानुग्रह इत्यादिना । तेनाऽऽचार्येण संदर्शित आगमोऽर्चनप्रकारो यस्य सः ॥ ४८ ॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

प्रथममेव । चित्तशुद्धेः पूर्वमेव अजितेन्द्रियत्वात् इहामुत्रभोगाविरक्तत्वात् अज्ञः स्वरूपज्ञानशून्यः भगवत्कथादौ श्रद्धात्मकज्ञानशून्यश्च यः स्वयं नाचरेत् किन्तु आत्मानं विज्ञं मत्वाऽन्यान् शिक्षयेदिति स्वयं पदस्यार्थः कर्मानाचरणलक्षणेन तज्जन्येनाधर्मेण मृत्योरनन्तरं मृत्युं मृत्युपरम्परामित्यर्थः । वक्ष्यते च "तावत् कर्माणि कुर्वीत" इत्यादि तथाच विकर्माधर्मेण मृत्युपरम्पराप्राप्तौ प्रमाणं श्रुतिः स्वकर्मभिः वेदोक्तस्वधर्मैरकृतैः सद्भिः अद्यमानः पीड्यमानः अकृतानां तेषां पापजनकत्वात् यद्वा स्वकर्मभिः पीड्यमानः दुःखबुद्ध्या तानि त्यजन्नित्यर्थः ॥ ४५ ॥

तस्मात् । कर्मत्यागस्य मृत्युहेतुत्वात् तस्मिन् कर्मणि तत्फलं कर्मफलं नैष्कर्म्यरूपा कर्मनिवृत्तिसाध्यज्ञानस्वरूपा अनभिनिवेशवान् अहं कर्त्तेत्यभिनिवेशशून्यः ततश्च फलश्रवणे सति तदा च सम्यक् विचारकाले "यो वा" इति श्रुतिः हे गार्गि! यो जनः एतदक्षरं कूटस्थं ब्रह्माविदित्वाऽज्ञात्वा अस्माल्लोकाल्लोकान्तरं विषयसुखस्पृहया गच्छति स कृपणो दीनस्तुच्छ इत्यर्थः । इत्यनेन प्रकारेण अनात्मज्ञस्य देहाभिमानिनोऽज्ञस्य कृपणतामवधार्य श्रुत्वा तं परोक्षम् एतं वेदान्तैकवेद्यं परमात्मानं ब्राह्मणा ब्रह्मचारिणो वेदानुवचनेन वेदाध्ययनोपलक्षितस्वधर्मेण विविदिषन्ति ज्ञातुमिच्छन्ति एवं वानप्रस्थास्तपसा श्रद्धया आस्तिक्येन यज्ञेन च गृहस्थाः अनाशकेन भोजनसङ्कोचेन यतयो विविदिषन्ति दन्त्यसकारपाठेऽनासक्त्या इति श्रुत्या ज्ञानशेषतां ज्ञानाङ्गत्वं चावधार्य "यज्ञादिश्रुतेरश्ववत्" इति न्यायात् ततश्च निष्कामकर्मप्रवृत्त्यनन्तरं स्वर्गकाम इति नियोज्यविशेषणे तस्य श्रुत्यर्थविचारेण निष्कामता चेत् स्वर्गस्याकामितत्वं कामित एव च स्वर्गादिः फलत्वेनावगम्यते योगेन स्वर्गं भावयेदिति तथाच संयोगपृथक्त्वन्यायेन वैदिककर्मणां विविदिषार्थत्वादीश्वरार्पणप्रभावाच्च नैष्कर्म्यापरपर्यायज्ञानभक्तिलक्षणा सिद्धिर्भवतीत्यर्थः । "भक्तिरस्य भजनं तदिहामुत्रोपाधिनैराश्येनामुष्मिन्मनःकल्पनमेतदेव च नैष्कर्म्य"मिति श्रुतेः" यदत्र क्रियते कर्म भगवत्परितोषणम् । ज्ञानं यत्तदधीनं हि भक्तियोगसमन्वित"मिति स्मृतेश्चेति ॥ ४६ ॥

वैदिकमिति । बालान् प्रति ज्ञानसाधनत्वेन वैदिकं कर्मयोगमुक्त्वा विज्ञान् प्रति तु तान्त्रिकं नारदपञ्चरात्राद्युक्तं साक्षाद्भक्त्यात्मकमर्चनलक्षणं कर्मयोगमाहेत्यर्थः । परस्यैवेति । वस्तुतोऽहङ्काराद्यदृष्टत्वेन दृश्यात्तस्मात् परस्यैव ॥ ४७ ॥

तमेव विधिम् । तन्त्रोक्तमेव प्रकारं महापुरुषमित्युक्त्या सामा-

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

न्यतः सर्वासामपि प्राप्तौ आत्मनः स्वस्याभिमतया प्रेष्ठयेत्युक्तम् ॥ ४८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

वेदोक्तं यदिनाचरेत् यथापि कर्माण्याचरेत् तेनाधर्मेण मृत्योर्मृत्युमुपैति ॥ ४५ ॥

नैष्कर्म्यां बन्धकसकलकर्मनिवृत्तिहेतुभूतां सिद्धिम् ज्ञानसम्पत्तिं लभते कर्मयोगो ज्ञानयोगहेतुरित्यर्थः । कर्मणामक्षयफलत्वश्रुतिरर्थवाद इत्यर्थः ॥ ४६ ॥

तन्त्रोक्तेन चेति । भगवच्छास्त्रोक्तेन धर्मेण वर्णाश्रमधर्माणां समुच्चयवाची चशब्दः ॥ ४७ ॥

सन्दर्शितागमः सन्दर्शितमार्गः मूर्त्यां विशिष्टमित्यर्थः ॥ ४८—५३ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथ नित्यनैमित्तिकयोरनभिसंहितफलयोर्भक्तियोगानुग्राहकतयानुष्ठेयत्वं वक्तुं तावत्तदननुष्ठाने प्रत्यवायमाह—नाचरेदिति । वेदोक्तं वेदविहितम् यदि नाचरेत्तथा विकर्माण्याचरेत्तेन विकर्मणा वेदविरुद्धकर्मानुष्ठानरूपेणावश्यकाननुष्ठानरूपेण वा धर्मेण मृत्योः सकाशान्मृत्युमेवोपैति अज्ञोऽजितेन्द्रिय इत्यनेन निष्पन्नभक्तियोगप्रपत्तियोगान्यतरनिष्ठस्य जितेन्द्रियस्य कथञ्चिद्विरुद्धकर्मानुष्ठितमपि न बन्धकमिति सूचितं तथा च वक्ष्यति "स्वपादमूलं भजतः प्रियस्य" इत्यादिना ॥ ४५ ॥

तस्माद्वेदोक्तं नित्यं नैमित्तिकं काम्यं च कर्म ईश्वरे समर्पितम् यथा तथा कुर्वाण एव निःसङ्गः तत्तदवान्तरफलेषु सङ्गरहितः नैष्कर्म्यां नैष्कर्म्यहेतुभूतां बन्धकसकलकर्मनिवृत्तिहेतुभूतां सिद्धिं ज्ञानसम्पत्तिं लभते कर्मयोगो हि ज्ञानयोगहेतुरित्यर्थः । तर्हि किमर्थं तत्तत्फलानि श्रूयन्त इत्यत्राह—रोचनार्था फलश्रुतिरिति । कर्मणां फलवत्त्वश्रुतिरर्थवाद इत्यर्थः । ईश्वरेऽर्पितमित्यनेन कर्मणां फलसाधनत्वबुद्धिं परित्यज्येश्वराराधनताबुद्धिः कार्येति सूचितम् अनेन फलत्यागः फलितः निःसङ्ग इत्यनेन ममेदं कर्मेत्यात्मीयताबुद्धिस्त्याज्येति अनेन कर्तृत्वत्यागः तदेवं फलसङ्गकर्तृत्वत्यागपूर्वकमनुष्ठितं वैदिकं कर्म भक्तियोगनिर्वर्त्तकमित्युक्तं भवतीति ॥ ४६ ॥

अथ तान्त्रिकं कर्मयोगं निरूपयिष्यंस्तावत्तस्य वैदिककर्मयोगसमुच्चितस्याचिराद्भक्तियोगनिष्पादकत्वमाह—य इति । अथ ननु यः पुमानात्मनः स्वस्य हृदयग्रन्थिमहंममाभिमानादिप्रकृतिसम्बन्धकार्यं तस्य ग्रन्थिवत् दुर्भेद्यत्वात्तत्त्वेन रूपणं निर्जिहीर्षुर्निर्हर्त्तुमिच्छुः तन्त्रोक्तेन च वैदिककर्मसमुच्चयवाची चशब्दः विधिना केशवं देवमुपचरेदाराधयेत् तान्त्रिकवैदिककर्मयोगाभ्यां भगवन्तमाराधयन्नाशु निष्पादितभक्तियोगः प्रकृतिसम्बन्धान्मुच्यत इत्यर्थः । परात्मन इतिपाठान्तरे परस्य देहावलक्षणस्यात्मनः स्वस्य हृदयग्रन्थिमिति सम्बन्धः तन्त्रशब्देनात्र पञ्चरात्रभगवच्छास्त्रं विवक्षितम् ॥ ४७ ॥

कोऽसौ तन्त्रोक्तविधिरित्यतस्तं निरूपयति—लब्धानुग्रह इत्यादिना । आचार्याल्लब्धानुग्रहः लब्धः अनुग्रहो येन सः तेनाचार्येण सन्दर्शितागमः सन्दर्शितपूजाप्रकारः आत्मनः स्वस्याभिमतया मूर्त्या विशिष्टं महापुरुषमभ्यर्चेत् ॥ ४८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

वेदस्यापौरुषेयत्वेन विप्रलम्भादिदोषाभावादज्ञेनापि वेदोक्तं कृतं सुकर्मेत्याशङ्क्य भगवदज्ञकृतं विकर्म तत् ज्ञानकृतमेव सुकर्म इति विविनक्ति—नाचरेदिति । स्वयं सर्वपूजितमिदमिष्टप्रदं दैवं न जानातीत्यज्ञः अत एवाजितेन्द्रियः विषयलम्पटः यो ना पुरुषो वेदोक्तं कर्माचरेत्करोति स मृत्योर्मृत्युमतीव दुःखमुपैति केन कारणेनेत्यत उक्तं विकर्मणेति वेदोक्तकर्मणो विकर्मत्वं कुत इत्यत उक्तम् अधर्मेणेति—

"एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः ।
यद्भक्त्या पुण्डरीकाक्षं स्तवैरर्चेन्नरः सदा" ॥

इति भीष्मोक्तेरनेवंविधस्य कर्मणा अधर्मत्वात् "यद्यनेवंवित् महत्पुण्यकर्म करोति तद्धान्ततः क्षीयत एवे"ति श्रुतिं हिशब्द आददाति अनेनेश्वरार्पणमौषधमेव कर्मणो नश्वरफलरोगविनाशयनित्यसुखहेतुरित्युक्तं भवति ॥ ४५ ॥

तर्हि "स्वर्गे लोके न भयं किंच नास्ती"ति श्रुतिः कथं संगच्छत इति तत्राह—रोचनार्थमिति । अल्पबुद्धेर्बहिर्मुखस्य योग्यस्य उत्पिपादयिषुर्दयालुरिव तस्मिन् बुद्ध्यवतारार्थं गुडजिह्विकान्यायमनुसंदधानो मधुरं मुक्तिफलं गर्भीकृत्य स्वर्गादिपुष्पं मधुररसमिव प्रकाश्य तदर्थं कर्म विदधाना अधीतश्रुतवेदार्थस्य समुत्पन्नजिज्ञासस्य क्षणभङ्गुरफलत्वात्स्वर्गादौ वैराग्यमुत्पाद्य श्रीनारायणचरणारविन्दभक्तिमुत्पाद्य तदुपासनासंभूतसंवित्संजातप्रसादसुलभापवर्गे तात्पर्यपर्यवसायिनी फलश्रुतिः संगता भवतीति—

"अज्ञात्वा कुर्वतः कर्म स्खलनात्पापकारणम् ।
तदेवार्पयतो विष्णोर्नैव पापाय तद्भवेत् ॥
मनोदोषविहीनस्य नतु दोषवतः क्वचित् ।
सत्सु केशवपूर्वेषु क्रमशो भक्तिहीनता ॥
असद्भक्तिस्तथा स्नेहो बहुमानमथापिवा ।
स्वोत्तमानां प्रियत्यागादात्मप्रियचिकीर्षया ॥
अधिकेष्वेव नीचोच्चभक्तिर्व्यत्यास एव वा ।
स्वोत्तमस्यात्मनश्चैव समस्नेहोऽथवा भवेत् ॥
कार्येषु बहुमानो वा आत्मनः समतापिवा ।
आधिक्ये किमु वक्तव्यमात्मनः शक्तिहापनम् ॥
शक्तस्याशक्तवत्कर्म मनोदोषा इतीरिताः" ।

इत्यनेनोक्ततात्पर्यार्थो बोद्धव्यः ॥ ४६ ॥

इदानीं भगवदर्चनप्रकारं कथयति । य आश्विति । तन्त्रोक्तेन पञ्चरात्रोक्तेन ॥ ४७ ॥

तन्त्रोक्तसंप्रदायमजानतः कथमर्चना घटत इति तत्राह—लब्ध्वेति । मध्यमिति । क्रियाविशेषणं बहुकालं परीक्ष्याचार्य

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

लब्ध्वेत्यस्मिन्नर्थे वर्तते तेनाचार्येण संदर्शितागमः सम्यक् दर्शितशास्त्रसंप्रदायः ॥ ४८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तत्र यथा बालानां बालचिकित्सैव हिताय स्यात्तदतिक्रमस्त्वहिताय तथा तेषां कर्मतदतिक्रमौ ज्ञेयावित्याह—नाचरेदिति । बालवदजितेन्द्रियः इहामुत्र भोगाविरक्तोऽपि वेदोक्तं यो नाचरेत् तथा अज्ञः न विद्यते ज्ञा भगवत्कथादौ श्रद्धारूपा धीवृत्तिर्यस्य स च यो नाचरेत् सोऽपि नित्यनैमित्तिककर्माकरणजातेनाधर्मेणैव मृत्योरनन्तरं मृत्युमुपैति न तु पुण्येनेत्यर्थः । वक्ष्यते च "तावत्कर्माणि कुर्वीते"त्यादि ॥ ४५ ॥

ननु कर्म खलु सजातीयत्वात्कर्म वृद्धये एव भवेत् प्रत्युत कथं तन्मोक्षाय भवतु इत्याशङ्क्योभयत्रापि समाधत्ते-वेदोक्तमेवेति । तत्र क्रियमाणकर्मणयासङ्गं निरस्यति । निःसङ्ग इति । तत्फलावाप्तिं निरस्यति-रोचनार्थेति । तदेतद्धेतुद्वयं कर्मवृद्धये दर्शितं तन्मोक्षाय हेतुः ईश्वरेऽर्पितामिति तत्सम्बन्धप्रभावेण संस्कृतत्वादिति भावः । आमयो येन भूतानामित्यादेः ॥४६॥

तदेवमपि बालान् प्रत्येवोक्तं विज्ञान् प्रति तु श्रूयतामिति श्रीभगवदर्चनमेव ग्राहयति-य आश्विति । चकारेण पाद्याद्युपचरणैर्वैदिकमन्त्रादीनपि गृह्णाति ॥ ४७ ॥

महापुरुषाभ्यर्चने सामान्यतः सर्वस्या यस्याः कस्याश्चिद्वा मूर्त्तेः प्राप्तौ विशिष्याह—मूर्त्येति एकयाप्यभिमतयेति ॥४८-४९॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

ननु कर्ममोक्षश्चेत् पुरुषार्थस्तर्हि प्रथममेव कर्मत्याज्यतामत आह—नाचरेदिति । यदि वेदोक्तं प्रातःस्नानसन्ध्यावन्दनादिकं कर्म नाचरेत्तदा "नहि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृ"दिति भगवदुक्तेर्दैहिकव्यापारं विना स्थातुमशक्यत्वादजितेन्द्रिय इतीन्द्रियजयाभावात् पशुरिव प्रातरारभ्यानियतभोजनस्त्रीसङ्गादिविविधपापनिरत एव स्यात् यतोऽज्ञः विवेकशून्यः ततश्च विकर्मणा निषिद्धाचरणलक्षणेनाधर्मेण मृत्योर्यस्मात् सकाशात् मृत्युं नरकमेव प्राप्नोति तथाच श्रुतिः "मृत्वा पुनर्मृत्युमापद्यते अद्यमानः स्वकर्मभि"रिति ॥ ४५ ॥

अतएव परमकारुणिको वेदो भक्तिविमुखानां नराणां पशूनामिवेन्द्रियारामत्वातिशयवारणायैव तानुद्दिश्य कर्माणि फलदर्शनया रोचयंस्तथा विधत्ते यथा प्रातरारभ्य स्नानादिभिर्विहितानुष्ठानैर्विकर्मण्यवसरमेव ते न प्राप्नुवन्ति । अनिषिद्धभोजनव्यवायादिषु प्रवर्त्यैव पापेभ्यो भीषयमाणः स्वरक्षां भीषणान्तान्मानयत्यन्यथा तदाज्ञापालनासामर्थ्यादेव ते नाऽमानयिष्यन्नित्येवं वेदतात्पर्यमवधार्य स्वस्याजितेन्द्रियत्वं दुर्वारमालक्ष्य विवेकी कर्मैव कर्त्तुमर्हतीत्याह-वेदोक्तमेव । ननु कर्माणि क्रियमाणे तस्मिंस्तत्फले चासक्तिस्तत्फलं च स्यात् नतु नैष्कर्म्यरूपा सिद्धिरत आह-निःसङ्गः कर्माणि फले चानभिनिवेशवान् ईश्वरेऽर्पितमेव ।

नतु फलस्य श्रुतत्वात् कर्माणि कृते फलं भवेदेव । न रोचनार्थेति कर्माणि रुच्युत्पादनार्थैव । अगदपाने खण्डलड्डुकादिवत् ततश्च "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति ब्रह्मचर्येण तपसा श्रद्धया यज्ञेनानाशकेनचे" ति यज्ञादीनां ज्ञानशेषतां चावधार्य निष्कामे कर्माणि प्रवर्त्तते ततश्च स्वर्गकामो यजेतेत्यादिभिः कामितस्यैव स्वर्गादेः फलत्वेनावगमादकामितोऽसौ न भवतीति परमेश्वरे कर्मार्पणमहिम्ना भक्तिमिश्रज्ञानजनकेन कर्मणापि नैष्कर्म्यसिद्धिर्भवेदिति भावः ॥ ४६ ॥

तदेवमपि बालान् प्रत्येवोक्तं विज्ञान् प्रति तु श्रूयतामिति श्रीभगवदर्चनाजिग्राहयिषयाह-य आश्विति । परात्मनः वस्तुतो देहात् परश्चासावात्मा जीवश्चेति तस्य हृदयग्रन्थिमहङ्कारं निर्हर्त्तुमिच्छुर्भवेत् तन्त्र आगमस्तदुक्तेन चकाराद्वैदिकेन च ॥४७॥

तं विधिमाह—लब्ध्वेति सन्दर्शित आगमोऽर्चनप्रकारो यस्मै सः ॥ ४८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

निषिद्धानुष्ठानात्संसारं विहितानुष्ठानान्मुक्तिं चाह-क्रमात्-नाचरेदिति द्वाभ्याम् । विकर्मणा निषिद्धानुष्ठानेन मृत्योरनन्तरं मृत्युं प्राप्नोति पुनः पुनर्जन्ममरणलक्षणं संसारं प्राप्नोतीत्यर्थः ॥ ४५ ॥

स्वर्गकामो यजेत इत्यादिफलश्रुतिः रोचनार्था कर्मणि श्रद्धोत्पादिका अतो निःसङ्गः स्वर्गादिभोगेषु विगतं सङ्कल्पमीश्वरे अर्पितम् यथा स्यात्तथा वेदोक्तं वेदविहितम् स्वाश्रमकर्म कुर्वाणः एवकारेण निषिद्धाद्दूरीभूतः नैष्कर्म्यं भगवज्ज्ञानं लभते तदनन्तरं सिद्धिं भगवद्भावापत्तिलक्षणां मुक्तिं लभते इत्यर्थः ॥ ४६ ॥

नैष्कर्म्यं भगवज्ज्ञानं लभते इत्युक्तं तत्र नैष्कर्म्यलाभानन्तरं मुक्तेः किं साधनान्तरमपेक्षितमुत नैष्कर्म्यादेव केवलान्मुक्तिरित्याकाङ्क्षायामाह—य इत्यादि । यः पूर्वोक्तनैष्कर्म्यलाभवान् परात्मनः देहेन्द्रियादिपरस्यात्मनः स्वस्य हृदयग्रन्थि संसारमूलभूतम् हृदयस्थमहंममाभिमानं निर्जिहीर्षुर्निर्हर्तुमिच्छुश्चेत्तर्हि विधिना आशु केशवमुपचरेदित्यन्वयः । केशवकृपां बिना नैष्कर्म्यमात्रेण हृदयग्रन्थिनिर्हारासंभवात्तदर्थं श्रद्धाविश्वासोपबृंहितेनोपचारेण केशवमाशु तोषयेत् विलम्बे कृते तु विषयासक्त्या नैष्कर्म्यविलोपे सति केशववैमुख्यम् संसारावहं पुनः स्यादिति भावः । कथंभूतेन विधिना तन्त्रोक्तेन पञ्चरात्राद्यागमोक्तेन चकाराद्वेदोक्तेन ॥ ४७ ॥

विधिं दर्शयति-लब्ध्वेत्यादिना । अनुग्रहं दीक्षाम् तेनाचार्येण सम्यक् दर्शितः आगमः अर्चनबोधकं शास्त्रं यस्य सः ॥ ४८ ॥

भाषा टीका ।

जो अज्ञानी पुरुष अजितेन्द्रि होकर स्वयं वेदके कहे हुये आचरण को नहीं करता है वह विकर्म के करने से अधर्मी होकर वार वार जन्मता मरता रहता है ॥ ४५ ॥

शुचिः संमुखमासीनः प्राणसंयमनादिभिः ।
पिण्डं विशोध्य सन्न्यासकृतरक्षोऽर्चयेद्धरिम् ॥ ४९ ॥
अर्चादौ हृदये चापि यथालब्धोपचारकैः ॥
द्रव्यक्षित्यात्मलिङ्गानि निष्पाद्य प्रोक्ष्य चाऽऽसनम् ॥ ५० ॥
पाद्यादीनुपकल्प्याथ सन्निधाप्य समाहितः ॥
हृदादिभिः कृतन्यासो मूलमन्त्रेण चार्चयेत् ॥ ५१ ॥
साङ्गोपाङ्गां सपार्षदां तां तां मूर्त्तिं स्वमन्त्रतः ॥
पाद्यार्घ्याचमनीयाद्यैः स्नानवासोविभूषणैः ॥ ५२ ॥

भाषा टीका ।

वेद के कहे कर्म को करता हुआ फल की इच्छा छोड़ कर कर्म फल को ईश्वर में अर्पण करता रहै तो मनुष्य मोक्ष सिद्धि को प्राप्त होजाता है फल श्रुति जो शास्त्र में है उस को रोचनार्थ समझना चाहिये ॥ ४६ ॥

जो पुरुष शुद्ध अपने आत्मा की वासना रूपी हृदय ग्रंथी को खोलना चाहै वह तो वेद विधि से पंचरात्र की विधि से श्रीकेशव भगवान् का पूजन करै ॥ ४७ ॥

पहिले उत्तम आचार्य गुरु से दीक्षा लेकर उनसे शास्त्रोक्त पूजा विधि को पढकर रामकृष्णादि जिन मूर्तियों में अपनी प्रीति अधिक होवै उसी में महापुरुष श्रीनारायण की पूजा करै ॥ ४८ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

मूर्तेः संमुखमासीनः आदिशब्देन भूतशुद्ध्यादिभिः पिण्डं देहं विशोध्य सन्न्यासैः सद्भिर्न्यासैःकृता रक्षा येन सः ॥ ४९ ॥

आदावेव द्रव्याणि पुष्पादीनि जन्त्वादिशोधनेन क्षितिं संमार्जनादिना आत्मानमव्यग्रतया लिङ्गं मूर्तिमनुलेपक्षालनादिना निष्पाद्य योग्यानि कृत्वा ॥ ५० ॥

पाद्यादिपात्राण्युपकल्प्य सान्निधाप्य हृदि संपूजितं श्रीमूर्तौ ध्यात्वा हृदादिभिः हृदयशिरःशिखाकवचनेत्रास्त्रमन्त्रैर्मूलमन्त्रेण च देवे कृतन्यासो मूलमन्त्रेणार्चयेत् ॥ ५१ ॥

अङ्गानि हृदयादीन्युपाङ्गानि सुदर्शनादीनि तत्सहितां सपार्षदां सपरिवाराम् कैरुपचारैरर्चयेत्तदाह-पाद्येति । आदिशब्देन मधुपर्कमाचनं च ॥ ५२ ॥

———

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

भूतशुद्ध्यादिभिरित्यादिना तत्सेवोपयोगिपार्षदमूर्तिचिन्तनपरिग्रहः भूतशुद्धिश्चाग्रे व्याख्यास्यते सद्भिर्न्यासैः केशवादिन्यासैः ॥ ४९ ॥

अर्चादाविति युग्मकं सन्निधाप्य यथायोग्यस्थाने स्थापयित्वा अर्चादावित्यादिना वक्ष्यमाणसूर्याधिष्ठानपरिग्रहः सान्निधाप्येत्यस्यैव व्याख्यानं श्रीमूर्तौ ध्यात्वेति हृदयेति हृदयाय नमः शिरसे स्वाहा शिखायै वषट् कवचाय हुं नेत्राभ्यां वौषट् अस्त्राय फट् इत्येवं मन्त्रैः मूलमन्त्रेण तं नमो भगवत इति द्वादशाक्षरेण स्वस्वगुरूपदिष्टमन्त्रेण वा ॥ ५०—५१ ॥

साङ्गोपाङ्गामिति युग्मकं तां तां स्वस्वाभीष्टां माल्यपुष्पम् ॥ ५२—५३ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

शुचिरिति । शुचिः संमुखं मूर्तेरभिमुखं यथा तथा आसीनः प्राणसंयमनादिभिः आदिशब्देन भूतशुद्ध्यादिसंग्रहः पिण्डं देहं विशोध्य सद्भिर्न्यासैः कृता रक्षा येन सः ॥ ४९ ॥

अर्चादौ प्रतिमादौ आदिशब्देन वक्ष्यमाणान्यर्कतोयातिथीनां संग्रहः हरिं यथा लब्धोपचारकैः सम्भावितैरुपचारसाधनैरर्चयेदिति सम्बन्धः।तत्रादावेव द्रव्यादीनि निष्पाद्य तत्र द्रव्याणि तुलसीचन्दनपुष्पादीनि प्रोक्षणादिना क्षितिं सम्मार्जनोपलेपनादिना आत्मानमव्यग्रतादिना यद्वाआत्मानंदेहं तत्त्वन्यासादिना लिङ्गं भगवन्मूर्तिमनुलेपनक्षालनादिना निष्पाद्य योग्यानि कृत्वा ॥ ५० ॥

पाद्यादिपात्राण्युपकल्प्य समाहितः समाधिना सन्निधाप्य प्रतिमादौ भगवन्तमावाह्येत्यर्थः।हृदयादिभिर्मन्त्रैः कृतः न्यासो येन सः कृतहृदयादिन्यास इत्यर्थः।तथा मूलमन्त्रेण च कृतन्यासः मूलमन्त्रेणैवार्चयेदित्यर्थः ॥ ५१ ॥

अङ्गानि हृदयादीनि उपाङ्गानि सुदर्शनादीनि तत्सहितां सपार्षदां सपरिवारां तां तां मूर्त्तिं स्वस्वमन्त्रतः तत्तन्मूर्त्तिमन्त्रेणैवार्चयेत् कैरुपचारैरर्चयेदित्यत्राह-पाद्येति।आद्यशब्देन दन्तधावनजिह्वोल्लेखनतैलाभ्यङ्गोद्वर्त्तनस्नानशाटिकासमर्पणादिसंग्रहः वासो वस्त्रयुग्मं यज्ञोपवीतस्याप्येतदुपलक्षणम् ॥ ५२ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

पिण्डं शरीरं सम्यक् मन्त्राक्षरन्यासेन कृतात्मरक्षः—

"परीक्ष्यैव गुरुः शिष्यं शिष्योऽपि गुरुमाव्रजेत्
अन्यथा नरकायैव प्रायश्चित्तं गुरोस्तथा" ॥

गन्धमाल्याक्षतस्रग्भिर्धूपदीपोपहारकैः ।
साङ्गं सम्पूज्य विधिवत्स्तवैः स्तुत्वा नमेद्धरिम् ॥ ५३ ॥
आत्मानं तन्मयं ध्यायन्मूर्तिं सम्पूजयेद्धरेः ।
शेषामाधाय शिरसि स्वधाम्न्युद्वास्य सत्कृतम् ॥ ५४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इत्यनेनाऽयमर्थमुभयोरप्यपेक्षितमिति अतोऽत्र क्रियाविशेषणत्वेन प्रयुक्तमिति ॥ ४९ ॥

अर्चाकारिणां बाहुविध्यादधिष्ठानविशेषमाह—अर्चादाविति । द्रव्यलिङ्गं शिलाद्यं क्षितिलिङ्गं स्थण्डिलम् आत्मलिङ्गं मनोलक्षणम्—

"द्रव्यलिङ्गं शिलाद्यं स्यादात्मलिङ्गं मनोमयम् ।
अथवा स्थण्डिलं चैव विष्णोर्लिङ्गं प्रकीर्तितम् ॥

इति अस्मादयमेवात्र विवक्षितोऽर्थः ॥ ५० ॥

हृदयादिकृतमन्त्रन्यासः साङ्गोपाङ्गामङ्गमन्त्रवाच्यमूर्तिभिः सहिताम् ॥ ५१—५३ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अर्चादाविति युग्मकम् पाद्यादीन्येव संनिधाप्य यथायोग्यस्थाने स्थापयित्वा मानसान्तरं श्रीमूर्तिरूपेण श्रीकृष्णं संनिधाप्येति वा ॥ ५० ॥ ५१ ॥

साङ्गोपाङ्गामिति युग्मकम् ॥ ५२ ॥ ५३ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

प्राणसंयमनं प्राणायामः आदिशब्दात् भूतशुद्ध्यादि पिण्डं देहं सद्भिर्न्यासैः कृता रक्षा येन सः ॥ ४९ ॥

यथा यथावत् द्रव्याणि पुष्पादीनि जन्त्वादिशोधनेन क्षितिं मार्जनादिना आत्मानमव्यग्रतया लिङ्गं मूर्त्तिमनुलेपप्रक्षालनादिना निष्पाद्य योग्यानि कृत्वा पाद्यादिपात्राण्युपकल्प्य हृदादिभिः हृदयशिरःशिखाकवचनेत्रास्त्रमन्त्रैर्मूलमन्त्रेण च कृतन्यासः ॥ ५० ॥ ५१ ॥

अङ्गानि हृदयादीनि उपाङ्गानि सुदर्शनादीनि तत्सहितां माल्यानि स्वर्णमुक्तादिहाराः "नाक्षतैरर्चयेद्विष्णुं न केतक्या महेश्वर" मिति निषेधात् अक्षता अनुपहताः स्रजः पुष्पमालाः ॥ ५२ ॥ ५३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

स्नानादिना शुचिः मूर्त्तेः सम्मुखमासीनः प्राणसंयमनादिभिः प्राणायामभूतशुद्ध्यादिभिः पिण्डम् शरीरं विशोध्य सम्यक् मन्त्रपदवर्णादिविन्यासैः कृता रक्षा येन सः हरिमर्चयेत् ॥ ४९ ॥

द्रव्याणि पुष्पादीनि जन्त्वादिशोधनेन क्षितिं संमार्जनादिना आत्मानं शौचादिना लिङ्गं मूर्त्तौ पूर्वसमर्पितपुष्पादिनिराकरणेन निष्पाद्य सुयोग्यानि कृत्वा यथा लब्धोपचारकैः देशकालाद्यनुसारलब्धैः पूजोपकरणैः अर्चादौ अर्चयेदित्यग्रिमेणान्वयः ॥ ५० ॥

पाद्यादीनि पाद्यानि पात्राणि उपकल्प्य सन्निधाप्य हृदि सम्पूजिताम् श्रीमूर्त्तिं ध्यात्वा हृदाविश्यः मूलमन्त्रेण च देवे कृतन्यासः मूलमन्त्रेण हरिमर्चयेत् ॥ ५१ ॥

अङ्गैर्हृदयादिभिः उपाङ्गैः सुदर्शनादिभिः सहितां सपार्षदां सपरिवारां तां तां स्वस्य स्वस्वाभिमतां मूर्त्तिं स्वमन्त्रतः पाद्याद्युपहारकान्तैरुपचारैरर्चयेदित्यध्याहृतेन पदेन सार्द्धश्लोकस्यान्वयः आदिशब्देनानुक्तं मधुपर्कादिकम् संगृह्यते ॥ ५२ ॥ ॥

भाषा टीका ।

स्नानसंध्यादि से पवित्र होकर भगवान् की मूर्त्ति के सन्मुख बैठे फिर प्राणायाम भूतशुद्धि आदि से शरीर को शुद्ध करके अंगन्यासादि सब न्यासों को करै फिर दिग्बंधन से रक्षा करके श्रीहरि का पूजन करै ॥ ४९ ॥

मूर्ति आदि में पूजन करै वा हृदय में करै यदि मूर्ति का पूजन करै तो जो कुछ पूजा की सामग्री मिलै तिसको पहिले रक्खै फिर नैवेद्य पुष्पादिकों को तथा पृथिवी को अपने आत्मा को तथा प्रतिमा को प्रोक्षणादि कों से पूजा योग्य करै और आसन का भी प्रोक्षण करै ॥ ५० ॥

पाद्य अर्घ्यादि कल्पना करके सावधानता से भगवान् का आवाहन करै फिर हृदयादिन्यास करके मूल मंत्र अष्टाक्षर आदि से पूजन करै ॥ ५१ ॥

हृदयादि अंग सुदर्शनादि उपाङ्गों के सहित और पार्षदों के सहित उन उन मूर्तियों को अपने मंत्र से पूजन करै पाद्य अर्घ आचन मधुपर्क स्नान वस्त्र भूषणादिकों से अच्छे पूजा करै ॥ ५२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अक्षतादितिलकालङ्कारे ननु पूजायाम् "नाक्षतैरर्चयेद्विष्णुं न केतक्या महेश्वर" मिति निषेधात् उपहारो नैवेद्यम् ॥ ५३ ॥

शेषाम् । निर्माल्यम् स्वधाम्नि स्वस्थाने देवं हृदि मूर्तिं करण्डके स्थापयित्वा पूजाविधिं समापयेदिति शेषः ॥ ५४ ॥

एवमग्न्यर्कतोयादावतिथौ हृदये च यः ।
यजतीश्वरमात्मानमचिरान्मुच्यते हि सः ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्याम्
एकादशस्कन्धे जायन्तेयोपाख्याने विदेहप्रश्ने
तृतीयोऽध्यायः ॥ ३ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तान्त्रिकं कर्मयोगमुपसंहरति—एवमिति ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
तृतीयोऽध्यायः ॥ ३ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी ।

आत्मानं तन्मयं तदाविष्टं ध्यायन् "नारायणमयं धीराः पश्यन्ति परमार्थिनः । जगद्धनमयं लुब्धाः कामुकाः कामिनीमय"मितिवत् स्वधाम्नि श्रीकृष्णमूर्तिं स्थाने स्थापयित्वा शयनलीलायमानत्वेन ध्यात्वा ॥ ५४ ॥

अर्चादावित्यादिना गृहीतमन्याधिष्ठानमपि कथयन्नुपसंहरति—एवमिति ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे
श्रीराधारमणदासगोस्वामिविरचितायां दीपिकादीपिन्या
टिप्पण्यां तृतीयोऽध्यायः ॥ ३ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

तन्मयम् । प्राचुर्ये मयट् तदन्तर्यामिकमित्यर्थः । शेषामाधाय भगवद्भक्तिप्रापणं पावनमन्नं भोजनार्थं ससत्कारं स्वीकृत्येत्यर्थः । स्वधाम्नि परमव्योमादौ ॥ ५४—५५ ॥

इति श्रीमद्भागवतव्याख्याने एकादशस्कन्धीये
श्रीसुदर्शनसूरिकृतशुकपक्षीये
तृतीयोऽध्यायः ॥ ३ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

माल्यानि पुष्पाणि दीपो नीराजनं तदनन्तरस्य मधुपर्कादेरप्युपलक्षणम् उपहारो नैवेद्यं तैः साङ्गं सपरिवारं यथाविधि सम्पूज्य स्तवैः स्तोत्रैः स्तुत्वा प्रणमेत् ॥ ५३ ॥

तन्मयं प्राचुर्ये मयट् आराध्यमूर्त्यन्तर्यामिकमात्मानं ध्यायन् हरेः मूर्तिं सम्पूजयेत् शेषं भगवद्भुक्तावशिष्टं पावनमन्नं भोजनार्थं स्वीकृत्येति शेषः । शिरस्याधाय भगवते पूर्वं समर्पितं तुलसीपुष्पादिकं शिरसि ससत्कारं धृत्वेत्यर्थः । सत्कृतामिति भावे क्तः सबहुमानमित्यर्थः यद्वेत्थं सत्कृतं सम्पूजितं हरिं स्वधाम्नि परमव्योमादौ उद्वास्य स्थापयित्वा पूजाविधिं समापयेदिति शेषः ॥ ५४ ॥

एवं निरूपितं तान्त्रिकं कर्मयोगमुपसंहरति—एवमिति । अग्न्याद्यधिकरणेषु सर्वान्तरात्मानम् ईश्वरं यो यजेत्सोऽचिरान्निष्पन्नभक्तियोगः कर्मबन्धान्मुच्यते ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम् ।
तृतीयोऽध्यायः ॥ ३ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तन्मयम् । तत्प्रधानम्—

"विष्णोर्भृत्योऽहमित्येवं सदा स्याद्भगवन्मयः ।
नैवाहं विष्णुरस्मीति विष्णुः सर्वेश्वरो ह्यजः" ॥

इति वचनात्स्वामित्वमेवार्थो ननु तत्स्वरूपत्वं स्वमात्मानमित्युत्तरत्रैक्यविधानादत्रापि स एवार्थः किं न स्यादितिचेन्न स्वं स्वतन्त्रमात्मानं व्याप्तमित्यर्थोपपत्तेः—

"स्वादानात्स्वात्मनो व्याप्त्या विष्णुः स्वात्मेति कथ्यते ।
न तु जीवस्वरूपत्वात्स हि विश्वेश्वरः प्रभुः" ॥

इति प्रमाणोपेतत्वात् हिशब्देनाप्यर्थस्य बहुप्रमाणप्रसिद्धिं द्योतयति ॥ ५४—५५ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
तृतीयोऽध्यायः ॥ ३ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

आत्मानं तन्मयन्तदाविष्टम् "कामुकाः कामिनीमयम्" इति वत् स्वधाम्नि श्रीकृष्णमूर्तेः स्थाने उद्वास्य उत्थाप्य शयनादिमुद्रया स्थापयित्वा यद्वा स्वधाम्नि प्रदेशविशेषे उद्वास्य इतः उत्थाप्य शयनलीलायमानत्वेन ध्यात्वा ॥ ५४ ॥

सम्भवेनान्यानपि पूजाङ्गान्याह—एवमिति ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धीये
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
तृतीयोऽध्यायः ॥ ३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तन्मयम् । उपास्यभगवदाकारमित्यहंग्रहोपासनोक्ता शेषां निर्माल्यं सत्कृतं दत्तं स्वधाम्नि उद्वास्य स्थापयित्वा पूजाविधिं समापयेदिति शेषः ॥ ५४ ॥

अचिरादिति पूर्वप्रोक्तात् कर्मयोगादयमहंग्रहोपासनाभक्तिमयस्तान्त्रिकः कर्मयोगः श्रेष्ठः किंतु यवै भगवता प्रोक्ता इत्यनन्तरं "तत्र भागवतान् धर्मान् शिक्षे"दित्यनन्तरं च शुद्ध एव भक्तियोगः प्रोक्तो ज्ञेयः ॥ ५५ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
एकादशे तृतीयोऽयं सङ्गतः सङ्गतः सताम् ॥ ३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अक्षतस्रजः चतरहिताः स्रजः उपहारो नैवेद्यम् एवमिथिवत्साङ्गम् हरिं सम्पूज्य स्तवैः स्तुत्वा नमेत् ॥ ५३ ॥

किङ्कुर्वन् हरेर्मूर्तिं सम्पूजयेत्तत्राह-आत्मानमिति । तन्मयं हरिप्रधानं ध्यायन् शेषां निर्माल्यम् सत्कृतमर्चितं हरिं स्वधाम्नि स्वस्थाने उद्वास्य स्थापयित्वा यथासुखं विहरेदिति शेषः ॥ ५४ ॥

आत्मानं परमात्मानमन्तर्यामिणम् ईश्वरं सर्वेश्वरम् यो यजति सः अचिरात् शीघ्रमेव मुच्यते संसारान्मुक्तो भवति ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
तृतीयाऽध्यायार्थप्रकाशः ॥ ३ ॥

भाषा टीका ।

चंदन पुष्प अक्षत माला धूप दीप नैवेद्य इत्यादिकों से अंग देवताओं के सहित विधि पूर्वक पूजन करके स्तोत्रों से स्तुति करै फिर नारायण को नमस्कार करै ॥ ५३ ॥

अपने को भगवन्मय ध्यान करके हरि की मूर्ति का पूजन करै फिर प्रसाद को मस्तक से लगाकर भगवान् का विसर्जन कर देवै ॥ ५४ ॥

इसी प्रकार से अग्नि सूर्य जल अतिथि वा अपने हृदय में अपने अंतर्यामी आत्मा ईश्वर को जो पूजता है सो थोड़े ही कालमें संसार बंधन से छूट जाता है ॥ ५५ ॥

इति श्रीमद्भागवत एकादश स्कन्ध तृतीयाऽध्याय
श्रीवृन्दावनस्थ पं० भागवताचार्यकृत
भाषा टीका समाप्ता ॥ ३ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे तृतीयोऽध्यायः ॥३ ॥

—:*:—



श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

॥ श्रीगोपीजनवल्लभाय नमः ॥

अथैकत्रिंशताध्यायैर्मुक्तिरेकादशे द्विधा ।
ब्रह्मभावः कृष्णयोगो हरेर्धर्मैस्तथाश्रया ॥ १ ॥
अविद्या पञ्चपर्वा हि तन्नाशे प्रथमा भवेत् ।
प्रकृत्यतिक्रमे चान्या ततोऽध्यायास्तथा द्वये ॥ २ ॥
जनकश्चोद्धवश्चैव सात्त्विको राजसस्तथा ।
पुष्टिमार्गस्य मुख्यत्वाद्विपरीता गतिर्गुणैः ॥ ३ ॥
मुक्तिर्हित्वान्यथारूपं स्वरूपेण व्यवस्थितिः ।
जीवब्रह्मविभागेन द्विधा द्वयमुदीर्यते ॥ ४ ॥
तामसा राजसाश्चैके ततआद्ये द्वयं मतम् ।
अंशाश्च भगवांश्चेति द्वितीयोऽपि द्विधा मतः ॥ ५ ॥
ततः पञ्चभिराद्या स्यात् चतुर्विंशतिभिः परा ।
एकैकेनेश्वरस्योक्ते त्याज्यांशाभावतः परे ॥ ६ ॥
ममाहंमतिनाशार्थं प्रक्रियाद्वितयं मतम् ।
तयोरभिनयः पश्चात् कृतो भगवतेति च ॥ ७ ॥
ततश्च प्रथमेऽध्याये बीजद्वयमुदीर्यते ।
ब्रह्ममुक्तिर्निजेच्छातो वैराग्येणेतरस्य च ॥ ८ ॥
चतुर्थी मुक्तिपक्षश्च तदिच्छात इति स्थितिः ।

अथ व्याख्या तत्र बीजप्रकारेणेश्वरेच्छया मुक्तिप्रकारमाह-सप्तभिः। ईश्वरस्य मुक्तौ भूमेर्भारनिराकरणं बीजमिति तदाह-पञ्चभिः । एकैकेन त्रिभिश्चेति कायवाङ्मनसा कृतम् । तत्र कायिकमाह--

॥ श्रीशुक उवाच ॥

मू० कृत्वा दैत्यवधं कृष्णः सरामो यदुभिर्वृतः ।
भुवोऽवतारयद्भारं जविष्ठं जनयन् कलिम् ॥ १ ॥

नायमनुवादः किन्तु पूर्वतयाभूभाररूपदैत्यवधो निरूप्यते भूमिर्दृप्तनृपव्याजेत्यत्र राजानो दैत्या निरूपिताः ते यद्यपि कंसजरासन्धादयो भवन्ति तथापि तेषां वधो निरोधशेषत्वेन निरूपित इति भूभारहरणं च तेन जातमिति स्वतन्त्रतया तत्पुनरुच्यते अनुवादे केवलस्य प्राप्त्यभावः प्रक्रियातः पृथक् कृत्यफलान्तरसम्बन्धार्थं पुनः कथनम् एक एवार्थो बहुधा निरूप्यते भिन्नप्रयोजनायेति व्यवस्थापितं यागे देवेभ्य इत्युपक्रम्य ते देवा वाच्यपक्रान्तायामित्यत्र तथा निर्णीतं वध्यत्वाय । दैत्येति । प्रकारः पूर्वसिद्ध एव । कृष्ण इति । सङ्कर्षणांशचरित्रस्यैव स्कन्धार्थत्वात् यादृशस्य भूभारनाशकत्वं तदाह । बलभद्रसहितो यादवश्चैव सहित इति तत्रापि केशवत्वज्ञापनाय सराम इति भूभारहरणार्थमेवांशावतरणस्य जातत्वात्तदुपयोगं वक्तुं यदुभिरिति तैर्वेष्टितः प्रार्थितो वा भूभारहरणार्थं देवत्वात् आसन्नस्य तु पीडायां स्वदेह एव स्वस्य भारः कः पुनः पीडकभार इति कलहजनने क्रोधावेशेन भारानुसन्धाननिराकरणार्थं सर्वत्र भूमौ कलिं जनयन् वेगवत्तरस्यैव लघात्वात् अतोऽक्लिष्टकर्मत्वाय कलिजननं वधो भूभारहरणायेति सिद्धं नैतादृशोऽर्थः क्वचिद्दशमस्कन्धे निरूपितो येनानुवादशङ्कापि स्यात् यो वै मयातिभरमासुरवंशराज्ञामित्यत्रैतस्यैवानुवादः तेन दशमस्कन्धे अनुक्तमेव भूभाररूपदैत्यानां वधरूपं चरित्रमिहोच्यत इति सिद्धम् ॥ १ ॥

एवं कायिकमुक्त्वा वाचनिकमाह—

मू० ये कोपिताः सुबहुपाण्डुसुताः सपत्नै—
र्दुर्द्यूतहेलनकचग्रहणादिभिस्तान् ।
कृत्वा निमित्तमितरेतरतः समेतान्—
हत्वा नृपान्निरहरत् क्षितिभारमीशः ॥ २ ॥

अक्लिष्टकर्मत्वाय स्वतो भगवत्समक्षमागता आधिदैविकरूपास्ते भगवता हताः ये तु दुर्योनादयो भगवति विरोधमकृत्वैव परस्परं विरुद्धा भगवति तु समास्तत्र ये भगद्वाक्यं कुर्वन्ति तैरन्ये मारिता इति निरूप्यते । अस्य विस्तारो भारते प्रसिद्धः अनेकैरपराधैर्बहुगकोपिताः लाक्षागृहादेस्तुल्यत्वदशायासजातत्वात् दुर्द्यूतादिकमुक्तं द्यूतस्य कपटरूपत्वे ज्ञाते कोपो भवति ततोऽपि हेलनेन षण्ढतिलाः पाण्डवा जाता इति वाचनिकोऽपराधः द्रौपदीकेशाकर्षणं कायिकोऽपराधः मानसो वा प्रथमः कायिक इति केचित् केशाकर्षणस्य भावान्तरज्ञापकत्वात् साधनफलयोर्बहुकालत्वज्ञापनाय निर्देशप्रतिनिर्देशौ कालान्तरे क्रियावश्यं भावाय सुबह्विति । शोभनत्वं हृदयस्थितिः पाण्डोः सुता इति वीरपुत्रत्वमविस्मरणाय स्वतः प्रतिक्रियासामर्थ्याय सपत्नैरिति तुल्यैरित्यर्थः । दुर्द्यूतादावादिशब्दः सजातीयबहुत्वाय भूमौ फलरूत्पादितत्वान्निमित्तार्थमितरेतरतः अन्योऽन्यसापेक्षयोः प्रवेशः समेतत्वं ये कोपिता यैश्च कोपितास्त इतरेतरशब्दवाच्याः उभयेषां प्रार्थनया निमित्तत्वज्ञापनाय तस्मिन् निमित्तं तु कोपिता एव अन्येषामानुषङ्गिकत्वात् पाण्डवा एव कौरवाणामुपरि युद्धार्थमागता इति नृपव्याजान् अनृपान् वा रूढिरेव वा दैत्यवधे देवानां सुखित्वात् भारस्याभस्तात् स्थापनं नृपाणां वधे तु ततोऽपि निरहरत् तेषां तत्सद्भावनिराकरणेनापि कार्यसिद्धौ तेषामेव निराकरणमीश्वरेच्छया नियन्तुमशक्यत्वादुपपन्नमित्याह ! ईश इति । गीतोपदेशेनैतदिति सिद्धम् ॥ २ ॥

भारानुसन्धानोपायान्वेषणकार्यकरणानि वदन् मानसं त्रिभिराह—तत्र भारानुसन्धानमाह—

मू० भूभारराजपृतना यदुभिर्निरस्य—
गुप्तैः स्वबाहुभिरचिन्तयदप्रमेयः ।
मन्येऽवनेर्ननु गतोऽप्यगतं हि भारं—
यद्यादवं कुलमहो ह्यविषह्यमास्ते ॥ ३ ॥

मुख्यानां स्वतः पाण्डवैश्चैव हतत्वादंशानामपि सकार्यत्वात् यदुभिः पृतनानिराकरणमुक्तं जरासन्धबाणशाल्वादीनां पृतनानामेव भारत्वं प्रकृतोपयोगात् यदूनां करणत्वाय गुप्तबाहुत्वमाह । गुप्तैः स्वबाहुभिरिति । रूपकं भारावतरणार्थमागतो गतो वा भार इति चिन्तां कृतवान् ननु सर्वजनीनो भारः कथमेवं संदिग्ध इत्यत आह । अप्रमेय इति । सांशो भगवानेव भार इति न सर्वजनीनः अप्रमेयत्वाद्भगवतः रक्षार्थमागतैराजभटैः सर्वस्वभक्षणमिव जातमित्याह । मन्य इति । पूर्वंस्थितस्य भारस्य सहेतुकस्य गतत्वेऽपि निराकरणकर्तॄणामेव हेतुत्वात्सपुनरुपस्थितः विजातीयत्वाच्च समानविभक्तिकत्वं साधकानां बाधकत्वादाश्चर्यमहो इति पूर्वस्मादपि विशेषमाह । अविषह्यमिति । दैवैर्भूम्या च निराकरणं वक्तुमशक्यमत आस्त एव भारः सिद्धः ॥ ३ ॥

निराकरणोपायमाह—

मू० नैवान्यतः परिभवोऽस्य भवेत्कथञ्चिन्
मत्संश्रयस्य विभवोन्नहनस्य नित्यम् ।

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

मू० अन्तः कलिं यदुकुलस्य विधाय वेणु-
स्तम्बस्य वह्निमिव शान्ति मुपैमि धाम ॥ ४ ॥

स्वतः परतो वा निराकरणं परस्य तत्र दुर्बलत्वादिष्टसाधनताज्ञानस्य च प्रवर्तकत्वादसम्भावितं चेतनकर्तृकत्वमित्याह-अस्यकुलस्य-निषेधनित्यत्वमेवकारार्थः । अन्यत इति यदुकुलव्यतिरिक्तादिति सामान्यनिषेधः वृष्णयादीन्यपीन्द्रप्रेरितानि न भवन्ति दूरापास्तो नाशः परिभवोऽपि न भवेत् । कथञ्चिदित्यकीर्त्यादिजनकत्वेन सम्भावितस्याकीर्त्या स्वतोऽपि मरणं सम्भवतीति तन्निराकरणं परिभवोऽपमाननं तद्धि स्वगतदोषेण गुणाभावेन वा भवति । तत्राहमेव सम्बन्धाभवो यस्येति न दोषसम्भावना शय्यासनाटनादावपीति पूर्वमुक्तत्वात् न तेषां मदादिः सम्भवति न वा गुणाभावः विभवोन्नहनत्वात् विभवाः सर्वसम्पदस्तैः सर्वतः पूरणमूर्द्ध्वं बन्धनमिव यस्येति नित्यमिति मत्स्वरूपत्वात् कालकृतोऽपि पराभवो नास्तीत्यर्थः नच प्राकृतसम्बद्धं वैकुण्ठं नेष्यत उपायमाह । अन्तःकलिमिति । यदुकुलस्यान्तर्मध्ये कलहमुत्पाद्य वेणुस्तम्बस्य मध्ये वह्निमिव अमङ्गलत्वान्नोक्तं तेन दग्धेति दृष्टान्ताच्च लभ्यते अलौकिकस्य भगवत इत्यादि तस्य कलेः सर्वनाशकत्वमाशङ्क्य तन्निराकरणायाह-शान्तिमुपैमीति । क्रमपाठादेव तत इति गम्यते तदनन्तरमन्यत्र दाह्यं पुनरत्रैव स्थितः किञ्चित्कुर्यादित्यत आह—उपैमिधामेति । देहलीप्रदीपवत् स्वस्थानं गमिष्यामीत्यन्तः कलेरुत्पादनमुपाय इति सिद्धम् ॥ ४ ॥

तस्यैतत्पत्तौ हेतुं वदन् कार्यमाह । एवमिति—

मू० एवं व्यवसितो बुद्ध्या सत्यसङ्कल्प ईश्वरः ।
शापव्याजेन विप्राणां सञ्जह्रे स्वकुलंविभुः ॥ ५ ॥

अशक्योपायान्तरादिपक्षनिराकरणाय आह-एवमेव निश्चितः बुद्ध्येति लोकशास्त्रनिराकरणम् आनन्दमात्रकरपादमुखोदरादेर्बुद्धेरपि तादृशी इच्छाशक्तिर्वा राजन्निति ब्रह्मशापो न निवार्यस्तवयैवानुभूयत इति सत्यसङ्कल्पतो विष्णुर्नान्यथा तु करिष्यति कर्तुमकर्तुमन्यथाकर्तुम् समर्थ ईश्वरः अतः ऋषीणां गर्वाभावायोद्धवः संरक्षितः वज्रनाभादयश्च शापो वक्ष्यमाणप्रकारः व्याजेनेति ब्रह्मप्रकरणत्वाय उपसंहार एव न प्रलयः स्वेति दोषाभावाय सर्वप्रकारसमर्थनायान्ते विभुरिति ॥ ५ ॥

एवं मनसा भूभारहरणमुक्तम् रूपान्तरलीकरणस्यैतत्प्रयोजनत्वान्निष्पन्ने कार्ये मुक्तिमाह द्वयेन । जीवब्रह्मणोर्हि सा जीवानामपि स्वमिश्रतया निरूपणम् अतो वर्तमानभविष्यद्भक्तमुक्तौ प्रकारभेदेन कथयन् स्वपदारोहणमाह—

मू० स्वमूर्त्यालोकलावण्यनिर्मुक्त्यालोचनं नृणाम् ।
गीर्भिस्ताः स्मरतां चित्तं पदैस्तानीक्षतां क्रियाः ॥ ६ ॥
आच्छिद्य कीर्तिं सुश्लोकां वितत्य ह्यञ्जसा नु कौ ।
तमोऽनया तरिष्यन्तीत्यगात्स्वं पदमीश्वरः ॥ ७ ॥

ज्ञानक्रियाशक्ती आच्छिद्य यशः प्रसार्य वैकुण्ठं गत इत्युक्तं भवति सहजप्रवृत्तिज्ञानस्य बाह्याभ्यन्तरभेदेन रूपप्रपञ्चे नामप्रपञ्चे च परिनिष्ठिता नामप्रपञ्चे विचारस्य सहकारित्वान्न श्रवणमात्रेण निर्द्धारः । अत आलोचनात्मकस्य चित्तस्यैव प्राधान्यम् "अधिकारश्च मार्गश्च नेश्वरेण विचार्यते । अन्तःस्थितं यदा ब्रह्म तदा योग उदीयते । इन्द्रियान्तः प्रवेशार्थं तथा साङ्ख्यं तथा परम् । बहिः स्थिते तु भगवति प्राच्छित्तिरेव युक्ता यथा स्थितौ तु न मुक्तिः भगवता स्मृतानां न ज्ञानापेक्षा अतः अज्ञानतरणमेवावशिष्यते लोके हि येन यदाच्छिद्यते तत्तदर्थमेव भवतीति वनकाष्ठच्छेदनादौ सिद्धं तदनुपयोगदशायां तु पतिव्रतावत् तूष्णींभावः तथा च भगवन्मूर्त्याच्छिन्नानि भगवन्मूर्त्यर्थमेव भवन्ति लोकात्तिरोधानेऽपि तच्चक्षुः पश्यति तादर्थ्यात् कदाचित्तूष्णींभावो वा ईश्वरात् परं न तैरन्यद्भवतीति मुक्तिः सिद्धा विषयच्छेदकस्य तदधीनच्छेदने कः प्रयास इति विशेषणम् अलौकिकोऽयमुपाय इति न काचिच्छङ्का गोपिकास्तु दृष्टान्त इति विद्यमानमुक्तिः आलोकः सूर्यमण्डलम् अलोकोऽन्धकारः लोकास्तु भुवनजनात्मकाः तेजः श्यामता संस्थानविशेषश्चावगम्यते मूर्तिप्राकट्ये हि त्रिभ्योऽपि तद्धर्माः पुनरावृत्तिरहिता भवन्ति एकवचनं जातिसूचकं रूपप्रपञ्चेनालोचनाद्यपेक्षा नाम्नि तु विशेषमाह-ताः स्मरतामिति । यद्येकेनैव छेदनं कुर्यात् नामप्रपञ्चच्छेदनं न भवेत् सजातिप्रतीतिजननात् क्रियाद्योभयत्र लोके वेदे च सहभावेनैव ज्ञानेन छिन्ना भवेत् तथा च भगवति केवला न प्रवर्तेत पदैः स्थानैर्वृन्दावनादिभिः क्रिया च प्राणसाध्या पिपासादिहेतुः आच्छिद्येति पूर्वेण सम्बन्धः उत्तरसम्बन्धस्तु त्रयाणां जीवजडब्रह्मणामेकत्वाय* कालभेदात्साधनभेदाश्चावसीयत सुश्लोकां ज्ञातप्रवृत्त्य सर्वभावाय सुष्टुश्लोका व्यासादिकृता यस्यामिति अनायासेन हि उद्योतनया तरणं तथोपायः कृत इत्यर्थः । नु इति निश्चयेन कौ पृथिव्याम् इतीति कार्यसमाप्तिः भविष्यदधिकार एव सर्व इति केचित् ततश्च नान्य उपायोऽस्तीति सिद्ध स्वपदगमनादिति तत्रैव स्वरूपस्थितिः सर्वनिर्वाहाश्वेश्वर इति तथा च प्रथमपक्षे बीजत्वं सिद्धं द्वितीये वैराग्यमेव बीजमिति तत्कारणं पूर्वत्र व्याजरूपम् ॥ ६ ॥ ७ ॥

शापं पृच्छति द्वाभ्याम् स्वतो न कथनं भक्तस्यानुचितमिति असम्भवेन पूर्वः पक्षः प्रश्नश्चेति द्वयं तत्र पूर्वपक्षमाह—

॥ राजोवाच ॥

ब्रह्मण्यानां वदान्यानां नित्यं वृद्धोपसेविनाम् ।
विप्रशापः कथमभूद्वृष्णीनां कृष्णचेतसाम् ॥ ८ ॥

गुणत्रयं नैर्गुण्यं चेति चतुष्टयं शापविरोधि तत्र ब्रह्मण्यता सात्त्विके उत्कृष्टो धर्मः शापविरोधी च राजसे वदान्यत्वं शापविरोधी च वृद्धोपसेवनं च तामसे उत्कृष्टः आयासरूपत्वात्तामसत्वं शापविरोधी च नित्यमिति सर्वत्र भक्तिधनसेवानां विद्यमानत्वात्कथं शापः कृष्णचेतसामात निर्गुणावस्था शापाप्रभवश्च असम्भावितत्वात्पूर्वपक्षः सिद्धः ॥८॥

प्रश्नमाह—

यन्निमित्तः स वै शापो यादृशो द्विजसत्तम ! ।
कथमेकात्मनां भेद एतत्सर्वं वदस्व मे ॥ ९ ॥

निमित्तस्याप्रसिद्धत्वात् निर्निमित्तपक्षस्य प्रकृते अभावात् ब्राह्मणेषु यादवेषु वा निमित्तोत्पत्तिः दृष्टादृष्टभेदेन यागविशेषे तत्तद्दर्शनानुपयोगात् स्वसदस्यानां दशानां गणना क्रियतेः०:

---

*अत्रैका पङ्क्तिं नष्टा । :०: अत्रैकपत्र पाठो नष्टः ।

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

मू० विश्वामित्रोऽसितः कण्वो दुर्वासा भृगुरङ्गिराः ।
कश्यपो वामदेवोऽत्रिर्वसिष्ठो नारदादयः ॥ १२ ॥

नारदादयः सदस्याः कालाविष्टा यादवा भगवदिच्छापूरणाय ब्राह्मणाधर्षणं कृतवन्त इत्याह-उक्तप्रकारवचनैः श्लोकैः तत्राद्यमाह-

मू० क्रीडन्तस्तानुपव्रज्य कुमारा यदुनन्दनाः ।
उपसंगृह्य पप्रच्छुरविनीता विनीतवत् ॥ १३ ॥

क्रीडन्त इति राजभावेशः तानुपव्रजंति धाष्टर्यं कुमारा इति दीर्घदर्शनाभावः यदुनन्दना इति पित्रादिमंमताः तानुपसंगृह्य नमस्कृत्येति सहजधार्मिकत्वम् अविनीता इति नामसाविर्भावः-आकारगोपनं भगवदाविष्टब्रह्मतेजसा धनार्थिनो याजकाः कामुका भविष्यन्तीति ज्ञेयं ॥ १३ ॥ वञ्चनप्रकार कृतवन्त इत्याह

मू० ते वेषयित्वा स्त्रीवेषैः साम्बं जाम्बवतीसुतम् ।
एषा पृच्छति वो विप्रा ! अन्तर्वत्न्यसितेक्षणा ॥ १४ ॥

पुराणान्तरे पार्वतीसहितो महादेवः भवतीयं इति मातृनाम्ना तु मुग्धत्वं गर्भिणी सुन्दरी चेयं वो युष्मान् अर्थात् किंजननीयं मया इति पृच्छति ॥ १४ ॥

वञ्चनामाह—

मू० प्रष्टुं विलज्जती युष्मान् ब्रूतामोघदर्शनाः ! ।
प्रसोष्यन्ती पुत्रकामा किं स्वित्सञ्जनयिष्यति ॥ १५ ॥

पादद्वयमुत्तरार्द्धं चेतिवाक्यद्वयम् अर्थात्साक्षात्प्रष्टुं ब्रूतेति स्वप्रार्थनाउभयोरौत्सुक्यपूरणं पादद्वयेन भावः स्पष्टः ॥ १५ ॥

निमित्ताभासमालक्ष्य कृष्णाविष्टाः शापं दत्तवन्त इत्याह—

मू० एवं प्रलब्धा मुनयस्तानूचुः कुपिता नृप ! ।
जनयिष्यति वो मन्दा ! मुसलं कुलनाशनम् ॥ १६ ॥

एवं वक्रोक्त्या परीक्षारूपया वञ्चनाः मननं वृत्तान्तज्ञाने हेतुः अन्यथा अल्पापराधेऽधिकदण्डोऽनुचितः तेषामल्पकर्तृत्वेऽपि भगवदीयविषयत्वात् दण्डो वा उक्तःस्यात् मुनीनां दण्डत्वं वा भवेत् मन्युवशानामेवान्ते विभूतित्वात् कुपिता इत्युक्तं वः कुलस्य नाशकं नित्यसापेक्षत्वादसमर्थसमासः कोपावेशादज्ञानप्रवेशो मन्दा इति सम्बोधनं बुद्धिरहिताः अमन्दा इति वा त्वरिता इति हास्ये नामसाद्राजसोऽयमिति विशेषः अदरीयांस इति वा व्रीहय इवेति अत एव वो मुसलम् भवत्कुलजनकम् "अत्ता चराचरग्रहणात्" इति न्यायेन भगवद्भोजनसाधनं फलपाकान्तत्वं च यादवानां कुलनाशनमिति तस्य स्वभावकार्यं व्रीहिमात्रस्य यथा अवघात हेतुः एवं सति न समासदोषः महदेकफलवद्भोगो भवेत् मन्दत्वादोदनभावेनेति विशेष- भावाज्ञातार इति च सम्बोधनम् अत एवाग्रे अकृतार्थत्वभावना अत एवोद्धवपश्चात्तापे निन्दा युज्यते अंशतस्तस्याप्यज्ञानं मौसलविषये दाहादिसम्भावनया अन्यमयत्वं विद्यमानमपि नोक्तं दर्शनादेव ज्ञातुं शक्यत्वात्... यदुपुरुषस्यायुधविशेषरूपमुशलोत्पत्तिज्ञापकं वचनं शाप इति सिद्धं सप्तभिरग्रिम.........यार्थदर्शनं गृहतयनम्

राजनिवेदनं लोकभयं तन्निराकरणाय मुशलनाशः अंशांशिविनियोगाय तस्य रूपद्वयस्थितिरिति तदर्थः ॥ १६ ॥

तत्र प्रथमं शापार्थदर्शनमाह—

मू० तच्छ्रुत्वा तेऽतिसन्त्रस्ता विमुच्य सहसोदरम् ।
साम्बस्य ददृशुस्तत्र मुशलं खल्वयस्मयम् ॥ १७ ॥

कार्ये जाते सङ्कर्षणावेशस्य गतत्वात्सर्वनाशानुसन्धानेन महाभयं ब्राह्मणानां ज्ञापकत्वाच्च पश्चात्तापः तेषां वाक्ये प्रामाण्यस्यावधारितत्वात् संवादात्पूर्वमेव भयोत्पत्तिः अचेतनत्वान्निश्चयमात्रत्वेन विमुच्य इष्टवन्तः उदरोच्छूनत्वाय मशिवस्त्रबन्धने तदाकाशे आविर्भूतः नाहशस्यादरभावमात्र नाभिद्वारा वा प्रकटम् अन्यथा जनयिष्यतीति वचनं बाधितं स्यात् आकृतिवचनाः शब्दा इति अयस्मयत्वस्यापि मुशलत्वं दाहादिप्रतीकारानिराकरणाय तथात्वम् उत्तरोत्तरं प्रतिश्लोकार्थकरणं भगवदावेशात् भक्षणं मृण्मयरूपत्वं सीसेन क्लीबादिस्तत्र निर्द्धारात् ॥ १७ ॥

ईश्वरेच्छया प्रयुक्तमपि गृहानीतवन्त इत्याह—

मू० किं कृतं मन्दभाग्यैर्नः किं वदिष्यन्ति नो जनाः ।
इति विह्वलिता गेहानादाय मुशलं ययुः ॥ १८ ॥

इष्टप्रकाराभावात् भाग्यैरेव कृतम् अन्येषां वा पूर्वं साक्षित्वेन स्थितानां वचनं न अस्मत्सम्बन्धिभिर्मन्दभाग्यैः भगवता सह बहिःस्थितिरुक्तमा तत्कर्त्तव्यक्तेऽन्तःप्रवेशः अतो मन्दत्वं लोकापवादोऽप्यधिकः इति कर्त्तव्यतामौढ्यं विह्वलत्वं तत्तद्गृहेषु प्रदर्शनार्थमत्याश्चर्यवत् स्थापयन्तीति गेहानित्युक्तम् ॥ १८ ॥

त्यजनकमिति न्यायेन सैव त्यक्तव्या मुशलस्य वा परित्याग उचितः भगवते निवेदनं वा अयमप्यकृत्वा राज्ञे निवेदनं कृतवन्त इत्याह—

मू० तं चोपनीय सदसि परिम्लानमुखश्रियः ।
राज्ञ आवेदयाञ्चक्रुः सर्वयादवसन्निधौ ॥ १९ ॥

साम्बनिमित्तत्वात् अग्रात् कृष्णे न निवेदने तं मुशलं चकारात्साम्बं च न्यायविचारकं राजद्वारं सभाख्यानं सदः राजदण्डभयादपि परितो म्लाना मुखश्रीर्येषाम् उग्रसेनोऽपि राजसभायां बहुभिः सह तिष्ठति एवं राजनिवेदने सर्वेषां ज्ञातं वृत्तं भवति तथा च सर्वेषां वैराग्यमुचितं परमकृपालोर्भगवत एकाकृतिरनेककार्यकर्त्रीति अंशानामवतीर्णानां सायुज्यं ब्रह्मभावो वा देय इति एवं करणम् ॥ १९ ॥

नच शापनाम्ना प्रकटस्य मुशलस्यान्यथाभावः सम्भवति भगवान् गुरुर्गतिश्च वर्त्तते तथापि न ज्ञानोपासनादिद्वारा मोक्षप्रयत्नः किन्तु सर्वे लोकाः सन्त्रस्ता एव जाता इत्याह—

मू० श्रुत्वा मोघं विप्रशापं दृष्ट्वा च मुशलं नृप ! ।
विस्मिता भयसन्त्रस्ता बभूवुर्द्वारकौकसः ॥ २० ॥

शापसंवादी मुशलःसंवादिवाक्यमपि श्रुत्वा न प्रश्नोत्पत्तिः किन्त्वाश्चर्यरसे विनियोग कृतवन्तः भयं च सन्दिग्धे द्वारकौकस इति देशदोषाभाव तथा च केषामपि नालौकिके प्रवृत्तिरिति सिद्धम् ॥ २० ॥

लौकिकोपायस्तु राज्ञा कृत इत्याह—

मू० तं चूर्णयित्वा मुशलं यदुराजः स आहुकः ।
समुद्रसलिले प्रास्यल्लोहं चास्यावशेषितम् ॥ २१ ॥

तदिति पाठे तदेति समुदायेनोत्पन्नः प्रत्येकपर्यवसायी यथा भवति तथांशभेदाः सम्पादिताः वृद्धानुमत्या कृतमिति आहुकेन सहितः पित्रा सहितो राजा समुद्रसलिल इति क्षारोदके नाशार्थम् अवशेषितमशक्यचूर्णीकरणांशम् ॥ २१ ॥

लौकिकोपायेन तन्निराकरणं कृतं तद्विपरीतं जातमित्याह—

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

मू० कश्चिन्मत्स्योऽग्रसील्लोहं चूर्णानि तरलैस्ततः ।
ऊह्यमानानि वेलायां लग्नान्यासन् किलैरकाः ॥ २२ ॥

नहि ब्रह्मवाक्यरूपमुशलचूर्णानि समुद्रे मग्नानि भवन्ति शेषित-लोहग्रसनं त्वागमकार्याय नतु समुद्रे तस्यापि मज्जनं नचायो-भक्ष्यः ज्ञानाभावाय तथोपायः आतितिः सत्त्वतृणान्येरकाः कटे उपयुज्यन्ते वेलायां लग्नत्वाद्वालुकायाममुना इव लोहचूर्णा-नामेरकात्वेन लौकिक्युपपत्तिः प्रष्टव्येत्याह, किलेति प्रसिद्धिरेव ऋषीणां तादृशी साक्षादुपयोगपर्यन्तं हि विनियोगो वक्तव्यः स चूर्णानामुक्तः ॥ २२ ॥

शल्यस्याह—

मू० मत्स्यो गृहीतो मत्स्यघ्नैर्जालेनान्यैः सहार्णवे ।
तस्योदरगतं लोहं स शल्यं लुब्धकोऽकरोत् ॥ २३ ॥

स इति कालकन्यारूपः एतदर्थमेव कालकन्याजरारूपेणावतीर्णा सङ्कर्षणांशस्य कालव्यासनरूपत्वात् स्वरूपास्थित्यर्थं तदासनं तत्-कन्यया दत्तम् आवेशे गते तु पश्चात्तापो व्याधस्य शिष्टं स्पष्टम् २३

पूर्वोक्तं तु भगवच्चरित्रत्वेनोपसंहरन् दृढीकरोति—

मू० भगवान् ज्ञातसर्वार्थ ईश्वरोऽपि तदन्यथा ।
कर्तुं नैच्छद्विप्रशापं कालरूप्यन्वमोदत ॥ २४ ॥

भगवानिति पूर्णत्वेन सर्वकर्तृत्वमुक्तं तेनैतत्सर्वं भगवच्चरित्रमित्यु-क्तम्भवति तु लौकिके परिहारे नाज्ञानाशक्ती निमित्तं किन्तु सङ्कर्षणा-त्वमेवेति वदन्ति तत्र सास्वत्यापराधित्वात् मर्यादाभेदेन न केऽपि स्वत एव ते चेन्मोक्षार्थमुद्यच्छन्तेरन् तदान्यथा कर्तुमपि शक्तः ननु, स्वत एव किमित्यन्यथा न कृतवान् तत्राह तदन्यथाकर्तुं नैच्छत स्वांशानामंशत्वे सायुज्ये वा विद्यमानावस्थानिवृत्तेस्तुल्यत्वात् प्रकारे परं विशेषः तत्साम्प्रतं वासुदेवकार्यकरणाभावात् अन्यथा कर्तुं नैच्छत् तत्र हेतुः कालरूपी तस्य विप्रशापत्वं विधेयं रूपं पूर्वेण सम्बद्धमीश्वरोऽपीति अन्यथा ईश्वरपदं व्यर्थं स्यात् ईश्व-रानुमोदनेन सेवककृतं दृढं भवतीति तस्माद्वैराग्यार्थमुपायो रचित इति सिद्धम् ॥ २४ ॥

इति श्रीभागवतसुबोधिन्यामेकादशस्कन्धविवरणे
प्रथमाध्यायविवरणम् ॥ १ ॥

वैराग्य हेतौ संसिद्धे हृदये रागसम्भवात् ।
आन्तरस्य बलिष्ठत्वान्न वैराग्यं फलिष्यति ॥ १ ॥
अतो गुरुस्तथा शास्त्रं वक्तव्यं मुक्तिहेतवे ।
गुरुर्हरिभक्तिमार्गसेवको विहितो महान् ॥ २ ॥
भगवद्वचनं शास्त्रं सेवकानां तु सेवके ।
प्रपन्न एवाधिकारी शास्त्रमार्गेण यो भवेत् ॥ ३ ॥
केवलेन निरोधेन निरुद्धा ये न ते तथा ।
ज्ञानेन सहितौ तस्माद्वसुदेवोद्धवौ मतौ ॥ ४ ॥
वसुदेवस्य संसिद्धं बीजं च ज्ञानकर्मणी ।
शास्त्रेणाचार्यराहित्यात् न ज्ञानं फलति स्फुटम् ॥ ५ ॥
उद्धवस्य प्रपत्तिस्तु महती लौकिकत्वतः ।
गोपिकाज्ञानसन्देशस्तस्या एव तु पोषकः ॥ ६ ॥
निरोधः सुदृढः कृष्णे ममतास्महितो महान् ।
मतोऽत्र वसुदेवस्य ममतानाशनं यथा ॥ ७ ॥
महत्ता तूद्धवस्यापि यथा नश्येत्तथा कथा ।

तत्र प्रथमं वसुदेवस्य भगवद्धर्मैर्भगवत्सायुज्यं वक्तुं गुरु-प्रपत्त्यर्थं कृष्णममताया दृढत्वादन्यत्र स्थित्यभावाच्च नारदं गुरुत्वेन भगवान् चिन्तितवान् तस्य स्थितिमाह—

श्रीशुक उवाच ।

मू० गोविन्दभुजगुप्तायां द्वारवत्यां कुरूद्वह ! ।
अवात्सीन्नारदोऽभीक्ष्णं कृष्णोपासनलालसः ॥ १ ॥

कृष्णसेवायां हि बहवो विघ्नाः दैत्याः पापानि च तत्र नारदस्य पापाभावेऽपि दैत्याः क्षोभकाः सन्ति बाह्याभ्यन्त-रभेदेन प्रकटश्च भगवान् सेव्यः तत्राध्यात्मिकादिदैत्यानां हृदये विद्यमानत्वात् प्रकटेऽपि भगवति सेवा न सम्भवति अत्र तु भग-वद्भुजैर्यदुभिर्गुप्तायां दैत्यप्रवेशाभावात् द्वारवत्यामिति च भगव-न्निर्गमनस्थानत्वेन महजदैत्यनिवासाभावाच्च नराणां जीवानां समूहं द्याति खण्डयतीति नारदः ब्रह्मभावप्रापक इत्यर्थः । उक्तार्थ-वचनाविश्वासाय सम्बोधनमित्यसकृदवोचाम कदाचिद्गमनं वैकुण्ठे कदाचित्प्रकटो हृदये अत आह, अभीक्ष्णमिति । सर्वदा कृष्णो-पासनायां लालसः दक्षशापोऽपि न नारदं स्पृशति द्वारकायां शापा-देरप्रवेशात् अनेनैतज्ज्ञापितं यदि नारदवद्यादवा भगवत्सेवां कुर्यु-स्तदा शापो नाभिभवेदिति अतो भगवत्सेवा देवादीनामपि दुर्लभा सर्वानर्थनिवारिका मुक्तानामप्यभिलषितेति प्रकरणारम्भे मोक्षतुल्यत्वाय निरूपितं स्पष्टम् । ननु, नारदस्य नारदत्वं प्राप्तस्य क्रममुक्तेर्नियतत्वात्स्वतः फलाद्यभावाच्च सेवावतः कथं लालसेति चेत् इन्द्रियसाफल्यमिति ब्रूमः अधिकारे कार्यकरणं न मुख्यं फलं इन्द्रियाणां देवतात्वाभावात् ॥ १ ॥

एतदेव शुकोऽसम्भवद्युक्तिमत्त्वेन द्रढयति—

मू० कोऽनु राजन्निन्द्रियवान् मुकुन्दचरणाम्बुजम् ।
न भजेत्सर्वतो मृत्युरुपास्यममरोत्तमैः ॥ २ ॥

इन्द्रियाणि वर्तन्ते अस्मिन्निति स्ववशेन्द्रियः नत्विन्द्रियेषु वर्तते च नह्यश्वरक्षकोऽश्ववान् भवति अतः परवशेन्द्रियो न भजत इत्यदोषः यस्य पुनरिन्द्रियाणि सन्ति सेवासाधकानि स कथं न भजते प्रयोजनाभावादिति चेत् न मोक्षदाता च सः सुसे-व्यश्च मोक्षस्यावश्येष्यमाणत्वाय सर्वतो मृत्युरिति अमराणामपि मुक्तिरपेक्षिता किम्पुनः सर्वतो मृत्यूनामित्यर्थः अन्तिमजन्मन्यु-त्तमत्वम् ॥ २ ॥

सङ्गतिमाह—

मू० तमेकदा च देवर्षिं वसुदेवो गृहागतम् ।
अर्चितं सुखमासीनमभिवाद्येदमब्रवीत् ॥ ३ ॥

प्रायेण वसुदेवो यदुकुलशापं न श्रुतवान् कृष्णस्थित्या लोकै-रनुक्तत्वात् वैराग्योपयोगाभावाच्च विशेषेण निसृष्टा इति वच-नात्पूर्वभावी वा कृष्णोपासनलालस इति नारदस्य पुनरागमने हेतुः पूर्वपक्षे निःशङ्कतया स्थितिरुत्तरपक्षे कृष्णगृहे स्थितो वसुदेवगृहे समागत इति शापानन्तरभावे तु भगवद्वाक्येन-तस्य निर्धार इति सर्वं सुस्थमिवासत्तिदैवं कथा मलाविस्तरेण तमिति पञ्चरात्रकर्तृत्वेन प्रसिद्धं सर्वदा स्वस्वकथापि एकदा सात्त्विके काले वसुदेव इति शुद्धसत्त्वात्मकः ऋषयो मन्त्रद्रष्टारः-

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

अलौकिकमन्त्रद्रष्टारो देवर्षयः ततोऽपि पुष्टिभागमन्त्रद्रष्टृत्वाद्विभूतित्वं वसुदेवगृहे प्रकृते स्वस्योपयोगः गृहागतमिति स्वाधीनता पूजितत्वमुत्तमप्रश्नोपयोगः भगवत्प्रेरणया समागतस्योपासनार्थमपि वैयर्थ्यं नास्तीति सुखमासीनमित्युक्तं पुनरभिवादनं गुरुत्वबोधकं बहुकालमारभ्य प्रष्टव्यमिति हृदि स्थितमिदमानिर्दिश्यते ॥ ३ ॥

प्रश्नमाह-षड्भिः—

॥ वसुदेव उवाच ॥

भगवच्छब्दवाच्याः षडर्था इति षट् श्लोकाः तत्र प्रोत्साहनं त्रिभिः प्रश्नश्च त्रिभिः तत्र प्रथमं नारदस्यैवासाधारणैर्गुणैस्तं प्रोत्साहयति—

मू० भगवन् ! भवतो यात्रा स्वस्तये सर्वदेहिनाम् ।
कृपणानां यथा पित्रोरुत्तमश्लोकवर्त्मनाम् ॥ ४ ॥

"ब्रह्म वेद ब्रह्मैव भवति यो यच्छ्रद्धः स एव सः" गुरुत्वाच्च भगवन्निति सम्बोधनं "जगन्मित्रं हि नारदः" यात्रा आगमनं राजादिसर्वेषामगणनाय सर्वदेहिनामित्युक्तं स्वतोऽपि निरपेक्षत्वात् अहिंसाप्रचुरधर्मबोधनात्संसारोद्धारकत्वाच्च देहाभिमानिनामिति मुक्तवैलक्षण्यार्थं स्वत एव निचार्य तेषां स्वतो हितकरणे दृष्टान्तः अकृपणानां सर्वतः सम्पन्नानामपि पित्रोरागमनम् स्वस्तये किं पुनः कृपणानामुभयोर्वियोगे ह्यतिकृपणाः स्वतः परमोत्कर्षार्थे विशेषणम् उत्तमश्लोकस्य मार्गभूतानां तत्र प्रविष्टानां भगवत्प्राप्तेर्नित्यत्वात् तथा च नारदस्य त्रयो गुणाः सर्वमैत्री सर्वहितज्ञापकत्वं गोविन्दप्रापणं चेति एकैकेनैव वयं कृतार्थाः किंपुनस्त्रिभिः ; उपसंहारे बहुवचनं पूजार्थं व्यवहारे वा कृतदोषपरिहाराय च आगमनं तु भगवदिच्छयेति न कोऽपि विरोधः ॥ ४ ॥

कथं नारदागमनेनैवमित्याशङ्क्य देवर्षिविभूतित्वं प्रकटयति—

मू० भूतानां देवचरितं दुःखाय च सुखाय च ।
सुखायैव हि साधूनां त्वादृशामच्युतात्मनाम् ॥ ५ ॥

देवापेक्षया उत्तमत्वं सर्वेषां सुखैककारित्वेन विभूतित्वमग्रिमश्लोके देवा हि द्विविधाः प्रवाहमर्यादाभेदेन तत्र प्रवाहदेवा वृष्ट्यादिकर्त्तारो भवन्ति ; वृष्ट्यादिकं तु दुःखकरमपि प्रवाहदेवा अपि द्विविधाः बाह्याभ्यन्तरभेदेन सुखदुःखे च लौकिकालौकिके चकाराभ्यामलौकिके परिगृहीते वेदितव्ये भूतानि भूलोकस्थितजीवाः प्रकरणात् विशेषः चरित्रं तु स्वरूपतो महत् परं तु सुखदुःखजनकं च ऋषित्वं हि मन्त्र द्रष्टृत्वं मन्त्रास्तु सहजमपि धर्मसम्पादितमपि प्रतिबध्नन्ति तदत्र सहजभाविदुःखं प्रतिबध्नन्तीति नात्र तिरोहितमिव सर्वजनीनमित्याह-हीति । साधवः सदाचाराः मर्यादारक्षकाः लोकावेक्षार्थं भगवता अधिकृता नारदतुल्याः पुष्टिमार्गस्था गोपिकातुल्या अच्युतात्मानः मन्त्रा अपि त्रिविधाः मर्यादास्थाः देवगुह्याः भगवद्वशीकरणरूपाः अतो भवन्तो भगवच्चरित्रं देवकृतं मर्यादया प्राप्तं च दुःखं मन्त्रप्रयोगेण दूरीकृत्य सुखमेव साधयन्तीत्यर्थः ॥ ५ ॥

विभूतित्वं वक्तुं ततोऽपि विशेषमाह—

मू० भजन्ति ये यथा देवान् देवा अपि तथैव तान् ।
छायेव कर्मसचिवाः साधवो दीनवत्सलाः ॥ ६ ॥

ननु, यज्ञे भगवदवयवभूता देवाः "यन्न दुःखेन सम्भिन्न"मिति वाक्यानुसारेण सुखमेव प्रयच्छन्तीति चेत् न नहि एकेन यागे कृते तत्सम्बन्धिनां स्वर्गो भवति तथा अग्निष्टोमे कृते द्वादशाहस्वर्गो भवति । ननु तेषां भगवदवयवभूतानां कथमेवमत आह, कर्मसचिवाः राजाधीना हि मन्त्रिणो भवन्तीति वेदमार्गस्तथैव नात्र किमपि विचारणीयं वैलक्षण्यमाह-साधवो दीनवत्सला इति । चतुर्थपादः सिद्धान्त इति मन्त आत्मा अहमेव चेति चतुर्थः पादः नहि अंशैस्तथा कर्तुं शक्यं यथा अंशिना दैन्यमेव करणे हेतुः वत्सं कान्ति जिह्वया आदत्ते इति कार्याकार्यविचाराभावेन सहजस्नेहवन्तो वत्सलाः सामान्यवाक्यं विशेषपरमिति प्रकरणादवगन्तव्यं तस्माद्भवत्समागममात्रेणैव भगवदवतार इति सर्वेषां सर्वं सिद्धं भवतीति तद्गुणवर्णनेन प्रोत्साहनमुक्तम् ॥ ६ ॥

प्रश्नमाह—

मू० ब्रह्मंस्तथापि पृच्छामो धर्मान् भागवतांस्तव ।
यान् श्रुत्वा श्रद्धया मर्त्यो मुच्यते सर्वतो भयात् ॥ ७ ॥

ब्रह्मभावाभिलाषी विदितसर्ववृत्तान्तो विचितसाध्यसाधनभावो धर्मान् पृच्छति, "कथमाचार्यवान् पुरुषो वेदे"ति शास्त्रार्थत्वाय भगवतो ब्रह्मत्वभावनायामपि गुरुत्वस्य भगवतानङ्गीकरणाच्च शास्त्रार्थसिद्धिः किन्तु मत्यपडक्षानमुपदिष्टं तेन जीवन्मुक्तिन्यायेन ब्रह्मभावे जातेऽपि ब्रह्मभूतः प्रसन्नात्मेत्यादिनिरूपितार्थस्यासिद्धेः भगवद्धर्माचरणेन तन्निद्धिरिति प्रश्नः नारदस्य ब्रह्मभावो जात इति तथा सम्बोधनं स्तुतिमात्रत्वाभावाच्च स्वस्यानुष्ठेयः स्वविचारितो भविष्यतीति तथापीति भवदागमनेनैव सिद्धोऽस्माकमर्थस्तथापि शास्त्रार्थपरिपालनाय पृच्छामः देवकीप्रभृतीनामप्ययमर्थोऽभिलषित इति बहुवचनं भागवतानिति प्रमाणतः स्वरूपतः फलतश्चेति त्रेधा नियतभगवत्सम्बन्धान् तवेति त्वयाप्यनुष्ठेयान् दुःखनिवर्त्तकत्वं तु तेषामिदानीमेवेत्याह-यान् श्रुत्वेति । उपायपरिज्ञाने हि निश्चिन्तता भवति श्रद्धया तदात्मत्वेन करणं सम्भवति मर्त्य इति स्वभावतः सभयत्वं सर्वत इत्याध्यात्मिकादिभिः ॥ ७ ॥

ननु, दिव्यद्वादशसहस्रवर्षानन्तरं प्रसन्नो भगवान् कथं कर्दमस्य शुक्र इव न गुरुर्जात इतिचेत्तत्राह—

मू० अहङ्किल पुराऽनन्तं प्रजार्थं भुवि मुक्तिदम् ।
अपूजयं न मोक्षाय मोहितो देवमायया ॥ ८ ॥

अलौकिकज्ञानज्ञापकस्य देवकीजठरादुद्गतस्य कुतो न गुरुत्वमित्यत आह-किलेति । प्रसिद्धार्थज्ञापकत्वेन न गुरुत्वं प्रसिद्धिस्तु जन्मभ्यां सत्यसङ्कल्पत्वादत्रापि पुत्रत्वमेव न गुरुत्वम् अस्मिन् जन्मनि प्रसिद्ध्यभावात् अत आह, पुरेति । ईश्वरपरिचयाभावादुपदेशोऽनुचित इति आशङ्क्य सेवितत्वान्ताभावादनन्तस्येव परिचयः प्रकारे परं विशेषः प्रजार्थं इति भुवि मुक्तिदमिति न क्रममुक्तिः न वा उभयार्थेन मोक्षायेति तपसा शुद्धचित्तस्य कथमेवमत आह—मोहित इति । प्रजासर्गे ब्रह्मणा आदिष्टो नचान्येकः प्रथमं सङ्कल्पश्च तथेति भगवतापि तथैव विचारितं ततो भगवत्साहस्रस्याविद्यमानस्य प्रार्थ्यमानत्वाद्विलम्बः

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

ततस्तपस आधिक्याच्चित्तशुद्धिः ततो भगवद्विचारितस्यान्यथा भावासम्भवान्मायामोहः यया देवा अपि मुह्यन्ति सा देवमाया ॥८॥

ननु, कथमिदानीमप्यन्यथा भविष्यतीत्याशङ्क्याह—

मू० यथा विचित्रव्यसनाद्भवेऽस्मिन् सर्वतो भयात् ।
मुच्ये मह्यञ्जसैवाद्धा तथा नः शाधि सुव्रत ! ॥ ९ ॥

इदानीं विशेषप्रार्थना "यास्येथे मद्गतिं पराम्" इति वचनाच्च भगवतः प्रतिबन्धकत्वम् अत्र स्थित्यभावकारणरूपभावे हेतुमाह, विचित्रव्यसनादिति । भगवतः पुत्रत्वेन स्थितावपि यदा व्यसनमन्यपुत्रादिसंसारचिन्ता तदा कदास्य निवृत्तिः नवा तस्य व्यसनस्यैकः प्रकारः व्यसनाभावार्थं परिगृहीतादपि व्यसनमिति विचित्रता जन्मान्तरे पुनः साधनसम्पत्तिः कीदृशी भवेदिति अस्मिन्नेव जन्मनीत्युक्तम् अधिकारोऽपि भयहेतुः तथा वैकुण्ठादप्यागमनम् अतः सर्वनिषेधायाह—सर्वतो भयादिति । अञ्जसेति अनायासेन आयासे हि चित्तस्योद्वेगात्पुनरावृत्तिर्भवेत् अद्धा साक्षात् परम्परया साधनाधायं यतो बाह्याभ्यन्तरभेदेन तत्रान्यमप्यस्मिन्निक्षिप्य मोचनं सम्भवति । यथा स्वस्वं सन्निवृत्त्यर्थमाह–साक्षादिति । शासनं वाचकशिक्षा, नोपदेशमात्रेण कार्यसिद्धिः सुव्रतेति सम्बोधनं सर्वनिर्वाहाय आश्रितसर्वकार्यसिद्धिकरणव्रतं भगवन्तमपि प्रार्थयित्वा सर्वं करिष्यतीति एवं त्रिभिः प्रश्नैः सिद्धः परीक्षितोऽपि ॥ ९ ॥

सावधानश्रवणसिद्धये शुकवचनम्

शुकउवाच ॥

मू० राजन्नेवं कृतः प्रश्नो वसुदेवेन धीमता ।
प्रीतस्तमाह देवर्षिर्हरेः संस्मारितो गुणैः ॥ १० ॥

राजन्निति महत्त्वसम्बोधनं योग्यकथात्वज्ञापनायोभयोर्गुणकथनं धीमता देवर्षिरिति सर्वथा परमसिद्धान्तकथने हेतुः प्रीत इति हरेर्गुणैः पुत्रादिभावेनानुवृत्त्यादिभिः सम्यक्त्वेन महानयमिति स्मारितः तस्य पूर्ववृत्तान्तः सम्यक् ज्ञात इत्यर्थः ॥ १० ॥

उत्तरत्वेन शास्त्रं वक्तुं स्वयमप्यभिनन्दनमाह–त्रिभिः—

गुरुशिष्ययोर्मध्ये प्रवचनस्य स्तुतिर्वक्तव्या तत्र प्रथमं श्रोतुः पुरस्कारः—

श्रीनारद उवाच ॥

मू० सम्यगेतद्व्यवसितं भवता सात्वतर्षभ ! ।
यत्पृच्छसे भागवतान् धर्मांस्त्वं विश्वभावनान् ॥ ११ ॥

यदस्माभिर्वक्तव्यं भगवद्धर्माणां श्रवणानुष्ठाने कर्तव्ये इति सर्वशास्त्रार्थनिर्णयोऽयमिति च भगवन्मार्गेऽन्यस्य कर्तव्यत्वाभावात् तदेतत् त्वयैव निश्चितं सात्वता भगवद्भक्ताः तदृषभस्त्वं निश्चितमार्गवक्तृत्वात् विशेषतो गुरुत्वार्थश्च पृच्छसे अनुवादे पुनर्भगवदीयत्वनिर्देशो भक्त्या विश्वस्मिन्ननुभावो येषामिति तदभावे मार्गान्तर इव कार्यासिद्धेः अनेन गुरोरभावे प्रश्नहेतुरप्युक्तः सामान्यतोऽपि श्रुतास्तथान्तःकरणवृत्तिं सम्पादयन्ति ॥ ११ ॥

अलौकिकानुभावत्वं प्रश्नहेतुत्वेनोक्त्वा कैमुत्तिकन्यायेन तान् स्तौति—

मू० श्रुतोऽनुपठितो ध्यात आदृतो वाऽनुमोदितः ।
सद्यः पुनाति सद्धर्मो देवविश्वद्रुहोऽपिहि ॥ १२ ॥

सतो भगवद्भक्तस्यैकोऽपि धर्मो लोकवेदघातिनः सर्वथा बहिर्भूतानि प्रायश्चित्तानर्हान् बहूनपि श्रुतमात्रः सद्यः पुनाति किम्पुनर्भगवद्धर्माणाम् माहात्म्यं वक्तव्यमित्यर्थः । यथा अजामिलं भगवत्सेवकानां पक्षपातलक्षणः स्वभावः "भूतानि विष्णोः सुरपूजितानि" इति न्यायेन श्रुतः पवित्रता लोके वेद च दुर्लभेति फलत्वेन कीर्त्यते श्रवणानन्तरभाविकीर्तनमनुपठनं ध्यानं मानसङ्कल्पवाङ्मनोगोचरस्तथा करोतीति त्रयम् आदृतो वेति पूर्वेण सह स्वतन्त्रविकल्पः आदरस्य प्रेमसहितत्वात् भिन्नकर्तृकश्रवणादावनुमोदनं मात्सर्याभावाद पदार्थे महती रुचिश्चेत्तथा भवतीति नात्र प्रमाणान्तरमपेक्ष्यते तस्माद्यत्र भगवत्सेवकधर्मोऽप्येतादृशः तत्र भगवद्धर्माणां किं माहात्म्यं वक्तव्यमित्यर्थः ॥ १२ ॥

स्वस्यापि कृतार्थतया सभाजनमाह—

मू० त्वया परमकल्याणः पुण्यश्रवणकीर्त्तनः ।
स्मारितो भगवानद्य देवो नारायणो मम ॥ १३ ॥

भगवद्धर्मप्रष्टा सर्वत्र दुर्लभः वैष्णवानामपि सर्वदा पिहितं स्मरणादिप्रेमाविर्भावे तु तेनैव पिधानं चित्ते सम्यक् प्रविष्टं स्मरति तद्विचारार्थं आतमिति सम्यक् स्मारित इत्यर्थः । कल्याणं विवाहादिपुण्यं गङ्गास्नानादि तथा चैहिकामुष्मिकपुरुषार्थरूपता भवति । परमत्वं परमानन्दरूपत्वात् रूपनामविभेदेनेति वक्तुं श्रवणकीर्त्तन इत्युक्तं परस्वसाध्यभेदेन भगवानिति धर्मिनिर्देशः ऐहिकामुष्मिकानन्तरं फलत्वमपि भगवत आह–देवो नारायण इति । देवपक्षपातित्वाद्देवः ब्रह्मजनकत्वाच नारायण इति । सर्वेषामपेक्षितः मम तु स्वामी सेव्य इत्यर्थः सेवायामपि तिरोहित एवेत्यद्येति विशेषः ॥ १३ ॥

एवमभिनन्दनमुक्त्वा शास्त्रमारभते । अत्रापीत्यादि अवापपरमाङ्गतिमित्यन्तं गुरोः केवलवाक्याच्छास्त्रीयं प्रमाजनकमिति सिद्धं तत्र कथोपक्षेपमाह—

मू० अत्राप्युदाहरन्तीममितिहासम्पुरातनम् ।
आर्षभाणां च सम्वादम्विदेहस्य महात्मनः ॥ १४ ॥

अत्र धर्मप्रश्ने अयमर्थः सर्वथा न त्वयैव पृष्टः किन्तु पुरातनोऽपि अनेन फलस्यापि नियतत्वं ज्ञापितं कल्पान्तरीयास्त इति सूचयितुमुदाहरन्तीति जन्मान्तरस्थाः गुरवोऽन्ये च भगवतो ब्रह्मणो वा वाक्यं नोदाहृतम् उक्तविषयत्वात् पुरातनमिति नारदकल्पापेक्षया ऋषभदेवपुत्राणां विदेहस्य च इतरेतरयोगेन प्रत्येकं प्राधान्यार्थं वा चकारः अस्य निमेर्नवमस्कन्धोक्तादन्यत्वाच्च लोकनप्रतिष्ठितत्वेन दूषणं श्रोतुर्वंशकथने प्रयोजनाभावादुत्तमत्वमात्रं वक्तव्यं तद्यज्ञमध्यस्थितं वक्ष्यति देहाभिमानाभावः भगवन्निष्ठता चात्राप्युक्ता तादृशोऽयं वंशः यत्र भगवता स्वधर्माविर्भावः षट्सु कृतः शुकवंशवत् सप्तमी हि कक्षा भगवद्धर्मे प्रतिपादिका ॥ १४ ॥

तान् वक्तुं षट् पुरुषानाह—

मू० प्रियव्रतो नाम सुतो मनोः स्वायम्भुवस्य यः ।
तस्याग्नीध्रस्ततो नाभिर्ऋषभस्तत्सुतः स्मृतः ॥ १५ ॥

पञ्चमस्कन्धोक्तोऽयमिति वक्तुं तृतीयादारम्भः शिष्टं स्पष्टम् ॥ १५ ॥

सप्तमानामुत्पत्तिं वदन् पितुर्माहात्म्यपुरःसरमाह—

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

मू०　तमाहुर्वासुदेवांशं मोक्षधर्मविवक्षया ।
　　अवतीर्णं सुतशतं तस्यासीद्ब्रह्मपारगम् ॥ १६ ॥

शतमध्ये तेषामप्युत्पत्तिः वेदाध्ययनं च साधारणमुक्तं भगवद्धर्माः शतं ततोऽप्यधिकाः सन्तीति तन्मध्ये नवानामप्युत्पत्तिः भक्तेस्तथात्वात् ॥ १६ ॥

अत्र न कोऽपि प्रवाहपतित इति वक्तुं पुष्टिस्थं द्वाभ्यामाह-स्वरूपकार्याभ्यां रूपेण ज्येष्ठोत्तमत्वं वदन् स्वरूपमाह—

मू०　तेषां वै भरतो ज्येष्ठो नारायणपरायणः ।
　　विख्यातं वर्षमेतद्यन्नाम्ना भारतमुत्तमम् ॥ १७ ॥

भगवत्परायणत्वे हि रूपोत्कर्षः यन्नाम्ना महतोऽपि नाम प्रसिद्धं भवति स नामोत्कर्षः ज्येष्ठश्चोत्तमत्वं सर्वेषां तादृशत्वज्ञापनाय ॥ १७ ॥

कार्यमाह—

मू०　स भुक्तभोगां त्यक्त्वेमां निर्गतस्तपसा हरिम् ।
　　उपासीनस्तत्पदवीं लेभे वै जन्मभिस्त्रिभिः ॥ १८ ॥

भरत एव हि भगवान् बद्धमुमुक्षुमुक्तावस्थाः प्रदर्शितवान् प्रधानामेतदेव रूपमेषा क्रियेति प्रवृत्तिनिवृत्तिधर्मांश्च भगवदिच्छया प्रतिबद्धाः नारायणपरायणस्य धर्मनिष्ठा न प्रयोजिकेति पदवीं लेभ इति ततोऽग्रे गतिर्न ज्ञायत इत्यर्थः । नारायणपराः सर्वे इति वचनात् भुक्तभोगा परित्यक्तेत्युपपत्तिकथनार्थं भुक्तभोगेति विशेषणं निर्गत इति न सन्यासो गृहीत इति ज्ञापयति तथा सति हरिणसङ्गे पतित्वं स्यात् ॥ १८

अन्येषामपि नव व्यतिरिक्तानां मर्यादायां विनियोगमाह—

मू०　तेषां नव नवद्वीपपतयोऽस्य समन्ततः ।
　　कर्मतन्त्रप्रणेतार एकाशीतिर्द्विजातयः ॥ १९ ॥

रूपमर्यादां हि नव रक्षितवन्तः अष्टदिङ्मध्यभेदात् सत्त्वरजस्तमोगुणा अन्योऽन्याभिश्रणेन नवविधा भवन्ति ते कर्तरि कर्मणि च प्रविष्टा एकाशीतित्वं सम्पादयन्ति एतावन्त एव हि प्रवृत्तिमार्गे वेदनिष्ठाः तेषां मध्ये नव नवद्वीपपतयो जाताः अस्येति पुरःस्थितभूमिनिर्देशो बुद्धिस्थभरतनिर्देशो वा कर्मतन्त्रप्रणेतार इति यजनयाजने प्रदर्शिते ब्राह्मणयाविर्भावस्तेष्विति द्विजातय इत्युक्तम् ॥ १९ ॥

प्रकृतानाह—

मू०　नवाभवन्महाभागा मुनयो ह्यर्थशंसिनः ।
　　श्रमणा वातरशना आत्मविद्याविशारदाः ॥ २० ॥

भागवतधर्मदर्शना नव महाभागवता इति ज्ञानभक्तिसहिता ऋषयो मन्त्रमिव भागवतधर्मदर्शना इत्युक्तत्वात् अलौकिकद्रष्टृत्वे षट् हेतूनाह, ते हि नवधा भक्तिरेव प्रकटेति तुल्यस्वभावाः लोके निखिलद्भगवद्धर्मा इति महाभागा इत्युक्तं प्राप्तो निधिरज्ञानादशक्त्या च गच्छेदिति अज्ञानं त्रिभिर्निवारयति । मननशीला हि अवेक्षकास्तत्र लब्धं परिपालयन्तीति तत्रापि तारतम्यज्ञानार्थमर्थशंसिन इति परमार्थभूतमेव वस्तु शंसते ननु योगबलेन यत्किञ्चित् इष्टमपि तस्मात्कथनार्थं धर्माणां सम्यगवधारणमुक्तं श्रमणा इति सामर्थ्यं येषां मनोवाक्कायेषु तदर्थमिति नाज्ञानेन प्रमादः अशक्तिं निराकरोति द्वयेन परिग्रहयो हि व्याकुलता अपरिग्रहे देहाध्यासे सति ततोऽपि अतः अपरिग्रहः आत्मज्ञानं चोक्तं देहाध्यासस्य सर्वथा बाधितत्वाय विशारदत्वम् ॥ २० ॥

गुरोर्नामपरिज्ञानाय तेषां नामान्याह—

मू०　कविर्हरिरन्तरिक्षः प्रबुद्धः पिप्पलायनः ॥
　　आविर्होत्रोऽथ द्रुमिलश्चमसः करभाजनः ॥ २१ ॥

अथशब्दः प्रकरणविच्छेदकः "तस्माद्भारत सर्वात्मा" इत्यत्र निरूपितः विस्तरभयान्नोच्यते ॥ २१ ॥

तेषामाश्रमधर्मं ज्ञानवैराग्याभ्यां श्लोकद्वयेनाह तत्र ज्ञानेन परिभ्रमणं प्रथममाह—

मू०　त एते भगवद्रूपं विश्वं सदसदात्मकम् ।
　　आत्मनोऽव्यतिरेकेण पश्यन्तो व्यचरन्महीम् ॥ २२ ॥

सङ्गपरिभ्रमणं निषिद्धमाशङ्क्य भगवद्धर्मदर्शनात्तत्परकथनार्थमप्येत इत्याह—त एत इति । वैदिकं भागवतज्ञानं चैकविधं भगवत्त्वेन परं विशेषः । साङ्ख्ये तु विकल्पदूरीकरणेनैकरूपानुभवः योगे तु बहिर्दर्शनाभाव एव तत्र वैदिके वैष्णवे च प्रकारत्रयेण ब्रह्मनिरूपणं ब्रह्मजगज्जीवप्राधान्यभेदात् तत्र जगत्प्राधान्यज्ञानमाह—भगवतोऽनन्तमूर्तेः कार्यरूपमेकं द्विविधबुद्धिहेतुभूतं व्यवस्थया न सदसद्रूपं किन्तु सर्वत्रैव तत्र स्वस्यापि अभेदः आत्मनः अव्यतिरेकः परिभ्रमणेऽपि ब्रह्मनिष्ठत्वाय जगत्प्राधान्यज्ञानम् ॥ २२ ॥

वैराग्यमाह—

मू०　अव्याहतेष्टगतयः सुरसिद्धसाध्य—
　　गन्धर्वयक्षनरकिन्नरनागलोकान् ।
　　मुक्ताश्चरन्ति मुनिचारणभूतनाथ—
　　विद्याधरद्विजगवाम्भुवनानि कामम् ॥ २३ ॥

वैराग्यमपि त्रिविधं विषयाणांव्यामोहकानांदूरेपरित्यागः अभ्यन्तरे दृढतया समागतानामुपेक्षा रागाभावाय सकृदनुभवोऽनिषिद्धप्रकारेण तत्र तृतीय एतेषु भगवद्धर्मरसाभिनिवेशात् निर्दीनामङ्गीकारेण न व्याहता इष्टा गतिर्येषां चतुर्दशलोकाभिप्रायेण गणिता लोकाः तत्रत्यैर्गुणैर्न सम्बद्धा मुक्ताः काममिति भगवदिच्छापरिपालकत्वान्नोद्विग्नाः ॥ २३ ॥

भारते यज्ञकर्तारः शुद्धाः भगवद्धर्मजिज्ञासवो भविष्यन्तीति भगवदाज्ञापरिपालनाय तत्र समागता इत्याह—

मू०　त एकदा निमेः सत्रमुपजग्मुर्यदृच्छया ।
　　वितायमानमृषिभिरजनाभे महात्मनः ॥ २४ ॥

सर्वथा आगन्तव्यमिति निर्बन्धो नास्तीति यदृच्छयेत्युक्तं सत्रे हि लौकिकवैदिकक्रियावेशातिरिक्तकालः सम्भवति । षडहैः सान् सम्पाद्याहरुत्सृजन्तीतिवत् तत आह,वितायमानमिति । श्रमाभावाय ऋषिभिरिति तथापि गमनमनुचितमिति जायन्तेया इति मातृनाम्ना निर्देशः परं भाग्यं निमेरित्याह—महात्मन इति ॥ २४ ॥

समागमः पूजनं च प्रश्नश्चेति त्रिभिः क्रमात् तत्र समागमाह—

मू०　तान् दृष्ट्वा सूर्यसङ्काशान् महाभागवतान्नृपः ।
　　यजमानोऽग्नयो विप्राः सर्व एवोपतस्थिरे ॥ २५ ॥

तेषां ब्रह्मविरत्वं भागवतत्वं चेति विशेषणद्वयं नृपत्वादुचितमुपस्थानं लोकतः ब्रह्मविरत्वाद्यजमानस्याप्युचितं महाभागव-

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

तत्त्वादग्निविप्रयोः सहभावेनाग्ने अनेन तेषां सहजोत्कर्षः प्रतिपादितः ॥ २५ ॥

पूजनमाह—

मू० विदेहस्तानभिप्रेत्य नारायणपरायणाः ।

प्रीतःसम्पूजयाञ्चक्रे ह्यासनस्थान् यथार्हतः ॥ २६ ॥

तेषां ब्रह्मत्वेन भगवत्त्वेन च ज्ञानम् अतो राजनि विशेषणद्वयं विदेह इति नारायणपर इति च अग्निविशेषणस्य पूजायामप्युपयोग इति पश्चाग्निरूपाणां दृष्ट्वैव प्रीतः तेनास्य तदूनं सर्वं ज्ञातमिति सम्पन्नं सम्यक् पूजा यथा भगवतः बहुकालस्थित्यै आसनस्थानिति ज्येष्ठानुक्रमेण यथारुचि पदार्थदानं च ज्ञात्वा पूजनं तेषामित्युत्कर्षः ॥ २६ ॥

प्रश्नमाह—

मू० तान् रोचमानान् स्वरुचा ब्रह्मपुत्रोपमान्नव ।

पप्रच्छ परमप्रीतः प्रश्रयावनतो नृपः ॥ २७ ॥

प्रश्रयः पदार्थस्तेषु वर्तत इति बोधहेतुः स्वरुचा रोचमानानिति रुच्युत्पादककान्तिस्तु ब्रह्मविदो भगवद्धर्मवत्त्वेन पितुः स्वस्य च मनसा कृता गुरवः सनकादय इति कथं तदुल्लङ्घनेन प्रश्न इत्याशङ्क्य तत्तुल्या एवेत्याह—ब्रह्मपुत्रोपमानिति । तथाप्यनुचितेनाब्रुवन्नित्यनेन समाधास्यते नवेति च वैकुण्ठस्थिता एवैते चत्वारोऽपि दुर्लभा लोके कुतो नवेति बहुकालमनोरथसिद्धिर्भविष्यतीति परमप्रीतः आसन्न इत्युक्तं विनयेन नम्रता प्रश्ने फलहेतुः नृप इति देशकालादिसर्वचातुर्यम् एवं तस्य प्रश्नपर्यन्तं नारदोक्तिरुक्ता राज्ञः प्रश्नमाह, चतुर्भिः । अभिनन्दनं द्वयेन द्वयेन च प्रश्नः भगवत्सेवकत्वेन भगवद्धर्मवत्त्वेन च ज्ञानं तु ब्राह्मणानां सहजत्वान्न स्तूयते तथैव प्रश्नोऽपि द्वयेन लब्धपरिपालनालब्धलाभाभ्याम् ॥ २७ ॥

तत्र प्रथमं भगवत्सेवकत्वेन तान् स्तौति—

जनक उवाच ॥

मू० मन्ये भगवतः साक्षात्पार्षदान्वो मधुद्विषः ।

विष्णोर्भूतानि लोकानां पावनाय चरन्ति हि ॥ २८ ॥

दर्शनादेव परमहंसा वैष्णवा इति ज्ञानं गोत्रादिप्रश्ने न कोऽपि पुरुषार्थः आगमनप्रयोजने सन्देहः स्वार्थमागमनं परार्थं वेति प्रथमो दर्शनादेव निवृत्तः परार्थे च प्राणिनो न खलः प्रवृत्तिः प्रेक्षापूर्वप्रवृत्तिश्चेयम् अतो भगवत्प्रेरणया ऽस्मदुद्धारार्थं समागतं तत्र बहिः सेवका राजसवेशधारिणो भवन्ति । तैश्चास्मत्तन्त्रैर्न सर्वं कार्यम् सिद्ध्यति अतः कृत्रिमवैकुण्ठादौ सनकादय इवान्येऽपि तत्सदृशा भगवत्सभायां तिष्ठन्ति पार्षदत्वेऽपि क्वचन गच्छन्ति तन्निवृत्त्यर्थं साक्षादिति मुख्यानित्यर्थः । कस्मिन्नवसरे पार्षदत्वं तत्राह—मधुद्विष इति । मधुकैटभौ हत्वा ब्रह्मणे वेदान् दत्तवान् हयग्रीवरूपेण ततश्च वेदरक्षावसरे सर्वेषां महतामवसरः अनेन तेषां वचनं न केनाऽपि शास्त्रेण विरुद्धमिति ज्ञापितं कार्यार्थं भगवदाज्ञयाऽऽगमनसम्भावनायामपि परिभ्रमणमयुक्तमित्याशङ्क्याह—विष्णोर्भूतानीति । पालकस्य सेवकाः यं गृह्णन्ति तं स्वसमानं कुर्वन्तीति भूतानि अथवा भगवदुत्पन्नानि गङ्गावत्सर्वपवित्रकरणार्थं परिभ्रमन्तीत्यर्थः नात्र सन्देहः गङ्गैव दृष्टान्तः इति हीत्युक्तं भगवतैवोत्पाद्य प्रेषिता इत्युक्तं भवति ॥ २८ ॥

भगवद्धर्मवत्त्वेन तेषां प्रशंसा गङ्गातोऽप्याधिक्यार्थमाह—

मू० दुर्लभो मानुषो देहो देहिनां क्षणभङ्गुरः ।

तत्रापि दुर्लभं मन्ये वैकुण्ठप्रियदर्शनम् ॥ २९ ॥

लब्ध्वा सुदुर्लभमिदमिति न्यायेन स्वर्गापवर्गयोर्द्वारमिति च अत्रैव मृग्य इत्यादिवचनैश्च मानुषदेहो नौकात्वेनाभिमतः परं सन्तो नाविका इव यदि भवन्ति तदा फलं सिध्यति तत्रात्र प्रत्यक्षबाधः कङ्कनीयः हेतुस्वरूपफलैः प्रत्येकं हि स भवति तत्र हेतुरप्रत्यक्ष एवं फलं साधनाभावात् स्वरूपेऽपि बहवः पथिका इत्यत्र विषमनद्यां प्राप्तनौका न नौकां सुलभां मन्यन्ते बहुश्रमसाध्येन प्राप्तत्वात् चतुरशीति लक्षयोनिष्वेका मनुष्ययोनिरिति कृत्वा बाधो निराकार्यः देहाभिमानस्य तामसत्वाद्राजसमानुषदेहो दुर्लभ इत्यर्थः । क्षणेन भङ्गुरम् आरब्धनाशं न तिष्ठतीति मानुषदेहप्राप्तिःस्वस्य दुर्लभा दुर्लभेऽपि दुर्लभा भगवत्प्रियप्राप्तिः तद्भावे प्राप्तापि व्यर्था अनर्थहेतुश्चेति लोकप्रसिद्धत्वभावेऽपि स्वानुभवः प्रमाणमित्याह—मन्य इति । वैकुण्ठस्थित्वा सर्वस्वरूपस्वधर्मान् दत्त्वा सेवकबाहुल्याय प्रेषयित्वा तत्प्रतीक्षया तिष्ठतीति वैकुण्ठस्य प्रियाः ॥ २९ ॥

नह्येवं समागमः पुनः सम्भविष्यति येन विलम्बः कर्तव्यः किन्तु शरीरस्योपयोगः कर्तव्य एवेत्याशयेनाह—

मू० अत आत्यन्तिकं क्षेमं पृच्छामो भवतोऽनघाः ! ।

संसारेऽस्मिन् क्षणार्द्धोऽपि सत्सङ्गः शेवधिर्नृणाम् ॥ ३० ॥

विरोधिसहभावाभावे सति अनन्तत्वमात्यन्तिकत्वं क्षेमो लब्धस्य परिपालनं लब्धो हि दुर्लभो देहः स च येनोपायेन नित्यो भवेत्स वक्तव्य इत्यर्थः । भवत इति द्वितीयं कर्म पदार्थद्वयस्य दुर्लभत्वेऽपि प्रारम्भकपायसम्भवात्प्रारम्भक्कृदर्शनेन कार्यसिद्धिः अत अनघा ! इति सम्बोधनं प्रतिबन्धकाभावाय विष्णोर्भूतानीति हेतुः आत्यन्तिकक्षेमस्योत्कर्षं वक्तुं कैमुतिकन्यायेनाह । संसारे स्मिन्निति । स्वव्यतिरिक्तानि क्षुद्राणि फलानि दातुं न बहुकालस्थितिरपेक्ष्यते निधिप्राप्तौ दारिद्र्यमिव ज्ञानदानेन संसारदुःखनिवृत्तिरित्यर्थः । अतः सदिति सामान्यपदं नरत्वमेवाधिकारिविशेषणम् ॥ ३० ॥

अलब्धलाभं पृच्छति ॥

मू० धर्मान् भागवतान् ब्रूत यदि नः श्रुतये क्षमम् ।

यैः प्रसन्नः प्रपन्नाय दास्यत्यात्मानमप्यजः ॥ ३१ ॥

भागवतधर्माः कदापि न प्राप्ताः योग्यस्य क्षेमाभावे ह्यप्रयोजकत्वम् अत आह—यदि नः श्रुतये क्षममिति । स्वरूपयोग्यतायां भवच्छ्रवणलब्धश्चेत्तदा धर्माणां तावद्वक्तव्ये भवति । धर्माणां योगत्वात् पूर्वापेक्षया अधिकफलत्वमाह । यैः प्रसन्न इति । सनुष्ठितैर्भगवत्प्रसादो नियतः धर्मान्तराधिकारिविशेषणमाधिक्यं पूर्वश्लोके नरत्वमेवोक्तं ततोऽधिकमित्यर्थः । अन्यस्यानात्मनिवेदिनो भगवानात्मानं न समर्पयति, प्रसादे कीर्त्यादिदानपुरः सरमात्मदानं च धर्माणां हेतुत्वं वरं वृणीमहेऽथापीति प्रसादेऽपि प्रार्थनायाः क्रियमाणत्वात् अपिशब्देन भक्तसङ्गं धर्माणामनन्यहेतुत्वाय न सम्बन्धेन प्रयच्छतीत्याह—अज इति ॥ ३१ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एवं प्रश्नद्वयं सिद्धं मध्ये नारदो वसुदेवं सावधानं करोति—

नारद उवाच ॥

मू० एवं ते निमिना पृष्टा वसुदेव ! महत्तमाः ।
प्रतिपूज्याब्रुवन् प्रीत्या ससदस्यर्त्विजं नृपम् ॥ ३२ ॥

महत्तमा इति तस्याधिकारमपि सम्पाद्य धर्मान्वक्ष्याम इत्युक्तं भवति, हितं वदति कारयति योग्यं कृत्वा च कारयतीति तथा प्रतिपूजनं बहिरेव ससदस्यर्त्विगिति वचनात् मुख्यमेकं गौणद्वयं च वक्तव्यमिति सूचितम् ॥ ३२ ॥

तत्र मानुषदेहसत्सङ्गयोः प्राप्तौ मोक्षावश्यम्भाव इति तदुपायप्रश्नः भगवद्धर्मप्रश्नश्चेति प्रश्नद्वयं तत्र समुदाये पृष्टस्य मुख्यपर्यवसानादतिनिपुणः कविराह सर्वत्र कुशलः तत्र प्रथमस्योत्तरमाह —

कविरुवाच ॥

मू० मन्ये कुतश्चिद्भयमच्युतस्य पादाम्बुजोपासनमत्र नित्यम् ।
उद्विग्नबुद्धेरसदात्मभावाद्विश्वात्मना यत्र निवर्त्तते भीः ॥३३॥

भक्तिमार्गेण गोविन्दभजनमित्युक्तं भवति अन्यस्य स्वपरनिर्वाहकत्वाभावात् उद्विग्नबुद्धेरिति वचनाद्वैराग्यरागाभावावुक्तौ " नचेद्यतेरन्न पुनर्मृताय " इति वचनात् । जन्मफलं पुनर्जन्ममरणाभावायेति तत्सर्वथा अभयं तत्र कर्ममार्गे प्रवाहस्य बाधकत्वं ज्ञानमार्गे त्वनधिकारः विषयिणोऽप्यापातत एवानुद्वेगः ज्ञानोत्तरं तु सर्वथा तद्वैराग्यसाध्यं तत्सहसा न निर्वहति । अतः सुगमोपायप्रेप्सोः केनाप्यंशेन च्युतिरहितस्य चरणसेवैवोपाय इति तदभावे मानुषदेहसत्सङ्गयोर्वैफल्यं नन्वेतस्यैव कथं निर्वाह इत्यत आह, मन्य इति ममैवं विचार इत्यर्थः । जगन्नाथादिस्थानेषु क्वचिद्गत्वा मरणपर्यन्तं भगवत्सेवायां न किञ्चिद्बाधकमिति भावः । गृहस्था देवा रोगाश्च न तत्र बाधका भविष्यन्तीत्यकुतश्चिद्भयं तत्र हेतुरच्युतस्येति ये हि स्वस्थानात् च्युतास्ते बाध्यबाधकतां प्राप्नुवन्ति भगवांस्तु न स्थानात् च्युतः तत्सम्बन्धादच्युता इव भवन्तीत्यर्थः। पादाम्बुजमित्यवतारादि असमासादेव गम्यते समीपे स्थित्वा यथायोग्यकरणमुपासना अत्र मानुषदेहे एतदेव नित्यं परं गमनार्थं साधनमुद्वेगः प्रवाहव्यावृत्त्यर्थं बुद्धिरिति वृत्तधर्मत्वान्नाशकत्वादस्य देहस्य तत्रात्मबुद्धिरज्ञानात्कृतेति विश्वात्मनेति फलं "मृत्युरस्मादपैति" इति न्यायात् । यत्रोपासनायाम् उत्पत्तिमारभ्य तदुपसनार्थं सङ्गे स्थितस्तदा निवर्त्तते सर्वांशेन नैव मन्यस्मिन्नुपाये मृत्युर्निवर्त्तत इत्यर्थः "अयनामाभ्यपद्यत" इति वचनात् अकिञ्चित्करत्वाय स्त्रीपदप्रयोगः ॥ ३३ ॥

द्वितीयस्योत्तरमाह–

मू० ये वै भगवता प्रोक्ता उपाया ह्यात्मलब्धये ।
अञ्जः पुंसामविदुषां विद्धि भागवतान् हि तान् ॥ ३४ ॥

द्विविधा हि भगवद्धर्मा गीतायामुक्ताः "यत्करोषि" इत्यादिश्लोकद्वयेनैकं "मन्मनाभव" इत्यपरे उभयेषामप्यात्मलब्धिः फलं परम्परया साक्षाच्च अन्यैरप्युक्ताः आत्मलब्धये शृण्वन्तीत्यादिना भगवतापि प्रयोजनान्तरार्थं "सर्वधर्मान्परित्यज्य" इत्युक्तमस्ति । तत्र ये धर्मा वै निश्चयेन साक्षात् भगवत्फला एव भगवद्विषया एव कायवाङ्मनोभिः व्यस्तैः समस्तैर्भगवतैव च प्रोक्ता "मन्मना भव" इति ते भागवताः सर्वत्र भगवत्सम्बन्धात् हीत्युक्तम् आत्मा भगवान् अञ्जः पुंसामविदुषामिति कर्मभक्तिज्ञानानां सहकारित्वं निषिद्धं पुरुषो हि स्वतन्त्रः प्रत्येकं ते भगवत्प्राप्त्युपायाः अत्रापि सर्वप्रसिद्धिरिति हीत्युक्तं विजातीयसहिताः प्रत्येकं ते उपाया मार्गाः "मनसैवानुद्रष्टव्यः" इति ज्ञानमार्गः द्वितीयतृतीयौ स्पष्टौ नम इति सदुपशिक्षाकर्तव्यनिर्द्धारत्वेन भगवति साधारणाः सर्वेषां त एव प्रधानभूता मिलिता भगवद्धर्मा इति विशेषः स्वतन्त्रफलरूपत्वं तेषां वक्तुं वाक्याद्यन्तयोर्निर्देशप्रतिनिर्देशौ विरुद्धाविति नात्र सन्देहः कर्तव्यः ॥ ३४ ॥

सर्वमार्गापेक्षयोत्कर्षं वक्तुं प्रवाहमर्यादयोर्बाधकत्वाभावमाह—

मू० यानास्थाय नरो राजन्न प्रमाद्येत कर्हिचित् ।
धावन्निमील्य वा नेत्रे न स्खलेन्न पतेदिह ॥ ३५ ॥

तेषामास्थितिः कायवाङ्मनसां तदीयत्वं लोके हि बहवः प्रमादाः सम्भवन्ति कालविशेषेण च राज्ञां चायमनुभवः मनुष्याधिकारकश्च दण्ड इति प्रवाहे बाधाभावमुक्त्वा मर्यादायामप्याह, धावन्निति । शीघ्रमुद्देश्यदेशगमनं धावनं मध्ये मध्ये क्रियोल्लङ्घनं वा शास्त्रगुरू श्रुतिस्मृती वा नेत्रे स्खलनं गतिकरणस्य विघातः पतनमवयविनः इहेति धर्मेषु समबालुकाभूमिवत् त्वरायां साधनपरित्यागे शास्त्रगुरूल्लङ्घने फलविलम्बः फलाभावो वा न भवतीत्यर्थः ॥ ३५ ॥

एवं श्लोकद्वयेन मुख्या भागवता धर्मा उक्ताः प्रथमानाह श्लोकत्रयेण कायेनेत्यादिना । "यत्करोषि" इत्यत्र लौकिके कर्तृत्वभोक्तृत्वे होमदाने पूर्वकाण्डे कर्तव्ये तपश्चोत्तरकाण्डस्थमिति लोकवेदयोः समर्पणमुक्तम् । ततश्च केवलस्य समर्पणस्य सुखदुःखाभावः फलं चोक्तं त्यागयोगसहितस्य मोक्षद्वारा स्वप्राप्तिरुक्ता "सन्यासयोगयुक्तात्मे" ति तथा आत्मनिवेदिनो विशेषेण वदति, प्रपन्नायेति । प्रश्ने वचनात् आत्मनिवेदन एव सर्वस्य समर्पणेऽपि पूर्वस्वभावानुवृत्त्या भगवन्तमात्मनिवेदनं च विस्मृत्य लौकिककर्तृत्वेन करोति तस्यैव समर्पणमिति विशेषः त्यागो भगवद्भजनार्थं इति संन्यासस्थाने भक्तिरुक्ता कार्यसमर्पणं भक्तियोगश्चेति श्लोकत्रयेण निरूप्यते आद्यमाह–

मू० कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वानुसृतस्वभावात् ।
करोति यद्यत्सकलं परस्मै नारायणायेति समर्पयेत्तत् ॥ ३६ ॥

ज्ञानप्राधान्येन क्रियाप्राधान्येन वा करणं तत्र कायवाङ्मनोभिरिन्द्रियैश्चेति क्रियाबुद्धिस्वरूपेणेति ज्ञानं ज्ञात्वाऽज्ञात्वा वा करणं यद्यदिति करणे पृथक्त्वं समर्पणे ह्येकत्वं विहितनिषिद्धानां लौकिकालौकिकानां च कृतानि तुभ्यं समर्पयामीति न किन्तु तुभ्यमेव कृतानीति स्वभावात् निम्नतया कृतमपि इत्येवं समर्पयेत् ॥ ३६ ॥

द्वितीयमाह—

मू० भयं द्वितीयाभिनिवेशतः स्यादीशादपेतस्य विपर्ययोऽस्मृतिः ।
तन्माययाऽतो बुध आभजेत्तं भक्त्यैकयेशं गुरुदेवतात्मा ॥३७॥

"मामेव ये प्रपद्यन्त" इति वचनादेवकारेण सर्वेषामन्येषामनुपायत्वमाह–मायामोहेनास्मृतिः अतो देहोऽहमस्मीति विपर्ययः । सर्वस्य हेतुर्मूलभूत ईशादपेतत्वं तदपि सृष्टिमायया पुन-

श्रीमद्वल्लभाचार्यकृतसुबोधिनी।

मायया भोगाभिनिवेशेन भयम् एवं दोषत्रयजनकमायानिराकरणाय आसमन्तात् तमेव भजेत् "भक्त्यैव तुष्टिमभ्येति" इति वचनात्। ईशो ह्यनन्ययैव सन्तुष्यति नन्वनन्यता न सम्भवति स्नेहस्य त्रिनिष्ठत्वात् अत आह गुरुदेवते आत्मा यस्येति परमप्रेमार्थं वै तदुक्तं भक्तेश्चिन्तामणिवत् बहुसाधकत्वान्न काचिच्चिन्ता॥३७॥

तृतीयमाह—

मू० अविद्यमानोऽप्यवभाति हि द्वयो—
र्ध्यातुर्धिया स्वप्नमनोरथौ यथा।
तत्कर्मसङ्कल्पविकल्पकम्मनो—
बुधो निरुन्ध्यादभयं ततः स्यात् ॥ ३८ ॥

सर्वथानर्थमूलं मन इति योगशास्त्रं तत्र हि द्वैतप्रपञ्चो मिथ्याभूत एव सवासनमनसा जन्यते यथा योगजधर्मसहिते मनसि सिद्धयः फलन्ति एवमेव वासनासहिते द्वयं स्वप्नमनोरथावपि सम्मते वासनया भवतः न च तावन्मात्रं मनसः किन्तु सङ्कल्पयति कर्म विकल्पयति च कर्मणः स्वरूपभेदान् जनयति। आपाततः सुखजनकत्वेऽपि दोषद्वयं ज्ञात्वा मनो निरुन्ध्यादेव एवं त्रयाणां समुदाये अभयं स्यात्। ततो भगवत्प्राप्तिः स्वादिलाभः "विमुक्तो मामुपैष्यसि" इति वचनात्। अयमन्यः प्रथमपक्षस्यैवमन्य इत्यस्य विकल्परूप इति केचित् साधारण इत्यन्ये ॥ ३८ ॥

एवं प्रकारद्वयेन भगवद्धर्मानिरूप्य मार्गत्रयानुकल्परूपं स्वतन्त्रं पक्षमाह—शृण्वन्नित्यादि पञ्चभिः। मुख्यपक्षाणामधिकाराभावे कारणसम्भवात् ज्ञानकर्मणोर्ब्राह्मणमात्रविषयत्वात् भक्तेरपि बहुसाधनसापेक्षत्वात्सर्वेषां शरीरमात्रसाध्योऽयमुत्तमः पक्ष इति नामान्यनन्तरूपेऽत्र प्रतिपादितमस्माभिः तदत्र स्वरूपं तस्य धर्मस्यादावाह—

मू० शृण्वन्सुभद्राणि रथाङ्गपाणेर्जन्मानि कर्माणि च यानि लोके।
गीतानि नामानि तदर्थकानि गायन् विलज्जो विचरेदसङ्गः ॥३९॥

आदौ गृहान्निर्गतश्चित्तपरितोषार्थं रसोत्पादनार्थं च सुष्टु भद्राणि कौतुकप्रधानानि तथा क्रियमाणे न कुत्रापि क्लेशं भवतीति ज्ञापयति। रथाङ्गपाणेरिति समादीनां ज्ञानविमिश्रत्व एव जन्मकर्मत्वाय शुद्धावतारस्य सर्वजनीनत्वात् यानि लोक इत्युक्तं यानि लोक इत्युत्तरत्रापि सम्बध्यते तदर्थकानीत्यौत्पत्तिकसम्बन्धाभावानुक्तं लज्जाभावः सङ्गाभावश्च प्रधानसमाने अङ्के परिभ्रमणदशायां यत्रैवं भगवत्कथा तच्छ्रुत्वा निर्लज्जो लौकिकगीतानि गायन्नसङ्गो विचरेदित्यर्थः ॥ ३९ ॥

एवमनुकल्पस्य स्वरूपमुक्त्वा तस्य कार्यमाह—

मू० एवं व्रतः स्वप्रियनामकीर्त्या जातानुरागो द्रुतचित्त उच्चैः।
हसत्यथो रोदिति रौति गायत्युन्मादवन्नृत्यति लोकबाह्यः ॥४०॥

अष्टधर्मैः प्रकृत्युल्लङ्घनं भवतीति लोकबाह्य इति प्रवाहोल्लङ्घनं फलं पञ्चानां प्रमत्तेनैकस्याप्यपरित्यागः प्रत्यहं सङ्कल्पानुरागाच्चित्तद्रवणान्यन्तराणि बहिः पञ्च कार्याणि कुर्वन्ति। अन्यापेक्षया रोदनं बहुकालमिति भिन्नः प्रक्रमः अपस्मारे हास्यं भिन्नोन्मादे नृत्यं सर्वथा लोकानुकरणाय ॥ ४० ॥

एवं कर्मणा लोकपरित्यागे ज्ञानभक्ती तस्यैकहेलया निरूपयति—

मू० खं वायुमग्निं सलिलं महीं च ज्योतींषि सत्त्वानि दिशो द्रुमादीन्।
सरित्समुद्रांश्च हरेः शरीरं यत्किञ्च भूतं प्रणमेदनन्यः ॥ ४१ ॥

महाभूतानि द्यावापृथिव्योः स्थिता दिशश्चतुर्विधभूतानि नदीसमुद्राः चकारात्पर्वताः एते हि गोविन्दस्य शरीरं प्रत्येकं वा समुदितं यत्किञ्चभूतमित्यनुक्तसङ्ग्रहो हेतुर्वा भगवतः प्रादुर्भूतं तल्लीलार्थमिति आत्मानं च पृथक्कृत्य प्रणमेत् ॥ ४१ ॥

एवं शृण्वन्नित्यादिप्रणमपर्यन्तं मार्गत्रयानुकल्प इति भक्तिज्ञानवैराग्याणां फलानि कर्मणः फलं वैराग्यं तानि क्रमेण भवितुं नार्हन्ति एकसाधनत्वात् युगपच्च लोके आयमानं न दृष्टमात एवं त्रयाणामेकदोत्पत्तिं लोकदृष्टान्तेन साधयति—

मू० भक्तिः परेशानुभवो विरक्तिरन्यत्र चैष त्रिक एककालः।
प्रपद्यमानस्य यथाऽश्नतः स्युस्तुष्टिः पुष्टिः क्षुदपायोऽनुघासम् ॥४२॥

भक्तिः परा प्रेमलक्षणा ईशानुभवो मामभिजानाति यावानित्यादि गोविन्दव्यतिरिक्तविरक्तिः आदिष्टघृतान्नभोजने त्रयमेकदा भवति परमकाष्ठां च प्राप्स्यतीत्यनुघासमित्युक्तम् ॥४२॥

दृष्टान्तं परिहृत्य फलमाह—

मू० इत्यच्युताङ्घ्रिं भजतोऽनुवृत्त्या भक्तिर्विरक्तिर्भगवत्प्रबोधः।
भवन्ति वै भागवतस्य राजन्! ततः परां शान्तिमुपैति साक्षात् ॥४३॥

सर्वकर्मसु मङ्गलाचरणमिव अनुवृत्त्या अच्युताङ्घ्रिभजनं स्नानभोजनादिस्थानेषु मध्ये मध्ये कर्तव्यम् एवमपि फलोत्पत्तिदर्शनात् फलोपकारकं क्रान्तरमाह—भागवतस्येति। एवमपि क्रियमाणः स यदि भागवतो भवेत्तस्यायमिति भगवता स्वधर्मार्थमुत्पादितश्चेत् भगवतः स्थानेषु परमशुद्धसत्त्वरूपं शान्तिं केवलब्रह्मानन्दानुभवस्थानं तद्योगिन एव जानन्ति साक्षात्स्वयमेव तत्स्थानं प्रविशतीति फलं भागवतत्वं ब्राह्मणत्ववदुपयोगि तत्र यथा ब्राह्मणविशेषाः कर्मविशेषे उपयुज्यन्ते ॥ ४३ ॥

एवमन्यत्राप्यनुकल्पे कीदृश उपयुज्यत इति स्वतन्त्रतया च पृच्छति, अर्थोपयोगार्थमपि भागवतैः सह भगवद्धर्मा उत्तमस्य कर्तव्या इति अध्यायार्थः फलिष्यति—

अतो भागवतं पृच्छति—

राजोवाच॥

मू० अथ भागवतं ब्रूत यद्धर्मो यादृशो नृणाम्।
यथा चरति यद्ब्रूते यैर्लिङ्गैर्भगवत्प्रियः ॥४४॥

भगवत्सेवकानां मध्ये स्थितो निःसन्दिग्धः मनुष्याणां मध्ये स्थितस्य लक्षणं धर्मः कर्तव्यः धर्माः प्रत्ययावगमादय इव ग्रामादय इव स्वरूपं प्रवाहे च कथं स्थितिरित्याह, यथेति। कायवाङ्मनोव्यापाराः पृष्टाः लिङ्गं वेषस्तैर्हरेः परिज्ञानम् ॥ ४४ ॥

अत्र प्रकृतोपयोगित्वलक्षणपूर्वकमुत्तरं वक्तव्यं तत्र प्रकृते त्रयाणामनुकल्पस्यापि त्रिविधो भक्तो वक्तव्यः। भगवता हि स्वार्थं निर्मितत्वादेकं फलमुत्तमलक्षणं वक्तव्यं तत्र सर्वे लोका नैकविधा भवन्तीति सर्वत्र त्रैविध्यं वक्तव्यं तत्र ज्ञानभक्तिकर्मणां त्रैविध्यं सर्वत्र हेतुरेकेन फललक्षणं चैकेनेति एकादशभिरुत्तरं वक्तव्यं, तत्र सर्वे वाचो वदितारो भवन्तीति द्वितीयो हरिरेव हरिराह—

ज्ञानिभेदमुत्तममाह—

हरिरुवाच॥

मू० सर्वभूतेषु यः पश्येद्भगवद्भावमात्मनः।
भूतानि भगवत्यात्मन्येष भागवतोत्तमः ॥ ४५ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

सेवते जगत्प्रधानज्ञानिन इत्युक्त भगवतः सकाशादुत्पन्नेषु सर्वेष्वेव प्रथमतो जीवब्रह्मैक्यं विधायाद्वैतामित्युदाम्नाय पञ्चवादीन् कथापयित्वा रामानुजव्युदाम्नाय प्रत्येकं बहुषु तद्धर्मानुसन्धानं सर्वत्र भगवद्दर्शनाय अनुभवपर्यन्तव्यापारादात्मन इत्युक्तं यद्यपि भगवानन्तरः तथाप्याधाराधेयभावस्य प्रतीयमानत्वात्तन्निवृत्त्यर्थं विपरीतं वक्तव्यं ततश्च कालादीनां नियामकत्वाभावात्तिरोधानपरिहाराद्वात्माधारत्वं फलत्यति एवमद्वयात्मदृढज्ञानी उत्तम इत्यर्थः । एतादृशस्यापि भ्रान्तिसमवस्थानार्थं तथा कर्तव्यमिति भावः ॥ ४५ ॥

द्वितीयमाह— ।

मू० ईश्वरे तदधीनेषु बालिशेषु द्विषत्सु च ।
प्रेममैत्रीकृपोपेक्षा यः करोति स मध्यमः ॥ ४६ ॥

शास्त्र एव तरतमभावेन ज्ञानानि निरूपितानि तत्र वैष्णवमन्त्रे ज्ञानकाण्डे ज्ञानं नादृशं पूर्वोक्तमुत्तमाधिकारित्वबलेन निरूपितं तत्रैवोपासनाकाण्डे तरतमभावेन ज्ञानं निरूपितम् उपासनाविचारेण तज्ज्ञानमुत्तमं तथापि ज्ञानपक्षे मध्यमत्वं भेदसहकारित्वात् प्रकृते ज्ञानाभिभवस्य असम्भवात् अनुकल्पार्थं स्थाप्य । ननु, भक्त एवायं भवतु न कृपोपेक्षयोर्निर्गुणविषययोर्बोधकत्वात् नवा भक्तिज्ञानयोः सह भावः एकस्य भेदाविरोधित्वात् अन्यस्य स्वरूपविरोधात् नहि भगवन्मार्गभक्तः कृपोपेक्षे कर्तुं शक्नोति तस्मात्तरतमभावज्ञानमेवैतादृशमिति मध्यमो ज्ञानभक्तः ॥४६ ॥

तृतीयमाह— ।

मू० अर्चायामेव हरये पूजां यः श्रद्धयेहते ।
न तद्भक्तेषु चान्येषु स भक्तः प्राकृतः स्मृतः ॥ ४७ ॥

एकत्र भगवन्तं निश्चिन्ततया जानाति पूजाकरणात्तमर्चायां भक्तिमार्गः भक्तेषु भावाभावात् न वा शास्त्रार्थमस्याहर्वोऽभूदिति ज्ञानात् न वा ज्ञानम् अन्येषु भावाभावात् चकारात् भक्ताभक्तयोस्तुल्यतानिर्देशादस्फुरणपक्षो निराकृतः अत एकदेशे भगवज्ज्ञानात् प्राकृतो ज्ञानभक्त एव ॥ ४७ ॥

भक्तिभिन्नं त्रिभिराह–गृहीत्वेत्यादिना । दोषाणां बहिर्व्याप्तत्वाभिमानात्तद्व्याप्त्यभावेनानुद्वेगेन च अभिपूर्वस्यार्थज्ञानसत्त्वात् विपरीतकथनतुल्यार्थमावाविभवज्ञानं अतः तदनु भगवात्मत्वा ततस्तदाश्रयः तत्र प्रथममाद्यमाह— ।

मू० गृहीत्वापीन्द्रियैरर्थान् यो न द्वेष्टि न हृष्यति ।
विष्णोर्मायामिदं पश्यन् स वै भागवतोत्तमः ॥ ४८ ॥

केचन विषयात् दूरतस्त्यजन्ति बलात्सम्प्राप्ते निन्दन्ति ते मध्यमाः केचन विषयेषु प्राप्तेषु हृष्यन्ति ते प्राकृताः अर्थपदप्रयोगात् न शोचति न काङ्क्षतीतिवत् इह लोकपरलोकयोः परित्यक्तत्वात् इति केचित् वस्तुतस्तु भिन्नविषयावेव इन्द्रियैर्गृहीतानामन्तःप्रवेशाभावे हेतुः विष्णोर्मायामिदं पश्यन्निति जीवपरिच्छिन्नात् ज्ञानादवज्ज्ञानाद्वा व्यापकस्य दर्शिका माया सर्वभावेन मोहयति तेन पदार्थापरिज्ञानात् चकित एको भक्तिपुरःसरो वैष्णवः ॥४८ ॥

द्वितीमाह—

मू० देहेन्द्रियप्राणमनोधियां यो जन्माप्ययक्षुद्भयतर्षकृच्छ्रैः ।
संसारधर्मैरविमुह्यमानः स्मृत्या हरेर्भागवतप्रधानः ॥ ४९॥

परित्यक्तविषयोऽयम् आन्तरपीडारहितः इन्द्रियाणां नाशाशक्तिः क्षेमया देहादीनां जन्मादीनि कृच्छ्राणि सहजा एते पदार्थधर्माः संसरणहेतवश्च एतेऽपि व्यामोहका एवेति ज्ञानमार्गीयः आपत्सु गजेन्द्रवत्स्मरणो भगवानिति भक्तिमार्गस्योत्कृष्टत्वात्त्वात्र प्रथमादिपक्षाः । प्रधान इति प्राकृतः प्रथमो मध्यमः जन्माद्यनुसन्धानरहित एकान्ते उपवासित इव मर्यादापुष्टिभेदात्पक्षद्वयमिति निर्द्धारः ॥ ४९ ॥

उत्तममाह —

मू० न कामकर्मबीजानां यस्य चेतसि सम्भवः ।
वासुदेवैकनिलयः स वै भागवतोत्तमः ॥ ५० ॥

काम एव नोत्पद्यते उत्पन्नेऽपि न कर्माणि तेष्वपि न वासनाः मुक्तः प्रपञ्चोऽयम् एवं पुष्टिमर्यादा भक्तिः प्रपत्तिश्चेति निरूपितं सर्वमाश्रयतो भवेदिति तृतीये हेतुः ॥ ५० ॥

वैराग्यमिश्रमाह–न यस्येत्यादि त्रिभिः ।
अभिमानो व्यवहारो वैदिकस्याव्यपेक्षणम् ।
त्रितयाभावतो मुख्य एकैकोऽन्यत्र युज्यते ॥

प्रथममाह—

मू० न यस्य जन्मकर्मभ्यां न वर्णाश्रमजातिभिः ।
सज्जतेऽस्मिन्नहम्भावो देहे वै स हरेः प्रियः ॥ ५१ ॥

गर्वो ह्यहङ्कारस्य शिरः जन्म सत्कुले कर्म ज्योतिष्टोमादि वर्णा ब्राह्मणादयः आश्रमाः प्रसिद्धाः जातिर्वैश्यविशेषवाचका अपि गर्वहेतुरिति लोकप्रसिद्धः अथवा वर्णा अभिव्यञ्जका शमदमः जातिर्ब्राह्मण्यादिः गुणास्ते अत एव दोषसहकारभाव एव साध्यः ॥ ५१ ॥

व्यवहारे द्रव्याभिमानाभावो द्वितीयः तमाह—

मू० न यस्य स्वः पर इति वित्तेष्वात्मनि वा भिदा ।
सर्वभूतसुहृच्छान्तः स वै भागवतोत्तमः ॥ ५२ ॥

स्वशब्दो धर्मादिवाची तत्र स्व इति वित्तेषु भेदः अनेन व्यवहृतं नान्यैः पर इत्यात्मनि तेन द्वेषादिः तेनाद्वैतरूपमुक्तं भवति, व्यवहारे भार्यादिष्वपि न भेद इत्यर्थः । अनेन दोषाभाव उक्तः गुणमाह—सर्वभूतसुहृच्छान्तश्चेति "दयया सर्वभूतेषु" इति न्यायात् । अन्तःसाधनं तद्विशेषाणाम ब्राह्मणभोजनोपवासवत् ॥ ५२ ॥

ऐहिकविरक्तिरुक्तैनोक्ता पारलौकिकीमाह–तृतीयेन ।

मू० त्रिभुवनविभवहेतवेऽप्यकुण्ठ—
स्मृतिरजितात्मसुरादिभिर्विमृग्यात् ।
न चलति भगवत्पदारविन्दा—
ल्लवनिमिषार्धमपि यः स वैष्णवाग्र्यः ॥ ५३ ॥

अश्वमेधादिकरणे त्रिभुवनविभवो भवति ब्राह्मणबलविचारेण बहुत्व बलिष्ठत्वादश्वमेधादिकरणे प्राप्ते भगवत्स्मरणं कथं युक्तमिति चेत् सत्यम् एतदपि अकुण्ठस्मृतिः स वैष्णवः स्वमार्गस्योत्कृष्टजनकत्वात् वेदो हि स्वार्थं न वदति तल्लङ्घने दोषः स्यात् किन्तु अस्माकं फलार्थं तदस्माभिर्नापेक्ष्यत इति ननु, भ्रान्तिस्तत्रेति चेत् अजित आत्मा येषां भगवद्भक्तास्तद्वशवा ते च ते सुराश्च आदिशब्देनाष्टविधा देवयोनयः परिगृहीताः अथवा अजितात्मान इति ज्ञानिनो भक्ता वा मनुष्याः सदाचाराश्चर्षयः पुरुषार्थपदेः

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

स्वभिध्यायेदिति निराकरणाय पदारविन्दादिति लवनिमिषार्द्धमपीति प्रधानयागकालाभिप्रायं निद्रादौ तु सहजविस्मरणं न बुद्धिपूर्वकं परित्यागः स्मृतिविरोधिनां कार्याणां परित्याग एवाचलनं मार्गान्तरगमनं वा ॥ ५३ ॥

ननु, "तृष्णया भववाहिन्या" इति न्यायेन गुणानां क्षोभकाणां च विद्यमानत्वात् रजः सत्त्वं तमश्चेति वचनाच्च कदाचित्कामसम्भवस्य सर्वजनीनत्वाच्चासम्भावितः पक्षोऽयमिति चेत्तत्राह—

मू० भगवत उरुविक्रमाङ्घ्रिशाखानखमणिचन्द्रिकया निरस्ततापे।
हृदि कथमुपसीदतां पुनः स प्रभवति चन्द्र इवोदितेऽर्कतापः॥५४॥

पुनः कामादयो हृदये नोत्पद्यन्ते अवाङ्मनोगोचरकर्मकर्त्रा निरस्तत्वात् नहि गुणादयोऽन्यत्रालब्धशरणाः येन तस्मिन्नेव हृदये पुनः प्ररोहेयुः चरणस्यैव माहात्म्यं वक्तुं भगवत इत्युक्तम् अतः सत्प्रतिपक्षता नान्यस्य शास्त्रवचनादङ्घ्रेः कल्पवृक्षत्वम् अचिन्त्यो हि मणिप्रभाव इति चन्द्रिकापदेन प्रभाबाहुल्यम् अनेन ब्रह्माण्डभेदनेन गङ्गाप्रवाहवन्निरन्तरमानन्दप्रवाहप्रवर्त्तने तापशङ्कापीति भावः । स तापः अर्कतापो हि दिवसे न रात्रौ तथा भगवद्विमुखे तापः तत्रापि चन्द्रे उदिते उष्मापि निवर्त्तते क ताप इत्यर्थः ॥ ५४ ॥

फलमुखं लक्षणमाह—

मू० विसृजति हृदयं न यस्य साक्षाद्धरिरवशाभिहितोऽप्यघौघनाशः
प्रणयरशनया धृताङ्घ्रिपद्मः स भवति भागवतप्रधान उक्तः॥५५

"आहूत इव मे शीघ्रम्" इति हि फले वक्तव्यम् अन्यथा ह्यनुकल्पस्य प्रत्यवायपरिहार एव स्यात् साक्षादित्यन्तर्यामिव्युदासाय हरिरित्युद्धारकः अग्निरिव भस्मना न छन्नः पापसमूहस्य पूर्वमेव नष्टत्वात् पुष्टिस्थो भगवान् भक्तिमार्गविरोधात्कथं तिष्ठतीत्याह-प्रणयेति । स्नानासाधनभक्त्या संवलिता तया स्थिरीभूतश्चरणः मस्तके रज्जुनिर्मिताधारवत् कमलं तूर्ध्वमुखं तथैव तिष्ठति तदा स सर्वजनीनो नारदवदुक्तो भवेदित्यर्थः । एवं धर्मोपयोगेनानुकल्पोपयोगेन च सफला भक्ता निरूपिता इति ॥ ५५ ॥

इतिश्रीभागवतसुबोधिन्यां श्रीमद्वल्लभदीक्षितविरचितायाम्
एकादशस्कन्धविवरणे
द्वितीयाध्यायविवरणम् ॥ २ ॥

अत्राधिकारहीनानां तृतीयाध्याय ईर्यते ।
अनुकल्पोऽधिकारो वा चतुर्भिः सम्भविष्यति ॥ १ ॥
दुष्टप्रवाह विज्ञानं तरणं हेतुभिः क्रमात् ।
ज्ञानकर्मपरिज्ञाने तृतीयेऽर्थचतुष्टयम् ॥ २ ॥
द्विपदारम्भागसंसिद्धै चतुःपादो निरूपिताः ।
ते स्थिताः शङ्कासम्बद्धाः साद्धपाद्भिः स्थिरीकृताः ॥३॥

एवं सनकाद्यनुकल्पनवयोगेश्वराणां चतूरूपत्वं तत्र प्रथमं चतुर्णां मध्ये मायास्वरूपं पूर्वमेव जिज्ञासितं पृच्छति, मायामोहरहितस्यैव पूर्वोक्ताधिकारात् पृष्ट्वा स्तुतिमध्ये अतः प्रथमं पृच्छति ।

राजोवाच ।

मू० परस्य विष्णोरीशस्य मायिनामपि मोहिनीम् ।
मायां वेदितुमिच्छामो भगवन्तो ब्रुवन्तु नः ॥ १ ॥

प्रकृतेः परस्य जगत्कर्त्तुः विष्णोर्मोक्षदातुः बन्धमोक्षौ निरूप्य मध्ये नियन्तुरीशस्य अतो माया त्रिविधा सर्वभवनसामर्थ्यं माया विद्याजनिका माया लोके व्यामोहिका विषयाणां सर्वव्यामोहकत्वात् इदमस्माकमुत्तमं जिज्ञासितमित्याह न इति ॥ १ ॥

तान् स्तौति कथनार्थम्—

मू० नानु तृप्ये जुषन् युष्मद्वचो हरिकथामृतम् ।
संसारतापनिस्तप्तो मर्त्यस्तत्तापभेषजम् ॥ २ ॥

अनुतृप्तिरलम्भावः महतां वचनमेव सर्वदा श्राव्यं तत्रापि हरिकथा तत्रापि मरणनिवर्त्तकं वचं च संसारतापमरणधर्मैर्व्याप्ताः अन्ये तापा अन्यैरपि गच्छन्ति तेषां पूर्वोक्तानां तु तापानामिदमेव भेषजं मायाकथने स्वयमसंसक्तः—

अन्तरिक्ष उवाच ।

मायाशब्दः शास्त्रेषु लोकेषु च बहुधा प्रयुक्तः सर्वभवनसामर्थ्यं व्यामोहिका च शक्तिः । ऐन्द्रजालिकविद्या च कापट्यादि च तत्तद्रूपनिरूपणार्थं तथा तथा प्रयुक्तः शब्दः समाधावपि एकैव शक्तिरुभयकार्यरूपा उक्ता प्रवाहस्त्वत्र मायाशब्देनोच्यते स च भगवत्कृतो भगवद्रूपश्च विषयैश्च व्यामुग्धा सर्वे भवन्ति अतोऽत्र किं युक्तमिति चेत् उच्यते—

मायाशक्तिर्भगवतो नात्र कार्या विचारणा ।
समाधौ तु तथा भानात् प्रयोगस्तु विचार्यते ॥
विचारे भगवद्वाक्यं लक्षणं कार्यगोचरम् ।
प्रतीतिश्चाप्रतीतिश्च साधिष्ठानस्य तद्विदि ॥
सुवर्णजलवत्कार्ये प्रक्रियेयं पुराणगा ।
तया सह कृतिः क्वापि छादनं चांशतोऽपि वा ।
निःस्वरूपकस्य कार्यस्य तद्धर्माणां सहैव वा ।
सदिव स्फुरणं यस्मात् त्रयं मायेति शब्द्यते ॥
मार्गत्रये हरेः स्फूर्त्तिस्ततोऽन्यन्मायया कृतम् ।
प्रतीतिरपि मिथ्येति केचिद्धर्मविचारकाः ॥
शास्त्रतो निर्णयस्तस्य वस्तुनो मायिकस्य च ।
ज्ञानेऽपि स्फुरणं यस्य तद्रूपं सत्यमुच्यते ॥
केवलाऽलौकिकाऽस्फूर्त्तिस्तावन्मात्रशरीरिणी ।
अस्थिरा मूलराहित्यात्मामायेति निगद्यते ॥
मात्रप्रयोगो यत्रास्ति तत्रैकस्यैव रूपणम् ।
उभयं तु हरेः कार्ये द्वितीये करणं तु सा ॥
द्वितीयमात्रकरणे काशकृत्स्नमतं स्थितम् ।

तदत्राह, सार्द्धचतुर्दशभिः ॥ २ ॥

तत्रैकेन सृष्टिमाह—

मू० एभिर्भूतानि भूतात्मा महाभूतैर्महाभुजः ।
ससर्जोच्चावचान्याद्यः स्वमात्रात्मप्रसिद्धये ॥ ३ ॥

एभिरिति जनत्वापेक्षया प्रतीतैरित्यर्थः । गृहस्थ इव महाभुजः अत्युत्साहेन कार्यकर्ता अत एवोच्चावचानि नैकरूपाणि आद्यः प्रथमत एव जलादिषु प्रविष्टः स्वस्थावस्थासहितस्य मात्राणां भगवतश्चेति अर्थानां प्रसिद्धये अथवा स्वमात्र एव योऽयमात्मा स्वप्नवत् तस्य प्रसिद्धये प्रकर्षेण सिद्धिः सृष्ट्यन्तरापेक्षया ॥ ३ ॥

भोगमाह-

मू० एवं सृष्टानि भूतानि प्रविष्टः पञ्चधातुभिः ।
एकधा दशधात्मानं विभजन् जुषते गुणान् ॥ ४ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

स्वार्थं सृष्टानि भूतानि देहान् महाभूतैः सह प्रविष्टः देवानामिन्द्रियाधिष्ठातृत्वादात्मनस्ताभिन्नत्वात् कर्मेन्द्रियरूपेण विभज्य विषयान् सेवते इत्यर्थः ॥ ४ ॥

अनर्थमाह—

मू० गुणान्गुणान् स भुञ्जान आत्मप्रद्योतितैः प्रभुः ।

मन्यमान इदं सृष्टमात्मानमिह सज्जते ॥ ५ ॥

पूर्वं ज्ञानात्मकः सदा स्वयं प्रभुरपि इन्द्रियैर्विषयान् भुञ्जानो भवति । ननु भोग स्वभावसिद्धे विषयत्वादिह कृत्वाह—आत्मप्र-द्योतितैरिति । पश्चात्तापि तावत् च अज्ञानेन तादृशो भोगोऽपि जात एव प्रभु इदमात्मनिर्दिष्टमात्मानं मन्यमानः स्वस्य गत्यन्तरं विस्मृत्य इह सज्जते ॥ ५ ॥

अस्मात्सङ्गात् सिद्धं तथाविधं कर्मगतिमाह—

मू० कर्माणि कर्मभिः कुर्वन् सनिमित्तानि देहभृत् ॥

तत्तत्कर्मफलं गृह्णन् भ्रमतीह सुखेतरम् ॥ ६ ॥

भोगस्य शास्त्र इव कर्मेन्द्रियैः सनिमित्तानि कर्माणि कृत्वा स्वयं च देहभृत् प्राकृतानां भृत्वा कर्माणि जनितं सञ्जातं फलं गृह्णन् नानाविधकुयोनिष्वनुभवन् भ्रमत्येव भ्रमति ॥ ६ ॥

सुखदुःखाभ्यां च तस्य तृप्तौ हतः सन् तदा दैन्यज्ञानमुपसंहरति—

मू० इत्थं कर्मगतिं गच्छन् बह्वभद्रवहः पुमान् ।

आभूतसम्प्लवात्सर्गप्रलयावश्नुतेऽवशः ॥ ७ ॥

कर्मगतिं तदाः पुनरपि सर्गप्रलयौ आभूतसंप्लवात् सर्वदा बह्वज्ञानात्मका महाप्रलय एव नाभिनत् कर्मगतिः सर्गप्रलयाविदुत्यत्तौ ॥ ७ ॥

तस्यावान्तरप्रलयमाह—धातूपप्लव इत्यादिभिः । तत्रैकेन सामान्यमाह—

मू० धातूपप्लव आसन्ने व्यक्तं द्रव्यगुणात्मकम् ।

अनादिनिधनः कालो ह्यव्यक्तायापकर्षति ॥ ८ ॥

उत्पत्त्यावस्था स्थितावसाने भगवदिच्छया वा द्रव्यगुणात्मकानि लौकिकसिद्धान्तसिद्धाः पदार्था उक्ताः तस्य संस्थानादिप्रत्यावानादिनिधन इत्युक्त तिरोभावार्थं प्रवृत्त इत्यर्थः ॥ ८ ॥

कार्यप्रलयप्रकारमाह चतुर्भिः—

मू० शतवर्षा ह्यनावृष्टिर्भविष्यत्युल्बणा भुवि ।

तत्कालोपचितोष्णार्को लोकांस्त्रीन् प्रतपिष्यति ॥ ९ ॥

अवष्टम्भमात्र उक्तो भवति, समप्रदहनतु तदानीमत्राक्यां ततः पुरुषागतासीति सन्ताप्यापि जगन्नाशकत्वादुल्बणत्युक्तम उप-चितश्चास्यावुष्णश्च ॥ ९ ॥

दाहमाह—

मू० पातालतलमारभ्य सङ्कर्षणमुखानलः ।

दहन्नूर्ध्वशिखो विष्वग्वर्धते वायुनेरितः ॥ १० ॥

पूर्वशतवर्षमध्य एवास्य प्रवेशः ॥ १० ॥

प्लावनमाह—

मू० संवर्तको मेघगणो वर्षति स्म शतं समाः ।

धाराभिर्हस्तिहस्ताभिर्लीयते सलिले विराट् ॥ ११ ॥

स्थावरस्यापि नैमित्तिकरूपाध्यात्मिकरूपा मेघाः विराट् विषयो दग्ध-

गोऽमर्यादाद्भुत ॥ ११ ॥

ततः पुरुषगतमाह—

मू० ततो विराजमुत्सृज्य वैराजः पुरुषो नृप ।

अव्यक्तं विशते सूक्ष्मं निरिन्धन इवानलः ॥ १२ ॥

अधिकारिपुरुषस्वज्ञापनयाऽव्यक्ते लयः अयमेकः प्रकारो नास्त्य मेव ॥ १२ ॥

साङ्ख्येन महाभूतानां लयमाह—

मू० वायुना हृतगन्धा भूः सलिलत्वाय कल्पते ।

व्यावर्तको भावो गन्धः वायुना च तस्य हरणं सिद्धम्

मू० सलिलं तद्धृतरसं ज्योतिष्ट्वायोपकल्पते ॥ १३ ॥

अनुक्ते काल एव सहसंक ॥ १३ ॥

मू० हृतरूपं तु तमसा वायौ ज्योतिः प्रलीयते ।

तमोगुणस्य तामस रूपं मम: आधिदैविकमत्र गृह्यते—

मू० हृतस्पर्शोऽवकाशेन वायुर्नभसि लीयते ॥ १४ ॥

कार्याणामधारो देशकालानवकाशः ह्रदेनाच्यते तत्र देशेन स्पर्शो-नाशः लोकेऽपि देशावकाशेन स्पर्शो भवतीति कालात्मनेत्यत्र तद्गतमात्मनाश्च ॥ १४ ॥

मू० कालात्मना हृतगुणं नभ आत्मनि लीयते ।

कालात्मनावकाशेन कालेन हि शब्दो नश्यति किरूप्य लयमाह-

मू० इन्द्रियाणि मनो बुद्धिः सह वैकारिकैर्नृप ।

प्रविशन्ति ह्यहङ्कारं स्वगुणैरहमात्मनि ॥ १५ ॥

आत्मनि जीवे नायं प्राकृतिको लयः किन्तु केवलमायाकृतः मायानैमित्ते ह्यस्य बहुविधत्वम् अन्यत्रापि कश्चिदेकदेशेनापि शब्दप्रयोगः यथेन्द्रजालिके सन्धिगता हि सा अङ्गेषु स्थिता स्वल्पविषया भवति, अतः कार्ये मुख्यं व्यामोहः पदार्थाश्चानु-भवश्च अयमत्र सम्भवतीति सम्पूर्णा उक्ताः ॥ १५ ॥

उपसंहरति—

मू० एषा माया भगवतः सर्गस्थित्यन्तकारिणी ।

त्रिवर्णा वर्णिताऽस्माभिः किं भूयः श्रोतुमिच्छसि ॥ १६ ॥

स्वरूपतो हि सा शक्तिर्निर्वक्तुमशक्या आकृत्या स्त्रीरूपा भगवतः पुरुषत्वे सौन्दर्यातिशयेन सुरता भवन्तीति मूले न स्वाभाविको दोषः

श्रीरूपत्वाद्रूपं रूपमाकृतिः स्त्रीनिगद्यते ।

स्वभोगाय तथा दैत्यमोहाय च सदा हि सा ॥

प्रभुस्त्वकरोत्था हि भक्तिमार्गे निरूपणाम् ।

श्रुतिनामन्यथा गीतिं दुर्गामिहागतापि ॥

वाजसंस्कारकृपया नात्योऽन्याश्रयणं मतम् ।

सर्वे मार्गो निर्गच्छन्तु सात्वत्त तथा नहि ।

अंशावत्तेन दोषोऽस्त्य ह्यवस्थायां तु सा रतिः ॥

मर्यादा पुष्टिमार्गेण मुक्तार्थं निन्द्यते परम् ।

अतस्त्याद्रूपयोलक्ष्यः प्रपञ्चश्च कुरुते ॥

सत आह किं भूयः श्रोतुमिच्छसीति ॥ १६ ॥

तत्राह—

राजोवाच ।

मू० यथैतामैश्वरीं मायां दुस्तरामकृतात्मभिः ।

तरन्त्यञ्जः स्थूलधियो महर्ष इदमुच्यताम् ॥ १७ ॥

"नापृष्टः कस्यचिद्ब्रूयात्" इति प्रश्नः "वेलाकूलान्तर्वशित्वात् कृता-त्माभिः" इत्युक्ते स्थूलधिय इति "मामेव ये प्रपद्यन्ते" इत्यपि निरा-

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

कृतम् अलौकिकतापहारी हि महर्षिः प्रतिपुरुष उपायपरिज्ञाना-देक एव निर्धारितमेकमुपायं वक्ति । एकवचनं स्थूलधियो बहि-र्मुखा ज्ञानभक्तिरहिता इत्यर्थः । तत्र स्थूलधियां तरणोपायो वक्तव्यः "मामेव ये प्रपद्यन्ते" इति एवकारेण सर्वेषामनुपायत्वं प्रतीयते स्थूलबुद्धिं स्थापयित्वैवोपायो वक्तव्य इति नाग्रहः किन्तु स्थूलबुद्धीनामपि यथा तरणं सिद्ध्यति तथोपायो वक्तव्यः तत्रो-पायो नारायणपरत्वमेव तद्भक्त्या सा भगवद्धर्मैर्भगवच्छास्त्रे साध-नत्वेन प्रतिपादितैः तेच गुरुसेवया सा च गुरुशरणं गतस्य-तच्छरणागमनमैहिकामुष्मिकफलभोगविरागाभावे न भवति "न तस्य तत्त्वग्रहणाय" इति वचनात् । तत्रैहिकवैराग्यं स्वाभिनभेदेन तत्र लौकिकानि कर्माणि स्त्रियं च परित्यजेत्युक्ते न परित्य-जति ॥ १७ ॥

अनुभवस्य बलिष्ठत्वादनुभवमेवाह—

प्रबुद्ध उवाच ।

मू० कर्माण्यारभमाणानां दुःखहत्यै सुखाय च ।

पश्येत्पाकविपर्यासं मिथुनीचारिणां नृणाम् ॥ १८ ॥

नृणामिति लौकिकानां मिथुनीचारिणामित्याग्रहः प्रथमतः "सुख-मस्यात्मनो रूपम्" इति न्यायेन कर्म आरम्भ एव विपरीतं भवति कर्माणीति बहुवचनात्पुनःपुनरारम्भः कर्मणा दुःखमित्य-नुभवः सुतरां फलाभावे अपेक्षितसुखकालेऽपि पुनःपुनरा-रम्भे गच्छति क्वचिद्विपर्यासेऽपि विपर्यासमेव पश्येत्—

"उपक्रमानुरोधेन स्वयं चापि तथा विधिः ।

स्वस्याबाधकता वाच्या परस्यैव एव हि ।

प्रवाहात्तु पृथक् ज्ञानं प्रतिकर्मव्यवस्थितिः ।

शास्त्रतः सर्वनिर्धारो यस्य तस्यैवमुच्यते ॥

प्रवाहपतिता नात्र विचार्या इति मे मतिः ।

एवं स्त्री तत्सङ्गपरित्याग उक्तः ॥ १८ ॥

धनपरित्यागमाह—

मू० नित्यार्तिदेन वित्तेन दुर्लभेनात्ममृत्युना ।

गृहापत्याप्तपशुभिः का प्रीतिः साधितैश्चलैः ॥ १९ ॥

"तद्धि चिन्तनमारभ्य विनाशावधिदुःखदम् ।

मृत्युस्तु सुलभो लोके दुर्लभं धनमेव हि" ॥

एवमपि मृत्युरूपम् एतादृशेन का प्रीतिः तेन साधितैर्वा ममतापदाश्चत्वारः अन्येषामेष्वेवान्तर्भावात् —

"भूम्यादिवृत्तयः सिद्धाः साधनानां गृहशेषता ।

देहे तु यस्य वैराग्यं स पूर्वत्र निरूपितः ॥ १९ ॥

पारलौकिकवैराग्यमाह—

मू० एवं लोकं परं विद्यान्नश्वरं कर्मनिर्मितम् ।

सतुल्यातिशयध्वंसं यथा मण्डलवर्तिनाम् ॥ २० ॥

"अयथाज्ञानतो जातं वैदिकं कर्मास्तमेव च ॥

पौराणं च ततो जातं फलं गृहवदेव हि ॥

अक्षयतृतीयाश्राद्धादि तथानन्तव्रतादि च ॥

समर्पितं प्रियं विष्णौ ततोऽपि फलितं तथा ॥

अतो नश्वरमित्युक्तं पृथक् भक्तिफलात् क्रमात् ॥

सतुल्यातिशयध्वंसमन्तःकरणदोषतः ॥

ज्ञानभक्तिफलं मोक्षं नाप दोषस्ततो भवेत् ॥

ऐश्वर्यसहितेष्वेवमिति दृष्टान्तसङ्ग्रहः ॥

स्पर्द्धासूयायुतो लोको मण्डलाधिपगोचरः ॥

लोकद्वयफलं यस्मादेवमेवेति निश्चयः ॥ २० ॥

अतो मोक्षफले हेतुमूलभूतस्तमाह हि—

मू० तस्माद्गुरुं प्रपद्येत जिज्ञासुः श्रेय उत्तमम् ॥

शाब्दे परे च निष्णातं ब्रह्मण्युपशमाश्रयम् ॥ २१ ॥

"निरालम्बं यथा लोके स्थानभ्रष्टो निगद्यते ॥

हरेः कृपाविशिष्टोऽपि गुरुहीनस्तथैव हि ॥

यथा भक्तिः स्वतन्त्रोक्ता गुरुसेवापि तादृशी ॥

जिज्ञासाशेषभावत्वं तथापि विनिगद्यते" ॥

यदेव पृच्छति तदेव वदिष्यतीति उत्तम श्रेय इत्युक्तं स गुरुर्मुक्तः लोके ज्ञापकं रूपमुपरमाश्रयमिति सर्वसन्देहवारणाय वैखरीज्ञानदूरत्वप्रवेशाय चोभयनिष्णातत्वम् —

मार्गान्तरस्थितो ह्यत्र बोधको न स्वमार्गगः ॥

प्रपञ्चितं तत्प्रथमं शुको वक्ता न नारदः ॥

सत्यमेव च कृष्णस्य दर्शनार्थी तथापि तु ॥ २१ ॥

सर्वज्ञत्वात्सर्वं वदिष्यतीत्याशयेनाह—

मू० तत्र भागवतान् धर्मान् शिक्षेद्गुर्वात्मदैवतः ।

अमाययानुवृत्त्या यैस्तुष्येदात्मात्मदो हरिः ॥ २२ ॥

गुरोरात्मत्वे स्नेहः श्रद्धा आराध्यत्वेन ज्ञानं च देवतात्वे मन्त्र-शास्त्रेऽप्युक्ता मन्त्रा गुरुमुखव्यतिरेकेण न फलन्तीति तत्र शिक्षा-गुरुसन्तोषोपायमाह, निष्कपटानुवृत्तिभिः भागवतधर्माणामेव शिक्षायां हेतुमाह, तुष्येदिति । स्वसन्तोषाभाव हेतुरेव न सिद्ध्येत् फलदातुरसन्तोषे फलम् अतः स्वपरनिर्वाहका धर्मा इति किञ्च-दुःखाभावोऽप्यानुषङ्गिकः ॥ २२ ॥

तत्र प्रथमं श्लोकत्रयेण प्रवाहान्निवृत्तिः कर्ममार्गप्रवेशः ज्ञान-मार्गप्रवेशश्चोच्यते तदभावे भागवतधर्मानधिकारात् तत्र प्रथमं प्रवाहान्निवृत्तिमाह—

मू० सर्वतो मनसोऽसङ्गमादौ सङ्गं च साधुषु ।

दयां मैत्रीं प्रश्रयं च भूतेष्वद्धा यथोचितम् ॥ २३ ॥

संसक्तेभ्यो मनस आकर्षणं मनसा हि सर्वं भवतीति स्वसिद्धः साधनेषु प्रथमसत्सङ्गः लोकानां परित्यागः पूर्ववच्च न सम्भवति, अविशेषमाह, दीनेषु दया समेषु मैत्री उत्तमेषु प्रश्रयः यथोचितमिति देशकालानुरोधः ॥ २३ ॥

कर्ममार्गप्रवेशमाह—

मू० शौचं तपस्तितिक्षां च मौनं स्वाध्यायमार्जवम् ।

ब्रह्मचर्यमहिंसां च समत्वं द्वन्द्वसंज्ञयोः ॥ २४ ॥

कर्म त्रिविधं कायिकादिभेदेन तत्र त्रयं त्रयमेकैकस्य । शौचं मृदादिभिः तपः कृच्छ्रादिः शीतादिसहनं तितिक्षा इति कायिकम् । वृथालापपरिवर्जनं वेदाभ्यासः सर्वत्र प्रियभाषणं वाच-निकम् । मानसे हि कामजयः क्रोधजयः वैषम्याभावश्चेति निर्देशो हि द्वन्द्वेनैव तयोः संज्ञा निर्दिष्टा यथा सुखदुःखे प्रियाप्रिये इति ॥ २४ ॥

ज्ञानमार्गप्रवेशमाह—

मू० सर्वत्रात्मेश्वरान्वीक्षां कैवल्यमनिकेतताम् ।

विविक्तचीरवसनं सन्तोषो येन केनचित् ॥ २५ ॥

आत्मेश्वरयोरैक्ये सिद्ध तस्य सर्वत्र निरीक्षणं ज्ञानम्—

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

"सङ्गाभावो गृहाभावो वस्त्रभोजनसंयमः ।

चतुष्टयं ज्ञानमार्गे साधनं सर्वदा मतम्" ॥

चौराणामपि विवेको न बाहुल्यं "समासिर्भक्तिमार्गो हि स यत-स्तादृशो मतः" तत्र दोषाभावफलयोराद्यन्तं निरूपणं मध्ये अपरिचितधर्माः परिचयश्च सेवकानुप्रवेशः सेवकतुल्यता तत उत्तमं साधनम् एवं पञ्चार्थाः ॥ २५ ॥

तत्र प्रथमं भक्तिमार्गप्रवेशाय साधनान्याह—

मू० श्रद्धां भागवते शास्त्रेऽनिन्दामन्यत्र चापि हि ।

मनोवाक्कर्मदण्डं च सत्यं शमदमावपि ॥ २६ ॥

प्रथमतः प्रमाणे महती श्रद्धा ततो विरुद्धानामन्यमार्गाणामपि स्मरणं निन्दाद्वारा हि सम्भवति सापि न कर्तव्या—न शुकवोऽनुम-न्तव्याः किन्तु भक्तेव पूर्वं मार्गान्तरे साधनत्वेनोक्ता अपि मौनादयः पुनरत्र नियतसाधनत्वायोऽयन्ते प्रमाणसिद्धत्वेनान्तरं व्यभिचार-परिज्ञानात्कायवाङ्मनसां दण्डः कर्तव्यः मनोहादयः अन्ये वा येनैव दण्डिता इति बुद्धिर्भवति सत्यं भगवन्मार्गे परमं साधनं भगवान्निष्ठा बुद्धिः शमः इन्द्रियनिग्रहो दमः वाङ्मनः-कायानां वा गुणा उच्यन्ते ॥ २६ ॥

प्रथमं साधनान्याह—

मू० श्रवणं कीर्तनं ध्यानं हरेरद्भुतकर्मणः

जन्मकर्मगुणानां च तदर्थेऽखिलचेष्टितम् ॥ २७ ॥

प्रेमसाधनं श्रवणादित्रयमिति पूर्वमुक्तम् अद्भुतकर्मण इति विशेषः शुद्धलीलामाहितः न दशविधलीलामहितः विजातीयानां बहूनां साधनानामनुचितत्वात् अत एव जन्मकर्मगुणानां चेत्युक्तं चकारात्तदङ्गभूतकर्मणः सर्वमोचकाः शिष्टेन्द्रियकार्या-णामप्यनुप्रवेशः सर्वेषामेकमुखत्वाय पूर्वोक्तचतुर्णामर्थे सर्वेन्द्रि-याणां विनियोगं शिक्षेत् ॥ २७ ॥

ततः कियत्कालसेवया परिचिते जातेऽप्यात्मसमर्पणं कर्त-व्यमित्याह—

मू० इष्टं दत्तं तपो जप्तं वृत्तं यच्चात्मनः प्रियम् ।

दारान् सुतान् गृहान् प्राणान् यत्परस्मै निवेदयेत् ॥ २८ ॥

इष्टदानाभयदानपरत्वे स्वात्मव्यतिरिक्तश्रयाणां या धर्मः वृत्तं सदाचारः आत्मनः प्रियं यदाह दारादीनां स्वतुल्यत्वाभि-प्रायेणाह, दारानिति । स्वभोगो वा अन्येषामेवेत्यन्तर्भावः देहस्य पूर्वमेव विनियुक्तत्वात्प्राणा उक्ताः ॥ २८ ॥

एवं विधानपूर्वकमात्मनिवेदनं कृत्वा तादृशैः सह भगवत्परि-चर्या कर्तव्येत्याह—

मू० एवं कृष्णात्मनाथेषु मनुष्येषु च सौहृदम् ।

परिचर्यां चोभयत्र महत्सु नृषु साधुषु ॥ २९ ॥

येषां कृष्णो असाधारणः स्वामित्वाभिमानके कृष्णात्मनाथाः मानुषभावः साधारणो भावः तेषु च सौहार्दं चकारात्पश्वा-दिषु च भगवदीयेषु सर्वत्र परिचर्यां च उभयत्र भगवति भगवदीयेषु च तदीयेषु विशेषमाह, महत्सु नृषु स्त्रीपशु-कनिष्ठा निवारिताः सम्प्रदायरक्षार्थं तत्रापि सदाचारेषु सानु-भावपुरुषत्वे सति सदाचारोऽस्त्वित्यर्थः । चकारात्स्त्रियापि वाहनत्वम् ॥ २९ ॥

फलरूपं साधनमाह—

मू० परस्परानुकथनं पावनं भगवद्यशः ।

मिथो रतिर्मिथस्तुष्टिर्निवृत्तिर्मिथ आत्मनः ॥ ३० ॥

भक्तानां परस्परं सम्वादो यत्र भगवदुक्तमर्थं परस्परमनुव-दन्ति यस्मिन् यशांसि तच्छिक्षेदिति सम्बन्धः । स्नानाद्यासक्ति निवारणाय पावनमित्युक्तं भगवद्यश इति भगवतोऽपि प्रीति-जनकं चरित्रं श्रवणकीर्तने एव परस्परं क्रियमाणे मिथः प्रीतिः तथैव तुष्टिः गाढन्तधर्मावेनौ पूर्वोक्तानुसन्धानेनैव परमा निवृत्तिः अन्तःकरणस्य फलरूपा अपि ये भावाः तान् शिक्षेत् ॥ ३० ॥

सफलस्वरूपसिद्धिरिति तेषामन्तरफलमाह—

मू० स्मरन्तः स्मारयन्तश्च मिथोऽघौघहरं हरिम् ।

भक्त्या सञ्जातया भक्त्या बिभ्रत्युत्पुलकां तनुम् ॥ ३१ ॥

रत्यादिमतामपि अन्यचित्तगमनव्यभिस्मरणं सम्भवति तत आह—स्मरन्त इति । अन्योऽन्यं दृष्ट्वा स्मर एव स्मरणं वचनेन स्मारणम् एकदेशबोधाय श्रवणं विस्मरणे निषेधानां फिङ्कुरस्मात् पाप-सम्पत्तौ प्रायश्चित्तं कृत्वा स्मर्तव्यमित्याह आह, अघौघहरमिति । पापं दूरीकृत्य दुःखं दूरीकरोति विषयत्वेन समागत एव स्मर-णात्पूर्वमेव पापसमूहान् दूरीकरोति अन्यथा स्मरणस्य तत्फलत्वं स्यात् । एवमविच्छिन्नतया श्रवणकीर्तना-दिसम्पत्तौ सर्वतः स्वर्णजलमिव प्रेमभक्तिरुत्पद्यते तथा व्यापिका भक्तिरुद्गच्छति यथा शरीरं पूर्यते ततः शरीरस्य गाढत्वा-दुत्पुलकत्वम् ॥ ३१ ॥

एवं शरीरे पूर्णस्य भक्तिरसस्य भगवत्प्राप्तिपर्यन्तं कृत्यमाह—

मू० क्वचिद्रुदन्त्यच्युतचिन्तया क्वचि—

द्धसन्ति नन्दन्ति वदन्त्यलौकिकाः ॥

नृत्यन्ति गायन्त्यनुशीलयन्त्यजम् ।

भवन्ति तूष्णीं परमेत्य निर्वृताः ॥ ३२ ॥

पूर्णे रसे मत्तावस्थायामिव भेदे विगलिते भगवदन्वेषणेन तमप्राप्यैव क्वचिद्रुदन्ति पुनस्तमन्तिके स्फुरन्तमुपलभ्य वृथैव रुदितमिति हसन्ति स्वाधीनतया स्फुरन्तं मत्वा नन्दन्ति ततः सान्निध्यमसहमाना यत्किञ्चिद्वदन्ति एतावता प्रवाहात् पृथक् भवन्ति ततः कायवाङ्मनःस्वध्यासस्य फल-माह, नृत्यगीतानुशीलनानि दोषाभावाभावार्थमिति एवमध्यासस्य सार्थकत्वमुक्त्वा निर्वृतिमाह—भवन्ति तूष्णीमिति । ततः परमरसं प्राप्य शान्तत्वात्परमसुखिन एव भवन्तीत्यर्थः ॥ ३२ ॥

एवं फलपर्यन्तं भगवद्धर्मानुक्त्वा तच्छिक्षया भगवत्परश्चेत् धर्मैर्धर्मिपरश्चेत् तदा सैव माया भर्तृस्थाने तं नयतीत्याह—

मू० इति भागवतान् धर्मान् शिक्षन् भक्त्या तदुत्थया ।

नारायणपरो मायामञ्जस्तरति दुस्तराम् ॥ ३३ ॥

शिक्षयैव भक्तिर्भवतीति तथा नारायणपरत्वम्—

नारायणः परो यस्य परत्वं कीदृशं मतम् ।

साङ्गान्तराद्युत्कर्षो विषयो ह्येक एव हि ।

प्रकारश्चेद्धर्मपरो विषयः कीदृशः परः ॥

उत्कृष्टबुद्धिः सिद्धैव ततो निष्ठावशिष्यते ॥ ३३ ॥

तद्धर्माणां न निष्ठात्वमतः पृच्छति संशयात् ।

जनक उवाच

नारायणाभिधानस्य ब्रह्मणः परमात्मनः ।

नारायणाभिधानस्य ब्रह्मणः परमात्मनः ।
निष्ठामर्हथ नो वक्तुं यूयं हि ब्रह्मवित्तमाः ॥ ३४ ॥

[illegible] हेतुकथनं ब्रह्मविन्मा इति नामगाथ [illegible] यूयमिति श्रुतिस्मृत्यविरोधेन वक्तुम् [illegible] भावः ॥ ३४ ॥

[illegible] षड्भिः [illegible] अपश्यत् पिप्पलायन उवाच । [illegible] परत्वं वक्तुं तत्र [illegible] सर्वाश्रयत्वात्—

प्रथम स्वरूपमाह—

मू० स्थित्युद्भवप्रलयहेतुरहेतुरस्य
यत्स्वप्नजागरसुषुप्तिषु सद्बहिश्च ।
देहेन्द्रियासुहृदयानि चरन्ति येन
सञ्जीवितानि तदवेहि परं नरेन्द्र ! ॥ ३५ ॥

[illegible] हि [illegible] जगतः [illegible] समानत्वं [illegible] तत्सु [illegible] परत्वं [illegible] भवति [illegible] वैलक्षण्येन [illegible] यथाक्रम च देहादीनां [illegible] ॥ ३५ ॥

[illegible] भवति [illegible] याति, [illegible] ज्ञानं हि सत् तत्र [illegible] आह—

मू० नैतन्मनो विशति वागुत चक्षुरात्मा
प्राणेन्द्रियाणि च यथानलमर्चिषः स्वाः ।
शब्दोऽपि बोधकनिषेधतयात्ममूल-
मर्थोक्तमाह यदृते न निषेधसिद्धिः ॥ ३६ ॥

[illegible] सर्वेषां [illegible] ज्ञानं न सम्भवति [illegible] "मनः पूर्वरूपं वागुत्तररूपम्" [illegible] प्रकाशालौकिकत्वेन न ज्ञानं [illegible] [illegible] लौकिकाः [illegible] प्राणेन्द्रियाणि [illegible] "पराञ्चि खानि" इत्यत्रापि [illegible] विद्यमानस्य [illegible] प्रकाशासा ऽनुपपन्न इति [illegible] लौकिकदृष्टान्तमाह, [illegible] इति [illegible] ज्वाला [illegible] तथा ज्ञानं [illegible] ऽपीति । [illegible] [illegible] च तत्र [illegible] ज्ञानं [illegible] इति [illegible] [illegible] । [illegible] ज्ञानं [illegible] किन्तु [illegible] ब्रह्म [illegible] च [illegible] न [illegible] निषेधति "यतो वाचो निवर्त्तन्ते" इत्यादिना "को अद्धा वेद" इति च "नेह नानास्ति" इति च नहि ब्रह्मणि [illegible] किं [illegible] ज्ञानं [illegible] । यदि [illegible] तदा न [illegible] तथा ज्ञानं तु [illegible] एव निष्- [illegible] [illegible] न बोधकत्वं तथा च शब्दस्य व्यापारोऽपि न बोधकत्वं करणा-

[illegible] आह—[illegible] इति । [illegible] ब्रह्मनिरूपणा कृतो [illegible] "नेति नेति" इति [illegible] [illegible] भवति [illegible] ज्ञानमेव [illegible] [illegible] परः ॥ ३६ ॥

[illegible] परत्वमाह —

मू० सत्त्वं रजस्तम इति त्रिवृदेकमादौ
सूत्रं महानहमिति प्रवदन्ति जीवम् ।
ज्ञानक्रियार्थफलरूपतयोरुशक्ति
ब्रह्मैव भाति सदसच्च तयोः परं यत् ॥ ३७ ॥

[illegible] ब्रह्मणो [illegible] तद्भूतत्वे [illegible] [illegible] ज्ञान [illegible] [illegible] [illegible] ब्रह्मैवेति । [illegible] तयोः [illegible] न [illegible] भावः ॥ ३७ ॥

[illegible] परमात्मत्वमाह [illegible]—तत्र [illegible] किमात्मन एव [illegible] परमात्मा [illegible] तथात्वं स्यादिति प्रथमशोहकदोषं दूरी-करोति—

मू० नात्मा जजान न मरिष्यति नैधतेऽसौ
न क्षीयते सवनविद्व्यभिचारिणां हि ।
सर्वत्र शश्वदनपाय्युपलब्धिमात्रं
प्राणो यथेन्द्रियबलेन विकल्पितं सत् ॥ ३८ ॥

[illegible] जायमानानां भवति [illegible] । तत्र [illegible] ब्रह्मवादे [illegible] जन्ममरणे स्तः न [illegible] धर्मो [illegible] जननं [illegible] इत्यादि [illegible] न चान्तरेऽपीते धर्मो न जीवस्य तत्र हेतुः [illegible] व्यभिचारिणामिति [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] । [illegible] जन्ममरणयोः । [illegible] हेतुत्व, [illegible] पर [illegible] [illegible] दृष्टान्तमाह—[illegible] चतुर्भिः पदैः नहि [illegible] जन्म [illegible] । [illegible] नित्यस्य [illegible] नहि [illegible] नहि [illegible] । [illegible] च [illegible] विद्यमानस्य कथ-[illegible] दृष्टान्तमाह—यथा प्राणो न जायते, तथापि [illegible] दृष्टान्तमाह—[illegible] विकल्पितं [illegible] । सत् [illegible] इन्द्रियबलेन ज्ञानशक्त्या क्रियाशक्त्या वा नाना [illegible] प्रापितमपि न जायते । [illegible] तस्य [illegible] ब्रह्मणो [illegible] विकारा एव जायन्ते न [illegible] इत्यर्थः ॥ ३८ ॥

[illegible] प्रमाणमाह —

अण्डेषु पेशिषु तरुष्वविनिश्चितेषु ।
प्राणो हि जीवमुपधावति तत्र तत्र ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी।

सन्ने यदिन्द्रियगणेऽहमि च प्रसुप्ते।
कूटस्थ आशयमृते तदनुस्मृतिर्नः॥ ३९॥

देहान्तरसम्बन्धो जीवस्यास्तीति सिद्धं तत्र भोक्ता जीवः कर्त्ता प्राणः यदा जीव इन्द्रियाणि गृहीत्वा तत्र गच्छति तदा प्राणो हि जीवमुपधावति। अविनिश्चिताः स्वेदजाः क्षुद्राः ततश्च सङ्घातागमनं द्वयोरुक्तं भवति। तथा च सङ्घातभिन्नस्य न तद्धर्मसम्बन्ध इति भावः। सङ्घाताद्भेदं मनुभवमप्याह। सन्न इति। आधिभौतिकान्निद्रयैव पृथक् कृतः सुषुप्तौ पुनरिन्द्रियाहङ्कारयोरपि लयः तदा स्थानाभावात् कूटस्थो भवत्यात्मा भेद हि ब्रह्मसकाशे गमनम् अन्यथा अयमेव कूटवत् तिष्ठति स तिष्ठतीत्यत्रास्माकमनुस्मरणं प्रमाणं "सुखमहमस्वाप्सम" इति सर्वदोषरहितः कूटस्थ आत्मा सङ्घाते वर्त्तत इति सिद्धम्॥ ३९॥

तस्य परत्वमाह—

मू० यर्ह्यब्जनाभचरणैषणयोरुभक्त्या।
चेतोमलानि विधमेद्गुणकर्मजानि॥
तस्मिन् विशुद्ध उपलभ्यत आत्मतत्त्वम्।
साक्षाद्यथामलदृशोः सवितृप्रकाशः॥ ४०॥

अन्तःकरणे शुद्धात्मानुभवः परमात्मनिष्ठा जगत्कारणविग्रहस्य भक्तिमार्गानुसारेणान्वेषणे यत्नेन भवति तत्पुनः प्रवृद्धमन्तःकरणमलानि दूरीकरोति भक्तेर्बहुफलत्वात् यर्हीत्युक्तं ज्ञानार्थं यतमानस्यैतद्भवति सामर्थ्यविशेषयुक्तस्यात्मविशेषस्य भक्त्या अन्तःकरणैर्मलं बाधयात् प्रतिसिद्धान्तसिद्धं वा तन्मार्गं साधनाभावं सूचयति, यर्हीति। विशुद्धत्वं मार्जनेन तेजःसम्पादने तदर्थं च प्रेमैव स्फुरितं वा प्रतिबिम्बो वेति सन्देह आह-साक्षादिति। तदवच्छेदेन तस्मिन्नाविर्भावे तेनैव ग्रहणम् ननु, जडेन तद्ग्रहणे विषयत्वं स्यात् प्रतिफलितेन ग्रहणेन प्रत्यक्षत्वं स्फुरणमात्रत्वे न पुरुषव्यापार इति चेत्तत्राह-यथेति। चक्षुरप्याध्यात्मिकं रूपं तथा प्रकृतेऽप्यलौकिकमप्राकृतं सवितुरिति स्वत एवोद्गतस्य प्रकाश इति सर्वदा स्फुरणम् अपराधीनता च चैतन्यानुसन्धानमित्यर्थः॥ ४०॥

मार्गत्रयेणाश्रयं श्रुतवतो राज्ञः कर्ममार्गे विशेषेण श्रद्धावतो बहुधा जिज्ञासमानस्य प्रश्नः—

राजोवाच।

मू० कर्मयोगं वदत नः पुरुषो येन संस्कृतः।
विधूयेहाशु कर्माणि नैष्कर्म्यं विन्दते परम्॥ ४१॥

प्रथमपादं एव प्रश्नः तस्य स्वमार्गानुसारेण फलनिर्णयमाह त्रिभिः पादैः। संस्कारकर्मक्षयमोक्षाः ऐहिकामुष्मिकगमनक्रमेण "अग्नि चैव तेन मांसञ्च यजमानः संस्कुरुते निर्वरुणत्वायेति च विराजमभिसम्पद्यते ब्रह्मार्पणम्" इति च तस्य निर्णयो मार्गान्तराविरोधेन ज्ञातव्यः॥ ४१॥

किञ्च, सन्देहान्तरमाह—

मू० एवं प्रश्नमृषीन् पूर्वमपृच्छं पितुरन्तिके।
नाब्रुवन् ब्रह्मणः पुत्रास्तत्र कारणमुच्यताम्॥ ४२॥

पूर्वं कर्मयोगेऽल्पः सन्देहः स्थितः त्यक्तकर्मणो दृष्ट्वा कृतः प्रश्नः परमिक्ष्वाकुसमीपे ततः सन्देहः कर्मयोग एवासमीचीनः तेषामवक्तव्यो वा सदोषे परित्यागभयं वा "न बुद्धिभेदं जनयेत्" इति वा अतस्तत्र कारणमुच्यताम्॥ ४२॥

कर्मनिर्द्धारेऽभिवाक्याभिमतार्थत्वादेकस्यैवोत्तरमाह—

॥ आविर्होत्र उवाच॥

सर्वे यज्ञा यस्मिन् प्रकटा भवन्तीति तथा आदौ कर्मणां त्रैविध्यं प्रमाणं चाह—

मू० कर्माकर्मविकर्मेति वेदवादो न लौकिकः।
वेदस्य चेश्वरात्मत्वात्तत्र मुह्यन्ति सूरयः॥ ४३॥

विषया भिन्ना लौकिका वैदिकाश्च तत्र लौकिकाः प्रत्यक्षादिसमधिगम्याः वैदिकास्तु वेदैकसमधिगम्याः तत्र शब्दमूलानां न प्रत्यक्षादिकबाधकत्वं समानशब्देषु सन्देहः तत्रापि दध्यादिवद्भेद एव। प्रकृते तु कर्माकर्मविकर्मेति विहितं निषिद्धं विहिताकरणरूपं च वेदैकप्रसिद्धोऽयमर्थो न लौकिकः तत्र वेदे परंपरया शब्दार्थनिर्द्धारेऽप्यभिप्रायः सन्दिग्धः नच सन्दिग्धप्रमाणकः यथा तथात्वं दोषः वेदस्तु ईश्वरः स्वात्मानं वदति तत्राभिप्रायसन्देहात् स्वस्वभ्रान्त्या प्रतीतेऽर्थे वेदतात्पर्यवादिनः परस्परमतानुसन्धानेन मुग्धा भवन्ति तस्माद्वेदनिर्द्धारार्थेन कल्पना युक्ता॥ ४३॥

तत्र स्वमतेनाभिप्रायं वर्णयति—

मू० परोक्षवादो वेदोऽयं बालानामनुशासनम्।
कर्ममोक्षाय कर्माणि विधत्ते ह्यगदं यथा॥ ४४॥

अयं कर्मप्रतिपादको वेदः फलांशे परोक्षवादः कर्माभावसाध्या इदति फलभोगदशायां कर्माभावात् अन्यथा फलांशे लौकिकं स्यात् वस्तुतस्त्वलौकिका एव पश्चाद्वोऽप्यत्यवोचाम बालानुशासनपरत्वे तु तुल्यता लौकिकस्येष्टत्वात् मोक्षश्च फलानां मुख्यः "अष्टवर्षं ब्राह्मणमुपनयीत" इति बालानामनुशासनत्वं फलविचारे क्रियमाणेनालौकिकत्वेन समाधानं किन्तु सुखदुःखाभावाभ्यां तथा च ब्रह्मात्मसुखस्य फलत्वे "सर्वेहोपरतिस्तनुः" इति न्यायेन स्वाभाविककर्मणां निवृत्तिरपेक्षिता सा चालौकिककर्मणा अन्यथा वेदस्य वैयर्थ्यापत्तेः। यथा रोगाधिकारे प्रवृत्त आयुर्वेदः तथा संसाराधिकारे वेदः अतो वैदिककर्मणा स्वाभाविककर्माणि निवर्त्तन्त इति सिद्धम्॥ ४४॥

अकरणे बाधकमाह—

मू० नाचरेद्यस्तु वेदोक्तं स्वयमज्ञोऽजितेन्द्रियः।
विकर्मणा ह्यधर्मेण मृत्योर्मृत्युमुपैति सः॥ ४५॥

"ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते" चित्तवृत्तिनिरोधो योगश्च उभयाभावे वेदोक्तकर्माभावे च मृत्वा पुनर्मृत्युमापद्यन्ते "अद्यमानाः स्वकर्मभिः" इति न्यायेनानिष्टफलं स्यात् स्वाभाविककर्मणां कथं वा पारलौकिकानिष्टफलत्वं तत्राह-विकर्मणा ह्यधर्मेणेति। आज्ञोल्लङ्घनमधिकोऽयं दोषः आधिकारिणः सर्वथा अधर्मत्वे हेतुः स्वाभाविककर्मणां तु मृत्युप्राप्त्यनन्तरं जन्म अत्र तु यातना भुक्त्वा पुनर्मरणमिति विशेषः॥ ४५॥

ननु, वेदोक्तकर्मकरणेऽपि न निस्तारः स्वाभाविकानामपि विद्यमानत्वात् औषधापथ्यवत् सङ्गदोषाश्चान्ये तथा करणदोषाः फलवाक्यानि बाधकानि श्रुतिलिङ्गयोर्हि श्रुतिर्बलीयसी समुच्चयो वा फलयोः तथा च बहुबाधकानां विद्यमानत्वाद्व्यर्थः प्रयास इति चेत्तत्राह—

श्रीमद्वल्लभाचार्यकृतसुबोधिनी।

मू० वेदोक्तमेव कुर्वाणो निःसङ्गोऽर्पितमीश्वरे।
नैष्कर्म्यां लभते सिद्धिं रोचनार्था फलश्रुतिः ॥ ४६ ॥

वैदिको भूत्वा कर्मकरणे वैदिकमेव कुर्यात् यजनयाजनादिभिः अकरणकालेषु निस्सङ्गः उपक्रमविरोधाच्च मानसः अर्पितमेव करोतीति न साधनवैगुण्यं वेदाभिप्रेतार्थकरणात्सिद्धिं प्राप्नोति तथाप्यभिप्रेतानां कथमभावस्तत्राह–रोचनार्थं रुच्युत्पादनार्थं बहूनि फलानि वेदे बोधितानि नतु तत्र तात्पर्यं कर्तुः फलाभिसन्धानाभावेन भविष्यतीति भावः ॥ ४६ ॥

एवं वैदिककर्मयोगनिर्द्धारमुक्त्वा सुगमसर्वजनीनतां त्रिककर्मनिर्द्धारमाह—

मू० य आशु हृदयग्रन्थिं निर्जिहीर्षुः परात्मनः।
विधिनोपचरेद्देवं तन्त्रोक्तेन च केशवम् ॥ ४७ ॥

लौकिकस्यानर्थस्य लौकिकैरेव निवृत्तिर्युक्तेति साङ्ख्यादयः सिद्धान्ताः प्रवृत्ताः तत्रापि शीघ्रहृदयग्रन्थिविभेदकः प्रकारो वैष्णवः परात्मनो विधिना न विभूत्यादिभजनप्रकारेण केवलपुष्टिमार्गेणेत्यर्थः। तत्राशक्तौ तन्त्रोक्तप्रकारेणापि कृष्णमेव भजेत् अथवा समुच्चयो मर्यादया उभयथापि पुष्टिमार्गस्थितत्वात्केशवमेव भजेत् ॥ ४७ ॥

मार्गान्तरविरोधाभावं वदन् भजनप्रकारमाह—

मू० लब्धानुग्रह आचार्यात्तेन सन्दर्शितागमः।
महापुरुषमभ्यर्चेन्मूर्त्याभिमतयात्मनः ॥ ४८ ॥

दीक्षायामन्याधिकारो निवर्तते अनुग्रहस्य प्राप्तत्वाच्च देवताविरोधः उपनयनादिकर्त्ता आचार्यः तदनुग्रहाच्च वेदविरोधः अन्येनाविरुद्धेनान्यस्य विकर्मत्वं स्वयं करणे हि सर्वत्र दोषः आचार्याभगवन्मार्गस्था वा उद्देश्ये फले न कर्मणामुपयोगः कर्तृसंस्कारस्त्वन्यथापि भविष्यति आश्वितिवचनाच्च परलोकबाधकत्वम् अहङ्कारग्रन्थिनिवृत्तौ मुक्तिरिति सर्वमतसाधारणं फलम् आचार्येणाप्यागम एवं पञ्चरात्रादिः प्रदर्श्यते महापुरुषः श्रीकृष्णः अभिमतया मूर्त्या प्रकारसहस्रमध्ये नवनीतचौर्यादिरूपेषु स्वभावो नियामकः ॥ ४८ ॥

पूर्वोक्तदोषाभावाय कर्तृशुद्धिमाह—

मू० शुचिः सम्मुख आसीनः प्राणसंयमनादिभिः।
पिण्डं विशोध्य सन्न्यासः कृतरक्षोऽर्चयेद्धरिम् ॥ ४९ ॥

शौचं स्मार्त्तं संमुखे आसीनः प्रतिमायाः आदिशब्देन भूतशुद्धिप्रकारा उक्ताः। न्यासेन देवतावाहनं रक्षायां बाधकानिवृत्तिः हरिं न प्रतिमाम् ॥ ४९ ॥

अत एवाधिकरणस्याव्यवस्थां वदन्मध्ये व्युत्थानाभावायाह—

मू० अर्चादौ हृदये चापि यथा लब्धोपचारकैः।
द्रव्यक्षित्यात्मलिङ्गानि निष्पाद्य प्रोक्ष्य चासनम् ॥५०॥

स्पष्टम् ॥ ५० ॥

अन्तरङ्गप्रकारमाह—

मू० पाद्यादीन्युपकल्प्याथ सन्निधाप्य समाहितः।
हृदयादिकृतन्यासो मूलमन्त्रेण चार्चयेत् ॥ ५१ ॥
पाद्यार्घ्याचमनीयाद्यैः स्नानवासोविभूषणैः।
साङ्गां पाङ्गां स पार्षदां तां तां मूर्तिं स्वमन्त्रतः ॥ ५२ ॥

आदिशब्देनार्घ्याचमनीयादि अथ भिन्नप्रक्रमेण विधानेन प्रवृत्तः सन्निधापनादिमुद्रया देवतासन्निधानं कृत्वा ततः सावधानः ततो हृदयादिकृतन्यासः स्वस्मिन् ध्यानेन मूलमन्त्रेण चार्चयेत् अङ्गानि चरणादीनि उपाङ्गानि चक्रादीनि पार्षदा सुनन्दादयः एवं साङ्गोपाङ्गां सपार्षदां हृदये पूजयेदिति पूर्वेण सम्बन्धः तामिमामुत्तरत्र पूर्वोत्तरपादद्वयमर्द्धमाह, साङ्गोपाङ्गां सपार्षदां तां मूर्तिं स्वमन्त्रतः तां पूर्वोक्तप्रकारेण हृदयपूजितां मूर्तिरूपां बाह्यां कृत्वा। नमेदिति सम्बन्धः कथमेवमत आह–स्वमन्त्रतः आन्तरस्य बाह्यत्वं मन्त्रवशाद्भवति मन्त्रतस्तां मूर्त्तिमित्युद्देश्यविधेयभावः ॥ ५१ ॥ ५२ ॥

पूजाक्रममाह—सार्द्धेन—

मू० गन्धमाल्याक्षतस्रग्भिर्धूपदीपोपहारकैः ॥
साङ्गं सम्पूज्य विधिवत्स्तवैः स्तुत्वा नमेद्धरिम् ॥५३ ॥

आदिशब्देन मधुपर्काभ्यङ्गाद्यैः अक्षता मालाः कुङ्कुमाक्षता वा नमनं क्रियासमाप्तिसूचकं स्तोत्रनमनेन पूजायां प्रविशत इति कथाप्रयोगः अयं भिन्नमिति मा भूदनेवम्विधेन तस्य पूजा न कर्तव्येति ॥ ५३ ॥

कर्तृनियममाह—

मू० आत्मानं तन्मयं ध्यायन् मूर्तिं सम्पूजयेद्धरेः।
शेषमाधाय शिरसि स्वधाम्न्युद्वास्य सत्कृतम् ॥५४॥

स्वस्वरूपं भगवद्रूपं भावयन् भगवता व्याप्तं वा भूतौ भगवदपगमोऽस्ति नतु स्वस्मिन्निति ज्ञापयितुं निर्माल्यं शिरस्याधाय हृदये उद्वास्य तत्र पुनः सत्कृतमात्मानं तन्मयं ध्यायन्निति सम्बन्धः। आत्मनि सर्वदा मन्त्रसम्बन्धान्नियतत्वम् ॥ ५४ ॥

एवं स्थलान्तरेऽपि पूजां वदन् फलमाह—

मू० एवमग्न्यर्कतोयादावतिथौ हृदये च यः।
यजतीश्वरमात्मानमचिरान्मुच्यते हि सः ॥ ५५ ॥

आदिशब्देन ब्राह्मणादिः हृदये चेति द्विरूपता भगवतो द्विरूपत्वं प्रतिपादयति सामर्थ्यमावश्यकत्वं च। यजन्नित्यन्तपर्यन्तं सन्ततिरुक्ता हीति प्रमाणानुसन्धानं सकृदिष्टापाद्यादि। अन्ते स्वरूपस्थित्यर्थं स इति ॥ ५५ ॥

इति श्रीभागवतसुबोधिन्यां श्रीमद्वल्लभदीक्षितविरचितायाम्
एकादशस्कन्धविवरणे तृतीयाध्यायविवरणम् ॥ ३ ॥

चतुर्थोऽध्यायः ।

---:*---

॥ राजोवाच ॥

यानि यानीह कर्माणि यैर्यैः स्वच्छन्दजन्मभिः ।
चक्रे करोति कर्ता वा हरिस्तानि ब्रुवन्तु नः ॥ १ ॥

॥ द्रुमिल उवाच ॥

यो वा अनन्तस्य गुणाननन्ताननुक्रमिष्यन् स तु बालबुद्धिः ।
रजांसि भूमेर्गणयेत्कथञ्चित्कालेन नैवाखिलशक्तिधाम्नः ॥ २ ॥
भूतैर्यदा पञ्चभिरात्मसृष्टैः पुरं विराजं विरचय्य तस्मिन् ।
स्वांशेन विष्टः पुरुषाभिधानमवाप नारायण आदिदेवः ॥ ३ ॥
यत्काय एष भुवनत्रयसन्निवेशो यस्येन्द्रियैस्तनुभृतामुभयेन्द्रियाणि ।
ज्ञानं स्वतः श्वसनतो बलमोज ईहा सत्त्वादिभिः स्थितिलयोद्भव आदिकर्ता ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

चतुर्थे त्ववतारेहाप्रश्नस्योत्तरमुक्तवान् ।
अयन्तीनन्दनो नाम्ना द्रुमिलो नवसत्तमः ।

मूर्त्याभिमतयाऽऽत्मन इत्यनेनाऽऽत्मनः प्रियमवतारं पूजयेदित्युक्तेऽवतारज्ञानमपेक्षितं तथा स्तवैः स्तुत्वा नमेद्धरिमित्युक्ते गुणकर्मज्ञानं चापेक्षितमतः पृच्छति—यानि यानीति । कर्ता करिष्यति ॥ १ ॥

त्वया पृष्टानि कालत्रयसम्बन्धिसकलावतारगुणकर्माणि कथयितुमशक्यानि संक्षेपतस्तु कानिचित्कथयिष्यामीत्याह—यो वा इत्यादिना । अनुक्रमिष्यन्गणयितुमिच्छति यः स तु बालानामिव बुद्धिर्यस्य स मन्दमतिः बालेन बाला वा अदीर्घदर्शिनी बुद्धिर्यस्य क्षुद्रबुद्धिः कालेन महता कोऽपि महामतिः रजांसि गणयेदप्यखिलशक्तिधाम्नः सर्वशक्त्याश्रयस्य भगवतो गुणांस्तु नैव गणयेत् तथा च श्रुतिः "विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसि" इत्यादि ॥ २ ॥

तत्राऽऽदौ पुरुषावतारमाह—भूतैरिति । यदा स्वसृष्टैर्भूतैर्विराजं ब्रह्माण्डं पुरं निर्माय तस्मिन् लीलया प्रविष्टो न तु भोक्तृत्वेन प्रभूतपुण्यस्य जीवस्य तत्र भोक्तृत्वात् ॥ ३ ॥

अस्य गुणकर्माण्याह द्वयेन—यत्काय इति । यस्याधिष्ठेयः काय एषः काये इति सप्तमी वा तनुभृतां समष्टिव्यष्टिजीवानां ज्ञानकर्मेन्द्रियाणि यस्य स्वतः स्वरूपभूतात्सत्त्वात्तनुभृतां ज्ञानम् यस्य स्वतः सिद्धं ज्ञानमिति वा यस्य श्वसनतः प्राणाद्बलं देहशक्तिः ओज इन्द्रियशक्तिः ईहा क्रिया यश्च सत्त्वादिभिर्विश्वस्य स्थितिलयोद्भवे आदिकर्ता ॥ ४ ॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

अवतारेहाप्रश्नस्य । अवतारलीलाप्रश्नस्य नवसु मध्ये सप्तमः अतः अवतारगुणकर्मज्ञानानां पूजनेऽपेक्षितत्वात् तानि त्रिकालसम्बन्धीनि जन्मकर्मादीनि ॥ १ ॥

द्रुमिल इति द्रुद्रुतमवतारैः स्फूर्तैः प्राप्तैः सह मिलतीति निरुक्तपुरस्कारेण तस्यैव सर्वावतारगुणकर्मादियाथार्थ्यविज्ञानात् स एवोवाचेति क्वचं कोऽपि महामतिरिति कर्तुरोचेपाल्लाभः गणयेदपीति तद्गणनं सम्भवतीत्यर्थः तथाच विष्णोर्गुणानामगण्यत्वे प्रमाणं श्रुतिः यः कविः पार्थिवान्यपि रजांसि विममे गणितवान् सोऽपि विष्णोर्वीर्याणि कं कः प्रावोचं प्रावोचदित्यर्थः ॥ २ ॥

तत्र तेष्ववतारेषु मध्ये तस्मिन् ब्रह्माण्डे स्वांशेन अन्तर्यामिरूपेण लीलया नियमनरूपया प्रविष्टः न तु भोक्तृत्वेन अनश्नन्नन्योऽभिचाकशीति इति श्रुतिविरोधात् "स्वधर्मनिष्ठः शतजन्मभिः पुमान् विरिञ्चतामेती"त्युक्तेः प्रभूतं प्रचुरं पुण्यं यस्य तस्य हिरण्यगर्भाख्यसमष्ट्यभिमानिनो जीवस्य तत्र ब्रह्माण्डे भोक्तृत्वात् भोक्तृत्वाधिकारात् यदा स्वांशेन विष्टस्तदा पुरुषाभिधानं पुरुषसञ्ज्ञामवापेति यत्तदोः सम्बन्धः ॥ ३ ॥

अस्य पुरुषावतारस्य गर्भोदशायिनः यस्य ब्रह्माण्डप्रविष्टस्य "द्वितीयं त्वण्डसंस्थित"मित्युक्तेः अधिष्ठेयो नियम्यः सप्तमपि त्वं तु नवीनोपासकानां चित्तस्थैर्यार्थं यस्य काये एष भुवन-

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी ।

त्रयसन्निवेशः"पातालमेतस्य हि पादमूल"मित्यादिशास्त्रेण कल्पितः यद्वा काय इति सप्तमी तृतीयार्थे यस्य कायेनैव भुवनत्रयसन्निवेशो भवति "भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकोऽस्य नाभित" इत्यादेः ज्ञानकर्मेन्द्रियाणि यस्येन्द्रियैर्भवन्ति "वाचां वह्निर्मुखं क्षेत्र"मित्यादेः स्वत इत्यस्य व्याख्या स्वरूपभूतसत्त्वादिति यस्य स्वरूपभूतविशुद्धसत्त्वादेव तनुभृतां ज्ञानं भवति, पूर्वार्थे विशेष्यस्य सत्त्वस्याध्याहार उत्तरार्धे तु यस्य स्वतः सिद्धं ज्ञानमिति सर्वज्ञत्वमुक्तम् ॥ ४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

॥ १—३ ॥

उभयेन्द्रियाणि यस्येन्द्रियैः इन्द्रियशब्दो गौणः इन्द्रियवत्परिकरभूतं शेषभूतमित्यर्थः । वलं धारणसामर्थ्यम् ओजः प्रवृत्तिसामर्थ्यम् ईहा चेष्टा ॥ ४—६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सूर्यभिमतयात्मन इत्यनेनात्मनः प्रियतमावतारं मत्पूजयोर्दिवुक्तेऽवतारज्ञानमपेक्षितं तथा स्तवैः स्तुत्वा नमेद्धरिम् इत्युक्ते गुणकर्मज्ञानं चापेक्षितं तत्र पृच्छति"यानि यानीति"द्वयैः स्वच्छन्दजन्मभिः स्वेच्छावतारैरिह लोके कर्ता करिष्यति स्वच्छन्देत्यनेनावताराणामकर्ममूलत्वमुक्तं तानि कालत्रयगोचरावतारसम्बन्धीनि चेष्टितानि नोऽस्मभ्यं भवन्तो ब्रुवन्तु विस्तराद्वर्णयन्तु ॥ १ ॥

यानि यानि ब्रुवन्त्विति प्रश्नस्य साकल्यविषयतामालक्ष्यानन्त्यान्न तानि साकल्येन कथयितुं शक्यानि संक्षेपतः कानिचित्कथयिष्यामीत्याह-दुर्मिलः । य इति । अनन्तस्यापरिच्छिन्नस्वरूपस्वभावस्य भगवतो गुणान्योऽनुक्रमिष्यन्नुगणयितुमिच्छति स तु बालानामिव बुद्धिर्यस्य सः मन्दमतिरित्यर्थः तत्र हेतुत्वेन तान्विशिनष्टि-अनन्तानीति । एतदेवोपपादयति । रजांसीति । कालेन महता कथञ्चित्केन चिद्यत्नेन भूमेरजांसि रेणून् गणयेत्सम्भावनायां लिङ् अखिलशक्तिधाम्नः विविधविचित्रशक्त्याश्रयस्य भगवतो गुणांस्तु नैव गणयेदानन्त्यादिति भावः अत्र"विष्णोर्नुकं वीर्याणि प्रावोचं यः पार्थिवानि विममे रजांसि"इति श्रुत्यर्थोऽभिसंहितः ॥ २ ॥

तावद्ब्रह्माण्डशरीरकवैराजपुरुषावतारमाह-भूतैरिति । आत्मना स्वेन सृष्टैर्भूतैः पृथिव्यादिभिः भूतग्रहणं चतुर्विंशतितत्त्वानामुपलक्षणं यदा विराजं ब्रह्माण्डरूपं पुरं विरचय्य तस्मिन्पुरे स्वांशेन विष्टः धारकतयानुप्रविष्टः तदा आदिदेवो नारायणः पुरुषाभिधानं पुरुषाख्यामवाप अयं वैराजः पुरुषः स्वावताराणामाद्योऽवतार इत्यर्थः ॥ ३ ॥

अस्य गुणकर्माण्याह द्वाभ्याम् । यदिति । यस्य वैराजपुरुषस्य कायः ब्रह्माण्डात्मको देहः भुवनत्रयस्य सन्निवेशो यस्मिंस्तथाभूतः यस्येन्द्रियैः कारणभूतैस्तनुभृतां व्यष्टिसमष्टिजीवानामुभयेन्द्रियाणि ज्ञानकर्मोभयेन्द्रियाणि बभूवुः इन्द्रियसम्बन्धोक्त्या तज्ज्ञानस्येन्द्रियसापेक्षत्वशङ्कां निरस्यति । ज्ञानं स्वत इति । यस्येत्यनुषज्यते स्वयमेव स्वात् स्वामस्यानीयाद्वायोस्तनुभृतां बलं धारणसामर्थ्यमोजः प्रवृत्तिसामर्थ्यम् । ईहा चेष्टा च भवति स एव सत्त्वादिभिः सत्त्वरजस्तमोभिः प्राकृतगुणैः स्वकृतैः स्थितिलयोद्भवे समाहारद्वन्द्वात्सप्तमी विश्वस्थित्यादिनिमित्त इत्यर्थः । आदिकर्त्ता आदिश्चासौ कर्त्ता च उपादानं निमित्तकारणं चेत्यर्थः ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

स्वच्छन्दजन्मभिः स्वेच्छावतारैः कर्ता करिष्यति ॥ १ ॥

द्रुमिलः भगवद्गुणकर्मणामनन्तत्वात्प्रश्नो दुष्परिहर इति भावेनाह—यो वा इति ॥ २ ॥

नन्वेवञ्चेल्लोके प्रश्नप्रतिवचने गुरुशिष्यभावौ च न स्त इति दोषपरिहाराय यथाशक्तिप्रवक्ष्यामीत्यभिसन्धायाह-भूतैरिति । भूतैरित्युपलक्षणं महदहङ्कारौ पञ्च भूतानि च यदा ससर्ज तदा पुरुषाभिधानमवाप यदा च महदादिचतुर्विंशतितत्त्वैः विराजं ब्रह्माण्डाख्यं पुरं विरचय्य स्वांशेन तस्मिन् प्रविष्टः तदा पुरुषाभिधानमवाप । यदा चात्मसृष्टैः पृथिव्यादिपञ्चभूतैः ब्रह्माण्डान्तःपुरं जातावेकवचनं पुराणि शरीराणि विरचय्य स्वांशेन पुरुषरूपेण तस्मिन् विष्टः तदा पुरुषाभिधानमवाप—

> "विष्णोस्तु पुरुषाख्यानि त्रीणि रूपाण्यथो विदुः—
> प्रथमं महतः स्रष्टृ द्वितीयं त्वण्डसंस्थितम् ।
> तृतीयं देहिनां देहे तानि ज्ञात्वा विमुच्यते" ॥

इति पुरुषरूपविष्णुज्ञानस्य मुक्तिहेतुत्वोक्तेः साक्षात्सच्चिदानन्दानि पुरुषरूपाणि विष्णोरभिन्नानीति ज्ञातव्यं नरः पुरुषः तेन सृष्टं नारन्तस्याश्रयो नारायणः नरसृष्टत्वान्नारं ब्रह्माण्डं तदाश्रयोऽपि नरस्य विद्यमानं नारं शरीरं तदाश्रयोऽपि संसरिव्यावृत्त्यर्थम् आदिदेव इति ॥ ३ ॥

एतदेव विशिनष्टि-यत्काय इति । भुवनत्रयसन्निवेशो यस्य काये शरीरे भगवच्छरीराधारत्वेन सन्नत इत्यर्थः । तनुभृतामुभयेन्द्रियाणि ज्ञानकर्मोत्पादकानीन्द्रियाणि यस्य इन्द्रियैः प्रेरितानि प्रवर्तन्ते अनेन शरीरान्तर्यामित्वमुक्तं कथं प्रेरकत्वमित्यत उक्तं ज्ञानांशकेनेति ज्ञानस्वरूपेणान्तःशरीरं विशतः न केवलं श्रवणादीनि बाह्येन्द्रियप्रेरितानि अपितु बलादीन्यपीत्याह-बलमिति । सत्त्वादिभिर्गुणैः स्थितिश्च लयश्च उद्भवश्च यस्मात्स तथा अत आदिकर्तेत्युच्यते ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

पूर्वं शृण्वन् सुभद्राणि रथाङ्गपाणेरित्युक्तं तदनुसारेण सूर्यभिमतयात्मन इति स्तवैः स्तुत्वेति च ज्ञातुं शक्यते ततस्तदर्थमाह-यानि यानीति ॥ १—२ ॥

तत्र सामान्यतः पुरुषावतारमाह-भूतैरिति । आदिदेवो नारायणः श्रीभगवान्"नारायणे तुरीयाख्ये भगवच्छब्दशब्दित"इत्यादेः

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

यदा महत्स्रष्टृत्वेन पुरुषाभिधानमवाप तदा भूतैर्विराजं विरचय्य तस्मिन् स्वांशेन प्रविष्टोऽपि पुरुषाभिधामवापेत्यर्थः ॥ ३ ॥

तत्र द्वितीयं पुरुषं विवृणोति—यत्काय इति । यच्छब्देन ब्रह्माण्डप्रविष्टमुच्यते "विष्णोस्तु त्रीणि रूपाणी"त्यादेः ॥ ४ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

> माया तत्तरणज्ञानकर्मनिर्णयबोधनैः
> शुद्धचित्तः शुद्धवीर्या हरेः पृच्छति मुक्तये ॥
> तृतीयेऽयं समाख्याता कथाहरिकथा सदा
> श्रोतव्येति यतश्चित्तं सर्वथा तत्परं भवेत् ॥

कालभेदेन करणभेदेन स्वरूपवैजात्येन यानि भिन्नानि तानि कथयेत्यर्थः । तत्तत्काले कृतानि तत्तत्कालकृतदोषनिवर्तकानि भवन्ति तत्तज्जन्मकृतानि तादृशजन्मवतां निवर्तकानि कर्माणि च सजातीयकर्मकृतदोषनिवर्तकानीति भेदप्रश्नादवगम्यते स्वच्छन्देति कर्मनिर्बन्धनिराकरणं भक्तेच्छा वा ॥ १ ॥

अलौकिकतया उत्तरं वदन् सर्वकथनमशक्यमित्याह—एतेन कालविलम्बाभावदर्थन्ये वदन्तीति भ्रमं वारयति-अन्तो नाशः परिच्छेदो वा अनन्तो देशकालापरिच्छिन्नः अपरिमितब्रह्माण्डेष्वपरिमितब्रह्मकल्पेषु च एकस्मिन् ग्रामे एकस्मिन् दिवसे एकमपि कर्म गणयेत् तदा जन्मनां कोटिः समाप्येत किं च गुणास्तु ज्ञानशक्तिभेदप्रकाशकाः यथा वेदादिविद्याः शिल्पादिविद्याश्च तत्रैकयाऽपि विद्यया यद्येकं कार्यं कुर्यात् तथाप्यानन्त्यं तिष्ठतु कर्मणां वार्ता कारणभूतगुणानामपि गणना अशक्या अनन्तशब्दः सङ्ख्यापरिच्छेदमपि वारयति, गुणानां कर्मत्वेन गुणा एव गणनीया ननु लोपयुक्तत्वेन अतो व्यावातानुसन्धानादूबालबुद्धिः बुद्धिग्राह्यसङ्ख्यात्वं बहूनामन्तता तदभावोऽनन्तत्वम् अत एतावत्त्वाभावात् ज्ञानमेव नास्ति वचनं दूरापास्तं नन्वशक्त्या तथात्वं भविष्यतीत्यत आह, रजांसीति । सूक्ष्मादृश्या एव कणा रजःशब्देनोच्यन्ते ते परमाणुभ्य ते न भवन्तीति प्रसिद्धिः तत्कोटिगुणानां ततः पञ्चाशत्कोटिरूपाणां परं पुरुषमात्रा भवन्ति । एवं कथञ्चिद् गणयेत् मन्ववताराः परिगणिता एव गुणाश्चेति कथमेवमत आह, सर्वसत्त्वान्तर्यामिणः तृतीयं सर्वभूतस्थमिति एकस्तृतीयः पुरुषावतारः तत्र प्रतिजीवप्रेरणायामानन्त्यं गुणानाम् अवताराश्चानन्ता इत्यर्थः ॥ २ ॥

तथापि त्रिकालानुगतानवतारान् वक्तुं प्रथमं सर्वावताराणां बीजं पुरुषावतारमाह—यदा स्वांशेन विष्टः तदा पुरुषाभिधानमवापेति सम्बन्धः । स्वांशः आनन्दांशः श्रुतिकारणवादानुसारेण पञ्चमहाभूतानि भगवतैव सृज्यन्ते "एतस्माज्जायते प्राण" इत्यादिना वाक्यात्सर्वपक्षन्यायेन न साङ्ख्याद्यनुसारेण स्वांशेन विष्टत्वे हेतुः अत एव विराजः पुरत्वेन निर्माणमादिमत्कल्पे सर्वमात्मार्थमिति गम्यते "परः पुरुष आविशत्" इति श्रुतेः । पुरप्रवेशात्पुरुषत्वम् उषधातुः प्रवेशार्थ इति पुरा अव्यादासधातोः पूःशब्दात् विशधातोः वर्णव्यत्यासस्सम्प्रसारणयत्वैरिदं रूपमिति वेदविदः असाधारणस्वरूपेषा मर्यादाभक्तिमार्गे नारायणो मूलभूतः स न जन्मवाद्येन किन्त्वादिदेवः आदिकारणभूतोऽपि देव-

मार्गप्रवर्तकः ॥ ३ ॥

अभिधानमवापेति वदन् कदाचिदेव पुरुषस्यावतारत्वमिति सूचयति, अस्य चरित्रमाह मुख्यपालनशक्तिरेषा शरीरेन्द्रियान्तःकरणैः सर्वपरिपालनं करोति सर्वावतारबीजञ्च भुवनत्रयस्य सम्यक् निवेशो यस्मिन् काये लोकत्रयमपि पुत्रमिवाङ्के स्थापयतीत्यर्थः । किञ्च, यस्येन्द्रियैः अस्मदिन्द्रियदेवताविषयैः तनुभृतां ज्ञानक्रियामयानीन्द्रियाणि आधिदैविकस्यैवोपाध्यनुप्रविष्टस्याध्यात्मिकत्वम् इति गोलकाविनियोगः इन्द्रियाणान्तु विषयत्वं हस्तेन दुग्धमिव पाययतीत्यर्थः । अन्तःकरणे विशेषमाह, ज्ञानं स्वतः इन्द्रियत्वे तु पूर्वोक्त एव विनियोगः स्वानुभवहेतुत्वे स्वस्य स्वत एव नित्यसिद्धं ज्ञानं ज्ञानरूपस्यात्मनो ग्रहणात्मकावन्तःकरणप्रतिबिम्बितस्य ग्रहणं भवति, तदत्र नास्ति स्वतः सिद्धज्ञानेन सर्वान् भावयतीत्यर्थः । प्राणकार्यमाह—श्वसनतः शरीरेन्द्रियशक्ती साधारणं च कार्यम् प्राणस्यैव चेष्टा क्षुत्पिपासे च चेष्टया परिगृह्येते अवान्तरोत्पत्तिस्थितिप्रलयानाह, सत्त्वादिभिरिति । तावन्मात्रत्वं निराकरोति आदिकर्तेति ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

> चतुर्थे द्रविडः प्राक्षदवतारान् हरेर्गुणान् ।
> लीलाश्च तेषु विस्तार्यं नारायणमवर्णयत् ॥

"मूर्त्याभिमतयात्मन इति श्रुतेर्भगवतः कियत्यो मूर्त्तय इत्यवतारजिज्ञासा तथा "स्तवैः स्तुत्वा नमेश्वरिम" इति श्रुतेः । तस्य कियन्ति गुणचरितानि स्तव्यानीति चरितेऽपि जिज्ञासेयमतः पृच्छति–यानीति । कर्त्ता करिष्यति ॥ १ ॥

तद्यावतारगुणकर्मणां सङ्ख्यातीतत्वात् यथा शक्त्येव कथयिष्यामीत्याह–य इति । अनुक्रमिष्यन् क्रमेण गणयितुमिच्छतीत्यर्थः ॥ २ ॥

तत्रादौ पुरुषावतारमाह–भूतैरिति द्वाभ्याम् । आदिदेवो नारायणः श्रीभगवान् यदा महत्स्रष्टृत्वेन पुरुषाभिधानमवाप तदा भूतैर्विराजं विरचय्य तस्मिन् स्वांशेनान्तर्यामितया प्रविष्टोऽभूत् ॥ ३ ॥

अस्य गुणकर्माण्याह—यस्य महाविष्णोः काये भुवनत्रयाणामुपलक्षणमस्य भुवनस्थानां कोटिकोटिब्रह्माण्डानां प्रतिरोमकूपगतत्वेन सन्निवेशो भवति । तनुभृतां समष्टिव्यष्टिजीवानां ज्ञानकर्मेन्द्रियाणि यस्य स्वतः स्वांशभूतादन्तर्यामित एव तनुभृतां ज्ञानं यस्य श्वसनतः प्राणात् तनुभृतां बलं देहशक्तिः ओज इन्द्रियशक्तिः ईहा क्रिया यश्च सत्त्वादिभिः स्थितिलयोद्भवे कर्मण्यादिकर्त्ता ॥ ४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

पूर्वाध्याये "महापुरुषमभ्यर्च्येन्मूर्त्याऽभिमतयात्मनः" इति "स्तवैः स्तुत्वा नमेश्वरिम्" इति च वर्णितं श्रुत्वा मूर्त्तिविज्ञानार्थं स्तवविषयभूतगुणकर्मविज्ञानार्थं च पृच्छति, यानीति । स्वच्छन्दजन्मभिः स्वेच्छावतारैः कर्त्ता करिष्यति ॥ १ ॥

त्रैकालिकानि भगवदवतारगुणकर्माणि साकल्येन वक्तुमश-

आदावभूच्छतधृती रजसाऽस्य सर्गे विष्णुः स्थितौ क्रतुपतिर्द्विजधर्मसेतुः ।
रुद्रोऽप्ययाय तमसा पुरुषः स आद्य इत्युद्भवस्थितिलयाः सततं प्रजासु ॥ ५ ॥
धर्मस्य दक्षदुहितर्यजनिष्ट मूर्त्यां नारायणो नरऋषिप्रवरः प्रशान्तः ।
नैष्कर्म्यलक्षणमुवाच चचार कर्म योऽद्यापि चास्त ऋषिवर्यनिषेविताङ्घ्रिः ॥ ६ ॥
*इन्द्रो विशङ्क्य मम धाम जिघृक्षतीति कामं न्ययुङ्क्त सगणं स बदर्युपाख्यम् ।
गत्वाऽप्सरोगणवसन्तसुमन्दवातैः स्त्रीप्रेक्षणेषुभिरविध्यदतन्महिज्ञः ॥ ७ ॥
विज्ञाय शक्रकृतमक्रममादिदेवः प्राह प्रहस्य गतविस्मय एजमानान् ।
मा भैर्विभो ! मदनमारुतदेववध्वो ! गृह्णीत नो बलिमशून्यमिमं कुरुध्वम् ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

कथान्यतः संक्षेपतः कानिचित्कथयिष्यामीत्याह—न इति । अनन्तस्य इयत्तानवच्छिन्नस्य अनन्तानसङ्ख्येयान् योऽनुक्रमिष्यन् गणयितुमिच्छति स वै निश्चयेन बालबुद्धिः बाला परतत्त्वविचाररहिता बुद्धिर्यस्य स तथा कालेन भूमिरजो गणयितुं पर्याप्तेन कश्चित्कथञ्चिद्भूमेः रजांसि गणयेदपि अखिलशक्तिधाम्नः सर्वचेतनाचेतनशक्त्याश्रयस्य गुणांस्तु नैव गणयेत् तथा च श्रुतिः "विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसि" इत्यादिः ॥ २ ॥

तत्र पुरुषावतारं तद्गुणकर्माणि चाह—भूतैरिति त्रिभिः। स्वांशेन कालाख्येन आत्मसृष्टैः भूतैः तदुपलक्षितैर्महदादिभिः विराजं पुरं सावरणं भुवनत्रयात्मकं शरीरं विरचय्य निर्माय तस्मिन् यदा आदिदेवः विभुः प्रविष्टस्तदा नारायणः स्वसृष्टजलायनः सन् पुरुषाभिधानमवापेत्यन्वयः ॥ ३ ॥

यस्य पुरुषस्य काये विराजि एष भुवनत्रयस्य सन्निवेशः यस्येन्द्रियैः तनुभृतां व्यष्टिसमष्टिजीवानां ज्ञानकर्मेन्द्रियाणि यस्य ज्ञानं तदुपलक्षितं कर्म स्वतः इन्द्रियनिरपेक्षम "अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः" इति श्रुतेः यस्य श्वसनतः प्राणात् बलं देहशक्तिः ओजः इन्द्रियशक्तिरीहान्तःकरणशक्तिः सत्त्वादिभिः स्वशक्तिगुणैः तदुपलक्षितैर्नियोज्यकर्तृभिः स्थितिश्च लयश्च उद्भवश्च यस्मात्स तथा अत एव आदिकर्त्ता नियोजककर्त्तेत्युच्यते ॥ ४ ॥

भाषा टीका।

राजोवाच।

श्रीभगवान् अपने स्वतंत्र जिन जिन जन्मों से जिन जिन चरित्रों को किये अथवा करते हैं अथवा करैंगे तिन चरित्रों को हम लोगों के आगे कहिये ॥ १ ॥

ऋषिरुवाच।

जो पुरुष अनन्तभगवान् के अनन्त गुणों को कहने को या गिनने को विचारै सो बालक बुद्धिवाला है क्योंकि कोइ चतुर होवे तो पृथिवी के रेणुओं भलेही किसी प्रकार से गिनलेवै परंतु सोइ चतुर पुरुष बडे कालतक भी सर्वशक्ति वाले बडे तेज वाले भगवान् के गुणों को नहीं गिन सकैगा ॥ २ ॥

जिससमय में भगवान् ने अपने बनाये हुये पञ्चभूतों से पुर देह को बनाया तबही अपने अंशके सहित उसमें प्रवेशकिया तब आदिदेव नारायण की पुरुष संज्ञा भई ॥ ३ ॥

जिन के शरीर में यह तीनों भुवन की रचना है जिन के इंद्रियो से सब देह धारियो के दोनो प्रकार के इंद्रिय भये हैं जिनके स्वरूप से सब का ज्ञान भया और बल से बल चेष्टासे चेष्टा भई उन के सत्वादि गुणों से जगत् की उत्पत्ति पालन नाश होता है वेही आदिकर्ता हैं ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

आदिकर्त्तेत्यनेन तत्पूर्वकं कर्त्रन्तरमपि सूचितं तद्दर्शयितुं गुणावतारद्वारा चराचरसृष्ट्यादिकर्तृत्वमाह—आदाविति । यस्येत्यनुषङ्गः यस्य रजसाऽस्य जगतः; सर्गे कार्ये शतधृतिर्ब्रह्मा भूतस्थितौ च विष्णुर्यस्य सत्त्वेनेति शेषः । क्रतुपतिस्तत्फलदाता द्विजातीनां तद्धर्माणां च सेतुः पालक इत्यर्थः । यस्य तमसा ऽस्याप्ययाय रुद्रोऽभूत् इत्येतैर्ब्रह्मादिभिर्निमित्तभूतैः प्रजासूद्भवादयो यतो भवन्ति स आद्यः पुरुष इत्यन्वयः ॥ ५ ॥

नरनारायणावतारमाह—धर्मस्येति । धर्मस्य भार्यायां दक्षदुहितरि मूर्तिसंज्ञायां नारायणो नर इति मूर्तिद्वयेनाजनिष्ट जातः तच्चरितमाह, नैष्कर्म्यमात्मस्वरूपं लक्ष्यते येन तत्कर्म कर्मनिर्हाररूपं वा उवाच। नारदादिभ्यः स्वयं चचार च योऽद्यापि कर्माचरन्नास्ते ऋषिवर्यनिषेविताङ्घ्री यस्य सः ॥ ६ ॥

भगवदवतारत्वद्योतकं परमोपशमं दर्शयितुमितिहासमाह—इन्द्र इति दशभिः । धाम स्थानं तपसा ग्रहीतुमिच्छतीति विशङ्क्य तपोनाशाय कामं सपरिवारं प्रेषयामास स कामो बदरीभिरुपाख्यायते यस्तं तस्याश्रममप्सरोगणादिभिः सह गत्वा स्त्रीणां प्रेक्षणान्येव इषवो बाणास्तैः न तस्य महि महिमानं जानातीत्यतन्महिज्ञः ॥ ७ ॥

अक्रममपराधमम् अहो अहं धीर इतिविस्मयो गर्वस्तद्रहितः

* इन्द्रोऽपि नाकपसुखमेकप इति विज०।

श्रीधरस्वामिकृतभावार्थदीपिका ।

एजमानान् शापभिया कम्पमानान् भो विभो ! समर्थ हे दयवध्वः ! मा भैष्ट बलिमातिथ्यं तान्प्रार्थयते आतिथ्याभावे शून्यप्रायः स्यादित्यर्थः ॥ ८ ॥

———

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपनी टिप्पणी ।

तत्पूर्वकं स पुरुष एव पूर्वं यस्य कर्मान्तरस्य तत्तथा तद्दर्शयितुं ब्रह्मादिलक्षणकर्मान्तरं ज्ञापयितुं यस्येत्यनुषङ्गः । यस्येन्द्रियेरित्यत्रान्वितस्य यच्छब्दस्य पुनः सम्बन्धः इति एवम् ॥ ५ ॥

नैष्कर्म्यं निर्गतं कर्मकर्तृ आत्मस्वरूपं निष्कर्मैव नैष्कर्म्यं स्वार्थे ष्यञ् तल्लक्ष्यते ज्ञायतेऽनेन तत्कर्म भगवदाराधनलक्षणमुवाच नारदादिभ्य इति शेषः । "तन्त्रं सात्वतमाचष्ट नैष्कर्म्यं कर्मणां यतः" इति प्रथमोक्तेः कर्म भगवदाराधनलक्षणं तपः ॥ ६ ॥

परमोपशमं सर्वोत्कृष्टान्तरिन्द्रियनिग्रहं किं वा "शमो मन्निष्ठतावुद्धे"रिति भगवदुक्तः लोकसंग्रहार्थं बुद्धेर्भगवन्निष्ठाम् ॥ ७ ॥

प्रहस्येति । अहो अस्माकमाहात्म्यं यदमी मामपि मोहयितुं प्रवृत्ता इत्युपहस्य अभाति अभयतीति भुस्ततसम्बोधनं हे भो विभो ! समर्थ इति यावत् तान्मदनादीन् पूर्वमेव नारदादिविशिष्टस्य स्वस्य तत्र सत्त्वात् स आश्रमः अशून्य एव अशून्यकरणं न कुरुत इति आतिथ्याभावेनैव तत्र शून्यत्वमुत्प्रेक्षणीयमिति शून्यप्रायः स्यादिति व्याख्यातमत इत्यर्थ इत्युक्तम् ॥ ८ ॥

———

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

स कामः अतन्महिज्ञः तन्महिमानभिज्ञः ॥ ७—८ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

आदिकर्तृत्वमेव प्रपञ्चयति—आदाविति । अस्य जगतः सर्गे निमित्ते आदौ व्यष्टिसृष्टेः पूर्वं रजसा उपलक्षितः शतधृतिरभूत् रजोगुणप्रचुरब्रह्माख्यजीवानुप्रवेशेन तच्छरीरकतया तद्रूपो बभूवेत्यर्थः । "सृष्टिं ततः करिष्यामि त्वामाविश्य प्रजापते" इति वचनं रुद्रोऽप्ययाय तमसेत्यप्ययाप्ययमेवार्थः अप्ययः संहारः स्थितौ निमित्तभूतायां विष्णुरित्यस्य सत्त्वेनेत्यादिः विष्णुः स्थित्यर्थं शुद्धसत्त्वोपलक्षितस्वावतारात्मकविष्णुरूपोऽभूदित्यर्थः । ब्रह्मरुद्रयोरिव विष्णोरप्यावेशावतारत्वशङ्काव्युदासाय देवतान्तराणां तच्छरीरत्वज्ञापनाय च विशिनष्टि—क्रतुपतिरिति । यज्ञनिर्वाहक इत्यर्थः । अत्र "इष्टापूर्तं बहुधा जातं जायमानं विश्वं बिभर्ति भुवनस्य नाभिः तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदु चन्द्रमाः स आत्मा अङ्गान्यन्या देवता" इत्यादिश्रुत्यर्थोऽभिप्रेतः स्थितिस्वरूपं दर्शयन्निर्वाहनष्टि—द्विजधर्मसेतुरिति । द्विजास्त्रैवर्णिकास्तेषां धर्माणां च सेतुरिव सेतुर्हि तीरान्तरप्रापकस्तद्वद्वर्णधर्मानुगुणधर्मफलप्रापक इत्यर्थः । अनिष्टपरिहारेष्टप्रापणरूपैव स्थितिरिति भावः

इतीत्थं यथा ब्रह्मादिरूपेण विश्वसृष्ट्यादिकर्त्ता तथेत्यर्थः । स आद्यः पुरुषः उपादानकारणभूतपुरुष इत्यर्थः । तदेवोपपादयति-उद्भवेति । अस्य तत इत्यादिः प्रजासूद्भवादयस्तत उपादानकारणभूताद्भवन्ति ॥ ५ ॥

अथ नरनारायणावतारं तद्गुणकर्माणि चाह—धर्मस्येत्येकादशभिः । धर्मस्य भार्यायां दक्षदुहितरि मूर्त्तिसंज्ञायां नारायणो नर इति मूर्त्तिद्वयेनाजनिष्टावतीर्णः नैष्कर्म्यलक्षणं बन्धकसकलकर्मनिवृत्तिहेतुभूतात्मकं योगं ज्ञानयोगमुवाच नारदादिभ्य उपदिदेशेत्यर्थः । सच क वर्तत इत्यत्राह, योऽद्यापीति । यो नरनारायणरूपो भगवानद्यापि ऋषिवर्यैर्नारदादिभिः निषेविताङ्घ्री यस्य स आस्ते बदर्याश्रम इति शेषः ॥ ६ ॥

नैष्कर्म्ययोगनिष्ठैरेवं वर्त्तितव्यम् इति प्रदर्शयितुं परमोपरामगर्भं तपोऽष्ठितात्मकमितिहासमाह—इन्द्र इति । मम धाम स्थानं तपसा ग्रहीतुमिच्छतीति विशङ्क्य तपोनाशाय सगणं सपरिवारं कामं मन्मथं च प्रेषयामास । स कामः बदर्युपाख्यं बदरीति यः प्रसिद्धः तं तस्याश्रमे अप्सरोगणादिभिः सह गत्वाऽतन्महिज्ञः तन्महिमानभिज्ञः स्त्रीणां प्रेक्षणान्येवेषवो बाणास्तैरविध्यत् ॥ ७ ॥

आदिदेवो नारायणः शक्रकृतमक्रममपराधं विज्ञाय गतविस्मयः अहं धीर इति विस्मयो गर्वस्तद्रहितः प्रहस्य एजमानान्कम्पमानान् शापभियेति भावः । प्राह तदेवाह,मा भैष्टेति । हे मदन ! हे मारुत ! हे देववध्वः ! यूयं मा भैष्ट बलिमातिथ्यं गृह्णीतेति प्रार्थयते इममस्माकमाश्रममशून्यं कुरुध्वमातिथ्याभावे शून्यप्रायः स्यादिति भावः ॥ ८ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

एतदेव विवृणोति—आदाविति अस्य जगतः सर्गे तादर्थ्ये सप्तमी सृष्ट्यर्थं रजसा गुणेन तं ब्रह्माणं सृष्ट्वादावग्रे तदन्तर्यामित्वेन नाम्ना शतधृतिः शतानन्दो ब्रह्मेत्यभूत् अस्य स्थितौ नाम्ना विष्णुरभूत् स्थित्यै हेतुत्वं वक्ति, क्रतुपातिरिति । क्रतवो द्विजधर्माश्च निमित्तान्येतैर्जगत्स्थापयतीत्यर्थः सत्त्वेनेति ग्राह्यं तमसा गुणेनास्याप्ययाय तं रुद्रं सृष्ट्वा तदन्तर्यामित्वेन नाम्ना रुद्रोऽभूदतः स आद्यः पुरुषाकारेण एतत्साधननाम्ना पुरुषोऽभूदिति भावः । उपसंहरति—इतीति । सततमिति वीप्सोपलक्षणं कालं कालं प्रजासु उद्भवस्थितिलया इति एवं प्रकारेण हरेर्वर्त्तते नान्यस्मादिति निश्चितं तदुक्तं "ब्रह्माणि स्थोऽसृजद्विष्णुः स्थित्वा रुद्रे त्वभक्षयत् । पृथक् स्थित्वा जगत्पाता तद्ब्रह्माद्याह्वयो हरिः" इति अत इयं कल्पना क्लिष्टेति मन्तव्यम् ॥ ५ ॥

हरी रूपान्तरैरपि त्रिजगत्स्थितिं करोतीत्याशयेन माहात्म्यप्रकटनपूर्वकं तान्याह—धर्मस्येत्यादिना । धर्मस्य सकाशात् "तप आलोचने" इति धातोः आलोचनं निश्चयज्ञानं स्वमात्मानं तपति जानातीति स्वतपाः स्वरूपभूतः प्रभावो यस्य सः स्वप्रभावः स्वविषयज्ञानरूपश्चासौ स्वरूपभूतप्रभावरूपश्चेत्यर्थः स्वशब्दः पदद्वयेन सम्बध्यते अवतारप्रयोजनमाह—नैष्कर्म्येति । नैष्कर्म्यलक्षणं योगं मुक्तिसाधनं ज्ञानमवदत्स्वयं च अनाशिषाधि योग-

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

मुपासनालक्षणं ध्यानं चचार कृतावतारप्रयोजनोऽपि लोकानुग्रहकातरो भूमावेकत्र आश्रमविशेष आस्ते इत्याह-मद्यापीति ६

श्रीनारायणं प्राणं च विनान्यान् सुरानपि परे ज्ञानप्रतिबन्धिनः कामादयः आविशन्ति किमुतान्यानिति भावेनेन्द्रस्याज्ञानं हरेर्महिम्नोऽप्रतिहतत्वं च प्रकटयितुं वक्ति-इन्द्रोऽपीति। एष नारायणो नाकसुखं नाके विद्यमानं सुखमैश्वर्यलक्षणं जिघृक्षति ग्रहीतुमिच्छतीति निरूप्य ज्ञानरूपानपि सुरान्विना प्राणं कचित्परे आविशन्ति ह्यतस्तेषामज्ञानादि ननु कथं "अथैतमेव नाप्नोति योऽयं मध्यमः प्राणः एवमेता देवताः पाप्मना विद्धा" इत्यादिश्रुतिस्मृतिभ्योऽयमर्थः सिद्धः स कामो बदर्युपाख्यं बदरीत्युपपदाश्रमेत्याख्या यस्य स तथा तं बदरिकाश्रमम् अप्सरोगणादिभिः सह गत्वा स्त्रीणां प्रेक्षणेषुभिर्नयनवक्त्रशरैरविध्यत् अज्ञं भगवन्तमिति शेषः। तस्य हरेर्महि माहात्म्यं न जानातीत्यतन्माहिम्नः उपलक्षणमेतत् इन्द्रादिरप्येवम् अनेन मुख्यप्राणोऽपि भगवदनुग्रहादसुरकृतपीडाया अविषयः किमुत हरिरसुरादिदुष्टकामादिपीडाया इति न्यायो दर्शितः "तं हासुरा ऋत्वा विदध्वंसुर्यथा श्मानमाखणमृत्वा विध्वंसतेव हैव विध्वंसमाना विष्वञ्चो विनेशुः" इति श्रुतेः ॥ ७ ॥

अक्रमम अस्थाने पद्न्यासमन्यायलक्षणम् इममाश्रमम् ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तस्माद्गुणावतारमाह-मायायिति। सर्गे विसर्गे विष्णुः सत्त्वेनेत्युक्तिस्तस्य शुद्धस्वरूपत्वात् साक्षिध्येनैव सत्त्वगुणोपकारकत्वाच्च ॥ ५ ॥

लीलावतारानुपक्रमते-धर्मस्येति। नैष्कर्म्यलक्षणं कर्मेति भगवदाराधनलक्षणमित्यर्थः। "तन्त्रं सात्वतमाचष्ट नैष्कर्म्यं कर्मणां यतः" इति प्रथमोक्तेः ॥ ६—१० ॥

श्रीमच्छुकमाचार्यकृतसुबोधिनी ।

ब्रह्मविष्णुमहेश्वराणां तथात्वमाशङ्क्यैतदवतारत्वमाह-अस्य परिदृश्यमानस्येति विसर्गं उक्तः विसर्गस्योत्पत्त्यर्थमादौ पुरुषो ब्रह्मा जात इत्यर्थः। कमलोद्भवः शतपत्रैर्धृत इति शतधैर्यधरत्वेन रजोगुणाद्स्तम्भनं वा तथैव विष्णुः सत्त्वगुणेन पालनं लौकिकं वैदिकं चेति विष्णुः स्थितौ क्रतुपतिरिति लौकिके तु विष्णोरवतारेण स्थितिः वैदिके तु निर्वाहका ब्राह्मणाः तेषां संसारावर्ते पतनं धर्मस्य च कालेन ग्रासः अतो निर्वाहार्थं सेतुरिति सुखतरणहेतुः तथा रुद्रोऽपि स त्रिविधोऽपि पुरुषः स आद्यः न त्वन्य इत्यर्थः। नित्योत्पत्तिप्रलयपक्षेण सर्वदाऽस्य कार्यमाह, इत्युद्भवेति। प्रजास्विति। प्रकर्षेण जायमानानां तथैवेतरैर्यथाजीववदिति ज्ञापितम् ॥ ५ ॥

एवं सामान्यतो भगवच्चरित्रमुक्त्वा पुष्ट्यवतारान्वक्तुं साधारणेन सर्वरक्षकधर्मद्वैविध्यज्ञापनाय प्रकृतिविकृतिभेदेन द्विविधं स्थितिहेतुभूतं नरनारायणावतारमाह-साधनफलयोः फलं यतीव इति न्यायेन स्थितौ सत्त्वां परिपालनात्सहजप्रवृत्तेराद्युत्त्वात् बहुत्वात्समानाधिकरणधर्मानुत्पत्तेर्महत्तपः कर्तव्यं भगवतैव तच्च निर्दुष्टं कर्तव्यं तपसि क्रोधो महत्त्व कामश्चेति शुद्धसत्त्वावताराद्न्तःकरणस्तम्भनात् तपो दोषौ च सम्भवन्तीति ध्रुवौ निराकर्तव्यः, तस्माच्चरित्रं तथैव वक्तव्यं सदग्रे दशाभिरेकेन प्रथममवतारं स्वार्थचरित्रं चाह, मातापितृशुद्धिः नाम्ना अधिष्ठानत्वं च नारायणनाम्ना ब्रह्मत्वं नरस्य ऋषित्वं मन्त्रद्रष्टृत्वाय नरः ऋषिवर्येति लक्ष्मीपतेर्नारायणस्य कर्मकर्तृत्वं नरानबन्धनामिति नर इति प्रथमपुरुषः लोकमर्यादयोत्तमत्वमाह-प्रशरः सेतुः प्रकर्षेण शान्तश्च न केवल पुष्टिस्थ इति इदं रूपं ज्ञानक्रियोभयरूपं तत्र ज्ञानकार्यमाह, नैष्कर्म्यलक्षणं पञ्चरात्रोक्तपरिचर्यारूपं लोकोपकारार्थमुक्तवान् कार्यं वरकालस्थितये योगं चचार अतः पुष्ट्यवताराणां मध्ये अयमवान्तरप्रथमस्य फलमाह ऋषिवर्याः पञ्चरात्रोक्तमन्त्रद्रष्टारः तत्सेवितचरणाः ॥ ६ ॥

वैपरीत्यं स्थितेः प्रयोजनत्वाय चरित्रमाह—दशाभिः सहस्रकवचवधकलपञ्च ऋषिनिबन्धनत्वादस्य मुखतो नोक्तं कामक्रोधजयौ द्वाभ्यां स्तुतिजयश्चतुर्भिः अदेयदानं द्वाभ्याम् द्वाभ्यां च चरित्रकथाचिन्त्यत्वं तत्र कामक्रोधोपस्थितिमाह-इन्द्रो यज्ञः केवलं क्रियाशास्त्रयनार: भोगावेशनात्माधिकमत्वा तपसः फलमिन्द्रत्वं मन्वन्तरातिक्रमे ब्रह्मत्वं तथापि प्राप्स्येत न भोगः ज्ञानापदिष्टं ज्ञानापेक्षा जगद्ब्रह्मणामपीन्द्रत्वेनैवेति भ्रमः अत एव मम धाम जिघृक्षतीति विशङ्क्य लोके हि कामक्रोधाभ्यामेव तपःक्षयः क्रोधेनैव च कामजयोऽपि अतः कामस्य जयपराजयाभ्यां स्वकार्यं मत्वा कामं न्ययुङ्क्त। सचाग्निरिव हृदयस्थितकामाद्बाधक इति तदुद्बोधे तदुपशमाय सगणमिति अनुद्बोधेन स्वरूपनाशः उद्बोधेऽप्यशान्ते आध्यात्मिकस्य क्षोभे हि सर्वनाश इति स च कामः बदरीति उपसमीपे आख्या यस्य बदरीनारायणमित्यर्थः। देशसहितात्मनः शब्दादपि ब्रह्मत्वज्ञानं न जातमिति भावः। विभावादिभिः सहित इति अप्सरोगणलक्षणसुमन्दवातसहितः जीवभावं गतो रसः नवभिः शृङ्गारादिभि र्विहरणीति भक्त्या तु बहिर्भगवानिति न काचिच्चिन्ता अभिनवेनाभिव्यक्तिः सजातीयेन सजातीयग्रहणं स्त्रीणां यत्प्रकृष्टमीक्षणं त इषवः लोमकालस्य बाणाः अविध्यदिति कामव्यापार उक्तः। ननु भगवति प्रवेशो बाणानां तस्य महिमाऽप्रच्युतभगवत्त्वं नहि पाषाणे कश्चित् बाणान् प्रक्षिपति ॥७॥

भगवत्कृतमाह—बाणानां कार्याभावेऽपि बाणप्रक्षेपोऽनुचित इति ईश्वरत्वाद्दण्डो विशेषः स्वाज्ञाशाकर्तृत्वाच्च कामादीनामनौचिती भृत्यापराधेऽपि इन्द्रस्य स्वामिनो दण्ड इति प्राप्नोति क्षोभे अज्ञाने वा कामादीनां वा दण्डः प्राप्नोति तच्छक्रकृतमक्रममिति निवृत्तिः स्वतो नारदादिद्वारा वा तपः प्रयोजनं ज्ञातव्यं जीवत्वं च तदार्थं क्रमो भवति अज्ञानात्त्वक्रमः भगवत्त्वान्नापराधदण्डौ आदिदेव इति स्वेनैव प्रस्थापितस्त्रीशो यस्य इति तूष्णीं भावे भयादेतेषां मरणेन शक्रापराध नापराधान्तरं च सम्भवतीति प्राह मच्छिक्षितं मयैव प्रयुक्तमिति प्रहस्येत्युक्तं गर्वादप्येवं सम्भवतीति तन्निराकरोति—गतविस्मय इति। तथा गतविस्मयत्वाभावे क्रोधवत् स्मितम् महत्त्वज्ञानमपि

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

भवेदित्यर्थः । तथा च क्रोधजन्महत्त्वज्ञानमपि भवेत् नारायणशाक-दण्डभयात्कम्पः उभयनिवृत्त्यर्थमेजमानान् प्रत्याह भये हि स्वामि-सेवकभावोऽपगतः ततस्तुल्यतया भोमदनमारुतदेववध्व ! इति सम्बोधनं माभैष्टेति इन्द्रादपि भयाभावः सूचितः स्वामिदण्ड-भयञ्च कार्यार्थमागता अतिथयो भवन्ति घोरा धातुकाश्च निवृत्ति-मार्गे अतिथयो भवन्तीति पूर्वेणान्वयः 'एतावज्जन्मसाफल्य' मित्यत्र निर्णीतं प्रमाणं न मनोरथः सिद्ध्यति तथाप्याश्रमस्थैरातिथ्यं कर्त्तव्यमित्याह । गृह्णीत नो बलिमस्मत्सम्बन्धिनीं पूजां ततः किमत आह । कुरुध्वमिति । मनोरथसिद्ध्यभावेऽपि परोपकारः सेवनी-यार्थः । निर्गुणानां महती रीतिरेषा "गृहेषु येष्वतिथय" इति न्या-यात् ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

गुणावतारानाह—आदाविति । रजसा रजोगुणेन सर्गे सृष्टौ कर्मणि शतधृतिर्ब्रह्मा अभूत् स्थितौ पालने कर्मणि विष्णुः द्विजानां स्वधर्माणां च सेतुः पालक इत्यर्थः । अप्ययाय संहारार्थम् ॥ ५ ॥

इत्थं प्रकारेण नारायणो नर इति ऋषिप्रवरः समजनिष्ट नैष्कर्म्यलक्षणं कर्म उवाच चचार च ॥ ६ ॥

बदर्युपाश्रयम् अप्सरोगणादिभिः सह बदरिकाश्रमं गत्वा स्त्रीप्रेक्षणान्येव इषवो बाणास्तैरविध्यत् न तस्य महिमानं जानातीत्यतन्महिज्ञः ॥ ७ ॥

अकृममपराधं गतविस्मयः अहो अहं धीर इति विशिष्ट-स्मयो गर्वस्तद्रहित इत्यर्थः । एजमानान् शापभिया कम्पमानान् भो विभोः ! समर्थ ! हे देववध्वश्च मा भैष्ट बलिं पूजोपहारं शाकपत्रादिकमस्मदातिथ्यं गृह्णीत वयं सम्पन्ना एव भवेमेति चेत् इमम् आश्रमम् अशून्यं कुरुध्वम् आतिथ्याभावे आश्रमः शून्यतुल्यः स्यादिति भावः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एतदेव विवृणोति–आदाविति । आदौ व्यष्टिसृष्टेः पूर्वम् अस्य व्यष्ट्यात्मकस्य जगतः सर्गे तादर्थ्ये सप्तमी सर्गार्थे यस्य पुरुषस्य नियोजककर्त्तुः सम्बन्धी अंशभूतः रजसोपलक्षितः शतधृतिः नियोज्यकर्त्ता अभूत् तच्छब्दसम्बन्धात्तच्छब्दलाभः यश्च क्रतुपतिर्यज्ञफलदः द्विजधर्मसेतुः त्रैवर्णिकधर्मविधारण-हेतुर्विष्णुः आवतारभूतः स्थितौ स्थित्यर्थमभूत् । शुद्धसत्त्वेनो-पलक्षित इति शेषः । यदंशभूतः तमसोपलक्षितः रुद्र अप्य-याय प्रलयाय अभूत् "सृजामि तन्नियुक्तोऽहं हरो हरति तद्वशः" इति ब्रह्मवचनात् । इति एतैर्ब्रह्मादिभिः नियोज्यकर्तृभिः सततं पुनःपुनः प्रजासु उद्भवादयो यतो नियोजकात्कर्तुर्भवन्ति स आद्यः पुरुष इत्यन्वयः ॥ ५ ॥

श्रीनरनारायणावतारं सचेष्टितं चाह–धर्मस्येत्येकादशभिः । धर्मस्य धर्मात् दक्षस्य दुहितरि कन्यायां मूर्त्याम् ऋषिषु प्रवरः श्रेष्ठः प्रवरत्वे हेतुः प्रशान्त इति । नारायणः नर इति द्विरूपः अजनिष्ट जातः नैष्कर्म्यं भगवत्स्वरूपं लक्ष्यते साक्षात्क्रियते येन तत्कर्म भगवद्ध्यानार्चनादिकं श्रीमन्नारदादिभ्यः उवाच स्वयं चचार योऽद्यापि ऋषिवर्यैः श्रीमन्नारदादिभिः निषेवि-ताङ्घ्रिः सन् तेभ्यः नैष्कर्म्यलक्षणं कर्म वदन् स्वयमाचरन् आस्ते ॥ ६ ॥

धाम स्थानं नैष्कर्म्यलक्षणकर्मानुष्ठानेन जिघृक्षतीति विशङ्क्य अतन्महिज्ञः अतत्प्रभाववित् इन्द्रः सगणं कामं तत्कर्मानुष्ठा-नविघ्नार्थं न्ययुङ्क्त नियोजितवान् तदनन्तरं स कामः बदरीमिरु-पाश्रयते यः आश्रममप्सरआदिभिः सह गतः स्त्रीणां प्रेक्षणान्येवेषवो बाणास्तैरविध्यत् ॥ ७ ॥

गतविस्मयोऽपास्तगर्वः अकृममपराधं बलिमातिथ्यम् इममा-श्रमम् अशून्यम् आतिथ्यप्रदानयुक्तं कुरुध्वम् ॥ ८ ॥

भाषा टीका ।

पहिले इस संसार की सृष्टि के समय में भगवान् ने रजोगुण से ब्रह्मा का रूप धारण किया, फिर यज्ञपति होकर ब्राह्मणादिकों के धर्म के रक्षाकर्ता होकर सत्त्व गुण परिपूर्ण विष्णुरूप से इसका पालन किया फिर उनहीं आदि पुरुष ने इस संसार के नाश करने के लिये तमोगुण से रुद्रावतार धारण किया इस प्रकार से निरन्तर प्रजाओं में उत्पत्ति स्थिति प्रलय करते हैं ॥ ५ ॥

फिर दक्षकी पुत्री मूर्ती देवी के गर्भ में धर्म देवके सकाश से ऋषियों में श्रेष्ठ शांत मूर्ति नरनारायण रूप धारण करके प्रगट भये फिर मोक्ष के हेतु ज्ञान को नारदादिकों को उपदेश किया और आपने अनुष्ठान किया जो कि अभी पर्यन्त भी बदरीकाश्रम में ऋषि श्रेष्ठों से चरण सेवा को प्राप्त होकर विराज मान हैं ॥ ६ ॥

बदरीनारायण भगवान् की योग तपस्या देखकर इन्द्र को शंका भई की यह कोई महात्मा है मेरे इन्द्रपद को लेलेवैगा ऐसे डरकर काम देव को उसके देव गणों के सहित बदरिकाश्रम को भेजा, वह काम देव भी भगवान् की महिमा को नहीं जानता था सो उसने अप्सराओं को तथा वसन्त ऋतुको सुंदर पवन को वहां लेजाकर स्त्रियों के कटाक्ष रूप बाणों से बदरीनारायण को वेधन किया ॥७॥

जब उन सर्वो से भगवान् का कुछ भी विकार न भया तब वे सब शाप के भय से कापने लगे तब भगवान् अभि-मान रहित होकर और यह इंद्र का व्यतिक्रम है ऐसा जान कर उन सर्वो से बोले कि हे कामदेव ! हे पवन ! हे देव स्त्रियां ! तुम लोग कुछ मत डरो यह भोजनादिक पदार्थ ग्रहण करो और इसी ठिकाने रहो यहां से मत जाओ ॥ ८ ॥

इत्थं ब्रुवत्यभयदे नरदेव ! देवाः सव्रीडनम्रशिरसः सघृणं तमूचुः ।
(१)नैतद्विभो ! त्वयि परेऽविकृते विचित्रं स्वारामधीरनिकरानतपादपद्मे ॥ ९ ॥
त्वां सेवतां सुरकृता बहवोऽन्तरायाः(२) स्वौको विलङ्घ्य परमं व्रजतां पदं ते ।
नान्यस्य बर्हिषि बलीन् ददतः स्वभागान् धत्ते पदं त्वमविता यदि विघ्नमूर्ध्नि ॥ १० ॥
क्षुत्तृट्त्रिकालगुणमारुतजैह्व्यशैश्न्यानस्मानपारजलधीनतितीर्य केचित् ।
क्रोधस्य यान्ति विफलस्य वशं पदे गोर्मज्जन्ति दुश्चरतपश्च वृथोत्सृजन्ति ॥ ११ ॥
इति प्रगृणतां तेषां स्त्रियोऽत्यद्भुतदर्शनाः ।
दर्शयामास शुश्रूषां स्वर्चिताः कुर्वतीर्विभुः ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

हे नरदेव ! अभयदे श्रीनारायणे इत्थं ब्रुवति सति देवाः कामादयः सव्रीडानि नम्राणि शिरांसि येषां ते लज्जाभरेणैवावनतशिरस्का इत्यर्थः । सघृणं यथा भवति तथा कृपां अनयन्त इत्यर्थः । कृपायुक्तं तमिति वा योजना । परे अतोऽविकृते स्वारामाश्च ते धीराश्च तेषां निकरैरानतम्पादपद्मं यस्य तस्मिन् त्वय्येतदक्षोभानुकम्पादि न विचित्रम् ॥ ९ ॥

अस्माकं चापराधाचरणं स्वभावत्वान्न चित्रमित्याहुः—त्वामिति । त्वां सेवमानानां सुरैरिन्द्रादिभिः कृता अन्तराया विघ्ना भवन्ति कस्मादित्यत आहुः—स्वौक इति । स्वस्थानं स्वर्गमतिक्रम्य परमं तव स्थानं व्रजतां नान्यस्य त्वामसेवमानस्य कुतः ? बर्हिषि यज्ञे स्वभागान्पुरोडाशादीन्बलीन्करान्कृषिक इव राज्ञे इन्द्रादिभ्यो ददतः प्रयच्छतः तर्हि किं मद्भक्तो विघ्नैर्भ्रंश्यति ? नेत्याहुः, धत्त इति । यदीति निश्चये यतस्त्वं सर्वसुराधीश्वरोऽविता रक्षकोऽतोऽसौ विघ्नानां मूर्ध्नि पदमङ्घ्रिं धत्ते कुतः ? पुनस्त्वयि विघ्नशङ्केति भावः ॥ १० ॥

त्वदभक्तानां तु केवलं तपश्चरतां द्वयी गतिः अस्माकं वा वशं यान्ति क्रोधस्य वा । तत्रास्मद्वशाः कामोपभोगमपि तावदनुभवन्ति क्रोधस्य वशाः पुनरतिमन्दा इत्याहुः—क्षुत्तृडिति । क्षुच्च तृट् च त्रिकालगुणाश्च शीतोष्णवर्षाणि च मारुतश्च प्राणो बाह्यो वा जैह्व्या जिह्वाभोगाश्च शैश्न्या गुह्योपभोगाश्च एतानस्मानपारजलधिरूपानतितीर्य विलङ्घ्य गोष्पदे मज्जन्ति कुतः ? यतः क्रोधस्य विफलस्य वशं यान्ति गच्छन्ति । किञ्च, जले मज्जन्तो यथा विवशाः सन्तो मस्तकारोपितं भारमुत्सृजन्ति तथा वृथैव न मोक्षाय न च भोगाय शापादिना दुश्चरं तप उत्सृजन्ति ॥ ११ ॥

स्त्रियो योगनिर्मिताः स्त्रीः शुश्रूषां कुर्वतीः स्वर्चिताः सुष्ठ्वलङ्कृतास्तेषां स्वलावण्यादिदर्पोपशमाय दर्शयामास ॥ १२ ॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

लज्जाया मनोधर्मत्वेन शिरःसु तदसम्भवात् साहित्यस्य च लज्जानुभावत्वेनैव विवक्षितत्वाल्लज्जाभरेणैवेत्यादि आर्थिकार्थत्वेन व्याख्यातं क्रियाविशेषणं घृणाया विषयो न व्यक्तोऽत इत्यर्थ इत्युक्तम् एतच्छन्दस्य व्यवहितपूर्वपरामर्शकत्वादक्षोभानुकम्पादीति व्याख्यातं तत्र प्रहस्येत्यनेन क्रोधाभावरूपोऽक्षोभ उक्तः मा भैष्टेत्यनेन भयात्मकदुःखप्रहाणेच्छारूपाऽनुकम्पोऽक्ता आदिनातिथ्यं तच्च बलिं गृहीतेत्यनेनोक्तम् ॥ ९ ॥

यदीति । यदि देवाः प्रमाणं स्युरितिवन्निश्चये यतस्त्वं भक्तानां निश्चयेन रक्षकोऽतोऽसौ भक्तो विघ्नान् जयतीत्यर्थः ॥ १० ॥

तत्र क्रोधास्मद्वशगयोर्मध्ये कामोपभोगमपीति यद्यपि कामोपभोगस्तपःफलं न भवति तथापि अस्मद्वशगास्तु तुच्छमपि तम् अनुभवन्तीत्यपेरर्थः । क्रोधस्य गोष्पदत्वं स्वविषयघातमात्रेण नष्टत्वात् जिह्वादिजयापेक्षया तुच्छत्वात्तुच्छफलत्वाच्च नतु विषयलोभवदनश्वरत्वम् । तदुक्तं सप्तमे “कामस्यान्तं हि क्षुत्तृड्भ्यां क्रोधस्यैतत्फलोदयात् । जनो याति न लोभस्य जित्वा भुक्त्वा दिशो भुवः” इति क्रोधस्य गोष्पदत्वारोपेण तद्वताञ्च मज्जनकर्तृत्वारोपेण तपसि मस्तकभारत्वमारोपितम् । वृथैवेत्यस्य व्याख्यानं न मोक्षायेत्यादि ॥ ११ ॥

योगबलेन दर्शयामास ॥ १२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

अविकृते विकाररहिते स्वारामधीराः आत्मारामास्तद्विज्ञाः ॥ ९ ॥

स्वौकः स्वशब्दो देववाची स्वर्गं विलङ्घ्येत्यर्थः ॥ १० ॥

अस्मानपारजलधीन् अस्मानेव जलधीन् इति पदे गोः गोष्पदे ॥ ११ ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

हे नरदेव ! अभयदे श्रीनारायणे इत्थं ब्रुवति सति देवाः कामादयः सव्रीडानि नम्राणि च शिरांसि येषां ते लज्जाभरेणावनतशिरस्का इत्यर्थः । सघृणं कृपायुक्तं यथा भवति तथा कृतापराधेष्वप्यात्मद्रुह्येषु कृपा यथास्यात्तथेत्यर्थः । तं श्रीनारा-

(१) नेयं विभो ! त्वयि परे विकृतिर्विचित्रा इति विज० पाठः (२) त्वां सुन्वतां बहवोऽन्तरायास्तान्को विलङ्घ्य इति विज० पाठः ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यदमूचुः तदेवाह—नैतदित्यादिना सार्द्धद्वयेन । त्वयि एतत्कृतापराधेऽस्मास्वनुग्रह इत्येतत्र विचित्रं तत्र हेतुतया श्रीनारायणं विशिंषन्ति अविकृते कामक्रोधादिविकाररहिते तत्र हेतुः परं हेयाकारप्रकृतिगुणवाविलक्षणे हेयप्रतिभटे किञ्च स्वारामधीरनिकरानतपादपद्मं स्वामिनं रमन्त इति स्वारामा आत्मारामास्ते च ते धीराः जितेन्द्रियाश्च तेषां निकरैः समूहैरानते सेव्यमाने पादपद्मं यस्य तस्मिन् त्वद्भक्तानामेव न कामादिविकारः कुतस्तवेति भावः । अतस्तवानुग्रहो महिमा इत्यर्थः ॥ ९ ॥

अस्माकं चापराधाचरणं स्वभावत्वात् चित्रमित्याहुः—त्वामिति । सेवतां सेवमानानां सुरैरिन्द्रादिभिः कृता बहवो विघ्नाः स्युः तत्र हेतुत्वेन तान् विशिंषन्ति । स्वौकः स्वशब्दो देवपरः तेषामोकः स्थानं स्वर्गं विलङ्घ्यातिक्रम्य परमं सर्वोत्तमं ते तव स्थानं व्रजतां गच्छतां वर्त्तमानसामीप्ये भविष्यति वर्त्तमानवद्भावाल्लिट् तस्य शत्राद्येशः अन्यस्य त्वामसेवमानस्य न विघ्नाः स्युः । कुतः? बर्हिषि यज्ञे स्वभागान्पुरोडाशादीन् बलीन्करान्कर्षक इव राज्ञे इन्द्रादिभ्यो ददतः प्रयच्छतः तर्हि मद्भक्ताः किं विघ्नैरुपहन्यन्त एव नेत्याहुः—यस्य इति । यदीति निश्चये यतस्त्वं सर्वरक्षकाभिरक्षिता रक्षिता अतोऽसौ विघ्नानां मूर्ध्नि पदमङ्घ्रिं धत्ते कुतः? पुनस्त्वयि विघ्नशङ्केति भावः ॥ १० ॥

त्वद्भक्तानां तु केवलं तपश्चरतां दुर्गो गतिः न मार्गं च वशं यान्ति क्रोधस्य वा तस्मान्महर्षयः कामोपभोगमपि वा तावदनुभवन्ति क्रोधवशात्तु पुनरभिमन्दा इत्याहुः—क्षुत्तृडिति । क्षुच्च तृट् च त्रिकालगुणाः शीतोष्णवर्षाश्च च मारुतश्च प्राणो घ्राणो वा जैह्व्या जिह्वोपभोगाः शैश्न्याः शिश्नोपभोगाः ये च तानस्मानपारजलधिरूपानतितीर्य विलङ्घ्य गोष्पदे मज्जन्ति कुतः? विफलस्य क्रोधस्य वशं यान्ति गच्छन्ति रुद्रवृत्तान्तोऽनेनाभिसंहितः । किञ्च, यथा जले मज्जन्तो मस्तकारोपितभारमुत्सृजन्ति तथा वृथा न मोक्षाय न च भोगाय शापादिना दुश्चरं तप उत्सृजन्ति ॥ ११ ॥

तेषां कामादीनामितीत्थं प्रगृणतां सतां विभुर्भगवानत्यद्भुतं दर्शयन्त इति तथा ताः स्त्रियः स्त्रीः दर्शयामास कथम्भूताः शुश्रूषां कुर्वतीः स्वर्चिताः स्वलङ्कृताः तेषां स्वबाधयादिप्रयुक्तदर्पोपशमाय दर्शयामासेति भावः ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अविकृतिः अविकारः स्वारामाश्च धीराश्च स्वारामधीराः तेषां निकरः समूहस्तेनानतं पादपद्मं यस्य स तथा तस्मिन् ॥ ९ ॥

भवतामल्पशक्तित्वाद्विकारः किं न स्यादित्याशङ्क्य वयं भवन्तं प्रत्यरूपबला अस्मान् प्रतिबलवन्त इति भावेनाहुः—त्वामिति । सुन्वतां भजमानानां ये अन्तरायाः कस्तान्विलङ्घ्य ते परमं पदं व्रजतां न कोऽपि व्रजति चेत् को वायुरेव नान्य इत्यर्थः "सा वा एषा देवतैतासां देवतानां पाप्मानं मृत्युमपहत्याथैनां मृत्युमत्यवहत्सा यदा मृत्युमत्यमुच्यत सोऽग्निरभवत्" इति श्रुतिश्चोक्तार्थे बलवत्प्रमाणम् । नन्वेवं तर्हि वायुमन्तरेण भजतामितरेषां भगवत्प्राप्तिलक्षणा मुक्तिर्न स्यादित्याशङ्क्य भगवदनुग्रहे सति कान्यापद्वृत्तान्तरा न स्यादिति भावेनाहु—नेति । त्वमविता बर्हिषि स्वभागं ददतः पुंसां यदि विघ्नमूर्ध्नि पदं धत्ते तर्हि स बलिरन्यस्य न तथैव यदि विघ्नमूर्ध्नि पदं न दध्यात्तर्हि बलिरपि स्वत्प्रीतिजनको न स्यात् न चायं तथा तस्मात्त्वत्कृपा भक्तेः प्राधान्यं तथैव विघ्ननिवृत्तिरिति दर्शितं भवति ॥ १० ॥

किं बहुना कामादिजयादपि क्रोधजय एव दुःसाध्यः तव सोऽपि गोष्पदतरणवत्सुशक इति विज्ञापयन्ति—क्षुत्तृडिति । चत्वारो मासाः शीतकराः चत्वारः उष्णहेतवः चत्वारो वर्षहेतव इति त्रिकालगुणाः शीतोष्णवर्षस्वभावाः जैह्व्यं जिह्वाभवं शैश्न्यं शिश्नप्रभवं व्यसनं क्षुदादिव्यसनमयापारजलधेरतितीर्य उत्तीर्य ये केचिदपण्डिताः भवदनुग्रहरहिताः विफलस्य प्रतिक्रियाकरणाशक्त्यभावेन फलरहितस्यात्मनाशादिविविधफलस्य क्रोधस्य वशं यान्ति ते गोष्पदे मज्जन्ति दुश्चरतपश्च वृथोत्सृजन्ति ॥ ११ ॥

इति शाब्दः प्रभृतिवचनः ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

क्रोधस्य गोष्पदत्वं स्वविषयघातमात्रेण विच्छिन्नत्वान्न तु जैह्वादिवदविच्छिन्नत्वमिति ॥ ११—२० ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

एवं श्लोकद्वयेन कामादिदोषाभाव उक्तः तथा च माहात्म्यमुक्तं भवति पुरुषबुद्धिग्राह्यजितेन्द्रियत्वादि तन्निराकरणं चतुर्भिर्वदन् त्रिभिस्तदाह—भगवद्भगवदीयासाधारण्यैर्गुणैः तत्र सप्रसङ्गं भगवद्धर्ममाह—भयाभावमात्रमाशंसितं पूजाया विधिकतामाह—इत्थं वदसीति महतो वचनमयाल्पानां पूजाप्रकारः कस्न्यूनतावश्यापकः अभयदानात्र परं दानम् आसनादिकमपि प्राप्तमिति गम्यते हे महद्देवममानं देयमिति लौकिक उपदेशः तेऽपि स्वरूपतो महान्त इति देवा इत्युक्तं विरुद्धकरणात् क्रीडा महता बहुमानाश्चर्यादरस्थं येद्याविदर्शनात्कामे निर्लिप्तत्वात्स्त्रीसहितं कर्म कृपासहितं वा दीनदर्शनात् क्रियाविशेषणत्वे 'विज्ञापनामिव भक्तेषु कुर्वन्ति कथनाशितान् भक्तान् स्मृत्वा त्वयि सर्वं सम्भवति सर्वेषां पितामहत्वात् तत्कृतक्षोभाभावात् गुणकार्यं विकृतं तदभाव किञ्च ज्ञानेन्द्रियजययोरपि प्रसिद्धानामपि श्लाघ्ये सम्मतज्ञानेन्द्रियजयौ किं वक्तव्यौ तदाह—स्वारामाश्च ते धीराश्च तेषां निकरैरानतं पादपद्मं यस्येति ॥ ९ ॥

त्वयि सर्वं युक्तं परं सेवकानां दुर्वेति तन्निराकरणं च पाक्षिकम् अतो निश्चनिराकरणाय तदनुवदन्ति—प्रवाहमर्यादासहितो भक्तः पुष्टो भवति तत उभयत्राधिकृता देवा सेव्याः स्वसेवापरित्यागेन भगवत्सेवापराणां प्रवाहमर्यादयोर्विघ्नं कुर्वन्ति अतः प्रवाहमर्यादयोः पदमलब्ध्वा देवा इव भवन्ति तदाह—त्वां सेवतामिति । फलपर्यन्तगीत पदं व्रजतामित्युक्तं यद्यपि "यथा तरोः" इति न्यायेन भगवत्पूजायां तुष्टा भवन्ति । तथापि भगवद्भक्तस्य देवाभावाच्च सेवामात्रेण तुष्टा भवन्ति तदाह, सेवतामिति

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

बहुप्रकारा विघ्नास्ततस्तत्कार्यं ततश्च किमपि कार्यं न सिद्ध्यतीत्यर्थः प्रवाहे बलिं ददतः ततः स्वभागान् मर्यादायां मच्च ते सर्वत्र विघ्नकर्त्तारो दुर्जना इव तदाह—नान्यस्येति । अनन्यत्वेनैकत्वात् यद्यपि "यदनु चरित" इति न्यायेन भगवतोऽपदिश्यमिमतं तथापि लोकापवादात् दयया वा बाधिता विघ्नस्थानां तदास्थानं प्राप्नोति कश्चिदित्यर्थः । विघ्नानां प्राचुर्यं किं वक्तव्यमत आह—यदि विघ्नमूर्ध्नीति विघ्नास्तत्कार्याणि नेतुं मस्तके स्थापितवन्तः यदि तत्रैव तत्स्थापनं तर्हि तत्रैव पदं च धत्त इत्यर्थः । उत्तरवाक्यगतो यच्छब्दः तेच्छब्दं नापेक्षते "तथा न ते माधव" इत्यत्र भगवदीया यादवा इव उदासीनाः सेवमानास्त्वत्रेति विशेषः ॥ १० ॥

एतद्दूरीकरणाय विघ्नानां माहात्म्यमाह परः सहस्रेष्वपि विघ्नेषु षडिमे प्रधानभूताः तत्राप्युत्तरोत्तराधिक्यं तदाह—क्षुदित्यादिना "समुद्र इव हि कामः" इति श्रुतेः । मनुप्रकृतिकस्य कामस्य उत्तरणं कठिनम् अन्यथा यावज्जीवमनन्तजन्मसु बाधते तत्र सहनं तरणं प्रतीकारो भजनम् अतः प्रतीकारसाधनानि कर्तॄणि वशीकरणं चापरो धर्मः सर्वेषां मवशीकृतानामेव तरणादिशङ्का अतितीर्येति बहुकालसहने तथा न बाधन्त इति ते दुर्लभाः कामे तु मप्रत्येन्द्रियं सुखमस्ति क्रोधे तदपि न शत्रुमरणस्य दुःखाभावहेतुत्वेऽपि न स्वकृते विशेषः क्रोधश्च दुःखात्मकः तदपि विवेकाभिमानवत एव क्रोधे सहनशक्तैव नास्ति वशीकृत एव भवतीत्याह—वशं यान्तीति । कामविचारे क्रोधस्त्वतितुच्छः प्रवाहमर्यादायां दियत्वमावात् विवेकविभुतित्वाच्च हेतोरत्यभावात् तदाह—गोः पदे मज्जन्तीति—विरुद्धवाक्यस्य पदैकदेशे मज्जन्तीत्यर्थः । कामः कायिकः क्रोधो वाचनिक इति सिद्धम् उभयोस्तारतम्यार्थं श्लिष्टवचनं कामे मग्नानां मर्यादाफलानुभावोऽस्ति क्रोधे तदपि नेत्याह—दुश्चरतपश्च वृथोत्सृजन्तीति । मग्नः शिरोभारमिव अपराधोपयोगाभावात् वृथेति त्रिकालगुणाः शीतोष्णवर्षाः अतिश्रमेण तीर्त्वा गोष्पदे ईश्वरानिर्मिते एवं कामक्रोधाभावं भगवति दृष्ट्वा भक्तेष्वप्राधान्यपौरुषदर्शनमिषेण स्तुतिरुक्ता ॥ ११ ॥

एवं ज्ञानमचिन्त्यैश्वर्यज्ञानादीति तन्निराकरणाय स्त्रियो दर्शितवानित्याह—स्त्रीभिः कामजयो यस्य क्रोधस्याप्यर्चनेन हि उत्कर्षाधायकत्वेन शुभयोरित्यचिन्त्यता तेषां सतां तेऽप्य इति वा तेषामेव सम्बन्धिन्य इति वा ब्रह्माण्डान्तरस्थाः अन्यथा उर्वशीदानमनुचितं स्यात् कामादीनामपि विवेकविस्मारकत्वेनेत्यद्भुतत्वं दर्शनं यासां ताः स्त्रीः अर्चने कामादीनां पूजायां स्थापनायां ननु तूष्णीं भावेनापि सर्वसिद्धौ किमित्येवं कृतवानित्यत आह—विभुरिति । समर्थस्य हि सद्भिः क्रीडनं तद्वदित्यर्थः ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

हे नरदेव ! भवद्भक्ते श्रीनारायणे इत्थं द्रुवति सति देवाः कामादयः सघृणं कृपायुक्तं तं परे परमे निर्विकारे स्वारामाः आत्मारामाः ॥ ९ ॥

त्वद्भक्ता अपि त्वत्प्रसादादस्मान्न गणयन्ति, कुतः ? पुनस्त्वं गणयिष्यसीत्याहुः—त्वां सेवमानानां जनानां सुरैरिन्द्रादिभिः कृता अन्तराया अस्मदादयो विघ्ना बहवो भवन्ति इन्द्राद्यैर्विघ्नाः कथं क्रियन्ते अत्राहुः—स्वौक इति । स्वस्थानं स्वर्गं मतिक्रम्य परमं तव स्थानं व्रजतां विघ्नकरणं खलु मात्सर्यहेतुकमित्येति भावः । नान्यस्य कर्मिप्रभृतेः कुतः बर्हिषि यज्ञे बलीन् पुरोडाशादीन् तत्तद्भागान् इन्द्रादिभ्यः करान् राज्ञे कर्षकाश्चेव ददतः तर्हि मद्भक्तो विघ्नैर्भ्रश्यति नेत्याहुः । धत्त इति । यदीति निश्चये यतस्त्वं सर्वसुराधीश्वरोऽवितारक्षकः अतोऽसौ विघ्नानां मूर्ध्नि पदं धत्ते कुतः । पुनस्त्वयि विघ्नकर्त्तृता इति भावः ॥ १० ॥

त्वद्भक्तिविमुखानां तपश्चरतां तु कामिनः अस्माकं वा वशा भवन्ति क्रोधस्य वा तत्राप्यशक्ताः कामोपभोगमपि तावदनुभवन्ति, क्रोधस्य वशाः पुनरतिमन्दा इत्याहुः । क्षुत्तृडिति । क्षुच्च तृट्च त्रिकालगुणाः शीतोष्णवर्षाणि च मारुतस्पर्शगिन्द्रियभोग्यो मरुवानिलश्च जैह्वयो जिह्वाभोग्यश्च शैश्न्यः शिश्नभोग्यश्च एतान् अस्मान् अपारजलधिरूपान् अतितीर्य विलङ्घ्य गोष्पदे मज्जन्ति किञ्च, जले मज्जन्तो यथा विवशीभूय मस्तकारोपितं धनभारमुत्सृजन्ति तथा वृथा न मोक्षाय न भोगाय आपातिना दुश्चरं तपश्च विसृजन्ति ॥ ११ ॥

प्रगृणतां स्तुवतस्तानननादृत्य स्त्रियः योगनिर्मिताः स्त्रीः शुश्रूषां सेवां कुर्वतीरिव प्राकृतीरित्यर्थः । तेषां स्वलावण्यादिदर्पोपशमाय दर्शयामास ॥ १२ ॥ १३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हे नरदेव ! देवाः कामादयः सव्रीडानि नम्राणि शिरांसि येषां ते सघृणं कृपायुक्तं तं भगवन्तमूचुः । परे पूर्णे अविकृते क्रोधादिरहिते स्वारामे भगवति ये धीराः प्राप्तनिष्ठाः तेषां निकरैः समूहैः आनतं पादपद्मं यस्य तस्मिन् एतत्कामक्रोधादिसंस्पृष्टत्वं न ॥ ९ ॥

भगवतः कामाद्यऽस्पृष्टत्वं कैमुतिकन्यायेनाहुः—त्वामिति । अन्यस्य भगवत्सेवकस्य राज्ञे बलीन् च स्वभागान् सुरेभ्यो ददतोऽपि सुरकृताः बहवः अन्तरायाः भवन्ति स्वौकः स्वस्थानं सुरलोकं विलङ्घ्यापि ते परमं पदं स्थानं व्रजतां त्वां सेवमानानां तु सुरकृताः अन्तरायाः नेत्यन्वयः । न तवेति किं वक्तव्यं यदि तु विघ्नमूर्ध्नि पदं धत्ते प्रभुर्हि कुर्यात्त्वत्सेवक इति शेषः तदा त्वमविता रक्षकोऽस्त्येव ॥ १० ॥

भगवतस्तद्भक्तानां च कामक्रोधादिवर्जितत्वं निरूप्य भगवद्भक्तानां कामादिवश्यत्वेनाकृतार्थत्वमाहुः—क्षुदिति । बहवस्तावत् क्षुत्तृडादिकामाभिभूताः असिद्धा अकृतार्था एव म्रियन्ते केचित्तु क्षुच्च तृट्च त्रिकालगुणाः त्रिचातुर्मास्यगुणाः शीतोष्णवर्षाणि च मारुतश्च नानाविधजैह्व्याः जिह्वाभोगाश्च शैश्न्याः शुद्धोपभोगाश्च तानस्मान् अपारजलधीन् जलधिवद्दुस्तरान् सुखबुद्ध्या तत्र तत्राशक्तैर्जनैः अतुमशक्यान् अतितीर्य विलङ्घ्य तत्र तत्रासक्तिं त्यक्त्वापि गोष्पदे मज्जन्ति अत्यल्पे क्रोधनाम्नि गर्ते पतन्ति तदेव स्पष्टयाहुः—क्रोधस्य वशं यान्तीति । पुत्रशिष्यादिशिक्षार्थविषयकक्रोधव्यावृत्त्यर्थमाहुः—विफलस्येति ।

(१ ते देवानुचरा दृष्ट्वा स्त्रियः श्रीरिव रूपिणीः ।
गन्धेन मुमुहुस्तासां रूपौदार्यहतश्रियः ॥ १३ ॥
तानाह देवदेवेशः प्रणतान् प्रहसन्निव ।
आसामेकतमां वृङ्ध्वं सवर्णां स्वर्गभूषणाम् ॥ १४ ॥
ओमित्यादेशमादाय नत्वा तं सुरबन्दिनः ।
उर्वशीमप्सरःश्रेष्ठां पुरस्कृत्य दिवं ययुः ॥ १५ ॥
इन्द्रायाऽऽनम्य सदसि शृण्वतां त्रिदिवौकसाम् ।
ऊचुर्नारायणबलं शक्रस्तत्रास विस्मितः ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अत एव तपः वृथोत्सृजन्ति चकारात् क्रोधविषयस्य जनस्य पापं गृह्णन्ति ॥ ११ ॥

तेषां कामादीनाम् इति इत्थं गृणतां विभुः नारायणः स्त्रियः इच्छयाऽऽविःकृताः स्त्रीः भगवन्! आज्ञापयेत्येवं शुश्रूषां कुर्वतीः भगवतापि साधुसाध्विति स्वर्चिताः सुष्ठु अर्चिताः अद्भुतदर्शनाः अदृष्टपूर्वदर्शनाः कामादितन्नियोजकेन्द्रादिभ्यश्चात्यन्तमुत्कृष्टदर्शना-स्तत्सौन्दर्यादिदर्पहराः दर्शयामास ॥ १२ ॥

भाषा टीका ।

हे नरदेव ! परीक्षित जी ! इस प्रकार से अभय देनेवाले भगवान् के कथन को सुनकर कामादिक देवता लज्जित होकर मस्तकों को नींचा करके बड़ी अधीनता से भगवान् से बोले, कि—हे प्रभो ! यह ऐसी बात आप के विषय में कुछ आश्चर्य नहीं है, क्योंकि ? आप माया से परे हैं और विकार रहित हैं केवल अपने आत्मस्वरूपही में रमण करने वाले और मुनिजन आप के चरण कमलों की सेवा करते हैं ॥ ९ ॥

जो पुरुष आप की सेवा करते हैं उनके ऊपर देवता लोग बहुत विघ्न करते हैं क्योंकि वे उपासक लोग देवताओं के स्थानों को भी लांघकर आप के परमपद को जाने वाले हैं, तिस से और जो लोग कर्मकांड से देवताओं को बली देते हैं तिनका विघ्न देवता नहीं करते हैं परन्तु तौ भी यदि आप भक्तों की रक्षा करने वाले हो तौ वे उपासक लोग विघ्न करने वालों के मस्तकपर पैर रखकर आप के स्थान को चले जाते हैं ॥ १० ॥

संसार में कोई तपस्वा वाले ऐसे हैं कि जो क्षुधा तृषा और तीनों कालों के दुःख और गुण कृत दुःख पवन के जिव्हा रस के लिंग इंद्रिय के दुःख इम काम आदि अपार समुद्रों के पार उतर कर निष्फल केवल क्रोध के वश होजाते हैं सो गौ खुर के बरोबर जल में डूब जाते हैं बड़ी दुष्कर तपस्या को व्यर्थ ही छोड़ देते हैं ॥ ११ ॥

इस प्रकार से उन के स्तुती करतेही में भगवान् ने बड़ी अद्भुत रूप वाली स्त्रियों को दिखा दिया जोकि सुन्दर प्रशंसनीय थीं और शुश्रूषा कर ने में हाजिर होरहीं थीं ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

रूपिणीर्मूर्त्तिमतीः श्रीरिव या: स्त्रियः स्त्रीर्दृष्ट्वा तासां तु रूपस्यौदार्येण महत्त्वेन हता श्रीः कान्तिर्येषां ते ॥ १३ ॥

वृङ्ध्वं वृणीध्वं क वयं वराकाः क चेमा इति चेत्तत्राऽऽह सवर्णां समानरूपाम् नैकाऽप्यस्मदनुरूपेति चेन्मा भवतु तथाऽपि स्वर्गस्य भूषणरूपाम् ॥ १४ ॥

सुरवन्दिनो देवभृत्याः ॥ १५ ॥

इन्द्राय इन्द्रं प्रति नारायणबलमूचुः शक्रस्त्रास त्रासं प्राप्तो विस्मितश्च तत्र विस्मित आसेति वा ॥ १६ ॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

स्त्रियः स्त्रीः तासामुर्वश्यादीनाम् ॥ १३ ॥

तान् कामादीन् तेषां तिरस्कारे शमिनां हास्यानौचित्यादित्यनेन सुखप्रसक्तिर्द्योत्यते । यद्वा, भगवदाराधनतपोनिष्ठानां न विघ्नाः प्रभवन्तीति प्रहसन् तथाच इत्येत्यनधिकार्थे स्वर्गभूषणरूपामिति व्याख्यानादूभूषणामित्येव पाठः ॥ १४ ॥

तुर्ओमित्यङ्गीकारे आदेशमाज्ञाम् ॥ १५ ॥

तत्र नारायणबले विस्मितो बभूव ॥ १६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

वृङ्ध्वं वृणीध्वम् ॥ १४—१६ ॥

(१) ता इति वीर० पाठः ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ता इति देवानुचराः कामादयः श्रीरिव रूपिणीः सुन्दरमूर्त्तिमतीः ता नारीर्दृष्ट्वा तासां रूपौदार्येण रूपसौन्दर्येण हता श्रीः कान्तिर्येषां ते तासां गन्धेन शरीरसौरभ्येन मुमुहुः पारवश्यं प्रापुः ॥१३॥

किञ्च, देवदेवो ब्रह्मा तस्यापीशः श्रीनारायणः तान् कामादीनाह-तदेवाह, आसां स्त्रीणां मध्ये एकतमां वृङ्ध्वं वृणीध्वं क वयं वराकाः क चेमा इति चेत्तत्राह सवर्णां समानरूपाम् इति न काप्यस्मदनुरूपा इति चेत्तत्राह, स्वर्गभूषणामिति । स्वर्गस्य भूषणरूपाम् इति ॥ १४ ॥

ओमित्यादि द्रुमिलवाक्यम् ते सुरवन्दिनो देवभृत्याः कामादयः आदेशं भगवदाज्ञाम् ओमित्यङ्गीकृत्य तं प्रणम्य च उर्वशीनामाप्सरःश्रेष्ठामादाय तां च पुरस्कृत्याग्रतो निधाय दिवं स्वर्गं ययुः ॥ १५ ॥

गत्वा च किं चक्रुरिन्द्रश्च किं कृतवांस्तदाह-इन्द्रायेति । सदसि त्रिदिवौकसां देवानां शृण्वतां सताम् इन्द्राय नमस्कृत्य श्रीनारायणस्य बलम् ऊचुः शक्र इन्द्रस्तत्र तावद्विस्मितः सन् तत्रास अभैषीत् ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

रूपिणीः प्रशस्तरूपाः ॥ १३ ॥

वृङ्ध्वं स्वीकुरुत ॥ १४ ॥

सुराणां बन्दिनः वन्दिग्रहणापदवः ॥ १५—१६ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

अदेयदानं वक्तुं तदपेक्षमाह—देवानुचरा अपि इन्द्राद्यन्तःपुरस्त्रीदर्शनेऽपि मोहाभावाय तादृशोऽपि सर्वजगत् श्रियो मूर्त्तिमत्य इव ता जाता इति तासां पद्मकिञ्जल्कगन्धानां गन्धेनैव मोहं प्राप्ताः कुतः पुजाज्ञानमित्यर्थः । श्रीरिति द्वितीया बहुवचनं गन्धेनैव यत्र मोहः किं पुनः स्पर्शनादिभिरिति भावः । लोलुपतां वक्तुं विशेषणान्तरमाह—तासां रूपौदार्याभ्यां हता श्रीर्येषामिति उत्तरसम्बन्धे षष्ठ्या अलुक् श्रीर्द्विविधाः कान्तिर्धनं चेति रूपेण कान्त्याधारेण कान्तिनाशः औदार्येण च धनस्य च औदार्याभावे धनं शिलावत् अथवा रूपस्य यदौदार्यं तासां रूपसन्निधानमात्रेण सर्वे रूपवन्तो भवन्तीति पूर्वकान्तेर्नाशः ॥ १३ ॥

तेषामभिप्रायं ज्ञात्वा अदेयमपि दत्तवानित्याह—आधिकाराभिनिवेशं दृढं मत्वा सन्तुष्ट इव ददातीति देवानां देवा इन्द्रादयस्तेषामीश इति उर्वश्यापीन्द्रस्य भोगः अतः अपकारिभोगपर्यवसानान्न दद्यात् तेषां दोषाभावमाह—प्रणतानिति । मोहमपि प्राप्य ते न पश्यन्तीत्यर्थः । अत एव द्रष्टुमपि भीतान् दृष्ट्वा जातमपि हास्यं दोषाभावायोपबृंहितमित्याह—प्रहसन्निवेति । भवतामिन्द्रस्य चोपकाराय सवर्णां स्वर्गभूषणामिति समानो वर्णो यस्या इति पञ्चमी ॥ १४ ॥

अस्यानुभावप्रवृत्तिं वक्तुं हेतुमाह—ओमित्यङ्गीकारे आज्ञामादाय नमनेन सेवकत्वस्थापनं दत्तग्रहणे कीर्तिस्थापने च हेतुः वन्दिन इति अप्सरस्त्वमेतेषां सुखाय ॥ १५ ॥

अनुभावमाह—कामादिजयो वशीकरणम् इन्द्रादिमानभङ्गश्चेति यत् तत्रासेति भयम् यथासुखं करिष्यतीति चरित्रेण विस्मयः । एवं देवविस्मापनं नारायणचरित्रमुक्त्वा क्रमेणोपकारानुसारेण सर्वावतारान् सङ्क्षेपत आह-यावदध्यायसमाप्ति तत्र क्रियापेक्षया ज्ञानस्य प्राधान्यं तत्रापि प्राधान्यं सनकादीनां तेन प्रथमं हंसचरित्रं त्रयोदशाध्याये स्पष्टम् ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तेषां पराभवदर्शनेन प्रहसन् इवेत्यतिगाम्भीर्येण प्रहासरोधो व्यञ्जितः वृङ्ध्वं वृणीध्वं क वयं वराकाः क चेमा इति चेत्तत्राह—सवर्णां समानवर्णां अतुल्या अितासां विधूतिरूपां प्राकृतीमपि काञ्चिदित्यर्थः । तथापि स्वर्गस्य भूषैव भविष्यतीत्याह, स्वर्गेति ॥ १४ ॥

आदेशमादाय आज्ञां गृहीत्वा सुरवन्दिनो देवभृत्याः ॥ १५ ॥
तत्रास अहो मया अपराद्धमिति त्रासं प्राप्तः ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

देवस्येन्द्रस्यानुचराः ते कामादयः रूपिणीः प्रशस्तरूपाः किं बहुना ? श्रीरिव श्रीसारूप्ययुक्ताः स्त्रियस्ताः स्त्रीर्दृष्ट्वा तासां रूपस्यौदार्येणोज्जृम्भितत्वेन हता श्रीः कान्तिर्येषां ते तथाभूताः सन्तः तासां गन्धेन मुमुहुः ॥ १३ ॥

देवाः इन्द्रादयः तेषां देवाः ब्रह्मशिवादयः तेषामीशः इवशब्दः स्वभावादेव प्रहसितमुखत्वं भगवतो द्योतयति-वृङ्ध्वं वृणीध्वम् । ननु, मत्कुणेन गरुडस्येव मादृशैः एतासां स्वीकरणं न युक्तमित्यत्राह-सवर्णामिति । स्वसमानरूपाम् । ननु, सवर्णा आसु नास्तीत्यत्राह—स्वर्गभूषणामिति । एकस्य प्राणिनस्तु का कथा सर्वोऽपि स्वर्गः आसां मध्ये एकतमाया अपि तुल्यो यद्यपि नास्ति तथापि स्वर्गालङ्कारतयैकां स्वीकुरुतेति फलितोऽर्थः ॥ १४ ॥

सुरस्येन्द्रस्य वन्दिनो भृत्याः ॥ १५ ॥

इन्द्राय इन्द्रं प्रति आनम्य प्रणम्य नारायणस्य बलमैश्वर्यमूचुः तदा शक्रः विस्मितः तत्रास भीतश्च ॥ १६ ॥

भाषा टीका ।

इन्द्र के सेवक उन काम देवादिकों ने जब रूपवती लक्ष्मी सरीकी उन स्त्रियों को देखा तब उनके रूपकी सुन्दरताई इनकी श्रीहत होगई और उनके गन्ध से मोहित होगये ॥ १३ ॥

जब वे देवता नमस्कार करते थे तब भगवान् हसते सरीके उन से बोले कि इन अप्सराओं के मध्य में से एक किसी को अपनी सी देख कर तुम लेजाओ जो कि तुमारे स्वर्ग की भूषण रूप हो जावेगी ॥ १४ ॥

हंसस्वरूप्यवददच्युत आत्मयोगं दत्तः कुमार ऋषभो भगवान् पिता नः ।
विष्णुः शिवाय जगतां कलयाऽवतीर्णस्तेनाऽऽहृता मधुभिदा श्रुतयो हयास्ये ॥ १७ ॥
गुप्तोऽप्यये मनुरिलौषधयश्च मात्स्ये क्रौडे हतो दितिज उद्धरताऽम्भसः क्ष्माम् ।
कौर्मे धृतोऽद्रिरमृतोन्मथने स्वपृष्ठे ग्राहात्प्रपन्नमिभराजममुञ्चदार्त्तम् ॥ १८ ॥
संस्तुन्वतोऽब्धिपतितान् श्रमणानृषींश्च शक्रं च वृत्रवधतस्तमसि प्रविष्टम् ।
देवस्त्रियोऽसुरगृहे पिहिता अनाथा जघ्नेऽसुरेन्द्रमभयाय सतां नृसिंहे ॥ १९ ॥
देवासुरे युधि च दैत्यपतीन् सुरार्थे हत्वाऽन्तरेषु भुवनान्यदधात्कलाभिः ।
भूत्वाऽथ वामन इमामहरद्बलेः क्ष्मां याच्ञाच्छलेन समदाददितेः सुतेभ्यः ॥ २० ॥

भाषा टीका ।

तब वे देव के मुख्य गण भगवान् की आज्ञा का अङ्गीकार [illegible] नमस्कार करके सब अप्सरों मे श्रेष्ठ उर्वशी को ले आगे करके स्वर्ग को चले गये ॥ १५ ॥

इन्द्र की सभा मे जाकर नमस्कार करके सब देवतों के सुनतेही श्रीनारायण के प्रभाव को उनने वर्णन किया तिसको सुनकर इन्द्र भी विस्मय को प्राप्त होकर बहुत डरगये ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अन्यानप्यवतारांस्तच्चरितानि चाऽऽह-हंसस्वरूपीति । दत्तो दत्तात्रेयः कुमारः सनकादिः नः पिता ऋषभश्च विष्णुरेव कलयाऽवतीर्णः सन्नात्मयोगमवदत्, तेन विष्णुना हयास्ये हयग्रीवावतारे मधुभिदा सता तत्र पातालतः सनातन्यः श्रुतय आहृताः॥१७॥

इला पृथ्वी ओषधयश्च गुप्ताः क्रौडे च वाराहावतारे ग्राहाद्गजेन्द्रममुञ्चन्मोचयामास एवमादौ यत्रावतारे नाम नास्ति तत्र विष्णुः शिवाय जगतां कलयाऽवतीर्ण इत्यनुवर्त्तनीयम् ॥१८॥

संस्तुन्वतः स्तुतिं कुर्वाणान् ऋषीन्वालखिल्यान्कश्यपार्थे समिदाहरणे गोष्पदे निमग्नानिन्द्रेणोपहसितानुद्धृत्याऽऽपदोऽमोचयत् तमसि ब्रह्महत्यायां प्रविष्टं मोचयामास असुरगृहे पिहिता निरुद्धा या देवस्त्रियस्ताश्चामुञ्चदनेकावतारैः ॥ १९ ॥

अन्तरेषु सर्वमन्वन्तरेषु कलाभिर्मूर्तिभिर्भुवनान्यदधादपालयत् इमां क्ष्मां समदाददत् ॥ २० ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी ।

आत्मयोगं ज्ञानयोगं तत्र हंसः सनकादिभ्यः दत्तो यदुप्रह्लादादिभ्यः कुमारो नारदाय ऋषभश्चात्मजेभ्यं ज्ञानयोगमवददिति ज्ञेयं ततः मधुदैत्यात् ॥ १७ ॥

गुप्त इति युग्मकं हरिसंज्ञकेऽवतारे ग्राहाद्गजेन्द्रं मोचयामास कुतो मोचयदित्यपेक्षायां कश्यपार्थमित्याद्यध्याहृतम् ॥ १८—१९ ॥

इत्यादितेरप्यनेकार्थत्वेन अपालयदिति व्याख्यातम् अयेत्यर्थान्तरे ॥ २० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

दत्तः कुमारो दत्तात्रेयः अत्रापि भगवान् कलयावतीर्णः इत्यनुषङ्गः ॥ १७ ॥

मात्स्ये अप्यये प्रलये इलां भूमितत्त्वम् अमुञ्चत् अमोचयत् ॥ १८ ॥

पिहिता येनेत्यध्याहारः ॥ १९ ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अन्यानप्यवतारांस्तच्चरित्राणि चाह-हंसस्वरूपीति । अच्युतो विष्णुर्हंसादिरूपेण जगतां शिवाय मङ्गलाय कलयाऽवतीर्णः सन्नात्मयोगं जीवात्मपरमात्मयाथात्म्यज्ञानयोगमवददुपदिष्टवान् इति सम्बन्धः । तत्र दत्तो दत्तात्रेयः कुमारः सनकादिः नोऽस्माकं कव्यादीनां पिता भगवानृषभश्च तेन विष्णुनैव हयास्ये हयग्रीवावतारे मधुभिदा मधुनामासुरमभिनदिति तथाभूतेन श्रुतयो वेदा अपहृता आनीताः ॥ १७ ॥

तथा मात्स्येऽवतारे मनुः सत्यव्रतः गुप्तो रक्षित इला पृथ्वी औषधयश्चकाराहरयश्च गुप्ता इत्यर्थः । क्रौडे वराहावतारेऽम्भसः प्रलयजलात् क्ष्मा भूमिम् उद्धरता विष्णुना दितिजो हिरण्याक्षो हतः कौर्मे कूर्मावतारेऽमृतोन्मथननिमित्ते स्वपृष्ठेऽद्रिर्मन्दरो धृतः तथा ग्राहाद्गजेन्द्रं शरणागतममुञ्चदमोचयत् यत्रावतारनाम न दृश्यते तत्र विष्णुः शिवाय जगतां कलयावतीर्ण इत्यनुसन्धेयम् ॥ १८ ॥

संस्तुन्वतः स्तुतिं कुर्वाणानृषीन् वालखिल्यान्कश्यपार्थे समिदाहरणे गोष्पदे मग्नानिन्द्रेण उपहसितान् उद्धृत्यापदोऽमोचयत् तमसि ब्रह्महत्यायां प्रविष्टं मोचयामास असुरगृहे हिरण्यकशिपुगृहे

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका।

पिहिता निरुद्धा या अनाथा देवस्त्रियस्ताश्चामोचयत् नृसिंहः सन् सतां साधूनामभयायासुरेन्द्रं हिरण्यकशिपुं जघ्ने हतवान् ॥ १९ ॥

दैवासुरे युधि युद्धे सुरार्थे इन्द्राद्यर्थं दैत्यपतीन् हत्वाऽन्तरेषु सर्वमन्वन्तरेषु कलाभिर्मूर्तिभिरवतारैरिति यावत् भुवनान्यदधादपालयत् वामनो भूत्वा याच्ञा व्याजेन बलेः सकाशादिमां क्ष्मामहरत्तां चादितेः सुतेभ्यः इन्द्रादिभ्यः समदात्प्रायच्छत् ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

ये ये हरेरवतारास्ते ते सर्वेऽप्येवंविधमाहात्म्याम्बुधय इति ज्ञाप्यते—हंसस्वरूपीति। विष्णुः कलया हंसरूप्यवतीर्णो जगतां शिवाय्यात्मयोगं परमात्मज्ञानमवदत् एवं दत्तादावप्यन्वेतव्यं कुमारो नाम हरेरूपान्तरं सनत्कुमारादियोगीश्वरज्ञानोपदेष्टा—

"कुमारनामा तु हरिर्ब्रह्मचर्यवपुः स्वयम्।
सनत्कुमाराय परं प्रोवाच जगदीश्वरः" ॥

इत्यनया स्मृत्या—

"विष्णोः सनत्कुमाराख्याच्छुश्रुवुर्ज्ञानमुत्तमम्।
सनत्कुमारप्रमुखा योगेशाः परमेश्वरात्" ॥

इत्यनया चोक्तार्थः सिद्ध इति हयास्ये हयग्रीवावतारे तेन मधुभिदा श्रुतय आहृताः ॥ १७ ॥

मात्स्येऽवतारे इला भूमिर्गुप्ता अप्यये प्रलये सत्यव्रतो नाम मनुः सप्तऋषयश्च गुप्ताः अम्भसः क्ष्मामुद्धरतो हरेः क्रोडे वराहावतारे दितिजो हिरण्याक्षो हतः अमृतोत्पत्तये क्षीरसमुद्रोन्मथने मन्दराद्रिः तापसो नाम हरिरिभराजं ग्राहादमुञ्चत् ॥ १८ ॥

व्यासावतारे संस्तुन्वतः प्रणमतश्च ऋषीन् संसाराब्धिपतितान् संसाराब्धेरमूमुचत्—

"सुपर्णा ऋषयो व्यासं नाधमाना ययुः सदा।
ध्वान्तं निवर्तयास्माकं मुमुग्धीति च वादिनः" ॥

इति वचनात्। व्यासावतारे इयं कथेति ज्ञायते नृसिंहे नरसिंहावतारे तमसि प्रविष्टं कर्तव्यमूढमिन्द्रं वृत्रवधतो दोषादमूमुचत् सतामभयायासुरेन्द्रं जघ्ने असुरगृहे पिहिताः अनाथाः देवस्त्रियः अप्सरसश्च व्यमोचयदिति—

"स्मरणात्तु नृसिंहस्य शक्रो मुक्तो वृत्रवधात्।
हिरण्यकहृताश्चापि तथैवाप्सरसां गणा" ॥

इति वचनसिद्धेयं कथा ॥ १९ ॥

उपेन्द्ररूपो हरिः दैवासुरयुद्धे सुरार्थं दैत्यपतीन् हत्वा अन्तरेषु मन्वन्तरेषु भुवनान्यदधात् वामनो भूत्वा याच्ञाच्छलेन बलेरिमां क्ष्माम् अहरत् हृत्वा च तामदितेः सुतेभ्यः समदादित्यन्वयः तदुक्तं—

"उपेन्द्ररूपी भगवान्प्रतिमन्वन्तरं विभुः।
असुरान्हन्ति नियतं श्राद्धदेवे च वामनः" ॥

इति ॥ २० ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी।

तथाऽन्यान् प्रमाणपर्यन्तानाह—अच्युत इति। सर्वरूपेष्वपि स्वरूपाप्रच्युतः आनन्दरूप एव तत्तदाकारं प्रदर्शयतीत्यर्थः अवदद्च्युत आत्मतत्त्वमिति पूर्वार्द्धे सर्वत्रानुषङ्गः हंसरूपात्रयसनत्कुमारऋषभा ज्ञानकलावतीर्णाः तृतीयपादस्य सर्वेष्ववतारेष्वनुषङ्गः फलवाक्यस्य कलयेति ज्ञानशक्त्या क्रियाशक्त्या वा जगतामिति त्रिलोकस्थानां तत्तदुपकारसिद्ध्यर्थं बहुवचनम्। अवतारास्त्रिविधाः सहजरूपाः समागताः शुद्धसत्त्वस्वरूपे आविर्भूताः स्वत एवेति च तत्र पुरुषः शरीरे नारायणः स्वतः शरीरे च तदन्ये शरीरे कृष्णः स्वत ऐक्याभिमाने आधाराधेयभावो निरभिमाने हंसस्तु आनन्दमयः प्रियशिरस्त्वादिरूपः हंसस्येव स्वरूपमस्यास्तीति हंसस्वरूपी अतोऽस्य भिन्नतया निर्देशः ततश्चत्वारः कुमारस्याप्यंशेऽप्यवतारतुल्यत्वम् ऋषभे विशेषमाह—भगवान् पिता न इति। षड्गुणैश्वर्याविर्भावो भगवन्मार्गप्रवर्तकश्च अजनाभनामाऽप्यवर्षादित्वैश्वर्यं परिपालनं वीर्यं शतक्रतव इति धर्मो वा जनपद इति यशः जयन्त्यामिति श्रीः नायं देह इति ज्ञानं प्रहगृहीत इवेति वैराग्यम् अस्मज्जनकं भगवन्मार्गः येनेति सहितस्तृतीयपादोऽग्रिमचतुर्षु ज्ञानप्राधान्येन वेदोद्धरणं हयग्रीवे मधुकैटभवधो वेदोद्धरणं च चरित्रं कर्णाभ्यामुत्पद्यमानौ शब्दमिन्द्रियमन्तर्भिरवोत्पन्नौ तद्वधेन तदुदरात् शङ्खे निवेश्याहृताः श्रुतय इत्यर्थः। मध्योरेव ग्रहणं प्रकृते ज्ञानोपयोगाय प्रपञ्चस्य मधुत्वं कीटानामपीन्द्रगोपादीनां माययेति तामसी माया तस्यामुत्पन्नः कैटभः प्रवाहपोषक इति तद्वधे मर्यादासिद्धिः ॥ १७ ॥

प्रतिपाद्यमवतारानाह——द्वाभ्याम्। वेदोद्धरणसाम्यात् मत्स्यमाह अप्यये ऐच्छिकप्रलये मनुः इला ओषधयश्च चकाराद्वेदाः हयग्रीवासुरवधं कृत्वा आहृता बहुकालप्लवनेच्छायामयमवतारः इच्छयैव प्रलयः षष्ठमन्वन्तरानन्तरं पुष्टित्वाददोषः पृथिव्यामिमाधिकारीबीजानि च सम्पादनीयानि च पतन्तीति तथा कृताः अस्मिन्मन्वन्तरे कृष्णावतारादिलौकिकाधिकाराय बहुकालं तथा ज्ञानोपदेशः भूमिसाम्यात्तदनन्तरं वराहः दितिजो हिरण्याक्षः तृतीयस्कन्धषडध्यायकथात्र अत एव भूम्युद्धारो गौणः अम्भस इति न कृष्णावतारवत् मग्नोद्धरणसाम्यात्तदनु कूर्मः अमृतोन्मथनार्थं स्वपृष्ठ इति कालकूटवञ्चनादिदोषसम्भवात् पुष्ट्या त्वदोषः एवं देहाभिमानरहितान् चतुर अवतारान्निरूप्य चतुर्थपञ्चमषष्ठमन्वन्तरावतारान् कार्यसमाप्तौ वैकुण्ठगतान्निराभिमानसाम्येन वैकुण्ठादागतान् चरित्रैणाह हरिर्गजेन्द्रः मोचितवान् प्रपन्नार्तिमोचनमिति प्रारम्भपक्षस्तु चतुर्थमन्वन्तरावतारचरित्रत्वेन गजेन्द्रस्य स्पष्टत्वात् पञ्चमषष्ठयोरग्रिमचरित्रमिति ज्ञायते ग्राहस्य वैराग्यहेतुत्वादप्यादौ निर्देशः प्रपन्नमिति सङ्ग्रामे च प्रपन्नानामितिवत् पुष्टित्वाददोषः अमोचयदिति वक्तव्ये सर्वकर्तृत्वादमुञ्चदिति आह प्रपन्नमोचने यस्य ब्रह्मचक्षुर्वेति विरुध्यतेऽत आह आर्तामिति नहि ते ओदरभूता आर्ताः पञ्चमन्वन्तरावतारावतारस्त्रीन् मोचितवान् उत्तरपूर्वकाण्डस्यान् इन्द्रं च अब्धिपतितानिति कल्पान्तरत्वात्तिरोहितं कश्यपेध्माहरणसमये गोमूत्रपतितानिति केचित् गजेन्द्र इव तेषामवस्था गरुडेन नीयमानानां वा समुद्रे पातः

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

चकारेण भेदः स्तोत्रकरणं च भिन्नतया समागत्य ऋषीनुद्धृतवानिति इन्द्रश्च तेनैवोद्धृत इति पुनश्चकारः वृत्रवधे प्रतीकाराभावादासुरगतिं प्राप्तः सोऽप्यागत्योद्धृत इति ज्ञातव्यं षष्ठे मन्वन्तरावतारे. अमृतं पाययित्वा बलिना इन्द्रासने गृहीते देवेषु लीनेषु देवस्त्रियः असुरैः स्वस्वगृहे गुप्ताः स्थापितास्ताश्च तत उद्धृताः निरभिमानिनं नृसिंहमाह पूर्वत्र तथात्वाच हिरण्यकशिपुपीडासप्तमस्कन्धोक्ता अनुसन्धेया सतामभयाय न केवलं प्रह्लादस्य मर्यादास्थत्वात् मन्वन्तरावतारानाह अनेन सामान्यतः सर्वान् विशेषतः ॥ १८ ॥ १९ ॥

पुनरर्द्धेन वामनं सर्वेषु मन्वन्तरावतारेषु युद्धे दैत्यान् हत्वा पुष्टिस्थत्वाद्देवार्थं त्रिभुवनरक्षणं चरित्रं चकारादन्येष्वपि सङ्ग्रामेषु रजितनैर्बलिव देवावध्यत्वज्ञापनाय पतीनिति मन्वन्तरेषु भिन्नता चतुर्दशत्वं च ज्ञापितं कलाभिः षड्भिः मन्वन्तरावतारेभ्यो विलक्षणं वामनचरित्रमिति भिन्नप्रक्रमायाथशब्दः इमामिति सप्तममन्वन्तरे वस्तु मत्स्यकृतः प्रलयः स कल्पान्तरे बलिना स्वर्गे हृते वा सर्वेषां बीजरूपेण स्थितिः पश्चादुद्गम इति मन्वन्तरारम्भोऽपि तदैव बीजरूपधर्मावेशात्पूर्ववत्कथा हरणांशः स्वतः याच्ञांशे दाने पुष्टित्वाददोषः मातृनाम्ना असामर्थ्यं स्वतः वामनस्यैव वृद्ध्या त्रिविक्रमत्वात् वामन इत्युक्तं अवतारनाम वामनस्वरूपेण हृता, किन्तु बलिसम्बन्धेन स्वत्वत्याजने याच्ञात्र हेतुः याच्ञामूलकत्वाद्दानस्य स्वार्थत्वाभावाच्छलं त्रिभिः क्रमैरसन्तुष्ट इत्यत्र ब्रह्माण्डं तदावरणानीत्युक्तम् अदित्यास्तपसा सन्तुष्टः अस्मिन् मन्वन्तरे केवलं पुरन्दरस्यैव न प्राधान्यं पदत्रयस्य दानाभावादिमामित्युक्तम् ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

हंसस्वरूपी हंसाकारः दत्तो दत्तात्रेयः कुमारः नः पिता ऋषभश्च विष्णुरेव कलयाऽवतीर्णःसन्नात्मयोगमवदत् तेन हयास्ये हयग्रीवावतारे मधुभिदा सता ततः श्रुतय आहृताः ॥ १७ ॥

अप्यये प्रलये मनुः सत्यव्रतः इला पृथ्वी ओषधयश्च गुप्ताः क्रौडे वराहावतारे इभराजं गजेन्द्रम् अमुञ्चत् मोचयामास ॥ १८ ॥

संस्तुन्वतः ऋषीन् वालखिल्यान् कश्यपार्थं समिदाहरणे गोष्पदे निमग्नान् इन्द्रेणोपहसितानुत्थाप्यामोचयत् शक्रश्च तमसि ब्रह्महत्यायां प्रविष्टममोचयत् पिहिता निरुद्धा देवस्त्रियश्चामोचयत् अनेकावतारैरिति शेषः ॥ १९ ॥

अन्तरेषु सर्वमन्वन्तरेषु अदधात् अपालयत् कलाभिर्मन्वन्तरावतारैः ॥ २० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

श्रीहंसादीनवतारान् तच्चरित्राणि चाह-हंसस्वरूपीति। विष्णुरेव कलया हंसस्वरूपी दत्तादिनामकश्च अवतीर्णः सन् आत्मनः "यद्विज्ञानेन सर्वं विज्ञातं भवति" तस्य स्वस्य सम्बन्धियोगं ज्ञानयोगं भक्तियोगं च अवदत् तेन विष्णुना हयास्ये अवतारे मधुभिदा सता ततः श्रुतयः आहृताः आनीताः ॥ १७ ॥

मात्स्ये मत्स्यावतारे अप्यये प्रलये मनुर्गुप्तः रक्षितः इला भूमिः ओषधयः चकारात्सप्तर्षयः गुप्ताः अम्भसः क्ष्मामुद्धरता विष्णुना क्रौडे वराहावतारे दितिजो हिरण्याक्षो हतः अमृतान्मथने कौर्मे कूर्मावतारे अद्रिः मन्दराद्रिः स्वपृष्ठे धृतः ग्राहात् गजेन्द्रममुञ्चत् मोचयामास विष्णुरवतीर्ण इत्यनुवर्त्तते एवं यत्रावतारनाम नोक्तं तत्रानुवर्त्तनीयम् ॥ १८ ॥

गरुडोपाख्यानप्रसिद्धान् श्रमणान् तपसातिक्षीणान् कश्यपाज्ञया समिदाहरणे पलाशपत्रमूलयष्टिकामेकैकां गृहीत्वा सूक्ष्मशरीरत्वेन गोष्पदे पतितान् महद्भारवता इन्द्रेणोपहासितान् संस्तुन्वतः स्तुतिं कुर्वाणान् वालखिल्यान् उद्धृत्यामुञ्चत् । वृत्रवधतो हेतोः चकारात् विश्वरूपवधतो हेतोस्तमसि ब्रह्महत्यायां प्रविष्टममुञ्चत् असुरगृहे पिहिताः निरुद्धाः या देवस्त्रियस्ताश्चामुञ्चत् बहुभिरवतारैः सतां प्रह्लादादीनाम् ॥ १९ ॥

अन्तरेषु भुवनानि अदधात् अपालयत् ॥ २० ॥

भाषा टीका ।

अच्युत भगवान् ने हंस स्वरूपी होकर ब्रह्मा को आत्म योग का उपदेश किया दत्तात्रेय होकर यदु आदिकों को ज्ञान दिया फिर हमारे पिता ऋषभ देव का रूप लिया जोकि साक्षात् कला से सब के हित के वास्ते अवतीर्ण भये उन्ही ने हयग्रीव अवतार मे मधुकैटभ को मार कर वेद लाकर ब्रह्माजी को दिये ॥ १७ ॥

उन्हीने मत्स्य अवतार से सब औषधि और पृथिवी तथा चाक्षुष मनु इनकी रक्षा करी वराहावतार से जल से पृथिवी को उद्धार करते समय में हिरण्याक्ष को मारा कूर्मावतार में समुद्र मंथन के समय अपने पीठ पर मंदर पर्वत को धारण किया श्रीहरि अवतार में शरणागत गजराज को ग्राह से छुडाया ॥ १८ ॥

किसी अवतार में स्तुति करते हुए समुद्र में पडे विरक्त ऋषियों की विपत्ति छुडाई और वृत्रासुर के वध करने से पाप में प्रविष्ट इन्द्र का पाप दूर किया। नृसिंह अवतार में देवताओं की स्त्री जो असुर के घर में घिरीं थीं उनको छुडा कर सत्पुरुषों को निर्भय करने के लिये हिरण्यकशिपु को मारा ॥ १९ ॥

देवता असुरों के युद्धमें देवतों के वास्ते असुरोंको मारकर फिर मन्वंतरों मे कला अवतारों से संसार की रक्षा करी तदनंतर वामन अवतार लेकर देवतों के वास्ते बलिसे पृथिवी की भीखमागने के छलसे इस भूमीको लेकर अदिती के पुत्रों को दिया ॥ २० ॥

निःक्षत्रियामकृत गां च त्रिःसप्तकृत्वो रामस्तु हैहयकुलाप्ययभार्गवाग्निः ।
सोऽब्धिं बबन्ध दशवक्त्रमहन् सलङ्कं सीतापतिर्जयति लोकमलघ्नकीर्त्तिः ॥ २१ ॥
भूमेर्भरावतरणाय यदुष्वजन्मा जातः करिष्यति सुरैरपि दुष्कराणि ।
वादैर्विमोहयति यज्ञकृतोऽतदर्हान् शूद्रान् कलौ क्षितिभुजो न्यहनिष्यदन्ते ॥ २२ ॥
एवं विधानि कर्माणि जन्मानि च जगत्पतेः ।
भूरीणि भूरियशसो वर्णितानि महाभुज ! ॥ २३ ॥
इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
वैयासिक्याम् एकादशस्कन्धे
चतुर्थोऽध्यायः ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

हैहयानां कुलस्याप्ययाय भार्गवरूपोऽग्निः स रामो दाशरथिः सन् सलङ्कं लङ्कायां स्थितं संच जयति वर्त्तमानकालीनोऽवतार इत्यर्थः ॥ २१ ॥

भाविनं रामकृष्णावतारमाह—भूमेरिति । बुद्धावतारमाह-वादैरिति । अतदर्हान् यज्ञानर्हान्दैत्यान्विमोहयिष्यति कल्क्यवतार-माह—शूद्रानिति । न्यहनिष्यन्निहनिष्यति ॥ २२ ॥ २३ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
चतुर्थोऽध्यायः ॥ ४ ॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

त्रिःसप्तकृत्वः एकविंशतिवारान् स रामो दाशरथिः स्वांशांशिनोरभेदाभिप्रायेण सलङ्कमिति सहार्थस्य द्वैविध्येऽपि विद्यमानमात्रत्वमभिप्रेत्य लङ्कायां स्थितमिति व्याख्यातम् । यद्वा, लङ्काशब्देन तत्स्थरक्षोगणो लक्ष्यते तथाच सपरिवारदशग्रीवमहन् ॥ २१ ॥

शूद्रान् । म्लेच्छान् कलेरन्ते ॥ २२ ॥

जगत्पतेरिति । तज्जन्मादीनामपि जगत्पालकत्वं व्यञ्जितं भूरियशस इति तेषां यशोमयत्वञ्च ॥ २३ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे
श्रीराधारमणदासगोस्वामिविरचितायां दीपिकादीपिनी
टिप्पण्याम् चतुर्थोऽध्यायः ॥ ४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

हैहयेति । हैहयकुलाप्ययहेतुभूतो भार्गव इत्यर्थः ॥ २१-२३ ॥

इति श्रीमद्भागवतव्याख्याने एकादशस्कन्धीये
श्रीसुदर्शनसूरिकृतशुकपक्षीये
चतुर्थोऽध्यायः ॥ ४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

हैहयानां कुलस्याप्ययाय नाशाय भार्गवरूपोऽग्निः रामः परशुरामः त्रिःसप्तकृत्वः एकविंशतिवारान् गां भूमिं निःक्षत्रियां क्षत्रियरहितां चकार स विष्णुः सीतापतिर्भूत्वा लोकानां मलं पापं हन्तीति तथा सा कीर्त्तिर्यस्य सः दाशरथिः जयतीति वर्त्तमाननिर्देशस्य वर्त्तमानकालीनोऽयमवतार इत्यभिप्रायः ॥ २१ ॥

अथ भाविनोऽवतारानाह—भूमेरिति । अजन्मा कर्मायत्तोत्पत्तिरहितः भूमेर्भारावताराय यदुषु जातोऽवतीर्णः सन् सुरैरपि कर्त्तुमशक्यानि कर्माणि चेष्टितानि करिष्यति । बुद्धावतारं तत्कर्मचाह-वादैरिति । अतदर्हान्यज्ञानर्हानपि यज्ञकृतः यज्ञान् कुर्वाणान् दैत्यान् वादैर्वेदविरुद्धैर्मोहयिष्यति कल्क्यवतारं तत्कर्म चाह शूद्रानिति-कलौ कलियुगान्ते क्षितिभुजः शूद्रान्न्यहनिष्यत् निहनिष्यति ॥२२॥ उपसंहरति । एवमिति ॥ २३ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
चतुर्थोऽध्यायः ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

निःक्षत्रियां क्षत्रियरहितां हैहयकुलाप्ययार्थं उज्ज्वलितभार्गवाग्निः भृगुकुलोत्थवह्निः लङ्कामहन्हतवान् दशवक्त्रं चाहन् हतवान् लोके जयति ॥ २१ ॥

बुद्धो यज्ञकृतो वादैर्विमोहयति कल्की कलेरन्ते शूद्रान् क्षितिभुजोऽन्यहनिष्यत् ॥ २२ ॥

निगमयति । एवं विधानीति ॥ २३ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
चतुर्थोऽध्यायः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

सलङ्कमिति । लङ्कास्थिततद्गणसहितमित्यर्थः । जयतीति "जयति जननिवासः" इतिवत् ॥ २१ ॥

शूद्रानित्युभयत्रान्वयः पूर्वत्र उपाख्यान् परत्र म्लेच्छानित्यर्थः ॥ २२ ॥ २३ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धीये
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
चतुर्थोऽध्यायः ॥ ४ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

रामावतारमाह द्विरूपेण तुशब्दादथमावेश इति केचित् क्षत्रक्षयायेत्यत्रावतारप्रयोजनं स्पष्टं भीतानिवीनपलायितादिपरित्यागादेकविंशतिवारमुद्यमः तत्रापि पृथ्वीनिष्कण्टका कर्तव्येत्युद्यमः पुष्टिमार्गस्थिता न मर्यादापालका इति भारत्यां दत्तात्रेयोऽपि पुष्टिस्थः रामौ तु मर्यादापालकौ ब्रह्मतेजसा क्षत्रिया उपसंहर्तुं शक्याः भगवत्तेजसा वा तत्र स्वयं भगवान् पालकत्वात् क्षत्रियान् हन्ति अत आह—भार्गवाग्निरिति । इध्मसाम्यादेकविंशत्वं देवलोकानां वा तावत्त्वाद्भूत्यर्थमवतीर्णस्तावद्वारं ततः परं भगवान् अवतरिष्यतीति भावः । गुणत्रयकार्यत्वात्त्रिधा विभागे सप्तधा भवति यद्वोः सहस्रजिद्धैहय इति यादवानामपि मध्ये हैहयोऽत्यमर्यादः तस्य कुलनाशार्थमिति अग्निप्राकट्यार्थं वेणुस्थानीयता उक्ता मूलभूततेजो भगवद्रूपं भृगौ स्थापितमिति तदवतीर्णं भगवदवतारत्वेनोच्यते परशुरामः "वैष्णवं तेज आसाद्य समशाम्यत्" इति सिद्धान्तः एवं वैलक्षण्यात् तुशब्दः सेतु रूपकमाहुः लौकिकास्ते स इति रामशब्देनो गृहीतः रामो वैश्वानरावतार इत्यन्ये तस्य चरित्रं पञ्चविधम् अन्या लीला समुद्रबन्धनं रावणवधः सीतापतित्वं सर्वोत्कर्षेण सदा स्थितिः । चरित्रमात्रस्य पापनाशकत्वमिति तत्र समुद्रबन्धनमलौकिकं पुरदाहराक्षसवधसहितरावणवधः अजेयत्वादमर्यादः मुख्यपुष्टिः सीतापतित्वं "स वै पतिः स्यात्" इति न्यायेन च जयतीति स्वरूप विकाराद्यभावेन सर्वदोषविवर्जितत्वम् अन्यस्यापि दोषदूरीकरणं चरित्रेण ॥ २१ ॥

शिष्टान् त्रीनवतारानाह कृष्णे सर्वावतारापेक्षया विशेषमाह, अजन्म जात इति गुणातीतोऽप्याविर्भूत इत्यर्थः । गुणघ्नान् कदाचिज्जायेतापि ननु बीजप्रयोजनाभावात् न कस्यचिदुत्पत्तिरित्यत आह, यदुषु भरावतरणायेति यदुषु नवमस्कन्धे भक्तिरुक्ता तद्बीजं मर्दनकृत्भारहरणायेति निमित्तं दशमस्कन्धे प्रपञ्चितमेतत् गुणातीतत्वे हेतुः सुरैरपि दुष्कराणीति अपिशब्दात् तिर्यग्भिः गुणिनामकार्यं करोतीति अनेन चरित्राण्यनन्तानीति सूचितं बुद्धावतारमाह, वादैर्विमोहयतीति । वादैरिति बहवो वादाः सांप्रत सृष्टाः अनर्हेषु यज्ञो मागच्छत्विति मतिव्यामोहव्यतिरेकेण न दृढप्रतीतिर्भवतीति वादाः विशेषेण मोहो विपरीते धर्मबुद्धिः यज्ञकृत यज्ञार्थं स्वयमन्तर्हितो भगवान् यज्ञानन्तर्भावयितुमित्यर्थः । कोऽयं पुरुषार्थ इत्याशङ्क्याह, अतदर्हान् यज्ञानर्हान् कलौ क्षत्रियत्वभावे कुण्डगोलकबाहुल्ये वादैरेव तानिश्रयः णारजारककस्यैववेदवेदार्थयोरन्यथा बुद्धिरित्यर्थः । त्रैगुण्यविषया इति योगशास्त्रं योगिनस्तु मर्यादां प्रवाहनिवृत्तये आहुः गुणमयान् पुरस्कृत्य निर्गुणान् करोतीत्यर्थः । अत एवायमेवार्थो यावानित्यत्र निरूपितः अतः परीक्षार्थं वेदनिन्देति सर्वं सुस्थं कल्किचरित्रमाह, शूद्रानिति । क्षितिभोक्तृत्वमधमानां माऽभूदिति वर्णाः कालव्यूह्यसरवादिकृताः ते क्रमशः क्रियमाणाः शुद्धतमसा शूद्रपर्यवसायिनो भवन्ति प्रान्तभागे कलौ हननम् ॥ २२ ॥

उपसंहरति । एवं विधानि धर्मसंस्थापनप्रकाराणि अनादिसिद्धो धर्मो जन्मना स्थिरो भवति कर्मणा चोपघातनिवृत्तिः धर्मो हि जगत उत्तम्भकः धर्मे रक्षिते रक्षितं जगत् स वै पतिः स्यादिति न्यायाज्जगत्पतिः प्रकारेऽपि बाहुल्यार्थमाह, भूरीणीति । तत्र हेतुः भूरियशस इति धर्मार्थकाममोक्षभक्तिप्रपत्त्यादिपुरुषार्थेषु स्थापकत्वेन भूरीणि यशांसि यस्य तानि न केवलं गुप्तानि कविभिरित्यर्थात् महाभुजेति क्रियाशक्तिप्राधान्यात् उक्तविश्वासः ॥ २३ ॥

इति श्रीभागवतसुबोधिन्यां श्रीमद्वल्लभदीक्षितविरचितायाम्
एकादशस्कन्धविवरणे चतुर्थाध्यायविवरणम् ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

सलङ्कं लङ्कास्थसर्ववीरसहितमित्यर्थः । जयतीति । कथाया अस्यास्तत्कालभवत्वात्तस्मिन्नादरविशेषो वक्तुः ॥ २१ ॥

विमोहयति विमोहयिष्यति बुद्धः न्यहनिष्यत् निहनिष्यति कल्किः ॥ २२ ॥ २३ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
एकादशे चतुर्थोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ ४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हैहयकुलात्ययार्थं भार्गवाग्निः जमदग्न्याख्याद्भार्गवाज्जातोऽग्निः रामः गां पृथिवीं निःक्षत्रियामकृत स विष्णुः दाशरथिः रामस्तु भूत्वा अब्धिं बबन्ध । सलङ्कं लङ्काशब्दस्तत्रत्यासुरसमूहपरः लङ्कागतासुरसमूहसहितं दशवक्त्रं रावणमहन् सच सीतापतिर्लोके जयति ॥ २१ ॥

अजन्मा स्वरूपमवतारी बुद्धावतारे अतदर्हान् यज्ञानर्हान् असुरान् विमोहयति कल्क्यवतारे शूद्रान् क्षितिभुजो नृपान् कलौ अन्ते न्यहनिष्यत् निहनिष्यति ॥ २२ ॥

वर्णितानि ऋषिभिस्तत्र तत्रेति शेषः ॥ २३ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
चतुर्थोऽध्यायार्थप्रकाशः ॥ ४ ॥

भाषा टीका ।

परशुराम अवतार में भगवान् ने हैहय राजा के कुल के नाश करने को भृगुवंश में जन्म लेकर अग्निवत् प्रकाशमान् होकर इस पृथिवी को एक बीसवार क्षत्रियों से रहित कर दिया उन्हीं भगवान् ने समुद्र को बांधकर लंका के राक्षसों के सहित रावण को मारा जिनके चरित्र के कथन से सब लोगों के पाप नष्ट होते हैं वे श्रीसीतापति रामचन्द्र जी इस समय अयोध्या में विराजमान हैं ॥ २१ ॥

फिर अजन्मा भी भगवान् पृथिवी के भार उतारने के लिये यदुवंश में अवतार लेकर देवताओं से भी नहीं होने वाले कार्यों को श्रीकृष्णावतार में करेंगे फिर बुद्ध अवतार में जो यज्ञ करने लायक नहीं हैं उन लोगों को वेद का निन्दा वाद करके मोहित करेंगे फिर कलि के अन्त में कल्की अवतार लेकर शूद्र जाति के राजाओं को मारेंगे ॥२२॥

हे महाबाहु जनक जी ! बड़े भारी यशोंवाले जगत् पति भगवान् के इस प्रकार के बहुत से जन्म तथा कर्म शास्त्रकारों ने वर्णन किये हैं ॥ २३ ॥

इति श्रीमद्भागवत एकादश स्कन्ध चतुर्थोऽध्याय
श्रीवृन्दावनस्थ पं० भागवताचार्यकृत
भाषा टीका समाप्ता ॥ ४ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे चतुर्थोऽध्यायः ॥ ४ ॥

——:*:——

अथ पञ्चमोऽध्यायः ।

———:*:———

राजोवाच ।

भगवन्तं हरिं प्रायो न भजन्त्यात्मवित्तमाः ! ।
तेषामशान्तकामानां का निष्ठाऽविजितात्मनाम् ॥ १ ॥

चमस उवाच ॥

मुखबाहूरुपादेभ्यः पुरुषस्याश्रमैः सह ।
चत्वारो जज्ञिरे वर्णा गुणैर्विप्रादयः पृथक् ॥ २ ॥
य एषां पुरुषं साक्षादात्मप्रभवमीश्वरम् ।
न भजन्त्यवजानन्ति स्थानाद्भ्रष्टाः पतन्त्यधः ॥ ३ ॥
दूरे हरिकथाः केचिद्दूरे चाच्युतकीर्तनाः ।
स्त्रियः शूद्रादयश्चैव तेऽनुकम्प्या भवादृशाम् ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

पञ्चमे भक्तिहीनानां का निष्ठा को युगे युगे ॥
पूजाविधिरिति प्रश्नद्वयस्योत्तरमुच्यते ॥ १ ॥

त्वां सेवतां सुरकृता बहवोऽन्तराया इत्यनेन श्रीहरिभक्ता विघ्नमूर्ध्नि पदं दत्त्वा परां गतिं यान्ति अभक्तानां तु विघ्ना भवन्तीत्युक्ते तर्हि तेषां का गतिर्भवतीति पृच्छति—भगवन्तमिति । हे आत्मवित्तमाः ! अविजितात्मनामत एवाशान्तकामानां का निष्ठा किं प्राप्यमित्यर्थः ॥ १ ॥

स्वजनकस्य गुरोर्भगवतोऽनादराद्गुरुद्रोहेण दुर्गतिं यान्तीति वक्तुं भगवतः सकाशाद्वर्णाश्रमाणामुत्पत्तिमाह—मुखात । गुणैः सत्त्वेन विप्रः सत्त्वरजोभ्यां क्षत्रियः रजस्तमोभ्यां वैश्यः तमसा शूद्र इति ॥ २ ॥

एषां मध्ये येऽज्ञात्वा न भजन्ति ये च ज्ञात्वाऽप्यवजानन्ति आत्मनः प्रभवो जन्म यस्मात्तम् तदभजने कृतघ्नतामप्याह—ईश्वरमिति । स्थानाद्वर्णाश्रमाद्भ्रष्टाः ॥ ३ ॥

तत्र येऽज्ञास्ते भवाद्विधानामनुग्राह्या इत्याह—दूर इति । दूरे हरिकथाश्रवणं येषां ते अत एव दूरे चाच्युतकीर्तनं येषां ते दूरे अच्युतकीर्तनाश्चेति वा ॥ ४ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी ।

का निष्ठा किं प्राप्यं पूजाविधिः पूजाप्रकारः पूर्वाध्याये-नावसरसङ्गतिमाह—त्वां सेवतामित्यादिना । तेषामभक्तानां का गतिः किं प्राप्यम् अत एव अजितात्मत्वादेव ॥ १ ॥

चमसशब्दस्य पात्रवाचकत्वात् कृपापात्राणां गतिवर्णनं सत्पात्रेणैव कर्तुं शक्यमिति चमस एवोवाचेति ज्ञेयम् ॥

मुखबाहूरुपादेभ्यः विप्रादयो यथासङ्ख्यं जज्ञिरे आश्रमेषु तु तदुपलक्षणमेव यथोक्तं "गृहाश्रमो जघनतो ब्रह्मचर्यं हृदो मम । वक्षःस्थलाद्वने वासो न्यासः शीर्षणि च स्थितः" इति ॥ २ ॥

आत्मप्रभवमिति गुरुद्रोह उक्तः । तदभजने भगवदभजने कृतघ्नतामपीत्यपिरत्र गुरुद्रोहं समुच्चिनोति ॥ ३ ॥

तत्र अज्ञाऽवज्ञात्रोर्मध्ये अत एव हरिकथाश्रवणाऽभावादेव द्वितीयेऽर्थे अच्युतं कीर्तयन्तीति भक्ता एवोक्ताः ॥ ४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

आत्मवित्तमा इति सम्बोधनम् न भजन्ति इति द्वेषपर्यन्तत्वमभजतामिति विवक्षितं प्रतिवचनानुगुण्यात् ॥ १—४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

नान्यस्य बर्हिषि बलीन्ददतः स्वभागानित्यनेन भगवन्तमासेवमानानां सुरकृता विघ्ना न सन्तीत्युक्तं, तत्र सर्वेषां भगवत्सृष्टत्वाविशेषेऽपि कुतः केषांचिदेव भगवत्सेवारुचिः केषांचित्तदभाव इत्यभजन्तश्च कीदृशाः कां वा गतिं यास्यन्तीति

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

पृच्छति—भगवन्तमिति । यद्यपि मुमुक्षूणां शिश्नोदरपरायणानां वार्त्तानुपयुक्तत्वान्न प्रष्टव्या तथापि यत्नेन तत्सङ्गपरिहाराय तत्प्रश्न इत्यवधेयम् आत्मवित्तमा ! इति सम्बोधनं तेषामविजितात्मनामजितेन्द्रियाणामत एवाशान्तकामानां का निष्ठा आसक्तिः कुत्रासक्तिः किं प्राप्यं कस्तत्र हेतुः कीदृशाश्चेति प्रश्नाशयः प्रतिवचनानुगुण्यात् ॥ १ ॥

तत्र तावद्भगवत्सेवारुचितदभावयोर्हेतुमसेवतां गतिं चमस आह द्वाभ्याम् । मुखेति । पुरुषस्य चतुर्मुखशरीरकस्य भगवतः मुखबाहूरुपादेभ्यः गुणैः सत्त्वरजस्तमोभिरुपलक्षिताः पृथगर्थाः कर्येण विप्रादयः चत्वारो वर्णाश्चतुर्भिराश्रमैः सह जज्ञिरे गुणैरित्यनेन सात्त्विकानां भगवत्सेवारुचिर्नान्येषामिति सूचितम् ॥ २ ॥

एषां चातुर्वर्ण्यचातुराश्रम्य व्यवस्थया व्यवस्थितानां मध्ये ये जनाः साक्षादात्मनां प्रभवं कारणभूतमीश्वरं सर्वनियन्तारं पुरुषं परमपुरुषं न भजन्ति अवजानन्ति देवतान्तरसमत्वेन मन्यन्ते तदेव ह्यवज्ञानं तथा चोक्तं भागवते तन्त्रे —

"यस्तु नारायणं देवं समत्वेनावमन्यते ।
सतु तेनावमानेन नरकान्नातिवर्तते" ॥

इति ते स्थानाद्वर्णाश्रमाद्भ्रष्टा अधः पतन्ति नरके पतन्ति आत्मप्रभवं न भजन्तीत्यनेन तेषां कृतघ्नता सूचिता ॥ ३ ॥

ननु, सत्यमात्मप्रभवत्वेश्वरत्वसर्वोत्कृष्टत्वादिज्ञाने सत्यपि तमभजतां कृतघ्नत्वादिदोषान्नरकपात इति ये तु तादृग्ज्ञानरहिताः केवलमज्ञास्तेषां का गतिरित्यत्राह—दूर इत्यादिना । दूरे हरिकथा तच्छ्रवणं येषां ते दूरेऽच्युतकीर्त्तनं येषां ते शास्त्रानधिकारादिति भावः । के त इत्यत्राह—स्त्रियः शूद्रादयश्च जनास्ते भवादृशां भागवतानामनुकम्प्याः दयनीयाः भागवतकृपाविषयाश्चेत्तेऽपि मुच्यन्ते एवेति भावः ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

श्रुतभगवद्भक्तलोकविशेषो राजा भगवद्विमुखानां कस्मिन्स्थाने स्थितिरिति पृच्छति—भगवन्तमिति । हे आत्मवित्तमाः ! ॥ १ ॥

हरेः पितृत्वेनात्यन्तोपकर्तृत्वात्तदभजनादिद्वेषोऽधःपातहेतुरिति तदभक्तानां तमस्येव निष्ठेति वक्तुं भगवदवयवेभ्यो वर्णाश्रमाणामुत्पत्तिप्रकारमाह—मुखेति । शमादिगुणैः ॥ २ ॥

एषामुत्पन्नानां मध्ये आत्मप्रभवं स्वोत्पादकं पितरमित्यर्थः पितुर्हरेः स्थानाद्वैकुण्ठादिलक्षणाद्भ्रष्टाः ॥ ३ ॥

श्रुत्याद्यर्थविचारानधिकृतत्वेन हरिकथाश्रवणकीर्तिनादिसाधनानां स्त्रीशूद्रादीनां श्रेयःसाधनमाह—दूरे हरिकथा इति । भवादृशानामनुकम्पाविषयत्वे हरिकथाश्रवणादधिकारिणः स्युरिति भावः । अच्युतस्य कीर्त्तनं येषामस्ति ते अच्युतकीर्त्तनाः ते च दूरे ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

॥ १ ॥

मुखबाहिति विराट् तदन्तर्यामिणोरभेदोक्तिः मुखबाहूरुपादेभ्य इत्युपलक्षणमेवाश्रमेषु यथोक्तम्—

"गृहाश्रमो जघनतो ब्रह्मचर्यं हृदो मम ।
वक्षःस्थलाद्वने वासो न्यासः शीर्षणि संस्थितः" ॥

इति ॥ २ ॥

न भजन्त्यत एवावजानन्तीत्यर्थः । यद्वा, केचिदश्रुत्वा न भजन्ति केचिच्छ्रुत्वापि न भजन्ति चेदवजानन्त्येवेत्यर्थः । स्थानाद्वर्णाश्रमरूपात्स्वाश्रमाद्भ्रष्टाः सन्तः क्रमादधोऽधो गच्छन्तीत्यर्थः ॥ ३ ॥

तत्र पूर्वाननुग्राहयति—दूर इति ॥ ४ ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी ।

वक्ता श्रोता तथा वाक्यं त्रिभिरुक्तं विशेषतः ।
लोके सर्वत्राप्रवृत्तौ प्रामाण्यं कुण्ठितं भवेत् ॥
अतस्तत्साधकाध्यायश्चतुर्थोऽयमुदाहृतः ।
देशकालस्वभावानां निर्द्धारक उदाहृतः ॥
अस्यार्थौ भगवद्देशे स्थित्वाऽलौकिकगीतितः ।
निराकृत्यान्यथा वादान् शुद्धः कृष्णं भजेदिति ॥

स्वभावविजयाय भ्रमवादान् निराकर्तुं पृच्छति—भगवन्तमिति । सर्वेष्टसिद्धिः हरिमिति सर्वानिष्टनिवृत्तिः एतादृशमपि बाहुल्येन न भजन्ति आत्मविदः सर्वज्ञाः तत्रापि भगवन्मार्गविदः श्रेष्ठा इति सम्बोधनं ज्ञानयोगाभावाय विशेषणद्वयम् इह लोके परलोके वा किं फलमित्यर्थः । यद्यपि प्रवाहफलमेव फलमभजनमात्रे अपदोषतैव विगुणस्य गुणा इति परं प्रवाहस्थः किञ्चिज्ज्ञो न तिष्ठति निन्दामकुर्वाण इति प्रश्नः । नन्वत्रापि निन्दाया निषिद्धत्वान्नरकपात इति कः सन्देह इति चेत् सत्यम् । भगवद्भक्तान् विकर्मस्थान् मत्वा धर्मस्थापनार्थं तान्निन्दति प्रवाहफलमेव लप्स्यतीति सन्देहः अभजनयोग्यता हि निन्दका भवति अशान्तकामत्वात् प्रवाह एव स्थितिः अविजितेन्द्रियत्वान्निषिद्धकरणमपि वैदिकत्वाच्च सन्देहवृत्तिः अविजितेन्द्रियान् सकामानपि वेदस्तारयतीति मार्गान्तरस्थास्तु स्वभावत एव पतिता इति वैदिकेष्वेव प्रश्नाभिप्रायः उत्तरमाह—सप्तदशभिः । तेषां योगस्य तथात्वात् चमस उवाच सिद्धान्ता हि पञ्च तत्र वैष्णवा भजन्त्येव शैवा निन्दकाश्चेत्पाषण्डिनः साङ्ख्ययोगयोर्निषेधः प्रश्न एव कृतः अतो वैदिका ब्रह्माश्चावशिष्यन्ते प्रवाहपतिता लोकचतुराश्च ॥ १ ॥

तत्र प्रवाहपतितलोकचतुराणां गतिमाह—द्वाभ्याम् । संन्यासवानप्रस्थब्रह्मचारिगृहस्थाः वर्णा इव तथा सत्याश्रमस्थानां त्रैगुण्यं सत्त्वाद्ब्राह्मणाः रजसा क्षत्रियाः रजस्तमोभ्यां वैश्याः ॥ २—३ ॥

इति श्रीवल्लभाचार्यविरचितैकादशस्कन्धस्यैतावती विवृतिः ॥

विप्रो राजन्यवैश्यौ च हरेः प्राप्ताः पदान्तिकम् ।
श्रौतेन जन्मनाऽथापि मुह्यन्त्याम्नायवादिनः ॥ ५ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

पञ्चमे चमसो विष्णुविमुखानां सुदुर्गतिम् ।
युगधर्मावतारांस्तु प्रोवाच करभाजनः ।

एवं कृपणावतारैः स्थापितयशस्यापि भगवति विमुखीभूय किं लिप्सन्त इत्युद्भूतविस्मयः पृच्छति–भगवन्तमिति । हे आत्मवित्तमाः का निष्ठा किं प्राप्यमित्यर्थः ॥ १ ॥

भजनीयस्य भगवतोऽभजनाद्दुर्गतिरेवेति वक्तुं प्रथमं भजनीयत्वे युक्तिमाह—मुखेति । गुणैः सत्त्वेन विप्राः सत्त्वरजोभ्यां क्षत्रियाः रजस्तमोभ्यां वैश्याः तमसा शूद्राः । अत्र मुखादिभ्य आश्रमैः सह चत्वारो वर्णा जज्ञिर इत्यन्वये आश्रमाणामपि मुखादिभ्य एवोत्पत्तिः प्रसज्जते साच न तथा यद्वक्ष्यते—

"गृहाश्रमो जघनतो ब्रह्मचर्यं हृदो मम ।
वक्षः स्थलाद्वने वासो न्यासः शीर्षणि च स्थितः" ॥

इति तस्मान्मुखबाहूरुपादेभ्य इत्यतः प्राग्जघनहृद्वक्षोमस्तकादिभ्य इत्याहार्यं ततश्च जघनादिभ्यो मुखादिभ्यश्च आश्रमैः सह क्रमेण वर्णा जज्ञिर इति सङ्गतम् ॥ २ ॥

एषां मध्ये ये न भजन्ति आत्मनः प्रभवो यस्मात्तम् आदिपितरमित्यर्थः ।[अत्र अज्ञात्वा च न भजन्तीत्यसन्तो द्विविधाः"अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम्" इति भगवदुक्तेर्मानुष्यकृतनोर्मायामयत्वभानमेवावज्ञा तद्वन्तो भजन्तश्च दृष्टा इत्यवजानन्तश्च द्विविधाः] न भजन्त्यत एवावजानन्ति अवश्यभजनीयस्य गुरोरभजनमेवावज्ञेति भावः । स्थानाद्वर्णाश्रमलक्षणात् ॥ ३ ॥

तत्र येऽज्ञास्ते भवद्विधानामनुग्राह्या एवेत्याह–दूरे इति । दूरे हरिकथा येषां ते ये साधुसङ्गभाग्यहीना इत्यर्थः । दूरे अच्युतस्य कीर्त्तनं येषां ते इति येच साधुसङ्गत्वेऽपि बधिरा इत्यर्थः । ते अनुकम्प्या इति तत्राद्या भक्त्युपदेशेन द्वितीया मूर्ध्नि चरणधूलिदानेन च कृतार्थी कार्या इत्यर्थः ॥ ४ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

"स्वौको विलङ्घ्य व्रजतां परमं पदं ते" इति भगवद्भक्तप्राप्य लोकं श्रुत्वा तदभक्तानां का गतिरिति पृच्छति—भगवन्तमिति । हे आत्मवित्तमाः ! यद्वा, ये प्रायः आत्मवित्तमाः प्रायग्रहणेन ये नात्मविदश्च हरिं न भजन्ति तेषाम् अविजितात्मनामस्वाधीनमनस्कानामत एवाशान्तकामानामसमाप्तभोगानाम् का निष्ठा किं प्राप्यमित्यर्थः । आत्मज्ञानं लब्ध्वापि हरिविमुखो भोगासक्तश्च निन्द्य एव —

"येऽन्येऽरविन्दाक्षविमुक्तमानिनस्त्वय्यस्तभावादविशुद्धबुद्धयः ।
आरुह्य कृच्छ्रेण परं पदं ततः पतन्त्यधोऽनादृतयुष्मदङ्घ्रयः ॥

इति वचनात् —

"आत्मानं चेद्विजानाति अयमस्मीति पूरुषः ।
किमर्थं कस्य वा हेतो र्देहं पुष्णाति लम्पटः" ॥

इति वचनाच्च ॥ १ ॥

स्वजनकद्रुहः कृतघ्नत्वेन दुर्गतिं यान्तीति वक्तुं भगवतः सर्वजनकत्वमाह–मुखेति । गुणैः सत्त्वादिभिर्हेतुभूतैः यद्वा शमादिभिः स्वासाधारणधर्मैः पृथग्भूता वर्णा आश्रमैः सह जज्ञिरे ॥ २ ॥

एषां पुरुषमुखादिभ्यः जातानां मध्ये ये आत्मप्रभवं स्वजनकं न भजन्ति प्रत्युत तत्र केचिदात्मवित्तमत्वाभिमानेन अवजानन्ति तत्र केचित् परमेश्वरं जीवभावं गतं प्रतिपादयन्ति केचिद्देवतान्तरसमत्वेन प्रतिपादयन्ति ते स्थानात् वर्णाश्रमात् भ्रष्टाः अधः पतन्ति एवं भूतानां भगवत्पराङ्मुखानाम् आत्मानमात्मवित्तमं मन्यमानानामधोगत्यर्हत्वम्—

"योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते ।
किं तेन न कृतं पापं चौरेणात्मापहारिणा ।
यस्तु नारायणं देवं समत्वेनावमन्यते ।
स तु तेनावमानेन नरकान्नानिवर्त्तते" ॥

इत्यादिश्रुतिस्मृतय आहुः ॥ ३ ॥

एवमात्मविदां हर्यवज्ञाकर्तॄणामधोगतिमुक्त्वा येतु प्रायग्रहणेन अनात्मविदः प्रागुक्तास्ते द्विविधाः । केचित्स्त्रीशूद्रादयः केचिदाम्नायवादिनस्तत्र पूर्वे सुसाध्यत्वादनुग्राह्या इत्याह—दूरे इति । दूरे हरिकथाः येषां ते अत एव दूरे अच्युतकीर्त्तनं येषां ते स्त्रियः शूद्राश्च आदिना तेभ्योऽपि निकृष्टाः अनुलोमजाः प्रतिलोमजाश्च ॥ ४ ॥

———

भाषा टीका ।

राजोवाच ।

आत्मज्ञानी मुनि जनो । प्रायः करके कितनेक पुरुष भगवान् हरि को नहीं भजते हैं उनकी कामना भी शांत नहीं होती हैं वे अजितेन्द्रिय हैं उनकी क्या गती होती है ॥ १ ॥

चमस उवाच महा पुरुष नारायण के मुख ० उरु पादों से चारों वर्ण तथा चार आश्रम भये हैं जो कि भिन्न भिन्न ब्राह्मण ब्रह्मचारी आदिक हैं सो सत्त्वादिगुणों से हैं ॥ २ ॥

इन सभों के मध्य में से जो अपनी उत्पत्ती करने वाले ईश्वर को नहीं भजते हैं और अवज्ञा करते हैं वे अपने स्थानों से भ्रष्ट होकर नरकों में पडते हैं ॥ ३ ॥

कोइतो श्रीहरि के कथा से दूर रहते हैं कोइ भगवत् नाम संकीर्तन से दूर रहते हैं वे स्त्री होवें अथवा शूद्र होवैं पर तुम सरी के पुरुषों को उनपर कृपा करनी चाहिये ॥ ४ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

ज्ञानलवदुर्विदग्धास्तत्त्वचिकित्स्यत्वादुपेक्ष्या इत्याशयेनाऽऽह–विप्र इति । श्रौतेनोपनयनाख्येन उपलक्षणमेतत् अध्ययनादिनापि हरेः पदान्तिकं तद्भजनोत्तमाधिकारं प्राप्ता अपि मुह्यन्ति

कर्मण्यकोविदाः स्तब्धा मूर्खाः पण्डितमानिनः ।
वदन्ति चाटुकान् मूढा यया माध्व्या गिरोत्सुकाः ॥ ६ ॥
रजसा घोरसङ्कल्पाः कामुका अहिमन्यवः ।
दाम्भिका मानिनः पापा विहसन्त्यच्युतप्रियान् ॥ ७ ॥
वदन्ति तेऽन्योऽन्यमुपासितस्त्रियो गृहेषु मैथुन्यपरेषु चाशिषः ।
यजन्त्यसृष्टान्नविधानदक्षिणं वृत्त्यै परं घ्नन्ति पशूनतद्विदः ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कर्मफलेषु सज्जन्ते कुतः? आम्नायेषु ये वादा अर्थवादास्तै मोहकतया विद्यन्ते येषां ते तदुक्तं गीतासु—

"यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः ।
वेदवादरताः पार्थ ! नान्यदस्तीति वादिनः" ॥

इत्यादिना ॥ ५ ॥

भक्तिमार्गदार्ढ्याय तेषां मोहं प्रपञ्चयन्निन्दति, कर्मणीत्यादिना । अकोविदा यथा बन्धकं न भवति तथा कर्म कर्तुमज्ञाः नचाभिज्ञान्पृच्छन्ति यतः स्तब्धा अनम्राः स्तब्धत्वे हेतुः यतो मूर्खा अपि पण्डिता वयमिति मानवन्तः । अतः "अपाम सोममसृता अभूम अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति यत्र नोष्णं न शीतं स्वापश्च ग्लानिर्नाप्यरातयः" इत्यादिकया यया माध्व्या गिरोत्सुकाः सन्तो मूढास्तया चाटुकानप्सरोभिः सह विहरिष्याम इत्यादिप्रियान् शब्दान्वदन्ति ॥ ६ ॥

किञ्च, तेषां कर्माभिनिवेशात्कामक्रोधदम्भादयो वर्द्धन्त इत्याह त्रयेण, । रजसेति । घोरोऽभिचारादिः सङ्कल्पो येषां ते अहिवन्मन्युर्येषां ते ॥ ७ ॥

कामुकत्वं प्रपञ्चयति—वदन्तीति । उपासिताः स्त्रियो यैस्तेतु वृद्धास्ते मैथुन्यं मिथुनसुखमेव परं नत्वातिथ्यादि येषु गृहेषु तेष्वाशिषो वदन्ति—

"इदमद्य मया लब्धमिमं प्राप्स्ये मनोरथम् ।
इदमस्तीदमपि मे भविष्यति पुनर्धनम्" ॥

इत्याकाराः दाम्भिकतां प्रपञ्चयति, यजन्तीति । असृष्टान्नविधानदक्षिणं न सृष्टा न सम्पादिताऽन्नविधानदक्षिणा यथा तथा यजन्ति तदा च वृत्त्यै जीविकार्थं परं केवलं पशून् घ्नन्ति अतद्विदो हिंसादोषानभिज्ञाः ॥ ८ ॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

ज्ञानस्य लवेन लेशेन दुर्विदग्धाः नैपुण्याभावाद्बुद्धियितुमशक्ताः आम्भिकित्सत्वाच्चाकिन्सारहितत्वादनिवर्त्योऽहङ्कारव्याधित्वात् उपेक्ष्या हेयाः । अर्थवादाः "अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवतीत्यादिलक्षणाः तत् अर्थवादमुग्धत्वं पुष्पितां पुष्पवदापातरमणीयां प्रवदन्ति प्रकृष्टफलां वदन्ति वेदवादरताः वेदेषु येऽर्थवादास्तेष्वेव रताः अभिनिविष्टाः स्वर्गादन्यत् फलं नास्तीति वादिनः ॥ ५ ॥

अनिन्द्ये निन्दा निन्दयितुं न प्रवर्त्तते किन्तु विधेयं स्तोतुमिति न्यायेन विधेयस्य भक्तिमार्गस्य दृढीकरणाय तेषां काम्यकर्मिणां मीमांसकानाम् अतः पण्डितमानित्वात् सोममसृतमपाम पास्यामः अमृताः मरणशून्या भविष्यामः चातुर्मास्यसंज्ञकेन यागेन यष्टुं शीलं यस्य तस्य सुकृतमपूर्वम् अक्षयमविनश्वरम् । यत्र स्वर्गे ग्लानिर्बलक्षयः माध्व्या मादिकया ॥ ६ ॥

अभिनिवेशः स्वीकृतस्य पुनस्त्यागासहिष्णुत्वम् अभिचार्यते मार्यतेऽनेनेत्यभिचारो मारणप्रयोगः आदिना परस्त्रीवशीकरणादिः ॥ ७ ॥

उपासिताः पादपतनादिभिः सेविताः आतिथ्यादि आतिथ्यमतिथियोग्यसत्कारः आदिनार्चनपुराणश्रवणादिपरिग्रहः मूर्खेचोऽवधारणे आशिष एव नतु ज्ञानवैराग्यादिवार्त्ताः अन्नविधानदक्षिणा अन्नविधानमन्नप्रदानं तत्सहिता दक्षिणा तदा च अन्नविधानाद्यभावे ॥ ८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

श्रौतेन वेदसंयोगत्वेन ॥ ५ ॥ ६ ॥

अभिमन्यवः अभिमानपराः ॥ ७ ॥

उपासितस्त्रियः परतन्त्राः आशिषो वदन्ति तद्द्वारेण प्ररोचनां जनयन्तीत्यभिप्रायः असृष्टान्नविधानदक्षिणाः लोभादप्रदीयमानाच्छादनदक्षिणाः वृत्त्यै जीवनार्थम् ॥ ८ ॥ ९ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

येतु सत्यपि शास्त्राधिकारे तज्जन्यज्ञाने च मौर्ख्यान्न भजन्ति तेऽधः पतन्त्येवेत्यभिप्रेत्याह—विप्र इति । विप्रादयस्त्रयः श्रौतेन वेदसंयोगाद्विद्यया तज्जन्यज्ञानेन च हरेः पदान्तिकं हरिचरणान्तिकप्राप्तिसाधनानुष्ठानयोग्यमधिकारं प्राप्ताः यद्यप्येवमथापि मुह्यन्ति मोहं प्राप्नुवन्ति न हरिपादाब्जं भजन्ति, किन्तु स्वर्गाद्यर्थकर्मसु सज्जन्त इत्यर्थः । तत्र हेतुत्वेन विशिनष्टि—आम्नायवादिन इति । आम्नायेषु वेदेषु वादा अर्थवादास्ते मोहकतया विद्यन्ते येषां ते तथा तदुक्तं भगवता—

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

"यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः ।
वेदवादरताः पार्थ ! नान्यदस्तीति वादिनः" ॥

इत्यादिना ॥ ५ ॥

तेषां मोहमेव प्रपञ्चयति—कर्मण्यकोविदा इत्यादिना । यथा बन्धाय न भवति तथा कर्मकर्त्तुमज्ञाः नचाभिज्ञान्पृच्छन्ति, यतः स्तब्धा अनम्राः तत्र हेतुः मूर्खा अपि पण्डितानात्मनो मन्यन्ते इति तथा " अपाम सोमम् अमृता अभूम अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति यत्र नोष्णं न शीतं न ग्लानिर्नं व्याधय" इत्यादिकया माध्व्या श्रोत्रप्रियमात्रकारिण्या गीरा उत्सुकाः सन्तो मूढाः तथा चाटुकानप्सरोभिः सह चरिष्याम इत्येवं विधानि प्रियवाक्यानि वदन्ति ॥ ६ ॥

किञ्च तेषां कर्माभिनिवेशात्कामक्रोधदम्भादयो वर्द्धन्त इत्याह रजसेति त्रिभिः । घोरोऽभिचारादिसङ्कल्पो येषां ते अहेः सर्पस्येव मन्युर्येषां ते मानिनः दुरहङ्कारिणः अच्युतप्रियान् विहसन्ति ॥ ७ ॥

कामुकत्वं प्रपञ्चयति । वदन्तीति । उपासिताः स्त्रियो यैस्ते न तु वृद्धोपसेविनः मैथुन्यं मिथुनसुखमेव परमुत्कृष्टं येषु तेषु गृहेष्वन्योऽन्यमाशिषो वदन्ति—

"इदमद्यमया लब्धमिदं प्राप्स्ये मनोरथम् ॥
इदमस्तीदमपि मे भविष्यति पुनर्धनम्" ॥

इत्यादिकान् प्रवदन्ति तद्द्वारेण प्ररोचनां जनयन्ति इत्यभिप्रायः दाम्भिकतां प्रपञ्चयति यजन्तीति असृष्टान्नविधानदक्षिणं लोभाद्दीयमानान्नाच्छादनदक्षिणं यथा तथा यजन्ति वृत्त्यै जीवनार्थं परं केवलं पशून् घ्नन्ति अतद्विदः हिंसादोषानभिज्ञाः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

विप्रादीनां हरिभक्त्यभावे श्रुतिविचारो न मोक्षहेतुरित्याह—विप्र इति । विप्रादयः श्रौतेन श्रुतिविचारयोग्येन जन्मना हेतुना हरेः पदान्तिकं प्राप्ताः हरिपदसमीपप्राप्तियोग्याः यद्यप्यथापि आम्नायेन सह वादः विवादो येषामस्तीति आम्नायवादिनः हरिभक्तिलक्षणमुख्यार्थापरिज्ञानात् मुह्यन्ति तत्त्वं न जानन्तीत्यतो जन्मादिकम् अप्रयोजकं किन्तु हरिभक्तिरेवेत्यर्थः ॥ ५ ॥

ननु, वेदोक्तकर्मणां तत्त्वज्ञानोत्पत्तेः कथं तेषां मोहः"कर्मणा ज्ञानमातनोति" इति श्रुतेरित्याशङ्क्य आम्नायाविषादित्वेन सम्यक् तदुदितकर्मतत्त्वापरिज्ञानादिदोषग्रहग्रस्तत्वादित्याह-कर्मणीति । अकोविदत्वे हेतुस्तब्धा इति, तत्र मूर्खा इति मूढत्वेन अन्वयः भातु ज्ञकयमित्यतः पण्डितमानिन इति अतो मूढाः यथा माध्व्या स्वर्गादिमधुवादिन्या गिरा सद्यो मधूनि गिरतीव स्थितया वाचा उत्सुकाः जिह्वारसं स्रवन्तः तथा चाटुकान् स्वर्गादिविषयवचनविशेषान्वदन्ति ॥ ६ ॥

किञ्चात इति अत आह—रजसेति । तत्र जनितेन रजसा रागेण घोरो निष्ठुरः पश्वालम्भनादिलक्षणः येषां ते तथा कामुकाः विषयलोलुपाः तद्विघ्नकर्तॄन् अभिमन्यवः अभितः मन्युरेव प्रधानो येषां ते तथा एवंविधाः पापाः अच्युतप्रियान् विहसन्ति पृथक् पृथक् दोषानुक्त्वा विहसन्तीत्यन्वयः ॥७॥

एतदेव विवृणोति–वदन्तीति । गृहेषु स्थित्वान्योऽन्यमाशिषो वाक्यप्रबन्धान् निजगुणोत्कर्षलक्षणान् वदन्ति तत्र हेतुरुपासितभिव इति किञ्चासृष्टान्नविधानदक्षिणाः अदत्तान्नविद्युक्तगुरुदक्षिणाः परं केवलं वृत्त्यै जीवनोपायार्थं पशूनजादीन् घ्नन्ति नत्वात्मभक्त्यै कुतोऽतद्विदस्तत्त्वाज्ञाः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

उत्तरानुपेक्षयति । विप्र इति । आम्नायवादिनो जैमिनीयाः आम्नायः कर्मकाण्डं ते हि तन्मात्रवदनशीलास्तस्य सुतरां तु ब्रह्मकाण्डस्य याथार्थ्यावेदिनोऽनीश्वरवादिनः ॥ ५ ॥

तेषां मोहमेवाह—कर्म्मण्यकोविदा इति ॥ ६ ॥

अधःपातौ च क्रमेण दर्शयति–रजसेति त्रिभिः । तत्र प्रथमेन सर्वेषामेव तेषां निन्दा द्वितीयेन विप्राणां तृतीयेन राजन्यवैश्यानामिति ज्ञेयम् ॥ ७ ॥ — ॥ ९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

ज्ञानलवदुर्विदग्धास्त्वचिकित्स्यत्वादुपेक्ष्या एवेत्याशयेनाह–विप्र इति । श्रौतेन उपनयनाख्येन उपलक्षणमेतत् अध्ययनादिनापि हरेः पदान्तिकं तद्भजनोत्तमाधिकारं प्राप्ता अपि मुह्यन्ति कर्मफलेषु सज्जन्ति । कुतः ? आम्नायेषु ये वादा अर्थवादास्त एव मोहकतया विद्यन्ते येषां ते तदुक्तं गीतासु—

"यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः ।
वेदवादरताः पार्थ ! नान्यदस्तीति वादिनः" ॥

इति ॥ ५ ॥

अकोविदाः कर्म यथा बन्धकं न भवति तथा कर्त्तुमज्ञाः नचाभिज्ञान् पृच्छन्ति यतः स्तब्धा अनम्राः यतो मूर्खा अपि पण्डिता वयमिति मन्यमानाः "अपाम सोमममृता अभूम अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति यत्र नोष्णं नच शीतं क्वापि ग्लानिर्नोप्यरातयः"इत्यादिकया यथा माध्व्या गिरा उत्सुकाः सन्तो मूढा मुह्यन्ति स्म तथैव चाटुकान् हंहो अप्सरोभिः सह विहरिष्याम इत्यादिप्रियान् शब्दान् मिथो वदन्ति ॥ ६ ॥

रजसा प्रवर्द्धमानेन रजोगुणेन मच्छत्रुरयं म्रियतामिति घोरः सङ्कल्पो येषां ते प्रतिक्षणं वर्द्धमानेन क्रोधेन अहिवन्मन्युर्येषां ते एते काष्ठमालाभृतो भिक्षुका उदरम्भरा विष्णुमाराध्य दुःखमेव प्राप्स्यन्तीति अच्युतप्रियान् विहसन्ति ॥ ७ ॥

उपासिताः स्त्रियो युवतय एव नतु महान्तो यैस्ते स्रक्चन्दनवनितादिसम्पादिकाः सम्पत्तयो भवन्ति अन्योऽन्यमाशिषो वदन्ति मैथुन्यसुखमेव परं येषु तेषु गृहेषु न सृष्टा न सम्पादिता अन्नादिदानविधानदक्षिणा यत्र तत् यथा स्यात्तथा यजन्ति वृत्त्यै जीविकार्थं केवलं पशून् छागादीन् घ्नन्ति अतद्विदः हिंसादोषानभिज्ञाः ॥ ८ ॥

श्रिया विभूत्याऽभिजनेन विद्यया त्यागेन रूपेण बलेन कर्मणा ।
जातस्मयेनान्धधियः सहेश्वरान् सतोऽवमन्यन्ति हरिप्रियान् खलाः ॥ ९ ॥
सर्वेषु शश्वत्तनुभृत्स्ववस्थितं यथा खमात्मानमभीष्टमीश्वरम् ।
वेदोपगीतं च न शृण्वतेऽबुधा मनोरथानां प्रवदन्ति वार्त्तया ॥ १० ॥
लोके व्यवायामिषमद्यसेवा नित्यास्तु जन्तोर्नहि तत्र चोदना ।
व्यवस्थितिस्तेषु विवाहयज्ञसुराग्रहैरासु निवृत्तिरिष्टा ॥ ११ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अपरेतु अधः पतिष्यन्ति अत एव ते भगवद्भागवद्विमुखा विप्रादयो विशिष्टजन्मकर्मादिभिः श्रेष्ठत्वाभिमानिनो दुःसाध्यत्वादुपेक्षणीया इत्याह—विप्र इति चतुर्दशभिः । विप्रः राजन्यः वैश्यो वेति चार्थे जन्मना त्रैवर्णिकजन्मना तदनुरूपेण श्रौतेन श्रुतिप्रोक्तेनोपनयनपूर्वकवेदाध्ययनादिना हरेः "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" इत्यादिश्रुतिवेद्यस्य परमात्मनः पदान्तिकं तच्छ्रवणमननध्यानदर्शनाधिकारं प्राप्ता अपि मुह्यन्ति मुक्त्युपायं परमात्मश्रवणादिकं विहाय संसारोपाये कर्मणि सज्जन्ते तत्र हेतुगर्भितविशेषणमाम्नायवादिन इति आम्नायेषु ये वादाः "अपाम सोमम्" इत्याद्या अर्थवादा मोहकतया विद्यन्ते येषां ते तथा ॥ ५ ॥

तन्मोहं प्रपञ्चयति–कर्मणीत्यादिना । तमेतमात्मानं ब्राह्मणा विविदिषन्ति यज्ञेन" इत्यादिश्रुत्युक्तरीत्या ज्ञानाङ्गभूते कर्मणि अकोविदाः कर्म अन्तःकरणशुद्धिद्वारा परमात्मश्रवणमननध्यानज्ञानोपयोगीनि न जानन्ति । ननु, तत्त्वज्ञान् कुतो न पृच्छन्तीत्यत्राह—स्तब्धाः अनम्राः अनम्रत्वे हेतुमाह मूर्खाः पण्डितमानिन इति यद्यपि मूर्खाः अपण्डितास्तथापि वयं पण्डिता इति मानवन्तः "अपाम सोमममृता अभूम अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति यत्र नोष्णं नच शीतं स्यान्न ग्लानिर्नाप्यरातयः" इत्यादिकया यया माध्व्या कर्मफलात्मकमधुरादिन्या गिरोत्सुकाः भूत्वा चाटुकान् स्वर्गे विहरिष्याम इत्यादिश्रोत्रप्रियान् शब्दान् वदन्ति ॥ ६ ॥

घोरः अतिदारुणः सङ्कल्पो येषां ते कामुका विषयलुब्धाः अहिवन्मन्युर्येषां ते दाम्भिकाः स्वपूज्यत्वख्यापनार्थं कर्म प्रकाशकाः ॥ ७ ॥

पूर्वश्लोकार्थं विवृणोति–वदन्तीति द्वाभ्याम् । तत्र कामुकत्वं प्रपञ्चयति उपासिताः दानमानादिभिः पूजिताः स्त्रियो यैस्तु गुरवः एवं विधास्ते मैथुन्यं स्त्रीपुरुषसंयोगजं सुखमेव परं ननु भगवद्भागवतसेवादिकं येषु गृहेषु तेषु स्थित्वा अन्योऽन्यमाशिषो वदन्ति कलत्रापत्यादिविषयकैः पञ्चयज्ञादिविषयकैश्च वाक्यप्रबन्धैः परस्परं स्वकीयां स्वकीयां कृतार्थतां बोधयन्ति दाम्भिकतां प्रपञ्चयति, यजन्त्यसृष्टान्नविधानदक्षिणम् इति अन्नञ्च विधानं विध्युक्तं कर्म च दक्षिणा च तेषां द्वन्द्वः न सृष्टाः अन्नविधानदक्षिणाः यथा तथा यजन्ति पापत्वं प्रपञ्चयति । परं शिष्यादिकं वृत्त्यै जीविकार्थं घ्नन्ति भिक्षाभटगामानयेत्येवं प्रेषयेति अपराविद्यायां नियोज्य संसारे च भ्रामयन्ति "हनहिंसागत्योः" इत्यस्य रूपम् घोरसङ्कल्पतां प्रपञ्चयति । घ्नन्तीति । तन्त्रतया पुनर्योजनीयम् अतद्विदः सिद्धान्तानभिज्ञाः पशून् घ्नन्ति हिंसन्ति स्वर्गसुखार्थमिति शेषः ॥ ८ ॥

भाषा टीका ।

ब्राह्मण क्षत्रिय वैश्य लोग वेदाभ्यास से और जन्म के संस्कार से हरि के स्थान के समीप जानेके योग्य हैं जो केवल कर्मकाण्डवादिक में लगे हैं वे मोहित होजाते हैं ॥ ५ ॥

कर्म में चतुर तो नहीं हैं अभिमानी हैं मूर्ख हैं और पण्डित मानी केवल वेदों के स्वर्गादि के मिलने के मीठे बचनोंमें आनन्दित रहते हैं ॥ ६ ॥

रजोगुण से उनके संकल्प बडे घोर होते हैं औ कामी हैं सर्प सरीके क्रोधी हैं दम्भ करनेवाले हैं अभिमानी हैं पापी हैं तिसी से अच्युत प्रिय जो वैष्णव जन तिनकी हंसी करते हैं ॥ ७ ॥

केवल स्त्रियों की उपासना करनेवाले वे लोग आपस में कहते हैं कि घरों में तथा मैथुनादि सुखों में ही स्वार्थ है और भी जिसमें विधि नहीं अन्नदान नहीं दक्षिणा नहीं ऐसे यज्ञों को करते हैं यज्ञों के मर्म को नहीं जानते हैं केवल वृत्ति के वास्ते पशुओं को मारते हैं ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

मानितां प्रपञ्चयति—श्रियेति । श्रिया धनादिसम्पदा विभूत्या ऐश्वर्येण अन्यादिना जातो यः स्मयो गर्वस्तेनान्धा धियेषां ते ईश्वरसहितान् सतोऽवमन्यन्ते ॥ ९ ॥

किञ्च, एवं वर्त्तमानास्ते वेदतत्त्वार्थं स्फुटमपि न जानन्तीत्याह–सर्वेष्विति । केन रूपेणावस्थितं तदाह–खमात्मानमीश्वरमात्मतया ईश्वरतया चावस्थितम् एवमप्यसङ्गतामाह—यथा खम् पुरुषार्थतामाह–अभीष्टम् स्फुटत्वमाह—वेदोपगीतं चेति । तत्कुतः? यतो मनोरथानां व्यवायामिषमद्यसेवाविषयाणां वार्त्तया प्रवदन्ति निवृत्तिपरं सन्तं वेदं प्रवृत्तिपरं पर्यायन्तीत्यर्थः ॥ १० ॥

ननु व्यवायादीनामपि "ऋतौ भार्यामुपेयाद्धुतशेषं भक्षयेत्" इत्यादिना विहितत्वात्किमेवं निन्द्यते अत आह–लोक इति ।

धनं च धर्मैकफलं यतो वै ज्ञानं सविज्ञानमनुप्रशान्ति ।
गृहेषु युञ्जन्ति कलेवरस्य मृत्युं न पश्यन्ति दुरन्तवीर्यम् ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

व्यवायः स्त्रीसङ्गः निम्ना रागत एव नित्यं प्राप्ताः जन्तोः प्राणिमात्रस्य अतस्तत्र तासु चोदनाविधिर्नास्ति । ननु, ऋतावुपेयादित्यादिना विधिर्दर्शितः, सत्यम् । नत्वयमपूर्वविधिः रागतः प्राप्तत्वात्किन्तु नियमविधिरूपेण रागिणामभ्यनुज्ञामात्रं क्रियते तदाह—व्यवस्थितिरिति । तेषु व्यवायादिषु कैः विवाहयज्ञसुराग्रहैः विवाहविषय एव व्यवायः कार्यः यज्ञ एवाऽऽमिषसेवा "सौत्रामण्यां सुराग्रहान् गृह्णाति" इति श्रुतेस्तत्रैव मद्यसेवेति नियमः क्रियते । ननु, नियमपक्षेऽप्यावश्यकत्वान्न निन्दायुक्ताऽत आह—आसु निवृत्तिरिति । आसु व्यवायामिषमद्यसेवासु निवृत्तिरिष्टा अयंभावः नायं नियमविधिरपि नित्यप्राप्तत्वादतो निवृत्तिः परिसङ्ख्यैव कथं तर्हि व्यवस्थितिरित्युक्तम् ? उच्यते न तावत्परिसङ्ख्याविधिना श्रुत्या निवृत्तिरुच्यते तथा सति स्वार्थत्यागः परार्थकल्पना प्राप्तबाधश्चेति दोषत्रयं स्यात् । अतः क्वचित्प्राप्स्यतोऽप्यर्थस्य प्रापणमनर्थकमित्यपूर्वविधिद्वाराऽन्यनिवृत्तिः फलतो भवति तद्यथा "इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्त" इत्यत्र रशनालिङ्गतो गर्दभाश्वाभिधानीरशनाद्वये प्राप्स्यतो मन्त्रस्यापूर्वविधिद्वारा परिसङ्ख्योच्यते यथोक्तं तन्त्रवार्त्तिके—

"अप्राप्तविधिरेवायमतो मन्त्रस्य निश्चितः ।
परिसङ्ख्याफलेनोक्ता न विशेषः पुनः श्रुतेः" ॥

इति क्वचित्तु रागतो नित्यप्राप्तस्याप्राप्तांशपूरणलक्षणस्य नियमफलस्याप्यभावान्नियमविधिद्वारा फलतः परिसङ्ख्या भवति यथा "पञ्च पञ्चनखा भक्ष्याः" इति तथा रागतो नित्यवत्प्राप्तस्य व्यवायादेर्विवाहादिनियमेनाभ्यनुज्ञाद्वारा परिसङ्ख्यैवेति । ननु, यद्यभ्यनुज्ञामात्रमेतद्भवेत्तर्हि—

"ऋतुस्नातां तु यो भार्यां सन्निधौ नोपगच्छति ।
घोरायां भ्रूणहत्यायां पच्यते नात्र संशयः" ॥

इत्यादिदोषश्रवणं न स्यात् । नैष दोषः मनसि कामे सत्यपि तस्यामरुच्या द्वेषादिना वा तामनुपगच्छतो दोषश्रवणोपपत्तेरिति सर्वमनवद्यम् ॥ ११ ॥

तदेवं व्यवायादिमनोरथाकुलितत्वाद्भीष्टमात्मानं न शृण्वन्तीत्युक्तमिदानीं धनस्यापि धर्मद्वारा परमात्मप्रापकस्य दृष्टोपभोगार्थं विनियोगाज्ञात्मज्ञानगन्धोऽपीऽत्याह—धनञ्चेति । धर्म एवैकं फलं यस्य तत् कुतः ? यतो यस्माद्धर्मात्सविज्ञानमपरोक्षज्ञानसहितं परोक्षज्ञानं भवति । कथंभूतम् अनुप्रशान्ति अन्वनन्तरमेव प्रकृष्टा शान्तिर्निर्वाणलक्षणा यस्य तत् एवम्भूतं धनं गृहेषु देहाद्यर्थं युञ्जन्ति ॥ १२

———

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

श्रीविभूत्योरेकार्थत्वेन पौनरुक्त्यमाशङ्क्य धनादिसम्पदित्यादिव्याख्यातम् अभिजनेन सत्कुलेन विद्ययाऽध्ययनेन त्यागेन दानेन रूपेण सौन्दर्येण बलेन देहपाटवेन कर्मणा यागादिना ॥ ९ ॥

एवं कामुकत्वमानित्वादिप्रकारेण वर्त्तमानास्ते कर्मठाः वेदतत्त्वार्थं वेदस्य वास्तवार्थं श्रीहरिं स्फुटं प्रव्यक्तम् आत्मतया रश्मीनां सूर्यवन्मूलरूपत्वेन ईश्वरतया अन्तर्यामितया एवमपि द्वैविध्येनात्रास्थितत्वेऽपि पुरुषार्थतां परमानन्दरूपतां वेदोपगीतं वेदान्तैकवेद्यं "नमो वेदान्तवेद्याय" इति "नावेदविन्मनुते तं बृहन्तम्" इति च श्रुतेः । तत् कुतः स्फुटत्वेऽप्यश्रवणे को हेतुरित्यर्थः । अग्रिमपद्यसङ्गतिलाभाय मनोरथपदं तद्विषयदर्शनेन व्याचष्टे व्यवायेत्यादि ॥ १० ॥

व्यवायादीनामपि निन्द्यत्वेनाभिप्रेतानामपीत्यपेरर्थः "ऋतौ सदा मैथुनार्थं भार्यामुपगच्छेत् हुतान्मांसाच्छेषमवशिष्टं मांसं भक्षयेत्" इत्यादिना विधिरूपेण वेदेन मादिना सौत्रामण्यामिति वक्ष्यमाणवाक्यग्रहः रागत एव इच्छात एव नित्यप्राप्ताः नित्यवत् प्राप्ताः । अतो नित्यप्राप्तत्वात् तासु व्यवायामिषमद्यसेवासु विधिरुपदेशो नास्ति, "चोदनाचोपदेशश्च विधिश्चैकार्थवाचकाः" इत्यभियुक्तोक्तेः विधिर्दर्शितः । उपेयादिति विध्यर्थे लिङ्श्रवणात् सत्यमित्यार्धाङ्गीकारे अयम् ऋतुगमनविधानरूपोऽपूर्वविधिर्नास्ति अप्राप्तार्थविधायको ह्यपूर्वविधिर्यथा प्रोच्यते यथाच स्वर्गकामो यजेतेत्यादि अत्र यागार्थव्रीहिप्रोक्षणस्य स्वर्गार्थयागस्य च वाक्यान्तरेण रागेण चात्यन्तमप्राप्तत्वादपूर्वविधित्वम् अत्र तु स्वेच्छयैव नित्यप्राप्तत्वान्नात्रास्त्येवेत्यर्थः । ननु, तर्हि कथं लिङ्श्रवणं तत्राह—किन्त्विति । नियमविधिरूपेण नियमविधिसदृशेन विधिवाक्येन अभ्यनुज्ञामात्रं प्रमाणान्तरप्रतिपन्नानिष्टसाधनत्वेतदभावमात्रबोधनं क्रियते तदाह । नियमविधिसमानार्थत्वमाह । द्वन्द्वस्य परवल्लिङ्गत्वे सति तास्विति वक्तव्ये तेष्विति एकशेषत्वात्पुंस्त्वं विवाहेत्युपलक्षणं तत्रापि ऋतावेवेत्यर्थः । सौत्रामण्यां तत्संज्ञकेयागे सुराग्रहान्मद्यपात्राणि गृह्णीयात् इति श्रुतिपदार्थः तत्रैव सौत्रामण्यामेव नियमः सार्वदिकव्यवायादिव्यावृत्तये सङ्कोचः । नन्विति शङ्कते नियमपक्षेऽप्यावश्यकत्वादिति । यथा व्रीहीनवहन्यादिति नियमविधिप्राप्तोऽवघातो ह्यावश्यकस्तथेत्यर्थः । अतः शङ्कातः सिद्धान्तमाहेत्यर्थः । आसु निवृत्तिरिष्टेत्यस्यात्र आसु व्यवायामिषमद्यसेवासु निवृत्तिरिष्टेति पठनीयं ततोऽयं भाव इति युज्यते व्यत्ययस्तु लेखकप्रमादादेव पूर्वं प्रवृत्त्यादिनियम् सिद्धान्तं विशदयति अयं भाव इति अयम् "ऋतौ भार्यामुपेयात्" इत्यादिर्नियमविधिर्न भवति कुतः ? नित्यप्राप्तत्वात् पक्षे प्राप्ताप्राप्तांशपूरको विधिर्नियमविधिः यथा व्रीहीनवहन्तीत्यादिः अत्र यथा तण्डुलनिष्पत्त्यर्थं नखविदलनादि लोकतः प्राप्तं तथावघातोऽपि तदर्थमेव लोकतः प्राप्तोऽपि नखविदलनादिव्यावृत्तये नियम्यते किन्तु यस्यां दशायामवघातं परित्यज्य नखविदलनादौ स्वेच्छया पुमान् प्रवर्त्तते तस्यां दशायामवघातस्याप्राप्तत्वात्तत्पूरकत्वेन नियमविधित्वमिति लक्षणसमन्वयः, तदुक्तं भट्टैः । "अवघातेऽपि

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी।

नियमो देशादाविव तेन सः। प्रधानेन प्रयुक्तः स्यात् सम्बन्धः प्रक्रियोक्तिभिः" इति अतः नित्यप्राप्तत्वेनाप्राप्तांशपूरणलक्षणनियमविधेरसम्भवात् परिसङ्ख्यैवेति उभयस्य युगपत् प्राप्तौ इतरव्यावृत्तिपरो विधिः परिसङ्ख्याविधिः सैवेष्टेति उच्यते उभय विधिसाङ्कर्यनियमविधिद्वारैवेयं परिसङ्ख्येति समाधीयते तत्प्रकारमाह—न तावदिति। परिसङ्ख्याविधिना कर्तृभूतेन श्रुत्या वाच्यार्थेन करणेन तथा सति वाच्यार्थाऽसम्भवेन स्व विरोधिप्रत्यनीकलक्षणया निवृत्तिपरिभाषणे सति स्वार्थस्य श्रुतस्य वाच्यार्थस्य ऋतुगमनस्य त्यागः तथा परार्थस्य अश्रुतस्यानृतुगमनस्यानृतौ भार्यां नोपेयादित्येवं कल्पनेति दोषद्वयं शब्दव्यवहारेण प्रतीयत इति शब्दनिष्ठं तथा रागतः प्राप्तस्याऽनृतुगमनस्य बाध इत्येको दोषोऽर्थविचारात् फलित इत्यर्थनिष्ठ इत्येवं दोषत्रयं स्यात् यतो वाच्यार्थासम्भवाल्लक्षणातो निवृत्तिपरिभाषणे दोषत्रयम् अतस्तन्निर्वहणाय क्वचिदपूर्वविधिद्वारा तात्पर्यतः परिसंख्या क्वचित्तु नियमविधिद्वारा तत्र पूर्वामाह—क्वचिदिति क्वचिदश्वाभिधानीमादत्त इत्यादौ प्राप्स्यतः मन्त्रे श्रुतस्येति सामान्योक्त्या पक्षे प्राप्स्यतोऽश्वाभिधानीरसनाग्रहणलक्षणार्थस्याश्वाभिधानीमादत्त इति ब्राह्मणवाक्येन पुनः प्रापणमनर्थकं व्यर्थम् अप्राप्ते शास्त्रमर्थवदिति न्यायात् इति हेतोः अपूर्वविधिद्वारा अपूर्वविधिसदृशतया सर्वांशेनाश्वाभिधानीग्रहणं मानान्तरेणाप्राप्तमित्यपूर्वविधित्वं पाक्षिकतया स्वांशेन प्राप्तमिति नापूर्वविधिः सङ्कुच्यते इति तद्द्वारान्यस्य गर्दभरसनाग्रहणस्य निवृत्तिः फलतस्तात्पर्यतो भवति गर्दभाभिधानीं न गृह्णीयादिति तद्यथा तदेव दर्शयति श्रुतस्य यजीयपशोरिमां रसनामगृभ्णन् गृह्णीयात् इति इति सामान्यतो रसनाविधायकमन्त्रं पठित्वा अश्वाभिधानीमश्वोऽभिधीयतेऽवस्थाप्यते यया तां रसनामादत्ते गृह्णीयादित्यत्र रसनालिङ्गतः रसनाशब्दसामर्थ्यात् रसनाद्वये गर्दभाश्वरसनयोर्विषये प्रयोगकाले प्राप्स्यतो मन्त्रस्य सम्बन्धी अयमश्वाभिधानीमेवाददीतेति मन्त्रार्थनिश्चायक इत्यर्थः। अयमश्वाभिधानीग्रहणविधिः परिसङ्ख्यात्वेनोच्यते पूर्वोक्तदोषत्रयनिवारणार्थं तत्र द्वारमाहापूर्वविधिद्वारेति तत्र वृद्धसंमतिमाह। यथोक्तमिति। अयमश्वाभिधानीविधिर्लोकारव्यत्ययेनाऽप्राप्तविधिरपूर्वविधिरेव मन्त्रस्य पाक्षिकविधायकत्वेऽपि सर्वांशेनाप्राप्तत्वात् तस्मात् अतस्तादृशविधेर्हेतोर्मन्त्रार्थोऽपि अश्वाभिधानीमेवाददीतेति निश्चितः स्यात् अतोऽपूर्वविधिद्वारा फलेन तात्पर्येण गर्दभाभिधानीं न गृह्णीयादिति परिसङ्ख्योक्ताविशेषो नियमविधिनास्ति कुतः पुनः श्रुतेः अंशेन प्राप्तस्यैवाश्वाभिधानीग्रहणस्य पुनः श्रुतत्वात् अप्राप्तांशपूरणाभावादित्यर्थः। नियमविधिद्वारा परिसङ्ख्यां दर्शयति। क्वचिदिति। क्वचित् पञ्चनखभक्षणवाक्ये रागतः स्वाभाविकेच्छातो नित्यप्राप्तस्य पञ्चनखभक्षणादेः व्यवायादेः सम्बन्धे अप्राप्तांशस्य पूरणमेव लक्षणं स्वरूपं यस्य तस्य नियमफलस्याप्यभावात् परित्रापूर्वविध्यभावं समुच्चिनोति नियमविधिद्वारा नियमविधिसदृशतया फलतस्तात्पर्यतः परिसङ्ख्या भवति पञ्चनखेतरा अभक्ष्या इति दार्ष्टान्तिकमाह। तथात्रेति। अत्र ऋतौ भार्यामुपेयादित्यादौ अभ्यनुज्ञाद्वारा प्रमाणान्तरप्रतिपन्नानिष्टसाधनत्वेऽपि तदभावमात्रबोधको विधिरभ्यनुज्ञा तद्द्वारा परिसङ्ख्यैव नापूर्वविधिः नापि नियमविधिरित्यर्थः। अनृतौ भार्यां नोपेयात् अहुतशेषं न भक्षयेत् सौत्रामण्यतिरिक्ते सुरां न गृह्णीयात् इत्येवं सर्वत्र परिसङ्ख्यैव नत्वपूर्वनियमयोरिव शास्त्रप्राप्तत्वेनावश्यकत्वमिति निवृत्तावेव तात्पर्यमित्यर्थः। तत्त्रयलक्षणमभियुक्तैरुक्तं "विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति। तत्र चान्यत्र सम्प्राप्तौ परिसङ्ख्येति गीयते" इति अन्यदतिरोहितार्थम् ॥ ११ ॥

तदेवं पूर्वोक्तप्रकारेण धर्मद्वारा भगवत्परितोषकतदर्पितकर्मद्वारा ज्ञानभक्तिलक्षणपरमार्थप्रापकस्य दृष्टोपभोगार्थम् ऐहिकपुत्रकलत्राद्युपभोगार्थं विनियोगात् व्यर्थकरणात् आत्मज्ञानगन्धोऽपि न कुतः पुनः अवगममित्यपरेरर्थः अपरोक्षज्ञानमनुभवः परोक्षज्ञानं शास्त्रीयं कलेवरस्येति सम्बन्धसामान्यविवक्षया चतुर्थ्यर्थे षष्ठी तथा चाजहल्लक्षणया देहाद्यर्थमिति व्याख्यातम् ॥ १२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्।

निर्दोषत्वे दृष्टान्तः व्यवस्थितिः तेष्विति शास्त्रस्य अप्राप्तार्थगोचरत्वात् रागप्राप्ता व्यवायादयो न विधेयाः। किन्तु व्यवस्थामात्रं शास्त्रकृत्यमित्यर्थः। तदेव विवृणोति, विवाहेति निवृत्तिः परदारादिभ्यो निवृत्तिः ॥ ११ ॥

यतः धर्मात् सविज्ञानं प्रकारवैविध्यज्ञानसहितं प्रजया प्रयोजनतया हेतुत्वं विवक्षितं प्रजार्थः ॥ १२—१४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

मानितां प्रपञ्चयति। श्रियेति। श्रीर्धनादिसम्पद्विभूतिरैश्वर्यं ग्रामाधिपत्यादिः अभिजनः सत्कुलप्रसूतत्वं त्यागो दानं रूपं देहसौष्ठवं बलं देहबलं कर्म श्रौतं स्मार्त्तं च एभिर्जातो यः स्मयो गर्वस्तेनान्धाऽविविक्ता धीर्येषां ते सहेश्वरानीश्वरसहितान् हरेः प्रियान् भक्तानवमन्यन्ति यतः खलाः भूतहिंसापराः इत्यर्थः ॥ ९ ॥

अभीष्टं निरतिशयपुरुषार्थरूपं वेदोपगीतं वेदान्तवेद्यस्वरूपस्वभावम् ईश्वरं न च शृण्वते तद्वार्त्तां न शृण्वन्तीत्यर्थः। किन्तु मनोरथानां वार्त्तया प्रवदन्ति प्रवदन्तः कालं नयन्तीत्यर्थः। कुतः यतस्तेऽबुधा अज्ञाः वेदोपगीतं न शृण्वत इत्यनेन वेदार्थतत्त्वावगमोऽपि न तेषां विद्यते इति सूचितम् ॥ १० ॥

उपासितास्त्रियो गृहेषु मैथुन्यपरेष्विति व्यवायो निन्दितः सूत्रै परं घ्नन्ति पशूनतद्विद इति यागीयमांसभक्षणं तथा तुल्यन्यायाद्यागीयसुरापानानिन्दाप्यभिप्रेता। श्रिया विभूत्येति वित्तनिन्दा च कृता। ननु, धर्मप्रजासम्पत्त्यर्थं "स्त्रियमुद्वहेत् ऋतावुपेयात् पशुमालभेत यजमानपञ्चमा इडां भक्षयन्ति हुतशेषमश्नीयात् सौत्रामण्यां सुराग्रहान् गृह्णाति प्रतिग्रहादिना धनमार्जये"दित्यादिभिः शास्त्रैर्व्यवायादीनां नियमितत्वात्किमिति तन्निन्दा क्रियते इत्याशङ्क्याह—लोक इति। व्यवायः स्त्रीसङ्गः व्यवायादयो नित्यरागस्था नित्यप्राप्ताः जन्तोः प्राणिमात्रस्यातस्तत्र तासु चोदना

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

विधिर्नास्ति, किन्तु तेषु व्यवायादिषु व्यवस्थितिः शास्त्रस्याप्राप्तार्थगोचरत्वाद्रागप्राप्तव्यवायादयो न विधेयाः । किन्तु व्यवस्थितिमात्रं शास्त्रकृत्यम् इत्यर्थः । तदेव विवृणोति । विवाहादिभिर्व्यवस्थितिरिति सम्बन्धः । विवाहगृहीतायामेव व्यवायः कार्यः यज्ञ एवामिषसेवा सौत्रामण्यामेव सुराग्रह इति नियमः क्रियत इत्यर्थः । नियमफलभूतं सङ्कोचमाह—आसु निवृत्तिरिष्टेति । आसु व्यवायामिषमद्यसेवासु निवृत्तिः परदारेभ्योऽनृतुकालेभ्योऽयज्ञीयामिषमद्यसेवाभ्यां च निवृत्तिरिष्टा न तु स्वदारादिभ्यः ॥ ११ ॥

यद्यप्येवं स्वदारादिषु नियमिता व्यवायादयो न निन्दितास्तथाप्युपयोगविशेषमविज्ञाय केवलदेहसुखार्थतयोपयुज्यमाना निन्द्या एवेत्यभिप्रायेणोत्तरमाह—द्रव्येति । तावद्धनस्योपयोगविशेषं वदंस्तदन्यथोपयुक्तस्यानर्थहेतुतामाह—धनञ्चेति । अयमर्थः धनन्तु धर्मैकफलं धर्म एक एव फलं यस्य तद्धर्मैकसाधनं प्रतिग्रहादिना सम्पादितेन धनेन भगवत्प्रीतिकरं धर्ममेव सम्पादयेन्नतु विषयभोगमित्यर्थः । एवं चेत्तत्सफलम् इति वक्तुं धर्मं विशिनष्टि—यतो धर्मात्सविज्ञानं चिदचिदीश्वरतत्त्वत्रयप्रकारवैविध्यज्ञानसहितं ज्ञानं भगवद्याथात्म्यज्ञानम् अनु ज्ञानादनु पश्चात्प्रशान्तिरशनायाद्यूर्मिषट्कराहित्यं च भवति । तादृशधर्मैकफलं धनम् इत्यर्थः । एवं धर्मैकफलमविज्ञाय केचित्केवलं गृहेषु युञ्जन्ति विषयभोगार्थतया विनियुञ्जते दुरन्तवीर्यं कलेवरस्य मृत्युं न पश्यन्ति चातस्ते निन्द्या इति भावः । कलेवरस्येति तादर्थ्यस्य शेषत्वविवक्षया षष्ठी वा कलेवरार्थतया गेहसुखार्थं युञ्जन्तीत्यर्थः ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

श्रिया शरीरकान्त्या विभूत्या अणिमाद्यैश्वर्येण श्रीविभूत्यादिना जातस्मयेन समृद्धमदेन अवमन्यन्ते अवजानन्ति ॥ ९ ॥

हरिप्रियावज्ञानमेव हर्यवज्ञानं तथापीदमाधिक्यमिति भावेनाह । सर्वेष्विति । हरेः शशविषाणवदविद्यमानस्यावज्ञाकथङ्काकारं सङ्गच्छत इत्यतो वा तदवज्ञानप्रकारमाह—सर्वेष्विति । तत्र हेतुमाह, अबुधा इति । हर्यवज्ञानेऽपि श्रीसेवाया विष्णुसेवात्वात्तद्वतां कथमधःपातः स्यादितीयमाशङ्क्य "येतु विष्णुमवज्ञाय श्रियमेव ह्युपासते । उपेक्ष्य वा हरिं ते तु भूत्वा वान्त्याः पतन्त्यधः" इत्यनेन परिहर्तव्या राजप्रीत्यभावे प्रकृतिवर्गप्रीत्या किं प्रयोजनमभीष्टफलानुदयात् हृदयङ्गमजनप्रीत्यभावे परिवृढदृढप्रीतिरपि नोदेति तत्साधकाभावादेवं प्रकृतेऽपि विष्णुप्रीत्यभावे लक्ष्म्यादिप्रीतिरपि अभीष्टफलदा न स्याल्लक्ष्म्यादिप्रीत्यभावे परं विष्णुप्रीतिरपि अभीष्टवर्षिणी न स्यात् । अतो यथा योग्यं विष्णुप्रीतेरनुकूलान्यप्रीतिरिति शास्त्रगुरूपदेशेन तत्तद्विष्णुजनभक्तिः कर्तव्येत्यत इयमेव विधेया नान्या तस्याश्चोदनाभावेऽपि निम्नजलस्यन्दनवत् स्वतः प्रवृत्तेः ॥ १० ॥

एवं कुर्वाणा असुरप्रकृतयो न देवप्रकृतयः तेषां वर्णायुतायुतकालेनापि प्रवृत्यदर्शनादुक्तनिदर्शनसाम्यायोग्याह-लोक इति । लोके अन्योन्यप्रसूतिमतः प्राणिनो व्यवायादिसेवाः नित्याः सदातनाः सन्ति । तुशब्दो दुष्टव्यवसायज्ञापनसूचकः तत्र मद्यादिसेवाया वामदेवादिषु यज्ञान्विहाय चोदनाविधिर्नाहि तेषामपि तदुक्तम्—

> "व्यवायामिषमद्यानि हरेः पूजार्थमेव तु ।
> वामदेव्यो नाम यज्ञो व्यवायो हरिपूजनम् ॥
> पितृयज्ञे देवयज्ञे मांसेन हरिपूजनम् ।
> व्यवाययज्ञे मद्यन्तु सोमात्मकनयेष्वने ॥
> क्षत्रियादेर्न विप्राणां विप्रो दोषेण लिप्यते ।
> अरागतः प्रवृत्तिः स्याद्रागो दोषस्य कारणम् ॥
> प्राणभक्षोऽथवा यज्ञे दैवे सर्वस्य चेष्यते ।
> पैष्टमद्यस्य माध्व्यादिक्षत्रियस्य न दुष्यति ॥
> दैवे रत्येव च प्रीतिर्विष्णोः पुत्रातु मानुषे ।
> तस्माद्विहितमात्रेषु रागं मुक्त्वा यथाविधि ॥
> समाहितो हरिं स्मृत्वा यज्ञन्याजी हरेर्भवेत् ।

इति विधिर्नास्ति चेत्किमिति तत्राध्यायत इति तत्राह, व्यवस्थितिरिति । यज्ञान् विहाय तेषु व्यवायादिषु स्थितिः सुरैव गृहं शरणं येषां ते तथा हरिविमुखाः तैरिष्टा ततः किं तत्राह, आसुरेति । निषिद्धक्रियात्वात् असुरजनस्य वृत्तिर्जीविका * "न सुरां पिबेत्" इति श्रुतेः ॥ ११ ॥

एतदेव विवृणोति, धनमिति । यतो यस्माद्धर्मादस्य सविज्ञाने ज्ञानमुत्पद्यते अनुज्ञानोत्पत्तेरनन्तरं प्रशान्तिः प्रकृष्टा मुक्तिर्भवति यो धर्मश्च धनाद्भवति तादृक् धर्मैकफलं धनं ये कलेवरस्यार्थे गृहेषु कलत्रादिषु युञ्जन्ति प्रयुञ्जते । कामस्यापि पुरुषार्थत्वात्तदर्थमर्थप्रयोगो युक्त इति तत्राह, मृत्युमिति । अनेन कामलक्षणपुरुषार्थस्य क्षणभङ्गुरत्वमुक्तम् अत ईदृशी प्रवृत्तिरासुरीत्यर्थः । धनं पुष्टिलक्षणमोक्षहेतुरित्येवं विभ्रधनस्यान्यविषयत्वं कुर्वताम् आसुरीप्रवृत्तिरिति किमु वक्तव्यमितीममर्थं हिशब्देन सूचयति ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तेषां मोहजं प्रमादमाह-सर्वेष्विति । तत्र शश्वदिति विद्वदनुभवसिद्धत्वम् चेश्वरस्य दर्शितम् ॥ १० ॥

लोक इति । तैः । तत्र नियमविधिरूपेणेति तत्सदृशेनेत्यर्थः । तदाहेति तत्समानार्थमाहेत्यर्थः । द्वन्द्वस्य परवल्लिङ्गत्वे सति तास्विति वक्तव्ये तेष्वित्येकशेषत्वान्नपुंसकत्वं विवाहेत्युपलक्षणं तत्रापि ऋतावेवेत्यर्थः । नियमपक्षेऽप्यावश्यकत्वादिति यथाश्वाभिधानीमादत्त इत्यत्रादानमावश्यकं तथेत्यर्थः । सिद्धान्तमाह-अत आहेति । नियमे आदानस्य विधिप्राप्तत्वात्र सर्वतो निवृत्तौ तात्पर्यं परिसङ्ख्यायां तु भक्षणस्य रागतः प्राप्तत्वात्सर्वत एव निवृत्तौ परमतात्पर्यमिति युक्तैव निन्देत्यर्थः । आसु व्यवायेत्याद्येकमयं भाव इत्यतः पूर्वमेव युज्यते तत्र तु लेखकभ्रमादिति ज्ञेयं व्यवस्थितिरिति तच्छब्देन करणभूतेन प्राप्स्यतः पाक्षिकतयेति ज्ञेयं व्यवस्थितिरिति तच्छब्देन व्याख्यातो नियम इत्यर्थः । नियमद्वारैवेयं परिसङ्ख्येति सिद्धान्तयितुमाह-उच्यत इति । परिसङ्ख्याविधिना कर्तृभूतेन श्रुत्या शब्देन करणभूतेन प्राप्स्यतः पाक्षिकतयेति ज्ञेयं क्वचिदित्यति रागतो

*एतस्मते आसुरिवृत्तिरिष्टा इति पाठभेदोऽस्ति ।

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

नित्यप्राप्तस्येत्यस्य नियमेत्यादिनान्वयः । तत्र हेतुः प्राप्तांशेति यथा पाक्षिकतयांशेनाप्राप्ताश्वाभिधानी सर्वांशेन पूर्य्यते तादृशत्वाभावादित्यर्थः । अत्रापि नियमविधिस्तत्सदृश एव ज्ञेयः शनसीति । विध्यभावेऽप्यनुज्ञाविषयाणां रागिणामप्यनुज्ञातिक्रमः स्यादेवेति भावः । अथवा लोकइति तथाहि—

"विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति ।
तत्र चान्यत्र सम्प्राप्तौ परिसङ्ख्या विधीयते" ॥

अत्र विधिर्यथा "अहरहः सन्ध्यामुपासीत" इति इदं खलु सर्वथैव न प्राप्नोति अयमेवापूर्वविधिरित्युच्यते नियमो यथा "इमामगृभ्णान् रशनामृतस्य" इति मन्त्रेण ऋतस्य याज्ञिकपशोः रशनां रज्जुमगृभ्णान् अगृह्णन्नित्यर्थेन गर्दभाश्वाभिधान्योरेकतरस्यां स्वाच्छन्देन प्राप्तायां ब्राह्मणेन नियम्यते अश्वाभिधानीमादत्त इति परिसङ्ख्या च "पञ्च पञ्चनखा भक्ष्या" इति अत्र रागप्राप्तेषु प्रायः सर्वेष्वेव मांसवत्सु भक्ष्येषु पञ्चैव परिसङ्ख्यायन्ते तदनुरोधेन तावन्त एवाभ्यनुज्ञायन्ते मात्रं नतु विधीयन्त इत्यर्थः । तत्र नियमे प्राप्स्यतोऽप्यर्थस्य प्रापणमनर्थकमिति ब्राह्मणेनापूर्वविधिनाऽन्यनिवृत्तिस्तात्पर्य्यतो भवति । अतः परिसङ्ख्या चात्र पर्य्यवसिता तन्त्रवार्त्तिके यथोक्तं "अप्राप्तविधिरेवायमतो मन्त्रश्च निश्चितः । परिसङ्ख्या फलेनोक्ता न विशेषः पुनः श्रुतेः" इति अयमश्वाभिधानीविधिरप्राप्तविधिरेव लकारव्यत्ययात् तस्मादतो विधेर्मन्त्रार्थश्च निश्चितः अश्वाभिधानीमेवाददीतेति अतोऽत्र परिसङ्ख्यात्वमपि फलेन तात्पर्य्येण प्राप्तम् ननु, सामान्यतो मन्त्रप्राप्तस्य रशनाद्वयस्याश्वाभिधानीमित्यनेन विशेष एवोक्तः अपरोऽपि ज्ञास्यत इति वाच्यं तत्राह—पुनः श्रुतेः पुनरुक्तत्वादनर्थकत्वादित्यर्थः । अथ परिसङ्ख्यायामिदं विविच्यते न तावत्परिसङ्ख्याविधिशब्देनाऽन्यनिवृत्तिं वक्ति, तथा सति पञ्चनखीभक्षणरूपस्य स्वार्थस्य त्यागः तथान्यनिवृत्तिरूपस्य परार्थस्य कल्पनं ततश्च प्राप्तस्य पञ्चनखीभक्षणरूपस्य बाधश्च स्यात् । तस्माद्यादृशं नियमविधौ पाक्षिकतयांशेनाप्राप्ताश्वाभिधानीसर्वांशेन पूर्य्यते रागतो नित्यप्राप्तेषु नियमफले तादृशत्वाभावान्नियमद्वारा तात्पर्य्यतः परिसङ्ख्या भवतीति तस्मादयमर्थः लोके व्यवायादयो जन्तोर्मनुष्यादेर्नित्याः रागत एव नित्यप्राप्ताः । तत्र व्यवायः स्वभावत एव आमिषमद्ये तु मनुष्यस्य परम्पराप्राप्तत्वादिति ज्ञेयम् । अतस्तत्र चोदना अपूर्वविधिर्नास्ति किन्तु तेषु रागिषु विवाहयज्ञसुराग्रहैर्व्यवस्थितिः क्रियते नियमद्वारा परिसङ्ख्या क्रियते तद्यथा विवाहेत्युपलक्षणं विवाह एव तत्रापि ऋतावेव व्यवायः कार्यः । यज्ञ एवामिषसेवा सुराग्रहे सौत्रामण्यामेव मद्यसेवेति । ननु, परिसङ्ख्यात्वे सति व्यवायादौ विधित्वमस्त्येव लिङादिसद्भावात् ततस्ताः कथं निन्दया त्याज्यन्ते तत्राह—आसु व्यवयादिषु निवृत्तिरेवेष्टेति रागप्राप्तत्वादभ्यनुज्ञामात्रं क्रियते । नत्वपूर्वनियमयोरिव शास्त्रप्राप्तत्वादवश्यं कार्य्यत इति निवृत्तावेव तात्पर्य्यमित्यर्थः । ऋतुस्नाताया भार्य्यायाः परित्यागदोषश्रवणं तु विध्यतिक्रमात् विध्यनुपपत्तेः । नच वैराग्येणाभ्यनुज्ञातातिक्रमात् तत्राभ्यनुज्ञाया अभावात् किन्तु सत्यप्यभ्यनुज्ञातायामन्यस्यां रागादौ तादृश्यां स्वभार्य्यायामरुच्यादिनैवाप्रवृत्तेस्तदतिक्रमात् ततो भ्रूणहत्यापर्य्यवसानाच्च एवमामिषमद्ययोरपि ज्ञातव्यमिति ॥ ११ ॥ — ॥ १८ ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

श्रिया । धनादिसम्पत्त्या विभूत्या ऐश्वर्य्येण सतः साधून् अवमन्यन्ते ॥ ९ ॥

दृढतरं प्रबोध्यमाना अपि ते नैव प्रबोध्यन्ते इत्याह—सर्वेष्विति । यथा समाकाशमित्यसङ्गत्वम् अभीष्टमित्याराध्यत्वम् ईश्वरमित्यनाराधने सति दण्डदातृत्वं वेदोपगीतं चाति सर्वथा विख्यातत्वं चोक्तं न शृण्वत इति केन प्रकारेणोच्यत आह—मनोरथानां व्यवायामिषादिविषयाणां वार्त्तयेति भगवत्कथायां सद्भिः प्रवर्त्तितानामपि तत्र विषयभोगवार्त्ते बलात् पातयन्तीत्यर्थः । प्रवदन्तीति तदा स्वयमेव प्रकर्षेण वक्तारो भवन्ति ॥ १० ॥

ननु, व्यवायादीनामपि "ऋतौ भार्य्यामुपेयात् हुतशेषं भक्षयेत्" इत्यादिना विहितत्वात् किमिति ते निन्द्यन्ते तत्राह—लोक इति । व्यवायः स्त्रीसङ्गः आमिषमद्ययोर्मांससमादिरयोः सेवा भक्षणानि नित्या रागत एव नित्यप्राप्ताः तत्र व्यवायः स्वभावत एव आमिषमद्यसेवा मानुषस्य कुलपरम्पराप्राप्तत्वादिति ज्ञेयम् । अतस्तत्र तासु चोदना शास्त्रविधिर्नास्ति अप्राप्तप्रापणस्यैव विधित्वात् ननु "ऋतौ भार्य्यामुपेयात्" इत्यादिर्विधिर्दृष्ट एवेति तत्राह, व्यवस्थितिरिति । तेषु व्यवायादिषु विवाहयज्ञसुराग्रहैर्व्यवस्थितिर्व्यवस्थैव दत्ता यदि स्त्रीमांसमद्यादिकं विना स्थातुं न शक्यते तदा विवाहविषय एव व्यवायः कार्य्यः । यज्ञ एवामिषसेवा सौत्रामण्यां सुराग्रहान् गृह्णातीति श्रुतेस्तत्रैव मद्यसेवा कार्य्येति तत्र तत्रैवाभ्यनुज्ञा दत्ता । ननु, वस्तुतो विधिः अत आसु व्यवायादिसेवासु निवृत्तिरेवेष्टा निवृत्तावेव शास्त्रस्य तात्पर्य्यमिति तथाहि भार्य्यामेवोपेयात् न स्त्रीमात्रम् ऋतावेवोपेयात् नान्यत्र, तत्रापि पञ्चपर्वातिरिक्तसमय एव रात्रावेव पुत्रकामनयैवेति क्रमक्रमतो निवृत्तिरेवाभिप्रेता । अथ "विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति । तत्र चान्यत्र च प्राप्तौ परिसङ्ख्या विधीयत" इत्यस्यार्थः प्रवृत्तिकर्मैकनिष्ठानां मते यथा अत्यन्तमप्राप्तौ विधिः यत्र रागतो विध्यन्तरतो वा सर्वथैवाप्राप्तिर्नास्ति स विधिरुच्यते यथा "अहरहः सन्ध्यामुपासीत" इति माघस्नानं प्रकुर्वीतेति निशि न स्नायात् चन्द्रग्रहे स्नायादिति अत्यन्ताप्राप्तिरहिते स्थले तु विधिर्न भवति किन्तु नियमः परिसङ्ख्या वा तत्र कुत्र वा नियमः कुत्र वा परिसङ्ख्येत्यत आह—पाक्षिके असति नियमः पाक्षिके अंशे असति निन्दा प्रायश्चित्तार्हे सति नियमः यथा "ऋतौ भार्य्यामुपेयात्" इति ऋतुसमये हि भार्य्यायां गमनं च रागप्राप्तं तत्रागमनांशे निन्दितो यथा—

"ऋतुस्नातान्तु यो भार्य्यां सन्निधौ नोपगच्छति ।
घोरायां भ्रूणहत्यायां पच्यते नात्र संशयः" ॥

इति स्मृतेः । अतोऽत्र नियम एव "ऋतौ भार्य्यामुपेयात्" एवेति ऋतौ भार्य्यागमनायोगो न कर्त्तव्य इति फलितार्थः । अथ तत्र च तन्मध्य इत्यर्थः । अन्यत्र च अन्यत्र तु अन्यस्मिन् भागे असति सति परिसङ्ख्या यथा "पञ्च पञ्चनखा भक्ष्याः" इति अत्र रागप्राप्ते पञ्चपञ्चनखभक्षणे च निन्दा न

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

श्रूयते । किन्तु तदितरभक्षणा एव अतः पञ्चैव पञ्चनखा भक्ष्या नान्ये इति परिसङ्ख्यैव अभ्यनुज्ञादान मात्रमतो मांसमात्रस्याऽभक्षणे नास्ति दोष इत्यायातम् अथ निवृत्तकर्मैकनिष्ठानां मतेऽर्थो यथा अत्यन्तं सर्वथा अप्राप्तौ विधिः यथा "अहरहः सन्ध्यामुपासीत" इत्यादि पाक्षिके प्रापणे सति विधित एव एकत्र कोटौ प्राप्तौ सत्यामन्यत्राप्राप्तौ च सत्यां नियम इत्यर्थः। यथा "इमामगृभ्णान् रशनामृतस्य" इति मन्त्रेण ऋतस्य यज्ञियपशोरशनां रज्जुमगृभ्णान्निनीमामित्येकवचनेन गर्दभाश्वाभिधान्यो रशनयोरेकतरस्यां प्राप्तिर्वाच्यते । तत्र किमश्वाभिधान्यामुतगर्दभाभिधान्यामिति संशये नियम्यते आश्वाभिधानीमादत्त इति अश्वाभिधानीमेवादद्यान्न गर्दभाभिधानीमिति नियमे निषेधो वाक्यार्थः तदेवमपूर्वविधिरिति नियमविधिरिति द्वावप्येतौ विधी एव का खलु परिसङ्ख्येत्यपेक्षायामाह, तत्र च तन्मध्येऽन्यतरत्वेऽथः अन्यत्र विधित इतरत्र रागस्थले प्राप्तौ सत्यां परिसङ्ख्या विधीयते । यथा रागतः सर्वमांसभक्षणप्राप्तौ पञ्चपञ्चनखेतरमांसानि सर्वाण्येव भक्ष्याणि भोक्तुः प्रत्यवायजनकानीत्यर्थः मांसभक्षणे पञ्चपञ्चनखमांसान्येव परिसङ्ख्यातानि अभ्यनुज्ञातानीति तत्रैव न प्रत्यवायः परिसङ्ख्याया अभ्यनुज्ञादानमात्रार्थत्वात् सर्वमांसाभक्षण एव शास्त्रतात्पर्यं एवमेव भार्यामेवाभिगच्छेन्न परकीयाम् ऋतावेव गच्छेन्नान्यत्रेत्यभ्यनुज्ञामात्रदानात् स्त्रीमात्रानभिगमन एव शास्त्रतात्पर्यम् ऋतुस्नातायां भार्यायामगमनदोषश्रवणं तु न विध्यतिक्रमात् विध्यनुपपत्तेरिति सन्दर्भः तस्यामरुच्या द्वेषादिना वा तदनभिगमन एव दोषश्रवणमिति स्वामिचरणाः ॥ ११ ॥

तथा धनस्यापि दृष्टोपभोगार्थमेव विनियोगादबुधा एव एते इत्याह—धनं चेति । धर्म एव एकमुत्कृष्टं फलं यस्य तत् यतो धर्मात् सविज्ञानमपरोक्षज्ञानसहितं परोक्षज्ञानं भवेत् । अनु अनन्तरमेव शान्तिर्मोक्षो यस्मात्तत् एवम्भूतं धनं गृहेषु देहाद्यर्थं युञ्जन्ति ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

मानित्वं विहसन्त्यच्युतप्रियानिति वाक्यार्थं च प्रपञ्चयति—श्रियेति श्रीः गृहकाञ्चनपाश्र्वादिरूपा विभूतिः अणिमादिरूपा अयादिना जातस्मयेन उत्पन्नेन मदेन अन्धधियो मलिनबुद्धयः खलाः सहेश्वरान् हरिसहितान् हरेः प्रियान् हरिर्वा प्रियो येषां तान् अतः साधून् निरपराधान् अवमन्यन्ति अवजानन्ति ॥ ९ ॥

किञ्च, कामुकत्वेन स्त्रोपास्यरूट्यादिविषयाणां मनोरथानां वार्त्तयोपलक्षिताः अबुधाः वेदार्थानभिज्ञाः अत एव वेदोपगीतं वेदार्थभूतमीशं न प्रवदन्ति न च शृणवते न शृण्वन्ति इति मुख्यस्तेषां मोहः कथम्भूतं ? सर्वेषु चराचरेषु अवस्थितम् "तत्सृष्ट्वा तदेवानु प्राविशत् अन्तः प्रविष्टः शास्ता जनानाम्" इत्यादिवेदं प्रपठन्तोऽपि तं न जानन्ति, अहो तेषां मोहाभिभूततेति भावः। पुनः कथम्भूतम् आत्मानामिति अन्तर्यामिणामित्यर्थः । एष त आत्मान्तर्यामि" इति श्रुतेः । असङ्गतामाह, यथा खमिति । अभीष्टं परमपुरुषार्थरूपम् ॥ १० ॥

ननु, कामुकाः उपासितस्त्रिय इत्येवं पुनःपुनः स्त्रीसङ्गः निन्द्यत्वेनोदाहृतः स किमनुपादेय एवेत्यत्र न केवलं स्त्रीसङ्गमात्रं वर्ज्यमपि तु स्त्रीसङ्गामिषभक्षणमद्यपानानि वर्ज्यानि तत्र तु नियमविधिद्वारा परिसङ्ख्याविधिवाक्यैः रागिणामभ्यनुज्ञामात्रं क्रियते इत्याह—लोके इति । लोके संसारे जन्तोः प्राणिमात्रस्य व्यवायामिषमद्यसेवास्तु नित्याः रागत एव नित्यप्राप्ताः तत्र तासु स्त्रीसङ्गमांसमद्यसेवासु चोदनाविधिर्नास्ति, अतः स्त्रीसङ्गमांसभक्षणमद्यपानानि वर्ज्यानि । ननु, "ऋतौ भार्यामुपेयात् हुतशेषं भक्षयेत् सौत्रामण्यां सुराग्रहान् गृह्णाती"ति विधिवाक्यानि सन्तीत्यत्रोच्यते अप्राप्तस्य प्रापको विधिरपूर्वविधिः यथा व्रीहीन् प्रोक्षतीति एवमुक्तवाक्यैर्न स्त्रीसङ्गमांसभक्षणमद्यपानानि विधीयन्ते, स्त्रीसङ्गादीनां रागत एव प्राप्तत्वात् अत उक्तवाक्यानि अपूर्वविधिरूपाणि न किंतु मन्दाधिकारिणां पशुवत् स्वाभाविकप्रवृत्तिनिवृत्तये अभ्यनुज्ञामात्रमेभिर्नियमविधिरूपैर्वाक्यैः क्रियते, एतदेवाह—व्यवस्थितिस्तेषु विवाहयज्ञसुराग्रहैरिति । तेषु स्त्रीसङ्गादिषु "ऋतौ भार्यामुपेयात्" इत्यादिवाक्यैर्विवाहादिभिः व्यवस्थितिर्नियमः क्रियते । तथाहि पक्षे प्राप्तस्य प्रापको विधिर्नियमविधिः यथा व्रीहीनवहन्तीति अनेनावघातस्य वैतुष्यार्थत्वं न प्रतिपाद्यते अन्वयव्यतिरेकसिद्धत्वात् किन्तु अवघातं विहायोपायान्तरेण यदा वैतुष्यं कर्त्तुमारभते तदा अवघातस्य तेनांशेनाऽप्राप्तत्वेऽनेनाप्राप्तांशपूरणमेव क्रियते तदोपायान्तरं परित्यज्यावघातेनैव वैतुष्यं कुर्यादिति नियमः । एवं विवाहविषये एव स्त्रीसङ्गः कर्त्तव्यः यज्ञे एवामिषसेवा सौत्रामण्यामेव मद्यसेवेति नियमः। ननु, नियमविधिनाप्यावश्यकत्वं व्यवायादीनां सिद्धमतो निन्दा न युक्तात आह—आसु निवृत्तिरिष्टेति । व्यवायादीनां नित्यप्राप्ततयाऽप्राप्तांशाभावात् नियमविध्यसम्भवं आसु व्यवायामिषमद्यसेवासु निवृत्तिः परिसङ्ख्यैवेष्टा उभयप्राप्तावितरव्यावृत्तिपरो विधिः परिसङ्ख्याविधिः यथा "पञ्च पञ्चनखा भक्ष्या" इति पञ्चनखाः "शशकः शल्लको गोधा कूर्मः खड्गी च पञ्चम" इति इदं हि वाक्यं न पञ्चनखभक्षणपरं तस्य रागतः प्राप्तत्वान्न नियमपरमप्राप्तांशाभावात् अतो पञ्चनखभक्षणनिवृत्तिपरं तद्वदृतौ भार्यामुपेयादित्यादीन्यपीतरव्यावृत्तिपराणि । ननु, तर्हि व्यवस्थितिरित्युक्तिरसङ्गता स्यादत्रोच्यते परिसङ्ख्याविधिः श्रुततोऽन्यव्यावृत्तिं न करोति यतः सा दोषत्रयग्रस्ता दोषत्रयं च श्रुतहानिरश्रुतकल्पनाप्राप्तबाधश्चेति श्रुतस्य पञ्चनखभक्षणस्य त्यागात् अश्रुतापञ्चनखभक्षणनिवृत्तेस्तु कल्पनात् प्राप्तस्य पञ्चनखभक्षणस्य बाधात् तस्मात्कञ्चित्प्राप्स्यतोऽप्यर्थस्य प्रापणमनर्थकमित्यपूर्वविधिद्वारा निवृत्तिः फलिता भवति । यथा "इमामगृभ्णान् रशनामृतस्ये-त्यश्वाभिधानीमादत्ते" इत्यत्र रशनालिङ्गतो गर्दभाश्वाभिधानीरशनाद्वये प्राप्स्यतो मन्त्रस्यापूर्वविधिद्वारा परिसङ्ख्योच्यते तदाह तन्त्रवार्त्तिककारः "अप्राप्तविधिरेवायमतो मन्त्रस्य निश्चितः। परिसङ्ख्या फलेनोक्ता न विशेषः पुनः श्रुतेरिति" पञ्च पञ्चनखा भक्ष्या इत्यादेस्तु नियमविधिद्वारा परिसङ्ख्याविधित्वं भवति तद्वदृतौ भार्यामित्यादीनामपि नियमद्वारा परिसङ्ख्याविधित्वात् रागिणामभ्यनुज्ञामात्रं तैः क्रियते । ननु, यद्युक्तवाक्यैः रागिणामभ्यनुज्ञामात्रं क्रियते तर्हि—

यद्घ्राणभक्षो विहितः सुरायास्तथा पशोरालभनं न हिंसा ।
एवं व्यवायः प्रजया न रत्या इमं विशुद्धं न विदुः स्वधर्मम् ॥ १३ ॥
ये त्वनेवं विदोऽसन्तः स्तब्धाः सदभिमानिनः ।
पशून् द्रुह्यन्ति विस्रब्धाः प्रेत्य खादन्ति ते च तान् ॥ १४ ॥
द्विषन्तः परकायेषु स्वात्मानं हरिमीश्वरम् ।
मृतके सानुबन्धेऽस्मिन् बद्धस्नेहाः पतन्त्यधः ॥ १५ ॥
ये कैवल्यमसम्प्राप्ता ये चातीताश्च मूढताम् ।
त्रैवर्गिका ह्यक्षणिका आत्मानं घातयन्ति ते ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

"ऋतुस्नातां तु यो भार्यां सन्निधौ नोपगच्छति ।
घोरायां भ्रूणहत्यायां पच्यते नात्र संशयः" ॥

इत्यादिदोषश्रवणं न स्यादिति चेन्न रागी यदि द्वेषादिना तां नोपेयात् तदा दोषश्रवणोपपत्तेः अत एव "यदहरेव विरजेत्तदहरेव परिव्रजेत् एतद्ध स्म वै तद्विद्वांसः आहुः ऋषयः कावशेयाः किमर्था वयमध्येष्यामहे किमर्था वयं यक्ष्यामहे एतद्ध स्म वै तत्पूर्वे विद्वांसोऽग्निहोत्रं न जुहुवांचक्रिरे एवं वै तमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च व्युत्थायाथ भिक्षाचर्यां चरन्ति किं कर्मणा किं प्रजया किं धनेन" इत्यादिश्रुतयः सर्वतो वैराग्यमुपदिशन्तीत्यलं विस्तरेण ॥ ११ ॥

एवं भगवद्बहिर्मुखानां नानाविधं मोहमुक्त्वेदानीं धर्मद्वारा भगवत्प्रापकस्य धनस्याप्यन्यथा व्ययं ये कुर्वन्ति तेषां मोह-माह—धनञ्चेति । यतो धर्मात् तीर्थवासमहत्सेवाहरिकथाश्रवणादिलक्षणात्सविज्ञानं विविधसाधनज्ञानसहितं साध्यभूतभगवद्गुणशक्तिस्वरूपादिविषयं ज्ञानमुत्पद्यते अनु ज्ञानलाभानन्तरं प्रशान्तिर्मोक्षलक्षणा भवति "ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति" इति श्रीमुखोक्तेश्च तीर्थवासमहत्सेवाहरिकथाश्रवणादिरूपः धर्म एवैकं फलं यस्य एवम्भूतं धनं च गृहेषु देहाद्यर्थे युञ्जन्ति प्रयुञ्जते । कलेवरस्य दुरन्तवीर्यमनिर्वार्यप्रभावं मृत्युं न पश्यन्ति अनुप्रशान्तीति पाठे ज्ञानविशेषणम् अनु अनन्तरं प्रशान्तिः प्रकृष्टा शान्तिः मोक्षलक्षणा यतस्तत् अत्र ज्ञानस्यैव ध्रुवा स्मृतिरूपस्य परा भक्तिरूपत्वं यतः इति एवं धनयाचकं वा यतः धर्मात् धर्मद्वारा ज्ञानं तद्यमं चेति योजना ॥ १२ ॥

भाषा टीका ।

धनादि सम्पत्ति से ऐश्वर्य से कुटुम्बी मनुष्यों से विद्या से दान देने से स्वरूप से बल से कामों से बड़े अभिमानी होकर बुद्धि से अन्धे होजाते हैं तब भगवान् नारायण को तथा उनके भक्त सत्पुरुष वैष्णवों को देखकर हँसते हैं क्योंकि वे सब दुर्जन हैं ॥ ९ ॥

जैसे आकाश सर्वत्र व्याप्त है वैसे सब देहधारियों में निरन्तर विराजमान अपने अत्यन्त प्रिय ईश्वर जिनको सब वेद गान करते हैं ऐसे ईश्वर विष्णु को जान सुनकर भी स्वर्गादि सुखों की बातों में रहते हैं ॥ १० ॥

इस संसार में मैथुन करना मांस खाना मद्य पीना यह तीन बात नित्य हैं अर्थात् सब को स्वभाव ही से प्यारे हैं इसके लिये किसी शास्त्र के आज्ञा करने की अपेक्षा नहीं है फिर जो शास्त्र विधान करता है तो यह जानना चाहिये कि "सिद्धौ सत्यामारभ्यमाणो विधिर्नियमाय कल्प्यते" इस न्याय से इन तीनों विषयों के प्रचार का निवारण करने के लिये व्यवस्था से विवाह यज्ञादिकों में मात्र इनका सेवन करके कम प्रवृत्ति होनेसे फिर सर्वथा त्याग करने के लिये वेदादिकों में इनका कथन है ॥ ११ ॥

धन तो केवल धर्म के वास्ते है जिस धर्म के करने से शास्त्र ज्ञान अनुभव ज्ञान और शान्ति होती है, तिस धन को घर में लगाते हैं अपने शरीर का जो दुस्तर पराक्रमवाला मृत्यु है तिसका कोई भय नहीं करते हैं ॥१२॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

किञ्च, व्यवस्थयाऽपि व्यवायाद्यनुज्ञानं न यथेष्टमपि त्वन्यथैवेत्याह—यदिति । यद्यस्मात्सुराया घ्राणभक्षोऽवघ्राणं स एव विहितो न पानं तथा पशोरालभनमेव विहितं न तु हिंसा अयमर्थः देवतोद्देशेन यत्पशुहननं तदालभनं "वायव्यं श्वेतमालभेत" इत्यादिश्रुतेर्नतु हिंसा "या वेदविहिता हिंसा न सा हिंसेति कीर्त्यते" इति वचनात् । भक्षणोद्देशेन तु क्रियमाणं हननं लौकिकहननं;तद्धिंसैव अत्र आलभनमेव विहितं न तु हिंसा अतो न यथेष्टमक्षणाभ्यनुज्ञेत्यर्थः । व्यवायोऽपि प्रजया निमित्तभूतया न तु रत्ये यतो अतोऽयथावादिन इमं विशुद्धं स्वधर्मं न विदुरिति ॥ १३ ॥

एवं भगवत्पराङ्मुखानां बहुदोषतां प्रपञ्च्य तन्निष्ठां प्रपञ्चयति—ये त्विति । पशुभिः अनेवंविदः न एवं धर्मं विदन्ति ये ते विस्रब्धा निःशङ्काः अनेन मनोरथो भविष्यतीति विश्वस्ताः ये

श्रीधरस्वामिकृतभावार्थदीपिका ।

तदानीन्तनपोषणेन वा तैः पशुभिर्विश्वस्तास्ते च पशवः प्रेत्य अमुत्र तान् खादन्ति—

"मांसभक्षयिताऽमुत्र यस्य मांसमिहाद्म्यहम् ।
एतन्मांसस्य मांसत्वं प्रवदन्ति मनीषिणः" ॥

इति वचनात् ॥ १४ ॥

अभिचारादिना द्विषन्तः मृतके देहे सानुबन्धे पुत्रादिसहिते ॥ १५ ॥

अज्ञास्तरन्त्यैरनुकम्पिताश्च तरन्ति तत्त्वज्ञास्तु स्वतः ये तु नात्यन्तमज्ञा न च तत्त्वज्ञास्तेऽन्तरालवर्तिनः पतन्तीत्याह—ये इति । कैवल्यं तत्त्वज्ञानमसम्प्राप्ताः मूढतामत्यन्तजडताम् अत्र हेतुः त्रिवर्गप्रधानाः अक्षयिका उपशान्तिस्थैर्यरहिता देहादिस्थैर्यबुद्धयो वा स्वयमेवात्मानं घातयन्ति ॥ १६ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी ।

व्यवस्थयापि नियमविशिष्टसत्तयाऽपि अन्यथैव बहुप्रकारैरेव नग्वालभनहिंसयोः को भेद इत्यपेक्षायामयमर्थः तथा च वेदाज्ञापालनार्थं शास्त्रविहननमालभनं तदनादरेण भक्षणार्थमेव हननं हिंसेति तयोर्भेदः अत्र तु वेदे तु अतः सुरापानादेः अवघ्राणाद्यर्थत्वात् अतो व्यवायादेः प्रजाद्यर्थत्वात् इमं चित्तशुद्ध्यर्थं वेदाज्ञापालनरूपम् ॥ १३ ॥

तन्निष्ठां तेषां बहिर्मुखानां प्राप्यम् अनेन पशुयागेन मांसेति अस्मिल्लोके यस्य पशोर्मांसमहमाद्मि स पशुरमुत्र यमालये मां भक्षयिता भक्षयिष्यति एतन्मांसस्य मांसशब्दस्य मांसत्वं निरुक्तिं मनीषिणः प्रवदन्तीति स्मृतिवाक्यार्थः ॥ १४ ॥

स्वात्मानमेव परकायेष्वपि वसन्तमीश्वरं द्विषन्तः केनाऽभिचारादिना अभिचारः श्येनादिना हिंसा आदिना लौकिकी हिंसा गृह्यते ॥ १५ ॥

अन्तरालवर्तिनः ज्ञानलवदुर्विदग्धाः उपशान्तिक्षणरहिताः क्षणमात्रमपि शान्तिशून्याः रजोविक्षिप्तमतय इत्यर्थः । द्वितीयपक्षे सर्वं हि पदार्थजातं देहादि क्षणिकमेव निखप्रलये तथाऽभ्युपगमात् तथापि नास्ति तत्र क्षणिकं क्षणिकत्वज्ञानं येषामिति देहादिस्थैर्यबुद्धय इति व्याख्यातम् ॥ १६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

मृतके शरीरे ॥ १५—२२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथ सुराभिषसेवाव्यवायानामुपयोगविशेषान्वदन् केषाञ्चित्तदज्ञानमाह—घ्राणभक्ष इति । सुरायाः यज्ञ इत्यादिः पशोरालभ्य भक्ष इत्यन्तः यज्ञे सुरायाः तथा पशोश्च भक्षः यज्ञीयसुराभिषसेवेत्यर्थः । घ्राणभक्षो विहितः प्राणः परमात्मा प्राणनहेतुत्वात् तथा च "श्रुतिः को ह्येवान्यात्कः प्राण्याद्यदेष आकाश आनन्दो न स्यात्" इति प्राणशरीरकत्वाद्वा तथा च श्रुतिः "मनोमयः प्राणशरीरनेता" इति प्राणशरीरकस्य परमात्मनो भक्षयितव्या विहितः स्वयज्ञस्तद्गुणयार्थं प्राणशरीरकपरमात्मनो भक्षयितव्या यज्ञीयसुराभिषसेवा विहितेत्यर्थः । यत् प्राणभक्ष इति पाठेऽवघ्राणात्मको भक्षः न तु पानादनात्मक इत्यर्थः । एवं चेत् दुष्यति प्रत्युत विशुद्धो भवति अन्यथा तु दुष्यत्येवेति भावः । तथा च गीतं भगवता—

"यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः ।
भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात्" ॥

इति च एवं पश्वालम्भनं न हिंसात्मकं किन्तु पश्वात्मोज्जीवनात्मकं भवतीत्याह—आलभनं न हिंसेति । तथा च श्रुतिः "न वा उ एतन्म्रियसे न रिष्यसि देवान् इदेषि पथिभिः सुगेभिः यत्र यान्ति सुकृतो न दुष्कृतस्तत्र त्वा देवः सविता दधातु" इति प्रजायै त्वव्यायनेन अपत्योत्पादनेन तृतीया न रत्यै न रतिसुखार्थम् एवं पितृऋणाद्विमुक्तो भवति । तथा च श्रुतिः "त्रिभिर्ऋणवान् जायते" इत्युपक्रम्य प्रजया पितृभ्य इति इमं विशुद्धं स्वधर्मं न विदुः न रत्यै इति वदिष्यमिति सम्बन्धः ॥ १३ ॥

इत्थमजानतां निष्ठां प्रपञ्चयन् गतिमाह—ये त्विति पञ्चभिः । एवंविधं धर्मं न विदन्त्यनेऽधार्मिकाः अत एवासन्तः स्तब्धा अविनीताः सदभिमानिनः सन्तो वयं इत्यभिमानवन्तः विस्रब्धा निःशङ्काः पशून् द्रुह्यन्ति द्रोहविषयाणां पशूनां कर्मत्वविवक्षायामुपपदविभक्तेः कारकविभक्तिर्बलीयसि" इति न्यायात्क्रुधद्रुहेति चतुर्थी बाधित्वा कर्मणि द्वितीया ते च पशवः प्रेत्यामुत्र तान् द्रोग्धॄन् प्रेतान् खादन्ति ॥ १४ ॥

किञ्च, अभिचारादिना द्विषन्तः परकायेषु कृतो द्वेषस्तदन्तरात्मनि स्वस्वात्मनि भगवत्येव पर्यवस्यतीत्यभिप्रायेण स्वात्मानम् हरिमीश्वरम् इत्युक्तं सानुबन्धे पुत्रकलत्रादिसहिते मृतके शवतुल्ये स्वदेहे बद्धः निरूढः स्नेहो येषां तेऽधः नरके पतन्ति ॥ १५ ॥

किञ्च, एषां सद्गतिः सर्वथा दुर्लभेत्यभिप्रेत्याह—ये इति । कैवल्यं ज्ञाननिष्ठामसम्प्राप्ताः मूढतां वा अनीता अप्रापिताः ते त्रैवर्गिकास्त्रिवर्गप्रधाना अक्षणिका उपशान्तिदशारहिताः देहादिस्थैर्यबुद्धयो वा स्वात्मानं घातयन्ति केवलमज्ञास्तत्त्वविदुपदेशात्तरन्ति ज्ञाननिष्ठास्तु स्वत एव अन्तरिता मूर्खास्तु नोभयथेत्यभिप्रायेण कैवल्यमसम्प्राप्ता येऽनीताश्च मूढताम् इत्युक्तम् आत्मानं घातयन्तीत्यस्यात्मनो सत्त्वप्राणरूपामन्ततः स्थावरतां प्राप्नुवन्तीत्यर्थः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

व्यवायादीनां यज्ञेषु विहितत्वमयुक्तं तद्विधानप्रकारमाह—यद्घ्राणेति । अयमर्थः सुराया घ्राणभक्ष इति यत् स विवादीनां देवयज्ञविशेषे विवक्षितः । तथा यत्पशोरालभनं तत् देवयज्ञे विहितं पशुमालभेतेति हिंसा न विहिता "न हिंस्यात्सर्वभूतानि" इति च यथा घ्राणभक्षादिकं विहितमेवं व्यवायः

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

पितृयज्ञे प्रजया सन्तत्यर्थं विहितो रत्यै इन्द्रियभोगार्थं न अत्रापि व्यवायाख्यपितृयज्ञे क्षत्रियस्य घ्राणभक्षमन्तरेण सुरा विहिता —

"व्यवाययज्ञे मद्यन्तु सोमात्मकतयेष्यते ।
क्षत्रियादेर्न विप्राणां विप्रो दोषेण लिप्यते ॥
अरागतः प्रवृत्तिः स्याद्रागो दोषस्य कारणम् ।
घ्राणभक्षोऽथवा यज्ञे दैवे सर्वस्य चेष्यते ॥

इति चोक्तं किमत्र मथितमत्राह—इमामिति । धर्मस्वरूपाज्ञानमेव भ्रान्तिकारणमित्यर्थः—

"यज्ञेष्वालम्भनं प्रोक्तं देवतोद्देशतः पशोः ।
हिंसानाम तदन्यत्र तस्मात्तां नाचरेद्बुधः ॥
यतो यज्ञे मृता ऊर्ध्वं यान्ति दैवे च पैतृके ।
अतो लोभादालभनं स्वर्गस्य तु न मारणम्" ॥

इति वचनाद्यज्ञे पशोरालम्भनं न मारणमित्युक्तम् ॥ १३ ॥

तत्र के मारका मारकानां पशूनां किं तत्फलमित्यत्राह-ये त्विति । असन्तोऽप्रशस्तकर्माणः त्रैवर्गिकाणां स्वहतपशुभिः खादनमेव प्रेत्य यजनफलम् ॥ १४ ॥

किञ्चाभेदज्ञानात्ततोऽप्यधिकदुःखकरो लोकः स्यादित्याह—द्विषन्त इत्यादिना । स्वात्मानं स्वाधारं स्वस्मिन्नासं च "स्वे महिम्नि" इति श्रुतेः । परकायेषु स्वकायेषु च सन्तं कायिनो जीवादन्यं द्विषन्तोऽसहमानाः आप्ततमादात्मशब्दोक्तं स्वस्मिन्नपि परेषु च—

"जीवादन्यं न पश्यन्ति श्रुत्वैवं विद्विषन्ति च ।
एतांस्त्वमासुरान्विद्धि लक्षणैः पुरुषाधमान्" ।

इति स्मृतिः । प्रतीतार्थबाधिका ॥ १५ ॥

एतदेव विशदयति—ये कैवल्यमिति । ये कैवल्यं यथार्थज्ञानम् असम्प्राप्ताः ये च मूढताञ्चातीताः पण्डितंमन्यास्ते त्रिवर्गसाधनयोग्यमभिजन्म यस्य स तथा तादृशमात्मानं पातयन्ति तमसीति शेषः । यद्वा, अभेदज्ञानिनां गतिमुक्त्वेदानीं मिश्रज्ञानिनां स्थितिमाह—ये इति । केवलो हरिरिति ज्ञानरहिताः अस्मादृशो न भवति भगवान् किन्तु ग्रामणीवत्प्रयोजक इति ज्ञानवन्तो ये ते भुक्तपुण्यफलाः आत्मानं स्वर्गान्मनुष्यलोकं प्रति पातयन्ति "ते तं भुक्त्वा स्वर्गलोकं विशालम्" इति च ॥ १६ ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

किञ्च, व्यवस्थयापि व्यवायाद्यभ्यनुज्ञानं न यथेष्टम् अपित्वन्यथैवेत्याह-यत् यस्मात् सुरायाः घ्राणभक्षः अवघ्राणमेव भक्षो विहितः नतु यथेष्टं पानं तथा पशोरालभनं वैधहिंसा किञ्चिदङ्गच्छेदनमेव नतु हिंसा वधः । व्यवायोऽपि प्रजया हेतुना नतु रमणार्थम् ॥ १३ ॥

एवमुक्तलक्षणं धर्मं न विदन्तीति ते " या शास्त्रविहिता हिंसा न सा हिंसेति कथ्यते " इत्यादिवाक्यार्थतात्पर्यमबुद्ध्वा ये पशून् प्राणत एव हिंसतीत्यर्थः । विस्रब्धाः वधकाले ध्येतेऽस्मत्पालका अस्मान्न हनिष्यन्ति किन्तु शत्रुदर्शनया उपहसितुमस्माभिः सह खेलन्त्येवेति पालितैः पशुभिः कृतविश्वासाः तान् द्रुह्यन्ति घ्नन्त्येव ततस्ते च पशवः प्रेत्य अमुत्र तांश्च स्वघातकान् खादन्ति "मांसभक्षयितामुत्र यस्य मांसमिहाद्म्यहम् एतन्मांसस्य मांसत्वं प्रवदन्ति मनीषिणः" इति वचनात् । यथा च योगबलेन यज्ञपशून् प्रत्यक्षं प्रदर्श्य प्राचीनबर्हिषं प्रत्युक्तं श्रीनारदेन—

"भोभो प्रजापते ! राजन् ! पशून् पश्य त्वयाऽध्वरे ।
संज्ञपितान् जीवसङ्घान् निर्घृणेन सहस्रशः ॥
एते त्वां सम्प्रतीक्षन्ते स्मरन्तो वैशसं तव ।
सम्परेतमयः कूटैश्छिन्दन्त्युत्थितमन्यवः" ॥

इति ॥ १४ ॥

द्विषन्त इति । मांसार्थं पशून् हिंसन्ति लोकान् वा यद्द्विषन्ति तत् स्वात्मानं हरिमेव द्विषन्तीत्यर्थः । मृतके स्वदेहे ॥ १५ ॥

अज्ञास्तत्त्वज्ञैरनुकम्पितास्तरन्ति तत्त्वज्ञास्तु स्वतः ये तु नात्यन्तमज्ञा नच तत्त्वज्ञास्तेऽन्तरालवर्त्तिनः पतन्तीत्याह । ये इति । कैवल्यमसम्प्राप्ताः कैवल्यप्रापकज्ञानशून्या इत्यर्थः । नापि पश्वादिवन्मूढाः तर्हि किं ज्ञानार्थिनो वा न त्रैवर्गिकाः धर्मार्थकामपराः भवन्तु तदपि कदाप्यवसरं प्राप्य हरिकथां श्रोष्यन्ति न अक्षणिकास्तत्र क्षणमात्रमप्यवकाशं न लभन्ते तर्हि ते आत्मानमेव घातयन्ति ॥ १६ ॥ १७ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अभ्यनुज्ञाविषयेऽपि व्यवायादेर्यथा ग्रहणं तद्दर्शयन् यथेष्टाचरणपराणां मोहमाह—यत् घ्राण इति । यद्यस्मात्सुरायाः घ्राणभक्षो विहितः अवघ्राणं प्रतिपादितं नतु पानं तथा पशोरालभनं वेदाज्ञयाऽधिकारिविशेषविषयिण्या यज्ञे देवतोद्देशेन पशुहननं न हिंसा एवं व्यवायः प्रजया हेतुभूतया नतु रत्यै इन्द्रियप्रीतये इमं विशुद्धं यथेष्टव्यवायामिषमद्यसेवाविपरीतं स्वधर्मं घोरसङ्कल्पाः कामुकाः न विदुरतोऽधः पतन्तीत्यन्तिमेन मुह्यन्तीति पूर्वेण वा सम्बन्धः ॥ १३ ॥

ये तु अनेवंविदः उक्तरहस्यानभिज्ञाः असन्तः अशिष्टाः स्तब्धाः सद्विमुखाः अतः सदभिमानिनः विस्रब्धा दण्डधरो नास्तीति विश्वस्ताः पश्वालम्भनस्येदमेव फलमिति विश्वासवन्तो वा यज्ञमिषेण मांसभक्षणार्थं पशून् द्रुह्यन्ति, प्राणहरणपर्यन्तां पीडां जनयन्ति तान् ते पशवः प्रेत्य मरणं प्राप्य यमलोकादौ खादन्ति ॥ १४ ॥

तान्खादन्तीति पशुद्रोहफलमुक्त्वाथ परार्थं पशून् द्रुह्यन्ति तद्दर्शयन् पशुद्रोहस्य फलान्तरमाह—अस्मिन्देहे मृतके मरणधर्मिणि सानुबन्धे, कलत्रापत्यादिसहिते बद्धस्नेहाः देहाद्यर्थं पशुप्राणहरा इत्यर्थः । स्वात्मानं स्वस्वरूपमधःपातकतया परकायेषु परात्मानमिति शेषः । उभयत्रेश्वरं नियन्तृतया वर्त्तमानं हरिं द्विषन्तोऽधो नरकादौ त्रिविधेन द्रोहेण पतन्तीत्यर्थः ॥ १५ ॥

मरणानन्तरं अधःपातस्तेषां भविष्यत्येतन्मात्रं न किन्तु जीवमाना अपि पतिष्यन्त्येवेत्याह—ये इति । केवलस्यानुपमस्य भावः कैवल्यमनुपमं पाण्डित्यमसम्प्राप्ताः मूढतां बाल्यमतीताश्च

एत आत्महनोऽशान्ता अज्ञाने ज्ञानमानिनः ।
सीदन्त्यकृतकृत्या वै कालध्वस्तमनोरथाः ॥ १७ ॥
हित्वात्यायासरचिता गृहापत्यसुहृच्छ्रियः ।
तमो विशन्त्यनिच्छन्तो वासुदेवपराङ्मुखाः ॥ १८ ॥

राजोवाच ।

कस्मिन् काले स भगवान् किं वर्णः कीदृशो नृभिः ।
नाम्ना वा केन विधिना पूज्यते तदिहोच्यताम् ॥ १९ ॥

करभाजन उवाच ।

कृतं त्रेता द्वापरं च कलिरित्येषु केशवः ।
नानावर्णाभिधाकारो नानैव विधिनेज्यते ॥ २० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

त्रैवर्गिका धर्मार्थकामप्रधानाः अचाणिकाः देहाद्यनित्यत्ववादिनः चणिकास्तद्विपरीताः देहादिस्थैर्यबुद्धयः आत्मानं नानाक्लेशैः घातयन्ति जीवन्मृता भवन्तीत्यर्थः—

"यश्च मूढतमो लोके यश्च बुद्धेः परं गतः ।
तावुभौ सुखमेधेते क्लिश्यत्यन्तरितो जनः" ॥

इति तृतीयस्कन्धस्थविदुरवचनाच्च ॥ १६ ॥

भाषा टीका ।

जोकि मदिरा का सूंघना मात्र भक्षण विहित है तैसे हि पशु का मंत्र से यज्ञ में वध ही विहित है न कि केवल हिंसा करना इसी प्रकार से मैथुन भी सन्तानों के वास्ते है न कि केवल मैथुन के वास्ते इस निर्मल धर्म को वे कर्मकाण्डी मीमांसक नहीं जानते हैं ॥ १३ ॥

जो कि इस प्रकार को नहीं जानने वाले असाधु हैं अनम्र हैं सत्पुरुषों का अभिमान करते हैं और लोभ के विश्वास से पशुओं को मारते हैं उन को वे ही पशु दूसरे जन्म में मार कर खाते हैं ॥ १४ ॥

पराये शरीर में वर्तमान अपने आत्मा ईश्वर हरि का द्वेष करने वाले पुरुष मारनेवाले कुटुम्ब सहित इस देह में स्नेह करने से नरकों में गिरते हैं ॥ १५ ॥

जो पुरुष मोक्ष के ज्ञान को नहीं प्राप्त भये हैं और जो मूर्ख भी नहीं हैं किन्तु धर्म अर्थ कामों में लगे हैं वे पुरुष अपने आत्मा का घात करते हैं ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तदाह—एत इति । आत्महनः आत्मापह्नवकर्त्तारः अज्ञाने कर्मणि तथा च श्रुतिः—

"असुर्या नाम ते लोका अन्धेन तमसाऽऽवृताः ।
तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः" ॥

इति ॥ १७ ॥

या गृहापत्यसुहृच्छ्रियस्ता हित्वा ॥ १८ ॥

तदेवं भगवद्भक्तिरेव कर्तव्येति स्थिते तत्र विशेषं पृच्छति, कस्मिन्काल इति । किंवर्णः कीदृग्वर्णवान् कीदृशः कीदृगाकारः केन वा नाम्ना केन वा विधिना ॥ १९ ॥

एषु कृतादिकालेषु नाना प्रकारा वर्णाभिधाकारा यस्य सः नानैव विधिना विविधेनैव मार्गेण ॥ २० ॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

तदाह आत्मघातित्वमाह—तथा च श्रुतिः । काम्यकर्मिणामात्महन्तृत्वे प्रमाणं श्रुतिः । ईशावास्योपनिषदि अविद्वन्निन्दार्थोऽयं मन्त्रः ते लोका इति तच्छब्दो यच्छब्दार्थे परमात्मभावमपेक्ष्य देवादयोऽप्यसुरास्तेषां स्वभूता असुर्या नाम शब्दोऽनर्थको निपातः लोकयः लोकयन्ते दृश्यन्ते भुज्यन्ते इति त्वन्यानि कर्मफलानि अन्धेनादर्शनात्मकेनाज्ञानेन तमसा आवृता आच्छादिताः तान् स्थावरान्तान् लोकान् ते जनाः प्रेत्य इमं देहं त्यक्त्वा यथाकर्म यथाश्रुतं गच्छन्ति, ते के? ये केचिदात्महनः आत्मानं घ्नन्तीति आत्महनोऽविद्वांसः ते हि आत्मानं नित्यं हिंसन्ति अविद्यादोषेण विद्यमानस्यात्मनस्तिरस्करणात् ॥ १७ ॥

अत्यायासेन अतिश्रमेण रचिताः सम्पादिता या गृहापत्यसुहृच्छ्रियस्ता हित्वेति यत्तदोर्गम्यत्वमेवान्यथा श्रिय इति प्रथमान्तमनन्वितं स्यात् ॥ १८ ॥

तदेवमभक्तनिन्दया भक्तिमार्गदार्ढ्यप्रकारेण तत्र भक्तौ यस्य भक्तिः कर्तव्या स भगवान् इह जगति पूज्यते तत्कालवर्णाकारादि भवद्भिरुच्यताम् ॥ १९ ॥

तत्तत्कालीनयुगावतारवर्णपूजादिज्ञानं सङ्ग्रहकर्तृत्वं स्यात् करभाजनस्तु करावेव भाजनं यस्येति तथा "पाणिपात्रोदराः

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

मत्तो माक्षिकेव न सङ्ग्रही" इत्युक्तेस्तु करभाजनो न सङ्ग्रहात् तथा भूतत्वात् स एवोवाचेति ज्ञेयम् इति चत्वारि युगानि सन्ति एषु कृतादिषु ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

किञ्च, एत आत्महनः अशान्ताः अशनापिपासादिपीडिताः अज्ञाने सत्यपि ज्ञानमानिनः ज्ञानश्रद्धाभिमानवन्तः कालेन ध्वस्ता मनोरथा येषां ते अत एवाकृतकृत्याः सीदन्ति जीवद्दशायां क्लिश्यन्ति इत्यर्थः ॥ १७ ॥

अत्यायासेन रचिताः सम्पादिताः गृहापत्यसुहृत्श्रीः हित्वा अनिच्छन्तोऽपि तमो नरकं विशन्ति वासुदेवपराङ्मुखास्तमो विश-न्तीत्यनेन वासुदेवभक्तास्तु तत्पदं विशन्तीति सूचितम् ॥ १८ ॥

तत्र विशेषं पृच्छति, कस्मिन्निति । किं वर्णः कीदृग्विधवर्णवान् कीदृशः कीदृगाकारः केन वा नाम्ना केन वा विधिना पूज्यते तदेतत्सर्वं मिहाधुनोच्यताम् ॥ १९ ॥

कृतमिति एषु कृतादिकालेषु नानाप्रकारा वर्णाभिधाकारा यस्य सः नानैव विधिना विविधेनैव मार्गेण पूज्यते ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

उभयेऽपि त्रैवर्गिकाः अधः पतन्तीत्युक्तं तत्र केषां कुत्र निपात इत्यतो अधोनिपातं विविनक्ति । ये नत्रेति । तत्रोभयेषु त्रैवर्गिकेषु ये आत्महनः परमात्मानं द्विषन्तः ते तमो विशन्तीत्यन्वयः । सीदन्त्यवसीदन्ति दुःखैकभाजो भवन्ति अशान्ता इत्यस्य विवरणं वासुदेवपराङ्मुखा इति अत्यायासरचितगृहादीन् हित्वा कालात्मना भगवता ध्वस्तः ब्रह्मत्वं गमिष्याम इत्यादिमनोरथो येषां ते तथा अनुच्छ्वासं श्वासमोक्षणवर्णसुखरहितं तमः विशन्ति ॥ १७ ॥ १८ ॥

मुमुक्षुभिः अधोक्षज ईज्यताम् इति निरणायि तत्र राजा पृच्छति, कस्मिन्निति । तत्सर्वम् ॥ १९ ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

कस्मिन्निति । नृभिः साधारणैरित्यर्थः । असाधारणानामन्यावताराणां ह्युपासनायाः सर्वदा श्रुतत्वात् ॥ १९ ॥—२९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

"असुर्या नाम ते लोका अन्धेन तमसाऽऽवृताः ।
तांस्ते प्रेत्याभिगच्छन्ति ये केचात्महनो जनाः" ॥

इति श्रुतेस्तेषामधोगतिरेवेत्याह-हित्वेति । या गृहापत्यसुहृद्भिः श्रीः त्यक्ता हित्वा त्यक्त्वा ॥ १८ ॥

एताहशानामुद्धारो भगवदवतारं विना न सम्भवतीति मनसि कृत्वा पृच्छति, । कस्मिन्निति । कीदृगाकारः ॥ १९—२० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

जीवतामेव सकारणं क्लेशं प्रपञ्चयति, । एत इति । आत्महनः अज्ञानात्मतत्त्वा आत्माज्ञानमेवात्महननं तच्चातिगर्हितं इत्यत्र कतथोक्तमीशावास्योपनिषदि—

"असुर्या नाम ते लोका अन्धेन तमसाऽऽवृताः ।
तांस्ते प्रेत्याभिगच्छन्ति ये केचात्महनो जनाः" ॥

इति अज्ञाने परमवेद्यपरमात्मज्ञानभिन्ने कर्मज्ञानमेव परमं ज्ञानमित्यभिमानवन्तः कालेन ध्वस्ता मनोरथाः येषां ते अकृतकृत्याः असम्पादितमुक्त्युपायाः अतः कारणात् सीदन्त्यवसीदन्ति ॥१७॥

मृतानां तु संसारप्रवेशमाह—हित्वेति । अत्यायासेनातिश्रमेण रचिताः सुसम्पादिताः या गृहादिरूपाः श्रियः सम्पदस्ताः अनिच्छन्तोऽपि हित्वा वासुदेवपराङ्मुखास्तमो विशन्ति, जन्ममरणलक्षणं संसारं प्राप्नुवन्ति वासुदेवभक्तास्तु संसाराद्विमुच्यन्ते इति फलितोऽर्थः ॥ १८ ॥

वासुदेवभजने विशेषं पृच्छति । कस्मिन् काले इति । इह लोके कस्मिन् काले कस्मिन् युगे किं वर्णः कीदृग्वर्णः कीदृशः किमाकारः केन नाम्ना वा केन विधिना वा स वासुदेवः भगवान् नृभिः पूज्यते तत्सर्वमुच्यताम् ॥ १९ ॥

प्रत्युत्तरमाह—कृतमिति । एषु कृतादिषु नाना अनेकप्रकाराः वर्णाभिधाकारा यस्य सः श्रीवासुदेवः नानैव विधिना अनेकप्रकारेण विधिना इज्यते ॥ २० ॥

भाषा टीका ।

वह लोक सब आत्मघाती हैं और अशान्त हैं अज्ञान में ज्ञानमानने वाले हैं तब उनके सब मनोरथ काल के बल से नष्ट हो जाते हैं तब वे कृत कृत्य न होनेसे दुखी होते हैं ॥ १७ ॥

अति परिश्रम से अर्जन किये जो घर स्त्री पुत्र धन इन सबों को छोड कर नहीं भी छोडना चाहते हैं तौभी वासुदेव से विमुख होनेसे नरकों को चले ही जाते हैं ॥ १८ ॥

राजोवाच ।

हे श्रीनारायण भगवान् किस युग मे किसवर्ण को धारण करते हैं और कैसे स्वरूप के होते हैं किसनामको पाते हैं और किस विधिसे मनुष्यों से पूजित होते हैं सो आप मेरे से कहिये ॥ १९ ॥

करभाजन उवाच ।

सत्ययुग त्रेता द्वापर कलियुग इनचारों युगों में केशव भगवान् नाना प्रकार के वर्णोंको तथा आकारोंको धारण करते हैं और नाना प्रकार की विधि से पूजित होते हैं ॥ २० ॥

कृते शुक्लश्चतुर्बाहुर्जटिलो वल्कलाम्बरः ।
कृष्णाजिनोपवीताक्षान् बिभ्रद्दण्डकमण्डलू ॥ २१ ॥
मनुष्यास्तु तदा शान्ता निर्वैराः सुहृदः समाः ।
यजन्ति तपसा देवं शमेन च दमेन च ॥ २२ ॥
हंसः सुपर्णो वैकुण्ठो धर्मो योगेश्वरोऽमलः ।
ईश्वरः पुरुषोऽव्यक्तः परमात्मेति गीयते ॥ २३ ॥
त्रेतायां रक्तवर्णोऽसौ चतुर्बाहुस्त्रिमेखलः ।
हिरण्यकेशस्त्रय्यात्मा स्रुक्स्रुवाद्युपलक्षणः ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तदेव वर्णादिचतुष्टयमाह । कृत इत्यादिना । कृष्णाजिनादीन्बिभ्रदिति ब्रह्मचारिवेशो दर्शितः ॥ २१ ॥

तपसा ध्यानेन ॥ २२–२३ ॥

त्रिगुणा दीक्षाङ्गभूता मेखला यस्य स यज्ञमूर्तिः हिरण्यकेशः पिशङ्गकेशः ॥ २४ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी ।

तदेव पृथगेव वर्णादिचतुष्टयं वर्णो नानाकारोऽधिकारीति चतुष्टयं कृष्णाजिनं कृष्णमृगचर्म अक्षं कमलाक्षं दण्डश्च कमण्डलुश्च तं सर्वोऽपि द्वन्द्वो विभाषयैकवद्भवतीति न्यायादेकवद्भावः अकारो ह्रस्वदीर्घप्लुत इतिवत् दण्डेन सहितं कमण्डलुमिति वा दण्डकमण्डलु इति पाठः सुगमः ॥ २१ ॥

तदा कृतयुगे शान्ता निरुद्धान्तःकरणाः तपआदिना ब्रह्मचारिधर्मेण ॥ २२ ॥

नामानि आह । हंस इति ॥ २३ ॥

त्रयी तत्प्रतिपाद्यो यज्ञ आत्मा मूर्तिर्यस्य स तथा च यज्ञमूर्तिरिति व्याख्यातं होमसाधनस्रुक्स्रुवादि उपलक्षणं ज्ञापकं यस्येति याज्ञिकवेशो दर्शितः ॥ २४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

हंसः शुद्धः सुपर्णः सौभनावयवः ॥ २३ ॥ — ॥ ३३ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एतदेव प्रपञ्चयति । कृत इत्यादिना । कृष्णाजिनादीन् बिभ्रदिति ब्रह्मचारिवेषो दर्शितः ॥ २१ ॥

मनुष्यास्त्विति तदा कृतयुगे मनुष्याः भगवदाराधकाः शान्ताः तदेव दर्शयति निर्वैराः सुहृदः सर्वभूतसुहृदः समाः समदर्शिनः शमेन दमेन च सहितेन तपसा ध्यानयोगेन यजन्त्याराधयन्ति ॥ २२ ॥

हंसो विशुद्धः सुपर्णः शोभनावयवः धर्मो धर्मनिर्वाहकः योगेश्वरो योगनिर्वाहकः अमलः हेयप्रतिभटः अव्यक्तः प्रत्यक्षादिभिर्न व्यज्यते इति तथा परमात्मा लोकत्रयान्तःप्रवेशनियमनाभ्यां धारक इत्येवंविधैर्गुणैर्नामभिर्गीयते ॥ २३ ॥

त्रेतायामिति असौ भगवान् त्रिगुणा दीक्षाङ्गभूता मेखला यस्य सः हिरण्यकेशः पिङ्गलकेशः त्रय्यात्मा त्रयीप्रतिपाद्ययज्ञनिर्वाहकः यज्ञमूर्त्तिर्वा वेदशरीरको वा स्रुक्स्रुवादीन्युपलक्षणानि चिह्नानि यस्य सः ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सामान्यत उक्तं विशिनष्टि । कृत इति । कस्मिन्काल इत्यस्योत्तरं कृत इति किं वर्ण इत्यस्योत्तरं शुक्ल इति कीदृश इत्यस्योत्तरं चतुर्बाहुरित्यादि नाम्नेत्यस्योत्तरं हंस इत्यादि केन विधिनेत्यस्योत्तरं तपसेत्यादि शान्त इत्याद्यधिकारिलक्षणम् एवमुत्तरत्रापि ॥ २१ ॥ २२ ॥ २३ ॥

त्रिमेखलः त्रिगुणितमेखलः ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

शुक्ल इति शुक्लवर्णः शुक्लनामा कृष्णाजिनं कृष्णसारचर्म उपवीतं यज्ञसूत्रं अक्षोऽकारादिक्षकारान्तवर्णमयीमाला तां दण्डं कमण्डलुं च बिभ्रदिति ब्रह्मचारिवेशो दर्शितः ॥ २१ ॥

तपसा ध्यानेनेति तदा तेन ध्यानमेव विधीयते ॥ २२ ॥

गीयते इति एतानि नामानि तदा गेयानि ॥ २३ ॥

रक्तवर्णो रक्तनामा च त्रिगुणा दीक्षाङ्गभूता मेखला यस्य सः त्रय्यात्मा यज्ञस्वरूपः त्रय्या विद्ययेति यज्ञस्तदा विधीयते ॥ २४—२६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तानेव नानाप्रकारान् वर्णादीन् दर्शयति । कृते इत्यादिना ।

तं तदा मनुजा देवं सर्व देवमयं हरिम् ।
यजन्ति विद्यया त्रय्या धर्मिष्ठा ब्रह्मवादिनः ॥ २५ ॥
विष्णुर्यज्ञः पृश्निगर्भः सर्वदेव उरुक्रमः ।
वृषाकपिर्जयन्तश्च उरुगाय इतीर्यते ॥ २६ ॥
द्वापरे भगवान् श्यामः पीतवासा निजायुधः ।
श्रीवत्सादिभिरङ्कैश्च लक्षणैरुपलक्षितः ॥ २७ ॥
तं तदा पुरुषं मर्त्या महाराजोपलक्षणम् ।
यजन्ति वेदतन्त्राभ्यां परं जिज्ञासवो नृप ! ॥ २८ ॥
नमस्ते वासुदेवाय नमः सङ्कर्षणाय च ।
प्रद्युम्नायानिरुद्धाय तुभ्यं भगवते नमः ॥ २९ ॥
नारायणाय ऋषये पुरुषाय महात्मने ।
विश्वेश्वराय विश्वाय सर्वभूतात्मने नमः ॥ ३० ॥
इति द्वापर उर्वीश ! स्तुवन्ति जगदीश्वरम् ।
नानातन्त्रविधानेन कलावपि यथा शृणु ॥ ३१ ॥
कृष्णवर्णं त्विषाऽकृष्णं साङ्गोपाङ्गास्त्रपार्षदम् ।
यज्ञैः सङ्कीर्त्तनप्रायैर्यजन्ति हि सुमेधसः ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

कस्मिन्काले इति प्रश्नस्योत्तरं कृते इति किं वर्णः इत्यस्य शुक्ल इति कीदृश इत्यस्य चतुर्बाहुरित्यादिना ॥ २१ ॥

केन विधिनेत्यस्य तपसेत्याद्युत्तरम् तपसा आलोचनात्मकेन ज्ञानेन ॥ २२ ॥

केन नाम्नेत्यस्योत्तरं हंस इत्यादि एवमुत्तरत्रापि ॥ २३ ॥

त्रिगुणा त्रिगुणिता दीक्षाङ्गभूता मेखला यस्य सत्रिगुणमेखलः यज्ञमूर्तिः हिरण्यकेशः "हिरण्यश्मश्रुः हिरण्यकेश" इति श्रुतिप्रोक्तः प्रकाशकेशः ॥ २४ ॥

भाषा टीका ।

सत्ययुग मे शुक्लवर्ण चारभुजा जटा वल्कल वस्त्र कृष्ण मृगचर्म यज्ञोपवीत तुलसी पद्माक्षादि माला दण्ड कमण्डलु धारण किये रूप से रहते हैं ॥ २१ ॥

उसकाल मे मनुष्य लोग बड़े शान्त होते हैं और वैर रहित सब के सुहृद सम दृष्टि वाले होकर तपस्या से शम दमादि से उन परमेश्वर का पूजन करते हैं ॥ २२ ॥

हंस सुपर्ण वैकुण्ठ धर्म योगेश्वर मनु ईश्वर पुरुष अव्यक्त परमात्मा इन नामों से गाये जाते हैं ॥ २३ ॥

वेही भगवान् त्रेता मे लाल वर्ण वाले होकर चार भुजा तीन कटिमेखला सुवर्ण के रङ्गके तुल्य केश तीनों वेद स्वरूपको धारण करते हैं होम के लिये स्रुक् स्रुवाओं को हस्त मे ग्रहण करते हैं ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

त्रय्या विद्यया वेदत्रयोक्तकर्मभिः ॥ २५ ॥

पृश्निगर्भः पृश्निः सुतपसः प्रजापतेः पत्नी तस्याः पुत्रः वृषाकपिः स्मृतः सन् वर्षति कामानाकम्पयति क्लेशानिति तथा जयत्येव सर्वदा जयन्तः ॥ २६

श्यामोऽतसीपुष्पसङ्काशः निजानि चक्रादीन्यायुधानि च यस्य सः श्रीवत्सो नाम वक्षसो दक्षिणभागे रोम्णां प्रदक्षिणावर्तः स आदिर्येषां करचरणादिगतपद्मादीनां तैरङ्कैरङ्कितैश्चिन्हैर्लक्षणैर्बाह्यैः कौस्तुभादिभिः ॥ २७ ॥

महाराजोपलक्षणं छत्रचामरादियुक्तम् वेदतन्त्राभ्यां वैदिकेनागमिकेन च मार्गेण यजन्ति पूजयन्ति परमीश्वरं ज्ञातुमिच्छवः ॥ २८ ॥

नामान्याह । नमस्त इति ॥ २९—३० ॥

नानातन्त्रविधानेनेति कलौ तन्त्रमार्गस्य प्राधान्यं दर्शयति॥३१ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कृष्णतां व्यावर्तयति–त्विषा कान्त्याऽकृष्णमिन्द्रनीलमणिवदुज्ज्वलम् यद्वा त्विषा कृष्णं कृष्णावतारम् अनेन कलौ कृष्णावतारस्य प्राधान्यं दर्शयति । अङ्गानि हृदयादीनि उपाङ्गानि कौस्तुभादीनि अस्त्राणि सुदर्शनादीनि पार्षदाः सुनन्दादयः तत्सहितम् यज्ञैरर्चनैः सङ्कीर्तनं नामोच्चारणं स्तुतिश्च तत्प्रधानैः सुमेधसो विवेकिनः ॥ ३२ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी ।

अधिकारिण आह । तमिति तं यज्ञमूर्त्तिं तदा त्रेतायाम् ॥ २५ ॥ नामानि आह विष्णुरिति ॥ २६ ॥

द्वापरयुगेऽवतारं श्रीकृष्णाविर्भावमयं तद्युगविशेषस्य च वैशिष्ट्यातिशयमभिप्रेत्य तमेव तत्तत्सर्वमयमाह द्वापर इति । अङ्कैरित्यस्य व्याख्याङ्कितैरिति हस्तपादवक्षआदि, समवेतैरित्यर्थः वाह्यैः शरीरसंयुक्तैरित्यर्थः कृष्णावतारविरहितद्वापरे तु शुकपत्रवर्णत्वं कलौ तु श्यामत्वं विष्णुधर्मोत्तरे दर्शितं द्वापरे शुकपत्राभः कलौ श्यामः प्रकीर्तित इति ॥ २७ ॥

तदा द्वापरे छत्रचामरादियुक्तमिति श्रीकृष्णस्यैव विशेषणं हरिवंशे राजेन्द्राभिषेकात् ज्ञातुमिच्छवोऽनुभवितुमिच्छन्तः ॥ २८ ॥

चतुर्व्यूहतालिङ्गेन श्रीकृष्णत्वमेव स्पष्टयन्नामान्याह । नमस्त इति ॥ २९ ॥

नानावतारावतारित्वमपि तत्र लिङ्गमित्याह । नारायणायेति । तत्र नारायणायेति दिग्दर्शनं कृत्वा नानावतारनिधानपुरुषावतारमयत्वेनाह । पुरुषाय महात्मन इति । अत एव विश्वेषामवतारणामपीश्वराय विश्वाय तत्तद्रूपाय चेत्यर्थः । किं बहुना सर्वभूतरूपाय सर्वात्मरूपाय चेति ॥ ३० ॥ ३१ ॥

"शुक्लो रक्तस्तथा पीत" इति पूर्वोक्ताभिप्रायेण कृष्णतां व्यावर्तयति इन्द्रनीलमणिवदुज्ज्वलमिति इन्द्रनीलमणेः भास्वररूपत्वाद्गुप्तावतारसूचनं तथापि "छन्नः कलौ यदभवस्त्रियुगोऽथ स त्व"मिति प्रह्लादवाक्यानुसाराद्गोपनमेव युक्तम् अतिरहस्यत्वादित्यभिप्रायेण यद्वेति न केवलं वर्णतः कृष्णमपि तु कान्त्यापि कृष्णवर्णावतारमित्यर्थः । अनेन श्लोकेन कृष्णावतारस्य प्राधान्यमित्युक्त्या "द्वापरे भगवान् श्याम" इत्यत्र रूढश्यामवर्णः कश्चन श्रीकृष्णादन्य एवावतार इति स्वाम्यभिप्रायः गुप्ततया तु तदिष्टिरपि तत्र प्रथमं सूचितैव व्यक्तगौरावतारपक्षस्तु सन्दर्भादौ द्रष्टव्य इति ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तमिति । तदा त्रेतायां भगवन्तं सर्वदेवमयं तच्छरीरकत्वात्तत्प्रचुरं त्रय्या विद्यया वेदोक्तकर्मणा यजन्ति ॥ २५ ॥

विष्णुरिति । यज्ञो यज्ञनिर्वाहकः पृश्निगर्भः पृश्निपुत्रः वृषाकपिः वृषः कामाभिवर्षुकः आकम्पयति विधुनोति क्लेशानित्याकपिः सचासौ सच जयत्येव सर्वदा जयन्तः उरुगायः उरुर्बहुधा गीयत इति तथा इत्येवंविधैर्गुणनामभिरीर्यते ऽभिधीयते ॥ २६ ॥

द्वापर इति द्वापरे निजानि चक्रादीन्यायुधानि यस्य सः श्रीवत्सो नाम वक्षसि दक्षिणभागे रोम्णां प्रदक्षिणावर्त्तः स आदिर्येषां करचरणादिगतपद्मादीनां तैरेवाङ्कैश्चिह्नैर्लक्षणैर्बाह्यैः कौस्तुभादिभिश्चोपलक्षितः ॥ २७ ॥

महाराजस्योपलक्षणानि छत्रचामरादीनि यस्य सः तं परं पुरुषं हे नृप ! जिज्ञासवः तत्त्वत्रयज्ञानेच्छवः मर्त्या वेदतन्त्राभ्यां वेदपञ्चरात्रोक्तविधानाभ्यां यजन्ति पूजयन्ति ॥ २८ ॥

नामान्याह । नमस्त इति द्वाभ्याम् ॥ २९—३० ॥

इत्येवं विधैर्नामभिः हे उर्वीश ! भूपते जगदीश्वरं स्तुवन्ति नानातन्त्रेति कलावपि नानाविधेन तन्त्रविधानेन पञ्चरात्रतन्त्रोक्तविधानेन यथा यजन्ति तच्छृणु ॥ ३१ ॥

त्विषा कान्त्या कृष्णवर्णम् इन्द्रनीलमणिवदुज्ज्वलवर्णमित्यर्थः कृष्णं श्रीकृष्णं अङ्गानि हृदयादिमन्त्रमूर्त्तयः उपाङ्गानि कौस्तुभादीन्यस्त्राणि सुदर्शनादीनि पार्षदाः नन्दसुनन्दादयः तत्सहितं सङ्कीर्तनप्रायैः सङ्कीर्त्तनप्रचुरैः यज्ञैरर्चनात्मकैः सुमेधसो विवेकिनः यजन्ति हि ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सर्वदेवमयं सर्वदेवप्रधानम् ॥ २५—३० ॥
कलावपि यथेज्यते तथा शृणु ॥ ३१ ॥ ३२ ॥ ३३ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

द्वापरयुगावतारं कथयन् श्रीकृष्णाविर्भावमयतद्युगविशेषस्य च वैशिष्ट्यातिशयमभिप्रेत्य तमेव तत्तत्सर्वमयमाह । द्वापर इति । सामान्यतस्तु द्वापरे शुकपत्रवर्णत्वं कलौ श्यामत्वं विष्णुधर्मोत्तरे दर्शितं "द्वापरे शुकपत्राभः कलौ श्यामः प्रकीर्त्तित" इतीदृशेन ॥ २७ ॥

महाराजोपलक्षणमिति श्रीहरिवंशदर्शितराजेन्द्राभिषेकात् तादृशं परं पुरुषं यजन्तीत्यन्वयः । यजने हेतुः जिज्ञासवः तमेवानुभवितुमिच्छव इति ॥ २८ ॥

चतुर्व्यूहतालिङ्गेन श्रीकृष्णत्वमेव विशेषतः स्पष्टयन्नाह । नमस्त इति ॥ २९ ॥

नानावतारमयत्वेनाप्याह । नारायणायेति । तत्र नारायणाय ऋषय इति दिग्दर्शनं कृत्वा तत्तदनन्तावताराकरपुरुषावतारमयत्वेनाह । पुरुषाय महात्मन इति । अत एव विश्वेषां तेषामीश्वराय विश्वाय तत्तद्रूपाय चेत्यर्थः । किं बहुना सर्वभूतरूपाय सर्वात्मरूपाय चेति ॥ ३० ॥

स्तुतिश्चेयं तदाविर्भावास्पदद्वापरारम्भत एव तज्जैर्ऋषिभिः क्रियत इति सैवानूदिता ॥ ३१ ॥

श्रीकृष्णावतारानन्तरकलियुगावतारं पूर्ववदाह । कृष्णेति । त्विषा कान्त्या योऽकृष्णो गौरस्तं सुमेधसो यजन्ति गौरत्वं चास्य—

आसन् वर्णास्त्रयो ह्यस्य गृह्णतोऽनुयुगं तनूः ।
शुक्लो रक्तस्तथा पीत इदानीं कृष्णतां गतः ॥

इत्यत्र पारिशेष्यप्रमाणलब्धमिदानीमेतदवतारस्पदत्वेनाभिख्याते

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

द्वापरे कृष्णताङ्गत इत्युक्तेः शुक्लरक्तयोः सत्यत्रेतागतत्वेन दर्शितत्वाच्च पीतस्यातीतत्वं प्राचीनावतारापेक्षया अत्र श्रीकृष्णस्य परिपूर्णरूपत्वेन वक्ष्यमाणत्वाद्युगावतारत्वं तस्मिन् सर्वेऽप्यवताराअन्तर्भूता इति तत्तत्प्रयोजनं तस्मिन्नेकस्मिन्नेव सिध्यतीत्यपेक्षया तदेवं यद्द्वापरे श्रीकृष्णोऽवतरति तदैव कलौ श्रीगौरोऽप्यवतरतीति स्वारस्यलब्धः श्रीकृष्णाविर्भावविशेष एवायं गौर इत्यायाति तदव्यभिचारात् तदेतदाविर्भावत्वं तस्य स्वयमेव विशेषणद्वारा व्यनक्ति कृष्णवर्णं कृष्णेत्येतौ वर्णौ च यत्र यस्मिन् श्रीकृष्णचैतन्यदेवनाम्नि कृष्णत्वाभिव्यञ्जकं कृष्णेति वर्णयुगलं प्रयुक्तमस्तीत्यर्थः। तृतीये श्रीमदुद्धववाक्ये समाहूता इत्यादिपद्ये श्रियः सवर्णेनेत्यत्र टीकायां श्रियो रुक्मिण्याः समानवर्णद्वयं वाचकं यस्य स श्रियः सवर्णो रुक्मीत्यपि दृश्यते यद्वा कृष्णं वर्णयति तादृशस्वपरमानन्दविलासस्मरणोल्लासवशतया स्वयं गायति परमकारुणिकतया च सर्वेभ्योऽपि लोकेभ्यस्तमेवोपदिशति यस्तम् अथवा स्वयमकृष्णं गौरं त्विषा स्वशोभाया विशेषणैव कृष्णोपदेष्टारं च यद्दर्शनेनैव सर्वेषां कृष्णः स्फुरतीत्यर्थः। किंवा सर्वलोकद्रष्टारं कृष्णं गौरमपि भक्तविशेषदृष्टौ त्विषा प्रकाशविशेषेण कृष्णवर्णं तादृशश्यामसुन्दरमेव सन्तमित्यर्थः। तस्मात्तस्मिन् श्रीकृष्णरूपस्यैव प्रकाशात् तस्यैवाविर्भावविशेषः स इति भावः। तस्य भगवत्त्वमेव स्पष्टयति। साङ्गोपाङ्गास्त्रपार्षदम् अङ्गान्येव परममनोहरत्वादुपाङ्गानि भूषणादीनि महाप्रभावत्वात्तान्येवास्त्राणि सर्वदैवैकान्तवासित्वात्तान्येव पार्षदाः बहुभिर्महानुभावैरसकृदेव तथा दृष्टोऽसाविति गौडवरेन्द्रवङ्गोत्कलादिदेशीयानां महाप्रसिद्धेः यद्वा अत्यन्तप्रेमास्पदत्वात्तत्तुल्या एव पार्षदाः श्रीमदद्वैताचार्यमहानुभावचरणप्रभृतयस्तैः सह वर्त्तमानमिति चार्थान्तरेण व्यक्तं तदेवं भूतं कैर्यजन्ति यज्ञैः पूजासम्भारैः "न यत्र यज्ञेशमखा महोत्सवा" इत्युक्तेः तत्र च विशेषेण तमेवाभिधेयं व्यनक्ति सङ्कीर्त्तनं बहुभिर्मिलित्वा तद्गानसुखं श्रीकृष्णगानं तत्प्रधानैः तथा संकीर्त्तनप्राधान्यस्य तदाश्रितेष्वेव दर्शनात् स एवात्राभिधेय इति स्पष्टम् अत एव सहस्रनाम्नि तदवतारसूचकानि नामानि कथितानि "सुवर्णवर्णो हेमाङ्गो वराङ्गश्चन्दनाङ्गदी। सन्न्यासकृच्छमः शान्त" इत्यादीनि दर्शितं चैतत्परमविद्वच्छिरोमणिना श्रीसार्वभौमभट्टाचार्येण "कालान्नष्टं भक्तियोगं निजं यः प्रादुष्कर्त्तुं कृष्णचैतन्यनामा आविर्भूतस्तस्य पादारविन्दे गाढं गाढं लीयतां चित्तभृङ्ग" इति ॥ ३२ ॥ ३३ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

श्याम इति श्यामवर्णः श्यामनामा च ॥ २७ ॥

महाराजोपलक्षणं छत्रचारादियुक्तं वेदतन्त्राभ्यां वैदिकेनागमिकेन च मार्गेण पूजयन्ति ॥ २८ ॥

नामन्याह। नमस्त इति ॥ २९ ॥ ३० ॥

इत्थं नृतिर्यगृषिदेवझषावतारै-
र्लोकान् विभावयसि हंसि जगत्प्रतीपान्।
धर्मं महापुरुष ! पासि युगानुवृत्त-
श्छन्नः कलौ यदभवस्त्रियुगोऽथ स त्वम् ॥

इति प्रह्लादवचनात् कलियुगीयावतारस्य छन्नत्वेन सर्वलोकदुर्बोधोऽवगम्यते अतस्तत्प्रमापकवचनमपि सोपक्रममर्थान्तरेण छन्नतयैवाह। नानेति। कलौ तन्त्रमार्गस्य प्राधान्यं दर्शितमित्याच्छादकोऽर्थः तेनाच्छन्नोऽर्थो यथा नाना कलौ अपि कारादासन् वर्णास्त्रयो ह्यस्य गृह्णतोऽनुयुगन्तनूरिति गर्गोक्तिप्राप्तवैवस्वताष्टाविंशचतुर्युगीयद्वापरोत्तरकलावपि तन्त्रविधानेन तन्त्राख्यन्यायविधिनाश्रितो धावतीति वेदकप्रयत्नोपायवर्णा एकदेशार्थद्वयबोधकेन शब्देनेत्यर्थः। अत एव शृण्विति शृण्वन्तमपि राजानं प्रति पुनः प्रेरणा रहस्यत्वेन तन्त्रेणोच्यमानमर्थं विशिष्यावधापयितुम् ॥ ३१ ॥

कृष्णेति। नानाकलियुगपक्षे कृष्णवर्णदेहं कृत्स्नं व्यावर्त्तयति त्विषा कान्त्या अकृष्णमिन्द्रनीलमणिवदुज्ज्वलमित्यर्थः। एकतः कलियुगपक्षे कृष्णवर्णं किन्तु त्विषा बहिःस्फुरन्त्या कान्त्या अकृष्णम् शुक्लरक्तश्यामानामुक्तत्वात् पारिशेष्येण पीतमन्तःकृष्णं बहिर्गौरमित्यर्थः। यद्वा कृष्णावतारलीलादिवर्णनात् कृष्णवर्णं साङ्गोपाङ्गेत्यादिकमुभयपक्षेऽपि स्पष्टप्रच्छन्नत्वाभ्यां तुल्य एवार्थः यज्ञैः परिचर्यामार्गैः सङ्कीर्त्तनप्रधानैर्ये सुमेधसः शुक्लो रक्तस्तथापीत इदानीं कृष्णतां गत इति छन्नः कलाविति कलावपि तथा श्रीविवस्वादीनां तात्पर्यार्थधारणावती येषां बुद्धिः शोभना भवेत्त एव नान्ये इत्यर्थः ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

सर्वदेवमयं सर्वदेवप्रधानं सर्वदेवाङ्गिनमित्यर्थः। त्रय्या विद्यया वेदत्रयोक्तकर्मभिः ॥ २५—२६ ॥

श्यामः घनश्यामः निजानि स्वासाधारणानि सुदर्शनादीन्यायुधानि यस्य सः श्रीवत्सः वक्षसि रोम्णां प्रदक्षिणावर्त्तस्तदादिभिः करचरणादिस्थपद्मादिभिरङ्कैः लक्षणैर्बाह्यैः कौस्तुभादिभिरुपलक्षितः पुरुषोत्तमत्वेन निश्चितः ॥ २७ ॥

परं पुरुषं महाराजोपलक्षणं छत्रचामरादियुक्तं परं पुरुषं जिज्ञासवो ज्ञातुमिच्छवः तमेव यजन्ति ॥ २८—२९—३० ॥

अथातिदीनेषु कलियुगगतेषु हरिभक्तेषु परमानुग्रहकरं विशेषतः कलौ उपास्यतया स्वयं भगवन्तं वक्तुं प्रतिजानीते नानेति। नानातन्त्रविधानेनेति। कलौ तन्त्रोक्तपूजनप्रकारस्य प्राधान्यं दर्शयति। नानातन्त्रविधानेन पञ्चरात्रसनत्कुमारीयगौतमीयादितन्त्रोक्तप्रकारेण यथा कलौ यजन्ति तथा शृणु ॥ ३१ ॥

त्विषा महत्या कान्त्योपलक्षितं कृष्णेन स्वासाधारणेन वर्णेन युक्तमिन्द्रनीलमणिवदुज्ज्वलम्। अङ्गानि हृदयादीनि उपाङ्गानि कौस्तुभादीनि अस्त्राणि सुदर्शनादीनि पार्षदा गरुडादयस्तैः सहितं कृष्णम् "एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम्" इत्यादिषु पूर्वत्र प्रतिपादितम् "मत्तः परतरं नान्य" दिति स्वमुखगीतं समानातिशयशून्यं परमं पुरुषं वासुदेवं—

कलेर्दोषनिधे राजन्नस्ति ह्येको महान् गुणः।
कीर्त्तनादेव कृष्णस्य मुक्तबन्धः परं व्रजेत् ॥

ध्येयं सदा परिभवघ्नमभीष्टदोहं तीर्थास्पदं शिवविरिञ्चिनुतं शरण्यम् ।
भृत्यार्त्तिहं प्रणतपाल ! भवाब्धिपोतं वन्दे महापुरुष ! ते चरणारविन्दम् ॥ ३३ ॥
त्यक्त्वा सुदुस्त्यजसुरेप्सितराज्यलक्ष्मीं धर्मिष्ठ ! आर्यवचसा यदगादरण्यम् ।
मायामृगं दयितयेप्सितमन्वधावद्वन्दे महापुरुष ! ते चरणारविन्दम् ॥ ३४ ॥
एवं युगानुरूपाभ्यां भगवान् युगवर्त्तिभिः ।
मनुजैरिज्यते राजन् ! श्रेयसामीश्वरो हरिः ॥ ३५ ॥
कलिं सभाजयन्त्यार्या गुणज्ञाः सारभागिनः ।
यत्र सङ्कीर्त्तनेनैव सर्वः स्वार्थोऽभिलभ्यते ॥ ३६ ॥
न ह्यतः परमो लाभो देहिनां भ्राम्यतामिह ।
यतो विन्देत परमां शान्तिं नश्यति संसृतिः ॥ ३७ ॥
कृतादिषु प्रजा राजन् ! कलाविच्छन्ति सम्भवम् ।
कलौ खलु भविष्यन्ति नारायणपरायणाः ॥ ३८ ॥
क्वचित्क्वचिन् महाराज ! द्रविडेषु च भूरिशः ।
ताम्रपर्णी नदी यत्र कृतमाला पयस्विनी ॥ ३९ ॥
कावेरी च महापुण्या प्रतीची च महानदी ।
ये पिबन्ति जलं तासां मनुजा मनुजेश्वर ! ॥
प्रायो भक्ता भगवति वासुदेवेऽमलाशयाः ॥ ४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

इति वक्ष्यमाणात्परमपदप्रापकैः सङ्कीर्तनप्रायैर्यज्ञैः सुमेधसः सुबुद्धयो यजन्ति ॥ ३२ ॥

भाषा टीका ।

उस काल में धर्मात्मा ब्रह्मज्ञानी सब मनुष्य सर्व देव स्वरूप देव हरि भगवान् का वेदत्रयी विद्या के मंत्रों से पूजन करते हैं ॥ २५ ॥

उस समय में विष्णु यज्ञ पृश्निगर्भ सर्वदेव उरुक्रम वृषाकपि जयन्त उरुगाय इन नामों से गाये जाते हैं ॥ २६ ॥

द्वापर में भगवान् श्यामल मूर्ति होते हैं पीतवस्त्र धारण करते हैं शङ्खचक्रादि आयुध वक्षस्थल में श्रीवत्स का चिन्ह और भी निज चिन्हों से सहित रहते हैं ॥ २७ ॥

उस समय में परमात्मा कि जिज्ञासा करने वाले पुरुष मनुष्य वेदों से तथा तंत्रों से भगवान् को महाराजाभिषेकादिक से पूजन करते हैं ॥ २८ ॥

और वासुदेव सङ्कर्षण प्रद्युम्न अनिरुद्ध रूप वाले भगवन् आप के अर्थ नमस्कार है ॥ २९ ॥

नारायण ऋषि आदिपुरुष महात्मा विश्वेश्वर विश्व सर्व भूतात्मा आपके अर्थ नमस्कार है ॥ ३० ॥

हे राजन् ! इस प्रकार से द्वापर में जगदीश परमात्मा की स्तुती करते हैं अब नाना तंत्रों के विधान से जैसे कलियुग में पूजन करते हैं सो भी तुम सुनो ॥ ३१ ॥

कान्ति से नील वर्ण वाले अङ्ग उपाङ्ग अस्त्र पार्षदों सहित श्रीकृष्ण मूर्ति का नाम सङ्कीर्तनादि यज्ञों से सुन्दर बुद्धिमान् पुरुष यजन करते है ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

स्तुतिमाह । ध्येयमिति । हे प्रणतपाल ! हेमहापुरुष ! ते चरणारविन्दं वन्दे कथम्भूतम् ध्येयं ध्यातुं योग्यं सदेति सर्वत्र सम्बध्यते ध्येयत्वे हेतवः इन्द्रियकुटुम्बादिभिर्यः परिभवस्तिरस्कारस्तं हन्तीति तथा तत् किञ्च अभीष्टदोहं मनोरथपूरकम् किञ्च तीर्थास्पदं गङ्गाद्याश्रयत्वेन परमपावनम् शिवविरिञ्चिभ्यां नुतं स्तुतं महत्तमम् । ननु तौ कृतार्थावेव किमर्थं ताभ्यां नुतं तत्राऽऽह । शरण्यमाश्रययोग्यं सुखात्मकमित्यर्थः । तर्हि ब्रह्मादिस्तुत्यं प्राकृतस्य कथं गोचरः स्यात् न भृत्यार्तिहं यस्य कस्यापि भृत्यमात्रस्यार्तिहन्तृ न केवलमागन्तुकार्तिमात्रं हन्ति किन्तु भवाब्धिपोतं संसारार्णवतारकं च ॥ ३३ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

इदानीं स्वयमाप्तकामत्वान्नैरपेक्ष्यं भक्तार्थे च सापेक्षतां दर्शयन् श्रीरामचन्द्रं स्तौति । त्यक्त्वेति । अन्यैः सुदुस्त्यजा या सुरेप्सिता राज्यलक्ष्मीस्तां त्यक्त्वा वर्त्तते च इत्यर्थः । योऽरण्यमगात् किं राज्यवैकल्यदर्शनेन न धर्मिष्ठः कुतः आर्यस्य गुरोर्दशरथस्य वचसा किञ्च एवं राज्यं त्यक्तवतोऽपि भक्तवात्सल्येन दयितया सीतयेप्सितं मायामृगं स्वर्णाकारं योऽन्वधावत् तस्य भगवतश्चरणारविन्दं वन्दे यद्वा हे धर्मिष्ठेति सम्बोधनम् तथाऽस्य विवक्षितत्वादार्षपक्षेन सन्धिर्न भवति यथा यदगादिति चरणारविन्दमेवोच्यते यन्मायामृगमन्वधावत्तत्ते चरणारविन्दं वन्द इत्यन्वयः अन्यत्समानम् ॥ ३४ ॥

युगानुरूपाभ्यां नामरूपाभ्याम् ॥ ३५ ॥

एतेषु चतुर्युगेषु कलिरेव श्रेष्ठ इत्याह । कलिमिति । गुणज्ञाः कलेर्गुणं जानन्ति ये ते ननु दोषाणां बहुत्वात्कथं सभाजयन्ति तत्राऽऽह । सारभागिनो गुणांशग्राहिणः कोऽसौ गुणस्तमाह यत्रेति तदुक्तम्—

"ध्यायन्कृते यजन्यज्ञैस्त्रेतायां द्वापरेऽर्चयन् ।
यदाप्नोति तदाप्नोति कलौ सङ्कीर्त्य केशवम्" ॥

इति ॥ ३६ ॥

तस्मात्कलावतोऽस्मात्सङ्कीर्तनात्परमो लाभो नास्ति यतः सङ्कीर्तनात् ॥ ३७ ॥

किञ्च कृतादिष्विति ॥ ३८—३९ ॥

अमलाशयाः सन्तः प्रायः प्रायशो भगवति भक्ता भवन्ति ४०

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी ।

तावपि शिवविरिञ्ची अपि आश्रययोग्यमिति कृतार्थयोरपि अत्यधिकसुखावाप्तिरेव नुतौ हेतुरित्यभिप्रेत्य सुखात्मकमित्यार्थिकोऽर्थः तीर्थेन मूर्ध्नि धृतेन शिवः शिवोऽभूदित्युक्तेः यस्य कस्यापीत्यनेन वर्णाश्रमाचारादिनियमो व्यावृत्तः आगन्तुकार्तिः जरादिपीडा ॥ ३३ ॥

नैरपेक्ष्यं राज्यापेक्षाराहित्यं तेन सदाचारपालकत्वं लक्ष्यते पित्राज्ञापालनात् भक्तार्थे च सापेक्षतामिति कारुण्यं लक्ष्यते रामचन्द्रं स्तौतीत्युक्तेऽपि वस्तुतः कृष्णावतारप्रसङ्गात् तत्रैव तात्पर्यावसानं सदाचारपालकत्वकारुण्ये तव आधुनिके तथैव श्रीरामाख्यावतारे तथा दृष्टत्वादिति वचनभङ्ग्या तथा प्रतिपत्तं राज्यवैकल्यं स राज्यव्यभिचारः तं दृष्ट्वा किमरण्यमगादिति समाधानं पूर्वार्धे नपुंसकपदस्याव्ययत्वमुपेत्य च इति पुंस्त्वपरिणामगौरवमतो वक्तीति ॥ ३४ ॥

श्रेयसां सर्वपुरुषार्थानामीश्वरो दाता हरिः प्रेम्णा मनोहरश्च ॥ ३५ ॥

सङ्कीर्त्तनेनैव साधनान्तरनिरपेक्षेण तेनेत्यर्थः । सर्वः कृतादिषु ध्यानादिसाधनसाहस्रैः साध्यः ॥ ३६ ॥

कीर्त्तनमाहात्म्यमाह । नह्यत इति । तस्मात् कीर्त्तनस्य सर्वापवर्गभक्त्वात् कलेः प्रसङ्गात् कलाविव्यक्त्याद्धृतं परमां सर्वोत्कृष्टां शान्तिं भगवत्प्रियां प्राप्नोति "शमो मन्निष्ठता बुद्धे"रिति भगवद्वाक्यात् अनुषङ्गेण संसृतिश्च नश्यति ॥ ३७ ॥

किञ्च अन्यदपि कलेर्वैशिष्ट्यमुच्यत इत्यर्थः । कृतादिष्विति सार्द्धकं नारायणपरायणास्तदीयप्रेमातिशयवन्तः क्वचित् क्वचिद्द्रौडादाविति श्रीकृष्णचैतन्यावताराभिप्रायेण द्रविडेषु च भूरिश इति श्रीवैष्णवाद्यपेक्षया अत्र यद्यपि "न देशनियमस्तत्र न कालनियमस्तथा । नोच्छिष्टादौ निषेधश्च श्रीहरेर्नाम्नि लुब्धके"ति स्कान्दाद्युक्तेः कलेर्न नामसङ्कीर्त्तनगुणोत्कर्षप्रयोजकत्वं किन्तु सर्वयुगेषु सङ्कीर्त्तनस्य समानमेव सामर्थ्यं तथापि कृतादिषु सामर्थ्यादिसद्भावात्तत्संयोगेनान्यान्यपि साधनानि तद्वदवलम्बत्वेनाश ऋषिभिः स्मर्यन्ते अत्र त्वनायत्या स्वतन्त्रमेव तदपि प्रशस्येत नारदादौ "हरेर्नाम हरेर्नाम हरेर्नामैव केवलम् । कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथे"त्यादिभिरिति सर्वमनवद्यम् ॥ ३८ ॥

यत्र द्रविडेषु ॥ ३९ ॥

प्रायश इति भक्तेष्वपराधिनो विनेत्यर्थः ॥ ४० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

आर्यवचसा पितृवचनेन ॥ ३४—४० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सङ्कीर्त्तनप्रकारं दर्शयति द्वाभ्याम् । ध्येयमिति । हे प्रणतपाल महापुरुष ! ते चरणारविन्दं वन्दे कथम्भूतं ध्येयं ध्यातुं योग्यं सदोत सर्वत्र सर्वदा ध्येयत्वे हेतवः कुटुम्बेन्द्रियादिभिर्यः परिभवः तिरस्कारः तं हन्तीति तथा तत् किञ्चाभीष्टदोहमिष्टार्थपूरकं च किञ्च तीर्थास्पदं गङ्गादिपुण्यतीर्थाश्रयत्वेन परमपावनं शिवविरिञ्चिभ्यां नुतं संस्तुतं शरण्यं शरणार्हं न केवलमभीष्टदोहमेवापितु भृत्यार्तिहं भक्तानामनिष्टनिवारकं च न केवलं यत्किञ्चिदार्तिहमपि तु सकलार्तिनिदानभूतभवाब्धेः पोतं प्लवं तत्तारणसाधनम् ॥ ३३ ॥

हे धर्मिष्ठ ! आर्यस्य पितुर्दशरथस्य वचसा सुरैरपीप्सितां राज्यलक्ष्मीं त्यक्त्वा यच्चरणारविन्दं कर्तृ अरण्यं प्रत्यगात् यच्च दयितया जानक्या ईप्सितं मायामृगमन्वधावत् तत्ते चरणारविन्दं वन्द इति ॥ ३४ ॥

एवमिति । युगानुरूपाभ्यामित्यस्य नामरूपाभ्यामिति विशेष्याध्याहारः इज्यते आराध्यते ॥ ३५ ॥

प्रसङ्गादेषु युगेषु कलिरेव श्रेष्ठ इत्याह । कलिमिति । गुणज्ञाः सत्स्वपि दोषेषु गुणमेव ये जानन्ति तथा सारभागिनः सारग्राहिणः भृङ्गा तत्सदृशा आर्याः कलिं सभाजयन्ति मानयन्ति कोऽसौ गुण इत्यतस्तमाह । यत्र कलौ सङ्कीर्त्तनेनैव भगवन्नामकीर्त्तनेनैव सर्वः स्वाभिलषितोऽर्थः लभ्यते तथा च स्मर्यते

ध्यायन्कृते यजन्यज्ञैस्त्रेतायां द्वापरेऽर्चयन् ।
यदाप्नोति तदाप्नोति कलौ सङ्कीर्त्य केशवम् ॥

इति सङ्कीर्त्तनमात्रस्यैवाभिलषितपुरुषार्थसाधनत्वरूपगुणात्कलिमेव सभाजयन्तीत्यर्थः ॥ ३६ ॥

यतस्तु कलौ सङ्कीर्त्तनमेवाभिलषितार्थसाधनमतस्ततोऽन्यो न

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

विद्यते लाभ इत्याह । नहीति । अतः सङ्कीर्त्तनात् परमो लाभः पुरुषार्थसाधनं न विद्यते लभ्यतेऽनेनेति लाभः बाहुलकात्करणे यत्र तत्र हेतुत्वेन विशिनष्टि । यतः सङ्कीर्त्तनादाप्रयाणानुवृत्तात् परमां शान्तिमशनायापिपासादिरहितां मुक्तिमिति यावत् विन्देत संसृतिर्नश्यति च ॥ ३७ ॥

यतश्च कलौ मुक्त्युपायः सुकरः ततः कृतादित्रययुगवर्त्तिन्यः प्रजाः कलावुत्पत्तिमिच्छन्तीत्याह । कृतादिष्विति । न केवलमिच्छन्त्यपि तु यथा सम्भवमुद्भविष्यन्ति चेत्याह । कलाविति । श्रीनारायण एव परमयनं प्राप्यं प्रापकमाधारश्च येषां ते अष्टाक्षरार्थचिन्तनपरा इति भावः ॥ ३८ ॥

क्व भविष्यन्तीत्यत आह । क्वचिदिति । तत्र तत्र द्राविडेषु देशेषु बहुशः भक्ताः सन्तीत्यर्थः । तत्रापि कुत्रेत्यत आह । ताम्रपर्णीति ॥ ३९॥

कुतस्तत्रत्यानां नारायणपरायणत्वमत आह । ये पिबन्तीति । सार्थेन हे मनुजेश्वर ! तासां नदीनां जलपानप्रभावान्निर्मलान्तःकरणा भगवति वासुदेवे भक्ता भविष्यन्तीत्यर्थः । पिबन्तीति पानोक्तिः स्नानादीनामप्युपलक्षणार्था प्रायो भक्ता इत्यनेन केषाञ्चिदेव तत्र प्रबलप्रतिबन्धवशात्तास्मिन्न भक्तिरिति सूचितम् ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यच्चरणारविन्दमार्यवचसा पितृवचनेन अरण्यमगात् यश्च दयितेप्सितं मायामृगमन्वधावत्तच्चरणारविन्दं वन्दामहे इत्यन्वयः ॥ ३४ ॥

उपसंहरति । एवमिति । सामान्यविधानमिदं विशेषविधिस्तु सद्गुरूपदेशगम्य इति शास्त्रहृदयं रहस्यत्वान्नोक्तं शास्त्रान्तरसिद्धत्वाच्चेत्यदोषः तदुक्तं—

ध्रुवं तयैव मुच्येत यां मूर्तिं प्रदिशेद्गुरुः ।
शिष्याणां योग्यताभिज्ञो शिष्यहानिस्तु तद्युगे ॥

इति यस्मिन् युगे स्वयमुत्पन्नः तत्पूर्वयुगावतीर्णहरिणा गुरूपदिष्टेन अभीष्टसिद्धिर्भवति,—

अवतीर्णहरेर्मूर्त्या तत्पूर्वयुगजेन च ।
नृसिंहमूर्त्या च तथा यां चान्यां प्रदिशेद्गुरुः ॥

इति ॥ ३५ ॥

कृतादेः कलेः पुण्यहेतुत्वं स्तौति । कलिमित्यादिना । सारभागिनः सारग्राहिणः ॥ ३६ ॥ ३७ ॥

तथा कलौ भविष्यन्ति जायन्ते क्वचिद्देशे तथा सम्भूताः नारायणपरायणाः स्युः ॥ ३८ ॥

यत्र द्रमिलेषु ताम्रपर्ण्यादिनद्यः सन्ति प्रतीची महानदी नाम्ना वेत्रवती वाराहक्षेत्रात्सह्यगिरिं भित्वा पश्चिमसमुद्रं स्यन्दमाना ॥ ३९ ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तत्र सदाचारपालकत्वं कारुण्यं च तव नाधुनिकमेवेत्याह । त्यक्त्वेति ॥ ३४ ॥ ३५ ॥

गुणज्ञाः कीर्त्तननामोच्चारणरूपं तद्गुणं जानन्तः अत एव महादोषाग्रहत्वात्सारभागिनः सारमात्रग्राहिणः कलिं समाजयन्ति गुणमेव दर्शयन्ति यत्र प्रचरितेन सङ्कीर्त्तनेनैव साधनान्तरनिरपेक्षया तेनेत्यर्थः । सर्वः ध्यानादिभिः कृतादिषु साधनसाहस्रैः साध्यः ॥ ३६ ॥

कीर्त्तनस्यैव महिमानमाह । न ह्यत इति । अतः कीर्त्तनात् यतो यस्मात्कीर्त्तनात् परमां शान्तिं शमो मन्निष्ठता बुद्धेरित्यनुसारेण ध्यानादिभिरप्यसाध्यां सर्वोत्कृष्टां भगवन्निष्ठां प्राप्नोति अनुषङ्गेण संसारश्च नश्यति ॥ ३७ ॥

अत एव ध्यानादिनिष्ठा अपि कृतादिप्रजा एतादृशीं भगवन्निष्ठां न प्राप्तवत्यः "महाभागवता नित्यं कलौ कुर्वन्ति कीर्त्तन"मिति स्कान्दाद्यनुसारेण तादृशनिष्ठाकारणं कीर्त्तनमाहात्म्यं च दीनैककृपातिशयशालिना भगवता तदानीं तत्तत्साधनावसरे यस्मान्न प्रकाशितं तस्माद्ध्यानादिना समर्थास्ता जिह्वोष्ठस्पन्दनमात्रस्य नातिसाधनत्वं भवेदिति मत्वा तत्र आस्थितवत्यश्च ततः कलिप्रजानां परमभगवन्निष्ठतां श्रुत्वा तदर्थं कलावेव केवलं निजजन्म प्रार्थयन्त इत्याह । कृतादिष्विति सार्द्धकेन तत्र हेतुः कलाविति तद्भक्तीच्छायामपि तद्भक्तसङ्गं विना सा न सम्पद्येतेति विभाव्येति भावः । तत्परायणत्वमत्र तदीयप्रेमातिशयवत्त्वम् एतदेव परमां शान्तिमित्यनेन कार्यद्वारा व्यञ्जितं "मुक्तानामपि सिद्धाना"मित्यादेः क्वचित्क्वचिद्गौडादौ श्रीकृष्णचैतन्यदेवावतारेण द्रविडेषु च भूरिश इति श्रीवैष्णवाद्यपेक्षया अत्र कलिसङ्गेन कीर्त्तनस्य गुणोत्कर्ष इति न वाच्यं भक्तिमात्रे कालदेशादिनियमस्य निषिद्धत्वात् विशेषतो नामोपलक्ष्य च विष्णुधर्मे क्षत्रबन्धूपाख्याने—

"न देशनियमस्तत्र न कालनियमस्तथा ।
नोच्छिष्टादौ निषेधश्च श्रीहरेर्नाम्नि लुब्धक" ॥

इति स्कान्दे पाद्मवैशाखमाहात्म्ये विष्णुधर्मे च—

चक्रायुधस्य नामानि सदा सर्वत्र कीर्त्तयेत् ।

इति स्कान्द एव च—

न देशकालावस्थात्मशुद्ध्यादिकमपेक्षते ।
किन्तु स्वतन्त्रमेवैतन्नामकामितकामदम् ॥

इति नच कलावन्यसाधनासमर्थत्वादेव तेनाल्पेनापि महत्फलं भवति नतु तस्य गरीयस्त्वेनेति मन्तव्यम्—

यस्मिन्न्यस्तमतिर्न याति नरकं स्वर्गोऽपि यच्चिन्तने ।
विघ्नो यत्र निवेशितात्ममनसां ब्राह्मोऽपि लोकोऽल्पकः ॥
मुक्तिं चेतसि यः स्थितोऽमलधियां पुंसां ददात्यव्ययः ।
किं चित्रं यदघं प्रयाति विलयं तत्राच्युते कीर्त्तिते ॥

इति समाधिपर्यन्तादपि तत्स्मरणात्कैमुत्येन कीर्त्तनस्यैव गरीयस्त्वं श्रीविष्णुपुराणे दर्शितम् अत एवोक्तम् एतन्निर्विद्यमानानामित्यादि तथा च "अघच्छित्स्मरणं विष्णोर्बह्वायासेन साध्यते ओष्ठस्पन्दनमात्रेण कीर्त्तनं तु ततो वर"मिति वैष्णवचिन्तामणौ—

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

येन जन्मशतैः पूर्वं वासुदेवः समर्चितः ।
तन्मुखे हरिनामानि सदा तिष्ठन्ति भारत ॥

इत्यन्यत्र सर्वापराधकृदपीत्यादिनामापराधभञ्जनस्तोत्रे च तस्मात्सर्वत्रैव युगे श्रीमत्कीर्तनस्य समानमेव सामर्थ्यं कलौ तु श्रीभगवता कृपया तद्ग्राह्यत इत्यपेक्षयैव तत्र तत्प्रशंसेति स्थितम् अत एव यद्यन्यापि भक्तिः कर्त्तव्या तदा तत्संयोगेनैवेत्युक्तम् यज्ञैः सङ्कीर्त्तनप्रायैरिति अत्र च स्वतन्त्रमेव नामकीर्त्तनमत्यन्तप्रशस्तं—

हरेर्नाम हरेर्नाम हरेर्नामैव केवलम् ।
कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथा ॥

इत्यादौ तस्मात्साधूक्तं कलिं सभाजयन्त्यार्या इत्यादित्रयम् ॥ ३८ ॥ ३९ ॥

प्राय इति तेषु भक्तेष्वपराधिनो विनेत्यर्थः ॥ ४० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अथमवतारः कलियुगवर्त्तिनो जनान् प्रायः कृष्णरामयोर्भजनमार्गमुपदिशत्यतस्तयोः स्तुतिनती आह द्वाभ्याम् । ध्येयं ध्यातुमर्हं सदेति नात्र कालदेशनियम इति भावः । इन्द्रियकुटुम्बादिभिर्यः परिभवस्तिरस्कारस्तं हन्तीत्यनुसंहितं फलमभीष्टदोहमित्यनुसंहितं तीर्थास्पदमिति ध्यानमात्रेण गङ्गादिसर्वतीर्थस्नानसिद्धेः कलौ द्रव्यदेशक्रियादिजनितं दुर्वारमपवित्र्यमपि नाशङ्कनीयमिति भावः । तत्र सदाचारमाह । शिवविरिञ्चीति सुखसेव्यत्वमाह शरण्यमिति । भक्तवात्सल्यमाह-भृत्यार्त्तिहमिति । न च भृत्यानां परिचर्यादिकमप्यपेक्षत इत्याह हे प्रणतपालेति । भृत्याभिमानवन्तं प्रणतिमात्रेणैव पालयतीति भावः । भवाब्धिपोतमिति "त्वत्पादपोतेन महत्कृतेन कुर्वन्ति गोवत्सपदं भवाब्धि"मिति ब्रह्माद्युक्तेर्भवाब्धिः कदा निस्तीर्ण इत्यपि त्वद्भृत्यो न जानातीति भावः । श्लेषेण तस्याप्यवतारस्याप्यनेनैव स्तुतिनती यथा हे महापुरुष हेपरमहंस महामुनीन्द्र शिवविरिञ्चिनुतम् आचार्यहरिदासाभ्यां स्तुतमन्यत् समानम् ॥ ३३ ॥

अन्यैः सुदुस्त्यजा या सुरेप्सिता राज्यलक्ष्मीस्तां त्यक्त्वा यदिति य इत्यर्थः अरण्यमगात् किं राज्यवैकल्यदर्शनेन न धार्मिष्ठः आर्यस्य गुरोर्दशरथस्य वचसा अनेन पितृभक्तत्वमुक्तं प्रेयसीप्रेमवशत्वं चाह दयितया सीतया ईप्सितं मायामृगं स्वर्णाकारं मृगं योऽन्वधावत् तस्य वन्दे श्लेषपक्षे असुभ्यः प्राणेभ्योऽपि दुस्त्यजा च सुरैरपि ईप्सितं राज्यं स्वकान्तेन विराजमानत्वं यस्याः सा च या लक्ष्मीस्तां त्यक्त्वा यत् यः अरण्यमगात् तत्र हेतुः आर्यस्य विप्रस्य वचसा तव सर्वमपि गार्हस्थ्यसुखं ध्वस्तं भवत्विति यज्ञोपवीतत्रोटनपूर्वकं यत् शापवचस्तेन धार्मिष्ठः धर्मवतां मध्ये अतिशयेन श्रेष्ठः विप्रवाक्यं मान्यथा भवत्विति कृतशापस्वीकार इत्यर्थः । गत्वा किमकरोदित्यत आह । मायां कलत्रपुत्रवित्तादिरूपां मृग्यति अन्वेष्यतीति मायामृगः संसाराविष्टो जनस्तमन्वधावत् कीदृशं दया अतिशयेनास्तीति दयी तस्य आयो दयिता तया हेतुना ईप्सितं स्वाभीप्सितम् आलिङ्गनमिषेण स्पर्शनं दत्त्वा संसाराब्धिपतितमपि तं प्रेमाब्धौ पातयितुमिति निरुपधिमहाकारुण्यं द्योतितम् ॥ ३४ ॥

युगानुरूपाभ्यां रूपनामभ्यां यदुक्तं भागवतामृते—

कथ्यते वर्णनामभ्यां शुक्लः सत्ययुगे हरिः ।
रक्तः श्यामः क्रमात् कृष्णस्त्रेतायां द्वापरे कलौ ॥

इति अत्र सत्यत्रेताद्वापरेषु हंससुपर्णेति विष्णुयज्ञेति वासुदेवसङ्कर्षणेत्यादि कीर्त्तनीया भगवन्नामावलीयथोक्ता तथा कलौ सा वर्त्तमानापि नोक्ता रहस्योद्घाटनाभावार्थमिति ज्ञेयम् ॥ ३५ ॥

चतुर्षु सत्यादिषु मध्ये कः श्रेष्ठ इत्यपेक्षायां कलिरेवेत्याह । कलिमिति । गुणज्ञाः कीर्त्तनप्रचाररूपं तद्गुणं जानन्तः तद्दोषाग्रहणात् सारभागिनः तस्य सारभाग एव ग्राह्यो वर्त्तते येषां ते । ननु कलेरपारदोषवत्वात् कथं ते सारभागमेव गृह्णन्ति सत्यम् यथा अपारगुणवत्त्वमपीत्याह । यत्रेति । सर्वः सर्वयुगप्राप्यः यदुक्तम्—

ध्यायन् कृते यजन् यज्ञैस्त्रेतायां द्वापरेऽर्चयन् ।
यदाप्नोति तदाप्नोति कलौ सङ्कीर्त्य केशवम् ॥

इति ॥ ३६ ॥

सर्वलाभसारमाह । नह्यत इति । इह श्रेयः प्राप्त्युपायेषु भ्राम्यतां भ्रमं प्राप्नुवतां परमां शान्तिं भक्तिं परमामिति विशेषणोपन्यासात् ॥ ३७ ॥

साधुसङ्गजनिता केवला भक्तिः कलावेव प्रायेण लभ्यत इत्याह । कृतादिष्विति । यत्र बहवो नारायणपरायणास्तद्भक्तिमात्रार्थिनस्तत्रावश्यं तेषां सङ्गतो भक्तिस्ततः प्रेमभक्तिश्च सम्भवेदित्याकाङ्क्षणेति भावः । चकाराद्गौडोढ्रयोः ॥ ३८—४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

"ऋग्वेदे सयजुर्वेदे तथैवाथर्वसामसु ।
पुराणे सोपनिषदे तथैव ज्योतिषेऽर्जुन—
सांख्ये च योगशास्त्रे च आयुर्वेदे तथैव च ॥
बहूनि मम नामानी"ति मोक्षधर्मे श्रीकृष्णवचनात् सर्वाणि नामानि—

सर्वं कृष्णः स्थावरं जङ्गमं च ।
विश्वात्मानं विश्वमेतं प्रणीहि ॥
यत् प्रशस्तं च लोकेषु पुण्यं यच्च शुभाशुभम्
तत्सर्वं केशवोऽचिन्त्यो विपरीतमतः परम् ॥

एतादृशः केशवोऽयं स्वयंभूर्नारायणः परमश्चाव्ययश्च मध्याद्यन्तो जगतस्तस्थुषश्च सर्वज्ञो यो भूतानां प्रभवश्चाव्ययश्चेति राजधर्मे सर्वज्ञस्य देवव्रतस्य वचनात्सर्वाणि रूपाणि च—

पितामहादपि वरः शाश्वतः पुरुषो हरिः ।
कृष्णो जाम्बूनदाभासो व्यभ्रे सूर्य इवोदितः ॥
श्रीवत्साङ्को हृषीकेशः सर्वदैवतपूजितः ।
ब्रह्मा तस्योदरभवस्तथाहं च ललाटजः ॥
शिरोरुहेभ्यो ज्योतींषि रोमभ्यश्च सुरासुराः ।
ऋषयो देहसम्भूतास्तथा लोकाश्च शाश्वताः ॥

इति दानधर्मे शिववचनात् सर्वदेवपूजितत्वं सर्वकारणत्वं च—

देवर्षिभूताप्तनृणां पितॄणां न किङ्करो नायमृणी च राजन् ! ।
सर्वात्मना यः शरणं शरण्यं गतो मुकुन्दं परिहृत्य कर्तम् ॥ ४१ ॥
स्वपादमूलं भजतः प्रियस्य त्यक्तान्यभावस्य हरिः परेशः ।
विकर्म यच्चोत्पतितं कथञ्चिद्धुनोति सर्वं हृदि सन्निविष्टः ॥ ४२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

असिलोम्नश्च हन्ता च तथा रावणनाशनः ।
विभीषणस्य भगवान् राज्यदो वालिनाशनः—
सुग्रीवराज्यदाता च वलिराज्यापहारकः ॥

इति हरिवंशे गरुडवचनात् रामादिमूर्त्तिधारित्वं च श्रीकृष्णस्य प्रसिद्धम् अतो महापुरुषादिनामभिः शिवादिपूज्यत्वेन च श्रीरामाद्यवतारगुणवर्णनेन च कलौ श्रीकृष्णस्तोतव्यो मुमुक्षुभिरित्याशयेन स्तुतिमाह । ध्येयमित्यादि श्लोकद्वयेन । हे महापुरुष ! पुरुषसूक्तादिवेदैकवेद्य हे प्रणतपाल ! नानावतारैः भक्तपालने वत्सलस्य ते चरणारविन्दं वन्दे कथम्भूतं ध्येयं ध्यातुं योग्यम् सदेत्यस्य सर्वत्र सम्बन्धः ध्येयत्वे हेतवः बाह्याभ्यन्तरैः शत्रुभिर्यः परिभवोऽनादरस्तं हन्तीति तथा तत् किञ्चाभीष्टदोहं मनोवाञ्छितपूरकम् किञ्च तीर्थास्पदं गङ्गाद्याश्रयत्वेन परमकीर्त्याश्रयत्वेन च परमशुद्धिहेतुभूतम् किञ्च शिवविरिञ्चिभ्यां नुतं स्तुतम् ननु ताभ्यां समर्थाभ्यां किमर्थं नुतं तत्राह । शरण्यमाश्रययोग्यं तयोरपि रक्षकमित्यर्थः । ननु शिवादिनुतमस्माकं दृग्गोचरः कथं स्यात्तत्राह । भृत्यार्त्तिहं सर्वभृत्यार्तिहरम् किं बहुना भवाब्धिपोतं संसारसमुद्रतारकम् ॥ ३३ ॥

हे धर्मिष्ठ ! आर्यवचसा पितृवाक्येन यदरण्यमगात् अविचलितत्वान्न सन्धिः दयितया प्रियया श्रीसीतया ईप्सितं मायामृगं मारीचं यश्चान्वधावत् तत्ते चरणारविन्दं वन्दे ॥ ३४ ॥

उपसंहरति । एवमिति । युगानुरूपाभ्यां युगानुसारेण प्रवृत्ताभ्यां वेदतन्त्रोक्तप्रकाराभ्याम् ॥ ३५ ॥

सारभागिनः सारग्राहिणः ॥ ३६ ॥

इह कलौ अतः सङ्कीर्तनात् यतः सङ्कीर्तनात्परमां शान्ति मोक्षम् ॥ ३७ ॥

अत एव कृतादिषु संस्थिताः प्रजाः कलौ सम्भवं जन्मेच्छन्ति अत एव नारायणः "अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते" इति स्वमुखगीतः सर्वनरसमूहप्रवर्तको भगवान्वासुदेवः परायणं यासां ताः कलौ सम्भवं प्राप्य नामसङ्कीर्तनादिनारायणभक्तिनिष्ठां शास्त्राचार्यानुग्रहात्प्राप्नुवन्तीत्यर्थः "यो यच्छ्रद्धः स एव सः" इति वचनात् ॥ ३८ ॥

तासां सम्भवस्थानान्याह क्वचिदित्यादिसार्द्धद्वाभ्याम् । क्वचित् क्वचित् श्रीमद्वृन्दावनपुरुषोत्तमक्षेत्रादिषु पुष्करप्रयागनैमिषारण्यादिषु क्षेत्रेषु च श्रीमथुरादिषु पुरीषु च सर्ववेदपुराणप्रसिद्धासु गङ्गायमुनासरस्वत्यादिनदीषु च भूरिशः बहुशः द्रामिडेषु च वासुदेवे प्रायो भक्ताः भविष्यन्तीति सार्द्धयोरन्वयः ॥ ३९—४० ॥

भाषा टीका ।

हे शरणागतों के रक्षक आपका जो ध्यान करने को योग्य संसार का नाश करने वाला मनोरथ पूर्ण करने वाला तीर्थों के तुल्य पवित्र कारक महादेव ब्रह्मादिकों से नमस्कृत शरणागत रक्षक भक्तों का दुःख निवारक संसार सागर का जहाज ऐसा चरणार विन्द तिसको मैं वन्दना करता हूं ॥ ३३ ॥

श्रीरामावतार मे जो चरण धर्म कि निष्ठा करने से पिता के वचन पालने के वास्ते देवतों के भी चाहना के योग्य राज्य लक्ष्मी को छोड कर जङ्गल को चला गया फिर जानकीजी के इच्छा करने से माया मृग के पीछे दौडा तिस चरणारविन्दको मैं वन्दन करता हूं ॥ ३४ ॥

इस प्रकार से युगों मे होनेवाले मनुष्य उन युगों के कर्म नाम रूपों से सम्पूर्ण कल्याणों के ईश्वर हरि भगवान् का पूजन करते हैं ॥ ३५ ॥

जो लोग गुणों के जानने वाले हैं सार भजने वाले हैं श्रेष्ठ हैं वे लोग कलियुग की प्रसंसा करते हैं क्यों कि इस युग में हरिनाम सङ्कीर्तनही से सर्वार्थ सिद्ध होते हैं ३६

इस संसार में भ्रमने वाले देह धारियों को इस से ज्यादा कोई लाभ नहीं है जिस नाम सङ्कीर्तनसे परम शान्ति प्राप्त होती है और संसार छूट जाता है ॥ ३७ ॥

हे राजन् ! सत्ययुगादि कों में भी प्रजा सब कलियुग में जन्म लेना चाहते हैं क्यों कि कलियुग में नारायण के परम भक्त पुरुष उत्पन्न होंगे करके ॥ ३८ ॥

हे महाराज ! कहीं कहीं पृथिवी में थोडे २ होंगे द्राविड देशमे वहुत होंगे जहां कि ताम्रपर्णी नदी है कृतमाला है पयस्विनी है बडी पवित्र कावेरी महा नदी है हे मनुजेश्वर उहां के जो मनुष्य उन नदियों के जलों को पान करते हैं वे निर्मल बुद्धि वाले होकर नारायण वासुदेव के भक्त होते हैं उसदेश में भये भक्त भक्तिसार स्वामी श्रीशठकोपस्वामी श्रीरामानुज स्वामी आदिक भये हैं ॥ ३९ ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

भक्तस्य विधिनिषेधनिवृत्तेः कृतकृत्यतामाह । देवर्षीति । आप्ताः पोष्याः कुटुम्बिन इतरे देवादयः एतेषां यथाऽभक्तः ऋणी अत एव तेषां किंकरस्तदर्थं नित्यं पञ्चयज्ञादिकर्ता तथा च स्मृतिः "हीनजाति परिक्षीणमृणार्थं कर्मकारयेदि"ति अयन्तु न तथा कोऽसौ यः सर्वभावेन श्रीमुकुन्दं शरणं गतः कर्त कृत्यं परित्यज्य यद्वा कर्तं भेदं परिहृत्य कृती केवल इत्यस्मात् वासुदेवः सर्वमिति बुद्ध्येत्यर्थः ॥ ४१ ॥

नारद उवाच ॥

धर्मान् भागवतानित्थं श्रुत्वाऽथ मिथिलेश्वरः ।
जायन्तेयान्मुनीन्प्रीतः सोपाध्यायो ह्यपूजयत् ॥ ४३ ॥
ततोऽन्तर्दधिरे सिद्धाः सर्वलोकस्य पश्यतः ।
राजा धर्मानुपातिष्ठन्नवाप परमां गतिम् ॥ ४४ ॥
त्वमप्येतान् महाभाग ! धर्मान् भागवतान् श्रुतान् ।
आस्थितः श्रद्धया युक्तो निःसङ्गो यास्यसे परम् ॥ ४५ ॥
युवयोः खलु दम्पत्योर्यशसा पूरितं जगत् ।
पुत्रतामगमद्यद्वां भगवानीश्वरो हरिः ॥ ४६ ॥
दर्शनालिङ्गनालापैः शयनासनभोजनैः ।
आत्मा वां पावितः कृष्णे पुत्रस्नेहं प्रकुर्वतोः ॥ ४७ ॥
वैरेण यं नृपतयः शिशुपालपौण्ड्रशाल्वादयो गतिविलासविलोकनाद्यैः ।
ध्यायन्त आकृतधियः शयनासनादौ तत्साम्यमापुरनुरक्तधियां पुनः किम् ॥ ४८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

विहितकर्मनिवृत्तिमुक्त्वा निषेधनिमित्तप्रायश्चित्तनिवृत्तिमाह । स्वपादमूलमिति । अतोऽन्यस्मिन्देहादौ देवतान्तरे वा भावो येन अत एव तस्य विकर्मणि प्रवृत्तिर्न सम्भवति यच्च कथञ्चित्प्रमादादिना उत्पतितं भवेत्तदपि हरिर्धुनोति ननु यमस्तत्र मन्येत तत्राऽह परेशः ननु 'श्रुतिस्मृती ममैवाज्ञे' इति भगवद्वचनात्स्वाज्ञाभङ्गं कथं सहेत तत्राऽह प्रियस्य ननु नायं पापक्षयार्थं भजते तत्राऽह हृदि सन्निविष्टः नहि वस्तु शक्तिरर्थितामपेक्षत इत्यर्थः ॥ ४२ ॥

जायन्तेयान् जयन्त्याः पुत्रान् ॥ ४३ ॥

उपातिष्ठन्ननुतिष्ठन् ॥ ४४ ॥

निःसंगो भूत्वा ॥ ४५ ॥

शास्त्रप्रक्रियेयमुक्ता युवां तु स्वत एव कृतार्थावित्याह युवयोरिति । वां युवयोः ॥ ४६ ॥

नच सर्वकर्मार्पणादिभागवतधर्मैरन्येषामिव युवयोः सत्त्वशुद्धिरापादनीया पुत्रोपलालनेनैव भागवतधर्मसर्वस्वनिष्पत्तेरित्याह । दर्शनेति । कृष्णे पुत्र इति स्नेहं प्रकुर्वतोर्वां तस्य दर्शनादिभिरात्मा पावितः शोधितः ॥ ४७ ॥

एतदेव कैमुत्यन्यायेन स्फुटयति । वैरेणेति । यं शयनासनादौ वैरेणापि ध्यायन्तस्तस्य गतिविलासाद्यैराकृतधियस्तत्तदाकारा धीर्येषां ते तत्सारूप्यमापुः किं पुनर्वक्तव्यमनुरक्तधियां तत्साम्यं भवतीति ॥ ४८ ॥

———

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

इतरे पोष्यव्यतिरिक्ताः पञ्च यज्ञाश्च "पाठो होमश्चातिथीनां सपर्या तर्पणं बलिः । एते पञ्च महायज्ञाः देवयज्ञादिसंज्ञका" इत्युक्ताः अत एव ऋणित्वादेव तेषां देवादीनां तदर्थम् ऋणापकरणार्थं तथाच कर्मानुष्ठाने ऋणास्य प्रमाणा स्मृतिः हीनजातिः हीना उत्तमर्णसकाशान्निकृष्टा जातिर्यस्य तं परिच्छीर्णं दातुमसमर्थम् ऋणार्थम् ऋणनिवृत्त्यर्थं कर्मैव कारयेदिति मध्यकार्यौ धूम इतिवदर्थशब्दोऽत्र निवृत्तिपरः अयं वक्ष्यमाणस्तु न तथा न ऋणी कर्त्तृशब्दस्य कृत्यवाचकत्वमप्रयुक्तमतो यद्वेति मेदं मुकुन्दाद्देवतादीनां स्वातन्त्र्यं परिहृत्य त्यक्त्वा इत्थमुक्तं गारुडे "अयं देवो मुनिर्वन्द्य एष ब्रह्मा बृहस्पतिः । इत्याख्या जायते तावद्यावन्नार्च्यते हरि"रिति अतएव वासुदेवः सर्वमिति बुद्ध्येत्यर्थं इत्युक्तं तथैवोक्तं श्रीमदर्ज्जुनेन "सर्वं समाप्नोषि ततोऽसि सर्वं" इति तथाच सर्वस्य तद्व्याप्यत्वात्तदायत्तवृत्तिकत्वात्तदभेदनिर्देशः यथा प्राणायत्तवृत्तिकत्वेनेन्द्रियाणामपि प्राणत्वनिर्देशः तथाच छान्दोग्ये पठ्यते न वै वाचो न चक्षूंषि न श्रोत्राणि न मनांसीत्याचक्षते प्राणो ह्येवैतानि सर्वाणि भवन्तीति यत्तु कैश्चिद्बाधितसामानाधिकरण्यं स्वीकृतं तच्छरणं मत इति शक्तिप्रकरणानुपयोगित्वात् क्षोदासहत्वाच्च त्यक्तं विश्वस्य मिथ्यात्वे हि तत्सङ्गच्छते तदेव तु न सम्भवति "तदेतदक्षयं नित्यं जगन्मुनिवराखिलं ब्रह्म सत्यं तपः सत्यं सत्यं चैव प्रजापतिः सत्याद्भूतानि जातानि सत्यं भूतमयं जगदिति तत्सत्यमाचक्षत इति नित्यो नित्यानां चेतनश्चेतनानामिति सत्यस्य सत्य"मिति च विष्णुपुराणभारतादिस्मृतिश्रुतिभिः कण्ठोक्त्या तत्सत्यत्वप्रतिपादनात् क्वचित्तथा वर्णनं तु ज्ञानप्रकरणे युक्तमेव वैराग्यार्थमिति सुधीभिर्विभाव्यम् ॥ ४१ ॥

अतएव अनन्यभाक्त्वादेव तस्यानन्यशरणस्य कथञ्चिदित्यस्याभिप्रायः विकर्मणीत्यादिः प्रमादोऽनवधानता आदिना

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी ।

उत्कण्ठया भक्तिवर्द्धिष्णोर्विष्णोरिच्छा गृह्यते यथा चित्रकेतौ तद्वद्धरिकर्तृककर्मधूननं परेशः परेषां ब्रह्मादीनामपीशो नियन्ता तदाज्ञामनने यमस्य का शक्तिरिति भावः "श्रुतिस्मृती ममैवाज्ञे यस्ते उल्लङ्घ्य वर्तते आज्ञाच्छेदी मम द्वेषी मद्भक्तोऽपि न वैष्णव" इति सकलवाक्यं गम्यम् अयं भक्तः अर्पितां पापवर्यार्थित्वम् ॥ ४२ ॥

जयन्त्याः पुत्रान् नवयोगेश्वरान् प्रीतः अनन्यशरणस्य माहात्म्यश्रुत्या हृष्टः सोपाध्याय इति तत्सङ्गिनामपि कृतार्थत्वोक्त्या साधुसङ्गमाहिमातिशयो दर्शितः अपूजयदिति वैष्णवानां विष्णुवत् पूजनमभिप्रेतं नतु सत्कृतिमात्रम् "अर्चयित्वा तु गोविन्दं तदीयान्नार्चयेत्तु यः । न स भागवतो ज्ञेयः केवलं दाम्भिकः स्मृत" इत्यादि स्मृतेः ॥ ४३ ॥

ततः पूजनानन्तरं धर्मान् भागवतधर्मान् श्रवणकीर्तनादीन् मां गतिं श्रीवैकुण्ठम् ॥ ४४ ॥

त्वमपि परं यास्यसे किं साधकभक्तवत् काक्वा नेत्यर्थः सर्वतः परस्य श्रीकृष्णस्य नित्यप्राप्तत्वादिति भावः ॥ ४५ ॥

तथैव श्रीस्वामिचरणानामुत्थानिका शास्त्रप्रक्रियेत्यादि पूरितं कृतार्थतामापादितं पुत्रतामगमदिति प्रकटलीलाभिप्रायेण नित्यलीलायां "जयति जननिवास" इत्याद्यनुसारेण नित्यपुत्रत्वात् ॥ ४६ ॥

तथैव टीकाकृतामिष्टिः नचेत्यादि भागवतधर्माणां यत् सर्वस्वं सारभागो वात्सल्यमिति यावत् तस्य निष्पत्तेर्मित्यसिद्धेः शोधितः ब्राह्मणाद्यपराधाभासादपि दूरे रक्षित इत्युक्त्या भविष्यदपराधस्य तत्कार्यस्य च मायिकलीलामयत्वमभिव्यञ्जितम् ॥ ४७ ॥

एतदेव कृतार्थत्वमेव तत्साम्यं सच्चिदानन्दरूपत्वं भवति नित्यमेवाप्नोतीति मोक्षेऽपि साम्योक्त्या ऐक्यमनादृतम् "इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः । सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति चे"ति श्रीगीतोक्तेः "यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति । एवं मुनेर्विजानत आत्मा भवति गौतम निरञ्जनः परमं साम्यमुपैती"ति मोक्षेऽपि भेदप्रतिपादकश्रुतेश्चेति ॥ ४८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

कृतयुगेऽपि दुष्करं ध्यानं कलौ न सुकरम् अत्यन्तदुष्करं तत्कथं ध्यानेन विना मुक्तिरित्यपेक्षायां सुकरोपायं दर्शयति देवर्षीति ॥ ४१ ॥

प्रपदनस्योत्तरपूर्वाघविरोधित्वमाह । स्वपादमूलमिति । भजतः संश्रयतः इत्यर्थः अन्यभावसम्बन्धस्त्यक्तो येन स त्यक्तान्यभावः ॥ ४२-५२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यत्र सङ्कीर्तनेनैवेति सुकरोपायत्वेनोक्तं सङ्कीर्तनं प्रतिवन्धभूयस्त्वसम्भावनया दुष्करं मन्वानं राजानमालक्ष्य ततोऽपि सुकरं प्रपदनाख्यमुपायं तस्य पूर्वोत्तराघरूपसकलप्रतिवन्धकविरोधित्वं चाह द्वाभ्याम् । देवर्षीति । हे राजन्नयं देवादीनां पितॄणां च न ऋणी भवत एव न तेषां किङ्करः नाभीष्टकारी तत्रात्माः पोष्याः कुटुम्बिनः इतरे देवादयः पञ्चमहायज्ञदेवताः कोऽसौ यः कृत्यं परिहृत्य परमश्लोक इत्यत्रापि यथा सम्प्रदायं परित्यागोऽत्रगन्तव्यः शरण्यं शरणार्हं मुकुन्दं सर्वात्मना सर्वभावेन प्राप्यप्रापकभावेन शरणं गतः सोऽयं न देवादीनामृणीत्यनेन संसृतिहेतुभूतमुक्तिविरोधिऋणत्रयविरोधित्वं प्रपदनस्योक्तम् अनेन पूर्वाघविरोधित्वं फलितं न देवादीनां किङ्कर इत्यनेन तत्प्रीत्यावहकर्मस्वधिकारो व्युदस्तः परिहृत्य कृत्यमित्यनेन देवकैङ्कर्यरूपयज्ञादिकर्मसाध्यफलाभिसन्धिर्निरस्तः ॥ ४१ ॥

स्वपादमूलमिति । हरिराश्रितदुरितहरः परेशो भगवान् स्वपादमूलं भजतः संश्रयतः उपायोपेयभावेन सेवमानस्येत्यर्थः । त्यक्तः अन्यस्मिन् देवतान्तरादौ भाव उपायोपेयभावो येन सः तस्य प्रियस्य हेतुगर्भाण्येतानि विशेषणानि नहि निरतिशयप्रीतिविषयगतो दोषः प्रीतिमतो वैमुख्यापादकः किन्तु निराचिकीर्षां विषय एवेति भावः । यद्विकर्म शास्त्रविरुद्धं कर्म कथञ्चित्प्रमादादिना उत्पतितं चेत्तत्सर्वं संनिविष्टो हरिर्धुनोति नाशयति ॥ ४२ ॥

धर्मानिति । धर्मानित्यादिनारदोक्तिः जायन्तेयान् जयन्त्याः पुत्रान्मुनीन्कव्यादीन् उपाध्यायैः सहितः प्रीतः सन् पूजयामास हि निश्चितम् ॥ ४३ ॥

तत इति । ततः सर्वस्य लोकस्य जनस्य पश्यतः सतः सिद्धाः कव्यादयः अन्तर्दधिरे राजा निमिः तद्धर्मान् सिद्धैरुपदिष्टानुपालिष्यन् परमां गतिं मुक्तिमवाप ॥ ४४ ॥

त्वमपीति । त्वमपि हे महाभाग ! वसुदेव श्रुतान्मत्त इति शेषः एतान् जायन्तेयजनकसम्वादसम्बाधितान् भागवतान् धर्मानाश्रितः अनुतिष्ठन् श्रद्धया सिषाधयिषितत्वरया युक्तः सहितः निःसङ्गः देहतदनुबन्धिषु आसक्तिरहितः अयं जीवदशा वृत्त्युपदेशः ततः परमपदमिति शेषः यास्यसे प्राप्स्यसि ॥ ४५ ॥

शास्त्रप्रक्रियेयमुक्ता युवां तु कृतार्थावेवेत्याह । युवयोरिति । कुतः यद्यस्मात् वां युवयोः पुत्रतामगमत्प्राप्तः अतो युवां कृतार्थाविति भावः ॥ ४६ ॥

तावन्मात्रेण कथं कृतार्थतेत्यत्राह । दर्शनेति । श्रीकृष्णे पुत्रस्नेहं प्रकुर्वतोर्वां युवयोस्तस्य दर्शनादिभिरात्मा पावितः शोधितः भगवत्प्राप्तियोग्यो निरस्ततत्प्राप्तिप्रतिबन्धकः कृत इत्यर्थः ॥ ४७ ॥

ननु देहानुबन्धिनि स्नेहो बन्धायैव भवेत्कथं श्रीकृष्णे नौ पुत्रस्नेह आत्मपावनहेतुरित्यत्र विषयवैलक्षण्यादिति किं पुनर्वाच्यमित्याह । वैरेणेति । शिशुपालादयो नृपतयः शयनासनादौ यत् यस्मिन् श्रीकृष्णविषये वैरेणापि ध्यायन्तस्तस्य गतिविलासावैराकृताप्रियः तत्तदाकारा धीर्येषां ते तत्साम्यं तत्साधर्म्यमापुः किं पुनर्व्यक्तव्यमनुरक्तधियां भवादृशानां तत्साम्यं भवतीति नहि कस्मिंश्चिद्वैरस्य तत्साम्यावहत्वं दृष्टं श्रीकृष्णे तु शिशुपालादीनां दृष्टं यतो यद्विषयो वैरभाव एव निरतिशयानुभाववान् किं पुनः स्नेहभाव इति भावः ॥ ४८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

(देवर्षिपितृभूताप्तनृणां पूजकाश्च स्युः ॥ ० ॥)

सामान्यमुक्त्वा विशेषमाह । देवर्षीति । यो ऽसाधारण्या परिचर्यया सर्वात्मना शरण्यं मुकुन्दं शरणं गतो भवति

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सोऽयं देवादीनां किङ्करो ऋणी च न भवति । सोत्तमाश्चि-नेति शेषः तेषां किङ्करः ऋणी च अत्रेदं तात्पर्यं सर्वात्मना हरिभक्ताः सर्वथा हरिभक्ताः भक्ता इति त्रिविधाः तत्र देवेशाः सर्वात्मना भक्ताः देवाः सर्वथा भक्ताः तदितरे भक्ता इति अत्रापि ये ये भक्त्याधिकास्ते ते अपरेषां स्वामिन उत्तमर्णाश्च स्वावरेषां किङ्कर ऋणी च न स्यात्—

सर्वात्मना हरेर्भक्ता देवेशा एव केवलम् ।
देवास्तु सर्वथा भक्ता भक्ता एवेतरे स्मृताः ॥
हरिभक्त्यधिकेष्वेव किङ्करश्चाप्यृणी तथा ।
हरिभक्तो नेतरेषां वासुदेवव्यपाश्रयात् ॥
द्विधैव सोत्तमर्णानि दातव्यानीतराणि च ।
दातव्येभ्यो विमुच्येत नेतरेभ्यः कथञ्चन ॥
कथं देवाद्यनुपकृतो मनो मोक्षेऽपि वर्तयेत् ।
बिम्बत्वात्तदधीनं हि स्वरूपं सर्वशो यतः ॥

इति स्मृतिश्चशब्दगृहीता ॥ ४१ ॥

एवम्विधस्यापि हरिभक्तस्य पूर्वादृष्टोपनतविकर्मणाधःपातः स्यादिति तत्राह । स्वपादमूलमिति । त्यक्तोऽन्यः स्वतन्त्रोऽहमिति भावो येन स तथा तस्य सर्वदा भगवदधीनोऽस्मीति भावयुक्तस्येत्यर्थः । कथञ्चिद्बलवददृष्टत्वात् यदुत्पतितं विकर्म तद्धुनोति इतरभक्तैर्देवा उदकादिभिरपि श्रीहरिस्मरणपूर्वकं पूज्या अन्यथा मोक्षो न स्यात् तदुक्तं—

उदकैश्च नमस्कारैः स्मृतिभिर्मनसा तथा ।
यतिभिश्चापि सम्पूज्या देवा मोक्षमियासुभिः
मध्ये विष्णुमनुस्मृत्य नान्यथा तु कथञ्चन ।

इति तत्रापि प्राधान्येन श्रीहरिध्यानं कर्तव्यं तत्सन्निधानसम्बन्धविशेषाद्देवतास्मरणं—

प्राधान्येन हरिर्ध्येयस्तत्सम्बन्धात्सुरादयः ।
ध्येयानान्यत्क्वचिद्ध्यायेद्दूरावनुपयोगिवत् ॥

इति विशेषवचनात् ॥ ४२ ॥

नारदः सिद्धेभ्यो भगवत्तत्त्वं विज्ञाय ततः राजा किमकरोदिति वसुदेवस्य हार्दं प्रश्नं परिहरति । धर्मानिति ॥ ४३—४६ ॥

आत्मा देहः ॥ ४७ ॥

मुक्तेरन्तरङ्गसाधनं भक्तिरेवेति दर्शयितुं वैरप्रधानासुरावेशाद्वैरिभिरभक्तानामपि भक्त्या स्वयोग्यं फलं भवति किमुत नित्यानुरक्तबुद्धीनामिति कैमुत्यन्यायमाह । वैरेणेति । शिशुपालादिषु स्थिता असन्तस्तन्नामानस्तत्सास्यद्वेषयोग्यफलं नरकादिलक्षणमापुः तत्स्थाः सन्तस्तस्य हरेः साम्यं निर्दोषत्वादिलक्षणं फलमापुः अनुरक्तधियः केवलभक्ताः किं पुनः भक्तियोग्यफलमापुरिति किं वक्तव्यम् अतो भक्तिरेव मुख्येत्यर्थः

पौण्ड्रकादिषु दैत्येषु सुरांशाः सन्ति सर्वशः ।
बहुमानफलं विष्णोस्ते बाल्यादाय सद्गतिम् ॥
विद्वेषस्य फलं यत्तु तदादायासुरास्तमः ।
यान्त्यतो नैव विद्वेषो विष्णौ कार्यः कथञ्चन ॥

इतिवचनात् प्रामाणिकोऽयमर्थः आकृतधियः स्वबुद्धौ तदाकारवन्तः ॥ ४८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तेषां न किङ्करः किन्तु भगवत एवेत्यनधिकारित्वं कर्त्तमेदमित्यर्थं ततो देवतादीनां स्वातन्त्र्यमिति यावत् एवमेवोक्तं गारुडे—

अयं देवो मुनिर्वन्द्य एष ब्रह्मा बृहस्पतिः ।
इत्याख्या जायते तावद्यावन्नार्चयते हरिम् ॥

इति ॥ ४१ ॥

न च विकर्मप्रायश्चित्तरूपकर्मान्तरं कर्तव्यं तस्य तच्छ्रद्धया एव विकर्मप्रवृत्त्यभावात् कथञ्चिदापतितेऽपि विकर्मणि तदनुस्मरणेनैव प्रायश्चित्तस्यापानुषङ्गिकसिद्धेरित्याह । स्वपादमूलमिति । इदि सन्निविष्टत्वे हेतुः । त्यक्तान्यभावस्येति । त्यक्तोऽन्यत्र देवतान्तरे भावो भगवतीव भक्तिर्येन विकर्मधूनने हेतुः हरिः स्वभावत एव सर्वदोषहरः परेशः शक्तिश्चेत्यर्थः तत्रापि प्रियस्येत्याग्रहतश्चेत्यर्थः ॥ ४२—४४ ॥

एवं तत्प्रश्नानुरूपमन्यद्विहितान् भगवद्धर्मानुक्त्वा तदीयस्वप्रियोजनोत्तरमाह । त्वमपीति । त्वमपि परं यादवेस काका त्वं तु नेत्यर्थः सर्वतः परस्य श्रीकृष्णस्य नित्यप्राप्तत्वादिति भावः ॥ ४५ ॥

किन्तु युवयोरिति जगदपि पूरितं कृतार्थतामापादितमित्यर्थः । तत्र हेतुः प्रकटलीलयापि यद्वां युवयोः पुत्रतामगात् ॥ ४६ ॥

ननु तथापि जयविजयवद्ब्राह्मणापराधाद्बिभेमि तत्राह— दर्शनेति । पावितः दोषाभासादपि दूरे रक्षित इत्यर्थः । तत्र हेतुः । कृष्ण इति । तत्रापि पुत्रस्नेहं प्रकुर्वतोरिति ताभ्याम् युवयोर्महदेवान्तरमिति भावः ॥ ४७ ॥

आस्तां युवयोर्वार्ता श्रीकृष्णस्य सर्वोत्कृष्टभगवत्स्वभावत्वात्साधारणानुरक्तजनानामपि सुतरां तत्तुल्या गतिः किं पुनर्यदूनामिति तान् प्रतिशोचन्तं कैमुत्येनाह । वैरेणेति ॥ ४८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

भक्तस्य नित्यनैमित्तिकश्राद्धतर्पणादियन्त्रणाराहित्यमाह । देवर्षीति । आप्ता नराः पोष्याः पितृमातृभार्यादयः देवादयः पञ्चयज्ञदेवाताः एतेषां कर्मी यथा ऋणी अत एव तेषां किंकरश्च तदर्थं नित्यं पञ्चयज्ञकर्त्ता तथा च स्मृतिः "हीनजातिं परिक्षीणमृणार्थं कर्म कारये" दिति अयं तु न तथा कोऽसौ यः सर्वभावेन श्रीमुकुन्दं शरणं गतः यथा पृथ्वीपतिना स्वकिंकरत्वेन गृहीतस्य जनस्य मण्डलेश्वराद्यनुवृत्तिर्न सम्भवेत् कर्त्त वर्णाश्रमविहितं कर्म त्यक्त्वा यद्वा कर्त्त भेदं त्यक्त्वेति यथा तरोर्मूलनिषेचनेनेति न्यायेन विष्णुपूजने सम्वृत्ते देवर्ष्यादयः साधु पूजिता एवेत्यत एव "मत्कथा श्रवणादौ वा श्रद्धा यावन्न जायत" इति वदता भगवता स्वभक्तस्य कर्माधिकारो दूरीकृतः ॥ ४१ ॥

विहितकर्मनिवृत्तिमुक्त्वा निषेधनिमित्तप्रायश्चित्तनिवृत्तिमाह । स्वपादमूलमिति । त्यक्तोऽन्यस्मिन् देवतान्तरे भावः सेव्यबुद्धिर्येन तस्य विकर्मणि प्रवृत्तिरेव न भवेत् कथञ्चित् प्रमादादिना

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

उत्पतितम् उत्पातरूपेण जातं चेत् तदपि हरिर्धुनोति ननु विकर्मवति भृत्ये दण्डयन्त एव प्रभवो दृश्यन्ते इति हरिरेव तं दण्डयन्तु न प्रियस्य भक्तस्य प्रियत्वादेवादण्ड्यत्वं परेश इति एतदेव तस्य पारमैश्वर्य्यमिति भावः । ननु, नायं पापक्षयार्थं भजते तत्राह । हृदि सन्निविष्ट इति नहि वस्तुशक्तिर्बोधतामपेक्षत इति भावः ॥ ४२ ॥

जायन्तेयान् जयन्त्याः पुत्रान् ॥ ४३—४४ ॥

श्रीवसुदेवस्य नित्यसिद्धभगवत्पितृभावस्यापि भगवत इव नित्यमूर्त्तेरपि भगवदिच्छयैव भक्तिरसौत्कण्ठ्यनिमग्नस्य स्वस्मिन् प्राकृतनरत्वाभिमानमालक्ष्य तं प्राकृतनरमिवोपदेशमात्रश्लाघादिभिरानन्दयति । त्वमपीति षड्भिः । परं परमेश्वरं प्राप्स्यसि ॥ ४५—४७ ॥

ननु परमेश्वरे पुत्रबुद्धिरेवानर्थकारिण्यावयोरपराधोत्पादनादिति चेन्मैवं प्रातिकूल्यभावेनापि कृष्णार्पितमनसा कृतार्थी भवन्ति किं पुनरानुकूल्यभावेन युष्मदादय इत्याह । वैरेणेति । गतिविलासाद्यैर्या विशिष्टा आकृतिः कृष्णस्याकारस्तन्मात्र एव नतु तन्माधुर्य्यधीर्य्येषां ते स्वीयशयनासनादिकर्मणि ध्यायन्तः सन्तः साम्यं सारूप्यं सायुज्यं च यथा योगमापुः अनुरक्तधियां युष्मदादीनां तु किं पुनस्तत् ततोऽप्यधिकं प्राप्यं तस्माद्-पराधस्य तु सम्भावनैव नास्तीति भावः॥ ४८ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

ननु वासुदेवनिष्ठस्य देवादिकार्येऽप्यधिकारोऽस्ति नवेत्यत आह । देवर्षीति । हेराजन् ! यः कर्त्तं कृत्यं परिहृत्य सर्वात्मना श्रीमुकुन्द एव मम स्थितिप्रवृत्तिहेतुः स एव प्राप्यः स एव स्वप्राप्तावुपाय इत्येवं सर्वः सम्पूर्णः अन्यत्र वृत्तिरहितः य आत्मा मनस्तेन शरण्यं शरणार्हं मुकुन्दं शरणं गतः स देवादीनाम् ऋणी न भवति अत एव किङ्करो न भवति ॥ ४१ ॥

स्वपादमूलं भजतः अहर्निशं चिन्तयतः इदमेव निरपेक्षं प्रापकं चेति मत्वा सर्वतः अत एव त्यक्तः अन्यभावः पादमूलेतरे प्राप्ये प्रापके च भावो येन स तस्य अत एव प्रियस्य हृदंगमस्य कथञ्चित् यन्नरकादिप्रापकं विकर्मोत्पतितं चकारात् यत्स्वर्गादिप्रापकं कर्मोत्पतितं पादमूलासक्तस्य शुभफलके कर्मण्येव प्रवृत्तिर्नास्ति कुतः पुनरकर्मणीत्यत उक्तं कथञ्चिदिति तत्सर्वं स्वप्रातिकपटकम् हरिर्विधुनोति निराकरोति ॥ ४२ ॥

धर्मान्निरयुपलक्षणं भगवद्भक्तमायोत्तरणप्रकारादीनाम् जायन्तेयान् जयन्त्यपत्यान् ॥ ४३ ॥

आतिष्ठन् श्रद्धाविश्वासादिना अनुतिष्ठन् परमां भगवद्भावापत्तिम् ॥ ४४ ॥

निःसङ्गः फलाभिसन्धिरहितः सन् ॥ ४५ ॥

भवता लोकसङ्ग्रहार्थं प्रश्नादिकं कृतं मयापि सामान्य पुरुषमिव भवन्तं प्रति—

त्वमप्येतान्महाभाग ! धर्मान्भागवताञ्छ्रुतान् ।
आस्थितः श्रद्धया युक्तो निःसङ्गो यास्यसे परम् ॥

इत्युक्तं भवांस्तु सभार्यः कृतार्थ एवेत्याह । युवयोरिति । वां युवयोः ॥ ४६ ॥

कृतार्थतामाह । दर्शनेति । कृष्णे सदानन्दे पुत्र इतिस्नेहं प्रकुर्वतोर्वां युवाभ्यां दर्शनादिभिः आत्मा देहः पावितः शोधितः ॥ ४७ ॥

एवं श्रीवसुदेवस्य सभार्यस्य कृतार्थतामुक्त्वेदानीमन्येषामुक्तभागवतधर्मनिष्ठानां कैमुतिकन्यायेन मुक्तिमाह । वैरेणेति । यं श्रीकृष्णं शिशुपालादयो नृपाः शयनादौ वैरेणापि । ध्यायन्तश्चिन्तयन्तः श्रीकृष्णगतिविलासादौ आकृतधियः आकृता तत्तदाकारा धीर्येषां ते तस्य श्रीकृष्णसाम्यमापुः किं पुनर्वक्तव्यमनुरक्तधियां भागवतानां तत्साम्यं भवतीति ॥ ४८ ॥

———

भाषा टीका।

हे राजन् ! देवता ऋषि सम्पूर्ण पितृगण इन सबों का वह पुरुष ऋणी नहीं होता है न किंकर होता है जोकि सब प्रकार सब के कर्तव्य को छोड़कर शरण रक्षक शरण्य मुकुंद की शरणागति को प्राप्त होता है ॥ ४१ ॥

तब परमात्मा हरि भी जो अपने चरण का भजन करता है प्रिय है अन्य भाव को छोड़ने वाला है तिसका जो कोई कुकर्म भूल से होजावै तो तिस सब को हृदये में स्थित होकर नाश कर देते हैं ॥ ४२ ॥

नारद उवाच ।

वे मिथिलेश्वर राजा इस प्रकार भागवत धर्मों को सुन कर प्रसन्न होकर जयन्ती पुत्र उन ऋषियों का उपाध्यायों को साथ लेकर पूजन करते भये ॥ ४३ ॥

तब तो सब लोगों के देखते ही वे सिद्ध लोग अंतर्धान होगये राजा भी उन धर्मों के अनुष्ठान करके मुक्ति को प्राप्त होगये ॥ ४४ ॥

हे महाभाग ! वसुदेवजी ! आप भी सुने हुये इन धर्मों को श्रद्धा से आश्रय करके निःसङ्ग होके परमगति को प्राप्त होजाओगे ॥ ४५ ॥

तुम दोनों स्त्री पुरुषों के यश से संपूर्ण जगत पूरि रहा है जिससे कि भगवान् हरि ईश्वर तुमारे पुत्र होगये ॥ ४६ ॥

श्रीकृष्णजी के साथ दर्शन से आलिंगन से भाषण से शयन से आसन से आपने श्रीकृष्ण के साथ स्नेह किया है तिससे आत्मा को पवित्र कर लिया है ॥ ४७ ॥

शिशुपाल पौंड्र शाल्व आदि दुष्टभि वैर से भी श्रीकृष्ण की गति विलास अवलोकनादिकों से उनका शयन आसनादिकों में ध्यान करने से उनकी समता को प्राप्त होगये तो फिर अनुराग करने वाले तो क्यों नहीं उनको प्राप्त होंगे ॥ ४८ ॥

———

माऽपत्यबुद्धिमकृथाः कृष्णे सर्वात्मनीश्वरे ।
मायामनुष्यभावेन गूढैश्वर्ये परेऽव्यये ॥ ४९ ॥
भूभारासुरराजन्यहन्तवे गुप्तये सताम् ।
अवतीर्णस्य निर्वृत्त्यै यशो लोके वितन्यते * ॥ ५० ॥

श्रीशुक उवाच ॥

एतच्छ्रुत्वा महाभागो वसुदेवोऽति विस्मितः ।
देवकी च महाभागा जहतुर्मोहमात्मनः ॥ ५१ ॥
इतिहासमिमं पुण्यं धारयेद्यः समाहितः ।
स विधूयेह शमलं ब्रह्मभूयाय कल्पते ॥ ५२ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
वैयासिक्याम् एकादशस्कन्धे
पञ्चमोऽध्यायः ॥ ५ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु पुत्रस्नेहश्चेन्मोक्षहेतुस्तर्हि सर्वे मुच्येरंस्तत्राऽह । मापत्यबुद्धिमिति । अपत्यबुद्धिं मा कृथाः अडागमश्छान्दसः ॥ ४९ ॥

ननु कथमीश्वरो मानुषः स्यात्कथं वा तस्य विश्वसृष्ट्यादिकर्तुः पूतनाशोषणादिकर्माश्चर्यमिव निरूप्यते तत्राह । भूभाररूपा असुरा एव राजन्यास्तेषां हन्तवे तान्हन्तुम् निर्वृत्यै मोक्षाय ॥ ५०—५१ ॥

इहास्मिन्नेव देहे शमलं मोहं विधूय ब्रह्मभूयया ब्रह्मत्वाय कल्पते ॥५२॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
पञ्चमोऽध्यायः ॥ ५ ॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

अपत्यबुद्धिं पुत्रसामान्यमतिं मा कुरु मायेति कृपाप्रधानमनुष्यलीलाप्रकटनेन गूढं दुर्विज्ञेयमैश्वर्यं यस्य तस्मिन् ॥ ४९ ॥

अवतीर्णस्याप्रपञ्चगोलोकादिति शेषः । तथाचाप्रसिद्धनराकृतिपरब्रह्मत्वं ननु पार्थिवमनुष्यत्वमिति भावः ॥ ५० ॥

एतद्भक्तिपञ्चाध्यायीवर्णिततत्त्वं मोहं प्रकटलीलावेशेन प्राकृतापत्यमतिं ब्रह्मशापभयञ्च ॥ ५१ ॥

ब्रह्मत्वाय कल्पते योग्यो भवति जीवन्मुक्तः स्यादित्यर्थः ॥५२॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे
श्रीराधारमणदासगोस्वामिविरचितायां दीपिकादीपिनीटिप्पण्याम् पञ्चमोऽध्यायः ॥ ५ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

अत्रान्यस्मिन्नादर्शे ३८ श्लोके कलौकचित् भक्ता भविष्यन्तीत्यनेनान्वयः द्राविडेषु च भूरिशः बहुशः बहव इत्यर्थः अन्यत्र कलौ प्रायशो भक्ता इति द्राविडेषु भूरिशः सर्वस्मिन् कलौ सर्वस्मिन् द्राविडेचेति तत्र हेतुत्वेन पिबन्ति जलं तासामित्युक्तिः इत्यधिकपाठो दृश्यते ॥

इति श्रीमद्भागवतव्याख्याने एकादशस्कन्धीये
श्रीसुदर्शनसूरिकृतशुकपक्षीये
पञ्चमोऽध्यायः ॥ ५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ननु सत्यमेतद्यत्कृष्णो लोकविलक्षणः सोऽपि प्राकृतो मम पुत्र इत्यत आह । मेति । कृष्णे केवलमपत्यबुद्धिं मा कृथाः न कुरु अडागमश्छान्दसः तत्र हेतुत्वेन विशिनष्टि । योगीश्वराणां विविधविचित्रशक्तिमतामपीश्वरेऽचैवामानुषाणि चेष्टितानि त्वयैव दृष्टानीति भावः । परे प्रकृतिविलक्षणेऽव्यये तदन्तरात्मतयावस्थितत्वेऽपि तद्गतदोषसंस्पर्शरहिते स्वरूपतः स्वभावतश्च विकाररहिते च नन्वेवंविधश्चेत्तदसाधारणवेशः किं न दृश्यत इत्यत आह । मायामनुष्यभावेन मायया सङ्कल्पात्मिकया हेतुभूतया यो मनुष्यभावः मनुष्याकारः तेन गूढमैश्वर्यम् ईश्वरासाधारणाकारो यस्य तस्मिन् ॥ ४९ ॥

किं तर्हि मायामनुष्यभावप्रयोजनमित्यत आह । भूभारेति ।

---

* वितन्वतीति वीरर० विज० पाठः ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

भुवो भाररूपा असुराः असुरसम्पत्त्याभिजाता राजन्यास्तेषां निर्हत्यै विनाशाय सतां साधूनां गुप्तये परित्राणाय चावतीर्णोऽस्य लोकस्य निर्वृत्यै सुखाय यशः कीर्तिं लोके जगति वितन्वति सप्तम्यन्तमिदं शृण्वतः कीर्त्तयतश्च जनस्य निरतिशयानन्दप्रापणाय कीर्त्तिं विस्तारयति कृष्णेऽपत्यबुद्धिं मा कृथा इति सम्बन्धः ॥ ५० ॥

एतविति । एतन्नारदोक्तमात्मनः मोहं तस्मिन्नपत्यबुद्ध्यात्मकं जहतुः ॥ ५१ ॥

अकृतेतिहासश्रवणादिफलमाहाइतिहासामिति । पुण्यं वदतां पुण्यावहं शृण्वतां च यः पुमान् समाहितचित्तो धारयेच्छ्रवणादिपूर्वकमितिहासार्थमनुतिष्ठेत् सोऽस्मिन्नेव जन्मनि शमलं भगवत्प्राप्तिप्रतिबन्धकं पापं विधूय ब्रह्मभूयाय ब्रह्मभूयं ब्रह्मभावः ब्रह्मसाधर्म्यमिति यावत् तस्मै कल्पते तत्साधर्म्यं प्राप्नोतीत्यर्थः ॥ ५२ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्

पञ्चमोऽध्यायः ॥ ५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

उक्तार्थमुपसंहरन् कृष्णेऽपत्यबुद्धिं विहाय सर्वेश्वरबुद्धिरेव कर्तव्येत्याह । मापत्यबुद्धिमिति ॥ ४९ ॥

हन्तवे हन्तुं "हन्तवा उ" इति श्रुतिः अस्य विश्वस्य ५०-५१

ब्रह्मभूयाय स्वस्वयोग्यपूर्णानन्दत्वाय ॥ ५२ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्

पञ्चमोऽध्यायः ॥ ५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

सर्वत्र हेतुः मापत्येति । अपत्यसाधारणबुद्धिं मा कुरु यतः कृष्णे "कृषिर्भूवाचक" इत्यादिलक्षणे अत एव सर्वात्मनि सर्वावतारिणि अत एवेश्वरे सर्ववशीकर्त्तरि अत एव परे तथापि मायेति कृपाप्रधानमनुष्यलीलाप्रकटनेन गूढं ज्ञातुमशक्यमैश्वर्यं यस्य तस्मिन् अत एवाव्यय इति यद्वा ननु तर्हि पुत्रस्नेहं प्रकुर्वतोरिति कथं पुत्रोचितः स्नेहः तस्मिन् श्लाघितं इतत्राह । मेति । अपत्यबुद्धिंमा अकृथाः किन्तु कुरुष्वेवेत्यर्थः तत्र हेतुः कृष्ण इत्यादि लक्षणेऽपि मायेत्यादिरूप इति पूर्ववत् ॥ ४९ ॥

कृपाप्रधानत्वमेवाह । भूभारेति ॥ ५० ॥

ततश्च एतादिति । मोहं ब्रह्मशापभयमयम् ॥ ५१ ॥

ब्रह्मभूयाय सर्वबृहत्तमत्वाय कल्पेत परमभक्तत्वापत्तेः ॥५२ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धीये

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे

पञ्चमोऽध्यायः ॥ ५ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तस्मात्त्वया अनुरक्तयैव भाव्यं नतूदासितव्यमित्याह । मेति । सर्वात्मनीश्वरे मदपत्यत्वमारोपितमेव न वस्तुत इत्यसंभावनया कृष्णे या अपत्यवदेव बुद्धिस्तां मा कृथाः मदपत्यमेवायमिति कृष्णे पुत्रभावं कुर्विति भावः । ननु मनुष्यस्य मम परमेश्वरः कथं पुत्रः स्यात्तत्राह । मायेति । त्वदपत्यत्वप्राप्त्यर्थं लोकदृष्ट्या मायया मनुष्यत्वेन गुप्तीकृतमैश्वर्यं येन अतो मनुष्यस्य तव मनुष्यः कृष्णः पुत्रो भवेदिति भावः । परेऽव्यये इति तदपि तस्य श्रेष्ठत्वम् ऐश्वर्यव्ययराहित्यं च भवेदिति भावः । अत्र वासुदेवप्रबोधनार्थमेव मायाशब्दः प्रयुक्तः वस्तुतस्तु कृष्णो मनुष्यः स्वरूपेणैव तदापि मायाशब्दः स्वरूपवाची ॥ ४९ ॥

भूभाररूपा असुरा एव ये राजन्यास्तेषां हन्तवे तान् हन्तुं सतां गुप्तये उभयेषामेव तेषां निर्वृत्यै सायुज्यप्रेमदानादिभिरिति वैषम्यनैर्घृण्ये पराहते ॥ ५० ॥

मोहं कृष्णे स्वपुत्रत्वस्यामाननं जहतुः ॥ ५१ ॥

शमलमविद्यां विधूय मोक्षं प्राप्नोति॥ ५२ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्
एकादशे पञ्चमोऽयं सङ्गतः सङ्गतः सताम् ॥ ५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

मायामनुष्याः प्राकृता मनुष्याः बुभुक्षवः तद्विषयको यस्तैरज्ञात एवं चरिष्यामीति श्रीकृष्णसङ्कल्पस्तेन गूढैश्वर्ये अव्यये नित्यगुणशक्तिविग्रहादिके परे निःशमानातिशये कृष्णे अपत्यबुद्धिं मा कृथाः अडागमः छान्दसः ॥ ४९ ॥

तर्हि मायामनुष्येषु किमर्थं तदवतरणं तत्राह । भूभारेति । भूभारासुरराजन्यानां हन्तवे तान् हन्तुं सतां सुराणां गुप्तये रक्षायै निर्वृत्यै मुक्तये मुमुक्षूणामिति शेषः ॥ ५० ॥

मोहं भगवदिच्छयैव भगवत्युत्पन्नामपत्यबुद्धिम् ॥ ५१ ॥

इहास्मिन् लोके शमलं देहम् आत्मबुद्धिरूपमात्मनि अब्रह्मात्मकबुद्धिरूपं भगवति देवतान्तरसमबुद्धिरूपं मोहं विधूय ब्रह्मभावाय कल्पते योग्यो भवति ॥ ५२ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धीये

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे

पञ्चमाऽध्यायार्थप्रकाशः ॥ ५ ॥

भाषा टीका ।

सर्वात्मा श्रीकृष्ण के विषय में पुत्र बुद्धिमत करना क्यों से कि वे परमात्मा हैं परमेश्वर हैं ऐश्वर्य को गुप्त करके मनुष्य भाव वर्तमान हैं ॥ ४६ ॥

वे तो पृथिवी के भार रूप जो राजा हैं तिनके मारने के वास्ते औसत्पुरुषों के रक्षा करने के वास्ते अवतार लिये हैं उनका यश लोक में विस्तृत होरहा है ॥ ५० ॥

श्रीशुक उवाच ।

महा भाग्यवान् वसुदेवजी इस बात को सुनकर बहुत विस्मित होगये और देवकीजी भी विस्मित भई फिर उन दोनों ने अपने संसारी मोह को छोड़ दिया ॥ ५१ ॥

इस पवित्र इतिहास को जो सावधानता से धारण करेगा सो पुरुष इस जन्म में सब पापों को दूर करके ब्रह्म गति को प्राप्त होगा ॥ ५२ ॥

इति श्रीमद्भागवत एकादश स्कन्ध पंचमोऽध्याय
श्रीवृन्दावनस्थ पं० भागवताचार्यकृत
भाषा टीका समाप्ता ॥ ५ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे पञ्चमोऽध्यायः ॥ ५ ॥

—:*:—

अथ षष्ठोऽध्यायः ।

——:*:——

श्रीशुक उवाच ।

अथ ब्रह्माऽऽत्मजैर्देवैः प्रजेशैरावृतोऽभ्यगात् ।
भवश्च भूतभव्येशो ययौ भूतगणैर्वृतः ॥ १ ॥
इन्द्रो मरुद्भिर्भगवानादित्या वसवोऽश्विनौ ।
ऋभवोऽङ्गिरसो रुद्रा विश्वे साध्याश्च देवताः ॥ २ ॥
गन्धर्वाप्सरसो नागाः सिद्धचारणगुह्यकाः ।
ऋषयः पितरश्चैव सविद्याधरकिन्नराः ॥ ३ ॥
द्वारकामुपसञ्जग्मुः सर्वे कृष्णदिदृक्षवः ।
वपुषा येन भगवान्नरलोकमनोरमः ॥
यशो वितेने लोकेषु सर्वलोकमलापहम् ॥ ४ ॥
तस्यां विभ्राजमानायां समृद्धायां महर्द्धिभिः ।
व्यचक्षतावितृप्ताक्षाः कृष्णमद्भुतदर्शनम् ॥ ५ ॥
स्वर्गोद्यानोपगैर्माल्यैश्छादयन्तो यदूत्तमम् ।
गीर्भिश्चित्रपदार्थाभिस्तुष्टुवुर्जगदीश्वरम् ॥ ६ ॥

देवा ऊचुः ।

नताः स्म ते नाथ ! पदारविन्दं बुद्धीन्द्रियप्राणमनोवचोभिः ।
यच्चिन्त्यतेऽन्तर्हृदि भावयुक्तैर्मुमुक्षुभिः कर्ममयोरुपाशात् ॥ ७ ॥
त्वं मायया त्रिगुणयाऽऽत्मनि दुर्विभाव्यं व्यक्तं सृजस्यवसि लुम्पसि तद्गुणस्थः ।
नैतैर्भवानजित ! कर्मभिरज्यते वै यत्स्वे सुखेऽव्यवहितेऽभिरतोऽनवद्यः ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

षष्ठे ब्रह्मादिभिः स्तुत्वा गन्तुं विज्ञापितं हरिम् ।
उद्धवः प्रार्थयामास स्वधाम नय मामिति ॥

अतः परमतिविस्तरेणाऽऽत्मविद्यां निरूपयितुं तत्प्रस्तावमाह । अथेति । आत्मजैः सनकादिभिरभ्यगात् द्वारकामिति चतुर्थेनान्वयः ॥ १—३ ॥

ननु तेषामुपेन्द्रादिरूपं भगवन्तं नित्यं पश्यतां कथमतिदिदृक्षा अत आह । वपुषेति येन । वपुषा नरलोकमनोरमः सन् सर्वलोकेषु यशो वितेने तदतिसुन्दरं वपुर्दिदृक्षवः ॥ ४ ॥

व्यचक्षतापश्यन् ॥ ५ ॥

स्वर्गोद्यानस्थैर्माल्यैः चित्राणि श्रद्धाबन्धप्रायाणि पदान्यर्थाश्च यासु ताभिर्गीर्भिः ॥ ६ ॥

बुद्धीन्द्रियादिभिर्दर्शनादिना प्राणेन च बलहेतुना दण्डवत्प्रणिपातेन नता नयं नमस्कृतवन्तः स्मेति विस्मये यथाहुः "दोर्भ्यां पद्भ्यां जानुभ्यामुरसा शिरसा दृशा । मनसा वचसा चेति प्रणामोऽष्टाङ्ग ईरित" इति स्मशब्दोक्तविस्मयाय विशेषणम् कर्ममयादुरुपाशान्मुमुक्षुभिर्भावयुक्तैरपि यत्केवलमन्तर्हृदि चिन्त्यते ननु दृश्यते तद्वयं नताः अहो भाग्यमित्यर्थः ॥ ७ ॥

ननु ममापि दृष्टादृष्टकर्मकरणात्कुतो मत्पदारविन्दचिन्तनं

श्रीधरस्वामिकृतभावार्थदीपिका।

कर्मपाशान्मुमुक्षुभिः क्रियते तत्राहुः। त्वमिति। हे अजित! अस्तामिदानींतनमिदमल्पं कर्म त्वं व्यक्तं महदादिप्रपञ्चं सृजसि पालयसि संहरसि च तदप्यात्मन्येव न पृथक् दुर्विभाव्यं मनसाप्यन्वेतुं वितर्कयितुं तद्गुणस्थस्तस्या मायाया गुणेषु नियन्तृत्वेन स्थितः अथ च एतैः कर्मभिर्मनागप्यजितो न लिप्यते कुतः यो भवाननवद्यो रागादिदोषरहितः यतः स्वे आत्मरूपे सुखेऽव्यवहितेऽनावृते अभिरतः अतस्त्वं कर्म कुर्वन्नप्यात्मारामः परमेश्वर इति मुमुक्षुभिश्चिन्त्यस इति भावः॥ ८॥

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी।

मां स्वधाम वैकुण्ठं नयेति प्रार्थयामास अतः पञ्चाध्यायीतः आत्मविद्यां परमात्मज्ञानं तत्प्रस्तावम् आत्मविद्याप्रसङ्गम् अथ नारदोपदेशानन्तरम्॥ १॥

तदेव विवृणोति। इन्द्र इत्यादिना। तत्रेन्द्र इति सार्द्धयुग्मकं कृष्णेति लुप्ततृतीयान्तं पृथक् पदं "सुपां सुपः सुलोपश्च" इति स्मृतेः अतएव वपुर्दिदृक्षव इत्यग्रे योजयिष्यति॥ २॥ ३॥

येनान्तर्भूतोपेन्द्रादिरूपेण श्रीकृष्णाख्यवपुषा॥ ४॥

अद्भुतं दर्शनं दृश्यत इति दर्शनं श्रीविग्रहो यस्य तं विस्मापनं स्वस्य चेत्युक्तेः॥ ५॥

शृङ्खलाबन्धो ह्येकं चित्रकाव्यं वकाराद्यर्णांश्च ग्राह्यास्तदत्र पूर्वपूर्वपद्यचरमस्थवर्णपदतदर्थैरुत्तरोत्तरादिमवर्णपदपदार्थानां सादृश्येन शृङ्खलाबन्धो विचारणीयः॥ ६॥

बुद्धीन्द्रियाणि ज्ञानेन्द्रियाणि भावयुक्तैरेव मुमुक्षुभिर्यत् पदारविन्दं चिन्त्यते ननु भावविरहितैरिति शुष्कमुमुक्षूणां तच्चिन्तनेऽयोग्यता दर्शिता अस्मिन् पद्येऽन्तिमवर्णस्य तकारस्योत्तरपद्याद्यतकारेण शृङ्खलाबन्धः नच तत्र त्वकारो न तकार इति वाच्यं काव्यमार्गे स्वरो न गण्यत" इति न्यायात् संयुक्तवकारानुस्वारयोरविवक्षितत्वादिति एवं परत्रापि ज्ञेयम्॥ ७॥

दृष्टमैहिकं पुत्रपौत्रादिविवाहरूपं कर्म अदृष्टं पारलौकिकं यज्ञादि कर्म तयोर्मम करणात् मत्कर्तृकानुष्ठानात् दृष्टादृष्टकर्तृभ्यो जीवेभ्यो मम विशेषाभावात् कुतो ममेत्यादि योजनीयम् इदानीन्तनम् अवतारकालीनम् इदं मनुष्यनाट्यानुरूपं दृष्टादृष्टकर्म आस्तां तदपि सृष्ट्यादिकमपि आत्मनि स्वरूपभूताधिष्ठान एव न पृथक् कुलालादिवदिति अभिन्ननिमित्तोपादानत्वमभ्युपगतं तत्र विवर्ताधिष्ठानत्वेनोपादानत्वमिति भगवान् शङ्करः स्वरूपशक्तिविशेषतया निमित्तत्वं प्रधानशक्तिविशिष्टतयोपादानत्वमिति तत्त्ववादिगुरवः सूक्ष्मचिदचिच्छरीरविशिष्टस्य सद्वारकमुपादानत्वं स्थूलतद्द्वयशरीरविशिष्टस्य कार्यत्वमिति हि श्रीवैष्णवाः आत्मन्येव नतु पृथगिति स्वामिव्याख्यानं तु तत्तन्मतानुकूलमिति सुधीभिर्विभाव्यम् एतैः सृष्ट्यादिकर्मभिः रागादिदोषरहितः इदं मया सम्यक् कृतमिदमसम्यगिति कर्तृत्वाभिनिवेशशून्य इत्यर्थः। आत्मरूपे स्वस्वरूपभूते सुखे अनावृते उपाध्यावरणरहिते अतः सृष्ट्यादिमहत्कर्मभिरप्यलिप्तत्वात् इति हेतोः भावः वाच्यार्थो व्यङ्ग्यः॥ ८॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्।

॥ १—६॥

बुद्धीन्द्रियप्राणमनोवचोभिः नताः स्मः कायान्तर्भावादिन्द्रियप्राणयोः भूततत्त्वस्वाश्रयकायिकप्रणामे हेतुत्वं भावयुक्तैः भक्तियुक्तैः॥ ७॥

आत्मनि सृजसि न कुलालादिवदशरीरभूतं कार्यं सृजसि किन्तु शरीरतया स्वाधेयं कार्यं सृजसीत्यर्थः। दुर्विभाव्यम् अन्वेष्टुं चिन्तयितुमशक्यं गुणस्थः गुणेषु स्थितः गुणानामधिष्ठाताप्यपरवश इत्यर्थः। तदेव विवृणोति। नैतैरिति॥ ८॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

तदेवमध्यायचतुष्टयेन विप्रशापान्यथाकरणसामर्थ्योदाहरणप्रसङ्गानुप्रसक्तं निमिजायन्तेयसम्वादं निरूप्येदानीं विप्रशापानुमोदनानन्तरवृत्तान्तमनुवर्णयति। अथेत्यादिना। अथ विप्रशापानुमोदनानन्तरं ब्रह्मा चतुर्मुखः देवैर्दीप्यमानैः प्रजेशैः प्रजापतिभिर्मरीच्यादिभिश्चात्मजैः सनकादिभिश्च परिवृतः द्वारकामभ्यगादिति सम्बन्धः तथा भूतभव्ययोः प्रजयोरीशः भवो रुद्रः भूतभव्येशत्वमस्य परमात्मसापेक्षमिति मन्तव्यम्॥ १॥

मरुद्भिर्मरुद्गणैः॥ २॥ ३॥

कृष्णदिदृक्षवः श्रीकृष्णं द्रष्टुमिच्छवः दिदृक्षाहेतुत्वेन भगवन्तं विशिनष्टि। वपुषेति। येन वपुषा नरलोकमनोरमः सन् सर्वलोकमलापहं यशो वितेने विस्तृतवान् तेन वपुषा उपलक्षितं श्रीकृष्णं दिदृक्षव इत्यर्थः॥ ४॥

महर्द्धिभिर्महतीभिऋर्द्धिभिः भोग्यभोगोपकरणादिसमृद्धिभिः समृद्धायां विभ्राजमानायां तस्यां द्वारकायामद्भुतं दृश्यते तथा तं कृष्णमवितृप्तान्यक्षीणि येषां तथा भूताः व्यचक्षत अपश्यन्॥ ५॥

स्वर्गेति। माल्यैः पुष्पैर्यदूत्तमं श्रीकृष्णं छादयन्तः वर्षन्तः चित्राणि पदान्यर्थाश्च प्रतिपाद्या यासु ताभिर्गीर्भिर्वाग्भिस्तुष्टुवुः॥ ६॥

ता एव त्रयोदशश्लोकात्मिका आह। नता इति। हे नाथ! तव पदारविन्दं बुद्ध्यादिभिर्नताः स्म कर्त्तरि क्तः नमस्कृतवन्तः बुद्धिमनःशब्दाभ्यां मानसिकः प्रणामो विवक्षितः वचःशब्देन वाचिकः इन्द्रियप्राणशब्दाभ्यां कायिकः कायस्येन्द्रियप्राणयुक्तव्यापारत्वात्तयोश्च कायान्तर्भावात्करणत्रयेण नमस्कृतवन्तो भवामेत्यर्थः। स्मशब्दः विवक्षितविस्मयमाविष्करोति पदारविन्दं विशिनष्टि यदिति। कर्ममयात् गुणाद्दृढपाशान्मुमुक्षुभिर्मोक्तुमिच्छुभिर्भावयुक्तैर्भक्तियुक्तैर्जनैरन्तर्हृदि हृदयकमलमध्ये यत्पादारविन्दं केवलं चिन्त्यते तादृशमधुना मांसचक्षुर्भिः साक्षात्कृत्य करणत्रयेण नमस्कृतवन्त इत्यघटितमेतत्संघटितमिति भावः॥ ७॥

ननु यद्यहमन्तर्हृदि विचिन्तनीयचरणस्तर्हि भवतां जीवानामिव हृदयसम्बन्धात्प्रक्रान्तवश्यत्वतन्मूलसुखित्वदुःखित्वादिदोषात्मिकामिति मां शरणं गता इत्यत आहुः। त्वमिति। त्रिगुणया सत्त्वादिगुणत्रयमय्या मायया आत्मनि धारके दुर्विभाव्यमन्वेष्टुं चिन्तयितुमशक्यं व्यक्तं स्थूलचिदचिदात्मकं जगत्सृजस्यवसि रक्षसि लुम्पसि संहरसि तद्गुणस्थः तस्या मायाया गुणेषु नियन्तृ-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तया स्थितः गुणानामभिमानी न तु गुणपरवश इत्यर्थः अनेन प्रकृतिवश्यत्वव्युदासः आत्मनीत्यनेन कुलालादिवद्शरीरभूतं न सृजसि किन्तु स्वशरीरतयात्मविशेषणं कार्यं सृजसीत्युक्तं भवति सृजसीत्यनेन न तत्र कारणत्वं किन्तु कर्तृत्वमेवोक्तं अथ कर्मवश्यत्वं व्युदस्यति । नैतैरिति । हेऽजित ! कनाप्यजितस्वभावस्वरूपस्वभाव ! एतैः सृष्ट्यादिरूपैः कर्मभिर्नाऽऽप्यसे न लिप्यसे सृष्ट्यादिकर्मणां लीलारूपत्वेन पुण्यपापात्मकत्वाभावाच्च कर्मवश्यत्वतन्मूलदुःखित्वादि प्रसङ्ग इत्यर्थः तत्र हेतुत्वेन विशिनष्टि । यदिति । यो भवान्स्वे स्वासाधारणेऽव्यवहितेऽनावृतेऽपरिच्छिन्ने इति यावत् सुखे आनन्देऽभिरतः नतु वैषयिकसुखाभिरतः वैषयिकसुखाभिरतानामेव तदर्थतया कृतानां कर्मणां पुण्यापुण्यात्मकत्वं तन्मूलदुःखित्वादिकं चेति भावः । किंबहुनेत्यभिप्रेत्य विशिनष्टि । अनवद्य इति । न विद्यतेऽवद्यं हेयं यस्मात्तु पापस्वभावात्सोऽनवद्यः स्वयं हेयप्रतिभटः स्वसेवकानामप्यनवद्यत्वापादकश्चेत्यर्थः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

स्वाभीष्टस्वलोकप्राप्तये भक्तमुख्यब्रह्मादिप्रार्थनासुधार्द्रीकृतचित्तस्य हरेस्तदभ्यनुज्ञानं स्वकुलसंहारस्योपक्रमश्च समृद्धभक्तिसमुद्रमग्नोद्धवोपलब्धिप्रकारश्चास्मिन्नध्याये कथ्यते तत्र प्रथमं ब्रह्मादिप्रार्थनाप्रकारः प्रारभ्यते । अथेत्यादिना आत्मजैरात्मनो मनसो जातैः सनकादिभिः संवित्प्रोक्तं विवृणोति । भवश्चेत्यादिना ॥ १-३ ॥

दिदृक्षुत्वे हेतुमाह । वपुरिति । सर्वलोकमलापहं यशो लोकेषु वितन्वन् भगवान्सर्वलोकमनोरम इति येन तस्मादिति शेषः या स्वयं कारिता तस्यामासीनम् ॥ ४ ॥ ५ ॥

माल्यैः पुष्पैः ॥ ६ ॥

यत्पदारविन्दमन्तर्हृदि बुद्धीन्द्रियप्राणमनोवचोभिमानिभिर्देवैश्चिन्त्यते ॥ ७ ॥

ब्रह्मादिदेवैश्चिन्त्यत्वे ततोऽप्युत्कृष्टत्वगुणेन भाव्यं तत्किमस्य निर्गुणत्वमस्तीत्यत्राह । त्वमित्यादिना । मायया स्वाधीनया नियतया त्रिगुणया प्रकृत्या आत्मनि आत्माधारत्वेन व्यक्तं ब्रह्माण्डम् अचेतनस्य पुरुषसम्बन्धित्वेन प्रवृत्तिदर्शनादिच्छामात्रेण प्रकृत्या सृष्ट्यादिकं कथमुपपद्यत इत्यत उक्तं तद्गुणस्थ इति प्रकृतिगुणेषु स्थित्वा नियतैर्गुणैः । ननु गुणसम्बन्धाज्जीववत्पुण्यपापलक्षणकर्मबद्धता स्यादेवेति तत्राह । नैतैरिति । एतैर्गुणनिमित्तैः अनेन दुःखानुभवोऽपि नास्तीत्युक्तं भवति अत्र हेतुगर्भविशेषणमाह । यदिति । यः प्रकाशरूपः अः प्रापण इति धातोः आत्मवगच्छति सर्वमिति सर्वज्ञ इत्यर्थः । अत एवाव्यवहिते स्वरूपसुखेऽभिरतः अत एवानवद्यः दुःखादिनिमित्तदोषाभावात् ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अतः परमतिविस्तरेण भगवद्विद्यां निरूपयितुं तत्प्रस्तावमाह । अथेति ॥ १ ॥

तदेव विवृणोति । इन्द्र इत्यादिना । तत्रेन्द्र इति सार्द्धयुग्मकम् ॥ २ ॥ ३ ॥

येन कृष्णाख्येन अन्तर्भूतोपेन्द्रादिरूपेण ॥ ४ ॥

कृष्णमद्भुतदर्शनमिति । स्वस्यापि विस्मापनमित्युक्तेः ॥ ५-७ ॥

त्वमिति । स्वे स्वरूपभूतह्लादिनीशक्तिप्रकाशिते ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ब्रह्मादिभिः स्तुतं संहर्तान्तर्भिस्तुं कुलं प्रभुम् ।
ज्ञात्वा न्यवेदयत् प्रेष्ठः षष्ठे स्वाभीष्टमुद्धवः ॥

आत्मजैः सनकादिभिः भूतानां प्राणिनां भव्यस्य कल्याणस्य ईशो दाता अभ्यगात् द्वारकामिति कर्मपदेन चतुर्थश्लोकस्थेनान्वयः ॥ १-३ ॥

येन वपुषा नरलोकमनोरमस्तं कृष्णं दिदृक्षव इत्यभेदोक्त्या वपुषः सकाशाज्जीवस्य यथा भेदस्तथा नेश्वरस्येति ज्ञापितं यदुक्तम्—

देहदेहिविभागश्च नेश्वरे विद्यते क्वचिदिति ॥ ४ ॥

तस्यां द्वारकायां व्यचक्षत अपश्यन् ॥ ५ ॥

स्वर्गोद्यान एवोपगैरुपगतैः चित्राणि शृङ्खलाबन्धप्रायाणि पदानि यथा च यासु ताभिर्गीर्भिः ॥ ६ ॥

बुद्ध्या बुद्ध्यधिष्ठानेन हृदयेन इन्द्रियेणेति दृग्भ्यां पद्भ्यां दोर्भ्यां चेत्यर्थः प्राणेन प्राणवता देहेनेति जान्वाद्यङ्गान्यपि लब्धानि यथाहुः दोर्भ्यां पद्भ्यां च जानुभ्यामुरसा शिरसा दृशा । मनसा वचसा चेति प्रणामोऽष्टाङ्ग ईरित" इति यच्चरणारविन्दं केवलमन्तर्हृदि चिन्त्यते नतु दृश्यते तद्बुधं दृष्ट्वा नताः स्म अहो भाग्यमिति भावः ॥ ७ ॥

अस्मदादिभिरीश्वरैरपि नमस्यत्वे तव दुर्वितर्क्यपरमपरमेश्वरत्वमेव हेतुरित्याहुः । त्वमिति । व्यक्तं विश्वं तद्गुणस्थः तस्या मायाया गुणेषु नियन्तृत्वेन स्थितः सृष्ट्यादिकं कुर्वन्नपि एतैः कर्मभिर्भवान् नाऽऽप्यते न लिप्यते तत्र हेतुः यः स्वीये सुखे अव्यवहिते अनावृतेऽभिरतः नतु जीव इव स्वसुखे अविद्यया आवृते सति रमणाभावाद्दीनः अत एव स कर्मभिर्लिप्तः एवं चात्वमनवद्यः सतु सावद्यः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तदेवं चतुर्भिरध्यायैः संक्षेपतो वर्णितं सपरिकरं भगवत्तत्त्वं भगवदुद्धवसंवादेन ... तमाद्यैकोनविंशत्यध्यायैर्विस्तरतो वर्णयितुं भगवदुद्धवसंवादं वक्ता प्रथमाध्यायान्ते "भगवान् ज्ञातसर्वार्थ ईश्वरोऽपि तदन्यथा । कर्तुं नैच्छद्विप्रशापं कालरूप्यन्वमोदत" इत्युक्तस्य विप्रशापानुमोदनस्यानन्तरं वृत्तान्तं च निरूपयितुं षष्ठाध्यायः प्रारभ्यते । अथेति । आत्मजैः श्रीसनकादिभिः देवैर्योतनस्वभावैर्मूर्तिमद्भिर्वेदैः प्रजेशैः दक्षादिभिः सह ब्रह्मा अभ्यगात् भवश्च यशौ द्वारकामिति वक्ष्यमाणेन पदेनान्वयः ॥ १ ॥

इन्द्रादयः द्वारकामुपसञ्जग्मुरित्यन्वयः । इन्द्र इति पृथगुक्तिः आदितेषु तस्य प्राधान्यात् ॥ २ ॥

ननु किमिच्छन्तो द्वारकां ते ब्रह्मादयः उपजग्मुरित्यत्राह । सर्वे कृष्णं दिदृक्षव इति ॥ ३ ॥

येन वपुषा यशो वितेने तेन अद्भुतदर्शनं कृष्णं व्यचक्षत अपश्यन् इति द्वयोरन्वयः ॥ ४ ॥ ५ ॥

शुद्धिर्नृणां न तु तथेड्य ! दुराशयानां विद्याश्रुताध्ययनदानतपःक्रियाभिः ।
सत्त्वात्मनामृषभ ! ते यशसि प्रवृद्धसच्छ्रद्धया श्रवणसंभृतया यथा स्यात् ॥ ९ ॥
स्यान्नस्तवाङ्घ्रिरशुभाशयधूमकेतुः क्षेमाय यो मुनिभिरार्द्रहृदोह्यमानः ।
यः सात्वतैः समविभूतय आत्मवद्भिर्व्यूहेऽर्चितः सवनशः स्वरतिक्रमाय ॥ १० ॥
यश्चिन्त्यते प्रयतपाणिभिरध्वराग्नौ त्रय्या निरुक्तविधिनेश ! हविर्गृहीत्वा ।
अध्यात्मयोग उत योगिभिरात्ममायां जिज्ञासुभिः परमभागवतैः परीष्टः ॥ ११ ॥
पर्युष्टया तव विभो ! वनमालयेयं संस्पर्धिनी भगवती प्रतिपत्निवच्छ्रीः ।
यः सुप्रणीतममुयाऽर्हणमाददन्नो भूयात्सदाङ्घ्रिरशुभाशयधूमकेतुः ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

माल्यैः पुष्पैः चित्राणि पदानि अर्थाश्च यासु ताभिः ॥६॥

हे नाथ ! ते पदारविन्दं बुद्ध्यादिभिर्वयं नताः नमस्कृतवन्तः अनेनोपास्योपासकभावो दर्शितः बुद्ध्यादिभिरित्यनेन—

दोर्भ्यां पादाभ्यां जानुभ्यामुरसा शिरसा दृशा ।
मनसा वचसा चेति प्रणामोऽष्टाङ्ग ईरितः ॥

इतिस्मृत्युक्तलक्षणः प्रणामो दर्शितः कमिति विस्मये विस्मयमेवाहुः । कर्ममयाः उरवः बहवः पाशा यस्मिन् तस्मात् संसारात् मुमुक्षुभिर्यत्केवलमन्तर्हृदि चिन्त्यते नतु दृश्यते तद्वयं साक्षाद्दृष्ट्वा नमस्कृतवन्तः अहो दुर्लभमद्यलब्धमिति विस्मयः यन्मुमुक्षुभिश्चिन्त्यते तत्पदारविन्दं नता इत्यनेन त्रैकालिकमुमुक्षुचिन्तनविषयं कालाऽपरिच्छिन्नं श्रीकृष्णपदारविन्दमिति दर्शितम् ॥ ७ ॥

उपासकेभ्य उपास्यस्य वैलक्षण्यं दर्शयितुं विश्वजन्मादिहेतुत्वं सर्वाधारत्वं स्वसुखाभिरतत्वं सर्वदोषास्पृष्टत्वं च भगवत आहुः । त्वमिति । हे अजित ! तद्गुणस्थः मायागुणेषु नियन्तृत्वेन स्थितस्त्वम् आत्मनि स्वस्मिन् सर्वधारणके मायया स्वशक्तिभूतया अन्यैर्दुर्विभाव्यं चिन्तयितुमप्यशक्यं व्यक्तं चिदचिदात्मकं विश्वं सृजसि अवसि रक्षसि लुम्पसि संहरसि च अथच एतैः कर्मभिर्भवान्नाज्यते न लिप्यते यतस्त्वमनवद्यः स्वभावतोपास्तसमस्तदोषः किञ्च यस्त्वम् अव्यवहिते अपरिच्छिन्ने स्वे स्वासाधारणे सुखे अभिरतः नतु सृज्यसुखे अनेन विश्वसृष्ट्यादिकं जीवोपकाराय करोषीत्युक्तम् ॥ ८ ॥

———

भाषा टीका ।

श्रीशुक उवाच ।

इसके अनंतर देवतों के सहित प्रजापतियों के सहित ब्रह्माजी द्वारकामे आये और भूत भविष्यत्काल के ईश्वर श्रीमहादेवजी भी भूतगणों के सहित आये ॥ १ ॥

इन्द्र भगवान् देवतों के सहित आये आदित्य वसु अश्विनी कुमार ऋभु आङ्गिरस रुद्र विश्वेदेव साध्यदेवता ॥ २ ॥

गंधर्व अप्सरा नाग सिद्धचारण गुह्यक ऋषि पितर विद्याधर किन्नर ॥ ३ ॥

ये सब श्रीकृष्ण दर्शनाभिलाषी होकर द्वारका को गये मनुष्य लोक के रमण कराने वाले भगवान् ने जिस शरीर से जगत् में यश का विस्तार किया जिससे कि सब लोगों का पाप नष्ट होता है उस मूर्ति के दर्शन को गये ॥४॥

बडी सम्पत्ति से विराजमान उस द्वारका मे जाकर उनोंने अद्भुत दर्शन जिनका ऐसे कृष्णचंद्र का दर्शन किया ॥ ५ ॥

स्वर्ग के बगीचे के फूलों से यदु नंदन को आच्छादन करते भये और चित्र विचित्र पद अर्थ वाली वाणियों से उनकी स्तुति करने लगे ॥ ६ ॥

देवा ऊचुः ।

देवता बोले हे नाथ ! आपके चरण कमल को हम वंदन करते हैं अपनी बुद्धि इंद्रिय प्राण मन वचन से हमारा नमस्कार है जिस चरण को कर्म मय संसार पास से छोड ने की इछा से प्रेम युक्त होकर मुमुक्षु लोग हृदय के भीतर चिन्तन करते हैं ॥ ७ ॥

आपनी अचिन्त्य माया से अपने ही रूप से इस अतर्कनीयं जगत् को तीनों गुणों के द्वारा सृजते हो और रक्षा करते हो और संहार करते हो और हे अजित ! इनके गुणों से आप युक्त नहीं होते हो जिससे कि आप अपने सुख स्वरूप में रमण करते हो और निर्दोष हो ॥ ८ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

नन्वात्मारामस्य किं कर्मकरणेनात आहुः । शुद्धिरिति । हे ईड्य हे ऋषभ ! दुराशयानां रागिणाम् विद्या उपासना विद्यादिभिस्तथा शुद्धिर्न भवति सत्त्वात्मनां सतां ते यशसि श्रवणेन सम्भृतया परिपुष्टयाऽभिवृद्धया सच्छ्रद्धया यथा स्यात् परमपावनस्य यशसो वितानाय तव कर्माचरणमिति भावः ॥ ९ ॥

तदेवं त्वद्यशःश्रद्धैव शुद्धिहेतुरस्माभिस्तु तवाङ्घ्रिर्दृष्टोऽतस्तवाङ्घ्रिर्नोऽस्माकमशुभाशयानां विषयवासनानां धूमकेतुस्तद्दाहकः

श्रीधरस्वामिकृतभावार्थदीपिका ।

कथम्भूतः वः क्षेमाय मोक्षाय मुनिभिर्मुमुक्षुभिः प्रेमार्द्रहृदा ऊह्यमानश्चिन्त्यमानः यश्च सात्वतैर्भक्तैः समविभूतये समानैश्वर्याय वासुदेवादिव्यूहैरर्चितः तेषु च कैश्चिदात्मवद्भिर्धीरैः स्वरतिक्रमाय स्वर्गमतिक्रम्य वैकुण्ठप्राप्तये सवनशस्त्रिकालमर्चितः॥१०॥

किं च प्रयतपाणिभिः संयतहस्तैर्हविर्गृहीत्वाध्वराग्नावाहवनीयादौ याज्ञिकैर्यश्चिन्त्यते ननु "यस्यै देवतायै हविर्गृहीतं स्यात्तां ध्यायेद्वषट्करिष्य"न्निति वचनात्तत्तद्देवताश्चिन्त्यन्ते अत आहुः । अथवा निरुक्तेन विधिनेन्द्रादिरूपेणैव यज्ञपुरुषश्चिन्त्यत इत्यर्थः । उत किञ्च अध्यात्मयोगे आत्माधिकारे योगे योगिभिरप्यात्मनस्तव माया अणिमादिस्तां जिज्ञासुभिस्तत्तत्कामैर्यश्चिन्त्यते परमभागवतैस्तु मुक्तैर्यः परीष्टः सर्वतः पूजितः स तवाङ्घ्रिर्नोऽशुभाशयधूमकेतुः स्यादिति पूर्वेणान्वयः ॥ ११ ॥

एतेषां च मुनिसात्वतादीनां षण्णां सेवकानां मध्ये परमभागवतेषु लक्ष्म्या अपि तव प्रीतिरधिकेति संस्तुवन्ति । पर्युष्टयेति । इडभावश्छान्दसः अहं यत्र वसामि तत्रैव वक्षसि पर्युषितापीयं वसतीति प्रति पत्नीवच्छ्रीः संस्पर्धमानां श्रियमनादृत्य यो भवान्पर्युषितयाऽपि अमुया वनमालया भक्तैरर्पितेयमिति प्रीत्या सुप्रणीतं सुष्ठु सम्पादितम् यथा भवति तथाऽर्हणां पूजामाददत् स्वीकृतवान् सुप्रणीतमित्यर्हणाविशेषणं वा तस्य तवाङ्घ्रिर्नोऽशुभाशयधूमकेतुर्भूयात् यद्वाऽयोऽङ्घ्रिरमुया सुप्रणीतमर्हणामाददत्सनोऽशुभाशयधूमकेतुर्भूयादित्यन्वयः । अथ वैवं सम्बन्धः । एतेभ्यो ध्यानार्चनादिनिष्ठेभ्योऽपि त्वद्यशसि प्रवृद्धसच्छ्रद्धावन्त एव कृतार्था भगवतो यशः प्रियत्वादित्याहुः पर्युष्टया वशकान्ताविल्यस्मात्परितः सर्वाङ्गे उष्टया कान्तया शोभितया वनमालया वक्षस्येकदेशे वर्तमाना श्रीः संस्पर्धमाना भवति तथाप्याम्नायमधुव्रतैर्बहुधा वर्णितया कीर्तिमय्या वैजयन्त्या वनमालयैव यो भवान् सुप्रणीतमर्हणामाददादित्यादि पूर्ववत् ॥ १२ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी ।

अनवद्यः शुद्ध इत्यत्र प्रकृत्यर्थभावार्थशृङ्खलाबन्धः । शुद्धिरिति । उपासना ख ब्रह्मोपासीतेत्यादि प्रतीकोपासना नतु भक्तिरुत्तरार्द्धे तदादेस्तस्या उत्कर्षविधमाणत्वात् सती चासौ श्रद्धा चेति तया निर्गुणा आभासोक्तशङ्कासमाधानाय भावार्थमाह । परमपावनायेति तथाच भक्तसुखार्थमेव तव लीलेति फलितं "मद्भक्तानां विनोदाय करोमि विविधाः क्रियाः" इति भगवदुक्तेरेवेति ॥ ९ ॥

पूर्वपद्येन सङ्गतिमाह । तदेवमिति । तेषु च भक्तेष्वेव मध्ये आत्मवद्भिः आत्मा त्वमेव नाथो येषां तथाच चिन्ताशून्यत्वाद्धीरैरिति व्याख्यातं वैकुण्ठप्राप्तये इति एवं चैश्वर्यैच्छुत्वाभावाद्दिदृक्षयैव वैकुण्ठप्राप्तिरभिप्रेतेति पूर्वतो वैशिष्ट्यम् ॥ १० ॥

याज्ञिकैः श्रीभरताद्यैरिति सिद्धपदप्रत्यासत्तेरध्याहृतं यस्यै देवतायै वां देवतामुद्दिश्य वषट् करिष्यन् वषडिति मन्त्रमुच्चारयन् इन्द्रादिरूपेणेति वह्न्यादिरूपतया ध्यातेन एवं च तेषां त्रयीतात्पर्यवेत्तृत्वं स्थितम् एतदज्ञातृत्वे प्रत्येव पृथक् तत्तद्देवता विधीयन्त इति भावः । आत्माधिकार इति । आत्मनः परमात्मनोऽधिकारः फलत्वेन स्फूर्तिर्यस्मिंस्तस्मिन् योगे चित्तस्यैकाग्र्यावस्थायां बहिर्वृत्तिनिरासात् कारणे लयो योगस्तस्मिन् योगिभिरपि चिन्त्यते परमभागवतैर्नित्यमुक्तैः ॥ ११ ॥

मुनिसात्वतादीनां षण्णामिति तत्र मुनयो मुमुक्षवः १ सात्वताः साधकभक्ताः २ धीरास्तत्राप्येकान्तिनः ७ याज्ञिकाः ४ योगिनः ५ परमभागवताश्चेति ६ ये षट् सेवकास्तेषां मध्ये वस निवास इति धातुः सेट् अत इडभावश्छान्दसः पर्युषितयेति तु साधुः यद्यपि स्पर्द्धते तथापि पूर्वार्थे अङ्घ्रिवर्णनस्य क्रमभङ्गो जातः पर्युष्टयेत्यार्षत्वकल्पनञ्चातो यद्वेति । द्वितीयेऽप्यर्थे आर्षत्वकल्पनं तदवस्थमेवेति यशसि श्रद्धावतां सप्तमाधिकारिणां मुन्यादिषड्भ्योऽपि श्रैष्ठ्यं वदन्तस्तद्यश एव मालारूपकत्वेन वर्णयन्ति । अथवेति ॥ १२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

यथा स्याच्छुद्धिरित्यन्वयः । कस्य चित् कचिदित्यर्थः ॥ ९ ॥

स्ववर्णाधिगमतुल्याय तपः आर्द्रहृदा भक्तिमता मनसा समविभूतये साम्यापत्तये सवनशः त्रिसन्ध्यं स्वरतिक्रमाय स्वर्गातिक्रमाय ॥ १० ॥

परीष्टः प्राप्तुमभिलषितः ॥ ११ ॥

पर्युष्टया यस्मिन्नङ्घ्रौ पर्युषितया वनमालया श्रीः संस्पर्द्धिनी मालायाः श्रियश्च त्वदङ्घ्रि सम्बन्धस्तुल्य इत्यर्थः यः अङ्घ्रिः॥१२॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

आस्तां त्वदुपासकानामनवद्यत्वावह इति यतस्त्वत्कथाश्रवणमात्रमेवानितरसाध्यां निरतिशयां शुद्धिमावहतीत्याहुः । शुद्धिरिति । हे ईड्य ! सत्त्वात्मनां सत्त्वप्रचुरमानसानाम् ऋष भनायक दुराशयानां दुष्टः दुष्टशब्दादिविषयप्रवण आशयोऽन्तःकरणं येषां तेषामत्यन्ताशुद्धियुक्तानामित्यर्थः तेषां नृणां विद्यादिभिर्न तथा शुद्धिर्भवेत् कथं यथा श्रवणेन सम्भृतया परिपुष्टया प्रवृद्धया तव यशसि विषये सच्छ्रद्धया स्यात् अध्ययनं पूर्वोत्तरभागद्वयात्मकवेदाध्ययनं श्रुतं तदर्थश्रवणं विद्या तज्जन्यज्ञानं तपोऽनशनादिरूपं कृच्छ्रचान्द्रायणादिरूपं वा क्रिया वर्णाश्रमानुगुणकर्मयोगः ॥ ९ ॥

यतस्त्वत्कथाश्रवणमेव निरतिशयशुद्ध्यावहं किमुत ध्यानार्चनादिविषयस्त्वदङ्घ्रिरित्यभिप्रायेण मुन्यादिभिर्ध्यातोऽर्चितश्च त्वदङ्घ्रिरस्मत्प्रणतिविषयोऽस्माकमशुभनिस्ताराय भवत्विति प्रार्थयन्ते स्यादिति । तवाङ्घ्रिर्नोऽस्माकम् अशुभाशयधूमकेतुः स्यात् अशुभाः आशयाः पापवासनाः तेषां धूमकेतुरिव धूमकेतुर्हि प्राणिनामशुभावहस्तेषां निरासकः स्यादिति यावत् तं विशिंषन्ति योऽङ्घ्रिः मुनिभिः क्षेमाय संसृतिनिस्ताररूपाय आर्द्रहृदा भक्तिमता मनसा ऊह्यमानः धार्यमाणः चिन्त्यमान इति यावत् यश्चात्मवद्भिः स्वात्मपरमात्मया-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

आत्मविद्भिः सात्वतैः पाञ्चरात्रैः समविभूतये समानैश्वर्याय स्वर्गलोकमतिक्रम्य नित्यविभूतिं गन्तुमित्यर्थः । व्यूहे वासुदेवादिव्यूहोपासने सवनशस्त्रिसन्ध्यं यश्चिन्त्यते इति अर्चितः ॥ १० ॥

किं च हे ईश ! प्रयता नियताः पाणयो येषां तैः केवलवैदिककर्मैकप्रवणपाणिभिरित्यर्थः । तैस्त्रय्या वेदविद्यया निरुक्तो यो विधिर्विधानं तेन हविश्चरुपुरोडाशादिकं गृहीत्वा ऽध्वराग्नौ आहवनीयादौ यश्चिन्त्यते इत्यनु षज्यते यश्च अध्यात्मयोगिभिरध्यात्मयोगे आत्मयाथात्म्यज्ञानयोगे चिन्त्यते इत्यनुषज्यते यश्चात्ममायां जिज्ञासुभिः सांख्यैरित्यर्थः तथा परमभागवतैः परमैकान्तिभिः प्रपत्तिनिष्ठैः परीष्टः इषुगतौ परितो ऽवाप्तः परिवृतः सेवित इति यावत् परीष्टः पर्याप्तः प्राप्तुमभिलषित इति वा वरिष्ठ इति पाठे वरिष्ठः श्रेष्ठोऽङ्घ्रिर्यः परमभागवतैश्चिन्त्यते इति सम्बन्धः यद्यपि निरीश्वरसांख्यानां न पुरुषातिरिक्तः परमात्मा विद्यते तथापि तेषां चिन्त्यस्य प्रकृतिवियुक्तात्मस्वरूपस्य परमात्मशेषतया तैरविज्ञातत्वेऽपि तस्य तदपृथक्सिद्धविशेषणत्वात्तच्चिन्तापर्यन्तपर्यवसितैव भवति तत्पर्यन्तज्ञानाभावाच्च न तेषां मुक्तिरपितु कैवल्यमेवेत्याभवायेत्यात्ममायां जिज्ञासुभिश्चिन्त्यत इत्युक्तम् ॥ ११ ॥

ननु यागादिषु बहुष्वपायेषु सत्स्वपि किमित्यङ्घ्रिमेव बहु मन्यध्वे इत्यत्र भोग्यतमत्वादित्यभिप्रेत्य प्रार्थयन्ते । पर्युष्टयेति । हे विभो ! भगवती श्रीर्लक्ष्मीर्वक्षःस्थितापीति शेषः तव यदङ्घ्रिमङ्घ्रौ पर्युष्टया पर्युषितया कर्त्र्या कः अङ्घ्रिपर्यन्तावधि चिन्त्येति विवक्षितोऽर्थः तथा वनमालया प्रतिपत्निवत् हृष्टभावः सपत्नीवत् संस्पर्द्धिनी स्पर्द्धावती बभूवेत्यर्थः । भवो वनमालायाश्च त्वदङ्घ्रौ सम्मर्दस्तुल्यः भोग्यतमत्वात्त्वदङ्घ्रिं सेवन्ते इति भावः तदेवाहुः यः अमुया श्रिया सुप्रणीतमानीय समर्पितमर्हणमाददानः स्वीकुर्वाणः सोऽङ्घ्रिः सदा नोऽस्माकमशुभाशयधूमकेतुः स्यात् अस्य पूर्ववदर्थः ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तव कीर्तिश्रवणपूर्णसच्छ्रद्धया संसारिणामपि सात्त्विकानां गुणनिमित्तपापादिलेपाभावेनात्यन्तिकी शुद्धिर्भवति किमुत तवेति भावेनाह । शुद्धिरिति हे ईड्य ! दुराशयानां नृणां तथा विद्यादिभिः शुद्धिर्न स्यात् यथा सत्त्वात्मनां पुंसां ते तव यशसि प्रवृद्धसच्छ्रद्धया शुद्धिः स्यादित्यन्वयः । अनेन त्रयोऽपि गुणा अशुद्धिहेतव उत नेति शङ्कापहस्तिता सत्त्वगुणस्य भगवत्कथारतिहेतुत्वाच्छुद्धिकरत्वेन ज्ञानजनकत्वेन मुक्तिहेतुत्वात् ॥ ९ ॥

अस्तु निरानन्दःसृष्ट्यादिफलता च ततः किमुस्माकमिति तत्राहुः । स्यान्न इति । यो मुनिभिः क्षेमाय आर्द्रहृदोह्यमानः यश्च सवनशः त्रिकाले आत्मविद्भिः स्वरूपविज्ञानादिभिः सात्त्विकैः पुरुषैः समविभूतिभिः समविक्रमैर्वासुदेवादिभिः व्यूहार्चितः तव सोऽङ्घ्रिरशुभाशयधूमकेतुः स्यादित्यन्वयः ॥ १० ॥

पुनरप्यङ्घ्रिं विशेषयन्ति । यश्चिन्त्यत इति । त्रय्या वेदत्रय्या निरुक्तविधिना स्वर्हविर्गृहीत्वा प्रयतपाणिभिर्याज्ञिकैः अध्वराग्नौ विचिन्त्यते "उताध्वर्योश्चकल्पयो"रित्यभिधानं यश्चाध्यात्मयोगे उत परमात्मध्यानेऽपि आत्ममायाजिज्ञासुभिः योगिभिः परमभागवतैः परीष्टः सम्यक् पूजितः ॥ ११ ॥

किञ्च यं श्रीर्भगवती पर्युष्टया वर्जितम्लानभावया निर्म्लानस्फुल्लवांसयुगे पतितया वनमालया सह प्रतिपक्षवत्संस्पर्द्धिनी सस्पर्द्धिनी स्पर्द्धावतीव तिष्ठतीत्यर्थः—

> अस्पर्शिनी स्पर्द्धिनीव श्रीराकेते वनमालया ।
> नहि स्पर्द्धा द्वयो दोषाः संविद्रूपां स्पृशन्ति ताम् ॥

इतिवचनात् यश्चामुया श्रिया सुप्रणीतमर्हणमर्चनमाददान आस्ते यद्वा भगवयिनो धर्मे प्रादानादिरवयवकस्य कथं युज्यत इत्यत्राह । स इति । यः प्रकाशरूपः पूर्वत्र वक्तव्यरूपः अत्र तु प्रकाशान्त इति अनेन लोकविलक्षणत्वेन ईश्वरस्यावयवस्य पादस्यापि यथाविधत् ज्ञातव्येयादानादिधर्मो युक्त इति ज्ञातव्यम् ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

विद्यादिसद्भावेऽपि दुराशयानामिति शुद्धभक्तिश्रद्धाया अभावात् विद्याद्यसद्भावेऽपि सत्त्वात्मनामिति तद्भावात् तदेवं श्रूयतामिति तथात्वे किमु पठ्यतामिति भक्तसुखार्थमेव त्वल्लीलेति भावः ॥ ९ ॥

मुनिभिरात्मारामैरपि क्षेमाय परमसुखाय सात्वतैर्भक्तैः आत्मा त्वमेव नाथत्वेन विद्यते येषां तादृशैः समानां स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिनां नारायणपरायणानां विभूतये परमसुखरूपायै स्वरतिक्रमाय इतरसुखभोगातिक्रमाय वार्चितः ॥ १० ॥

यश्चिन्त्यत इत्युत्तमाधिकारिपरम् अत एव त्रय्या निरुक्तविधिनेति अनीतात्पर्यमर्थवादितविधिनेत्यर्थः । एतद्ज्ञानिनः प्रत्येकवा सा देवता पृथग्विभाविता इति भावः । तथा च सर्वार्थदत्वेन चरणस्य चरणोपनिषदुदाहरिष्यते चरणं पवित्रमित्यादिका ॥ ११ ॥

तादृशस्यापि चरणस्य स्वेषु परमानुग्रहं दर्शयितुमाहुः । पर्युष्टयेत्यर्धेन तदेवं पर्युष्टापि अस्मादुःसहापि कथं सा न त्यज्यत इति पूर्वपक्षमुत्थाप्य तमेव सिद्धान्तेन दर्शयन्ति । स इत्यर्धेन योऽङ्घ्रिः नोऽस्मत्कर्तृकममुया वनमालया करणभूतया अर्हणं सुष्ठु प्रणययुक्तं यथा स्यात्तथा इदन्त स्वीकृतवानिति अनेन स्वैः कदाचिदुद्वासितामेव तदा श्रीभगवान् धृतवानिति ज्ञापितम् यद्यपि तस्या मालाया दिव्यत्वात् पर्युष्टत्वं न सम्भवति अस्पृश्या च तत्रेर्ष्याविष्टभूषणत्वाच्च सम्भवति तथापि सप्रश्नयविनोदोक्तिमात्रमिदम् ॥ १२—१५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अतो यथा त्वच्चरणमेव नमस्यं तथैव त्वद्यश एव भवाब्धिस्मरणादिविषयीकर्तव्यमित्याहुः । शुद्धिरिति । हे ईड्य नु भोः विद्यादिभिस्तथा शुद्धिर्न भवति यतस्ताभिरेव दुराशयानां विद्यादिभिः गर्वश्च दुष्ट एवाशयः प्रायः स्यादित्यर्थः सत्त्वात्मनां शुद्धसत्त्ववपुषा-

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

सत्त्वात्मनां मध्ये ऋषभ हे श्रेष्ठ ! ते तव यशसि श्रोतुं स्मर्तुं कीर्त्तयितुं च प्रवृद्धा सती श्रद्धा वा भक्त्या तथा यथा शुद्धिः स्यात् कीदृश्या श्रवणेन शास्त्रादिश्रवणेन सम्भृतया परिपुष्टया ॥ ९ ॥

तथैव त्वच्चरण एव श्रेयोऽस्मनीनश्च यः स चास्माभिरङ्ग इत्यत इदमाशास्महे त्याहुः । स्यादिति । अशुभाशयानां विषयवासनानां धूमकेतुरग्निः स्याद्भवतु प्रेमार्द्रहृदा ऊह्यमानः यश्च सात्वतैर्भक्तैः समविभूतये सार्ष्टिरूप्यसामीप्याय यद्वा समानां स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिनां नारायणपराणां या विभूतिः प्रेमसम्पत्तिस्तस्यै आत्मा त्वमेव नात्वत्पेण पर्य्युषितं येषां तैः स्वरतिक्रमाय स्वर्गादिलोकाधिकारात्ययाय चार्चितः यदुक्तं प्रह्लादेन "कामानां हृद्यसंरोहं भवतस्तु वृणे वर"मिति ॥ १० ॥

न केवलं सात्वतैरेव ध्यातिमः किन्तु कामिभिर्यागिनिभिरपीत्याहुः । य इति । प्रयतपाणिभिः संयतहस्तैः हविर्गृहीत्वा अध्वराग्नौ आहवनीयादौ याज्ञिकैर्यश्चिन्त्यते त्वदुक्तमाह वेभूतय एवेन्द्रादयो न ते स्वतन्त्रा इति भावयन इत्यर्थः । तत तथा अध्यात्मयोगे आत्माधिकारे योगे योगिभिरपि आत्ममायस्तव मायाविलयार्थं जिज्ञासुभिश्चिन्त्यते यास्तितीर्षितं भवति तत्तत्त्वं जिज्ञासवा वेति भावः । परमभागवतैस्तु परि सर्वतो भावेन निष्कामत्वेन इष्टः स तवाङ्घ्रिरस्माकमशुभाशयधूमकेतुः स्यादिति पूर्वेणान्वयः ॥ ११ ॥

वैकान्तिकभक्तावशोभिरेवाहितं पर्युषितमपि स्वर्गोत्कण्ठायाः सकाशाद्वन्दुरत्वं करोषीत्येवं तव भक्तवात्सल्यमित्याहुः । पर्युषयेति । इदमाश्चर्यम् अहं यत्र वसामि तत्रैव वसति पर्युषिताशेषं वसतीति प्रतिपत्तिवत् श्रीः सपत्नीभाना भवति तथापि तां सपत्नीमानां जिघ्रन्नादृत्य यो भवान् पर्युषितयापि अमुया भक्तैकान्तिकभक्तार्पितया तादृश्यं स्पृहणीयमिति बुद्ध्यैवाभिनयावया सुप्रणीतं सुष्ठु संपादितम् अर्हणां पूजामाददत् स्वीकृतवान् तस्य तवाङ्घ्रिः अत्र संस्पर्द्धिनीत्युत्प्रेक्षैव दृष्टान्तकृता नतु श्रियः कदाचित् कापि स्पर्द्धा इष्टा ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

स्वर्गादिसुखासक्तानामकृतार्थानां भगवद्भक्तोऽस्तु सत्त्वानां कृतार्थानां च कथयन्तो भगवतो विश्वतो मुमुक्षूपकारित्वमाहुः । शुद्धिरिति । हे ईड्य ! हे पुरुष हे ऋषभ ! हे सर्वश्रेष्ठ ! सत्त्वात्मनां सात्त्विकमनस्कानां मुमुक्षूणां ते यशसि श्रवणसम्भृतया भवद्गुणश्रवणेन परिपुष्टया इद्धतया अत एव महत्या सत्श्रद्धया शुद्धिः यथा स्यात् तथा दुराशयानां स्वर्गे अप्सरोभिर्विहरिष्याम एवं दुष्टः आशयो येषां तेषां तु शुद्धिर्विद्यादिभिर्न भवति तत्र विद्या कर्मविद्या श्रुतं कर्मपरत्वेन वेदार्थश्रवणम् अध्ययनं स्वरतो वर्णतो वेदाभ्यासः ॥ ९ ॥

मुमुक्षवो दुराशया अकृतार्थाः अतो दुराशयनिर्णाशको मुमुक्षुसेव्यस्तवाङ्घ्रिर्नो भवत्वित्याहुः । स्यादिति । नोऽस्माकमशुभाशयानां दुष्टानामाशयानां धूमकेतुस्तन्निर्मूलत्वहेतुः स्यात् योऽङ्घ्रिः क्षेमाय मोक्षाय मुनिभिर्मुमुक्षुभिः प्रेमार्द्रहृदा ऊह्यमानश्चिन्त्यमानः मुनीनां भवान्तरभेदानाहुः । यश्चाङ्घ्रिः कैश्चित्सात्वतैराराधनतन्त्रैर्मुमुक्षुभिः स्वरतिक्रमाय स्वर्गमतिक्रम्य परमधामप्राप्तये सालोक्यमुक्तये इत्यर्थः । कैश्चित्सात्वतैः समविभूतये समानैश्वर्याय आत्मवद्भिरिति विशेषणेन परमात्मसायुज्यमुक्तये च व्यूहे वासुदेवादिव्यूहे सप्तनक्षत्रिकाकालमर्चितः ॥ १० ॥

पुनरङ्घ्रिं विशिंषन्ति । य इति । प्रयताः पाणयो येषां तैर्याज्ञिकैः हविर्गृहीत्वा अध्वराग्नौ आहवनीयादौ यश्चिन्त्यते ननु "यस्यै देवतायै हविर्गृहीतं स्यात्तां ध्यायेद्वषट्करिष्य"न्निति श्रुतेः यस्या उद्देशेन हविर्गृह्यते सा चिन्त्यते अत आहुः । उरुमायिकत्विति । येऽत्र युक्तविधिमन्त्रादिरूपेण तत्सन्निधानाद्याश्रमत्वेन चिन्त्यत इत्यर्थः । अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव चेति भगवद्वचनात् तस्मात् एवं विकल्पयोरित्याभिमानात् तत अपि च अध्यात्मयोगे मनो ऽधिकृत्य वर्तमानानां चित्तवृत्तीनां निरोधे योगिभिः पातञ्जलैः मायां जिज्ञासुभिः प्रकृतितत्त्वभेदाय शास्त्रविज्ञुभिः साङ्ख्यैर्यश्चिन्त्यते अपि च यः परमभागवतैः भगवत इमे भागवताः ज्ञातत्त्वा भगवद्गुणाश्रितस्वरूपाभिज्ञाः तैस्तु यः परीष्टः सर्वतः पूजितः तस्य अङ्घ्रिः हे ईश ! नोऽशुभाशयधूमकेतुः स्यादिति पूर्वेणान्वयः ॥ ११ ॥

एवं मीमांसकैरिन्द्रादिदेवताद्वारेण पातञ्जलैश्चित्तवृत्तिनिरोधद्वारेण साङ्ख्यैः प्राकृततत्त्वसङ्कलनद्वारेण कथंचित्तवाङ्घ्रिश्चिन्त्यते न तु त्वां जानन्ति न च साक्षात्तवाङ्घ्रिं पूजयन्ति अतस्तव परमभागवता एव प्रिया इत्याहुः । पर्युष्टयेति । हे विभो ! यद्यपि सर्वेषु मन्त्रदेवताकर्मकर्त्रादिषु चित्तवृत्तिनिशमनपरेषु तत्त्वसङ्कलनपरेषु च किं बहुना सर्वेषु चेतनाचेतनेषु भवानेव विराजते "यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति । तस्याहं न प्रणश्यामि स च मे न प्रणश्यती"ति भगवद्वचनात् तथापि शास्त्राचार्योक्तप्रकारविशेषं विना यत्र तत्राराधनं तव नातिप्रियमिति सम्बोधनपदाभिप्रायः पर्युष्टया इदभावः छान्दसः पर्युषितया वनमालया परमभागवतैरर्पितयापि पर्यन्तावलम्बिन्या मम पदाङ्घ्रियुग्मे पर्युषितापीयं महतादरेण वसतीति प्रतिपत्तिवत् भार्यो हृद्यः इयं वक्षसि स्थिता भगवती श्रीः संस्पर्द्धिनी सम्यक् स्पर्द्धावती बभूव तथापि यत्तवाङ्घ्रिः अमुया वनमालया सुप्रणीतं सुष्ठु सम्पादितं यथा भवति तथा अर्हणां पूजाम् आददत् स्वीकृतवान् स तवाङ्घ्रिः नोऽशुभाशयधूमकेतुर्भूयात् धन्याः परमभागवतास्तदर्पका इति भावः ॥ १२ ॥

भाषा टीका ।

हे ईड्य ! स्तुति करने योग्य हे ऋषभ सत्पुरुषों में श्रेष्ठ परमेश्वर जिन पुरुषों का सकाम वासनावाला अन्तःकरण है तिन लोगों की विद्या उपासना वेदाध्ययन शास्त्र श्रवण तपः क्रिया आदिकों से वैसी शुद्धि नहीं होती है जैसी की सत्त्वगुणवाले मनुष्यों को आपके गुणानुवाद में श्रद्धा करने से कथा श्रवण करने से अर्जन करी हुई भक्ति से होती है ॥ ९ ॥

आप का चरण कमल हम लोगों के पापों को नाश

केतुस्त्रिविक्रमयुतस्त्रिपतत्पताको यस्ते भयाभयकरोऽसुरदेवचम्वोः ।
स्वर्गाय साधुषु खलेष्वितराय भूमन् ! पादः पुनातु भगवन् ! भजतामघं नः ॥ १३ ॥
नस्योतगाव इव यस्य वशे भवन्ति ब्रह्मादयस्तनुभृतो मिथुरर्द्यमानाः ।
कालस्य ते प्रकृतिपूरुषयोः परस्य शं नस्तनोतु चरणः पुरुषोत्तमस्य ॥ १४ ॥
अस्यासि हेतुरुदयस्थितिसंयमानामव्यक्तजीवमहतामपि कालमाहुः ।
सोऽयं त्रिणाभिरखिलापचये प्रवृत्तः कालो गभीररय उत्तमपूरुषस्त्वम् ॥ १५ ॥
त्वत्तः पुमान् समधिगम्य ययास्य वीर्यं धत्ते महान्तमिव गर्भममोघवीर्यः ।
सोऽयं तयाऽनुगत आत्मन आण्डकोशं हैमं ससर्ज बहिरावरणैरुपेतम् ॥ १६ ॥

भाषा टीका ।

करने को अग्नि के तुल्य होवै कैसा चरणारविन्द है जिसको कि प्रेम युक्त हृदय से मुनि जन धारण करते हैं और जिस चरणारविन्द को आपके भक्तजन सायुज्य मुक्ति पाने के लिये आत्मज्ञानी हो कर स्वर्ग को उल्लंघन कर के वैकुण्ठ लोक को जाने के वास्ते चतुर्व्यूह रूप से पूजन करते हैं ॥ १० ॥

हे ईश ! जिस चरण को याज्ञिक लोग यज्ञ की अग्नि के समीप हवि को ग्रहण कर के हाथ जोड कर वेदत्रय की कही विधि के अनुसार चिन्तन करते हैं और जिस चरण को योगिजन आत्म माया के जानने कि इच्छा से योग समाधि में चिंतन करते हैं और जिस चरण को सर्वोत्तम भागवत जन सर्वथा पूजते रहते हैं ॥ ११ ॥

हे विभो ! जिस आपकी वनमाला के हृदय में रहने से यह जूठी है ऐसा जानकर सौतिनसरीकी लक्ष्मी जी वैर करती हैं तौ भी भक्तों कि दिइ उस माला से आप सब के और हमारे पूजन को ग्रहण करते हौ तिन आप का चरण हम लोगों के पाप नाश को अग्नि के तुल्य हो जावै ॥ १२ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

त्वच्चरणस्य भक्तपक्षपातः प्रसिद्ध एवेति स्तुवन्तः प्रार्थयन्ते । केतुरिति । बलिबन्धेन त्रिभिर्विक्रमैर्युतः तत्र द्वितीयविक्रमे सत्यलोकं गतस्तव पादः केतुरत्युच्छ्रितो विजयध्वज इव तत्सम्पादयन्ति त्रिपतत्पताकः त्रिधा पतन्ती त्रिषु लोकेषु वा पतन्ती गङ्गा पताका यस्य तथा सुरदेवचम्वोस्तत्सेनयोरुभयोर्भयाभयकरः साधुषु सुरेषु स्वर्गाय खलेष्वसुरेष्वितरायेतरस्मै अधोगमनाय च एवं केतुरूपस्ते पादः स भजतां नोऽघं पुनातु शोधयतु अघादिति पाठे भजतां नः इति कर्मणि षष्ठ्यौ अघाद्गलतोऽस्मान्पुनात्विति तथा च श्रुतिः " चरणं पवित्रं विततं पुराणं येन पूतस्तरति दुष्कृतानि । तेन पवित्रेण शुद्धेन पूता अतिपाप्मानमरातिं तरेम । लोकस्य द्वारमर्चिष्मत्पवित्रं ज्योतिष्मद्भ्राजमानं महस्वत् । अमृतस्य धारा बहुधा दोहमानम् चरणं नो लोके सुधितां दधात्विति" ॥ १३ ॥

ननु युद्धे देवासुरादयः परस्परं जयन्ति जीयन्ते च किमहन्तत्रेत्यत आहुः । नसीति । मिथुर्मिथोऽर्द्यमाना युद्धादिभिः पीड्यमाना ब्रह्मादयोऽपि यस्य तव वशे भवन्ति न तु जये पराजये वा स्वतन्त्राः के इव नसि नासिकामाविध्य बद्धा गावो बलीवर्दा इव कुतः कालस्य कलयितुः प्रवर्तकस्य तदेव कुतः प्रकृतिपुरुषयोरपि परस्य तस्य ते पुरुषोत्तमस्य पादो नः शं तनोतु ॥ १४ ॥

प्रकृतिपुरुषाभ्यां परत्वमुपपादयन्तः कालत्वेन पुरुषोत्तमत्वमाहुः । अस्येति । अस्य जगत उदयादीनां हेतुरसि कुतः अव्यक्तं प्रकृतिर्जीवः पुरुषो महान्महत्तत्त्वं तेषां कालं नियन्तारं त्वामाहुः "अक्षरात्परतः परः महतः परमव्यक्तमव्यक्तात्पुरुषः परः पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गति"रित्याद्याः श्रुतयः किञ्च अयं संवत्सरात्मको यः कालस्त्रिणाभिस्त्रीणि चातुर्मास्यानि नाभयो यस्य सोऽपि त्वमेव अतस्त्वमुत्तमपुरुष इति तथा च गीतासु " यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः । अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः " इति ॥ १५ ॥

त्वमेव प्रकृत्यादिद्वारा जगत्सृष्ट्यादिहेतुरित्युक्तं तत्केन प्रकारेण तदाहुः । त्वत्त इति । त्वत्तः पुरुषो वीर्यं शक्तिं समधिगम्य प्राप्य यया मायया सह महान्तं धत्ते कमिव अस्य विश्वस्य गर्भमिव सोऽयं महान् तयैव माययाऽनुगतः सन्नात्मनः सकाशादाण्डकोशं ससर्ज त्वयाऽनुगत इति पाठेऽपि तया मायया त्वयाऽधिष्ठितः सन्निति ॥ १६ ॥

———

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

तत् ध्वजत्वं सम्पादयन्ति त्रिषु लोकेष्विति तत्र दिवि मन्दाकिनी पाताले भोगवती भुवि तु गङ्गेति ज्ञेयं चरणमिति पवित्रं शुद्धं विततं व्यापकं पुराणम् अनादि नित्यनूतनं वा येन पूतः पवित्रीकृतः तेन पवित्रेण पापपर्वतात्त्रायकेण शुद्धेन स्वयञ्च पवित्रेण अरातिं संसारलक्षणं लोकस्य वैकुण्ठस्य सोपानवा

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी ।

द्वारं प्रापकम् अङ्घ्रिष्मतः पवित्रादङ्घ्रेरपि पवित्रं ज्योतिष्मत् सूर्यादिष्वपि भ्राजमानं महस्वत् स्वस्मै स्वयं प्रकाशम् अमृतस्य प्रेमानन्दस्य धाराः प्रवाहान् बहुधा वैचित्र्येण पूरयत् चरणं लोके स्वभक्तजने सुधितां सुधिततां सुधावदाहरणीयतां दधातु ॥ १३ ॥

तत्र देवासुरादीनां परस्परजयपराजययोः अहं किं करोमीति शेषः । तदेव कालत्वमेव परस्य कारणस्य ॥ १४ ॥

प्रकृतिपुरुषाभ्यां प्रधानजीवाभ्यां परत्वम् उपपादयन्तः युक्त्या प्रतिपादयन्तः अनुमानार्थापत्त्यन्यतरत्वं हि युक्तिरत्र हि प्रकृत्यादिनियन्तृत्वान्यथानुपपत्त्या तत्परत्वं सिद्धं प्रकृतेः परतोऽक्षराज्जीवात् परं इति जीवपरत्वं महतस्त्वात् परमव्यक्तं प्रधानं प्रधानात् परस्तत्प्रवर्त्तकः पुरुषः परमेश्वरात् परं किञ्चिदन्यन्नास्ति सा पुरुषरूपा अत्र तच्छब्दस्य विधेयधीहेतुत्वात् स्त्रीत्वं स हि पुरुषः परमोऽवधिरित्यर्थः । परा गतिः परमपुरुषार्थ इति श्रुतिपदार्थः अतः कालत्वात् गीतावाक्ये क्षरं प्रधानादिवर्गम् अक्षराज्जीवात् ॥ १५ ॥

तत् संहारकहेतुत्वं यया मायया सह वर्त्तमानं मायायामित्यर्थः । अनुगतः व्याप्तः सन् आत्मनः स्वस्मात् सकाशात् हैमं प्रकाशबहुलं पाठान्तरे तया माययैव त्वयाधिष्ठितः नतु शुद्धस्वरूपेणान्यथा विकारप्रसङ्गः स्यादिति ॥ १६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

त्रिपतत्पताकः त्रिधा पतद्गङ्गाप्रवाहपताक इतराय नरकाय ॥ १३ ॥

कालस्य कालशरीरकस्य ॥ १४ ॥

अस्यासीति । उदयादिहेतुरसि एवंभूतं त्वां कालमाहुः । कालविशिष्टरूपेण सृष्ट्यादिहेतुरसीत्यर्थः । त्रिनाभिः समन्यूनाधिकाहोरात्रनाभिः अपचये क्षये ॥ १५ ॥

त्वत्त इति । अमोघवीर्यः कालः त्वत्तः पुमांसं वीर्यमाधिगत्य लब्ध्वा प्रकृतौ गर्भं धत्ते आधत्त इत्यर्थः । सोऽयं कालः ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

निरतिशयशुद्धयावहत्वाद्भक्तपक्षपातित्वाच्चाङ्घ्रिमेव बहु मन्यामहे इत्यभिप्रेत्य प्रार्थयन्ते । केतुरिति । योऽङ्घ्रिः त्रिभिर्बलिबन्धनैर्विक्रमैः त्रिलोकसङ्ग्राहकैः न्यासैर्युक्तः तत्र द्वितीयविक्रमे सत्यलोकं गतस्तव पादः केतुरुच्छ्रितो विजयध्वज इव तत्सम्पादयन्ति त्रिपतत्पताकः त्रिधा पतन्ती त्रिषु लोकेषु वा पतन्ती गङ्गा पताका यस्य सः अनेन निरतिशयशुद्ध्यावहत्वं सूचितं गङ्गा हि जगत्पावनी तस्यास्तत्प्रभवत्वात् असुरदेवचम्वोः तत्सेनयोः भयाभयकरः अनेन भक्तपक्षपातित्वं सूचितं किं च यः साधुषु स्वर्गाय सुखायासाधुषु इतराय दुःखाय च भवति स तव पादोऽङ्घ्रिः हे भूमन् ! हे भगवन् ! भजतां नोऽस्माकमघं पुनातु शोधयतु असुरदेवचम्वोर्भयाभयकर इत्यनेन तयोर्भगवदङ्घ्रिसंचारतद्भावाभ्यां जयपराजयोक्त्या तद्वश्यता सूचिता ॥ १३ ॥

तामेवाविष्कुर्वन्तः प्रार्थयन्ते । नसीति । नसि नासिकायां ओता नासामाविद्ध्य बद्धाः बलीवर्दा इव ब्रह्मादयः तनुभृतो देहिनः मिथुर्मिथः युद्धादिभिः अर्द्यमानाः पीड्यमानाः प्रक्लिश्यमानाः सन्तो यस्य तव वशे भवन्ति वश्या भवन्तीत्यर्थः । ब्रह्मादय इति परोक्षनिर्देशः कल्पान्तरीयब्रह्मादीनामपि तद्वश्यताभिप्रायकः तत्र हेतुत्वेन तं विशिंषन्ति कालस्य कालशरीरकस्य ब्रह्मादीनपि स्ववशी कुर्वतः कालस्यापि नियन्तुः तत्र हेतुः प्रकृतिपुरुषयोः परस्य विलक्षणस्येश्वरस्यैवम्भूतस्यात एव पुरुषोत्तमस्य तथाचोक्तं भगवतैव "यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः । अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तम" इति तव चरणोऽङ्घ्रिर्नोऽस्माकं शं सुखं तनोतु ॥ १४ ॥

प्रकृतिपुरुषयोः परस्य पुरुषोत्तमस्येत्यनेन ताभ्यां परत्वमेव पुरुषोत्तमत्वमिति सूचितम् तदेवोपपादयन्ति । अस्यासीति । अस्य स्थूलचिदचिदात्मकस्य जगतः उदयस्थितिसंयमानामुत्पत्तिस्थितिलयानां हेतुरसि अनेन पुरुषोत्तमशब्दसमानविषयपरमात्मशब्दप्रवृत्तिनिमित्तं सूचितं तथाहि उदयहेतुरित्यनेन जगतस्तत्कार्यत्वं फलितम् अत एव कार्यानुप्रवेशोऽपि "तत्सृष्ट्वा तदेवानुप्राविश"दिति श्रुतेः स्थितिहेतुरित्यनेनान्तः प्रविश्य प्रशासनेन भर्तृत्वं व्याप्यगतदोषास्पर्शश्चेत्युभयं फलितम् एतदेव हि परमात्मशब्दस्य प्रवृत्तिनिमित्तं यत्सर्वकार्यव्यापनभरणमिति तेनैव नियमनस्वाम्यादिकं तथा च गीतं भगवता "यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः" इति परमात्मविषय एव पुरुषोत्तमशब्द इति तेनैव गीतम् "उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृत" इति तदेवं परमात्मपुरुषोत्तमशब्दयोः समानविषयत्वं फलितं तत्र पुरुषोत्तमशब्दे "प्रशंसावचनैश्च" इति समासमभिप्रेत्य तत्समानार्थकविशेषणसमासविषयत्वमाहुः । उत्तमपूरुषस्त्वमिति । तत्रोत्तमत्वस्यावधिसापेक्षत्वात्तमाहुः । अव्यक्तेति । अव्यक्तजीवमहतामुत्तमपूरुष इति सम्बन्धः "यस्मात् क्षरमतीतोऽह"मिति गीतावचनानुगुण्यादौचित्याच्च अत्राव्यक्ताद्यवधिसापेक्षस्याप्युत्तमशब्दस्य "सम्बन्धिशब्दः सापेक्षो नित्यं सर्वः समस्यत" इतिन्यायेन नित्यसापेक्षत्वात्समासः यद्यप्यव्यक्तजीवमहद्भ्य इति पञ्चमीनिर्देश उचितः तथापि पुरुषोत्तमशब्दे नीचोत्तमभावसम्बन्धावलम्बिन्याः शेषषष्ठ्या अपि समासः साधुरिति ज्ञापनाय षष्ठीनिर्देशः तत्राव्यक्तशब्देन प्रकृतिस्तत्संसृष्टश्चेतनश्च विवक्षितः जीवशब्देन मुक्तो नित्यश्च महच्छब्देन महदादिप्रकृतिकार्यं कृत्स्नं विवक्षितं पुरुषोत्तमशब्देन "यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तम" इति गीतावचनात् पञ्चमीनिर्देशगर्भात्पञ्चमीसमासोऽप्यवगम्यते न च तद्विधायकाभावः तात्परस्तपर इत्यनेन पञ्चमी भयेनेत्यत्र पञ्चमीतियोगविभागादेव तदुपपत्तेः अत्र पञ्चमीषष्ठीसमासयोः पुरुषशब्दोऽबद्धमुक्तोभयावस्थजीवमात्रपर इति संयमहेतुरित्युक्तं संहारहेतुत्वमुपपादयन्ति । कालमिति । कालशरीरकमाहुः कालशरीरकत्वेन संहारहेतुत्वमाहुरित्यर्थः । कोऽसौ काल इत्यतस्तत्स्वरूपमाहुः । यः त्रिणाभिः समन्यूनाधिकाहोरात्रनाभिः त्रीणि चातुर्मास्यानि नाभयो यस्येति वा स सम्वत्सरात्मकः अखिलस्य जगतोऽपचये अपक्षये प्रवृत्तो गभीरवेगः सोऽयं काल उत्तमपूरुषस्त्वमित्याहुरिति सम्बन्धः । अत्र श्रुतयः स्मृतयश्चेति कर्तृपदाध्याहारः "परंज्योति-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

रूपमभिसम्पद्य स्वेन रूपेणाभिनिष्पद्यते स तत्र पर्येति स उत्तमः पुरुष” इत्यादिकाः श्रुतयः “अंशावतारं पुरुषोत्तमस्य ह्यनादिमध्यान्तमजस्य विष्णो”रित्यादिकाः स्मृतयः अनेन “अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तम” इत्यस्यार्थ उक्तः अत्र च भगवद्गीताभाष्ये वेदार्थावलोकनादवलोकयते इति लोक इति स्मृतिरिहोच्यत इति भाषितम् कालमाहुरित्यादिना गभीररयं इत्यन्तेन संयमहेतुत्वमुपपादितम् ॥ १५ ॥

अथ सृष्टिहेतुत्वमुपपादयन्ति । त्वत्त इति । पुमाननिरुद्धाख्यः सः जगद्व्यापारेऽधिकृतः अमोघवीर्यः अमोघमप्रतिहतं सङ्कल्पमात्रेण सृष्ट्यावहं वीर्यं सृष्ट्युपयुक्तविविधविचित्रशक्त्यात्मकं यस्य सः त्वत्तः सर्वव्यूहमूलभूतात्समधिकृत्य तावदधिभूय अस्येति तादर्थ्यस्य शेषत्वाविवक्षया षष्ठी परिदृश्यमानजगत्सृष्ट्यर्थमित्यर्थः । यथा प्रकृत्या महान्तस्महत्तत्त्वाख्यं वीर्यं धत्ते आधत्ते कमिव गर्भमिव पुरुषो योषिति गर्भमिव प्रकृतौ महत्तत्त्वमुत्पादयामासेत्यर्थः । प्रकृतावाहितायाः परिणामसामर्थ्यरूपायाः शक्तेः कार्यरूपत्वान्महत्तत्त्वस्य वीर्यत्वव्यपदेशः सोऽयं महान् तया प्रकृत्या ऽनुगतः कारणतया ऽनुगतः कारणभूतप्रकृतिवद्गुणत्रयुक्त इत्यर्थः । आत्मनः सकाशादण्डकोशं ससर्ज अहङ्कारतन्मात्रमहाभूतेन्द्रियद्वारा सृष्टवानित्यर्थः । कथम्भूतं हैमम् आवरणैः पृथिव्यादिभिः सप्तभिर्बहिरावृतम् । अत्र सोऽयमित्यनेन भगवदात्मको महान् विवक्षितः । अण्डकोशशब्दस्तदन्तर्वर्तिब्रह्मादिस्तम्बपर्यन्तवस्तूनामप्युपलक्षणार्थो ज्ञेयः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हे भगवन् ! भूम्नः ते पादो नोऽस्माकं जगतां चाघं पुनातु बलिविक्रमस्ततः त्रयो विक्रमा एव प्रशस्तकर्माणि यस्य तथा तस्य प्रशस्ते कर्मणि तथेत्यादि तस्य तव केतुर्ध्वजस्त्रयो वेदा एव पतत्स्यदवलन्त्यः पताका यस्य स तथा यक्षासुरदेवचम्वोः भयाभयकरः किंच यः साधुषु स्वर्गाय सुखाय खलेष्वितराय दुःखाय भवतीति ॥ १३ ॥

सुखदुःखयोः कारणत्वेन हरेः पादस्य स्वातन्त्र्यं प्रत्यक्षगिनिभावेनाह । नस्योतगाव इति । सुखदुःखयोर्नियन्तार इन्द्रियाभिमानिनो देवाश्च यस्य पादस्य वशे वर्तन्ते नासि नासिकायाम् ओता गावः स्वामिन इव ; यश्च तनुभृतां शरीरिणां आयुषि शतवर्षलक्षणे रज्यमानः * संवर्द्धमानः तावत्कालं स्थित्वान्ते अहञ्च दुःखहामिति अभिमानशून्यश्चेति तनुभृदायुषि रज्यमानस्य पुरुषोत्तमस्य ते चरणो नः शं तनोत्वित्यन्वयः ब्रह्मणा संपरित्यक्तो मृत इत्युच्यते नर इत्यनेन श्रीहरिसंबन्धो देहिनां विज्ञायते तदभिमानशून्यत्वे हेतुमाह । प्रकृतीति । अत्रापि हेतुमाह । कालस्येति । कालप्रेरकस्य तस्य सकाशात् परस्य वा ॥ १४ ॥

सृष्ट्यादिगुणपूर्णत्वाच्च काल इत्याशयेनाह । अस्य जगतः उदयादीनां हेतुरसि “प्रधानादिदमुत्पन्न”मिति श्रुतेः प्रकृत्यादीनां जगद्धेतुत्वादिदं कथमत्राह । अव्यक्तादीनां हेतुरसि अतः कालः कालनिर्मातृत्वाच्च काल इत्याह । कालमात्र इति“सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधी”ति श्रुतेः हरेर्विधान्तरेण कालशब्दवाच्यत्वमाह । त्रिणाभिरिति । तिस्रश्चातुर्मास्यलक्षणा नाभयो यस्य स तथा गभीररयः अतर्कितापारवेगः सोऽयं कालस्त्वं त्वमिति क इति तत्राह । उत्तमेति । पुरुषोत्तमशब्दवाच्यः संहारकर्तृत्वं विशिनष्टि । अखिलेति । अधुना यादवाद्यखिलजगन्निरासे प्रवृत्तः यद्वा पुरुषोत्तमत्वं विवृणोति । अस्येति । अनेन कथं तद्विवृतमभूदित्यत उक्तमव्यक्तेति कालस्वरूपाज्ञाने अस्याप्युत्पत्तिसमयः इति निश्चयो न स्यादत्रोक्तं कालेति कालस्वरूपज्ञाता तन्निर्माता वा कीदृशः कालः येन तद्विशेषज्ञानी स्यादत्राह । सोऽयमिति । हरिः यं कालं विशेषतो जानाति सोऽयं काल एवं विशिष्ट इत्यन्वयः । कथमत्राह । त्रिणाभिरिति । अखिलस्य समस्तप्रपञ्चस्यापचये संहारे च प्रवृत्तः अनेन सृष्ट्यादिविशेषविशिष्टं कालं जानातीत्युक्तं भवति अतश्च किमवसितमत्राह । उत्तमेति। एवंविधात्कालादप्युत्तमस्त्वमित्यर्थः । अनेन प्रकृतिपुरुषकालमहत्तत्त्वेभ्य उत्तमत्वात्पुरुषोत्तम इत्युक्तं भवति । तदुक्तं “कालाज्जीवात्तथाव्यक्तान्महतश्चोत्तमो यतः । उत्तमः पुरुषस्तस्माद्भगवान्विष्णुरुच्यत” इतिः ॥ १५ ॥

व्यक्तं सृजस्यस्यासि हेतुरिति श्लोकद्वयेन कथितं सर्जनं त्वत्त इति विवृणोति । त्वत्त इति । त्वत्तो ब्रह्माण्डं जगदुत्पद्यत इति यदुक्तं तत्प्रधानमधिकृत्य प्रधानादिशब्दवाच्यान् रमादीनाधिकरणं कृत्वा वर्तते तथाहि महाप्रलये लक्ष्म्या सह रममाणान्नारायणाख्यात्त्वत्तोऽवतीर्णः पुमान् पुरुषनामामोघवीर्यो भवान् प्रधानाभिमानित्वात्तन्नाम्न्यां रमायां महान्तमिव स्थितं स्ववीर्यं गर्भं धत्ते पुरुषनामानं चतुर्मुखं प्रधानाख्यं गायत्रीं च सृष्टवानित्येकोऽर्थः स पुमांश्चतुर्मुखो महान्तमिव गर्भं महत्तत्त्वाभिधमात्मानं श्रद्धाभिधां गायत्रीं च प्रधाननाम्न्यां गायत्र्यां धत्ते सृष्टवानित्यपरः ताभ्यां महत्तत्त्वाख्यश्रद्धाख्याभ्यां शेषोऽहङ्कारापरनामा जातः इत्यन्योऽर्थः“नारायणाख्यः परमः शेते लक्ष्म्यान्वितो लये । स एव पुरुषाख्यं तु द्वितीयं रूपमात्मनः । कृत्वा रमायां पुरुषनामानं तु चतुर्मुखम् । प्रधानाख्यां च गायत्रीं ससर्ज पुरुषात्मकः । चतुर्मुखः स पुरुषो महत्तत्त्वाभिधं पुनः । प्रधाननाम्न्यां गायत्र्यां ससर्जात्मानमेव तु । श्रद्धाभिधां च गायत्रीं ताभ्यां शेषोऽन्वजायत” इत्यादिवाक्यात् सकृदुक्तवाक्यस्यान्वयभेदो युज्यते सोऽयं महत्तत्त्वाख्यो ब्रह्मा यो नारायणादभिव्यक्तः पुरुषनामा तेन त्वयानुगतः प्रविष्टः श्रद्धाख्यगायत्रीं सृष्ट्वाहङ्कारादितत्त्वैः सहात्मनः परमात्मनः प्रवेशादुत्पादनसमर्थैर्बहिर्नवभिरावरणैरुपेतं हैममाण्डकोशं ससर्जेत्यन्वयः । ब्रह्मणः आण्डकोशसृष्टयङ्गीकारे व्यक्तं सृजसीत्यस्य विरोधनिरासार्थं त्वयानुगत इत्युक्तम् ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

जीवात् पुरुषादुत्तमत्वेन पुरुषोत्तमत्वं व्यज्य प्रकृतिद्रष्टृत्वोऽप्युत्तमत्वेन व्यञ्जयति । त्वत्त इति । ययेति यस्यां मायायामित्यर्थः । अन्यत्तैः ॥ १६ ॥

---

* रज्यमान अ इति स्थिते अकः सवर्णे दीर्घे सोमपा इतिवत् रज्यमान इति अकारान्तपुल्लिङ्गशब्दोऽयम् अत्र विशेषस्तात्पर्यदीपिकातोऽवगन्तव्यः ।

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

स च तवाङ्घ्रिः प्रायः सर्वलोकानुभवप्रसिद्ध एवेत्याहुः। केतुरत्युच्छ्रितो विजयध्वज इव तव पादः पुनातु त्रिविक्रमेऽवतारे युतः महाविभूतियुक्त इत्यर्थः। त्रिधा पतन्ती त्रिषु लोकेषु वा पतन्ती गङ्गैव पताका यस्य सः असुरदेवचम्वोस्तत्सेनयोरुभयोर्भयाभयकरः साधुषु सुरेषु स्वर्गाय खलेष्वसुरेष्वितराय अधोगमनाय एवंभूतस्ते पादः भजतां नोऽघं पुनातु शोधयतु अघादिति पाठे षष्ठी आर्षी अघाद्भजतोऽस्मान् पुनातु तथा च श्रुतिः "चरणं पवित्रं विततं पुराणं येन पूतस्तरति दुष्कृतानि" इति ॥१३॥

ननु यूयं ब्रह्मादय ईश्वरलोकैर्भजनीया भूत्वापि किमिति मां भजध्वे तत्राहुः। नसि नासिकायामोता प्रविद्धा बद्धा बलीवर्दा इव यस्य तव वशे भवन्ति। मिथुर्मिथो मत्सरादिदोषैः पीड्यमाना इत्यनैश्वर्यमुक्तम् यतः कालस्य तेषां कलयितुर्नियन्तुः नच तथा तव कोऽपि नियन्तेत्याहुः। प्रकृतिपुरुषयोरपि परस्य श्रेष्ठस्य ॥ १४ ॥

उक्तमेव पुरुषोत्तमत्वमुपपादयन्ति। अस्य जगत उद्भवादीनां हेतुरसि तथा अव्यक्तं मायाकारणोपाधिः जीव उपहितः महान् महत्तत्त्वादिः कार्योपाधिः तेषामपि कालं कलयितारं नियन्तारमाहुः। तथा अयं संवत्सरात्मको यः कालस्त्रिणाभिः त्रीणि चातुर्मास्यानि नाभयो यस्य स तव गभीररयः गम्भीरो वेगश्चेष्टा यस्य अतः कार्यकारणातीतत्वात् जीवादुत्तमत्वाच्च त्वमेवोत्तमः पुरुषः यदुक्तं गीतासु "यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः। अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तम" इति ॥ १५ ॥

जीवात् पुरुषादुत्तमत्वमुक्त्वा प्रकृतिद्रष्टुः पुरुषादप्युत्तमत्वमभिव्यञ्जयन्ति। त्वत्तः सकाशात् पुमान् आदिपुरुषः समधिगम्य शक्तिं प्राप्य यया मायया द्वारा वीर्यं वीर्यरूपे महान्तं धत्ते कमिव अस्य विश्वस्य गर्भमिव सोऽयं महान् तयैव मायया अनुगतः सन् आत्मनः सकाशादण्डकोशं ससर्ज ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

तवाङ्घ्रेः सत्पक्षपातित्वं प्रसिद्धमेवेति स्तुवन्तः स नो मोक्षप्रतिबन्धकपापनिवृत्तये भवत्विति प्रार्थयन्ते। हे भगवन् स्वाभाविकषडैश्वर्यसम्पन्न! हे भूमन् अनन्तानन्दस्वरूप! ते पादः भजतां सेवकानां नोऽघं पुनातु शोधयतु कीदृशः यो वामनावतारे त्रिविक्रमयुतः त्रिभिर्विक्रमैः त्रिलोकसंग्राहकैः पादन्यासैर्युतः तत्र द्वितीये विक्रमे सत्यलोकं गतो यः केतुः महाध्वज इव त्रिपतत्पताकः त्रिषु लोकेषु पतन्ती विष्णुपदी पताका यस्य सः असुरदेवचम्वोः क्रमाद्भयाभयकरः साधुषु विहितकारिषु स्वर्गाय खलेषु निषिद्धकारिषु इतराय नरकाय च भवति एवम्भूतः अत्र श्रुतिरप्यनुसन्धेया "चरणं पवित्रं विततं पुराणं येन पूतस्तरति दुष्कृतानीतेन पवित्रेण शुद्धेन पूता अतिपाप्मानमरातिं तरेम। लोकस्य द्वारमर्चिष्मत्पवित्रं ज्योतिष्मद्भ्राजमानं महस्वत्। अमृतस्य धारा बहुधा दोहमानं चरणं नो लोके सुधितां दधातु" इति ॥ १३ ॥

भगवदङ्घ्रेः मोक्षप्रतिबन्धकाघनिवर्तकत्वं प्रतिपाद्येदानीं सर्वे ब्रह्मादयस्तदधीनास्त्वं च सर्वप्रवर्तक इति स्तुवन्तस्तवाङ्घ्रिर्नो मुक्तिं दद्यादिति प्रार्थयन्ते। नसीति। मिथुर्मिथः अर्द्यमानाः पीड्यमानाः ब्रह्मादयो यं यस्य प्रकृतिपुरुषयोः प्रधानक्षेत्रज्ञयोः परस्योत्कृष्टस्य स्वामिनः "प्रधानक्षेत्रज्ञपति"रिति श्रुतेः अत एव पुरुषोत्तमस्य अचेतनाच्चेतनाच्च स्वरूपेण भिन्नस्य "यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः। अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तम" इति श्रीमुखोक्तेः अत एव कालस्य चेतनाचेतनयोः कलयितुः प्रवर्तकस्य "मत्तः सर्वं प्रवर्तते" इति स्मृतेश्च यस्य वशे भवन्ति तत्र दृष्टान्तमाहुः। नस्योतगाव इवेति। नसि नासिकायां कृतच्छिद्रायां प्रोताः नद्धा गावो बलीवर्दा इव तस्य ते चरणः नो मुक्तिलक्षणं सुखं तनोतु विस्तारयतु ॥ १४ ॥

ननु मम सर्वप्रवर्तकत्वं भवतां ब्रह्मादीनां मम वशवर्तित्वं च कथं घटेतेत्यत्राहुः। अस्येति। अस्य चिदचिदात्मकस्य जगतः उद्भवादीनां त्वं हेतुरसि निमित्तोपादानरूपं कारणमसि सर्वस्य चिदचिदात्मकस्य जगतः कार्यत्वात्त्वद्वशवर्तित्वं भवतस्तु निमित्तकारणत्वेनोपादानकारणत्वेन च सर्वप्रवर्तकत्वमित्यर्थः। तथापि उत्तमपुरुषश्चिदचिद्विलक्षणस्वरूपेण विकारादिदोषवर्जितः ननु "प्रधानादिदमुत्पन्न"मिति श्रुतेः प्रधानस्य "जीवाद्भवन्ति भूतानि जीवे तिष्ठन्त्यचञ्चलाः। जीवे प्रलयमृच्छन्ति न जीवात्कारणं पर"मिति श्रुतेर्जीवस्य "हिरण्यगर्भः समवर्तताग्रे आदिकर्ता स भूताना"मित्यादिश्रुतेश्चतुर्मुखस्य कालं तथान्ये इति श्रुतेः "कालो भवाय भूतानामभवाय च पाण्डव! कालमूलमिदं ज्ञात्वा भव स्थैर्यपरोऽर्जुन" इति विष्णुपुराणोक्तेश्च कालस्य च जगत्कारणत्वमस्ति कथं मम जगत्कारणत्वमत आहुः। अव्यक्तस्य "मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वर"मिति श्रुतेः शक्तिभूतप्रधानस्य जीवस्य "एष परस्यांश" इति श्रुतेः अंशभूतस्य क्षेत्रज्ञस्य महतः क्षेत्रज्ञविशेषस्य "यो वै वेदांश्च प्रहिणोति तस्मै" इत्यादिश्रुतेः भगवदनुग्रहेणैव प्राप्तैश्वर्यस्य यो गभीररयो दुरूहवेगः त्रिणाभिः तिस्रश्चातुर्मास्यलक्षणा नाभयो यस्य सोऽयं कालः अखिलस्य जगतः अपचये संहारे प्रवृत्तः तस्य चांशभूतस्य त्वां कालं कलयितारं प्रवर्तकं "सर्वस्य वशी सर्वस्येशानः प्रधानक्षेत्रज्ञपतिः यो ब्रह्माणं विदधाति पूर्वं सः कालकालो गुणी सर्वविद्यः" इत्यादिश्रुतयः आहुः। प्रधानादीनां भगवच्छक्तीनामणूनामभिशक्तिवत् पृथग्जगद्धेतुत्वाभावाद्भगवत्येव श्रुतीनां समन्वयः तथाहि प्रधानशक्तियुक्तान्महदादिद्वारा इदमुत्पन्नम् जीवयतीति जीवो भगवांस्तस्माद्भूतानि भवन्ति हिरण्यं गर्भे यस्य स तथा भगवान् कालशक्त्या कलयतीति कालः भगवान् कालमित्यादि श्रुतिस्मृत्योर्विषयः विस्तरस्तु प्राचां ग्रन्थेषु द्रष्टव्यः ॥ १५ ॥

जीवप्रधानादिचिदचिच्छक्तिधरः जगतःस्थित्युद्भवादिहेतुस्त्वमसीत्युक्तं तत्रोभयहेतुत्वमुपपादयन्ति। त्वत्त इति। त्वत्तः अमोघवीर्यः अप्रतिहतप्रभावः पुरुषः पुरुषावतारो वीर्यशक्तिं समधिगत्य प्राप्य अस्य जगतः सृष्ट्यर्थमिति शेषः। महान्तं महत्तत्त्वाभिधं गर्भमिव यया प्रकृत्या धत्ते तया शक्तिमत्त्वेनानुगतः अनुसृतः सोऽयं पुरुषः बहिः सप्तभिरावरणैरुपेतं हैमं प्रकाशबहुलमाण्डकोशं विराडभिधमात्मनः शरीरमिति शेषः ससर्जेत्यन्वयः ॥ १६ ॥

तत्तस्थुषश्च जगतश्च भवानधीशो यन्माययोत्थगुणविक्रिययोपनीतान् ।
अर्थान् जुषन्नपि हृषीकपते ! न लिप्तो येऽन्ये स्वतः परिहृतादपि बिभ्यति स्म ॥ १७ ॥
स्मायावलोकलवदर्शितभावहारिभ्रूमण्डलप्रहितसौरतमन्त्रशौण्डैः ।
पत्न्यस्तु षोडशसहस्रमनङ्गबाणैर्यस्येन्द्रियं विमथितुं करणैर्न विभ्व्यः ॥ १८ ॥
विभ्व्यस्तवामृतकथोदवहास्त्रिलोक्याः पादावनेजसरितः शमलानि हन्तुम् ।
आनुश्रवं श्रुतिभिरङ्घ्रिजमङ्गसङ्गैस्तीर्थद्वयं शुचिषदस्त उपस्पृशन्ति ॥ १९ ॥

बादरायणिरुवाच ॥

इत्यभिष्टूय विबुधैः सेशः शतधृतिर्हरिम् ।
अभ्यभाषत गोविन्दं प्रणम्याम्बरमाश्रितः ॥ २० ॥

भाषा टीका ।

हे भूमन् ! हे भगवन् ! त्रिविक्रम वामन अवतार मे आपका जो पाद तीनों लोकों के उपर पता का के तुल्य होगया थाँ वह पाद असुर सेना के भय देने वाला है देवसेना के अभय देने वाला है साधु पुरुषों को स्वर्ग देने वाला दुष्टों को नरक देनेवालों है वह चरण भजन करने वाले हमलोगों को पवित्र करै ॥ १३ ॥

आप प्रकृति पुरुष दोनों से परे हो जिन आप के काल के वश होकर ब्रह्मादिक सब देह धारी जीव आपस मे दुखित हो कर जैसे नाक मे पोया हुआ बैल होवै तैसे आपकी आज्ञा को करते हैं तिन आप पुरुषोत्तम का चरण हम लोगों के कल्याण को करै ॥ १४ ॥

इस जगत् की उत्पत्ति पालन नाश के आप हेतु हो प्रकृति जीव महत्तत्व इनके भी आप नियंता हो सो आप तीन चातुर्मास रूप काल होकर इस संसार के नाश करने मे प्रवृत्त हो ऐसे गंभीर वेग वाले काल रूप आपही उत्तम पुरुष हो ॥ १५ ॥

महत्तत्व रूपी आदि पुरुष ने आप से वीर्य को प्राप्त होकर आपकी उस माया के द्वारा जगत् रूप गर्भाधान किया उसी अमोघ वीर्य वाले पुरुष ने उसी माया के अनुगत होकर अपने स्वरूप से वाहिर सात आवरणों के सहित सुवर्ण मय ब्रह्मांड अंडकोश को उत्पन्न किया है ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

नन्वेवं भूतमीश्वरत्वं मम कुतोऽवगतं मयाद्भिस्तत्राहुः । तदिति । तत्तस्मात्तस्थुषः स्थावरस्य जगतो जङ्गमस्य च भवानधीशः यद्यस्मान्माययोत्था उज्जृम्भिता या गुणविक्रिया इन्द्रियवृत्तिस्तयोपनीतानर्थान्विषयान् जुषन् जुषमाणोऽपि हे हृषीकपते ! न लिप्तस्त्वम् ये त्वन्ये जीवा योगिनो वा स्वतः परिहृतादप्यविद्यमानात्यक्ताद्वा विषयजोषणाद्बिभ्यति वासनामात्रेण बध्यन्त इत्यर्थः ॥ १७ ॥

अलिप्तत्वमाहुः । स्मायेति । स्मायावलोकः मन्दस्मितविलासितोऽवलोकस्तस्य लवः कटाक्षस्तेन दर्शितो यो भावोऽभिप्रायस्तेन मनोहारि यद्भ्रूमण्डलं तेन प्रहिता ये सौरता मन्त्रास्तैः शौण्डैः प्रगल्भैरनङ्गबाणैः कामस्य बाणैः संमोहनैः करणैः कामकलादिभिः षोडशसहस्रं पत्न्यो यस्येन्द्रियं मनो विमथितुं क्षोभयितुं न विभ्व्यो न समर्थाः स भवान्न लिप्त इति पूर्वेणान्वयः ॥ १८ ॥

तस्मात्तवामृतरूपा या कथा तदेव उदकं वहन्तीति तथा कीर्त्तिनद्यः तथा पादावनेजसरितो गङ्गाद्याश्च त्रिलोक्याः शमलानि हन्तुं विभ्व्यः केन प्रकारेण आनुश्रवं गुरोरुच्चारणमनुश्रूयत इत्यनुश्रवो वेदस्तत्र भवं कीर्त्तिरूपं तीर्थं श्रुतिभिः श्रवणेन्द्रियैरङ्घ्रिजं चाङ्गसङ्गैरेवं शुचिषदः स्वाश्रमधर्मस्थितास्तव तीर्थद्वयमुपस्पृशन्ति सेवन्त इति ॥ १९ ॥

विबुधैः सह ॥ २० ॥ २१ ॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

एवं सृष्ट्यादिकर्तृत्वेन माययेति अत्र सर्वावतारावतारिशिरोमणेः श्रीकृष्णस्य स्तोतव्यत्वेन प्रकृतत्वात् स्वांशेन प्रकृतिप्रवर्त्तकपुरुषरूपेण वर्णनमिदं ज्ञेयं "कर्मफलं प्रयोक्तरी"ति न्यायेन जुषमाणत्वेऽपि स्वरूपभूतचिच्छक्त्याऽलिप्तत्वं मायां व्युदस्य चिच्छक्त्या कैवल्ये स्थित आत्मनी"ति श्रीमदर्ज्जुनोक्तेः ॥ १७ ॥

साक्षाद्रूपेऽप्यलिप्तत्वमाहुः स्मायेति । अभिप्रायोऽत्र रमणरूपः प्रहिताः प्रयुक्ताः सौरताः सम्भोगाङ्गरूपा मन्त्रवत् सम्मोहका भावहावहेलादयस्ते च ते शौण्डाश्च प्रगल्भास्तैरनङ्गबाणकैः करणैः क्रियते वशीक्रियते नायक एभिरिति करणानि तैस्तथा च कामकलाभिरिति व्याख्यातं कामस्य सम्भोगशृङ्गारस्य कला अलङ्कारशब्दवाच्याः भावहावहेलालीलाविलासविच्छित्तिविब्बोककिलकिञ्चिताद्या द्वाविंशतिः विशेषेण मथितुं स्वोत्तमप्रेमवतीतुल्यत्वेन क्षोभयितुं न शेकुः किन्तु यासां यादृशः प्रेमा तादृशमेव शेकुरिति प्रेमवश्य एव त्वं नतु कामीत्यर्थः ॥ १८ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी ।

तस्मादलिप्तत्वेनेश्वरत्वात् केन प्रकारेणोभयनदीनां शमलहन्तृत्वम् ॥ १९ ॥

अम्बरमाश्रित इति । नहि देवाः भुवं स्पृशन्ति इति स्वमर्यादादर्शनाय भगवतोऽपि मनुष्यमर्यादायां स्थैर्यत्वं दर्शयतीति भावः ॥ २० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

अर्थान् कार्यभूतान् जुषन् लीलारसास्वादकतयानुभवन्नपि न लिप्तः अकर्मवश्य इत्यर्थः । परिहृतादपि वर्जितादपि ॥ १७ ॥ १८ ॥

आनुश्रवं वेदसिद्धं श्रुतिभिः कर्णपुटैः ॥ १९—३६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथोदयहेतोः पाश्चात्यं स्थितिहेतुत्वमुपपादयन्त आहुः । तदिति । ततः उदयहेतुत्वादनन्तरमित्यर्थः । तस्थुषः स्थावरस्य जगतो जङ्गमस्य च सृष्टस्य चराचरात्मकस्य जगत इत्यर्थः । भवानधीशः अधीशत्वं चात्रान्तः प्रविश्य प्रशासितृत्वं मन्वाद्यन्तर्विष्ण्वाद्यवताररूपेण पालकत्वमनिष्टपरिहारेष्टप्रापणात्मकं च इदमेव हि स्थितिहेतुत्वं यन्मन्वाद्यन्तर्यामिविष्ण्वाद्यवताररूपेणानिष्टपरिहारेष्टप्रापणरूपं तत्रान्तर्यामिकृत्यमाह । यन्मायया यस्य तवान्तर्यामिणो मायया तत्तज्जीवकर्मानुगुणसङ्कल्पेनोत्था विजृम्भिता गुणविक्रिया गुणपरिणामात्मकेन्द्रियवृत्तिस्तयोपनीतानर्थान् शब्दादिविषयान् जुषन् अध्यारोपितभेषणोऽत्रजुषिः परस्मैपदमार्षं जोषयन् अनुभावयन्नित्यर्थः । यद्वा लीलारसौपयिकतया जीवद्वारानुभवन्नित्यर्थः। अथापि न लिप्तः पुण्यपापाभ्यामिति शेषः। अकर्मवश्यत्वादिति भावः । तत्र हेतुत्वेन सम्बोधयन्ति हृषीकपत इति। हृषीकानीन्द्रियाणि तत्पतित्वं तद्वशीकर्तृत्वं तदवश्यत्वं तद्व्यापारात्मकपुण्यापुण्यकारयितृत्वञ्च त्वद्व्यतिरिक्तास्तु नैवंविधा इत्याहुः । येऽन्य इति । त्वद्व्यतिरिक्ताः सर्वे जीवा योगिनो वा स्वतः परिहृतादविद्यमानात्यक्ताद्वा विषयजोषणाद्बिभ्यति वासनामात्रेण बध्यन्त इत्यर्थः ॥ १७ ॥

हृषीकपतित्वमर्थिममन्त्रावतारे प्रसिद्धमित्याहुः । स्मायावलोकेति । स्मायावलोको मन्दस्मितविलासितोऽवलोकः स्मेरावलोक इति पाठेऽपि स एवार्थः तस्य लवः कटाक्षस्तेन सन्दर्शितो यो भावोऽभिप्रायविशेषस्तेन मनोहारि यत् भ्रूमण्डलं तेन प्रहिता ये सौरतमन्त्राः सुरतालापाः स्तैः शौण्डैः प्रगल्भैरनङ्गबाणैः सम्मोहनैः शरैः कामशालिभि करणैः षोडशसहस्रमपि पत्न्यः यस्य तवेन्द्रियं विमथितुं क्षोभायितुं वशीकर्तुमिति यावत् न विभ्व्यः न समर्थाः प्रबभूवुः त्वन्तु सर्वस्य वशीति भावः । तथाच श्रुतिः सर्वस्य वशी सर्वस्येशान इति ॥ १८ ॥

किं बहुनाऽमर्थान् जुषन्नपि न लिप्त इति यतस्त्वच्चरित्रं चरणोदकमेव च निर्लेपतामावहतः इत्याहुः । विभ्व्य इति । उदवहाशब्दो नद्यां रूढः अत एव "उदकस्योदः संज्ञायाम्" इत्युदादेशः तवामृततुल्या याः कथास्ता एवोदवहा नद्यः तथा पादावनेजसरितः पादक्षालनजलात्मिका गङ्गाद्याः सरितश्च त्रिलोक्याः शमलानि दुरितानि हन्तुं विभ्व्यः समर्थाः अत एवमनएव शुचिषदः शुचये आत्मविशुद्ध्यर्थं सीदन्ति किलसन्तीति तथात्मविशुद्धिकामा इत्यर्थः त नवानुभवमनुश्रवो वेदः गुरूच्चारणमनुश्रूयत इति व्युत्पत्तेः तत्सिद्धं कीर्तिरूपतीर्थं श्रुतिभिः श्रवणेन्द्रियैः अङ्घ्रिजं गाङ्गं त्वङ्गभङ्गैः स्नानादिभिरित्येवं तीर्थद्वयमुपस्पृशन्ति सेवन्ते ॥ १९ ॥

इतीति । अम्बरमाकाशमाश्रितः शतधृतिर्ब्रह्मा सेशैः शिवसहितैर्विबुधैः देवैः सह हरिं श्रीकृष्णमित्येवमभिष्टूय स्तुत्वा पुनः प्रणम्य गोविन्दं प्रत्यभाषत उवाचेत्यर्थः ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ननु तव सहकारिकारणत्वं मुख्यकारणत्वं चतुर्मुखस्यातः स्वामित्वं च तस्येति तत्राह । तत्तस्थुष इति । यतो यदनुप्रवेशमन्तरेण एषां तत्त्वानां सर्जनशक्तिर्नास्ति तदनुप्रवेशे साऽस्ति च ततस्माद्भवांस्तस्थुषा जगतश्चाधिक ईशः । नन्वेतदधीशत्वं कथं ज्ञायत इति तत्राह । यदिति । मायया इच्छया उत्थगुणविक्रियया संबन्धप्रकृतिगुणविकारेणोपनीतान् प्राप्तानर्थान् विषयांस्तदिन्द्रियेषु स्थित्वा जुषन्नपि न लिप्त इति यत्तेनाधीश इति ज्ञायते हृषीकपत इति सबुद्ध्येन्द्रियस्वामित्वस्य जीवस्य सत्त्वेऽपि तदनियतत्वदर्शनादीशनियतत्वदर्शनाच्च हरेरिन्द्रियेशत्वं मुख्यमिति ज्ञायते। ननु योगिष्वनेकान्तोऽधोलेपहेतुरत्राह।येऽन्य इति।येऽन्ये योगिनः सनकादयः परिहृतानितीह्नतिया पञ्चम्यर्थे स्वतः भवतः प्रसादात्परिहृतेभ्यो विषयेभ्यो बिभ्यति स्म अनर्थं स्मृत्वेति शेषः।"भीत्रार्थानां भयहेतु"रित्यतः पञ्चमी अनेन विषयालेपनं योगिनां यत्तद्भगवतः प्रसादात् । सापि च भगवतस्तु स्वतो न अन्यनियतं नित्यं चेत्युक्तं भवति ॥ १७ ॥

विषयालेपो नाम तदजितत्वमित्याह । स्मायेति । स्मायो मन्दहासस्तेन सहितोऽवलोकः तस्य लवेन सह दर्शितो भावः शृङ्गारचेष्टा तथा हारि मनोहरं भ्रूमण्डलं तेन सह प्रहितः प्रयुक्तः सौरतः सुरते विद्यमानो मन्त्रः तेन शौण्डैर्निशितैरनङ्गस्य बाणायमानैः करणैः आलिङ्गनादिलक्षणैः साधनैर्निमथितुं विलोडयितुं जेतुमित्यर्थः ॥ १८ ॥

यद्ययं भगवान् देवदत्तवद्विषयलम्पटत्वेन स्त्रीजितस्तर्हि तत्कथानदीस्नानं पापनाशनं न स्यान्नच तथा निःसंगत्वेन स्त्रीजितो नैवेति तर्कं गर्भीकृत्य स्तुवन्ति विभ्व्य इति । सप्तसुप्रथमेति सूत्राद्विभ्व्य इति प्रथमा षष्ठ्यर्थे त्रिलोक्याः यदनन्यसाध्यं तत्सर्वं विभ्वनस्तव अमृतकथोदवहाः अमृतकथालक्षणा नद्यः पादावनेजसरितश्चेति यत्तीर्थद्वयं तदुपस्पृशन्ति स्नानादियोग्यं कुर्वन्ति अत्र किं प्रमाणमत्राह।आनुश्रवमिति। श्रुतिप्रसिद्धं सम्यक् स्रवन्ति सरितो नद्येन अन्तर्हृदा मनसा पूयमाना" इत्यादेः कुतोऽभूदित्यत उक्तं अंघ्रिजमिति अंघ्रिलंघनमतिक्रमणं शत्रूणां पराक्रमलक्षणकथेत्यर्थः । अन्यत्तु प्रसिद्धं आघ लघि गत्यर्थाविति धातुः कैः करणैः श्रुतिभिः श्रवणैरङ्गसङ्गैश्च किं फलमुद्दिश्य

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

शमलानि मलानि निहन्तुं मलं "विष्ठाऽघयोर्मल्यौ"ति यादवः शुचावग्नौ सीदति निषीदति तिष्ठतीति शुचिषत्तस्य चन्द्रार्कमण्डलस्थस्य वा ॥ १६ ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तदेव दर्शयति । तदिति । यस्मादेवं तवांशः पुरुषः स्रष्ट्रत्वादीशः तत्र चेशरूपेण जुषन् जोषयन्नपीत्यर्थः । न लिप्तः "कर्मफलं प्रयोक्तरी"ति न्यायेनेति भावः ॥ १७ ॥

नन्वहमत्र तु कामीव लक्ष्ये नेत्याहुः । स्मायेति । अनङ्गबाणरूपैः करणैः स्वाभिकप्रेमवतीस्पर्द्धया कृत्रिमैर्भावहावादिभिर्विशेषेण सोत्तमप्रेमवतीतुल्यत्वेन मथितुं किन्तु यावांस्तत्र प्रेमांशस्तावदेवेत्यर्थः । इति प्रथमस्कन्धपद्यवत् प्रेमवश्य एव त्वं नतु कामीत्यर्थः ॥ १८ ॥

तत्र किं वक्तव्यं तव चरितं काममलमिति यतस्त्वत्कथापि कामादिशमलमपहन्तीत्याहुः । विभ्व्य इति । अत्रोदवहाशब्दस्य नद्यां रूढिर्नैवा यौगिकत्वेऽमृतत्वं तिरस्कृतं स्यात् पादावनेजसरित इति तु दृष्टान्तत्वेनोक्तं शमलं निहन्तुं विभ्व्य इत्यपि किं वक्तव्यं यतस्तत्तीर्थद्वयं सुखविशेषप्राप्त्यर्थं शुचिसदो निर्मलचित्ता अपि उपस्पृशन्ति सदा सेवन्ते ॥ १६ ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

एवं च मूलभूतः परमपरमेश्वरस्त्वमेवेत्याहुः । तदिति । यस्मादेवं तत्तस्मात् तस्थुषः स्थावरस्य च जगतो जङ्गमस्य च भगवानधीशः स्रष्टा पुरुष ईशस्त्वं तु तमप्यधिकरोषीत्यर्थः । यद्यस्मान्मायया उत्थिता या गुणविक्रिया इन्द्रियवृत्तिस्तयोपनीतान् विषयान् मर्त्यादिशरीरेषु जीवद्वारा परमात्मैव त्वं जुषमाणः सन्नपि हृषीकपते ! हे इन्द्रियनियन्तः ! न लिप्तः ये त्वन्ये योगिनस्ते स्वतःस्वेन परिहृतादपि विषयजोषणाद्बिभ्यति वासनामात्रेण बध्यन्ते इत्यर्थः ॥ १७ ॥

स्वयं भगवद्रूपः साक्षात्त्वं त्वप्राकृतविषयेष्वपि न लिप्त इत्याहुः । स्मायावलोको मन्दस्मितविलासितोऽवलोकः तस्य लवः कटाक्षः तेन दर्शितो यो भावो ऽभिप्रायस्तेन मनोहारि यद्भ्रूमण्डलं तेन प्रहिता ये सौरता मन्त्रास्तैः शौण्डैः प्रगल्भैः अनङ्गस्य बाणोघाणतुल्यकरणैः कामकलाभिः षोडशसहस्रपत्न्यः विमथितुं क्षोभयितुं न शेकुः पत्नीनां चिच्छक्तिवृत्तित्वात्तासां कामकला अप्यप्राकृत्यश्चिन्मय्य एव ताभिरप्यवशीकारदर्शनाद्लिप्त एव त्वं किं च पारिजाताद्याहरणाज्ञार्पितवशीकारदर्शनात् ताश्च कदाचित्तासां चिद्विशेषप्रेममय्योऽपि भवन्तीत्युज्ज्वलनीलमणौ प्रतिपादितं ततश्च त्वं प्रेमवश्य एव नतु प्राकृताप्राकृतकामवश्य इतिभावः । यद्वा विमथितुं व्रजसुन्दर्य इव विशेषेण मथितुं न शेकुः किन्तु यावांस्तत्र प्रेमांशस्तावदेवेत्यर्थः ॥ १८ ॥

यद्यपि त्वमेवमलिप्तस्तथापि तव लीलामृतं चरणामृतं च संसारबन्धाल्लोकान्मोचयत्येवेत्याहुः । विभ्व्य इति । तव अमृतरूपा याः कथास्ता एव उदवहाः पुण्यनद्यः पादावनेजसरितो गङ्गाश्च शमलान्यविद्यामालिन्यानि हन्तुं विभ्व्यः समर्थाः केन प्रकारेण आनुश्रवं गुरोरुच्चारणमनुश्रूयन्त इत्यनुश्रवाः पुराणाद्यास्तत्र भवं लीलामृतन्तीर्थं श्रुतिभिः श्रवणेन्द्रियैः अङ्घ्रिजं तीर्थं च अङ्गसङ्गैः एवं शुचिषदः शुद्धचेष्टाजनाः तीर्थद्वयमुपस्पृशन्ति अधिकं सेवन्ते ॥ १९—२० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

स्थितिहेतुत्वमुपपादयन्ति । तदिति । तत्तस्मिन् आण्डकोशे तस्थुषः स्थावरस्य जगतो जङ्गमस्य भवान् अधीशः स्थितिकर्त्ता अधीशत्वे हेतुमाहुः । यत् यस्माद्धेतोः "पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति । तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः" इति स्मृतेः भक्तैरुपनीतान् अर्थान् जुषन् जुषमाणोऽपि हे हृषीकपते उत्था प्रवृत्ता गुणविक्रिया त्रिगुणसृष्टिर्यया मायया तया न लिप्तस्त्वम् परमेश्वरात्त्वत्तोऽन्ये ये जीवास्ते तु "ये हि संस्पर्शजा भोगा दुःखयोनय एव ते । आद्यन्तवन्तः कौन्तेय ! न तेषु रमते बुध" इति स्मृतेः स्वतः परिहृतात् मायालेशाद्विषयजोषणाद्बिभ्यति अतोऽधीशोऽसि त्वम् ॥ १७ ॥

हृषीकपतित्वं विवृण्वन्ति । स्मायेति । स्मायो मन्दहासेन सहितोऽवलोकः तिर्यक्प्रेक्षणं तस्य लवेन दर्शितो यो भाव आशयः तेन हारि मनोहरं यद्भ्रूमण्डलं तेन प्रहिताः प्रयुक्ताः ये सुरते भावाः सौरता मन्त्राः तैः शौण्डैः कामिजनपराभवे प्रगल्भैः अनङ्गबाणैर्मदनशरैः करणैरालिङ्गनादिलक्षणैः साधनैः षोडशसहस्रपत्न्यः यस्येन्द्रियं मनः विमथितुं विलोडयितुं जेतुं न विभ्व्यः न समर्थाः बभूवुः ॥ १८ ॥

अविभ्वीत्वं विवृण्वन्ति । विभ्व्य इति । तव नास्ति मृतं मरणं याभिस्ताः मुक्तिप्रदाः याः कथाः ता एव उदवहाः मुक्तिप्रदशास्त्ररूपाः नद्य इत्यर्थः । तथा पादावनेजसरितः चरणकमलप्रक्षालनोदवहाः श्रीगङ्गाद्याः त्रिलोक्याः शमलानि हन्तुं विभ्व्यः समर्था भवन्ति नदीद्वयसेवनप्रकारं तदधिकारिणश्चाहुः गुरूच्चारणादनु अनन्तरं श्रूयते इत्यनुश्रवं तदेवानुश्रवमुपनिषदादिशास्त्ररूपम् श्रुतिभिः श्रवणेन्द्रियैः अङ्घ्रिजं चाङ्गसङ्गैः एवं तीर्थद्वयं शुचौ सीदन्तीति तथा गङ्गादितीर्थवासिनो वेदान्तश्रवणमननाद्यर्थं गुरुसमीपवर्तिनश्च उपस्पृशन्ति सेवन्ते ॥ १९ ॥

विबुधैर्देवैः सह सेशः ईशेन शिवेन सहितः ॥२०—२१॥

भाषा टीका ।

तिससे आप स्थावर जंगम दोनों के अधीश हो माया से उत्पन्न भये जो गुण उनके विकारों से उत्पन्न जो विषय हैं तिन को आप सेवन करते हो तौभी उनमे लिप्त नहीं होते हो आप सब इंद्रियों के पति हो और दूसरे सब योगि लोग तो विषयोंको छोड कर दूर रहते हैं तौभी उनसे डरते रहते हैं ॥ १७ ॥

आप की जो सोला हजार रानी हैं सो सब मन्दहास से प्रिय दृष्टियों के लेशमात्र से दिखाया जो भाव तिस से मन का हरन

ब्रह्मोवाच ॥

भूमेर्भारावताराय पुरा विज्ञापितः प्रभो ! ।
त्वमस्माभिरशेषात्मंस्तत्तथैवोपपादितम् ॥ २१ ॥
धर्मश्च स्थापितः सत्सु सत्यसन्धेषु वै त्वया ।
कीर्तिश्च दिक्षु विक्षिप्ता सर्वलोकमलापहा ॥ २२ ॥
अवतीर्य यदोर्वंशे बिभ्रद्रूपमनुत्तमम् ।
कर्माण्युद्दामवृत्तानि हिताय जगतोऽकृथाः ॥ २३ ॥
यानि ते चरितानीश ! मनुष्याः साधवः कलौ ।
शृण्वन्तः कीर्तयन्तश्च तरिष्यन्त्यञ्जसा तमः ॥ २४ ॥
यदुवंशेऽवतीर्णस्य भवतः पुरुषोत्तम ! ।
शरच्छतं व्यतीयाय पञ्चविंशाधिकं प्रभो ! ॥ २५ ॥
नाधुना तेऽखिलाधार ! देवकार्यावशेषितम् ।
कुलं च विप्रशापेन नष्टप्रायमभूदिदम् ॥ २६ ॥
ततः स्वधाम परमं विशस्व यदि मन्यसे ।
सलोकाँल्लोकपालान्नः पाहि वैकुण्ठकिङ्करान् ॥ २७ ॥
* (संस्तुतो भगवानित्थं विबुधैः पद्मजादिभिः ।
प्रतिनन्द्याह तान् राजन् ! मायामनुज ईश्वरः ॥ ० ॥)

श्रीभगवानुवाच ॥

अवधारितमेतन्मे यदात्थ विबुधेश्वर ! ।
कृतं वः कार्यमखिलं भूमेर्भारोऽवतारितः ॥ २८ ॥

भाषा टीका ।

वाला जो भूमंडल तिस से प्रेरित जो मंत्री कीसी चतुराई इन चेष्टाओं से औ अपनी सब इंद्रियों से काम देव के बाणों को चला कर भी आप की इंद्रियों के चलित करने को समर्थ नहीं हो सकीं ॥ १८ ॥

आप की कथा रूपी अमृत जल प्रवाह की जो नदी हैं और आप के चरणारविंद के प्रक्षालन के जल की जो नदी गंगाजी हैं वे दोनों प्रकार की नदी सब जीवों के पापों को नाश करने में समर्थ हैं तिस मे कथा नदी तो श्रवण से पवित्र करती हैं और गंगाजी स्नानादि अंगसंग से पवित्र करती हैं जो पुरुष अपने धर्मों मे स्थित हैं वे लोग आप के इन दोनों तीर्थों का अवगाहन करते हैं ॥ १९ ॥

श्रीशुक उवाच ॥

महादेवजी के सहित ब्रह्माजी इस प्रकार से सब देवों के सहित श्रीकृष्णचंद्र की स्तुति करके प्रणाम करके आकाशही मे स्थित होकर यह वचन बोले ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

विक्षिप्ता विस्तारिता ॥ २२ ॥
उद्दामानि वृत्तानि विक्रमा येषु तानि कर्माणि ॥ २३—२८ ॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

भूमेरिति युग्मकम् अशेषात्मन्निति सर्वान्तर्यामिन्नेव भूभा-

* इत्याधिकः पाठो वीरराघव विजयध्वजयोः ।

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

दीनां दुःखं ज्ञात्वैवेत्यर्थः । तद्विज्ञापनं त्वया तथैवोपपादितं सत्यसन्धेषु सत्यप्रतिज्ञेषु ॥ २१ ॥ २२ ॥

विभ्रज्जगति दर्शयन् ॥ २३ ॥

यानीति । यच्छब्दद्वयोत्तरवाक्यगतत्वेन तच्छब्दानपेक्षत्वं साधु चन्द्रमसि पुष्करैः कृतमितिवत् प्रसक्तेति श्रवणकीर्त्तनयोः स्वतः पुरुषार्थत्वं तरणस्यानुषङ्गिकत्वं चोक्तम् ॥ २४ ॥

विज्ञप्तितमाह । यदुवंश इति ॥ २५ ॥

नष्टप्रायमदर्शनप्राप्तप्रायम् ॥ २६ ॥

ततो हेतोः स्वधाम प्रापञ्चिकाप्रकटीभूतं द्वारकाया एवाप्रकटप्रकाशं स्वयं भगवत्कृष्णरूपेण प्रविश स्वांशविष्णुरूपेण तु सलोकांल्लोकपालान्नः पाहि नानावैकुण्ठनाथैः स्वविलासैश्च वैकुण्ठकिङ्करान् पाहीति सर्वांशमादायावतीर्णत्वात् ॥ २७ ॥

अवधारितं श्रुतं अखिलं दैत्यसंहारादि ॥ २८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदेवाह सप्तभिः । भूमेरिति । हे अशेषात्मन् ! समस्तचिदचिद्वस्त्वन्तरात्मन् ! तदस्मद्विज्ञापितं तथैव यथाविज्ञापनम् उपपादितं साधितम् ॥ २१ ॥

सत्ये धर्मे इति सन्धाभिसन्धिर्येषां तेषु सत्सु सर्वेषां लोकानां जनानां शृण्वतां वदतां च मलमपहन्तीति तथा सा कीर्तिर्दिक्षु विक्षिप्ता विस्तारिता ॥ २२ ॥

अवतीर्येति । न विद्यते उत्तमं यस्मात्तद्रूपं वपुर्बिभ्रद्दूर्बिभ्राणः जगतो हिताय श्रेयःसाधनाय उद्दामानि उदाराणि वृत्तानि वार्त्ताः येषु तानि उदारकथाविषयकर्माणीत्यर्थः । तानि कर्माणयकृथाः कृतवानसीत्यर्थः ॥ २३ ॥

जगतो हितायाकृथा इत्येतदेवोपपादयन्ति । यानीति ! हे ईश ! ते नराञ्जसा सुखेन तमः प्रकृतिं तत्कार्यं संसारमित्यर्थः तरिष्यन्ति ॥ २४ ॥

यदुवंश इति । हे पुरुषोत्तम ! हे विभो ! पञ्चविंशाधिकं शरच्छतं वर्षशतं व्यतीयाय व्यतिक्रान्तमभूत् ॥ २५ ॥

ततः किमत आह । नेति । हेऽखिलाधार ! तव देवकार्यावशेषितमवशेषितं देवकार्यमित्यर्थः । तत्कर्त्तव्यमधुना तव नास्तीदं कुलं यदुकुलं नष्टप्रायं नष्टवत् ॥ २६ ॥

ततोऽपि किमत आह । तत इति । ततः अवतारप्रयोजनस्य वृत्तत्वादधुना परमं सर्वोत्कृष्टं स्वधाम स्वस्थानं परमं पदं अवस्य यदि मन्यसे न वयं विधातुं प्रभवा इति भावः । हे वैकुण्ठ ! लोकैः सहितान् किङ्करानस्मान् लोकपालान् यो हि वैकुण्ठस्य तव किङ्कराणि वा किङ्कराज्ञापनानुवर्त्तनमेव तत्पालनमितिभावः ॥ २७ ॥

संस्तुत इति । पद्मजादिभिर्ब्रह्मादिभिर्विबुधैरित्थं संस्तुतः स्तुतिपूर्वकं विज्ञापितः भगवान्मायामनुजः स्वसङ्कल्पोपात्तमनुजावतारः प्रतिनन्द्य तद्विज्ञापनमभिनन्द्य हे राजंस्तान् विबुधानाह ॥ ० ॥

तदेवाह । अवधारितमिति । हे विबुधेश्वर ब्रह्मन्नेतन्मे मयाऽवधारितं विचार्यनिश्चितं किन्तत् । यत्त्वमात्थ उक्तवानसि तदेव स्पष्टयति । कृतमिति । वो युष्माकम् ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

पञ्चविंशाधिकं पञ्चविंशत्यधिकं तदुक्तं "वत्सराणां शतञ्चैव ऋतूनां पञ्चविंशकम् । अवतीर्णस्य कृष्णस्य यदा प्रागात्तदाहारम् । स्वस्थानगमनापेक्षी ब्रह्मा तुष्टाव सामर इति॥२५॥

अवशिष्टदेवकार्यापेक्षयापि न स्थेयमित्याह । नाधुनेति । यदुकुलमवशिष्टमपेक्ष्यापि न स्थेयमित्याह । कुलं चेति ॥ २६ ॥

यादवानां देवत्वात्तेषु स्थितौ कलेरप्रवेशात्तस्य चापेक्षितत्वात्तत्कुलसंहारार्थं किञ्चित्कालस्थित्यपेक्षायां तत्कृत्वा झटिति स्वधाम प्रवेष्टव्यमित्याशयेनाह । ततः स्वधामेति । तदुक्तं च—

संवत्सरद्वयं चैव पश्चात्स्थित्वा जनार्दनः ।
अभिपेदे परं स्थानं चतुर्मासाधिकं पुनरिति ॥ २७ ॥

अवधारितं निश्चितम् ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

भूमेरिति युग्मकम् । उपपादितं त्वयेत्युत्तरेणान्वयः ॥ २१·२५ ॥

नष्टप्रायमदर्शनगततुल्यम् ॥ २६ ॥

स्वधाम प्रापञ्चिकाप्रकटीभूतं द्वारकाया एव प्रकाशं श्रीकृष्णरूपेण प्रविश श्रीविष्णुरूपेण तु सलोकाँल्लोकपालान्नः पाहि नानावैकुण्ठनाथरूपैश्च वैकुण्ठकिङ्करान् पाहीति सर्वांशमादायावतीर्णत्वात् ॥ २७ ॥ २८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ननु युष्माभिः क्षीरोदशायेव विज्ञापितः नत्वहं तत्राह । अशेषात्मन् हे सर्वावतारावतारिस्वरूप ! तस्यापि स्वरूपत्वादित्यर्थः॥२१॥

विक्षिप्ता विस्तारिता ॥ २२—२४ ॥

शरच्छतं वर्षशतम् ॥ २५ ॥

न देव कार्य्यावशेषितं देवकार्य्यस्यावशेषो नास्त्यधुनेत्यर्थः । नष्टप्रायमन्तर्हितप्रायं मंशरदर्शनार्थत्वात् ॥ २६ ॥

स्वधाम प्रपञ्चागोचरीभूतं द्वारकायाः प्रकाशविशेषं कृष्णस्वरूपेण प्रविश वैकुण्ठश्वेतद्वीपादिकं तु नारायणादिस्वरूपेण सर्वांशमादायावतीर्णत्वात् ॥ २७ ॥ २८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

विक्षिप्ता विस्तारिता ॥ २२ ॥

उद्दामानि अनुपमानि वृत्तानि विक्रमा येषु तानि २३—२७

अवधारितं निश्चितं स्वीकृतम् ॥ २८ ॥

तदिदं यादवकुलं वीर्यशौर्यश्रियोद्धतम् ।
लोकं जिघृक्षद्रुद्धं मे वेलयेव महार्णवः ॥ २९ ॥
यद्यसंहृत्य दृप्तानां यदूनां विपुलं कुलम् ।
गन्तास्म्यनेन लोकोऽयमुद्वेलेन विनङ्क्ष्यति ॥ ३० ॥
इदानीं नाश आरब्धः कुलस्य द्विजशापतः ।
यास्यामि भवनं ब्रह्मन्नेतदन्ते तवानघ ! ॥ ३१ ॥

श्रीशुक उवाच ।

इत्युक्तो लोकनाथेन स्वयम्भूः प्रणिपत्य तम् ।
सह देवगणैर्देवः स्वधाम समपद्यत ॥ ३२ ॥

भाषा टीका ।

ब्रह्मोवाच ।

हे अशेषात्मा पूर्व काल मे पृथिवी के भार उतारने के वास्ते हमने आपको प्रार्थना किया था सो सब आपने उसी प्रकार कर दिया ॥ २१ ॥

सत्यप्रतिज्ञा वाले सत्पुरुषों मे धर्म का स्थापन आपने कर दिया और सब लोगों के पापों के नाश करने वाली कीर्ति भी आपने सब दिशों मे फैला दी है ॥ २२ ॥

यदुवंश मे अवतार लेकर दिव्य मनोहर रूपको धारण करके जगत् के हितके लिये अति सुंदर अद्भुत चरित कर्म भी आपने बहुत किये ॥ २३ ॥

हे ईश्वर! जो आप के चरित्र हैं तिनको कलियुग मे जो मनुष्य सत्पुरुष सुनैंगे वा कीर्तन करैंगे वे सब अनायास से अज्ञान कृत संसार को तर जावँगे ॥ २४ ॥

हे प्रभो पुरुषोत्तम यदुवंश मे अवतार लेकर आप को एक सौ पंचीस वर्ष बीतगये हैं ॥ २५ ॥

हे अखिलाधार प्रभो ! अब आपको कोइ भी देवकार्य करना नहीं बाकी रहा है औ यह आप का यदु कुल भी ब्राह्मणों के शाप से प्रायः नष्ट सरीका होगया है ॥ २६ ॥

हे वैकुंठ ! तिस कारण से यदि आप की इच्छा होवै तो अपने वैकुंठ धाम को आप पधारो सब लोकों के सहित हम लोकपालों की रक्षा करो ॥ २७ ॥

श्रीभगवानुवाच ।

हे देवेश्वर ! जो आपने कहा है सो बात मैने निश्चय करली है तुम लोगों के सब काम हमने कर लिये हैं औ भूमी का भार सब उतार लिया है ॥ २८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

वीर्यशौर्ययुक्तया श्रिया ॥ २९ ॥

उद्वेलेन लङ्घितमर्यादेन ॥ ३० ॥

वैकुण्ठं यास्यंस्तव भवनं यास्यामि ॥ ३१ ॥ ३४ ॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

वीर्येत्यत्रैकवद्भावे क्लीबत्वं स्यादतो वीर्यशौर्ययुक्तयेति व्याख्यातम् उद्धतमवध्यं लोकं जगदेव जिघृक्षत् अनन्तत्वेन प्राप्तुमिच्छत् ॥ २९ ॥

लङ्घितमर्यादेनेति । मद्वियोगादुन्मत्तचेष्टत्वेन कर्त्तव्याकर्त्तव्यविचारलोपात् ॥ ३० ॥

नाशोऽदर्शनम् अप्रकटद्वारकायां प्रवेशनमित्यर्थः । एतदेव प्रवेशनस्यान्ते विकुण्ठासुतरूपेण वैकुण्ठं यास्यन् ॥ ३१ ॥

लोकनाथेनेति । लोकसङ्ग्रहार्थं ब्राह्मणशापवर्णनमुचितमिति भावः ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तर्ह्यधुना विज्ञापितमवधारयेत्यत आह । तदिदमिति । तत्तथापीदं यादवकुलं वीर्यादिभिरुद्धतमनिवार्यं वीर्यं पराभिभवसामर्थ्यं शौर्यं युद्धे स्वगृह इव प्रवेशसामर्थ्यं श्रीर्धनादिसम्पत् ततः किमत आह । लोकं जिघृक्षदाशयितुमुद्युक्तं मे मया वेलया महार्णव इव रुद्धं निवारितम् ॥ २९ ॥

ततो यदि कुलमसंहृत्य गन्तास्मि गमिष्यामि तर्ह्यनेन कुलेनायं लोक उद्वेलेन उल्लङ्घितमर्यादेन यदुकुलेन विनङ्क्ष्यति विनष्टो भविष्यति उद्वेलेनेवेति पाठे उद्वेलेन वेलामतिक्रान्तेन महार्णवेन यथा नङ्क्ष्यति तद्वदनेनेत्यर्थः ॥ ३० ॥

कदा तर्हि संहरिष्यसीत्यत आह । इदानीमिति । द्विजशापान्नाश आरब्ध एव नह्यारब्धनाशं वस्त्ववतिष्ठते किन्त्वचिरेण निरवशेषं विनश्यतीति भावः । हेऽनघ ! एतदन्ते कुलनाशान्ते हे ब्रह्मन्! तव भवनं यास्यामि श्रीवैकुण्ठं यास्यंस्तव भवनं यास्यामीत्यर्थः ॥ ३१ ॥

अथ तस्यां महोत्पातान् द्वारवत्यां समुत्थितान् ।
विलोक्य भगवानाह यदुवृद्धान् समागतान् ॥ ३३ ॥

श्रीभगवानुवाच ।

एते वै सुमहोत्पाता व्युत्तिष्ठन्तीह सर्वतः ।
शापश्च नः कुलस्याऽऽसीद्ब्राह्मणेभ्यो दुरत्ययः ॥ ३४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इतीति । लोकनाथेन श्रीकृष्णेनेत्यमुक्तः कं कृष्णं प्रणिपत्य प्रणम्य देवगणैः सह स्वधाम स्वस्थानं सत्यलोकं समपद्यत समगात् ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तर्हि कालक्षेपे किं कारणं तत्राह । तदिदमिति । मे लोकं लोकं लिघृक्षति प्राप्तुमिच्छति ॥ २९ ॥

अनुपसंहारे को दोष इति तत्राह । अनेनेति । उत्कर्षेण वीर्यशौर्यादिगुणैर्लीलमानेन यादवकुलेन सतो यदुकुलस्योत्कर्षं युगधर्माद्धिरिक्षतीत्यभिप्रायेणोक्तमाचार्यैः "सतामपि कलौ प्राप्ते विकारो मनसो भवेत् । तस्माद्यदूंश्च संलन्हे नैते स्युः पापिनो सदा । पुनर्लोकहितार्थाय स्वरेखाभिकामहरिः । आविश्य रत्नाकरोऽजगतः पुरुषोत्तमः । स्वात्मना स्वहस्तेन पुरुषार्थोऽधिको भवेत् । इत्यनुग्रहबुद्ध्या च संलन्हे स्वकुलं विभु"रिति ॥ ३० ॥

एतदन्ते एतस्य यदुकुलसंहारस्यान्ते तव प्रीत्यै भवनं यास्यामि ॥ ३१—३५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

उद्धतमवध्यं लोकं जगदेव जिघृक्षत् अनन्तत्वात् प्राप्तुमिच्छत् ॥ २९ ॥

नन्वेतेषां ब्रह्मण्यानां सदान्यानां नित्यं वृद्धोपसेविनां व्याप्त्या सर्वत्र भद्रमेव भवतु तत्राह । यदीति । उद्वेलेन मद्वियोगादुन्मत्तचेष्टेन ॥ ३० ॥

नाशः अदर्शनं निगूढायां द्वारकायां प्रवेशनमित्यर्थः एतस्य प्रवेशनस्यान्ते तव भवनं विकुण्ठासुतरूपेण यास्यामि तदुपरिगं तद्वैकुण्ठं यास्यामित्यर्थः ॥ ३१ ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

वीर्यं बलित्वं शौर्यं युद्धोत्साहः तयोः श्रिया सम्पत्त्या उद्धतं इतात् हननादुद्धतम् अवध्यमित्यर्थः । लोकं जिघृक्षत् अनन्तत्वादव्याप्तुमिच्छत् ममाचिन्त्यशक्तिना द्वारकायामेव रुद्धमन्यथा सर्वभूलोकेऽपि मातुमपर्याप्तमिति ॥ २९ ॥

इमानां नायकत्वेन भूताहङ्काराणाम् उद्वेलेन अतिक्रान्तमर्यादेन तदुद्रोपमेनेत्यर्थः । लोको भूर्लोकः यद्यपि मत्परिजनानामेषां परमधार्मिकाणां यदूनां भारं पृथ्वी भारं न मन्यते तदपि तस्याः स्वामिना ममाऽवस्मारोऽवतारणीय एव सुकुमार्यां वनितायां अति बहुतरभूषणभारो यथा तत्कान्तेनावतार्यते तथा यद्यपि स्पृहणीयवस्तुनो भारः सुसह एव तदप्यतिभारस्तु न सुसहः यथाकस्मात्प्राप्तोऽपि कनकराशिभारो मृगतृष्णापि वणिजा दुर्वह एव भूतरथचरणोऽश्वयावत्सदूगुरिति व्यावर्त्यनातुङ्कारोऽपि पृथिव्या दुःसह एव दृष्ट इति ॥ ३० ॥

नाशोऽदर्शनं निगूढायां द्वारकायां प्रवेशनमित्यर्थः एतस्य प्रवेशनस्यान्ते तव भवनं विकुण्ठासुतरूपेण यास्यामि तदुपरिगं वैकुण्ठं यास्यामीति सन्दर्भः ॥ ३१—३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

मे इदं यादवकुलं वीर्यशौर्ययुक्तया श्रिया ऊर्ध्वं लोकं जिघृक्षति परिभाव्य स्थातुमिच्छतीति फलितोऽर्थः ॥ २९ ॥

किञ्चायं लोकः अनेन कुलेनोद्वेलेन मनुष्यलोकमतामतिक्रम्य वर्तमानेन विनङ्क्ष्यति देवलोकतुल्यतां प्राप्य मनुष्यलोकभावात्प्रच्याविष्यतीत्यर्थः । तदा देवलोकमनुष्यलोकयोर्विशेषाभावः स्यादिति भावः । एतदन्ते यदुकुलसंहारान्ते स्वधाम यास्यन् तव भवनं यास्यामि ॥ ३०—३५ ॥

भाषा टीका ।

यह जो यादव कुल है सो सूरता वीरता की संपत्ति से बड़ा अभिमानी होरहा है सो सब संसार को नष्ट करदेता परंतु जैसे समुद्र को किनारा रोकता है तैसे मैंने इस को रोक रखा है ॥२९॥

यदि इन गर्वित यदुओं के विना समेटे मैं जाऊँगा तो तब निर्मर्यादा वाले इस कुल के उपद्रव से यह सब लोक नष्ट होजावेगा ॥ ३० ॥

हे ब्रह्मन् ! इस वक्त ब्राह्मणों के शाप के निमित्त से इस कुल का नाश का आरंभ कर दिया है इस के होने पर हे अनघ ! तुमारे लोक को जावेंगे ॥ ३१ ॥

श्रीशुक उवाच ।

लोकनाथ श्रीकृष्ण के इतने कहने पर ब्रह्माजी भगवान् को प्रणाम करके देव गणों के सहित अपने धाम को चले गये ॥ ३२ ॥

नवस्तव्यमिहास्माभिर्जिजीविषुभिरार्यकाः ! ।
प्रभासं सुमहत्पुण्यं यास्यामोऽद्यैव माचिरम् ॥ ३५ ॥
यत्र स्नात्वा दक्षशापाद्गृहीतो यक्ष्मणोडुराट् ।
विमुक्तः किल्बिषात्सद्यो भेजे भूयः कलोदयम् ॥ ३६ ॥
वयं च तस्मिन्नाप्लुत्य तर्पयित्वा पितॄन् सुरान् ।
भोजयित्वोशिजो विप्रान्नानागुणवताऽन्धसा ॥ ३७ ॥
तेषु दानानि पात्रेषु श्रद्धयोप्त्वा महान्ति वै ।
वृजिनानि तरिष्यामो दानैर्नौभिरिवार्णवम् ॥ ३८ ॥

श्रीशुक उवाच ॥

एवं भगवताऽऽदिष्टा यादवाः कुरुनन्दन ! ।
गन्तुं कृतधियस्तीर्थं स्यन्दनान् समयूयुजन् ॥ ३९ ॥
तन्निरीक्ष्योद्धवो राजन् ! श्रुत्वा भगवतोदितम् ।
दृष्ट्वाऽरिष्टानि घोराणि नित्यं कृष्णमनुव्रतः ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

प्रभासं यास्याम इति वदतोऽयमभिप्रायः एते देवांशाः स्वाधिकारानेवार्हन्ति न तु सद्यो मोक्षम् द्वारवत्यां मृता मुच्येरंस्तस्मादल्पपुण्यफलं प्रभासं नेष्यामीति ॥ ३५ ॥

दक्षशापाद्यक्ष्मणा गृहीत उडुराट् चन्द्रो यत्र स्नानमात्रं कृत्वा किल्बिषात्तस्माद्रोगदुःखात्सद्यो विमुक्तः सन्भूयः कलावृद्धिं भेजे ॥ ३६ ॥

उशिजः कमनीयान् अन्धसा अन्नेन ३७ ॥

उप्त्वेति । यथा सुक्षेत्रे बीजमुप्तं बहुफलं भवति तथा दानं सत्पात्रे इति द्योतयति ॥ ३८—४१ ॥

श्रीराधारमणदासगोस्वामिभिर्विरचिता
दीपिकादीपिनी टिप्पणी ।

अथ ब्रह्मणो विसर्जनानन्तरं महोत्पातानिति तु तदिच्छयैव अन्यथा "मुनिवासनिवासे किं घटेतारिष्टदर्शनम्" इति तदसम्भवात् ॥ ३३ ॥

सर्वतो दिव्यभौमदैहिकभेदेन नच प्रतिकारः कर्तुं शक्य इत्याह । शापश्चेति ॥ ३४ ॥

अस्माभिरिति । बहूनां स्वसाम्यमेवाभिप्रेतं जिजीविषुभिरिति स्वात्मवदेव तेषामप्युत्पातनिरसनमभिप्रेतम् एते यादवेष्वाविष्टाः द्वारवत्यां मृता मुच्येरन्निति कपटश्च अङ्गरूपायां तस्याममङ्गलानुकरणमपि माभूदित्यर्थः ॥ ३५ ॥

तीर्थस्य ब्रह्मशापशमनयोग्यतामाह । यत्रेति ॥ ३६ ॥

वयमिति युग्मकम् तस्मिन् प्रभासे ॥ ३७ ॥ ३८ ॥

भगवतेति । तदाज्ञां कोऽन्यथा कुर्यादिति भावः । व्याजमयवाक्यश्रुत्या विस्मितं राजानं सान्त्वयति । कुरुनन्दनेति ॥ ३९ ॥

तन्निरीक्ष्येत्येव पाठो न तु तानिति तत् प्रभासयात्रोद्यमनं दृष्ट्वा पश्चाज्जनपरम्परयैव यदुभ्यो भगवतोदितम् एते वै इत्यादि पद्यत्रयं श्रुत्वा तस्माद् गुप्तीकृत्यैव तेभ्यस्तेनोपदेशात् घोराण्यरिष्टानीति यद्यपि तत्र सम्भवति तथापि बहिर्दृष्ट्या तदाभासानेव दृष्ट्वा विविक्ते रहसि ॥ ४० ॥ ४१ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

अन्यत्स्पष्टम् ॥ ३७—५० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथेति । अथ ब्रह्मगमनानन्तरं विलोक्य समागतान् यदुवृद्धानाहेति सम्बन्धः ॥ ३३ ॥

तदेवाह । एत इति । शापश्चेति च एते यतः शाप आसीत्ततो महोत्पाता दृश्यन्त इत्यर्थः ॥ ३४ ॥

तर्हि किमस्माभिः कर्तव्यमित्यत्राह । नवस्तव्यमिति । हे आर्यकाः ! जिजीविषुभिरस्माभिरिह पुरे न वस्तव्यं न स्थातव्यं किन्त्वद्यैव प्रभासं यास्यामः माचिरं विलम्बं माकुरुत ॥ ३५ ॥

तत्रापि किं प्रयोजनमित्यत्र आह । यत्रेति । उडुराट् चन्द्रः दक्षशापात् यक्ष्मणा क्षयरोगेण गृहीतो यत्र प्रभासे स्नात्वा स्नानमात्रं कृत्वा किल्बिषात् यक्ष्मणो विमुक्तः सद्य एव पुनः कलोदयं लेभे प्राप्तवान् ॥ ३६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अतो वयमपि तस्मिन् प्रभासे आप्लुत्य नानागुणावता षड्रसोपेतेनान्धसा अन्नेन उशिजः कमनीयान् विप्रान् भोजयित्वा ॥३७॥ तेषु विप्ररूपेषु पात्रेषु महान्ति दानानि उप्त्वेत्यनेन यथा सुक्षेत्रे बीजमुप्तं बहुफलं भवति तथा सत्पात्रे दानमपीति द्योतितं नौभिरर्णवमिव दानैर्वृजिनानि विप्रशापप्रयुक्तदुःखानि तरिष्यामः ॥ ३८ ॥

एवमिति । एवं हे कुरुनन्दन ! तीर्थं प्रभासं गन्तुं कृताशिषः स्यन्दनान् रथान् समयूयुजन्वाहैर्युक्तांश्चक्रुरित्यर्थः ॥ ३९ ॥

तदिति । हेराजन् ! भगवतोक्तं श्रुत्वा तदुद्योजनं निरीक्ष्य च घोराणि अरिष्टान्युत्पातान् दृष्ट्वा च नित्यं कृष्णमनुव्रतः हेतुगर्भमिदम् ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यत्र प्रभासे दक्षशापादुत्पन्नाद्यक्ष्मणः किल्बिषात्प्रमुक्तोऽभूत ॥ ३६ ॥

उशिजोऽन्नीन् ॥ ३७—३९ ॥

अरिष्टानि अशुभानि ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अथ तस्यां महोत्पातानिति तदिच्छयैव । मुनिवासनिवासे किं घटेतारिष्टदर्शनमिति तदसम्भवात् ॥ ३३—३४ ॥

अस्माभिरिति । तेषां स्वसाम्यमेव निर्दिष्टम् । तत्र जिजीविषुभिरित्यात्मवदेव तेषामुत्पातनिरसनमाभिप्रेतम् । तत्र व्याजमात्रं प्रभासमित्यादि । मङ्गलरूपायां स्वपुर्याममङ्गलानुकरणमपि माभूदित्यभिप्रायकञ्च अनुकरणमात्रत्वञ्च जिजीविषुभिरित्यनेनैव व्यञ्जितम् । अन्यथा श्रीभगवदङ्गीकारभङ्गः स्यात् ॥ ३५ ॥

तत्र च तीर्थे ब्रह्मशापस्यापि शमनयोग्यतां दर्शयति । यत्रेति । अन्यथा श्रीभगवतो युक्तिभङ्गः स्यात् ॥ ३६ ॥

सनौकादृष्टान्तेन साधनेन तदेव द्रढयति । वयमितियुग्मकेन । एतद्व्याख्यानिदानविवरणं श्रीकृष्णसन्दर्भसप्तदशोत्तरशततमवाक्यचूर्णिकामारभ्य चतुस्त्रिंशदुत्तरतत्पर्यन्तग्रन्थे द्रष्टव्यम् ॥ ३७—३९ ॥

तन्निरीक्ष्येति । प्रथमं यादवानां प्रभासयात्रोद्यमदर्शनं पश्चादेव श्रीभगवतस्तेभ्यः स्तादृगुपदेशश्रवणमिति तस्मात् परोक्षीकृत्य तेभ्यस्तेन तदुपदिष्टं परम्परयैव तच्छ्रवणमिति लभ्यते तादृश तत्प्रतिज्ञायामपि दृष्टारिष्टानीति यस्तुन उत्पाताभासेऽपि बहिर्दृष्ट्या तदाभासः स्यादेवेति निर्णीतमिति गम्यते ॥ ४० ॥४१ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

महोत्पातान् भगवदिच्छयैवाविर्भूतान् मुनिवासनिवासे किं घटेतारिष्टदर्शनमित्युक्तेस्तत्र तदसद्भावात् ॥ ३३ ॥ ३४ ॥

प्रभासमिति । मन्निजपरिकरैर्विशिष्टैव द्वारिका सदा विराजतु तेषु प्रविष्टान् देवानेव यादवरूपानवाचितं तेभ्यः सकाशात् योगबलेन निष्काश्य प्रभासं नीत्वा तत्रैव तान् मायया मौसलसङ्ग्रामं प्रापय्य स्वर्गं प्रस्थाप्य विकुण्ठाद्युत्तमादिस्वरूपोऽहमपि वैकुण्ठादिधामानि यास्यामि पूर्णस्वरूपेण तु सपरिकरोऽहं द्वारकायां सदैवास्म्येवेति भगवन्मनोगतं ज्ञेयम् ॥ ३५ ॥

यक्ष्मणा रोगेण गृहीतोऽपि यत्र स्नानमात्रं कृत्वा तस्मात् दुःखाद्विमुक्तः कलावृद्धिं भेजे ॥ ३६ ॥

उशिजः कमनीयान् अन्धसा अन्नेन ॥ ३७ ॥

उप्त्वेति । यथा सुक्षेत्रे बीजमुप्तं बहुफलं भवति तथा दानं सत्पात्रे इति द्योतयति ॥ ३८—४१ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

उडुराट् चन्द्रः दक्षशापाद्यक्ष्मणा गृहीतः यत्र प्रभासे स्नानमात्रं कृत्वा किल्बिषात् यक्ष्मदोषलक्षणात्पापाद्विमुक्तः सन् कलोदयं कलावृद्धिं भेजे ॥ ३६ ॥

नानागुणवता मधुरत्वादिगुणयुक्तेन अन्धसा अन्नेन उशिजः तपोवृत्तादिभिः कमनीयान् ॥ ३७ ॥

यथा सत्क्षेत्रे सत्फलसिद्धये बीजमुप्तं बहुफलं स्यात्तथा सत्पात्रे दानमिति द्योतयितुमाह । उप्त्वेति ॥ ३८ ॥ ३९ ॥

अरिष्टानि दुर्निमित्तानि ॥ ४०—४१ ॥

भाषा टीका ।

इसके अनन्तर उस द्वारका में उत्पन्न भये महा उत्पातों को देख कर आये हुये वृद्ध ज्ञानी मनुष्यों से भगवान् कृष्णचन्द्र यह वचन बोले ॥ ३३ ॥

श्री भगवानुवाच ।

इतने ए सब महा उत्पात इहां सब ठिकाने दीखते हैं और हमारे कुल को ब्राह्मणों का बडा भारी शाप भी होगया है ॥ ३४ ॥

हे वृद्धजनो ! इस से आगे हम को इहां नहीं रहना चाहिये बडे पुण्य वाले प्रभास क्षेत्र को आजही चलें जावें विलम्ब मत करो ॥ ३५ ॥

जिस प्रभास तीर्थ में स्नान करने से चन्द्रमा दक्ष के शाप से भया जो राजयक्ष्मा क्षय रोग तिस से शीघ्रही छूट गये और फिर पहिले से कलाओं को प्राप्त भये हैं ॥ ३६ ॥

हम भी उसी प्रभास में स्नान कर के पितर देवतों का तर्पण कर के अनेक प्रकार के गुणदायक अन्न का सुन्दर ब्राह्मणों को भोजन करावेंगे ॥ ३७ ॥

उन सत्पात्रों के अर्थ हम लोग बडे दान देवेंगे और श्रद्धा करेंगे तो जैसे नौकों से बडे समुद्र को तर जाते हैं तैसे हम भी सब दुःखों को तर जावेंगे ॥ ३८ ॥

श्री शुक उवाच ।

हे कुरु नन्दन ! परीक्षित् जो इस प्रकार से भगवान् के

विविक्त उपसङ्गम्य जगतामीश्वरेश्वरम् ।
प्रणम्य शिरसा पादौ प्राञ्जलिस्तमभाषत ॥ ४१ ॥

उद्धव उवाच ।

देवदेवेश ! योगेश ! पुण्यश्रवणकीर्तन ! ।
संहृत्यैतत्कुलं नूनं लोकं सन्त्यक्ष्यते भवान् ॥
विप्रशापं समर्थोऽपि प्रत्यहन्न यदीश्वरः ॥ ४२ ॥
नाहं तवाङ्घ्रिकमलं क्षणार्धमपि केशव ! ।
त्यक्तुं समुत्सहे नाथ ! स्वधाम नय मामपि ॥ ४३ ॥
तव विक्रीडितं कृष्ण ! नृणां परममङ्गलम् ।
कर्णपीयूषमास्वाद्य त्यजन्त्यन्यस्पृहां जनाः ॥ ४४ ॥
शय्यासनाटनस्थानस्नानक्रीडाऽशनादिषु ।
कथं त्वां प्रियमात्मानं वयं भक्तास्त्यजेम हि ॥ ४५ ॥
त्वयोपभुक्तस्रग्गन्धवासोऽलङ्कारचर्चिताः ।
उच्छिष्टभोजिनो दासास्तव मायां जयेमहि ॥ ४६ ॥
वातरशना य ऋषयः श्रमणा ऊर्ध्वमन्थिनः ।
ब्रह्माख्यं धाम ते यान्ति शान्ताः संन्यासिनोऽमलाः ॥ ४७ ॥
वयं त्विह महायोगिन् ! भ्रमन्तः कर्मवर्त्मसु ।
त्वद्वार्तया तरिष्यामस्तावकैर्दुस्तरं तमः ॥ ४८ ॥

भाषा टीका ।

आज्ञा देने से सब यादव प्रभास जाने का विचार कर के अपनी २ गाडी रथों को जोडते भये ॥ ३९ ॥

इतनी बात देख कर और भगवान् के वचन को सुन कर और बडे कठिन उत्पातों को देख कर सदा काल जो श्रीकृष्ण के अनुवर्तन करने वाले उद्धवजी एकान्त में जाकर जगत् के ईश्वरों के भी ईश्वर श्रीकृष्णचन्द्रचरणों को मस्तक से प्रणाम कर के हाथ जोड कर प्रार्थना करने लगे ॥ ४०—४१ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

लोकं मर्त्यलोकम् न प्रत्यहन् न प्रतिहतवान् ॥ ४२—४४ ॥

शय्यादिषु त्वां भक्ता नित्यं सेवितवन्तो वयं कथं त्यजेम ॥ ४५ ॥

त्यक्तुमशक्नुवन् प्रार्थये न मायाभयादित्याह । त्वयेति । चर्चिताः अलंकृताः हि निश्चितं जयेम ॥ ४६ ॥

संन्यासिनो हि ब्रह्मचर्यादिक्लेशैः कथंचित्तरन्ति वयं त्वनायासेनैव तरिष्याम इत्याह । वातरशना इति । ऊर्ध्वमन्थिनः ऊर्ध्वरेतसः ॥ ४७ ॥

तावकैर्भक्तैः सह त्वद्वार्तया दुस्तरं तमः संसारम् ॥ ४८ ॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

देवदेवेति सार्द्धकम् संहृत्य संहारानुकरणेन स्वसङ्गेनीत्वेत्यर्थः । अत एव नूनमिति वितर्के यद्यस्मात् ॥ ४२ ॥

अतएव स्वं वञ्चितं मत्वा प्रार्थयते । नाहमिति । यथा यादवान्नेष्यसि तथा मामपि नयेत्यपरार्थः ॥ ४३ ॥

स्वकर्त्तृकत्यागाशक्यत्वं कैमुत्येन दर्शयति । तवेति । विक्रीडितमिति भावे निष्ठा लीलाश्रवणेऽपि त्वदेकनिष्ठत्वं स्यात् किं पुनः साक्षाद्दर्शनादाविति भावः ॥ ४४ ॥

तदेवाह । शय्येति ॥ ४५ ॥

परोक्षपूजादावपि साधकभक्तानामपि उपभुक्तस्रगादिना तज्जयः सुप्रसिद्ध एव किं पुनः साक्षाद्वयमिति भावः ॥ ४६ ॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

वातरसनेति । रसनाशब्देन वस्त्रं लक्ष्यते हिरण्यरसन इत्यत्र चतुर्थे तैरेव तथा व्याख्यातत्वात् ते तव धाम स्वरूपम् ॥ ४७ ॥

वयं त्विति युग्मकम् । वयमिति साधकभक्तेषु स्वाभेदमङ्गीकृत्य बहुवचनं तरिष्यामस्तर्तुं शक्नुमेत्यर्थः ॥ ४८ ॥ ४९ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अतः विविक्ते एकान्ते तं श्रीकृष्णं समभाषत ॥ ४१ ॥

तदेवाह । देवेत्यादिना एवं विज्ञापित इत्यतः प्राक्तनेन । हे देव ! स्वतेजसा दीप्यमान हे देवानां ब्रह्मादीनामीश ! हे योगेश ! योगनिर्वाहक ! पुण्यं शृण्वतां कीर्त्तयतां च पुण्यावहं श्रवणं कीर्त्तनं च यस्य तस्य सम्बोधनं लोकं नूनं सन्त्यक्ष्यसे त्यक्तुमिच्छसि तथानुमिनोमीति भावः । कुतः हे ईश्वर ! यत् यस्मात्समर्थोऽपि विप्रशापं न प्रत्यहन्न प्रतिहतवान् ॥ ४२ ॥

ततः किमत आह । नाहमिति । त्यक्तुं नोत्सहे न मृष्यामि तर्हि किंविधेयमित्यत आह । स्वधाम नय मामपीति । स्वधाम वैकुण्ठम् ॥ ४३ ॥

त्यागोत्साहमसम्भावयन्नाह । तवेति । कर्णपीयूषं श्रोत्रयोरमृततुल्यं परममङ्गलावहं च तव विक्रीडितमेवास्वाद्य श्रुत्वाऽन्यस्पृहां देहतदनुबन्धिशब्दादिविषयस्पृहां त्यजति त्वामेवाश्रयत इत्यर्थः ॥ ४४ ॥

कथं पुनः शय्यादिषु सहवर्त्तमानं प्रियतमं तत्र हेतुरात्मानं त्वां कथं त्यजेमहि तत्रापि भक्ता वयं कथं त्यजेमहि ॥ ४५ ॥

त्वां त्यक्तुमशक्नुवन् स्वधाम नय मामिति प्रार्थये न तु संसृतिभयादित्यभिप्रेत्याह । त्वयेति । त्वयोपभुज्य त्यक्तैः स्रगादिभिश्चर्चिताः अलंकृताः त्वदुच्छिष्टभोजिनश्च दासा वयं तव मायां जयेम हि निश्चितं न मायातरणार्थमस्माभिर्यतितव्यमित्यर्थः ॥ ४६ ॥

त्वत्पदं त्वन्माधातरणं चास्माकं सुलभमेवासीदित्यभिप्रेत्याह । वातरसना इति । दिगम्बराः कौपीनमात्रधारिणः नतु नग्नाः श्रमणाः अनशनादिभिः श्रमवन्तः ऊर्ध्वमन्थिनः ऊर्ध्वरेतसः सन्न्यासिनः चतुर्थाश्रमिणः शान्ता रागद्वेषादिरहिताः ब्रह्माख्यमिति मध्यमपदलोपी समासः ब्रह्मलोकाख्यमित्यर्थः—

> एतं देवयानं पन्थानमापद्याग्निलोकमागच्छति
> स वायुलोकं स वरुणलोकं स आदित्यलोकम्
> स इन्द्रलोकं स प्रजापतिलोकं स ब्रह्मलोकम् ।
> अश्व इव रोमाणि विधूय पापं चन्द्र इव
> राहोर्मुखात्प्रमुच्य धूत्वा शरीरमकृतं कृतात्मा
> ब्रह्मलोकमभिसम्भवानि स वा एष दिव्येन चक्षुषा
> मनसैतान् कामान् पश्यन् रमते एते ब्रह्मलोक

इत्यादिषु ब्रह्मलोकत्वेन प्रसिद्ध इत्यर्थः । तत् ते तव धाम स्थानं यान्ति ॥ ४७ ॥

एवमन्ये ब्रह्मचर्यादिभिः क्लेशैस्तरन्ति वयं त्वनायासेन तरिष्याम इत्याह । वयं त्विति । हे महायोगिन्निह संसारे कर्मवर्त्मसु कर्मार्जितेषु सुखदुःखादिषु स्वर्गनरकपद्धतिषु वा भ्रमन्तोऽपि वयं तावकैस्त्वद्भक्तैः सह त्वद्वार्त्तया दुरन्तमपि तमः तमःकार्यं संसारं तरिष्यामः अनायासेनेति शेषः ॥ ४८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भवान् समर्थोऽपि विप्रशापं न प्रत्यहन् यस्मान्नूनमिदानीं लोकं संत्यक्ष्यते ॥ ४१—४४ ॥

शय्यासनादिषु प्रियम् ॥ ४५ ॥

तवाधीना मायां प्रकृतिम् ॥ ४६ ॥

श्रमणा भिक्षावृत्तयः ॥ ४७ ॥

तावकैः तव भक्तैः सह त्वद्वार्त्तया ॥ ४८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

देवदेवेति सार्द्धकम् । अत एव नूनमिति वितर्कोक्तिः संहृत्य संहारमुद्रया स्वसङ्गेन नीत्वेत्यर्थः ॥ ४२ ॥

अतः स्वस्मिंस्तद्द्वोपनमनयनं दृष्ट्वा प्रार्थयते । नाहमिति । यथा यादवाञ्छेष्यस्येव तथा मामपि नयेत्यपिशब्दार्थः स्वकर्तृकत्यागाशक्यत्वं कैमुत्येन दर्शयति । तवेति ॥ ४३—४४ ॥

तदेवाह । शय्येति ॥ ४५ ॥

त्यक्तुमशक्नुवन्नेव प्रार्थये न मायाभयात् अतः साधकभक्तानामपि तत्करणमारोपितत्वत्सम्बन्धेनापि सुखसाध्यमिति दर्शयन् सजातीयवासनत्वेन तेष्वपि स्वाभेदमङ्गीकृत्वैवस्मत्प्रयोगेणैव तेषां तदाह । त्वयोपभुक्तेति । परोक्षपूजादावपीति भावः । जयेम जेतुं शक्नुमः ॥ ४६ ॥ ४७ ॥

वयमिति युग्मकम् । तरिष्यामस्तर्तुं शक्नुमेत्यर्थः ॥ ४८—५० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

देवानामपि देवा ब्रह्मादयस्तेषामीशेति देवकार्यं ब्रह्मप्रार्थितं च त्वया सर्वं सम्पादितमिति भावः । न केवलमेतदर्थमेवावतीर्णस्त्वमभूः किन्तु दुर्वितर्कविचित्ररसमयरूपगुणचरित्रप्रकाशनया भक्तजनानन्दनार्थमपीत्याह । हे योगेशेति यदुक्तं “यन्मर्त्यलीलौपयिकं स्वयोगमायाबलं दर्शयता गृहीत”मिति जनिष्यमाणजनतानिस्तारार्थमपीत्याह । पुण्येति । अत एव त्वदीयसर्वविधिस्त्तिलस्य निष्पन्नत्वादिदानीमिमं लोकं सन्त्यक्ष्यते नूनमिति वितर्कं भवानन्तर्धास्यतीति तर्कयामि किं च शापनिवर्त्तकं प्रभासस्नानमुपदिशसि किं त्वद्दर्शनादपि प्रभासस्नानमधिकं भवेत् विप्रशाप एषां मा फलत्विति तव मनोगते सत्यपि किं शापः प्रभवितुं शक्नुयात् तस्मात्तवात्र अन्तर्द्धित्सैव दृश्यते यत् यतः समर्थोऽपि भवान् विप्रशापं न प्रत्यहन् न प्रतिहतवान् ॥ ४२ ॥

नन्वीश्वरोऽहं यथेच्छामि तथा करोमि तेन तव किमिति चेत्तत्राह । नाहमिति ॥ ४३ ॥

अन्यस्पृहां पुत्रकलत्रादिमोक्षान्तस्पृहां त्यजन्ति नतु विक्रीडितं त्यक्तुं शक्नुवन्ति अहं तु त्वामपि त्यक्तुं कथं शक्नुयामिति भावः ॥ ४४ ॥

किं च शय्यादिषु त्वां भक्ताः पादसंवाहनाद्यैः नित्यं सेवितवन्तो वयं कथं त्यजेम ॥ ४५ ॥

स्मरन्तः कीर्तयन्तस्ते कृतानि गदितानि च ।
गत्युत्स्मितेक्षणक्ष्वेलि यन्नृलोकविडम्बनम् ॥ ४९ ॥

श्रीशुक उवाच ।

एवं विज्ञापितो राजन् ! भगवान् देवकीसुतः ।
एकान्तिनं प्रियं भृत्यमुद्धवं समभाषत ॥ ५० ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
वैयासिक्याम् एकादशस्कन्धे
षष्ठोऽध्यायः ॥ ६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

त्वत्कृपयैवानुवत्स्येव प्रार्थये नतु मायाभयादित्याह । त्वयेति । मायां जयेमेति सा यद्यस्मान् प्रतिविक्रम्यन्ती आयाति तर्ह्येतैरेवास्त्रैः प्रबलीभूय तां जयेम नतु ज्ञानादिभिरित्यर्थः ॥ ४६ ॥

वातरसनाद्यास्तैस्तैर्ज्ञानवैराग्यादिभिः साधनैर्ब्रह्माख्यं तव धाम [तत्परं परमं ब्रह्म सर्वं विभजते जगत् । ममैव तत् घनं तेजो ज्ञातुमर्हसि भारते]अर्जुनं प्रति त्वदुक्तेस्तवैव तेजोविशेषं ते यान्ति सत्यं ते यान्तु वयन्तु न तत् यियासामः किन्तु त्वन्मुखचन्द्र-मधुरस्मितसुधापानमत्ता एव तिष्ठासाम इति भावः ॥ ४७ ॥

किञ्च त्वदेकान्तिनो महाभक्ता मायातरणं भक्तेः फलत्वेन नैवानुसन्दधते वयन्तु न तादृशा इति तादृशीं प्रौढिं कथं कुर्म इति दैन्येनैवात्मनि मायातितीर्षामारोप्याह । वयन्त्विति । तुर्भि-न्नोपक्रमे वयन्तु दासा अपि मध्यरस्यावलम्बिनस्त्वदाश्रयापि ज्ञाना-द्यासमचिकीर्षव एवेति भावः । हे महायोगिन्निति तव योगमायां मायाञ्च नैव विविदिषाम इति भावः । तावकैस्त्वद्भक्तजनैः सहेति ते खलत्वमलुव्धस्वभावा एवेति तैरेवास्माकं साहित्यमुपपद्यते न वातरसनाद्यैरिति भावः । तत्तरणे वः कः प्रकार इत्यत आह । स्म-रन्त इति । त्वदीयचरित्रश्रवणकीर्तनादिसुदर्शनास्त्रतेजसैवा-स्माकं तत्तमस्तरणं सुगममेवेति भावः । क्ष्वेलिः प्रेयस्या सह सौरतपरिहासः ॥ ४८ ॥ ४९ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

लोकं भूलोकम् न प्रत्यहन् प्रतिहृतवान् ॥ ४२—४४ ॥

शय्यादिषु प्रियम् अतिस्नेहविषयं त्वामात्मानमन्तर्यामिणं वयं भक्ताः कथं त्यजेमहि ॥ ४५ ॥

ननु मायातो भीतोऽसि किं तत्राह । त्वयेति । चर्चिताः अलं-कृताः मायां कार्यकारणरूपां प्रकृतिम् ॥ ४६ ॥

श्रमणा भिक्षावृत्तयः ऊर्ध्वमन्थिनः ऊर्ध्वरेतसः नैष्ठिकादयः शान्ता बहुयत्नेन शान्तिं प्राप्ताः ब्रह्माख्यं बृहत्त्वेन ब्रह्मनामकं धाम स्थानं यान्ति अर्चिरादिमार्गेण प्राप्नुवन्ति "ब्रह्मणः सदनादूर्ध्वं तद्विष्णोः परमं पदं शुद्धं सनातनं ज्योतिः परं ब्रह्मेति यद्विदुरिति" महा-भारते भगवद्वाक्यतः ब्रह्माख्यत्वं सुप्रसिद्धम् ॥ ४७ ॥

वयं तु सुगमेनोपायेन मायां तीर्त्वा तद्यास्याम इत्याह । वयं त्विति । तावकैस्त्वद्भक्तैः सह त्वद्वार्तया तमः संसारं तरि-ष्यामः ॥ ४८ ॥

———

भाषा टीका ।

उद्धव उवाच ।

हे देवदेवों के ईश ! हे पुण्यश्रवणकीर्तन ! मेरे को माळूम होता है कि आप इस कुलको संहार कर के इस लोक का त्याग करोगे जिस से कि ब्राह्मणों के शाप के नाश करने को समर्थ हो तो भी आप ने नाश नहीं किया है ॥ ४२ ॥

हे केशव ! हे नाथ ! मैं आप के चरण कमल को आधे क्षण भी छोडने नहीं चाहता हूं मेरे को भी आप अपने धाम को लेजाओ ॥ ४३ ॥

हे कृष्ण ! आप का क्रीडा चरित्र मनुष्यों को परम मङ्गल कारक है उस चरित्र रूपकर्ण के अमृत को प्राप्त हो ने से मनुष्य और मनोरथों को छोड देते हैं ॥ ४४ ॥

शयन बैठना चलना स्नान क्रीडा भोजन इत्यादि कों में आप के सङ्ग रहने वाले प्रिय भक्त हम लोग आप आत्मा अंतर्यामी को कैसे छोड सके हैं ॥ ४५ ॥

आप के भोगे हुये फूलमाला वस्त्र अलङ्कार इनों से भूषित होकर आप के उच्छिष्ट प्रसाद को पाकर हम लोग आप के दास आप की माया को जीत जाते हैं ॥४६॥

दिगम्बर परिश्रम वाले सन्यासी जो ऊर्ध्वरेता ऋषि जन निर्मल मन वाले शान्त पुरुष आप के ब्रह्मनामक धाम को जाते हैं ॥ ४७ ॥

हे महायोगि ! हम लोग तो इहां कर्म मार्गों में भ्रमते हुये हैं तौ भी आप के भक्तों के सङ्ग में आप का चरित्र कथन करने से संसार को तर जावैंगे ॥ ४८ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

क्ष्वेली परिहासः द्वन्द्वैकत्वम् ॥ ४९

श्रीधरस्वामिकृतभावार्थदीपिका ।

एकान्तिनमित्यादि । स्वाभिप्रायावज्ञने हेतुः ॥ ५० ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
षष्ठोऽध्यायः ॥ ६ ॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

सम्यक् निष्कैतवतयाऽभाषत ॥ ५० ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धीये
श्रीराधारमणदासगोस्वामिकृतदीपिकादीपने टिप्पणे
षष्ठोऽध्यायः ॥ ६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

इति श्रीमद्भागवतव्याख्याने एकादशस्कन्धीये
श्रीसुदर्शनसूरिकृतशुकपक्षीये
षष्ठोऽध्यायः ॥ ६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

कथं भूताः सन्तस्तव कृतानि चेष्टितानि गदितानि सूनृतानि स्वोक्तिः परिहासः गत्यादीनां द्वन्द्वैकवद्भावः तत्र नृलोकविडम्बनं मनुष्यचेष्टानुकरणं तच्च स्मरन्तः स्मारयन्तश्च तरिष्याम इति पूर्वेण सम्बन्धः ॥ ४९ ॥

हे राजन्नेकान्तिनमनन्यदैवतमत एव प्रियं भृत्यं चोद्धवं समभाषत ॥ ५० ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
षष्ठोऽध्यायः ॥ ६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

गत्युत्स्मितेक्षणोक्ष्वेलि यन्नृलोकविडम्बनं तानि च तच्च स्मरन्तः उत्पन्नतत्त्वज्ञानोऽप्युद्धवो भ्रमन्त इत्यात्मनो ऽवमतां वक्तीति सत्साधूनां स्वभाव इति प्रदर्शनाय "आत्मनो ऽवमतां ब्रूयुरुत्तमा अपि सर्वशः । कदाचिदेवे स्वगुणान् स्निग्धेष्वेव हि साधव" इति वचनादुक्तं युक्तमिति ॥ ४९ ॥

एकः श्रीहरिरेव सर्वोत्तम इति भावो यस्य स एकान्तिनं मुख्यप्रियमिति वा "एके मुख्यान्यकेवला" इत्यभिधानम् ॥ ५० ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
षष्ठोऽध्यायः ॥ ६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धीये
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
षष्ठोऽध्यायः ॥ ६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

एकान्तिनमित्यादिकं स्वाभिप्रायावज्ञने हेतुः ॥ ५० ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
एकादशस्य षष्ठोऽयं सङ्गतः सङ्गतः सताम् ॥६॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

गत्यादीनां द्वन्द्वैकत्वं क्ष्वेली परिहासः कृतादीनि स्मरन्तः कीर्तयन्तश्च सन्तः तमस्तरिष्याम इति पूर्वेणान्वयः । एवं भक्त्युपाये सिद्धेऽपि भगवत्संगन्तु दुस्त्यज एवेति भावः ॥ ४९—५० ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
षष्ठाध्यायार्थप्रकाशः ॥ ६ ॥

भाषा टीका ।

आप के किये हुये कहे हुये चरित्रों को स्मरण करके कीर्तन कर के आप की चाल मन्द हास से देखना परिहास आदिकों में जो मनुष्य नाट्य है तिसको स्मरण कर के हम लोग संसार को तर जावेंगे ॥ ४९ ॥

श्री शुक उवाच ।

हे राजन् ! परीक्षित इस प्रकार से प्रार्थना करने से देवकीनन्दन भगवान् एकान्ति प्रिय उद्धव भक्त के प्रति अच्छे तरह कहने लगे ॥ ५० ॥

इति श्रीमद्भागवत एकादशस्कन्ध षष्ठाऽध्याय
श्रीवृन्दावनस्थ पं० भागवताचार्यकृत
भाषा टीका समाप्ता ॥ ६ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे षष्ठोऽध्यायः ॥ ६ ॥

—:*:—

अथ सप्तमोऽध्यायः ।

———*:———

श्रीभगवानुवाच ॥

यदात्थ मां महाभाग ! तच्चिकीर्षितमेव मे ।
ब्रह्मा भवो लोकपालाः स्वर्वासं मेऽभिकाङ्क्षिणः ॥ १ ॥

मया निष्पादितं ह्यत्र देवकार्यमशेषतः ।
यदर्थमवतीर्णोऽहमंशेन ब्रह्मणाऽर्थितः ॥ २ ॥

कुलं वै शापनिर्दग्धं नङ्क्ष्यत्यन्योऽन्यविग्रहात् ।
समुद्रः सप्तमेऽह्न्येतां पुरीं च प्लावयिष्यति ॥ ३ ॥

यर्ह्येवायं मया त्यक्तो लोकोऽयं नष्टमङ्गलः ।
भविष्यत्यचिरात्साधो ! कलिनाऽपि निराकृतः ॥ ४ ॥

न वस्तव्यं त्वयैवेह मया त्यक्ते महीतले ।
जनो ऽधर्मरुचिर्भद्र ! भविष्यति कलौ युगे ॥ ५ ॥

त्वं तु सर्वं परित्यज्य स्नेहं स्वजनबन्धुषु ।
मय्यावेश्य मनः सम्यक् समदृग्विचरस्व गाम् ॥ ६ ॥

यदिदं मनसा वाचा चक्षुर्भ्यां श्रवणादिभिः ।
नश्वरं गृह्यमाणं च विद्धि मायामनोमयम् ॥ ७ ॥

पुंसोऽयुक्तस्य नानाऽर्थो भ्रमः स गुणदोषभाक् ।
कर्माकर्मविकर्मेति गुणदोषधियो भिदा ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सप्तमे तूद्धवस्यात्मज्ञानसिद्ध्यै हरिः स्वयम् ।
अवधूतेतिहासोक्तगुरुषट्कामवर्णयत् ॥

यदात्थ संहृत्यैतत्कुलमिति स्वर्वासं वैकुण्ठवासं प्रति ॥१॥२॥

त्वं च सर्वत्यागेनाऽऽत्मनिष्ठो भवेति वक्तुमाह । कुलमिति त्रयेण ॥ ३ ॥

तदैवायं नष्टमङ्गलो भविष्यति निराकृतो नितरामाक्रान्तः ॥४॥

न वस्तव्यमेव त्वया ॥ ५—६ ॥

ननु गुणदोषाभ्यां विषमे लोके कुतः समदृष्टिः स्यामत आह । यदिदमिति । मनआदिभिर्गृह्यमाणं मनोमयत्वान्मायेति विद्धि तदपि न स्थिरं किन्तु नश्वरं विद्धि ॥ ७ ॥

मनोमयत्वे हेतुः । पुंस इति । विक्षिप्तमनसः नानार्थो भेदविषयो भ्रमः स भ्रम एव गुणदोषभाक् ननु वेदेनैव विधिनिषेधाभ्यां भेदस्य सत्यतोक्ता न भ्रमविजृम्भितगुणदोषबुद्धेः कर्म विहितम् अकर्म तल्लोपः विकर्म निषिद्धमिति भेदः अविद्यावद्विषय एव वेद इत्यर्थः ॥ ८ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी ।

यत्कुलसंहारादिकं स्वधाम्नि तव नयनं चात्थ ॥ १ ॥

अंशेन बलदेवेन सह ॥ २ ॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

शापनिर्दग्धमित्यनुकरणाभिप्रायेण वस्तुतस्तु शापेऽपि निर्गतं दग्धं दाहो यस्मात्तादृशं सत् नङ्क्ष्यति प्राकृतलोकानामदर्शनमेव प्राप्स्यतीत्यर्थः । प्लावयिष्यति समुद्रः स्वदत्तभूमौ चतुर्दिक्ष्वावरिष्यति नतु मध्येऽपि "वर्जयित्वा महाराज ! श्रीमद्भगवदालय"मिति वक्ष्यमाणत्वात् ॥ ३ ॥

यर्ह्येव त्यक्तस्तदैवेत्यन्वयः ॥ ४ ॥

नवस्तव्यमेवेति । एकत्र स्थानं बद्ध्वा न स्थेयमित्यर्थः । समदृग्विचरस्व गामित्युक्तेः ॥ ५ ॥

यद्यपि नोद्धवोऽप्यवपि मन्न्यूनो यद्गुणैर्नार्दित इति भगवदुक्तेरुद्धवस्य सिद्धत्वेनोपदेश्यत्वं न सम्भवति तथापि तन्मतादरणाय तमुपदिश्य ज्ञानयोग्यान् प्रत्याह । त्वन्त्विवति सप्तभिः । समं ब्रह्मैव पश्यतीति तथाभूतः सन् ॥ ६ ॥

मनोमात्रविलासितत्वात् मायेति मिथ्येति विद्धि तदपि मिथ्याभूतमपि ॥ ७ ॥

अयुक्तस्य पुंसः नानाभेदो विषयो यस्य तथाभूतो भ्रमो भवति स भ्रम एव गुणदोषबुद्धिहेतुर्भवतीत्यन्वयः । नेति समाधानं भ्रमेति भ्रमेण विजृम्भिता प्रकाशिता गुणदोषबुद्धिर्यस्य तस्यैव अविद्याऽनात्मनि आत्मबुद्धिस्तद्वन्तोऽज्ञा विषया अधिकारिणो यस्य तथाभूत एव विधिनिषेधलक्षणो वेदः नतु स्वरूपज्ञविषयः "त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्ज्जुने"ति श्रीभगवदुक्तेः ॥ ८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

॥ १—५

गां भूमिम् ॥ ६ ॥

मायामनोमयं मायाशब्देन गुणाः लक्ष्यन्ते गुणवश्यमनोग्राह्यं न विद्वन्मनोग्राह्यम् आत्मस्वरूपमेव तथा विद्धीत्यर्थः ॥ ७ ॥

अयुक्तस्य इति पदं नानार्थो भ्रमः नानाविधदेहविषयभ्रमः सगुणदोषकृत् पुण्यपापहेतुरित्यर्थः । तदेवोपपादयति । कर्मेति । कर्म काम्यं विकर्म पापम् उभयमपि दोषः अकर्म निष्कामकर्म स गुण इत्यर्थः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

भाषणमेवाह । यदित्यादिना । हे महाभाग ! मां प्रति यदात्थ संहृत्यैतत्कुलं नूनं लोकं सन्त्यक्ष्यते भवानिति तन्मे चिकीर्षितमेव तथा ब्रह्मा भवो रुद्रः लोकपालाश्च मम स्ववासं श्रीवैकुण्ठवासमभिकाङ्क्षिणः अभिकाङ्क्षन्त इत्यर्थः ॥ १ ॥

नन्ववतारप्रयोजनमनिष्पाद्य कथं गमिष्यसीत्यत आह । मयेति । किन्तदेवकार्यमित्यत आह । यदर्थमिति । ब्रह्मणाऽर्थितः प्रार्थितोऽशेन बलभद्रेण सह यदर्थमवतीर्णः तद्भूभारहरणात्मकमिति भावः ॥ २ ॥

ननु न भारोऽपनीतः दुःसहभारात्मकस्य यदुकुलस्यावशिष्टत्वादित्यत आह । कुलं वा इति । शापेनैव नितरां दग्धप्रायमन्योऽन्यकलहाग्निरवशेषं नङ्क्ष्यति वै निश्चितं तर्हि पुरीं कः पालयिष्यतीत्यत आह । समुद्र इति । न कोऽपि पालयिष्यति किन्त्वित आरभ्य सप्तमेऽन्हि एतां द्वारकां पुरीं समुद्रः प्लावयिष्यति नाशयिष्यतीत्यर्थः ॥ ३ ॥

त्वया त्विह न स्थातव्यमिति वक्तुमाह । यर्हीति । यर्ह्ययं लोको मया त्यक्तः तदैवाचिरान्नष्टमङ्गलः हे साधो ! कलिना निराकृतः अभिभूतश्च भविष्यति ॥ ४ ॥

अतो मया त्यक्ते इहास्मिन्महीतले त्वया न वस्तव्यं न स्थातव्यं हे भद्र ! अधर्मे रुचिर्यस्य तथा भूतो भविष्यति अतोऽपीह न वस्तव्यमित्यभिप्रायः ॥ ५ ॥

तर्हि किम्विधेयं क्व गन्तव्यमित्यत आह । त्वन्त्विति । सर्वं शब्दादिविषयं स्वजनेषु बन्धुषु स्नेहं च त्यक्त्वा मनो मयीश्वरे सम्यक् निवेश्य समदृक् सर्वस्य ब्रह्मात्मकत्वानुसन्धानरूपसमदृष्टिमान् गां भूमिं विचरस्व ॥ ६ ॥

सर्वं परित्यज्येति शब्दादिविषयत्याग उक्तः वैराग्यमन्तरेण त्यागासम्भवात्तत्र वैराग्यजननार्थं तेषां नश्वरत्वं प्रकृतिगुणवश्यमानसानामेव सुखकरत्वं चाह । यदिदमिति । यन्मनआदिभिर्गृह्यमाणं तदिदं सर्वं नश्वरं मायामनोमयं च विद्धीति सम्बन्धः मायाशब्देन तद्गुणवश्यं लक्ष्यते मायागुणवश्यं यन्मनः तत आगतं "तत आगत इत्यधिकारे मयट् च" इति मयट् प्रकृतिगुणवश्यमनोजन्यमेव विषयसुखं गुणवश्यमानसानामेव तद्रोचते नतु विशुद्धमानसानामित्यर्थः ॥ ७ ॥

समदृग्विचरस्वेत्युक्तं ननु देवमनुष्यतिर्यक्पादपादिभेदभिन्नतया प्रतीयमानेषु वस्तुषु विभिन्नैव दृष्टिः स्यान्न त्वेकरूपेत्यत आह । पुंस इति । अयुक्तस्य सर्वान्तरात्मनि सर्वशरीरके मयि चित्तमयुञ्जतः पुंसः नानार्थः नाना अर्था यस्य सः यो नानार्थविषयः प्रत्ययः स भ्रमरूपः तत्तद्ब्रह्मात्मकस्वतन्त्रवस्तुविषया प्रतीतिर्भ्रमरूपैवेत्यर्थः । सर्वान्तरात्मनि मयि चित्तं युञ्जतस्तु मदात्मकत्वेनैकरूपा या प्रतीतिः सा तु प्रमितिरूपेति भावः । अस्तु नानार्थो भ्रमः ततः किमत आह । गुणदोषभागिति यस्य पुंसो भ्रमः स, गुणदोषभाक् सुखदुःखभाक् पुण्यापुण्यभाग्वा गुणदोषकृदितिपाठे स भ्रमो गुणदोषकृत्सुखदुःखकृदित्यर्थः । किं भ्रमः स्वरूपेणैव गुणदोषावहः नेत्याह । कर्मेति । यस्य कर्माकर्मविकर्मेतिभिदा भेदः तस्य धियः गुणदोषौ विषयौ गुणदोषधिय इति पाठे कर्मादयस्तदनुवृत्तिप्रयुक्तसुखदुःखबुद्धयश्चेत्यर्थः । कर्मावश्यं कर्त्तव्यं नित्यं नैमित्तिकञ्च अकर्म अकर्तव्यं प्रतिषिद्धमित्यर्थः । विकर्म विविधफलाय चोदितं काम्यं कर्म अयमर्थः स्वतन्त्रवस्तुभ्रमदेहात्मभ्रमतोऽज्ञस्य पुंसः विधिनिषेधाद्यात्मकभेदभिन्नशास्त्रवश्यता तदनुवर्त्तनातिलङ्घनाभ्यां सुखदुःखे च भ्रमस्य शास्त्रवश्यतापादनद्वारा गुणदोषकृत्वं न स्वरूपेणेति नचैतावता ब्रह्मविदां शास्त्रातिलङ्घनं न दोषायेति मन्तव्यं तेषामपि निश्चितं स्वतन्त्रवस्तु प्रतीतिभ्रमाणामामोचं कदाचिद्भ्रमानुवृत्तिदर्शनात्तत्प्रयुक्तशास्त्रवश्यत्वस्यावर्जनीयत्वात् न ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भगवान्यद्ववधूतसंवादव्याजेन स्वतन्त्रमुद्धवायोपदिशत्यध्यायत्रयेण तत्रादावुद्धवोक्तं स्वाभीष्टमिति वदन् ब्रह्मादीनां स्वलोकगमनाभिलाषं देवकार्यकरणेनावतारप्रयोजनं स्वयात्रानन्तरं द्वारवत्याः समुद्रे मज्जनं लोकस्य पापबुद्धित्वेनामङ्गलत्वं कलिग्रस्तलोकादुद्धवस्य निर्याणप्रेरणं स्वात्मन्मनः प्रवेश्य महीपर्यटननियोग इत्यादि वक्ति । यदात्थमामित्यादिना । मां स्वलोकगतं कर्तुमभिकाङ्क्षिणः ॥ १—२

स्वर्गारोहणानन्तरं सप्तमे दिवसे ॥ ३ ॥

यर्हि यदा ॥ ४ ॥

अधर्मरुचिरिति पदच्छेदः ॥ ५—६ ॥

क्षितिसंचरणे इत्थं भावविशेषमुपदिशति । यदिदमिति । मनआदिसर्वेन्द्रियैर्गृह्यमाणं यदिदं विश्वं तदिदं नश्वरं क्षणभङ्गुरं विद्धि नन्विदमनिर्वाच्यं तर्हीति तत्राह । विद्धीति । विद्धीत्युभयत्र संबध्यते मनोमयीं मायां च मन्मनःप्रधानप्रकृतिनिर्मितं विद्धि मे बुद्धिं प्रधानीकृत्य प्रकृत्या रचितत्वात् नानिर्वाच्यं विद्धि मृद्घट इति वन्मायामयमिति प्रयोगा युज्यन्ते अचेतनप्रकृतेः कार्यात्मकत्वमस्तु चेतनायाः कथमिति इयमाशङ्का "प्रकृतिः सा परा मह्यं रोदसी लोकधारिणी । ऋता सत्यामरा जय्या लोकानामात्मसंज्ञिते"त्यनेन परिहर्तव्या प्राधान्यापेक्षयोपपद्यत इत्यर्थः ॥ ७ ॥

एवं प्राधान्यज्ञानपूर्वकं भक्त्या मयि मनो युञ्जानस्य योगिनोऽनर्थोपशमो नान्यस्येत्याह । पुंस इति । अयुक्तस्य मयि मनो योगरहितस्य पुंसो मत्प्रेरितप्रकृतिरचिते नानाविधेऽर्थे यो भ्रमो मामन्तरेण स्वकर्तृत्वज्ञानं स गुणदोषकृत् स्वर्गनरककृत् अनेन तद्भोज्यसुखदुःखात्मकः अपारः संसारो लक्ष्यत इति ज्ञातव्यं तदुक्तं "स्वर्गाद्याश्च गुणाः सर्वे दोषाः सर्वे तथैव च । आत्मनः कर्तृताभ्रान्त्या जायन्ते नात्र संशयः । परमात्मानमेवैकं कर्तारं वेत्ति यः पुमान् । स मुच्यतेऽस्मात्संसारात्परमात्मानमेति चेति" भ्रमस्य निमित्तमाह । कर्मेति सर्वं हि परमेश्वरः करोतीति ईश्वराधीनक्रियायाम् इदं मया क्रियते इदं मया न क्रियते इदं विपरीतं क्रियत इति कर्माकर्मविकर्मेति भिदा बुद्धिभ्रमो गुणाभ्यां रजस्तमोभ्यां दोषधियो दोषबुद्धेः पुरुषस्य भवतीति यतोऽस्माद्भ्रमस्य मूलकारणं रजस्तमसोः शक्तिं विज्ञाय तौ परिहृत्य मय्येव स्थापनेन युक्तेन्द्रियजयो युक्तचित्तस्त्वम् इदं जगदात्मनि विरिञ्चे ईक्षस्व कार्यकारणात्मके जगति विततं विस्तृतशक्तिमात्मानं विरिञ्चिम् अधीश्वरे मयि ईक्षस्व मदाधारं पश्येत्यन्वयः तदुक्तम् "आत्मशब्दोदितो ब्रह्मा परमात्माभिधो ह्यहम् सर्वं ब्रह्मणि वीक्षेत मयि ब्रह्माणमेव चेति ॥ ८—९ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

यदुकुलसंहारादिकं स्वधाम्नि तव नयनं चात्थ ॥ १ ॥

अंशेन बलदेवेन सह ॥ २ ॥

शापनिर्दग्धमित्यनुकरणाभिप्रायं वस्तुतस्तु शापेऽपि निर्गतं दग्धं दाहो यस्मात्तथाभूतं सत् नङ्क्ष्यति अदर्शनमेव प्राप्स्यतीत्यर्थः । प्लावयिष्यति चतुर्दिक्ष्वावरिष्यति नतु मध्येऽपि "वर्जयित्वा महाराज श्रीमद्भगवदालय" मिति वक्ष्यमाणात् ॥ ३ ॥

तव स्वधामनयनं तु किञ्चिद्विलम्बेनैव करिष्यामि यतो मुनिषु मदुपदेशग्रहणाय सम्प्रति त्वां स्थापयिष्यामीत्यभिप्रेत्य तथोपदेष्टुमुपक्रमते । यर्ह्येवेति । नोद्धवोऽण्वपि मन्न्यूनो यद्गुणैर्नार्दितः प्रभुः । अतो मद्वयुनं लोकं ग्राहयन्निह तिष्ठत्विति तृतीयस्य तदुक्तेः ॥ ४—५ ॥

अनन्तरमुपलक्ष्य तदुपदेश्यान् प्रत्येवाह । त्वं त्वित्यादि । यदि सर्वनिजोपदेशेन तत्र ज्ञानयोग्यान् प्रत्येवाह । त्वं त्विति सप्तभिः ॥ ६ ॥

जागरे मायाप्रधानं स्वप्ने मनःप्रधानं विद्धि अत एव नश्वरं विद्धीत्यर्थः ॥ ७ ॥

अयुक्तस्य । असमाहितचित्तस्य भ्रम एव तावन्नानार्थः बहुविधार्थो यत्र तथाविधः स एष च गुणदोषभाक् गुणदोषबुद्धिहेतुरित्यर्थः । अतः कर्माकर्मेति ॥ ८—९ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

सप्तमे ज्ञानवैराग्ये विभित्सुः कृष्ण उद्धवे ।
अवधूतोक्तगुरुषु प्रोवाचाष्टौ धरादिकान् —

स्वर्वासं वैकुण्ठवासम्प्रति ॥ १ ॥

अंशेन बलदेवेन सह ॥ २ ॥ — ॥ ३ ॥

अत्रान्तरे मनसि भगवान् किञ्चित्परामर्शं रुक्मिण्यादिविवाहबाणाद्यसुरवधप्रसङ्गतस्तत्र तत्र बन्धुमिलनप्रसङ्गतश्चेन्द्रप्रस्थमिथिलादिषु च यातायातैर्मां दिदृक्षूणां भूतलस्थभक्तानां मनोरथो मया प्रायः सम्पादित एव पृथिव्या अधः स्थितानां बलिराधिनन्दनादीनामपि षड्गर्भानयनगुरुपुत्रानयनप्रसङ्गेन ऊर्ध्वस्थानामदितिकश्यपादीनामपि पारिजाताद्याहरणप्रसङ्गेन महावैकुण्ठस्थानामादिपुरुषभूमादीनामपि विप्रबालकानयनप्रसङ्गेन वाञ्छितं मद्दर्शनं निष्पादितमेव किन्तु बदरिकाश्रमवासिनां नरनारायणादिपरमहंसमहामुनीन्द्राणामेव मद्दर्शनौत्सुक्यं न सफलीभूतं बभूव सम्प्रति तु सपादशतवर्षपर्यन्ता मत्प्राकट्यमर्यादा च वृत्तेत्यतस्तत्र प्रस्थापयितुमयमुद्धव एव निरूपयितव्यः अयं हि मत्तुल्यत्वान्मत्प्रतिमूर्तिरिव तेभ्यः उपायनत्वेन देयं मदीयभगवच्छब्दवाच्ययोर्ज्ञानवैराग्ययोरेकमेकं कणं मद्भक्तियोगं च महानर्घ्यं रत्नमिवादाय यास्यंस्तेषां मनोऽभीष्टं स्पष्टमेव पूरयिष्यति यद्यप्यस्य मत्प्रेमपरिपूर्णस्य तदुत्थे ज्ञानवैराग्ये वर्तेते एव सम्प्रति मयोपदेष्टव्ययोः पृथक्ज्ञानवैराग्ययोर्नास्त्येवास्य जिघृक्षा तदपि मदिच्छायां सत्यां तत्राप्यस्य जिघृक्षा स्वल्पधुनैवोत्पत्स्यते तथैव यद्यप्यस्य मद्विच्युतौ सद्य एव प्राणहानिस्तदपि मदिच्छाशक्तिरेव बलवती प्राणानस्य पालयित्वा तावद्दूरमप्येनं यापयिष्यति प्रापञ्चिकलोकालक्षितं मदन्तिकेऽपि स्थापयिष्यतीति परामृश्य च श्रीमदुद्धवचेतसि ज्ञानवैराग्ययोर्भक्तियोगस्य च जिघृक्षां संचार्याह । त्वं त्विति । स्वजनबन्धुषु यादवादिषु स्नेहं परित्यज्येति तेषु तव स्नेहो द्विविधः मत्परिचयात् प्रथमत एव स्वदेहसम्बन्धेनैकः मत्सम्ब-

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

न्योऽन्यो द्वितीयः तत्र पूर्व एव त्वया त्यक्तुं शक्यः स एव मया त्यागे विधीयते नतूत्तरः त्वदशक्यत्वाद्विगीतत्वाच्चेति भगवदाशय उद्धवेन ज्ञायत एव ॥ ४—६ ॥

ननु कीदृशं समदृक्त्वन्तत्राह । यदिदमिति । मनआदिभिर्गृह्यमाणं यदिदं पृथिव्यादिकं वर्त्तते तत्सर्वं जागरे मायामयं मायाकल्पितत्वांशेन तुल्यमेव स्वप्ने मनोमयं मनःकल्पितत्वेनांशे सर्वतुल्यमेव ॥ ७ ॥

उक्तमेवार्थं प्रपञ्चयति । पुंस इति । नानार्थो नानाविधोऽर्थो यो गुणदोषभाक् अयमर्थो गुणं भजत इत्युत्कृष्टः अयमर्थो दोषं भजत इति निकृष्टः पुंसोऽयुक्तस्याज्ञानिनो भ्रमः भ्रमप्रतीत इत्यर्थः । गुणप्रवाहपतितानां कोवार्थ उत्कृष्टः को वा निकृष्टस्तेषां वा क उत्कर्षः को निकर्षः यदुक्तं चित्रकेतुना "गुणप्रवाह एतस्मिन् कः शापः को ह्यनुग्रहः । कः स्वर्गो नरकः को वा किं सुखं दुःखमेव वेति ननु वेदेनैव विधिनिषेधाभ्यां गुणदोषावुक्तौ सत्यं वेदोऽप्यविद्यावद्विषय एवेत्याह । कर्म विहितम् अकर्म तल्लोपः विकर्म निषिद्धमिति भिदा भेदो गुणदोषधियो गुणदोषयोर्विवर्धायस्य तस्याज्ञानिन एवोक्तेत्यर्थः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

नाहं तवाङ्घ्रिकमलं क्षणार्द्धमपि केशव त्यक्तुं समुत्सहे नाथेत्यादिवादिनमुद्धवं प्रत्यस्मिन्नध्याये स्वप्राप्तये संक्षेपतः संन्यासेनैराग्यं स्वभक्तिमात्मज्ञानं तद्दार्ढ्यार्थं यदुअवधूतसंवादरूपेषु चतुर्विंशद्गुरुषु अष्टगुरूंश्चाह श्रीभगवान् । यदात्थेति । संहृत्यैतत्कुलं नूनं लोकं सन्त्यक्ष्यते भवानिति यदात्थ तन्मे चिकीर्षितं कर्तुमिष्टमेव ब्रह्मादयोऽपि मे स्ववासं ये स्वर्गे लोकेऽमृतत्वं भजन्ते इति श्रुत्युक्तपरमधामवासं प्रति मसिकाङ्क्षिणः आकाङ्क्षावन्तः सन्ति ॥ १ ॥

अहमपि स्वधाम गन्तुं प्राप्तावसरोऽस्मीत्याह । मयेति । अंशेन बलेन सह ॥ २ ॥

त्वं च सर्वतो विरक्तो भूत्वा मद्भक्तनिष्ठो भवेति वक्तुमाह । कुलमिति श्लोकत्रयेण ॥ ३ ॥

यर्हि मया त्यक्तो भविष्यति तर्ह्येवायं लोको नष्टमङ्गलो भविष्यति अत एव कलिना नितरामाक्रान्तो भविष्यति ॥ ४ ॥

हेभद्र ! इह गृहे त्वया नैव वस्तव्यम् ॥ ५ ॥

सर्वं परित्यज्य त्यक्तेष्वपि स्नेहं च परित्यज्य सम्यङ्मयि मनः आवेश्य समदृक् सन् गां पृथिवीं विचरस्व ॥ ६ ॥

सर्वपरित्यागे त्याज्यस्य दोषः भगवति मनःसमावेशने भगवद्गुणश्चापेक्षितः समदृक्त्वे सर्वस्यैकात्मकत्वं चापेक्षितमतो भगवान् स्वस्य सर्वहेतुत्वेन गुणं सर्वस्य नश्वरत्वेन दोषं सर्वस्य स्वशक्तिरूपमायाकार्यत्वेनैकात्मकत्वञ्चाह । यदिदमिति । इदं मनआदिभिर्गृह्यमाणं जगत् नश्वरं क्षणभङ्गुरं विद्धि यद्यतो मायामनोमयं मायाप्रेरकमनःप्रधानं जगदुपादानरूपायाः मम शक्तेः प्रेरकेण मम मनसा जगन्निर्माणे प्रधानभूतेन रचितमित्यर्थः । सर्वस्य जगतो ह्यनित्यत्वात् तत्र विरक्तः सन् मम मायाकार्यत्वेन समं मत्वा समदृक् सन्सर्वहेतुत्वेन सर्वेश्वरं मां जानन् मद्भक्तःसन् पृथ्वीं विचरस्वेति फलितोऽर्थः ७ ॥

ननु मां पर्यटतो मम विहितकर्मलोपः स्यादत्राह । पुंस इति । अयुक्तस्य अविवेकिनः भगवत्कारणाज्ञानभक्तिरहितस्य नानार्थः संसारः भ्रमः स्वाश्रयोऽन्याश्रयो वेत्यादिभ्रमविषयो भवति अतः स पुमान् गुणदोषभाग्भवति अत एव तस्य गुणदोषधियः पुंसः कर्माकर्मविकर्मेति भिदो भवन्ति अविवेकानिवृत्त्यर्थं विहितं कर्मानुष्ठेयमकर्मविहितलोपो नैव कर्तव्यो विकर्म निषिद्धाचरणं नैवकर्तव्यमित्यर्थः । विहितमनुष्ठेयं निषिद्धं दूरतो हेयमेवेति सिद्धान्तः ॥ ८ ॥

भाषा टीका ।

श्री भगवानुवाच ।

हे महाभागी उद्धव जी तुमने जो बात हम से कही है सो तो हमारी करने की इच्छा है ही है ब्रह्मा महादेव और सब लोकपाल मेरा बैकुण्ठ में बास करना चाहते हैं ॥ १ ॥

मैंने इहां का सब देवतों का कार्य्य कर दिया है जिस के वास्ते ब्रह्मा के प्रार्थना करने से अंश बलदेवजी सहित हम अवतीर्ण भये हैं ॥ २ ॥

यह कुल शाप से दग्ध होकर परस्पर के बैर से नष्ट हो जायगा और आज से सात में दिन इस पुरी को समुद्र डुबाय देगा ॥ ३ ॥

मेरे न रहने से इस लोक का मङ्गल नष्ट होजायगा जब तबहीं हे साधु उद्धव कलियुग भी इस लोक के मनुष्यों को हत भागी कर देगा ॥ ४ ॥

मैं जब इस महीतल को त्याग देऊंगा तब तुम इहां नहीं रहना हे भद्र इहां के लोग सब अधर्म में रुचि करेंगा ऐसा कलियुग का धर्म है ॥ ५ ॥

तुम तो अपने स्वजन बन्धुओं में सब स्नेह को छोड अच्छी तरह मेरे में मन लगा कर समदृष्टि होकर पृथिवी में बिचरो ॥ ६ ॥

जो यह संसार में मन से बचन से नेत्रों से कर्णों से ग्रहण किया जाता है सो सब नश्वर अनित्य है इनको मनो मय मगन्माया रचित जानो ॥ ७ ॥

अज्ञानी पुरुष का नाना पदार्थों में मन का भ्रम रहता है उसी से गुण और दोष देखा जाता है गुण दोष की बुद्धि ही से कर्म अकर्म बिकर्म एगुणों के भेद भी यथाधिकार माने जाते हैं और किये जाते हैं ॥ ८ ॥

तस्माद्युक्तेन्द्रियग्रामो युक्तचित्त इदं जगत् ।
आत्मनीक्षस्व विततमात्मानं मय्यधीश्वरे ॥ ९ ॥
ज्ञानविज्ञानसंयुक्त आत्मभूतः शरीरिणाम् ।
आत्मानुभवतुष्टात्मा नान्तरायैर्विहन्यसे ॥ १० ॥
दोषबुद्ध्योभयातीतो निषेधान्न निवर्तते ।
गुणबुद्ध्या च विहितं न करोति यथाऽर्भकः ॥ ११ ॥
सर्वभूतसुहृच्छान्तो ज्ञानविज्ञाननिश्चयः ।
पश्यन्मदात्मकं विश्वं न विपद्येत वै पुनः ॥ १२ ॥

श्रीशुक उवाच ।

इत्यादिष्टो भगवता महाभागवतो नृप ! ।
उद्धवः प्रणिपत्याह तत्त्वजिज्ञासुरच्युतम् ॥ १३ ॥

उद्धव उवाच ।

योगेश ! योगविन्यास ! योगात्मन् ! योगसम्भव ! ।
निःश्रेयसाय मे प्रोक्तस्त्यागः संन्यासलक्षणः ॥ १४ ॥
त्यागोऽयं दुष्करो भूमन् ! कामानां विषयात्मभिः ।
सुतरां त्वयि सर्वात्मन्नभक्तैरिति मे मतिः ॥ १५ ॥
सोऽहं ममाहमिति मूढमतिर्विगाढस्त्वन्मायया विरचितात्मनि सानुबन्धे ।
तत्त्वञ्जसा निगदितं भवता यथाहं संसाधयामि भगवन्ननुशाधि भृत्यम् ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कथमात्मनि परिच्छिन्ने विततं जगदीक्षणीयं तत्राऽऽह । आत्मानमिति । मयि ब्रह्मणि तद्रूपेणेक्षस्व ॥ ९ ॥

नन्वेवं युक्तचित्तत्वेन कर्माकरणे देव दयो विघ्नान् करिष्यन्ति तत्राऽऽह । ज्ञानेति । ज्ञानं वेदतात्पर्यनिश्चयो विज्ञानं तदर्थानुभवस्ताभ्यां सम्यग्युक्तस्तत आत्मानुभवेनैव तुष्टचित्तोऽतः शरीरिणां देवादीनामात्मभूतोऽन्तरायैर्न प्रति हन्यसे अयं भावः यावदनुभवं यथाश्रमं कर्माणि कुर्वन्नेव तदनन्तरं सर्वेषामात्मभूतत्वान्न कोऽपि विघ्नानाचरति तथा च श्रुतिः "तस्य ह न देवाश्च नाभूत्या ईशते आत्मा ह्येषां स भवती"ति ॥ १० ॥

नचोत्पन्नज्ञानस्यापि यथेष्टाचरणप्रसङ्ग इत्याह । दोषबुद्ध्येति । गुणदोषबुद्ध्यतीतोऽपि प्राक्तनसंस्कारान्निषिद्धान्निवर्तत एव किन्तु न दोषबुद्ध्या विहितं च प्रायशः करोति न गुणबुद्ध्या यथाऽर्भकः सङ्कल्पविकल्परहितः किञ्चित्करोति कुतश्चिन्निवर्तते तद्वत् ॥ ११ ॥

एवं भूतस्य न पुनः संसार इत्याह । सर्वभूतेति । न विपद्येत न पुनः संसरेत् ॥ १२ ॥ १३ ॥

त्वं तु सर्वं परित्यज्येत्याद्युपदेशमात्मनोऽयोग्यं मन्वानः पृच्छति । योगेशेति । योगफलदायिन् योगविदां न्यासो नामातिमोक्षो निक्षेपविशेषः यद्वा योगो विन्यस्यते क्रियते यस्मिन् योगात्मन्योगे आत्मा प्रकटो भवति यस्य योगस्वरूपेति वा योगस्य सम्भवो यस्मात् चतुर्भिरेतैः सम्बोधनैः स्वमहिम्ना केवलं त्वयोपदिष्टं न तु मदधिकारं पर्यालोच्येति द्योतितम् तदाह । निःश्रेयसायेति । नचारोग्याद्यर्थं सर्वस्वदानादिवदयं त्यागः किन्तु संन्यासलक्षणोऽप्रत्यापत्तिरूपः ॥ १४—१५ ॥

यं प्रति त्यागाद्युपदिष्टं सोऽहं मूढमतिः कुतः ममेत्यहमिति च सानुबन्धे पुत्रादिसहिते त्वन्मायया विरचिते आत्मनि देहे विगाढो निमग्नोऽतस्तत्तु भवता निगदितं यथाहमञ्जसा संसाधयामि तथा भृत्यं मामनुशाधि शनैः शिक्षय ॥ १६ ॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

यस्मादयुक्तस्यैव भ्रमस्तस्मात् आत्मनि त्वंपदवाच्याधिष्ठाने तद्रूपेण ब्रह्मरूपेण जहदजहल्लक्षणयेति शेषः ॥ ९

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी ।

वेदतात्पर्यनिश्चयः तत्त्वमसीत्यादिवेदवाक्यार्थावधारणं तदर्थानुभवः वेदार्थसाक्षात्कारः तेनैव आत्मानुभवेन ब्रह्मानुभवेन सन्तुष्टचित्तत्वात् आत्मभूतः ब्रह्मत्वेन स्वरूपभूतः यावदनुभवम् अनुभवपर्यन्तं ब्रह्मसाक्षात्कृतेः पूर्वमित्यर्थः । यथासम्भवं ज्ञानाऽविरोधेन तदनन्तरम् अनुभवानन्तरं कर्माकरणेऽपि कोऽपि देवादिः तथाच ब्रह्मानुभविनो विघ्नाभावे प्रमाणं श्रुतिः इ इत्यव्ययमव्यर्थे देवा अपि तस्य ब्रह्मानुभविनः अभूत्यै ब्रह्मभीप्रतिबन्धाय नेशते न समर्था भवन्ति हि यतः स ज्ञानी एषां देवादीनामात्मा स्वरूपं भवति नहि स्वस्वरूपे कोऽपि विघ्नमाचरति ॥ १० ॥

निषेधात् सुरापानादेः दोषबुद्ध्या हेयबुद्ध्या न गुणबुद्ध्या उपादेयबुद्ध्या उभयातीतः पुमान् निषेधान्निवर्त्तते किन्तु दोषबुद्ध्या न विहितं च करोति किन्तु गुणबुद्ध्या नेत्यन्वयः ॥ ११ ॥

एवम्भूतस्य जीवन्मुक्तस्य ज्ञानविज्ञानाभ्यां परोक्षाऽपरोक्षानुभवाभ्यामात्मविषयको निश्चयो यस्य स तथा न संसरेज्जन्मादि नानुभवेत् ॥ १२ ॥

महाभागवतत्वेन कृष्णाख्यपरमतत्त्वस्य नित्यप्राप्तेस्तदुपदेशगौरवेणैव तत्त्वजिज्ञासुरित्यर्थः ॥ १३ ॥

आत्मनोऽयोग्यमिति । भगवता स्वत्यागात् स्वायोग्यतातिशयमननादित्यर्थः । निरुपमस्य भगवतो निक्षेपविशेषत्वेन वर्णनमनुचितमिवेत्यरुचौ पक्षेति योगश्चित्तवृत्तिनिरोधः योगे संप्रज्ञातसमाधौ आत्मा स्वरूपं प्रकटो ज्ञातो भवति यस्य तदुक्तं पतञ्जलिना "तदा द्रष्टुः स्वरूपेऽवस्थान"मिति अत्र प्रकटपदाध्याहारात् पक्षान्तरं योगस्वरूपेति योगोऽसम्प्रज्ञातसमाधिः स्वरूपं निर्विकल्पकं यस्य स तथा तदुक्तं पातञ्जले "विरामप्रत्ययाभ्यासपूर्वकः संस्कारशेषोऽन्य" इति विरामप्रत्ययो नेति नेतीत्येतदंशापवादस्तदभ्यासपूर्वः अन्योऽसम्प्रज्ञातसमाधिः सच ब्रह्मात्मक एव अभावस्याधिकरणात्मकत्वादित्यर्थः । योगस्य सम्भवः सुगमतयोत्पत्तिर्यस्माद्भगवतस्तदप्युक्तं तत्रैव "ईश्वरप्रणिधानाद्वे"ति नचारोग्याद्यर्थमिति कालपुरुषप्रतिग्रही सर्वस्वं त्यक्त्वा स्वप्राणान् रक्षति पुनश्च द्रव्यार्जनं करोति इति तदीयसर्वस्वदानवन्नायं संन्यासरूपस्त्यागः पुनर्ग्रहणं प्रत्यापत्तिः अप्रत्यापत्तिरूपः पुनरग्रहणस्वरूपः भिक्षोरिन्द्रियलोलतेति पुनर्ग्रहणे वान्ताशित्वेन निन्दाश्रवणादित्यर्थः ॥ १४ ॥

त्वयि अभक्तैस्तु सुतरां दुष्करः इति मे मतिर्निश्चयः तदुक्तं त्वय्येव युञ्जानानामभक्तानां प्राणायामादिभिर्मनः । अक्षीणवासनं राजन् ! दृश्यते पुनरुत्थितमिति ॥ १५ ॥

स इति तच्छब्दबलात् यं प्रतीत्यध्याहृतम् अतो देहे निमग्नत्वात् तत्तु स्वजनादौ स्नेहत्यागादिकं अञ्जसाऽनायासेनैव ॥ १६ ॥

———

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

इदं जगत् शरीरमात्मनि जीवेन धार्यं विद्धीत्यर्थः । आत्मानं जीवं मयि विततं मया धार्यं विद्धीत्यर्थः ॥ ९ ॥

ज्ञानविज्ञानसंयुक्तः साधारणासाधारणाकारविषयज्ञानवान् ॥ १० ॥

दोषेति । उभयातीतः गुणदोषातीतः तदेव विवृणोति । दोषबुद्ध्या निषेधान्न निवर्त्तते निषेधमनुवर्त्तते एव निषिद्धानाचरणमेव दोषातीतत्वमित्यर्थः । गुणबुद्ध्या विहितं काम्यं न करोति काम्याननुष्ठानमेव गुणातीतत्वमित्यर्थः । काम्यानां त्यागो दुष्कर इत्युत्तरत्राभिधानात् यथार्भकः बालवदनाविष्कृतस्वयाथात्म्यः ॥ ११ ॥

ज्ञानविज्ञाननिश्चयः सांख्यप्रसंख्यानवान् सांख्यदर्शनाद्वैषम्यमाह । पश्यन्मदात्मकमिति ॥ १२—२३ ॥

योगेश ! योगनिर्वाहक योगविन्यास विन्यस्यतेऽनेनेति विन्यासः योगोपदेष्टः योगात्मन् योगस्याधार योगशास्त्रजनक १४-१५ विरचितात्मनि संसारे इति शेषः ॥ १६ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यस्मान्नानार्थप्रतीतिर्भ्रमस्य सुखदुःखगर्भसंसृतिहेतुत्वं ततस्तन्निवृत्तये सर्वं ब्रह्मात्मकं पश्येत्याह । तस्मादिति । युक्तेन्द्रियग्रामः नियमितेन्द्रियगणः युक्तचित्तः मय्यावेशितचित्तः इदं जगदचित्परिणामात्मकं देवमनुष्यादिशरीरजातमात्मनि जीवे ईक्षस्व जीवेन धार्यं पश्य आत्मानं जीवं मय्यधीश्वरे विततं व्याप्तं मया धार्यं पश्येत्यर्थः सदेवमीक्षमाणस्य भ्रमस्तन्मूला संसृतिश्च निवर्त्तत इति भावः ॥ ९ ॥

नन्वित्थमारब्धैवमीक्षमाणस्याप्यनादितया विषयप्रवणेन्द्रियस्योक्तविधेक्षणस्यान्तरायैर्विहतिः स्यादत आह । ज्ञानेति । ज्ञानविज्ञानसंयुक्तः साधारणासाधारणाकारविषयज्ञानवान् पृथिव्यादीनामात्मपर्यन्तानां तत्त्वानां साधर्म्यवैधर्म्याभिज्ञः शरीरिणामात्मभूतः आत्मवत्सर्वसुहृद्भूतः आत्मानुभवेनैव निरतिशयसुखरूपेण सन्तुष्टः विघ्नैर्न विहन्यते नहि निरतिशयानन्दोदधिमग्नः शब्दादिसुखलेशाभासानुभवतदर्थकर्मरूपैरन्तरायैर्विहन्यते । तत्र तस्य रुचेरभावादिति भावः । ज्ञानविज्ञानसंयोगस्त्वनात्मनामनुपादेयत्वार्थः । तस्य शब्दादिविषयेष्वरुच्यर्थं ततश्चानुभववृद्धिः ॥ १० ॥

नान्तरायैर्विहन्यत इत्यनेनैहिकपारलौकिकशब्दादिवैषयिकसुखतदर्थकर्मरूपान्तरायैर्विहतिर्नास्तीत्युक्ते तर्हि स किञ्चिद्विधिनिषेधौ नानुवर्त्तत एवेत्यपेक्षायां तस्य विशेषमाह । दोषेति । आत्मानुभवसन्तुष्ट इत्यनुषज्यते तदयमर्थः आत्मानुभवसन्तुष्टः, उभयातीतः वैषयिकसुखदुःखातीतोऽपि दोषबुद्ध्या—

नाविरतो दुश्चरितान्नाशान्तो नासमाहितः ।
नाशान्तमानसो वापि प्रज्ञानेनैनमाप्नुयादिति ॥

निषिद्धाचरणस्यात्मप्राप्तिविरोधित्वरूपदोषबुद्ध्या निषेधान्न निवर्त्तते किन्तु निषेधमनुवर्त्तत एव तथा गुणबुद्ध्या स्वर्गादिसुखसाधनत्वबुद्ध्या विहितं काम्यं कर्म न करोति निषिद्धाचारः प्रत्यवायजननद्वारा आत्मानुभवाद्यथा प्रच्यावयेत्तथा गुणबुद्ध्या कृतं काम्यं कर्म स्वफलजननद्वारा तस्मात्प्रच्यावयेदिति तदपि न करोतीत्यर्थः एवं भूतोऽपि यथा अर्भकः अर्भको यथा स्वस्वभावमनाविष्कुर्वन्नवतिष्ठते तद्वदयमपि स्वमाहात्म्यमनाविष्कुर्वन्नवतिष्ठत

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इत्यर्थः । अत्रार्भकदृष्टान्तेन विदुषः कामचारोऽनुज्ञायत इति न मन्तव्यं तच्च "नाविरतो दुश्चरिता"दिति विद्याविरोधित्वश्रवणात्तस्य विद्यायामनन्वयात्तथा चानाविष्कारस्यैवान्वयात् तथाच श्रुतिः बाल्येन तिष्ठासेदिति शारीरकसूत्रं च "अनाविष्कुर्वन्नन्वयात् तस्यायमर्थः बालस्य यत्स्वभावानाविष्काररूपं कर्म इति तदुपादानो वर्तेत विद्वान् कुतः अन्वयात्तस्यैवान्वयात् बाल्येन तिष्ठासेदित्यस्मिन् विधौ तस्यैव ह्यन्वयसम्भवः इतरेषां तु विद्याविरोधित्वश्रवणात् नाविरतो दुश्चरितादिति आहारशुद्धौ सत्त्वशुद्धिरिति च ॥ ११ ॥

एवम्भूतस्य न पुनः संसृतिरित्याह । सर्वभूतसुहृदिति । सर्वभूतसुहृदित्यनेनात्मभूतः शरीरिणामिति पूर्वोक्तं विवृतं शान्त इत्यनेन वैराग्यवत्त्वमुक्तं तेन नान्तरायैर्विहन्यत इत्यङ्गार्थं उक्तः ज्ञानविज्ञाननिश्चय इत्यनेन ज्ञानविज्ञानसंयुत इति प्रत्यभिज्ञापितं पश्यन्मदात्मकं विश्वमित्यनेन जगदात्मनि धीत्वस्तेत्याद्यर्थं उक्तः एवंभूतः पुनर्न विपद्येत न संसरेत् ॥ १२ ॥

इतीति । हे नृप ! उद्धवः प्रणिपत्य नमस्कृत्य तत्त्वमुपास्योपासकोपासनतत्साधनयथावस्थितस्वरूपं ज्ञातुमिच्छुरच्युतं श्रीकृष्णं प्राह ॥ १३ ॥

तदेवाह । योगेशेत्यादिषड्भिः । तावन्नाहं त्वत्प्रश्नोत्तरदानप्रभुरिति मात्रोच इत्यभिप्रायेण सम्बोधयति योगेशेत्यादि योगेश! योगनिर्वाहक ददामि बुद्धियोगं तमिति भगवता गीतत्वादिति भावः योगविन्यास विन्यस्यतेऽनेनेति विन्यासः योगोपदेष्टः योगात्मन् योगस्याधार योगफलरूपेति वा योगसम्भव । योगशास्त्रजनक योगश्चात्र ब्रह्मोपासनात्मकः त्वं तु सर्वं परित्यज्येत्यादिना भगवति चित्तनिधानात्मकभक्तियोगस्य विषयाभिलाषत्यागादिपूर्वकत्वमुक्तं तदघटमानं मन्वानः सदुपायं पृच्छति । निःश्रेयसायेति सार्द्धद्वयेन । निश्रेयसाय मोक्षाय त्यागः प्रोक्तः स च नारोग्याद्यर्थसर्वस्वदानादिरूपं त्यागः किन्तु संन्यासलक्षणः अप्रत्यापत्तिरूपः प्रोच्यताम् १४

ततः किमत आह । त्याग इति । हे भूमन् ! कामयन्त इति कामा विषयाः तेषां त्यागो विषयात्माभिर्विषयप्रवणचित्तैर्दुष्करः दुःखेनापि कर्तुमशक्यः सर्वात्मनि त्वयि अभक्तैस्तु सुतरां दुष्कर इति मे मतिः संजातभक्तियोगैस्तु निरतिशयसुखरूपत्वदनुभवानिष्टत्वात्कथं चित्कामत्यागः सम्भवेदपि त्वदभक्तैस्तु सुतरां दुष्कर इति भावः ॥ १५ ॥

सोऽहमिति । यं प्रति त्याग उपदिष्टः सोऽहं त्वन्मायया विरचिते आत्मनि देहे सानुबन्धे पुत्रकलत्रादिसहिते अहं ममाभिमानमूढमतिरत एव विगाढः मग्नः भवता यन्निगदितं त्वं तु सर्वं परित्यज्येत्यादि तद्यथाञ्जसा सुखेन साधयामि तथा हे भगवन् ! भृत्यं मामनुशाधि विविच्य ज्ञापय भृत्यमिति हेतुगर्भम् ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

बलवत्प्रतिबन्धके सत्यन्तरायैरुक्तनीक्षणप्रकारो विहतः स्यादित्यत्राह । ज्ञानेति । शरीरिणामात्मवद्भूतः "आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुने"ति वचनात् आत्मौपम्येन सर्वाणि भूतानि पश्यन्नित्यर्थः । आत्मनः परमात्मनोऽनुभवेनैव तुष्टः आत्मा मनो यस्य स तथा अनेन "तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात्" इतिसूत्रार्थो दर्शित इति ॥ १० ॥

एवंविधज्ञानिनः कर्मकरणप्रकारं श्लोकद्वयेनाह । दोषबुद्ध्येति । यः शान्तः क्रोधरहितः ज्ञानविज्ञानाभ्यां वैराग्यसिद्धान्ते निश्चलः पर्वतवत् स्थिरो विश्वं मदात्मकं मम सर्वस्वातन्त्र्यान्मदधीनं पश्यन्नत एव ममाधिष्ठानत्वेन सर्वभूतसुहृत् विश्वेषां भूतानां निरुपाधिकप्रीतिकृदत एवोपरतः ऐहिकामुष्मिकविषयाविरक्तो निषिद्धाचरणाद्दोषः स्यादिति दोषबुद्ध्या तद्दोषानुत्पत्तये निषेधाद्विधिवचनाच्च निवर्तेत विहितकरणात्सुखादिगुणो भवतीति गुणबुद्ध्या विहितं न करोति किं तर्हि यथार्भकः फलानुसंधानरहितः क्रीडालक्षणं कार्यं करोति तथा किन्तु स्वतन्त्रकर्ता नारायण एव मयि स्थित्वा विहितकरणे प्रेरयति निषिद्धान्निवर्तयति तद्वाक्किरेव मम तत्फलमिति निरूप्य कर्म करोति स पुनर्न विपद्यते संसारलक्षणां विपदं न प्राप्नोतीत्यन्वयः—

　　कर्तृत्वमात्मनो यस्माज्ज्ञाननिष्ठो न मन्यते ।
　　ततो ऽकुर्वन्नपि सदा दोषबुद्ध्या न निन्दति ।
　　गुणबुद्ध्या न विहितं किन्त्वीशप्रेरितोऽस्म्यहम् ।
　　स एव च मयि स्थित्वा निन्द्यानिन्द्ये करोत्यजः ।
　　न मे दोषो न च गुणः कर्तृत्वाभावतः स्फुटम् ॥
　　स्वातन्त्र्यं त्वत्र चेशस्य ये ऽज्ञास्तेषु भवेदपि ।
　　इति मत्वा निवर्तेत निन्द्यात्कुर्याद्गुणानिति ॥

इति वाक्यसिद्धोऽयमर्थः ये अज्ञास्तेष्वज्ञेषु दोषो गुणश्च भवेदित्यर्थः ।

　　अनित्या मे गुणा न स्युर्दोषा नैव कथञ्चन ।
　　इति मत्वा शुभं कुर्यान्निवर्तेदशुभादपि ॥
　　ज्ञानी त्वकर्तृताभानादीशकर्तृत्वनिश्चयात् ।
　　किन्तु पूर्णगुणायैव न तु दोषापनुत्तये ॥
　　तथाल्पगुणसिद्ध्यर्थं बालवत्कृतनिश्चयः ।

इत्येतदप्युक्तार्थे मानम् ।

　　वैलक्षण्याद्धरेर्भिन्नं तत्तन्त्रत्वात्तदात्मकम् ॥
　　इति विश्वं प्रपश्यन्ति ज्ञाननिष्ठा हरेः प्रियाः !

इत्येतज्ज्ञानार्थिना विश्वमेव द्रष्टव्यमित्यस्मिन्नर्थे मानम् ॥११-१३॥

योगस्य यमनियमादेरीश योगस्य ज्ञानस्य विशेषेण न्यासो देवादिषु येन स तथा तस्य संबोधनं योगविन्यासेति योगात्मन् ज्ञानस्वरूप ! योगसंभव उपायजनक—

　　ज्ञानं तु योगशब्दोक्तं युज्यतेऽनेन यत्सुखम् ॥
　　क्वचिद्योग उपायः स्यात्क्वचिच्चित्तनिरोधनमिति ।

त्यागं दानाद्व्यावर्तयति संन्यासलक्षण इति सर्वदुष्टसंगपरित्यागलक्षण इत्यर्थः ॥ १४ ॥

ततः किमत्राह । त्याग इति । कामानामयं त्यागः सुतरां त्वदभक्तैर्दुष्करः ॥ १५ ॥

त्वन्मायया सोऽहमुद्धवनामा सानुबन्धे विरचितात्मनि निर्मितदेहे ममाहमिति मूढमतिरत एव विगाढ इति यत्त्वमाद्भवता निगदितं यथा साधयामि तथा भृत्यं मां शाधीत्यन्वयः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

ज्ञानेत्यत्रात्मा ब्रह्म ॥ १०—१२ ॥

श्रीमानुद्धवोऽपि महाभागवतत्वात् श्रीभगवतस्तथोपदेशगौरवेण तत्त्वं जिज्ञासुरिव श्रीभगवता स्वत्यागात्स्वायोग्यतातिशयमनेन तत्राप्यातिनिकृष्ट इव स्वदैन्यमाहेत्याह । इतीत्यादिभिः ॥ १३ ॥

तथैव तस्य वाक्यं दर्शयति । योगेशेति त्रिभिः ॥ १४—१७ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तस्माद्युक्तेन्द्रियग्रामः निरुद्धेन्द्रियवृन्दः निरुद्धचित्तः सन् इदं सुखदुःखमयं जगत् आत्मनि भोक्तरि जीवे भोग्यत्वेन स्थितं पश्य तं च भोक्तारमात्मानं मय्यधीश्वरे परमात्मनि नियन्तरि नियम्यत्वेन स्थितमीक्षस्व ॥ ९ ॥

नन्वेवं युक्तचित्तत्वेन कर्माकरणे देवादयो विघ्नान् करिष्यन्ति तत्राह । ज्ञानेति । ज्ञानं वेदतात्पर्यनिश्चयः विज्ञानं तदर्थानुभवः ताभ्यां सम्यक् युक्तः ततश्चात्मानुभवेनैव तुष्टचित्तः ततश्च शरीरिणां देवादीनामप्यात्मभूतः प्रीतिपात्रीभूतः स्याः तथाच श्रुतिः "आत्मा ह्येषां स भवती"ति ततश्च नैव ते विघ्नान् कुर्युरिति भावः ॥ १० ॥

किञ्चोत्पन्नज्ञानोऽपि न यथेष्टाचरणो भवतीत्याह । दोषेति । गुणदोषबुद्ध्यतीतोऽपि ज्ञानी प्राक्तनसंस्कारतो निषेधान्निवर्त्तत एव किन्तु न दोषबुद्ध्या विहितञ्च प्रायशः करोति न तु गुणबुद्ध्या यथाऽर्भकः सङ्कल्पविकल्परहितः किञ्चित् करोति कुतश्चिन्निवर्त्तते च तद्वदिति ॥ ११-१२-१३ ॥

हे योगेश ! योगानां कर्मयोगज्ञानयोगभक्तियोगानामीश्वर अतएव योगविन्यास ! अनधिकारिण्यपि मयि योगं ज्ञानं सम्प्रति स्वप्रभावादेव विन्यस्यसीत्यर्थः । योगात्मन् ! हे योगस्वरूप यदि त्वं मया प्राप्तस्तर्हि सर्वे योगाः प्राप्ता एवेति भावः । किञ्च योगाद्भक्तियोगादेव त्वं सम्भवसि भक्तेष्वाविर्भवसीति मह्यं भक्तियोगो विशेषतो देय इति भावः ॥ १४ ॥

विषयात्मभिर्विषयाविष्टचित्तैस्त्वद्भक्तैरपि दुष्करः अभक्तैस्तु सुतराम् ॥ १५ ॥

स च विषयाविष्टचित्तोऽहमेव यतस्त्वन्मायया विरचिते आत्मनि देहे सानुबन्धे पुत्रकलत्रादिसहिते विगाढो निमग्न इति देहस्यान्धकूपत्वमारोपितं तेन तदावेशत्याजनमेव तस्मादुद्धारः प्रथमं कार्यस्तदनन्तरमेव ज्ञानाद्युपदेश इति ध्वनिः तत्तस्मात् ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ननु अयुक्तस्य गुणदोषधियः आवश्यकतया कर्मण्येवाधिकारोऽस्तु मया किं कर्त्तव्यं तत्राह । तस्मादिति द्वाभ्याम् । ज्ञानभक्तिहीनः गुणदोषभाक् भवति अतस्तस्यावश्यकतया कर्मण्यधिकारः भवांस्तु मज्ज्ञानभक्तियुक्तः तस्माद्धेतोः, युक्तेन्द्रियग्रामः नियमितेन्द्रियसमूहः युक्तचित्तः नियमितेन्द्रियनायकः आत्मनि जगदात्मनि अधीश्वरे चेतनाचेतननियन्तरि मयि विततं जगत् आत्मानं च ईक्षस्व ॥ ९ ॥

एवं ज्ञानविज्ञानसंयुक्तः समानातिशयशून्यसर्वशक्तिसर्वैश्वर्यैकाद्वितीयविषयं ज्ञानं चिदचिद्ब्रह्मस्वरूपभेदविषयं विविधं ज्ञानं विज्ञानं ताभ्यां सम्यक् युतः शरीरिणाम् आत्मभूतः आत्मवत्प्रेष्ठः अनुभवेन तुष्टः सन्तुष्टः आत्मा मनो यस्य सः अन्तरायैर्विघ्नैर्न विहन्यसे ॥ १० ॥

ननु ज्ञानभक्तिसम्पन्नः समदृक् विधिनिषेधशास्त्रमवलङ्घयति किं नेत्याह । दोषबुद्ध्येति । उभयातीतः गुणदोषबुद्धिवर्जितः समदृक् दोषबुद्ध्या निषेधान्न निवर्त्तते अर्थादभ्यासान्निवर्तते एव विहितं च गुणबुद्ध्या न करोति अर्थादभ्यासादेव करोति यथा अर्भकः दोषबुद्ध्या चाण्डालादिभ्यो न निवर्तते किन्तु तत्सङ्गानभ्यासान्निवर्तते एव बन्धुषु च गुणबुद्ध्या न प्रविशति किन्तु अभ्यासात्तेषु प्रविशत्येव तद्वत् ॥ ११ ॥

पुनर्न विपद्येत जन्ममरणे न भजेत् ॥ १२ ॥

तत्त्वजिज्ञासुः संक्षेपतः श्रुतं भगवत्तत्त्वं विस्तरतः पुनस्तदेव सपरिकरं ज्ञातुमिच्छुः अच्युतं नित्यमूर्तिं श्रीकृष्णं प्राह ॥ १३ ॥

योगानां ज्ञानभक्तिवैराग्यानामीश फलद योगाः विन्यस्यन्ते समर्प्यन्ते यस्मिन् हे योगनिधान ! योगाः आत्मानः प्रियतमाः यस्य हे योगप्रिय योगानां सम्भवो यस्मात् हे योगप्रवर्त्तक योगानां फलदेन निधानेन योगस्नेहिना प्रवर्त्तकेन च भवता मे मम निःश्रेयसाय संन्यासलक्षणः सम्यक् सर्वविसर्जनरूपस्त्यागः त्वं तु सर्वं परित्यज्य इत्यादिना प्रोक्तः यद्यपि मय्यावेश्य मनः सम्यगित्यनेन भक्तियोगः तस्माद्युक्तेन्द्रियग्राम इत्यादिना ज्ञानयोगश्च प्रोक्तस्तथापि त्यागो दुष्कर इति वक्तुं निःश्रेयसाय मे प्रोक्तस्त्याग इत्युक्तम् ॥ १४ ॥

काम्यन्ते इति कामाः गृहादिपदार्थाः विषयेषु आत्मा मनो येषां तैः ॥ १५ ॥

यं प्रति त्यागाद्युपदिष्टं सोऽहं ममेति अहमिति च मूढमतिः सानुबन्धे देहगेहादिसहिते त्वन्मायया त्वच्छक्त्या प्रकृत्या रचितः आत्मा स्वरूपं यस्य तस्मिन् संसारे गाढो निमग्नः तत्त्यागादिकं भवता निगदितं यथा अञ्जसा सुखेन संसाधयामि तथा भृत्यं मां संशाधि सम्यक् शिक्षय ॥ १६ ॥

भाषा टीका ।

तिससे संपूर्ण इन्द्रिय समूह को असद्विषय से रोककर चित्तको एकाग्र करके इस सब जगत् को आत्मा में स्थित आत्मा के अधीन देखो और ज्ञान व्याप्ति से व्याप्त सूक्ष्म आत्मा को अधीश्वर मेरे अधीन देखो ॥ ९ ॥

शास्त्र ज्ञान अनुभव ज्ञान इन दोनों से युक्त होकर सब देहधारियों के सुहृद आत्मा होकर परमात्मा के अनुभव ही से यदि सन्तुष्ट रहोगे तो कोई संसार के विघ्न तुमको नहीं लगेंगे ॥ १० ॥

जो पुरुष गुण दोष की दृष्टि से रहित है सो भी दोष की शंका से निषिद्ध कर्मों से नहीं निवृत्त होता है और न गुण की बुद्धि से विहित कर्मों में प्रवृत्त होता है

सत्यस्य ते स्वदृश आत्मन आत्मनो ऽन्यं वक्तारमीश ! विबुधेष्वपि नानुचक्षे ।
सर्वे विमोहितधियस्तव माययेमे ब्रह्मादयस्तनुभृतो बहिरर्थभावाः ॥ १७ ॥
(यावत्पदाब्जरसिकैर्नहि सङ्गता ये तद्युक्तिभिर्विमृशतामपि नापयाति ।
सत्सङ्गमो गृहजुषामपि दम्पतीनां तत्पात्मनां खलु नृणां हतरंहसां स्यात् ॥ ० ॥)
तस्माद्भवन्तमनवद्यमनन्तपारं सर्वज्ञमीश्वरमकुण्ठविकुण्ठधिष्ण्यम् ।
निर्विण्णधीरहमुह वृजिनाभितप्तो नारायणं नरसखं शरणं प्रपद्ये ॥ १८ ॥

श्रीभगवानुवाच ।

प्रायेण मनुजा लोके लोकतत्त्वविचक्षणाः ।
समुद्धरन्ति ह्यात्मानमात्मनैवाशुभाशयात् ॥ १९ ॥
आत्मनो गुरुरात्मैव पुरुषस्य विशेषतः ।
यत्प्रत्यक्षानुमानाभ्यां श्रेयोऽसावनुविन्दते ॥ २० ॥
पुरुषत्वे च मां धीराः सांख्ययोगविशारदाः ।
आविस्तरां प्रपश्यन्ति सर्वशक्त्युपबृंहितम् ॥ २१ ॥
एकद्वित्रिचतुष्पादो बहुपादस्तथापदः ।
बह्व्यः सन्ति पुरः सृष्टास्तासां मे पौरुषी प्रिया ॥ २२ ॥
अत्र मां मृगयन्त्यद्धा युक्ता हेतुभिरीश्वरम् ।
गृह्यमाणैर्गुणैर्लिङ्गैरग्राह्यमनुमानतः ॥ २३ ॥
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
अवधूतस्य सम्वादं यदोरमिततेजसः ॥ २४ ॥

भाषा टीका ।

किन्तु बालक की नांई साधन दशा में किये हुये अभ्यास ही से शुभ कर्म में ही उसकी प्रवृत्ति रहती है ॥ ११ ॥

जो सब प्राणियों का मित्र है शान्त है शास्त्रज्ञान अनुभव ज्ञान से निश्चय करने वाला है वह सब जगत् को हमारे स्वरूप देखता है तो वह फिर संसार को नहीं प्राप्त होता है ॥ १२ ॥

श्री शुक उवाच ।

हे नृप ! भगवान् के ऐसे आज्ञा देने से वे महा भागवत उद्धव श्री तत्त्व के जानने की इच्छा वाले भये फिर अच्युत भगवान् को प्रणाम करके प्रश्न करने लगे ॥१३॥

हे योगदाता ! हे योगियों के परम धन ! हे योगियों के प्राण ! हे योग के पैदा करने वाले ! मेरे मोक्ष कल्याण के लिये आपने सन्यासरूपी त्याग का कथन किया है ॥ १४ ॥

हे व्यापक ! हे सर्वान्तर्यामि विषय में मन रखने वाले पुरुषों को कामनाओं का छोडना यह त्याग बडा कठिन है और जो आप के भक्त नहीं हैं तिन को तो बहुतही कठिन है यह बात मेरे विचार में है ॥ १५ ॥

सो मै तो बडा मूर्ख बुद्धिवाला हूं आप की माया से रचित जो देहादिक तिस के मोह में डूबा हूं तब आप के कहे हुवे उस ज्ञान मार्ग को जैसे मैं सहज में समुझ जाऊं और उस का साधन कर सकूं तैसे मुझ भृत्य को आप सिखाइये ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

मया संक्षेपत उक्तं विस्तरतस्त्वन्यान्पृच्छामि चेदत आह । सत्यस्येति । स्वदृशः स्वप्रकाशस्य सत्यस्याऽऽत्मनः आत्मनो मां प्रति वक्तारं ते त्वत्तोऽन्यं नानुचक्षे न पश्यामि स्वदृशः स्वतः सिद्धज्ञानात्त्वत्तोऽन्यमिति वा कुत इत्यत आह । सर्वे इति । बहिरर्थभावा विषयेष्वर्थबुद्धयः ॥ १७ ॥

केचिद्दुःशीला भवन्ति केचित्क्लेशिनाः फलकाले विनश्यन्ति केचिदशाः केचिद्[illegible]ऽसमर्थाः केचित् स्थानाद्भ्रष्टास्तद्वच्चावृत्त्यर्थमनवद्यमित्यादीनि पञ्च विशेषणानि न अन्तः कालतः पारं देशतश्च यस्य तम् कालादिभिरकुण्ठो विकुण्ठलोको धिष्ण्यं

श्रीधरस्वामिकृतभावार्थदीपिका ।

स्थानं यस्य तमङ्ग हे भगवन् ! ह स्फुटम् निर्वेदे हेतुः वृजिनैर्दुःखैरभितप्तः हकारगौरवाय वृकारो युक्त इव पठनीयः नन्वनवद्यत्वादीनि कुतो मम तत्राह । नारायणमिति । अनुकम्पितागाह नरो जीवस्तस्य सखायं भवन्तं शरणं प्रपद्ये ॥ १८ ॥

तदेवमसम्भावनाविपरीतभावनाभ्यामुपदिष्टं तत्त्वमनवगाहमानं प्रति तन्निवृत्तये गुरूपदेशं विनाऽपि स्वान्वयव्यतिरेकाभ्यामेव तत्त्वप्रतिपत्तिर्भवतीति दर्शयितुमाह । प्रायेणेति । लोकतत्त्वस्य विचक्षणाः परीक्षकाः अशुभाशयाद्विषयवासनातः ॥ १९ ॥

तदुपपादयति । आत्मनः पश्वादिशरीरेऽप्यात्मैव हिताहितज्ञाने गुरुः ॥ २० ॥

तत्र प्रत्यक्षं दर्शयति । पुरुषत्वे चेति । तथाच श्रुतिः "पुरुषत्वे चाविस्तरामात्मा सहि प्रज्ञानेन सम्पन्नतमो विज्ञातं वदति विज्ञातं पश्यति वेद श्वस्तनं वेद लोकालोकौ मर्त्येनामृतमीप्सत्येवं सम्पन्नोऽथेतरेषां पशूनामशनापिपासे एवाभिविज्ञान"मिति ॥ २१ ॥

अतः पुरुषत्वं स्तौति । एकेति ॥ २२ ॥

अनुमानमाह । अत्र पौरुष्यां पुरि युक्ता अप्रमत्ता अग्राह्यं ग्राह्येभ्योऽहङ्कारादिभ्यो व्यतिरिक्तं मामद्धा साक्षान्मृगयन्ति मार्गेण प्रकारद्वयमाह । गृह्यमाणैर्बुद्ध्यादिभिर्गुणैर्हेतुभिः जडानां प्रकाशः स्वप्रकाशमेकं विना न घटत इत्यनुपपत्तिमुखेन लक्षकैः तथा तैरेव लिङ्गैर्व्याप्तिमुखेनानुमानेन ईश्वरं प्रवर्तकं मृगयन्ते बुद्ध्यादिकरणानि कर्तृप्रयोज्यानि करणत्वाद्वास्यादिवदिति तदुक्तम् "भगवान्सर्वभूतेषु लक्षितः स्वात्मना हरिः । दृश्यैर्बुद्ध्यादिभिर्द्रष्टा लक्षणैरनुमापकै"रिति नचैवाता आनुमानिक आत्मेति मन्तव्यम् देहादिव्यतिरिक्तत्वंपदार्थशुद्धिमात्रस्यैवानुमानेन विवक्षितत्वात् ॥ २३ ॥

भूयोऽन्वयव्यतिरेकाभ्यामसम्भावनादिनिवृत्तावितिहासमाह— अत्रापीति ॥ २४ ॥ २५ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी ।

सत्यस्येत्यादि । षष्ठीत्रयं कर्मणि आत्मनः परमात्मनः पुनरात्मनो मे मां प्रतीत्यर्थः द्वितीयपक्षे स्वदृश इति पञ्चम्यन्तं ते इत्यस्य विशेषणम् ॥ १७ ॥

तस्माद्ब्रह्मादीनां त्वन्मायामोहितत्वात् तद्व्यावृत्त्यर्थं तेषां दुःशीलादीनां क्रमेण व्युदासार्थं तत्राह तत्राह नारायणं नरस्य महत्स्रष्ट्रादिपुरुषसमूहस्यापि परमाश्रयं स्वयं भगवत्त्वात् तथापि नरो जीवस्तस्य सखायं नरमात्रानुग्रहायावतीर्णमित्यर्थः ॥ १८ ॥

उपदिष्टं तत्त्वं तदेवं पूर्वोक्तप्रकारेणासम्भावनाविपरीतभावनाभ्यामनवगाह्यमानमानिश्चिन्वन्तमुद्धवं प्रति तत्रोपदिष्टे त्यागे अशक्यत्वमसम्भावना सोऽहं ममाहमिति विपरीतभावना ताभ्यां तन्निवृत्तये असम्भावनादिनिरासाय हिते कर्मणि प्रवृत्तिरन्वयः अहितान्निवृत्तिर्व्यतिरेकस्ताभ्याम् एवकारस्य व्यावर्त्यमाह गुरूपदेशं विनापीति तत्त्वप्रतिपत्तिः अनुमानार्थापत्तिभ्यां शुद्धात्मज्ञानं प्रायेणेति तेषां विरलत्वं सूचयति लोकतत्त्वस्य जनयाथार्थ्यस्य ॥१९॥

तत् । आत्मनैवोद्धरणम् उपपादयति । युक्त्या साधयति पुरुषस्य मनुष्यस्य तु आत्मा विशेषतो गुरुरिति गुर्वनुसरणे प्रवर्त्तक इत्यर्थः । श्रेयस्तत्त्वज्ञानम् ॥ २० ॥

तत्र । प्रत्यक्षानुमानयोर्मध्ये पुरुषत्वे मनुष्यदेहे आत्मानमाविस्तरामतिप्रकटं पश्यन्ति तत्र च धीराः शास्त्रविचक्षणाः सन्तो मामपि पश्यन्तीत्यर्थः । तथाच मनुष्यदेहे ज्ञानाधिक्ये प्रमाणं श्रुतिः पुरुषत्वे मनुष्यदेहे आत्माविस्तरामतिप्रकटो वर्त्तते स हि मनुष्यदेहावच्छिन्न आत्मा प्रज्ञानेन प्रकृष्टज्ञानेन सम्पन्नतमः विज्ञातम् अर्थविशिष्टतया विज्ञातं शब्दं वदति विज्ञातं विचारितम् उपादेयतया पश्यति श्वस्तनं श्व इदमेवं कर्त्तव्यमिति वेद लोकाऽलोकौ प्रकाशाप्रकाशौ स्वर्गनरकौ वेद मर्त्त्येन मरणधर्मवता देहेन साधनं कृत्वाऽमृतं मोक्षमीप्सतीत्येवं सम्पन्नः ज्ञानेनाढ्यतमः अथेत्यर्थान्तरे इतरेषां तद्व्यतिरिक्तानां पशूनामश्वादीनामशनापिपासे एव तयोरेव ज्ञानं नतु शब्दार्थादिज्ञानमित्यर्थः ॥२१—२२ ॥

अतो ज्ञानसाधनत्वात् साक्षान्मां मृगयन्ति नतु जीवम् अनुपपत्तिमुखेन अर्थापत्तिप्रमाणेन अनुपपद्यमानार्थदर्शनेन तदुपपादकमर्थान्तरकल्पनमर्थापत्तिः यथा पीनो देवदत्तो दिवा न भुङ्क्ते अत्र यथा दिवाऽभुञ्जानस्य रात्रिभोजनमन्तरा पीनत्वानुपपत्त्या तदुपपादकं रात्रिभोजनं कल्प्यते रात्रौ भुङ्क्ते इति तथा जडानां बुद्ध्यादीनां स्वप्रकाशमेकमात्मानमन्तरा प्रकाशानुपपत्त्या तदुपपादकः स्वप्रकाश आत्मा कल्प्यते बुद्ध्यादीनां प्रकाशकः परमात्माऽस्तीति लक्षकैः प्रमाणान्तरं दर्शयति । तथेति तैर्बुद्ध्यादिभिरेव करणत्वेन लिङ्गैर्लीनस्य परमात्मनो गमकैर्हेतुभिरित्यर्थः । व्याप्तिमुखेन व्याप्तिव्यापारद्वारा तत्र हेतुसमानाधिकरणात्यन्ताभावाऽप्रतियोगिसाध्यसामानाधिकरण्यं व्याप्तिः करणत्वं हि हेतुस्तत्समानाधिकरणस्तदधिकरणवृत्तिर्हि घटाद्यभावस्तत्प्रतियोगी घटादिरप्रतियोगि तु कर्तृप्रयोज्यत्वलक्षणं साध्यं तेन सहैकाधिकरणवृत्तित्वं करणत्वस्येति लक्षणसमन्वयः अनुमानतः परामर्शात् कर्तृप्रयोज्यत्वव्याप्यकरणत्ववत्ताज्ञानादित्यर्थः । बुद्ध्यादिकरणानीति पक्षः कर्तृप्रयोज्यत्वं साध्यो धर्मः करणत्वादिति हेतुः वास्यादिवदिति दृष्टान्तः यत्र यत्र करणत्वं तत्र तत्र कर्तृप्रयोज्यत्वं यथा वास्यादिरित्यन्वयव्याप्तिः यत्र कर्तृप्रयोज्यत्वं नास्ति न तत्र करणत्वं यथात्मेति व्यतिरेकव्याप्तिस्तथाच स्वतन्त्रः कर्त्ता परमेश्वर इति सिद्धम् एतावता अनुमानेनान्वेषणमात्रेण;वैशेषिकादिसम्मतः केवलानुमानगम्य आत्मेति न मन्तव्यं मन्तव्य इति श्रुत्या देहादिभ्यो व्यतिरिक्तस्य त्वंपदवाच्यस्येश्वराभेदेन या शुद्धिरसंसारित्वं तावन्मात्रस्यैवानुमानेन विवक्षितत्वादित्यर्थः।उपलक्षणश्चैतत् शास्त्रानुसारिलिङ्गस्यापि ईश्वरसाधने विहितत्वादिति ॥ २३ ॥

भूयः पुनरप्यन्वयव्यतिरेकाभ्यां विधिनिषेधाभ्यां मूलेऽत्रापीति अन्वयव्यतिरेकाभ्यामसम्भावनादिनिवृत्तावपि ॥ २४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

बहिरर्थे अनात्मनि भावो भावना प्रतिपत्तिर्येषां ते बहिरर्थभावाः ॥ १७ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

या युक्तिभिरिति । ये त्वत्पदाब्जगुणानुभवरसिकैः न सङ्गताः तेषां युक्तिभिः उपदेशमनपेक्ष्य केवलयुक्तिभिः स्वातन्त्र्येण तन्निरसनोपायप्रतिपादकैः विमृशतामपि या माया नापयाति दुर्निरासया तया विमोहितधिय इत्यन्वयः ॥ ० ॥

अकुण्ठेति सम्बुद्धिः ॥ १८—१९ ॥

प्रत्यक्षानुमानाभ्यां श्रुतिस्मृतिभ्याम् इह प्रत्यक्षेणानित्यत्वादिदर्शनात् परत्र च तत एवानित्यत्वानुमानाच्चेत्यर्थः ॥ २० ॥

पुरुषत्वे चेति । मनुष्यजन्मन्येव मामाविस्तरामतीव स्फुटतरं जानन्ति ॥ २१ ॥

मनुष्याणामेव शास्त्राधिकारः अतः पौरुषी तनुः प्रियेत्यर्थः ॥ २२—३४ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ननु मया संग्रहेणोक्तं विस्तरतस्त्वन्येभ्यो जानीहीत्यत आह । सत्यस्येति । हे ईश ! सत्यस्य नित्यमसंकुचितस्वभावस्य तत्र हेतुःस्वदृशः स्वस्मिन्नेव दृग्वस्य तस्य नित्यं प्रत्यक्षितस्वयाथात्म्यस्येत्यर्थः । अनेन बद्धमुक्तजीववैलक्षण्यमुक्तं बद्धो हि सङ्कुचितस्वभावः मुक्तस्तु बद्धदशायामप्रत्यक्षितस्वयाथात्म्यः आत्मनः जीवस्यात्मनः अन्तरात्मनः ते त्वत्तः अन्यं वक्तारमुपदेष्टारं विबुधेष्वपि नानुचक्षे न पश्यामि ते इत्यार्षत्वात्षष्ठी व्यत्ययेन कुत इत्यत आह । सर्व इति । सर्वेऽपीमे ब्रह्मादयो विबुधाः तव मायया मोहितबुद्धयः तनुभृतः कर्माधीनदेहभाजः बाह्यर्थे ऽनात्मनि भावः भावना अहमिति प्रतिपत्तिः येषां ते अज्ञा इत्यर्थः ॥ १७ ॥

मायां विशिनष्टि । येति । ये त्वत्पदाब्जगुणानुभवरसिकैर्भागवतैर्न सङ्गतास्तेषां युक्तिभिरुपदेशमनपेक्ष्य केवलयुक्तिभिर्निरसनोपायैर्विमृशतामपि या माया नापयाति न निवर्तते तया विमोहितधिय इति पूर्वश्लोकेन सम्बन्धः । तर्हि सद्भिः सङ्गम्यतामित्यत आह । सत्सङ्गम इति । दम्पतीनां मिथुनीभूय वर्तमानानामपीत्यर्थः । गृहजुषां गृहान्सेवमानानां गृहस्थानामपीत्यर्थः । तप्तात्मनां तापत्रयाभितप्तानां हृतरंहसां हृतं रंहो वेगः विषयप्रावण्यरूपो येषान्ते नृणां खलु सत्सङ्गमः स्यात् नतु विषयलालसानामिति भावः ॥ ० ॥

यतो विबुधेष्वपि त्वत्तोऽन्यं वक्तारं नानुचक्षे तस्माद्भवन्तमेवाहं शरणं सदुपदेशेन रक्षितारं प्रपद्येऽध्यवस्यामीत्यर्थः । कथंभूतः वृजिनेन सांसारिकदुःखेनाभितप्तः अत एव निर्विण्णधीः परितप्तबुद्धिः अहो इति निपातो निर्वेदसूचकः कथंभूतमनवद्यं मोहादिरूपदोषरहितमनन्तपारमनन्तावधिमपरिच्छेद्यस्वरूपस्वभावमित्यर्थः । सर्वज्ञं सर्ववस्तुविषयसाक्षात्कारवन्तमीश्वरं सर्वनियन्तारमकुण्ठाविकुण्ठधिष्ण्यमकुण्ठं वैकुण्ठं धिष्ण्यं स्थानं यस्य तं नारायणं नराणां प्राप्यप्रापकमाधारं च नरस्य सखायम् इमान्याचार्यत्वसूचकानि विशेषणानि तत्राद्येन भ्रमविप्रलम्भमोहादेर्व्यावृत्तिः द्वितीयेन ज्ञानावाप्तत्वस्य तृतीयेन कल्याणविषयत्वस्य तुरीयेण तृतीयस्य कर्ममूलत्वस्य पञ्चमेन तुरीयस्य प्रत्युत्वस्य नारायणं नरसखमित्यनेनाखिलाध्यात्मतत्त्वोपदेशार्थं बदरीवनारायणावतारूपत्वमर्जुनादिमुखेन तदुपदेष्टृत्वं च व्यज्यते ततश्च वात्सल्यं फलितम् ॥ १८ ॥

इत्थमापृष्टः प्राह भगवान् । प्रायेणेत्यादिना । यत्तावदुक्तं त्यागोऽयं दुष्कर इत्यादिना भक्तियोगात्पूर्वं विषयत्यागो दुष्कर इति तत्र शनैः शनैर्मनःशिक्षया स सुकर एवेति वक्तुं तत्र निदर्शनतया अवधूतयदुसम्वादात्मकमितिहासं वक्तोपक्रमते अत्मविरीक्षकाः स्वमनसः शिक्षयैव स्वात्मानं तारयन्तीत्याह । प्रायेणेति । लोकतत्त्वविचक्षणाः तत्तद्वस्तुप्रतिनियतगुणविमर्शनकुशलाः आत्मनैव सम्यक्शिक्षितेन मनसैवाशुभाशयाद्विषयवासनातः स्वात्मानं तारयन्ति ॥ १९ ॥

यत एवमतः पुरुषस्यात्मनः स्वस्य विशेषतः गुरुर्हितप्रवर्तकः आत्मैव सम्यक् शिक्षितं मन एव पुरुषस्य विशेषत इत्यनेन मनुष्यजन्मनि मनःशिक्षाविवेकः श्रेयः सम्प्राप्तिश्च सुलभेति सूचितं तदेवोपपादयति । यदिति । यस्मिन्मनुष्यजन्मनि प्रत्यक्षानुमानाभ्यामिह प्रत्यक्षेणानित्यत्वदर्शनात्परत्र दृष्टान्तेनानित्यत्वानुमानाच्च तत्र वैराग्येण श्रेयोऽनुविन्दते भगवदुपासनया मोक्षाख्यं श्रेयः प्राप्नोतीत्यर्थः । यद्वा प्रत्यक्षानुमानाभ्यां श्रुतिस्मृतिभ्यां श्रेयोऽनुविन्दते पुरुषस्यैव शास्त्राधिकारात् शास्त्रत एव श्रेयस्तत्साधनादीनामवगम्यत्वादिति भावः ॥ २० ॥

एतदेवोपपादयति । पुरुषत्व इति । पुरुषत्वे च मनुष्यजन्मन्येव सांख्ययोगविशारदाः साङ्ख्यं चिदचिदीश्वरतत्त्वत्रयविवेकः योगः परमात्मोपासनात्मकः तयोर्विशारदाः । कुशलाः धीराः जितेन्द्रियाः सन्तो मामाविस्तरामतीव स्फुटतरं जानन्ति कथम्भूतं सर्वशक्तिभिः प्रकृतिपुरुषसमावितविविधविचित्रसृष्ट्याद्युपयुक्तसर्वज्ञत्वसत्यसंकल्पत्वादिभिरुपबृंहितं पुष्कलितम् ॥ २१ ॥

यतो मां पुरुषत्व एवाविस्तरां प्रपश्यन्त्यत एव मनुष्यशरीरं मम प्रियतममित्याह । एकेति । पादकद्वयस्य द्वन्द्वान्ते श्रूयमाणस्यैकादिभिः प्रत्येकं सम्बन्धः पुर इत्यनेन स्वनिवासस्थानमुक्तं सृष्टा इत्यनेन स्वस्य तत्स्रष्टृत्वमनेन कारणत्वं फलितं तासामेकपादादिपुरां मध्ये पौरुषी पुरुषाकारा पूर्मे मम प्रिया अत्र हेतुराविस्तरां प्रपश्यन्तीत्युक्तम् ॥ २२ ॥

एवं तर्हि लब्धमनुष्यजन्मानः सर्वेऽपि किम्प्रपश्यन्तीत्याशङ्कायां न सर्वे प्रपश्यन्ति प्रत्यक्षादिप्रमाणावेद्यत्वादित्याह । अत्रेति । अत्र पौरुष्यां पुरि युक्ताः अप्रमत्ताः केचिदेवेश्वरं सर्वनियन्तारं मामद्धा साक्षाद्धेतुभिर्जगत्कारणत्वादिहेतुभिर्मार्गयन्ति मृगयन्ति विमृश्य पश्यन्तीत्यर्थः । तत्र हेतुत्वेनात्मानं विशिनष्टि । गृह्यमाणैरिति । प्रत्यक्षेण गृह्यमाणैर्गुणैः रूपादिभिर्लिङ्गैरग्राह्यं प्रत्यक्षमूलैर्व्याप्त्यादिभिर्लिङ्गैरग्राह्यमित्येतदेव स्पष्टीकरोति आनुमानत इति । अनुमानेनाग्राह्यमित्यर्थः । रूपादीनां पृथिव्यादौ चाक्षुषत्वादिजनकत्वदर्शनेन तेषां स्वाश्रये चाक्षुषत्वादिजनकत्वस्वाभाव्यनिश्चयात् गुणैरिति अहेयासाधनत्वानिर्देशः ॥ २३ ॥

अथेतिहासं प्रस्तौति । अत्रेति । अत्र लोकतत्त्वविचक्षणाः समुद्धरन्ति ह्यात्मानमात्मनैवाशुभाशयादित्यस्मिन्नर्थे पुरातनमितिहासमुदाहरन्ति निदर्शनतया कथयन्तीत्यर्थः । इतिहासं विशिनष्टि । अवधूतस्येति । सम्वादं तयोः प्रश्नप्रतिवचनात्मकमित्यर्थः ॥ २४ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तव मत्स्यरूपोपदेष्टा भक्तोऽन्यः किं न स्यादत्राह । सत्यस्येति । ते तव स्वरूपस्य वक्तारमात्मनस्त्वत्तोऽन्यं पुरुषं नानुचक्षे न पश्यामि कीदृशस्य सत्यस्य साधुज्ञानादिगुणस्य स्वदृशः स्वयंप्रकाशमानस्य आत्मनः सर्वव्यापिनः मनुष्येष्वभावेऽपि देवेषु स्यादत उक्तं विबुधेष्वपीति उक्तं विशिनष्टि । सर्वं इति । ब्रह्मा आदिः कारणं येषां रुद्रादीनां ते तथोक्ताः ते विमोहितधियः परोक्षज्ञानवन्तः कुतस्तत्राह । तनुभृत इति । शरीराभिमानित्वादत एव बहिरर्थभावाः मोक्षतदुपयोगिभ्योऽन्यत्रापि कामयुक्ताः अस्य श्लोकस्यार्थः—

अशरीरः सदा विष्णुः पूर्णानन्दत्वतः सदा ॥
इच्छा च क्रीडयैवास्य न फलाय यतो विभोः ।
अतो बाह्यार्थकामोऽपि निष्काम इति कथ्यते ॥
ब्रह्मा निरभिमानित्वाच्छरीरेऽप्यशरीरवान् ।
नित्यानन्दोपभोग्यन्यकामस्योभिव्यक्तितः सदा ॥
बहिरर्थविनिर्मुक्तस्तथापि तनुधारणात् ।
अमूढा मूढ इति वदुच्यते च सरस्वती ॥
रुद्राद्यास्तन्वभीमानाद्बहिरर्थयुजस्तथा ।
सर्वेषां ब्रह्मपदवीयोग्यानां पूर्वमेव तु ॥
अभावस्त्वपरोक्षस्य मोहो ज्ञानस्य भण्यते ।
ब्रह्मणस्त्वंशरूपेषु भारत्या ज्ञानवर्जनम् ॥
ब्रह्मगायत्र्यभावे तु नांशावतरणं क्वचित् ।
शतजन्मसु पूर्वं तु ज्ञानोदय उदीर्यते ॥
अपरोक्षेण पारोक्ष्यात्पूर्णज्ञानं सदैव तु ।
शतजन्मगतायाश्च आपरोक्ष्योभिव्यक्तिर्भवेत् ॥
क्वचित्क्वचित्सरस्वत्या अंशावतरणेष्वपि ।

शक्तिविवेकग्रन्थादवगत इति अशरीरी "वायुरभ्रं विद्युत्स्तनयित्नुरशरीराणि वा एतानी"ति श्रुतिरत्रमानम्—

श्रुतिभिस्तनितत्वात्तु स्तनयित्नुर्हरिः स्मृतः ॥
अभ्रं भूताभिभरणाच्छ्रीर्वायुर्भरतः स्मृतः ।
विद्युत्तु भारती प्रोक्ता एत एवाशरीरिणः ॥
व्यत्यासेनापि नाम स्यादेतेषां महतां सदा ।

इत्यनेन श्रुत्युक्ता एत एवेति ज्ञायते ॥ १७ ॥

यस्माद्भगवतोऽन्यो वक्ता नास्ति तस्मादहं नारायणं शरणं प्रपद्ये मम ज्ञानोपदेशायेति शेषः । भवन्तं पूज्यम् अनवद्यत्वं पूज्यत्वे हेतुः अनवद्यत्वे हेतुः यद्यनन्तपारत्वं तर्हि स्वस्याज्ञानं प्राप्तम् अत उक्तं सर्वज्ञमिति बलवत्प्रतिबन्धकेन ज्ञानं कचिद्दलव्यं स्यादत उक्तम् ईश्वरमिति देशप्रभुवदीश्वरस्यापि स्थानच्युतिः स्यादत्राह अखण्डेति अखण्डमपरिच्छिन्नम् अविकुण्ठं अविनाशि च धिष्ण्यं यस्य स तथा नञ् उभयत्र संबध्यते शरणप्राप्तौ हेतुमाह निर्वेदेति कुतो निर्वेद इत्यत्राह वृजिनेति एवं विशिष्टोऽपि नारायणोऽन्यः किं न स्यादत्राह नरसखमिति एतद्विशेषणं हरेरिति कुत इतीयमाशङ्का—

विष्णोर्वीर्यैरनन्तस्य त्रिभिरंशैर्नरः स्मृतः ।
सेन्द्रश्चतुर्भिः पार्थस्तु द्वाभ्यां तु बललक्ष्मणावपि

अनेन परिहर्तव्या ॥ १८ ॥

लोकतत्त्वविचक्षणस्यायोग्यस्य पुनस्तत्त्वज्ञानप्रश्नः किमर्थं इत्याशङ्क्य परोक्षलोकतत्त्वज्ञानस्य सत्स्नेहमन्तरेणोत्पन्नस्य पुरुषार्थसाधनत्वं न स्यात् प्रत्युतानर्थहेतुत्वं च अपरोक्षज्ञानानुत्पादादित्याशयेनाह । प्रायेणेति । अस्यैवमक्षरयोजना प्रायेण बहुलं लोके ये मनुजा लोके तत्त्वे च विचक्षणाः सत्स्नेहनिर्मुक्तपरोक्षज्ञाननिपुणास्ते आत्मनैव प्रयत्नेनैवाशुभाशयात् दुस्तरोऽपि पञ्चमी पापफलदुःखबहुलं तमः प्राप्यात्मानं समुद्धरन्ति निर्मूलयन्ति हि यस्मात्तस्मात्स्नेहयुक्ता लोकतत्त्वपरोक्षज्ञानविद्याविशारदाः आत्मनैव सात्त्विकमनसैवाविर्भूतापरोक्षज्ञानेनैवाशुभाशयात्पापकारणात्संसारादात्मानं समुद्धरन्त्युन्नयन्ति पन्नगं कृपादिवेति अनेन भगवद्भक्त्युत्पन्नं ज्ञानं पुरुषार्थोपयोगीति ज्ञानसमुद्रमग्नस्यापि मम भगवत्परोक्षज्ञानोत्पत्तिप्रकारो वक्तव्य इति तत्प्रश्नः सार्थक इति यत्नोऽर्कोऽग्नै मनस्यात्मा इत्यभिधानादात्मशब्दो यत्नादौ वर्तते इति सिद्धम्—

पारोक्ष्येणैव तत्त्वं तु लोकं चापि वदन्ति ये ।
तेऽपि सत्स्नेहनिर्मुक्तास्तमो यान्ति विनिश्चयात् ॥
आपरोक्ष्यं न च ज्ञानं तेषामुत्पद्यते क्वचित् ।

इति वचनादुक्तोऽर्थभेदः सिद्ध इति सन्तोष्टव्यम् ॥ १९ ॥

आत्मनैवेत्येवकारेण श्रेयःसम्पत्तौ सात्त्विकमनसः प्राधान्यमुक्तं तदेव प्रतिपादयति । आत्मन इति । आत्मनो जीवराशेः श्रेयःसम्पादने गुरुरुपदेष्टात्मैव मन एव "मनसा वा अग्रे सङ्कल्पयत्यथ वाचा व्याहरती"ति श्रुतेः "अत" सातत्यगमन इति धातोः निष्पन्नेनात्मशब्देन शरीरमेव लक्ष्यते तस्यैव गमनसम्भवात्तत्रापि विशेषतः पुरुषार्थलक्षणश्रेयः सम्पत्तौ पुरुषस्य मनुष्यशरीरं प्राप्तस्य आत्मनः आत्मैव गुरुरिति सम्बध्यते कुत एतदत्राह । यदिति । असौ पुरुषः मानुषशरीरं प्राप्तो जीवः प्रत्यक्षानुमानाभ्यां श्रेयः पुरुषार्थं विन्दत इति यदत इति मनःपूर्वकं चक्षुषा कृष्यादिना व्रीह्यादिसम्पल्लक्षणश्रेयः प्राप्तिदर्शनेन यागादिसाधनसामग्र्या स्वर्गादिश्रेयः प्राप्यत इत्यनुमीयत इति ॥ २० ॥

एतदेव विशदयति । पुरुषत्व इति । पुरुषत्वे मनुष्यशरीरप्राप्तौ सत्यां च सांख्ययोगविशारदा धीराः सर्वशक्त्युपबृंहितं मामाविस्तारं यथायोग्यं विश्वरूपपर्यन्तं प्रपश्यन्ति यद्वा आ सन्तापः आसंसारसन्तापं विविधं तारयतीत्याविस्तारस्तम् आस्तु सन्तापकोपयोरिति यादवः निरयाविर्भूतनैर्मल्यं वा ॥२१॥

बह्वीष्वासु पूर्षु का पूरुतम श्रेष्ठेति तत्राह । तासामिति ॥२२॥

तत्र कारणमाह । अत्र मामिति । अत्र पुरुषशरीरे मनोयोगयुक्ता योगिनः ख्यातो ग्राह्यमीश्वरं मामद्धा प्रत्यक्षीकर्तुं मार्गयन्ति विचार्यज्ञातुं यतन्ते कैर्हेतुभिः सद्युक्तिभिः अनुमानतः विनिर्दोषपञ्चावयवलक्षणवाक्यात्मकैः किंप्रमाणकैश्चक्षुरादिना गृह्यमाणैः रूपादिभिरात्मनः परमात्मनो लिङ्गैर्गमकैर्ज्ञापकैर्जीवस्य दर्शनादिज्ञातन्त्र्याभावेन तत्कर्तान्य ईश्वरोऽस्तीत्यनुमीयत इति ॥ २३ ॥

यथाहं संसाधयामि तथा मां शाधीत्युद्धववाक्यमवधारयन्नुक्तमर्थमितिहासेन सम्वेदयति । अत्रेति । अत्र पुरुषशरीरे अहंनिर्गमेण सुलभ इत्येतस्मिन्नर्थे अवधूतयदुसंवादरूपमिमिहासं पुरातनमुदाहरन्ति अस्यैव विवरणं पुरातनमिति अमिततेजसः अनल्पबलस्य तेजो बले प्रभावेऽपि ज्योतिष्यर्चिषि रेतसीति च २४ ॥ २५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

नारायणं नरस्य महदादिस्रष्ट्रादिपुरुषसमूहस्यापि परमाश्रयं तथापि नरसखं नरमात्रानुग्रहायावतीर्णम् ॥ १८ ॥

यथा चैवमुद्धवेन प्रार्थितं तथैव श्रीभगवानुवाच । प्रायेणेति ॥ १९ ॥

आत्मनो गुरुरिति । गुर्वनुसरणे प्रवर्त्तक इत्यर्थः ॥२०॥

पुरुषत्वे मानुष्यप्राप्तौ सत्यामाविस्तरां प्रकटतरज्ञानाः सन्तः तत्र च धीराः शास्त्रविचक्षणाः सन्तो मामपि पश्यन्तीत्यर्थः॥२१॥२२

ईश्वरमिति जीवस्यापि तस्य तत्र स्वातन्त्र्याभावात् नचैतावतानुमानिक ईश्वर इति मन्तव्यम् अनुमानस्यास्य शास्त्रानुगतत्वेन विवक्षितत्वात् ॥ २३—२६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

सत्यस्येति षष्ठी आर्षी सत्यात् सर्वकालदेशसत्ताकात् सद्योहिताद्वा ते त्वत्तः स्वस्य मम एकुज्ञानं यतस्तस्मात् आत्मनो मम आत्मनः परमात्मनस्त्वत्तः सकाशादन्यम् ॥ १७ ॥

तस्माद्भवन्तमेवाहं प्रपद्ये तत्र कश्चित् सर्वगुणमण्डितोऽपि दुराचारो भवतीति तद्व्यावृत्त्यर्थमाह । अनवद्यं कश्चित् सेवितः फलकाले विनश्यतीति तद्व्यावृत्त्यर्थमाह अनन्तपारं न विद्यते अन्तः कालतो न च पारं देशतश्च यस्य तं कश्चिदकृतज्ञो भवति नच त्वमित्याह । सर्वज्ञं कश्चिदसमर्थो रक्षणे न च त्वमित्याह । ईश्वरं कश्चिदस्थानपदो न च त्वमित्याह कालादिभिरकुण्ठो विकुण्ठलोको धिष्ण्यं स्थानं यस्य तम् उ हे भगवन् ! निर्वेदे हेतुः वृजिनैर्दुःखैरभितप्तः अत्र हकारगौरवाच्च वृकारो युक्त इव पठनीयः परमसर्वोत्कर्षमाह । नारायणं नारस्य महत्स्रष्ट्रादिपुरुषसमूहस्यापि परमाश्रयं परमं कृपालुत्वमाह । नरसखं नरमात्रानुग्रहायावतीर्णमित्यर्थः ॥ १८ ॥

भो उद्धव ! त्वमात्मानं मूढमतिं मन्यसे अहं त्वादृशं सुधियं विबुधेष्वपि नावलोके लोकेऽप्यत्र त्वत्तो निकृष्टा अपि गुरूपदेशं विनापि स्वीयबुद्धिबलादेव तत्त्वं जानन्तो दृश्यन्ते किं पुनस्त्वं सर्वसुधीमुकुटमणिर्मादृशगुरूपदिष्टनिखिलतत्त्व इत्याह । प्रायेणेति । लोकतत्त्वविचक्षणाः दृश्यमानलोकभद्राभद्रहेतुविचारप्रवीणाः अशुभाशयात् विषयवासनातः ॥ १९ ॥

एष आत्मा किञ्चित् श्रेयः प्रत्यक्षेण विन्दते किञ्चित् परामृश्यानुमानेनापि ॥ २० ॥

तत्रापि मनुष्यदेहगता एव जीवाः प्रायो मां ज्ञातुं प्रभवन्तीत्याह । पुरुषत्वे चेति । तत्रापि धीराः निर्मत्सरास्तत्रापि सांख्यं ज्ञानं योगो भक्तियोगस्तयोर्विचक्षणाः तथा च श्रुतिः "पुरुषत्वे चाविस्तरामात्मा स हि प्रज्ञानेन सम्पन्नतमो विज्ञातं वदति विज्ञातं पश्यति वेद श्वस्तनं वेद लोकालोकौ मर्त्येनामृतमीप्सत्येवं सम्पन्नोऽथेतरेषां पशूनामशनापिपासे एवाभिज्ञान"मिति ॥ २१ ॥

अतः पुरुषत्वं स्तौति । एकेति ॥ २२ ॥

अत्र पौरुष्यां पुरि स्थिता अद्धा साक्षान्मां कृष्णरूपिणमीश्वरं मार्गयन्ति युक्ता भक्तियोगवन्तः हेतुभिः श्रवणकीर्त्तनाद्यैः भक्त्याहमेकया ग्राह्य इति मदुक्तेः। ननु बुद्ध्यादिप्रवर्त्तकं त्वामनुमानेन मार्गयन्तो दृश्यन्त इत्यत आह । गृह्यमाणैर्बुद्ध्यादिभिर्गुणैर्लिङ्गैर्व्याप्तिमुखेन यदनुमानं तस्मादग्राह्यं बुद्ध्यादिकरणानि कर्तृप्रयोज्यानि करणत्वाद्वास्यादिवदित्यनुमानेनास्वतन्त्रः कर्त्ता जीवोऽनुमीयते तथा प्रयोजकः स्वतन्त्रोऽन्तर्यामी च कथंचिदनुमीयते नतु कृष्णः स्वयं भगवानहं मम तर्कातीतत्वान्मद्रूपगुणलीलैश्वर्याणामप्यतर्क्यत्वादिति ॥ २३ ॥

अत्रापि अनुमानगम्यत्वेऽन्तर्यामिस्वरूपस्य मम प्राप्तावपि ॥२४॥ ॥ २५ ॥ २६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

संक्षेपतो मया त्यागाद्युपदिष्टं विस्तरतो ज्ञातुमिच्छसि चेत्तर्हि प्रष्टव्याः तत्राह । सत्यस्येति । सत्यस्य अविनाशिनः देहादिविनाशिपदार्थभिन्नस्य आत्मनः जीवात्मनः जातावेकवचनम् सर्वेषामात्मनामात्मभोऽन्तरात्मनः स्वदृशः अनुपमात् स्वतः सिद्धज्ञानात् ते त्वत्तः अन्यं विबुधेष्वपि वक्तारं मां प्रत्युपदेष्टारम् नानुचक्षे न पश्यामि तत्र हेतुमाह । सर्वे इति । तव मायया त्रिगुणमय्या शक्त्या मोहितबुद्धयः अतो वहिरर्थाः सपरिकरमोक्षव्यतिरिक्ताः साध्यसाधनरूपाः धनविद्यादयः तेषु भावो वक्तुं प्रीतिर्येषां ते तथा, नतु मोक्षोपायकथने ब्रह्मादीनां प्रायशः प्रीतिरिति भावः ॥१७॥

यस्मात्त्वत्तोऽन्यं विबुधेष्वपि वक्तारं नानुचक्षे तस्माद्धेतोः हे भगवन् ! भवन्तं शरणं प्रपद्ये कथम्भूतः ह स्फुटं वृजिनैर्दुःखैरभितप्तः अतो निर्विण्णधीः कथंभूतम् अनवद्यं स्वभावतोऽपास्तसमस्तदोषम् अनन्तपारम् नास्ति कालतः अन्तः देशतः पारं च यस्य तम् सर्वज्ञं सर्वदा सर्वद्रष्टारम् ईश्वरं सर्वनियन्तारम् अकुण्ठः अनावरणः विकुण्ठो धिष्ण्यं स्थानं यस्य तम् नारायणम् "त्वत्तः पुमान्समधिगम्य यथास्य वीर्यं धत्ते महान्त"मिति ब्रह्माद्युक्तात् पुरुषावतारादपि पूर्णो मुख्यो नारायणो यस्तम् नरसखमिति येनार्जुनं प्रत्युक्तं मत्तः परतरं नान्यत्किंचिदस्ति धनञ्जयेति तेनार्जुनस्य सखायं स्वयं भगवन्तं ब्रह्मनारायणादिभिर्नामभिः प्रसिद्धं परतत्त्वं श्रीकृष्णमित्यर्थः ॥ १८ ॥

आत्मानं स्वात्मानं जीवम् आत्मनैव "सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च एष ते आत्मान्तर्यामी" त्यादिश्रुतिस्मृतिप्रसिद्धेनान्तर्यामिणैव अनुग्राहकेण अशुभाशयोपलक्षितात्संसारात्समुद्धरन्ति कथं भूताः लोकतत्त्वविचक्षणाः लोकेषु यत्तत्त्वम् "अन्तः प्रविष्टः शास्ता जनाना"मिति श्रुत्युक्तं तत्त्वं तद्विचक्षणाः अन्तरात्मप्रेरित एव जीवः यतस्ततः सा(त्)मादत्ते इत्येवं परीक्षकाः प्रायग्रहणेन शास्त्राचार्योक्ततत्त्वविचक्षणानां ग्रहणं बोध्यम् ॥ १९ ॥

आत्मनो जीवात्मनः स्थिरचरदेहगतस्य आत्मैवान्तरात्मैव गुरुर्हिताहितसूचकः पुरुषस्य तु विशेषतो गुरुः यत् येनान्तरात्मना असौ पुरुषः प्रत्यक्षानुमानाभ्यां देवदत्तः श्रेयस्कामः सद्धर्मपरः ममापि सद्धर्मानुष्ठानेन श्रेयो भविष्यति सूर्यः कृतसद्धर्मानुष्ठानः लब्धदेवभावत्वात् न यः कृतसद्धर्मानुष्ठानः न स देवभावं प्राप्तः मनुष्यादिवत् इत्येवं प्रकाराभ्याम् अद्धा निरपेक्षं प्रमाणं प्रत्यक्षं

अवधूतं द्विजं कञ्चिच्चरन्तमकुतोभयम् ।
कविं निरीक्ष्य तरुणं यदुः पप्रच्छ धर्मवित् ॥ २५ ॥

यदुरुवाच ।

कुतो बुद्धिरियं ब्रह्मन्नकर्तुः सुविशारदा ।
यामासाद्य भवाँल्लोकं विद्वांश्चरति बालवत् ॥ २६ ॥
प्रायो धर्मार्थकामेषु विवित्सायां च मानवाः ।
हेतुनैव समीहन्ते आयुषो यशसः श्रियः ॥ २७ ॥
त्वन्तु कल्पः कविर्दक्षः सुभगोऽमृतभाषणः ।
न कर्ता नेहसे किञ्चिज्जडोन्मत्तपिशाचवत् ॥ २८ ॥
जनेषु दह्यमानेषु कामलोभदवाग्निना ।
न तप्यसेऽग्निना मुक्तो गङ्गाऽम्भस्थ इव द्विपः ॥ २९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

श्रुतिस्तत्सापेक्षं प्रमाणमनुमानं स्मृतिस्ताभ्याम् श्रेयोऽनुविन्दते यथेष्टं भुक्तिलक्षणं मुक्तिलक्षणं वा कल्याणं प्राप्नोति ॥ २० ॥

सांख्ययोगे चिदचिद्ब्रह्मविवेकलक्षणे योगे वेदान्तशास्त्रोक्तः तत्त्वत्रयचिन्तने धीराः सर्वशक्त्युपबृंहितम् आविस्तरां स्फुटतरं मां प्रपश्यन्ति ॥ २१ ॥

अतएव पौरुषी पूः मे प्रिया ॥ २२ ॥

अत्र अस्यां पौरुष्यांनानुमानमितिश्रुतेः अनुमानतः अग्राह्यम्माम् "आत्मशब्दात्"इत्यादिसूत्रैः "स आत्मा"इत्यादिश्रुतिभिश्च गृह्यमाणैः हेतुभिः जगत्कारणभूतब्रह्मनिर्णायकगुणै"र्यतो वा इमानि भूतानि जायन्ते" इत्यादिश्रुतिप्रोक्तैः जगत्कर्तृत्वादिभिः "सत्यं ज्ञानमनन्त"मित्यादिश्रुतिप्रोक्तैः सत्यत्वादिभिश्च लिङ्गैश्च "हिरण्यश्मश्रु"रित्यादिश्रुतिप्रोक्तैः मृगयन्ति अन्वेषयन्ति ॥ २३ ॥

अत्र मयान्तर्यामिणा अनुगृहीता एव अशुभाशयादात्मानं समुद्धरन्तीत्यभिमतार्थे ॥ २४ ॥

भाषा टीका ।

आप सत्य स्वरूप हो स्वयं प्रकाश सर्वज्ञ हो सब के आत्मा अन्तर्यामी हो हे ईश्वर! आप को छोड कर दूसरे किसी को भी मै ज्ञान का वक्ता देवतों में भी नहीं देखता हूं ये सब ब्रह्मादिक देहधारी आप की माया से विमोहित बुद्धि वाले होकर बाहिर के विषयों को ही जानने वाले हैं न की ज्ञान के भी वक्ता हैं ॥ १७ ॥

वह माया कैसी है कि जो लोग आप के चरण कमल के भक्तों के सङ्ग नहीं करते हैं उनके बडे विचारों के करने से भी जो माया नहीं छूटती है उन पुरुषों का सङ्ग करना तो हम सरीके घर के विषयों को सेवन करने वालों को नहीं होसक्ता है ॥ ० ॥

तिस से निर्दोष अनन्त पार वाले सर्वज्ञ ईश्वर सर्वदा अव्याहत वैकुण्ठ धाम वाले नर के सखा नारायण आप के शरण में मै संसार तापों से तपा हुआ वैराग्यवान् होकर प्राप्त हुआ हूं ॥ १८ ॥

श्रीभगवानुवाच ।

प्रायः कर के लोक में तत्त्व के जानने वाले मनुष्य इस अशुभ संसार में से अपने आपही से आत्मा का उद्धार करते हैं ॥ १९ ॥

विशेष करके अपना गुरु आपही विचार से होता है जिस से कि प्रत्यक्ष और अनुमान से यह पुरुष कल्याण को प्राप्त होजाता है ॥ २० ॥

सांख्ययोग में चतुर जो लोग हैं सो मेरे को मनुष्य रूपही में सब शक्तियों के सहित प्रकाश मान देखते हैं॥ २१ ॥

एक पाद दो पाद तीन पाद चार पाद बहुत पाद और बिना पाद वाले बहुत से शरीर बनाये हैं परन्तु उन में पुरुष शरीरही मेरे को अत्यन्त प्रिय है ॥ २२ ॥

उत्तम युक्ति वाले पुरुष युक्तियों से ईश्वर को ढूंढ लेते हैं इश्य इन्द्रियों से ग्रहण करने योग्य नहीं हैं तौ भी अनुमान से जान लेते हैं ॥ २३ ॥

इस विषय में यदु महाराज तथा बडे तेजस्वी अवधूत दत्तात्रेय जी का जिस मे सम्वाद है ऐसी एक पुरातन इतिहास को प्राचीन लोग कहते हैं ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सुविशारदा अतिनिपुणा सर्वलोकविलक्षणा ॥ २६ ॥

सर्वलोकवैलक्षण्यमेवाऽऽह । प्राय इति । धर्मादिषु विवित्सायां आत्मविचारे च मानवाः समीहन्ते प्रवर्तन्ते तत्राप्यायुरादेर्हेतुना कामनयैव ॥ २७ ॥

त्वं तु न कस्यचित्कर्मणः कर्ता भवसि न किञ्चिदीहसे इच्छसि तत्त्वशक्त्याऽज्ञानेन वाऽनैपुण्येन वा विरूपत्वेन वाऽशा-

त्वं हि नः पृच्छतां ब्रह्मन्नात्मन्यानन्दकारणम् ।
ब्रूहि स्पर्शविहीनस्य भवतः केवलात्मनः ॥ ३० ॥

श्रीभगवानुवाच ।

यदुनैवं महाभागो ब्रह्मण्येन सुमेधसा ।
पृष्टः सभाजितः प्राह प्रश्रयावनतं द्विजः ॥ ३१ ॥

ब्राह्मण उवाच ।

सन्ति मे गुरवो राजन्! बहवो बुद्ध्युपाश्रिताः ।
यतो बुद्धिमुपादाय मुक्तोऽटामीह तान् शृणु ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

गिमतया वा औदासीन्यं घटत एव नेत्याह । कल्प इत्यादिना ॥ २८ ॥

महानानन्दश्च तव कुत इति पृच्छति । जनेष्विति ॥ २९ ॥

स्पर्शविहीनस्य विषयभोगरहितस्य अत्र हेतुः केवलात्मनः कलत्रादिशून्यस्य ॥ ३०—३१ ॥

बुद्ध्यैवोपाश्रिताः स्वीकृता न तूपदेशेन अटामि पर्यटामि ॥३२॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

द्विजं दत्तात्रेयं "योगर्द्धिमापुरुभयीं यदुहैहयाद्या" इति द्वितीयोक्तेः धर्मवित् परमहंसधर्मज्ञः ॥ २५ ॥

इयं बुद्धिः कुत उपलब्धेति शेषः । यां बुद्धिमासाद्य प्राप्य ॥२६॥

सर्वलोकेभ्यो बुद्धेर्वैलक्षण्यं वैशिष्ट्यं प्राय इति निष्काम-प्रवृत्तेर्दौर्लभ्यं सूचयति तत्रापि आत्मविचारप्रवृत्तावपि अत्र विवित्सापदस्य स्वाश्रयसमवायसम्बन्धेन विचारे लक्षणा ॥ २७ ॥

नन्वशक्त्येति कर्माणि पङ्ग्वादीनामशक्त्या सामर्थ्याभावेन तत औदासीन्यं घटते त्वन्तु कल्पः समर्थः एवमन्येऽपि कव्यादि-शब्दा अज्ञानादिप्रतियोगितया व्याख्येयाः ॥ २८—२९ ॥

स्पर्शो विषयेन्द्रियसम्पर्कः अत्र भोगरहितत्वे ॥ ३० ॥

बुद्ध्यैव स्वीकृताः गुरुत्वेन सम्भाविता यतो येभ्यो गुरुभ्यः ॥ ३१ ॥

पृथिवीति युग्मकम् । सुपेशकृदित्यत्र सकारलोप आर्षः ॥३२-३४॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

स कीदृश इत्यतस्तमनुवर्णयति । अवधूतमिति । अवधूतमभ्य-ङ्गादिभिरसंस्कृतदेहं ननु वर्णाश्रमधर्मत्यागिनं न विद्यते कुत-श्चिद्भयं तातपादेभ्यो यस्य तं तरुणं युवानं कविं विद्वांसम् ॥२५॥

प्रश्नमेवाह । कुत इति पञ्चभिः । हे ब्रह्मन्नकर्त्तुरिन्द्रियप्रीतये कर्माण्यकुर्वतस्तवेयं सुविशारदाऽतिनिपुणा सर्वलोकविलक्षणा मतिः कुतः कस्माद्धेतोरुदिता तां विशिनष्टि । यामिति । यां बुद्धि-मासाद्य प्राप्य सम्पाद्येति यावत् विद्वानपि बालवदवधूतश्च-रति ॥ २६ ॥

बुद्धेः सुविशारदत्वमेवाह । प्राय इति । प्रायशो मानवा धर्मा-दिषु विवित्सायां तत्साधनवेदनेच्छायां निमित्तभूतायां धर्मादि-साधनादिज्ञानार्थं चेत्यर्थः । तथा आयुरादेर्हेतुना आयुराद्यर्थं च समीहन्ते प्रवर्त्तन्त एव त्वं तु जडादिवत्किञ्चिदपि कर्त्तुं नेहसे नेच्छसि ॥ २७ ॥

नन्वशक्त्यज्ञाननैपुण्यवैरूप्यावाग्मित्वादिभ्यो न कर्तुमीहत इत्यतस्तं विशिनष्टि । कल्प इत्यादिना ॥ २८ ॥

कुतस्तव महानानन्दश्चेत्याह । जनेष्विति । दह्यमानेषु सत्सु त्वं तु न तप्यसे यथा दवाग्निना मुक्तो गङ्गाम्भःस्थो द्विपो गज-स्तद्वत्सुखमवतिष्ठस इत्यर्थः ॥ २९ ॥

पृष्टमपि तूष्णीमवस्थितं प्रतिवक्तुं चोदयति । त्वं हीति । हे ब्रह्मन्! भवतः आत्मनि मनस्यानन्दकारणं कथम्भूतस्य स्पर्शवि-हीनस्य शब्दादिविषयस्पर्शविहीनस्य केवलात्मनः अनुबन्ध-रहितदेहस्यापीति ॥ ३० ॥

इत्थमापृष्टः प्राहावधूत इत्याह भगवान् । यदुनेति । ब्रह्मण्येन ब्रह्मकुलोपकर्त्रा सुमेधसा बुद्धिमता सभाजितः सम्पूजितः पृष्टश्च प्रश्रयेण प्रकृष्टसेवयाऽवनतं नम्रं यदुं प्राह ॥ ३१ ॥

तदेवाह । सन्तीत्यादिना यावन्नवमाध्यायसमाप्ति । तावत्कुतो बुद्धिरित्यस्योत्तरमाह । सन्तीति । बुद्ध्युपाश्रिताः शिक्षणीयया बुद्ध्योपाश्रिता उपासिताः मद्बुद्ध्या शिक्षिता इत्यर्थः । यतः येभ्यो बुद्धिशिक्षितामितिशेषः । उपादाय स्थिरीकृत्य मुक्तः तापत्रयादिति शेषः । अटामि पर्यटामि तान् बुद्ध्युपाश्रितान् गुरून् शृणु ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अकर्तुर्निषिद्धाचरणरहितस्य अशनादिप्रवृत्तिशून्य च ॥ २६ ॥

बालवत्संचरणं ज्ञानसम्पादनाय किं न स्यादित्याशङ्क्य सत्यं

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

नायं मनुष्यधर्मः किंतु तेषां धर्मादिष्वेव प्रवर्तनम् आत्मतत्त्वविविदिषायां सत्यां चेत्याह । प्राय इति । प्रायो मानवाः परमात्मतत्त्वविविदिषायां सत्यां चेह धर्मादिष्वेव समीहन्ते प्रवर्तन्ते आयुरादिप्राप्तये च हेतुना तत्प्राप्तिसाधनसामग्र्येण ॥ २७ ॥

शक्त्यादिसाधनसामग्र्यभावादेवमवस्थानमिति तत्राह । त्वं त्विति ॥ २८—२९ ॥

स्पर्शविहीनस्य विषयभोगविहीनस्य केवलात्मनः शरीरमात्रपरिग्रहस्य ॥ ३०—३१ ॥

बुद्ध्युपाश्रिताः बुद्ध्या संगृहीताः यतो येभ्यः शिक्षावृत्तिमुपादाय शरीराभिमानयुक्तः तान् गुरून् ॥ ३२—३४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

विविदिषा जिज्ञासामात्रम् ॥ २७—४९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

धर्मार्थकामेषु विविदिषायां विविदिषायामात्मविचारे आयुरादेर्हेतुना कामनयैव समीहन्ते प्रवर्तन्ते ॥ २७ ॥

त्वन्तु न कस्यचित्कर्मणः कर्त्ता नच किमपीहसे तत्र कल्प इति न त्वसामर्थ्येनेत्यर्थः । कविरिति नाज्ञानेन दक्ष इति नत्वनैपुण्येन सुभग इति नतु कौरूप्येण हेतुना वनितादिकमिच्छसीत्यर्थः । मितभाषण इति नत्ववाग्मितया केनापि सह संलापमिच्छसीत्यर्थः । किन्त्वेतादृशोऽपि जडादिवद्वर्तसे ॥ २८ ॥

किञ्च तरुणस्यापि तव कामादिसन्तापो न कुत इति पृच्छति । जनेष्विति ॥ २९ ॥

मुखमेव वार्त्तां कथयतीति न्यायेन दृश्यमान एतावानानन्दश्च तव कुतः इति पृच्छति । त्वं हीति । स्पर्शो विषयभोगः केवलात्मनः एकाकिनः ॥ ३० ॥

प्रश्रयेणेति । तत्परिचर्ययैव तद्वशीकरिष्णुनेत्यर्थः । सुमेधसेति स्वबुद्धिप्रीणिततन्मनस्केनेति तत्प्रतिवचने हेतुः ॥३१॥

बुद्ध्यैवोपाश्रिताः ननूपदेशेन सांसारिकसन्तापान्मुक्तः ॥ ३२—३३—३४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सुविशारदा सुष्ठु निपुणा बालवत् अभिमानशून्यः योगिनो बाल्यमभिमानशून्यत्वं न तु सदसदनपेक्षित्वमित्याकरे स्थितम् ॥ २६ ॥

प्रायः बहुधा मानवा धर्मादिषु विविदिषायां धर्मादिबोधेच्छायां समीहन्ते प्रवर्तन्ते तत्रापि आयुरादेर्हेतुना निमित्तेन चकारात्केचित्तु धर्मादिबोधेच्छायामपि न प्रवर्तन्ते ॥ २७ ॥

कुतस्त्वं त्रिवर्गत्यागीति पृच्छति। त्वमिति ।तुशब्दः पूर्वोक्तेभ्यो द्विविधेभ्यो मानवेभ्यो वैलक्षण्यं सूचयति कल्पः समर्थः कविः क्रान्तदर्शी दक्षः निपुणः सुभगः प्रियदर्शनः अमृतभाषणः सत्यहितवक्ता अकर्मण्यैः अशक्तत्वाधानैपुण्यदुर्दर्शनत्वदुर्भाषित्वादिभी रहितोऽपि त्वं जडादिवदकर्ता पूर्वोक्तत्रिवर्गानुष्ठाता न भवसि न च किंचित्त्रिवर्गोपायिकं व्याख्यादीच्छादिकमीहसे ॥ २८ ॥

कुतस्त्वं कामाद्यस्पृष्ट इति पृच्छति । जनेष्विति ॥ २९ ॥

बाह्यसुखोपकरणत्यागित्वेन त्यक्तबाह्यसुखस्याभ्यन्तरानन्दवतो भवतस्तदानन्दकारणं ब्रूहीति पृच्छति । त्वामिति । केवलस्य त्यक्तगार्हस्थ्यस्य अत एव स्पर्शविहीनस्य ग्राम्यसुखरहितस्यापि आत्मनि हृदि आनन्दकारणं ब्रूहि ॥ ३० ॥

सुमेधसा महत्संगतद्भक्तिमद्बृहदारण्यकालोचनादिबुद्धिमता ॥३१॥

बुद्ध्युपाश्रिताः बुद्ध्यैव गुरुत्वेन गृहीताः यतो येभ्यः बुद्धिविवेकवर्ती धिषणामुपादाय प्राप्य मुक्तः अहममाभिमानविमुक्तः पर्यटामि ॥ ३२—३४ ॥

भाषा टीका ।

निर्भय होकर विचरते हुये कोइ अवधूत बडे पंडित दयावान् ऐसे एक ब्राह्मण को देखकर धर्मात्मा यदु महाराजने प्रश्न किया ॥ २५ ॥

यदुरुवाच ।

हे ब्रह्मन् ! कुछ काम नहीं करने वाले आप को यह निपुण बुद्धि कहां से आई है जिस बुद्धि का आश्रय करके आप विद्वान् हो फरभी बालक सरीके विचरते हो ॥ २६ ॥

सब मनुष्य तो प्रायः करके धर्म अर्थ काम मोक्ष इनकी जानने कि इच्छा से आयु यश धन इनके निमित्तही से काम करते हैं ॥ २७ ॥

आप तो पंडितहो समर्थहो वक्ता हो चतुर हो सुंदर हो मधुर भाषी हो फिरभी न कुछ करते हो न कुछ चाहते हो विकल पागल पिशाच सरीके रहते हो ॥ २८ ॥

सब मनुष्य तो काम लोभरूपी दावानल से जलते हैं आपको तो कोइ ताप नहीं है जैसे कि गंगाजी के बीच मे खडा हाथी जंगली आग से दुखी नहीं होता है ॥ २९ ॥

हे ब्रह्मन् ! मेरे पूछने से आप अपने आत्मा मे आनंदके कारण को कहिये आपतो विषय भोग से रहित एकले हो तब आप को आनंद कैसे होता है ॥ ३० ॥

श्री भगवानुवाच ।

ब्रह्मण्य सुंदर बुद्धिवाले यदु महाराजने अब बडे सत्कार पूर्वक पूजन करके ऐसे पूछा और नम्रहो कर आगे खडे रहे तब महाभागी ब्राह्मण दत्तात्रेयजी कहने लगे ॥ ३१ ॥

ब्राह्मण उवाच ।

हे राजन् ! अपनी बुद्धिसे आश्रय किये हुये हमारे गुरु बहुत हैं जिनसे जिस बुद्धिको लेकर संसार से मुक्तहोकर हम फिरते हैं तिनको श्रवण करो ॥ ३२ ॥

पृथिवी वायुराकाशमापोऽग्निश्चन्द्रमा रविः ।
कपोतोऽजगरः सिन्धुः पतङ्गो मधुकृद्गजः ॥ ३३ ॥
मधुहा हरिणो मीनः पिङ्गला कुररोऽर्भकः ।
कुमारी शरकृत् सर्प ऊर्णनाभिः सुपेशकृत् ॥ ३४ ॥
एते मे गुरवो राजंश्चतुर्विंशतिराश्रिताः ।
शिक्षावृत्तिभिरेतेषामन्वशिक्षमिहात्मनः ॥ ३५ ॥
यतो यदनुशिक्षामि यथा वा नाहुषात्मज ! ।
तत्तथा पुरुषव्याघ्र ! निबोध कथयामि ते ॥ ३६ ॥
भूतैराक्रम्यमाणोऽपि धीरो दैववशानुगैः ।
तद्विद्वान्न चलेन् मार्गादन्वशिक्षं क्षितेर्व्रतम् ॥ ३७ ॥
शश्वत्परार्थसर्वेहः परार्थैकान्तसम्भवः ।
साधुः शिक्षेत भूभृत्तो नगशिष्यः परात्मताम् ॥ ३८ ॥
प्राणवृत्त्यैव सन्तुष्येन्मुनिर्नैवेन्द्रियप्रियैः ।
ज्ञानं यथा न नश्येत नावकीर्येत वाङ्मनः ॥ ३९ ॥
विषयेष्वाविशन् योगी नानाधर्मेषु सर्वतः ।
गुणदोषव्यपेतात्मा न विषज्जेत वायुवत् ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

गुरूनाह । पृथिवीति ॥ ३३ ॥

शोभनं रूपं कीटस्य करोतीति सुपेशकृत् ॥ ३४ ॥

मे मया श्रिताः तदाह । एतेषां वृत्तिभिरात्मनः शिक्षाः शिक्षणीयानर्थान्हेयोपादेयादीनन्वशिक्षमनुशिक्षितवानस्मि ॥ ३५ ॥

नाहुषो ययातिः ॥ ३६ ॥

क्षितेः क्षमां शिक्षितवानित्याह । भूतैरिति । आक्रम्यमाणः पीड्यमानः तद्विद्वान्भूतानां दैववशवर्तित्वं विद्वान् व्रतं नियमम् ॥ ३७ ॥

पर्वतरूपा वृक्षरूपा च या पृथिवी तस्याः शिक्षितमाह । शश्वदिति । सर्वदा परार्थाः परोपकारार्थाः सर्वा ईहा यस्य सः परार्थ एव एकान्ततः सम्भवो यस्य सः भूभृत्तः पर्वतात् तस्य हि वृक्षतृणनिर्झरप्रस्रवक्रियाः परार्था एव यथा तद्वत् तथा नगशिष्यो वृक्षशिष्यः सन् परात्मतां पराधीनात्मताम् वृक्षो यथा परैरवखण्डयोत्पाट्य वा नयनमप्यनुमन्यते तद्वत् ॥ ३८ ॥

वायुरपि द्विविधः प्राणो बाह्यश्च तत्र प्राणस्य गुरुत्वमाह । प्राणवृत्त्येति । प्राणो ह्याहारादिमात्रेण प्रवर्तते रूपरसादीनिन्द्रियविषयांस्तु नापेक्षते तथा मुनिरपि भवेदित्यर्थः । प्राणवृत्तेरकरणे मनोवैकल्येन ज्ञाननाशः स्यादतो देहनिर्वाहः कर्तव्यः गुणलिप्सायां तु वाङ्मनश्च विक्षिप्येताऽतो नाधिकं लिप्सेदित्याह । ज्ञानमिति । नावकीर्येत न विक्षिप्येत ॥ ३९ ॥

विषयान् सेवमानोऽपि तेष्वनासक्तिं बाह्याद्वायोः शिक्षेदित्याह । विषयेष्विति । नानाधर्मेषु शीतोष्णादिधर्मकेषु नहि वायुर्वने दहने वा सज्जते तद्वत् ॥ ४० ॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

एतेषां पृथिव्यादीनां वृत्तिभिर्धर्मैः ॥ ३५ ॥

यतो यस्माद्गुरोः यद्यं हेयमुपादेयं वार्थम् ॥ ३६ ॥

नियमं क्षमारूपं मार्गात् ज्ञानमार्गात् ॥ ३७ ॥

पृथिव्या अवान्तरभेदं गुरुत्वेन स्फुटीकरोति पर्वतरूपेति साधुः यथा शश्वत् परार्थसर्वेहः परार्थैकान्तसम्भवः स्यात्तथा भूभृत्तः शिक्षेत इत्यन्वयः । तस्य भूभृतः वृक्षादिप्रस्रवक्रियाः परार्था एवेत्युपलक्षणं तस्य सम्भवोऽपि एकान्ततः सर्वथा हरिणगवयसिंहादिवासायैवेति ॥ ३८ ॥

वायोरप्यवान्तरभेदमाह । वायुरपीति । तत्र तयोर्द्वयोर्वाय्वोर्मध्ये प्राणस्य वृत्तिराहारमात्रं तयैव इन्द्रियप्रियै रूपादिना चक्षुरादीनां लालनैः प्राणवृत्तेराहारमात्रस्य अतः प्राणवृत्त्यकरणस्य ज्ञाननाशकत्वात् रसासक्तिं विहायौषधिवद्भुञ्जता देहनिर्वाहः कर्तव्यः गुणलिप्सायां श्रेष्ठमधुराम्लादिरसापेक्षायाम् अतो गुणलिप्साया विक्षेपकत्वात् अधिकं प्राणवृत्तेरतिरिक्तम् ॥ ३९ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी ।

विषयेषु रसादिषु आवसन् तान् सेवमानोऽपीत्यर्थः । धने पुष्पिते दहनेऽग्नौ ॥ ४० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

एतेषां शिक्षावृत्तिभिः शिक्षा अशिक्षं शिक्षां कृतवान् ३५॥३८ इन्द्रियार्थैः शब्दादिभिः ॥ ३९—४१ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तान्निर्दिशति द्वाभ्याम् । पृथिवीति । मधु करोत्याहारत्वेनेति मधुकृद्भृङ्गः सच मधुकृन्ततीति आच्छिद्य गृह्णातीति व्युत्पत्तेः मधुमक्षिका च ॥ ३३ ॥

मधुहा मध्वाहर्ता व्याधः कुररः पक्षिविशेषः उत्क्रोशाख्यः चन्द्रिकाशनः शरकृदस्त्रकारः सुपेशमतिशोभनं रूपं कीटस्य करोतीति तथा भ्रमरविशेषः ॥ ३४ ॥

एते चतुर्विंशतिगुरवो मेमया आश्रिताः तदाह।एतइति।शिक्षा इति एतेषां वृत्तिभिरहमात्मनः शिक्षा मनः प्रतिशिक्षा अन्नाशिक्षं पाकं पचतीति वन्निर्देशः शिक्षां कृतवानस्मीत्यर्थः ॥ ३५ ॥

तत्र यतो वृत्तेः यच्छिक्षणमनुशिक्षामि अनुशिक्षितवानस्मि पूर्ववन्निर्देशः न चलेत अन्वशिक्षामित्यादिपरोक्षापरोक्षनिर्देशः स्वदृष्टान्तेनान्यैरप्येवं वर्तितव्यमित्यभिप्रायकः हे नाहुषात्मज।नाहुषो ययातिः हे पुरुषव्याघ्र ! तच्छिक्षणं तथा ते तुभ्यं कथयामि निबोधावधारय ॥ ३६ ॥

तत्र क्षितिः पर्वतवृक्षादिरूपा समरूपा चेति द्विधा तत्र समरूपायाः क्षितेः क्षमां शिक्षितवानस्मीत्याह । भूतैरिति । दैववशानुगैर्दैवप्रेरितैः भूतैराक्रम्यमाणः पीड्यमानोऽपि धीरः तदाक्रमणप्रयुक्तदुःखसहिष्णुः तद्विद्वान् भूतानां दैववशानुगत्वं जानन् मार्गान्नचलेदित्येव क्षितेर्व्रतं नियतं धर्ममन्वशिक्षं मार्गः क्षितिपक्षे धारणात्मकः पक्षान्तरे ज्ञानमार्गः ॥ ३७ ॥

पर्वतवृक्षरूपायाः क्षितेः शिक्षितमाह । शश्वदिति।शश्वत् सर्वदा परोपकारार्था परार्था ईहा चेष्टा यस्य सः परार्थ एवैकान्ततःसम्भवो यस्य सः भूभृतः पर्वतात्साधु यथा तथा एवं शिक्षितं तस्य हि तृणनिर्झरप्रस्रवणादिक्रियाः परार्था एव तद्वदित्यर्थः । तथा नगशिष्यः सन् परात्मतां पराधीनतां शिक्षेत वृक्षो यथा परैरवखण्ड्य वोत्पाट्य वा नीयमानो न निवारयति नानुमन्यते वा तद्वत् ॥ ३८ ॥

वायुरपि द्विविधः प्राणो बाह्यश्च तत्र प्राणाच्छिक्षणीयमाह । प्राणवृत्त्येति । प्राणो ह्याहारादिमात्रेण वर्तते शब्दादिविषयांस्तु नापेक्षते तथा मुनिरपि प्राणधारणमात्रप्रयुक्तया वृत्त्या आजीविकया वर्तेत नत्विन्द्रियप्रियैः शब्दादिविषयैर्न ताननुभवन्नित्यर्थः । प्राणवृत्त्या वर्तनमपि किमर्थमित्यत आह । ज्ञानमिति । प्राणवृत्त्यकरणे मनोवैक्लव्येन ज्ञाननाशः स्यादतो यथा ज्ञानं न नश्येत मनो वा नावशीर्येत तदुपयुक्तया देहनिर्वाहोपयुक्तया वृत्त्या वर्तेत इत्यर्थः ॥ ३९ ॥

विषयान् सेवमानोऽपि तेष्वनासक्तिं बाह्याद्वायोः शिक्षितवानित्याह । विषयेष्विति । नानाधर्मेषु प्रियाप्रियतदुभयानुभयात्मकेषु विषयेष्वाविशन्नपि तानिन्द्रियैः स्पृशन्नपीत्यर्थः । गुणदोषाभ्यां प्रियाप्रियाभ्यां व्यपेतः विमुक्तः आत्मा मनो यस्य सः सर्वतः सर्वेषु विषयेषु न विषज्जेत नासक्तो भवेत् न तु वायुश्चन्दने दहने वा विषज्जते तद्वदित्यर्थः । अनासक्तावत्र दृष्टान्तो नतु गुणदोषव्यपेतात्मत्वे चेत्यवगन्तव्यं तस्य तदनपेतात्मत्वात् ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

एतेषां पृथिव्यादीनां शिक्षाकरणवृत्तिभिः ॥ ३५ ॥

यतो यस्मात् पृथिव्यादेर्यद्वर्तनं शिक्षामि शिक्षे तत्तथा निबोध बोधतिः परस्मैपदी ॥ ३६ ॥

क्षितेः शिक्षितां बुद्धिमाह । भूतैरिति । तद्दैवं विदन्तीति तद्विदः तेषां वैवज्ञानां मार्गात् तद्विद्वानिति पाठे तस्य दैवस्य वशानुगत्वं जानन् मार्गात् सतामिति शेषः क्षितेर्व्रतमचलत्वम् अत एवाचलेति पृथिव्या नामान्तरम् ॥ ३७ ॥

भूमेः शिक्षितं व्रतान्तरंबुद्धिं चाह । शश्वदिति । सर्वदा परेषां गुरुदेवादिसज्जनानामर्थे आत्मनः सर्वेहां सकलचेष्टा संभवं वृद्धिं च "सज्जनार्थेषु मन्येत ऐहिकीं वृद्धिमात्मनः" इत्यादेरयमेवार्थ इति शिक्षेत नियमेनेति शेषः ॥ ३८ ॥

एवं विज्ञानानि शिक्षमाणस्य मुनेर्वृत्तिप्रकारमाह । प्राणवृत्त्येति । मुनिर्यावत्प्राणवृत्त्या शरीरयात्रया संतुष्येत् तावत्यैव निर्वहेत् एतत्कारणावश्यमाह । नैवेति । तत्रापि ज्ञाननाशकारणानि मनोविक्षेपनिमित्तानि च द्रव्याणि न सेवेतेत्याशयेनाह । ज्ञानमिति ॥ ३९ ॥

वायोः शिक्षिता का बुद्धिरिति तत्राह । विषयेष्विति । विषयेष्वाविशन् विषयाननुभवन् योग्यात्मा योगी जीवः गुणदोषसंबन्धेन न विषज्जेत संसक्तो न भवेत् गानादिनानाधर्मेषु ॥ ४० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

एतेषां वृत्तिभिरेवात्मनः शिक्षाः शिक्षणीयानर्थान् अन्वशिक्षम् ॥ ३५ ॥ ३६ ॥

क्षितेः क्षमां शिक्षितवानित्याह । भूतैरिति । दैववशाः पित्रादयस्तेषामनुगैः तद्विद्वान् भूतानां दैववशवर्तित्वं जानन् ॥ ३७ ॥

पर्वतरूपा वृक्षरूपा च या पृथिवी तस्याः शिक्षितं क्रमेणाह । शश्वदिति । परार्थाः सर्वा ईहाः भूधारणनिर्झरोत्कमणस्रोत्पन्नरत्नादिप्रदानरूपाश्चेष्टा यस्य सः भूभृत्तः शिक्षेत शिक्षया च एवं भूतो भवेदित्यन्वयः । नगस्य वृक्षस्य शिष्यः सन् परात्मतां शिक्षेत् परेष्वेवार्पित आत्मा येन तस्य भावस्तत्ता तां वृक्षं खलु स्थानात् स्थानान्तरं नीत्वा यदा रोपयति सेचनादिकं च करोति तत्र सोऽनुमन्यत एव नतु

पार्थिवेष्विह देहेषु प्रविष्टस्तद्गुणाश्रयः ।
गुणैर्न युज्यते योगी गन्धैर्वायुरिवाऽऽत्मदृक् ॥ ४१ ॥
अन्तर्हितश्च स्थिरजङ्गमेषु ब्रह्मात्मभावेन समन्वयेन ।
व्याप्त्याऽव्यवच्छेदमसङ्गमात्मनो मुनिर्नभस्त्वं विततस्य भावयेत् ॥ ४२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

विप्रतिपद्यत इति तथा योगी भवेदिति पर्वतादत्र विशेषो द्रष्टव्यः ॥ ३८ ॥

वायुरपि द्विविधः प्राणो बाह्यश्च तत्र प्राणाच्छिक्षितमाह । प्राणवृत्त्येति । प्राणो ह्याहारादिमात्रेण प्रवर्त्तते रूपरसादीनिन्द्रियावयवांस्तु नोपचयत इत्याह । इन्द्रियप्रियैर्विषयैः तथा मुनिरपि भवेदित्यर्थः । प्राणवृत्तेरकरणे मनोवैकल्येन ज्ञाननाशः स्यादतो देहनिर्वाहः कार्यः । किञ्च वाङ्मनो यथा नावकीर्येत न विक्षिप्येतेत्यतिरूक्षेनासंस्कृतेनाहारेण वाङ्मनः निःसरेत् मनोऽपि विक्षिप्तं स्यादेवमतिस्निग्धेनान्यानस्यशुक्रादिवृद्धया वाङ्मनसयोर्विक्षोभ इति तथा न कुर्वीत् ॥ ३९ ॥

विषयान् सेवमानोऽपि तेष्वनासंक्ति बाह्याद्वायोः शिक्षेदित्याह । विषयेष्विति । नानाधर्मेषु लघुत्वगुरुत्वोत्कर्षनिकर्षादिमत्सु न हि वायुर्गहने दहने वा सज्जते तद्वत् ॥ ४० ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ये मया एते गुरवः आश्रिताः एतेषां वृत्तिभिः आत्मनः शिक्षाः शिक्षणीयाः हेयोपादेयपदार्थविषया वृत्तीः अन्वीशक्षमनुशिक्षितवानस्मि ॥ ३५—३६ ॥

पृथिव्याः सकाशात् शिक्षितमुपदिशति । भूतैरिति द्वाभ्याम । दैवस्य तत्तत्कर्मफलप्रदस्य भगवतो वशानुगैर्भूतैर्मनुष्यपश्वादिभिः आक्रम्यमाणः पीडयमानोऽपि तद्विद्वान् तेषां दैववशवर्त्तित्वं विद्वान् धीरः भूतकृतोपद्रवसहनशीलः मुमुक्षुः मार्गात् क्षमारूपात् श्रेयः पथाच्च चलेदिति क्षितेर्भूमेर्व्रतं क्षमारूपं नियमम अन्वीशिक्षमनुशिक्षितवास्मि ॥ ३७ ॥

साधुः शश्वत्सर्वदा परार्था ईहा यस्य सः परार्थ एव एकान्ततः संभवो यस्य सः एवंभूतः भवेत् तत्रोपायमाह । नगस्य द्रुमस्य शिष्यः अर्थान्नगात् भूभृतः पर्वताच्च परात्मतां पराधीनतां परोपकारित्वमित्यर्थः शिक्षेत ॥ ३८ ॥

वायोः सकाशात् शिक्षितमुपदिशति । प्राणेति त्रिभिः । मुनिर्वेदान्तार्थमननादिशीलः इन्द्रियप्रियैः नैव भवेत्किंतु प्राणवृत्त्या रसादिनिरपेक्षाहारादिमात्रेण कालक्षेपवृत्त्यैव संतुष्येत् यथा वेदान्तश्रवणादिजन्यं ज्ञानं न नश्येत् ज्ञानोपकारकद्वयं च विक्षिप्तं न भवेदित्याह । ज्ञानमित्यादिना ॥ ३९ ॥

प्राणवृत्त्यापि स्वीकृतेषु विषयेषु भोजनाच्छादनेषु नानाधर्मेषु शीतोष्णादिधर्मवत्सु न विषज्जेत आसक्तिं न नैव कुर्यात् ॥ ४० ॥

———

भाषा टीका ।

पृथिवी वायु आकाश जल अग्नि चन्द्रमा सूर्य कबूतर अजगर समुद्र पतंगा भौंरा हाथी मधुहरने वाला हरिण मछली पिंगला वेश्या कुरर पक्षी बालक कुमारी बाण कर्ता सर्प मकरी कीट ॥ ३३—३४ ॥

हे राजन् ! इतने मेरे आश्रय किये हुये चौबीस गुरु हैं इनकी शिक्षा की वृत्ति से मैंने अपनी आत्मा को शिक्षा दी है ॥ ३५ ॥

हे नहुष पुत्र ! जिनसे जिस प्रकार जो शीखा है हे पुरुष श्रेष्ठ ! तिसको मैं तैसाही कहूंगा आप श्रवण करो ॥ ३६ ॥

प्रारब्ध के वशमें भये मनुष्यों से दुखित किया जाय तौ भी धीर पुरुष इस बात को जानता हुआ अपने मार्ग में से नहीं हटे स्थिर रहै इस बात को मैंने पृथिवी से सीखा है ॥ ३७ ॥

साधुको चाहिये कि सदा काल पराये हित की सब चेष्टा करै पर के वास्ते जीवन समझै इस बात को पर्वत रूपी या वृक्ष रूपी पृथिका शिष्य होकर साधू शीखै ॥ ३८ ॥

मुनि को प्राण वृत्तिसे संतोष करना चाहिये इंद्रियों की प्रीति नहीं चाहै जैसे की ज्ञान नष्ट न होवै जैसे मन वचन का नाश न होवै तैसा मात्र आहार करै ॥ ३९ ॥

योगी नाना धर्म वाले विषयों में प्रवृत्त होभी जावे तौ भी उन के गुण दोषों से रहित होकर मलग रहै किसी से लिप्त न हो यह बात वायु से शीखी है ॥ ४० ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

यथा वायुर्गन्धादिधर्मयोगेन प्रतीयमानोऽपि वस्तुतो न तद्योगी एवं देहादिधर्मयोगेनाहंप्रत्ययेन प्रतीयमानोऽप्यात्मा न तद्धर्मवानिति संभावितमिति वायोरेव शिक्षितमित्याह । पार्थिवेष्विति । तद्गुणाश्रयो देहधर्मान् बाल्यादीनाश्रित्य वर्तमानो गुणैस्तैरेव ॥ ४१ ॥

आकाशाच्छिक्षितं सम्भावनाद्वयमाह । अन्तर्हितश्चेति द्वयेन । अन्तर्हितश्च देहान्तर्गतोऽपि मुनिरात्मनो देहाद्यसंगमत एवाव्यवच्छेदं च भावयेत् कुतः स्थिरजङ्गमेषु समन्वयेन वा व्याप्तिस्तया किम्भाणिषु सूत्रस्येव व्याप्तिः न विततस्य सर्वगतस्य तत्कृतः ब्रह्मात्मभावेन ब्रह्मस्वरूपभावनया "तत्त्वमसी"तिश्रुतेः नन्वेतत्सर्वं कथं

तेजोऽबन्नमयैर्भावैर्मेघाद्यैर्वायुनेरितैः ।
न स्पृश्यते नभस्तद्वत्कालसृष्टैर्गुणैः पुमान् ॥ ४३ ॥
स्वच्छः प्रकृतितः स्निग्धो माधुर्यस्तीर्थभूर्नृणाम् ।
मुनिः पुनात्यपां मित्रमीक्षोपस्पर्शकीर्तनैः ॥ ४४ ॥
तेजस्वी तपसा दीप्तो दुर्धर्षोदरभाजनः ।
सर्वभक्ष्योऽपि युक्तात्मा नादत्ते मलमग्निवत् ॥ ४५ ॥
क्वचिच्छन्नः क्वचित्स्पष्ट उपास्यः श्रेय इच्छताम् ।
भुङ्क्ते सर्वत्र दातॄणां दहन् प्रागुत्तराशुभम् ॥ ४६ ॥
स्वमायया सृष्टमिदं सदसल्लक्षणं विभुः ।
प्रविष्ट ईयते तत्तत्स्वरूपोऽग्निरिवैधसि ॥ ४७ ॥
विसर्गाद्याः श्मशानान्ता भावा देहस्य नाऽऽत्मनः ।
कलानामिव चन्द्रस्य कालेनाव्यक्तवर्त्मना ॥ ४८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सम्भवति तत्राऽऽह । नभस्त्वं तत्तुल्यत्वं भावयेत् यथा नभसः सर्वगतस्य न घटादिभिः सङ्गः परिच्छेदो वा एवमात्मनोऽपि सम्भवतीति ॥ ४२ ॥

किञ्च कूटस्थस्याऽऽत्मनो नागमापायिदेहादिसम्बन्ध इत्याह । तेजोऽबन्नमयैः तेजश्च आपश्चान्नं पृथिवी च तन्मयैः कालसृष्टैर्गुणैर्देहादिभिः पुमान्न स्पृश्यत इति नभोवत्संभवतीति ॥ ४३ ॥

स्वच्छत्वादिभिर्गुणैरुदकं जगत्पुनातीति तद्गुणा मया शिक्षिता इत्याह । स्वच्छो निर्मलः प्रकृतितः स्वभावतः स्निग्धो जनेष्वनुरागवान् माधुर्यो मधुरालापी तीर्थभूस्तीर्थस्थानम् अपां मित्रमुदकतुल्यः अघादिति पाठे सखायं पापात्पुनाति स्वच्छत्वादिगुणैर्यथोदकसादृश्यं ज्ञातव्यम् ॥ ४४ ॥

अग्नेः शिक्षितमाह । तेजस्वीति । ज्ञानातिशयात् विशेषतस्तपसा दीप्तः दुर्धर्षोऽक्षोभ्यः स चासावुदरभाजनश्चापरिग्रहः युक्तात्मा मुनिः ॥ ४५ ॥

अग्नेरेव शिक्षान्तरमाह । क्वचिदिति । यथाग्निः परेच्छयैव हविर्गृह्णाति तथा मुनिरित्याह । दातॄणामिति । प्रागुत्तराशुभं भूतं भविष्यच्च पापम् ॥ ४६ ॥

आत्मनो देहोपाधिकमेव उच्चनीचत्वादि न स्वाभाविकमित्यग्निदृष्टान्तेन सम्भावितमित्याह । स्वमायया स्वाविद्यया सृष्टं सदसल्लक्षणं देवतिर्यगादिरूपं विप्रशूद्रादिरूपं वा ॥ ४७ ॥

आत्मनो जन्मादिषड्विकाराभावः चन्द्रदृष्टान्तेन सम्भावित इत्याह । विसर्गाद्या इति । विसर्गो जन्म श्मशानं नाशः अत्रेयं ज्योतिःशास्त्रप्रक्रिया आप्यमण्डलं चन्द्रः तेजोमयमण्डलमादित्यः तयोरेकनक्षत्रावस्थाने चन्द्रो न दृश्यते चक्षुषा आदित्यमण्डलेन समदेशस्थितेन व्यवधानात् सा अमावास्या अथ षष्टिघटिकाभिश्चन्द्रो नक्षत्रान्तरं गच्छति आदित्यस्तु त्रयोदशभिः अहोरात्रैः अतः प्रतिपदमारभ्य विषमस्थितस्य आदित्यमण्डलस्य पञ्चदशः पञ्चदशो भाग आप्यमण्डले प्रतिबिम्बितो दृश्यते सा कलेत्युच्यते एवं पञ्चदशेऽह्नि त्रयोदशभिर्नक्षत्रैरन्तरामिति राशिचक्रस्य सप्तविंशतिनक्षत्रात्मकस्य मध्ये सम्मुखौ यदा चन्द्रादित्यौ तिष्ठतः तदा सम्पूर्णं प्रतिबिम्बं भूच्छायालाञ्छितं दृश्यते सा पूर्णिमा तस्याममावास्याप्रतिबिम्बेन सह षोडशकलश्चन्द्र उपचर्यते ततः पुनः प्रतिपदमारभ्य मण्डलयोर्विषमीभावात् कलाह्रासः तत्र यथा कलानामेवोत्पत्त्यादयो नाप्यमण्डलस्य तथात्मनोऽपीत्याह । कलानामिवेति ॥ ४८ ॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

तद्गुणाश्रयः तेषां देहादीनां ये गुणाः कार्श्यादिधर्मास्तेषामहंप्रत्ययेनाश्रयोऽपि तैर्गुणैर्धर्मैरसङ्गत्वाद्वस्तुतो न युज्यते ॥४१॥

एकस्य सजातीयभेदविरहितस्याद्वितीयस्य देहाद्यसङ्गं देहाद्यसम्बद्धम् अतएव असङ्गत्वादेव अव्यवच्छेदमपरिच्छिन्नत्वं समन्वयेन अधिष्ठानतयानुगमेन तत् जीवस्य विततत्वं तत्त्वमसीति तत्पदेनेश्वर उच्यते त्वंपदेन जीव उच्यते असिपदेन ब्रह्म तत्र मायोपहितं चैतन्यं सर्वज्ञं सर्वकारणम् अविद्योपहितं चैतन्यं किञ्चिज्ज्ञं जगत्स्रष्टौ सर्वथाऽशक्तमिति तयोरैक्याभावात् मुख्यार्थस्य बाधः विशिष्टवाचकस्य शब्दस्य विशेष्यांशेऽपि वाचकतया कथञ्चिद्योगः ऐक्यं तु प्रयोजनमिति सोऽयं देवदत्त इतिवन्मायाविद्यादिविशेषणपरित्यागेनानुगतचिन्मात्रोपादानेन भागलक्षणया जीवेऽपि ब्रह्मस्वरूपभावनया विततत्वोपपत्तिरित्यर्थः । एतत् असङ्गत्वमपरिच्छिन्नत्वञ्च ॥ ४२ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी।

तन्मयैः तेजआदिविकारैः ॥ ४३ ॥

मुनिः पुनात्यघान्मित्रमिति पाठान्तरं तत्र स्वच्छत्वादयो गुणा जले स्फुटमुपलभ्यन्ते इत्यर्थात्तात्पर्यवशाज्जलसादृश्यं ज्ञेयम् ॥ ४४ ॥

सर्वभक्षोऽपि भक्ष्याऽभक्ष्यविचारशून्योऽपि मलं तज्जन्यं दोषं नादत्ते न प्राप्नोति ॥ ४५ ॥

क्वचिद्व्यावहारिकजनेषु जडवदवधूतवेशभाषादिना छन्नः क्वचिच्च मुमुक्षुप्रभृतिषु उपदेशादिना स्पष्टः अतः श्रेय इच्छद्भि-रुपास्यः सर्वत्र भुङ्क्ते इति तस्य परमहंसत्वमभिव्यञ्जितं भूतं भविष्यच्चेति प्रारब्धस्य भोगमन्तराऽपरिहार्यत्वं व्यञ्जितम् ॥ ४६ ॥

स्वाविद्यया स्वरूपाज्ञानेन तत्तत्स्वरूपः देवतिर्यगादि-रूपः ॥ ४७ ॥

तत्र चन्द्रदृष्टान्ते तयोश्चन्द्रादित्ययोः अदर्शने हेतुः चक्षुष इति अथ अमावास्यानन्तरं अतः षष्टिघटिकाभिर्नक्षत्रान्तरगमनात् पञ्चदशोभागः पञ्चदशांशः आप्यमण्डले जलमयमण्डले तस्यां पूर्णिमायां ततः पूर्णिमानन्तरम् अत्र ज्योतिःशास्त्रप्रक्रियायाम् ॥४८॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

समन्वयेन वेदान्तवाक्यसमन्वयासिद्धेन ब्रह्मात्मभावेन सर्व-वस्तूनां ब्रह्मात्मकत्वेन आत्मनः परमात्मनः असङ्गं नभस्त्वं नभस इव भावयेत् ॥ ४२ ॥

निर्दोषत्वे च नभोदृष्टान्त इत्याह । तेज इति । पुमान् परः पुमान् ॥ ४३ ॥

अप्, मित्रम् अपां तुल्यः ॥ ४४ ॥

सर्वभक्षः स्वाद्वस्वादुविभागमनपेक्ष्य भक्षकः ॥ ४५ ॥

स्पष्टः योगाभ्यासरूपमथनेन स्पष्टः ॥ ४६ ॥ ४७ ॥

विसर्गाद्याः निषेकाद्याः ॥ ४८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

वायोरेव शिक्षणीयान्तरमाह। पार्थिवेष्विति आत्मदृग्योगी पृथि-व्यादिपरिणामरूपेषु देहेषु प्रविष्टःतद्गुणाश्रयः देवत्वमनुष्यत्वस्थूल-त्वकृशत्वादिदेहधर्मयोगितया प्रतीयमानोऽपि तैर्गुणैर्न युज्यते स्थूलो-ऽहं कृशोऽहमिति न मन्यते आत्मदृग्योगीति हेतुगर्भं यतः देहविलक्षण-मात्मानमेव पश्यतीति तथा गन्धैर्वायुरिव यथा सुरभिपूतिगन्धा अ-र्थेषु प्रविशन्नपि वायुर्वस्तुतो न तद्योगी तद्वत् ॥ ४१ ॥

अथाकाशाच्छिक्षितमाह द्वाभ्याम् । अन्तरिति । समन्वयेन वेदा-न्तवाक्यसमन्वयसिद्धेन ब्रह्मात्मभावेन सर्ववस्तूनां ब्रह्मात्म-कत्वेनाव्यवच्छेदं निरन्तरं यथा तथा सर्वेषु चराचरात्मकेषु भूतेषु विततस्य व्याप्तस्य पूर्णस्येति यावत् आत्मनः परमा-त्मनः अन्तर्बहिश्च व्याप्त्याऽसङ्गं नभस्त्वं नभस इव भाव-येत् ॥ ४२ ॥

निर्दोषत्वे नभोदृष्टान्तमाह । तेज इति । तेजश्चापश्चान्नं पृथिवी च इन्द्रियकवद्भावः तन्मयैस्तद्विकाररूपैर्वायुना ईरितैः प्रेरितैर्मेघाद्यैः भावैः पदार्थैर्यथा नभो न स्पृश्यते तद्वत्पुमान् परमपुरुषः काल-सृष्टैः कालेन निमित्तभूतेन सृष्टैर्गुणैः गुणपरिणामात्मकैः स्थिर-जङ्गमैर्न स्पृश्यते व्याप्यगतदोषैर्न स्पृश्यते इत्यर्थः ॥ ४३ ॥

स्वच्छत्वादिभिर्गुणैरापो जगत्पुनन्तीति तद्गुणाः शिक्षणीया इत्याह। स्वच्छ इति।स्वच्छः निर्मलः प्रकृतितः स्वभावतः स्निग्धः भूतेष्वनुरा-गवान् माधुर्यः मधुरालापी नृणां तीर्थभूस्तीर्थस्थानमपामिवत्रमपां तुल्यः अन्यदपि उभयसाधारणं धर्ममाह।ईक्षादिभिः पापात्पुनातीति ईक्षा दर्शनम् उपस्पर्शनं जलपक्षे स्नानपानादिकं मुनिपक्षे पाद-स्पर्शादिरूपम् ॥ ४४ ॥

अथाग्नेः शिक्षणीयमाह । तेजस्वीति।तेजस्वी ज्ञानातिशयवान् विशेषतस्तपसा दीप्तः दुर्धर्षः अक्षोभ्यः सचासावुदरभाजनश्चेति उदरं भाजनमन्नादिनिधानपात्रं यस्य सः अपरिग्रह इत्यर्थः सर्वभक्षः मिष्टकदन्नविभागमनवेक्ष्य भक्षकः नतु निषिद्धानिषि-द्धभक्षकः“आहारशुद्धौ सत्त्वशुद्धि”रिति नाविरतो दुश्चरितादिति” च श्रुतेः युक्तात्मा समाहितचित्तः मलं नादत्ते निर्मलश्चाग्निवद्य-थाग्निस्तद्वत् ॥ ४५ ॥

तत एव शिक्षणीयान्तरमाह । क्वचिदिति द्वाभ्याम् । छन्नः अग्नि-पक्षे भस्मना छन्नः योगिपक्षे स्वमाहात्म्यानाविष्कारेण स्पष्टः अग्नि-पक्षे आज्यादिरूपहविषा पक्षान्तरे योगाभ्यासादिना श्रेयः स्वर्ग-मोक्षादिरूपमिच्छतामिच्छद्भिः उपास्यः यथाग्निः परेच्छयैव हविर्गृ-ह्णाति तथा मुनिरपीत्याह । भुङ्क्त इति । दातॄणां प्रागुत्तराशुभं भूतं भविष्यच्च पापं दहन् ॥ ४६ ॥

स्वमाययेति।विभुः परमपुरुषः सदसल्लक्षणं चिदचिदात्मकं जग-त्प्रविष्टःतत्तत्स्वरूपः देवमनुष्यादिरूपः ईयते प्रतीयते यथाग्निरेधसि दारुणि प्रविष्टः तद्रूप ईयते तद्वत् अग्नेरधिष्ठानगतवक्रत्वादिरिव देवाद्याकारो नान्तर्यामिपरमात्मस्वरूपगत इत्यर्थः ॥ ४७ ॥

जन्मादिषड्भावविकाराः शरीरस्यैव इति नत्वात्मनः चन्द्रस्य कलानामिवेति चन्द्रदृष्टान्तेन शिक्षितमित्याह। विसर्गाद्या इति।निषे-काद्याः श्मशानान्ताः नाशान्ता भावा विकाराः अस्पष्टगतिना कालेन निमित्तेन देहस्यैव नत्वात्मनश्चन्द्रस्य कलानामिव यथा चासां वृद्धिह्रासौ न तु चन्द्रस्य तद्वदित्यर्थः ॥ ४८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

पार्थिवेषु पृथिवीकार्येषु प्रविष्टः तद्गुणाश्रयः जन्मदुःखा-दिदेहधर्माश्रयः गुणैर्दुःखादिभिः ॥ ४१ ॥

नभसः शिक्षितमाह । अन्तरिति । मुनिर्विततस्य व्याप्तस्या-कृतिनः आत्मनः परमात्मनः नभोवदव्यवच्छेदमखण्डत्वं देहेषु असङ्गत्वं भावयेच्चिन्तयेत् कुत्र कथमत उक्तं । स्थिरजङ्ग-मेष्विति। स्थिरजङ्गमेषु चराचरात्मकेषु वस्तुषु अन्तरात्म-भावेन अन्तर्यामित्वेन अणुत्वव्याप्त्या बहिर्ब्रह्मभावेन बृहत्त्वेन महत्त्वव्याप्त्या इदं केन सिद्धमत्राह । समन्वयेनेति । उपक्रमा-दितात्पर्ययुक्तप्रमाणेन ब्रह्मणः आत्मभावेन स्वैक्येनेत्यन्यथा व्याख्यानम्—

> जीवान्तर्यामिको विष्णुरात्मनामा समीरितः ।
> तस्य तु ब्रह्मरूपत्वाद्ग्रहणं तस्य चैव च ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

पश्येदाकाशवद्व्याप्तिमसङ्गत्वं च नित्यशः ।
इतिप्रमाणविरुद्धं तस्मान्नाङ्गीकर्तव्यः सोऽर्थ इति ॥ ४२ ॥

असङ्गप्रकारमाह । तेज इति । यथा नभो वायुनेरितैर्मेघाद्यैर्न स्पृश्यते तद्वत्तथा पुमान् परः पुरुषः कालसृष्टैः तेजोऽम्बन्नमयैर्गुणैर्विषयैर्न स्पृश्यते इत्यन्वयः ॥ ४३ ॥

अद्भ्यः शिक्षितां बुद्धिमाह । स्वच्छ इति । तीर्थवद्गङ्गादिशुद्धजलवत् प्रकृतितः स्वभावतः स्वच्छः —

प्रकृतिः पञ्चभूतेषु स्वभावे मूलकारणे ।

इत्यभिधानं ननु जीवस्य स्वच्छगुणत्वे जीवपरयोः को विशेष इतीयमाशङ्का स्वच्छत्वादयो गुणा हरे स्वतः सिद्धा जीवस्येष्टव्या स्वीकर्तव्या इति परिहर्तव्या तदुक्तम्—

गुणान् जीवस्य चेष्टव्यान् सिद्धान्विष्णोर्गुणांस्तथा ।
तत्सदृष्ट्वा विचिन्वीत पृथगेव सुधीः सदेति ॥

माधुर्यः सुखहेतुः—

मधुनाम सुखं विद्यान्माधुर्यं सुखहेतुता ।
सुखे रतिर्वा सम्प्रोक्ता शब्दतत्त्वविचक्षणैरिति ।

वचनात् मुनिर्मित्रं स्वाश्रितं पुनाति ईक्षणमात्रेण ॥ ४४ ॥

अग्नेः शिक्षितां बुद्धिमाह । तेजस्वीति । तेजस्वी प्रभाववान् अन्यत्रार्चिष्मान् तपसा उपवासादिना अन्यत्र सन्तापहेतुज्वालया दीप्तः प्रकाशनशक्तिमान् दुर्धर्षः पराभवयितुमशक्यः—

पराभवो धर्षणं स्यादवज्ञानमथापि वा ।
न तत्सत्सु सदा कुर्यात्सहसा शयनन्नचेति ॥

वचनात् दूरभाजनो दूराग्निषेव्यः युक्तात्मा परमात्मनि युक्तमनाः एवं विधो ज्ञानी सर्वभक्षोऽपि पापं नादत्ते अपरोक्षज्ञानिनोऽपि सर्वभक्षणं "सर्वान्नानुमतिः प्राणात्यये तद्दर्शनात्" इत्यापद्विषये कथमाश्रयेत् ॥ ४५ ॥

क्वचिच्छन्नः दुष्टजनसन्निधौ क्वचित्स्पष्टः सुजनसमीपे आत्मज्ञानादिलक्षणं श्रेयः इच्छतां पुंसामुपास्यः दातॄणां प्रागुत्तराशुभं दहन् सर्वं भुङ्क्ते मुन्यग्न्योः सममिदम् ॥ ४६ ॥

अग्नेः शिक्षितं परमात्मज्ञानमाह । स्वमाययेति । स्वमायया स्वेच्छाधीनप्रकृत्या सृष्टं सदसल्लक्षणं स्थूलसूक्ष्मरूपं जगत्प्रविष्टः तत्तत्सरूपः तत्तत्पदार्थानुगुणरूप ईयते कथमेधसि प्रविष्टः एधोऽरूपोऽग्निरिव अत्र जीवस्य छन्नत्वं परमात्मनः प्राकट्यं चेति विशेषण ज्ञातव्यम्—

जीवस्य च्छन्नतां शिक्षेत्प्रविष्टत्वं परात्मनः ।
तद्गुणविडम्बं च वह्नेः सर्वं यथापिवेति ॥

वचनात्—

अल्पदारो यथाल्पोऽग्निरेवमल्पशरीरगः ।
दृश्यते परमात्मापि स्थूलास्थूलशरीरगः ॥

इति ॥ ४७ ॥

चन्द्रमसः शिक्षितां बुद्धिमाह । विसर्गाद्या इति । विविधाः सर्गाद्याः जननाद्याः श्मशानान्ताः मरणान्ता देहस्यैव नात्मनो जीवस्य चन्द्रस्य कलानां क्षयादिकं यथा न चन्द्रस्वरूपस्य ॥ ४८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

एवं देहधर्मानासक्तिमपि तस्मादेव शिक्षेदित्याह । पार्थिवेष्विति । सुगन्धो दुर्गन्धोऽयमिति तत्तद्योगित्वेन प्रतीयमानोऽपि वस्तुतो वायुर्यथा न तत्तद्योगी एवं देहधर्मयोगेनाहंप्रत्ययेन प्रतीयमानोऽपि योगी न तद्धर्मा यत आत्मदृक् आत्मानं ततः पृथक्तया पश्यतीति सः ॥ ४१ ॥

परमात्मनोऽन्तर्बहिरपि वर्तमानत्वमसङ्गत्वं चाकाशस्यैवेत्याकाशं दृष्ट्वा शिक्षेदित्याह । अन्तरिति द्वयेन । मुनिर्योगी अन्तर्बहिश्च देहान्तर्गतोऽपि विवेकेन आत्मनः परमात्मनो विततस्य सर्वव्यापकस्य नभस्त्वमाकाशसादृश्यं भावयेत् तदेवाह । स्थिरजङ्गमेषु अन्तर्हितः अन्तर्हितेनोतीत्यन्तर्हित तस्य अन्तर्गतस्य चकाराद्बहिर्गतस्य च ब्रह्मात्मभावेन ब्रह्मस्वरूपत्वेन या समन्वयेन व्याप्तिस्तया अव्यवच्छेदं अनवच्छिन्नत्वं यथा नभसः सर्वगतत्वाद्वस्तुतो न घटादिभिः सङ्गः परिच्छेदो वा एवमात्मनोऽपि ॥ ४२ ॥

तेजश्च आपश्च अन्नं पृथिवी च तन्मयैः कालसृष्टैर्गुणैर्देहादिभिः पुमान्न स्पृश्यते यद्वद्वायुनेरितैर्मेघाद्यैर्नभो न स्पृश्यते तद्वत् ॥ ४३ ॥

जलाच्छिक्षितमाह । स्वच्छो निर्मलः प्रकृतितः स्वभावतः स्निग्धः जनेषु स्नेहकृत् माधुर्यो मधुरः मधुरालापी तीर्थभूः मत्त्युपदेशेन लोकपावनः अपां मित्रं जलतुल्यः अघादिति पाठे मित्रं सखायं पुनाति स्वच्छत्वादिगुणैरर्थाज्जलसादृश्यं ज्ञेयम् ॥ ४४ ॥

वह्नेः शिक्षितमाह । तेजस्वीति त्रिभिः । दुर्धर्षः क्षोभयितुमशक्यः सर्वाशी उदरभाजनश्च युक्तात्मा योगी एवं भवेदित्यर्थः ॥ ४५—४६ ॥

अग्निर्यथा एधसि प्रविष्ट ईयते मन्थनात्तु प्रकटीभवति तथैव भगवानिदञ्जगत् प्रविष्ट ईयते श्रवणकीर्तनादिभक्त्यभ्यासात् प्रत्यक्षीभवति ॥ ४७ ॥

चन्द्राच्छिक्षितमाह । विसर्गो जन्म श्मशानं मृत्युस्तदन्ता दशा देहस्यैव नात्मनः चन्द्रस्य पञ्चदशकलानामेव यथा उत्पत्त्या दयः नतु षोडश्यामाकलारूपस्य चन्द्रस्य ॥ ४८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

पार्थिवेषु पृथिव्युपलक्षितपञ्चभूतमयेषु प्रविष्टः तद्गुणाश्रयः बालोऽस्मि तरुणोऽस्मि इत्यादिव्यवहारवशाद्देहगुणाश्रयतया प्रतीयमानोऽपि गुणैर्बालत्वादिभिर्न युज्यते बालत्वादिगुणको न भवति यथा चम्पकादिगन्धाश्रयतया प्रतीयमानोऽपि वायुर्गन्धैर्न युज्यते तद्वत् ॥ ४१ ॥

आकाशाच्छिक्षितमाह । अन्तर्हितश्चेति द्वाभ्याम् । समन्वेतीति समन्वयस्तेन समन्वयेन आत्मभावेन स्वस्वभावेन या व्याप्तिस्तया अव्यवच्छेदं व्यवच्छेदरहितम् असङ्गं व्याप्यसंस्पर्शदोषरहितम् ब्रह्म बृहद्गुणशक्त्याद्याश्रयं जगत्कारणम्—

अहो भाग्यमहोभाग्यं नन्दगोपव्रजौकसाम् ।
यन्मित्रं परमानन्दं पूर्णं ब्रह्म सनातनमि

त्युक्तलक्षणं श्रीकृष्णाख्यं परं तत्त्वम् स्थिरजङ्गमेषु अन्तर्बहिश्च भवति एवं हि विततस्य सर्वव्यापकस्यात्मनो बृहदात्मनः

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

मुनिस्तन्मननशीलः नभस्त्वं तत्तुल्यत्वं भावयेत् मायावादिना तु अन्तर्बहिश्च देहान्तर्गतोऽपि मुनिरात्मनो देहाद्यसङ्गम् अत एवाऽपरिच्छेदं च भावयेत् कुतः स्थिरजङ्गमेषु समन्वयेन या व्याप्तिस्तया किमणिषु सूत्रस्येव व्याप्तिर्न विततस्य सर्वगस्य कुतः ब्रह्मात्मभावेन ब्रह्मस्वरूपभावनया तत्त्वमसीतिश्रुतेः। नन्वेतत्सर्वं कथं सम्भवति तत्राह नभस्त्वं भावयेत् यथा नभसः सर्वगतस्य न घटादिभिः सङ्गः परिच्छेदो वा एवमात्मनोऽपि सम्भवतीति व्याख्यातं तदयुक्तम् अणुर्ह्येष आत्मेत्यादिश्रुतिप्रतिपादितस्यान्वयेन सर्वव्याप्त्यसम्भवात् अणुस्वरूपस्य व्यापकस्वरूपैक्यभावनापि निरर्थिकैव स्यात् नहि परमाणुर्मेरुभावनया मेरुर्भवति तत्त्वमसीति वाक्यन्तु अंशभूतस्यात्मनोंऽशिपृथगवस्थानाभावादवस्थानाभेदं वदति न स्वरूपत एकत्वम् अन्यथा सर्वं खल्विदं ब्रह्मेत्यनेनापि सर्वस्य चेतनाचेतनस्य स्वरूपैक्यं प्रसज्ज्येत नचैकस्मिन् भेदत्रयशून्ये सन्मात्रे वस्तुनि मायया भेदो वस्तुतस्त्वभेद इतिवाच्यम् मायायाः सत्यत्वेऽद्वैतसिद्धान्तभङ्गापत्तेः मिथ्यात्वे तु भेदकत्वासम्भवात् अनिर्वचनीयत्वे मायया भ्रान्तत्वेन मायावादिनां भ्रान्तत्वं तन्मुखेनैव स्यात् मायावादनिराकरणविस्तरः पराभिमताध्यासगिरिवज्रे द्रष्टव्यः ॥ ४२ ॥

तेजश्च आपश्च अन्नं पृथिवी च तन्मयैर्भावैरुष्णत्वादिगुणकैर्द्रव्यैर्मेघाद्यैश्च नभो न स्पृश्येत् न स्पृश्यते यथा तद्वत् पुमान् परमेश्वरः कालसृष्टैर्भावैः प्राकृतैः पदार्थैर्न स्पृश्यते ४३

जलाच्छिक्षितमाह। स्वच्छ इति। स्वच्छः निर्दोषः प्रकृतितः स्निग्धः स्वभावतः कोमलः माधुर्यः मधुरवागादिवृत्तिमान् तीर्थभूस्तीर्थभूतः अपां मित्रमुदकगुणग्राही मुनिः पुनाति जगदिति शेषः ॥ ४४ ॥

अग्नेः शिक्षितमाह। तेजस्वीति। दुर्धर्षः द्वन्द्वैरनभिभूयमानः सचासौ उदरभाजनः अपरिग्रहयुक्तः अयुक्तभोजनवासस्त्रंपर्शादिभ्योऽशिष्टव्यवहारेभ्यो युक्तः दूरीभूतः आत्मा मनो यस्य सः सर्वभक्षोऽपि श्रद्धयाऽश्रद्धया मानतोऽमानतश्च प्राप्तं सर्वं भुङ्क्ते तथापि मुनिः मलप्रसारं वैषम्यमित्यर्थः। अग्निवत्प्रादत्ते युक्तायुक्तनिरपेक्षभक्षणं तु सूत्रकारादिभिर्नानुज्ञातम् "आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृति"रिति श्रुतेः ॥ ४५ ॥

तस्मादेव शिक्षितान्तरमाह। क्वचिदिति। प्रागुत्तराशुभमतीतानागतम् ॥ ४६ ॥

तस्मादेव परमात्मनः संसारगुणदोषास्पृष्टत्वं शिक्षितं दर्शयति। स्वमाययेति। स्वमायया प्रकृत्या सदसल्लक्षणं साध्वसाधुलक्षणम् इदं जगत् सृष्टं निर्मितं प्रविष्टोऽपि "तत्सृष्ट्वा तदेवानुप्राविश" दिति श्रुतेः तथापि विभुरेवेयते स्वासाधारणविभुत्वादिधर्मवानेव प्रतीयते शास्त्रद्वारा निश्चीयते नतु सदसल्लक्षणेन संसारेण अन्यथा क्रियते इत्यर्थः। एधसि सदसल्लक्षणे प्रविष्टः तत्तत्स्वरूपः तत्तदाकारः अग्निरिवेयते प्रत्यक्षतया प्रतीयते न त्वन्यथेयते तद्वत् ॥ ४७ ॥

चन्द्राच्छिक्षितमाह। विसर्गाद्या इति। विसर्गाद्याः जन्माद्याः श्मशानान्ताः भावाः षड् विकाराः अव्यक्तगतिनाऽलक्षणगमनेन कालेन निमित्तेन देहस्यैव न त्वात्मनो जीवस्य यथा वृद्धिह्रासौ कलानामेव न तु चन्द्रस्य तद्वत् ॥ ४८ ॥

भाषा टीका।

यद्यपि पृथिवी आदि विकार के देह में योगी प्रविष्ट है तौभी देह धर्मों से युक्त नहीं होता है गुणों के आश्रय से रहकर भी गुणों से युक्त नहीं होता है यहबात वायु से सीखनी चाहिये वायु भी किसी गंध से लिप्त नहीं होता है ॥ ४१ ॥

ब्रह्मात्म रूप से स्थावर जंगम सब मे अन्वित होकर रहने वाला परमात्मा है और व्यापक है सब से अलग है इस बात को आकाश को देख कर जानना चाहिये ऐसे व्याप्त ब्रह्म की मुनि भावना करै ॥ ४२ ॥

जैसे कि अग्नि जल मेघ वायु आदि के धर्मों से आकाश का स्पर्श नहीं होता है तैसे ही काल के गुणों से आत्मा का स्पर्श नहीं होता है ॥ ४३ ॥

प्रकृति से निर्मल अति स्नेह वाला मधुर गुण वाला मनुष्यों का तीर्थ रूप ऐसा मुनि जल का मित्र होकर दर्शन स्पर्शन कीर्तन आदि कों से सब को पवित्र करै यह बात जल से सीखनी चाहिये॥ ४४ ॥

तेजवाला होवै तप से प्रकाश मान होवै बडा दुर्धर्ष होवै पेटही बरतन रखै सर्व पदार्थ का मिठा कुटुमादि का भक्षण कर ने से भी योगी को रोग दोष नहीं होता है यह गुण अग्नि से सीखा है ॥ ४५ ॥

कहीं छिपा रहै कहीं प्रगट रहै कल्याण चाहने वालों का उपास्य होवै देने वालों के पापों का दहन करता हुआ सब पदार्थों को भोगै यह भी अग्नि का गुण है ॥ ४६ ॥

इसी प्रकार जैसे काष्ठों में अग्नि रहता है तैसे ईश्वर भी स्थूल सूक्ष्म इस संसार को पैदा कर इसमे प्रविष्ट होकर सकल रूपसे भान होते हैं ॥ ४७ ॥

जन्म से लगा कर मरण पर्यंत सब विकार देहके हैं आत्मा के नहीं हैं जैसे कि अलक्षित काल के योग से चन्द्रमा के कलाओंका क्षय होता है चन्द्रमा का नहीं ॥ ४८ ॥

कालेन ह्योघवेगेन भूतानां प्रभवाप्ययौ ।
नित्यावपि न दृश्येते आत्मनोऽग्नेर्यथाऽर्चिषाम् ॥ ४९ ॥
गुणैर्गुणानुपादत्ते यथाकालं विमुञ्चति ।
न तेषु युज्यते योगी गोभिर्गा इव गोपतिः ॥ ५० ॥
बुध्यते स्वेन भेदेन व्यक्तिस्थ इव तद्गतः ।
लक्ष्यते स्थूलमतिभिरात्मा चावस्थितोऽर्कवत् ॥ ५१ ॥
नातिस्नेहः प्रसङ्गो वा कर्तव्यः क्वापि केन चित् ।
कुर्वन्विन्देत सन्तापं कपोत इव दीनधीः ॥ ५२ ॥
कपोतः कश्चनारण्ये कृतनीडो वनस्पतौ ।
कपोत्या भार्यया सार्धमुवास कतिचित्समाः ॥ ५३ ॥
कपोतौ स्नेहगुणितहृदयौ गृहधर्मिणौ ।
दृष्टिं दृष्ट्याऽङ्गमङ्गेन बुद्धिं बुद्ध्या बबन्धतुः ॥ ५४ ॥
शय्यासनाटनस्थानवार्ताक्रीडाशनादिकम् ।
मिथुनीभूय विस्रब्धौ चेरतुर्वनराजिषु ॥ ५५ ॥
यं यं वाञ्छति सा राजंस्तर्पयन्त्यनुकम्पिता ।
तं तं समानयत्कामं कृच्छ्रेणाप्यजितेन्द्रियः ॥ ५६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सिंहावलोकनेनाग्निदृष्टान्तेनैव देहानां क्षणभङ्गुरतया वैराग्यं शिक्षितमित्याह । कालेनेति । ओघवद्वेगो यस्य तेन आत्मनः सम्बन्धिनां भूतानां देहानामित्यर्थः । अर्चिषां ज्वालानाम् ॥ ४९ ॥

आदित्याच्छिक्षितमाह द्वयेन । गुणैरिति । गुणैरिन्द्रियैर्गुणान् विषयानुपादत्ते यथाकालमर्थिन्यागते सति विमुञ्चति च न तेषु युज्यते लब्धामिति दत्तमिति वाऽभिनिवेशं न करोति गोभी रश्मिभिर्गाः जलानि गोपतिः सूर्यो यथा ॥ ५० ॥

स्वतो भेदशून्यस्याप्यात्मनो भेदप्रतीतिरुपाधिवशादित्यादित्यदृष्टान्तेनैव सम्भावितमित्याह । बुध्यत इति । स्वे स्वस्वरूपेऽवस्थित आत्माभेदेन न बुध्यते अभिव्यनक्तीति व्यक्तिरुपाधिः व्यक्तिस्थ उपाधौ प्रतिबिम्बितस्तु तद्गत इव उपाधिप्रविष्ट इव भेदेन स्थूलमतिभिर्लक्ष्यते अर्कवदित्यन्वयः ॥ ५१ ॥

कपोताच्छिक्षितमाह । नातिस्नेह इति । स्नेहः प्रीतिः प्रसङ्ग उपलालनाद्यासक्तिः ॥ ५२ ॥

दृष्टान्तं प्रपञ्चयति । कपोतः कश्चनेति ॥ ५३ ॥

तयोर्मिथःस्नेहप्रसङ्गौ दर्शयति । कपोताविति त्रयेण । स्नेहेन गुणितं बद्धं हृदयं ययोस्तौ ॥ ५४ ॥

विस्रब्धौ निःशङ्कौ ॥ ५५ ॥

सा कपोती तर्पयन्ती सहासवीक्षितालापादिभिः प्रीणयन्ती अतएव तेनानुकम्पिता सती यं यं वाञ्छति तं तं कामं समानयत् सम्पादयामास राजन्निति त्वं यथेति सूचितम् ॥ ५६ ॥ ५७ ॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

भूतशब्दस्य तत्कार्ये लक्षणया इत्यर्थ इत्युक्तम् ॥ ४९ ॥

अर्थिन्यागते सतीत्युपलक्षणं क्षुधाद्यवसरानुरूपेणापि ॥ ५० ॥

उपाधिवशात् देहाद्युपाधिवशेन उपाधिप्रविष्ट इवेति व्यापकत्वादसङ्गत्वाच्च वस्तुतः प्रवेशासम्भवादिवेत्युक्तं स्वे स्वरूपेऽवस्थित आत्मा भेदेन न बुध्यते व्यक्तिस्थस्तु स्थूलमतिभिस्तद्गत इव लक्ष्यते प्रतीयते तत्र दृष्टान्तः अर्कवदित्यन्वयः यथा गगने स्वरूपस्थोऽर्को भेदेन न ज्ञायते किन्त्वैकरूप्येणैव जलादिप्रतिबिम्बितस्तु उपाधिभेदेन लघुह्रस्वमलिनत्वादिभेदेन प्रतीयते तद्वदित्यर्थः ॥ ५१ ॥

दीनधीः कृपणबुद्धिरित्यर्थः ॥ ५२ ॥

कतिचित् समाः सम्वत्सरानभिव्याप्येत्यर्थः ॥ ५३ ॥ ५४ ॥

शय्यादिषु मिथुनीभूय द्वितीयान्तपाठे शय्यादिकं प्रति मिथुनीभूय ॥ ५५ ॥

अतएव तया स्वस्य प्रीणनादेव तेन कपोतेन अनुकम्पिताऽनुकम्पाविषयीकृता ॥ ५६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

अग्नेः सूक्ष्मस्य स्थूलानां तद्विशेषणभूतानामर्चिषामुत्पत्तिविनाशौ यथा न सूक्ष्मांशे एवं सूक्ष्मतरस्य परमात्मनः स्वविशेषणभूतप्रभवाप्ययौ न भवत इत्यर्थः ॥ ४९ ॥

गुणैः गुणभूतैः श्रोत्रादिभिः गोपतिरादित्यः गोभिः किरणैः ॥ ५० ॥

देहेषु प्रतीयमानस्याप्यात्मनो देहस्वभावासंसर्गेऽप्यादित्यदृष्टान्त इत्याह । बुद्धिसंस्थेनेति । * भेदेन देवत्वमनुष्यत्वादिना ॥ ५१—६५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अयमर्थोऽप्यग्निदृष्टान्तेनापि शिक्षणीय इत्याह । कालेनेति । ओघवत्प्रवाहवद्वेगो यस्य तेन कालेन प्रभवाप्ययौ जन्मनाशौ नित्यावपि प्रवाहतो नित्यावपि भूतानामेव नत्वात्मनः यथाऽग्नेर्विद्यमानस्य सत एवार्चिषां ज्वालानामेव प्रभवाप्ययौ दृश्येते न त्वग्नेस्तद्वदित्यर्थः ॥ ४९ ॥

आदित्याच्छिक्षणीयमाह । गुणैरिति । यथोचितकालं गुणैरिन्द्रियैर्गुणान्विषयानुपादत्ते गृह्णाति विमुञ्चति च उपादानमत्र सम्पादनात्मकं मोचनं त्वर्थिभ्यस्त्यागात्मकम् उपभोग्यवस्तूनि सम्पादितानि चेदर्थिभ्यो ददाति नत्वात्मनानुभाव्यामीत्यर्थः । तदाह । न तेन युज्यत इति । तेन विषयजातेन न युज्यते नोपयुज्यते आत्मने नोपयुञ्ज्यादित्यर्थः । गोभिर्गा इव गोपतिः यथा गोपतिः सूर्यः गोभिः किरणैर्गा अप उपादत्ते मुञ्चति च तद्वत् ॥ ५० ॥

वस्तुतो देवमनुष्यादिभेदरहितस्याप्यात्मनस्तद्भेदप्रतीतिर्भ्रान्तिरूपेत्येतदप्यादित्याच्छिक्षणीयमित्याह । बुध्यत इति । स्थूले शरीरे मतिरात्माभिमानो येषां तैरात्मा प्रत्यगात्माऽवस्थितः देवादिशरीरे अवस्थितः अन्नेनेतिच्छेदः स्वस्मिन्नविद्यमानेन देवमनुष्यादिभेदेन बुध्यते देवोऽयं मनुष्योऽयमिति प्रतीयते वीक्ष्यते स्वात्मापि तथा देवोऽहं कृशोऽहं स्थूलोऽहमिति वीक्ष्यत इत्यर्थः। स्थूलमतिभिरित्यनेन देहाद्विलक्षणात्ममतिभिस्तु देहस्वभावासंसर्गितयैवात्मा वीक्ष्यते चेति सूचितं तत्र दृष्टान्तः अर्कवदिति यथा चार्को दिवि स्थितो दर्पणजलखण्डादिषु प्रतीयमानोऽपि न तद्गतस्वभावसंसर्गितया प्रतीयते तद्वत् दृष्टान्तदार्ष्टान्तिकयोर्विशेष इत्याशयेनाह। व्यक्तिस्थ इव तद्गत इति । आदित्यस्तु दर्पणादिव्यक्तावनवस्थितोऽपि तत्स्थ इव लक्ष्यते आत्मा तु परमार्थतस्तद्गतः देवादिशरीरगतः तत्स्वभावासंसर्गित्वं तूभयोरपि तुल्यं संसर्गितया प्रतीतेर्भ्रान्तिरूपता चोभयत्र तुल्या ॥ ५१ ॥

अथ कपोताच्छिक्षितमाह । नेति । अतिस्नेहः प्रीतिः प्रसङ्गः उपलालनाद्यासक्तिः क्वापि केन चिदपि न कर्तव्यः ॥ ५२ ॥

दृष्टान्तं प्रपञ्चयति । कपोत इत्यादिना यावदध्यायसमाप्ति । वनस्पतौ कृत्वा नीडं कुलायं येन सः सार्धं सह कतिचित्समाः संवत्सरानुषितवान् ॥ ५३ ॥

कपोताविति कपोतश्च कपोती च कपोतौ 'पुमान्स्त्रिया' इत्येकशेषः स्नेहेन गुणितं निबद्धं हृदयं ययोस्तौ गृहधर्मिणौ मैथुन्यधर्मिणौ बबन्धतुः वीजितवन्तौ ॥ ५४ ॥

विस्रब्धौ निःशङ्कौ वनराजिषु शय्यादिकं मिथुनीभूय चेरतुश्चक्रतुः ॥ ५५ ॥

यद्यदिति । हे राजन् ! यद्यदनेन त्वं यथेति सूचितम् अन्तर्वत्नी गर्भिणी सती सा कपोती अनुकम्पिता कपोतेन दयापूर्वकं प्रचोदिता यद्यदिष्टं वाञ्छितं अकामयत तं तं कामं काम्यत इति तथा तमिष्टं कृच्छ्रेणातिप्रयासेनापि समनयत्सम्पादयामास यतः सोऽजितेन्द्रियः ॥ ५६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कालवेगेन प्रतिक्षणमपि देहादीनां सूक्ष्मावुत्पत्तिनाशौ स्त इति सोदाहरणमाह । कालेनेति । कालाख्यनद्योघवेगेन भूतानां प्राणिनाम् आत्मनो देहस्य नित्यावपि सदातनावपि भवाप्ययौ उत्पत्तिनाशौ न दृश्येते सूक्ष्मत्वादिति शेषः यथाग्नेरर्चिषां ज्वालानां प्रवाहविशेषः यथा पुरुरवसो जरा अश्विभ्यामेव दृष्टेति गीतातात्पर्यवचनं सद्भावप्रमाणं भूतानां चेतनानामात्मनः परमात्मनः प्रभवाप्ययावित्यन्यथा व्याख्यानम्—

अवयव्यवयवानां च गुणानां गुणिनस्तथा ।
शक्तिशक्तिमतोश्चैव क्रियायास्तद्वतस्तथा ॥
स्वरूपांशांशिनोश्चैव नित्याभेदो जनार्दन ।
जीवस्वरूपेषु तथा तथैव प्रकृतावपि ॥
चिद्रूपायामतो नांशा अगुणा अक्रिया अपि ।
हीना अवयवैश्चेति कथ्यन्ते ते त्वभेदतः ॥
पृथग्गुणाद्यभावाच्च नित्यत्वादुभयोरपि ।
विष्णोरचिन्त्यशक्तेश्च सर्वं सम्भवति ध्रुवम् ॥
क्रियादेरपि नित्यत्वं व्यक्त्यव्यक्तिविशेषणम् ।
भावाभावविशेषेण व्यवहारश्च तादृशः ॥
विशेषस्य विशिष्टस्याप्यभेदस्तद्वदेव तु ।
सर्वं चाचिन्त्यशक्तित्वाद्युज्यते परमेश्वरे ॥
तच्छक्त्यैव च जीवेषु चिद्रूपप्रकृतावपि ।
भेदाभेदौ तदन्यत्र ह्युभयोरपि दर्शनात् ॥
कार्यकारणयोश्चापि निमित्तं कारणं विनेति ।

प्रमाणविरुद्धत्वाज्जडस्येत्यङ्गीकर्तव्यम् अनङ्गानां चेतनानां क्रियावत्त्वं चाचिन्त्येशशक्तिमियतत्वाद्युज्यते इत्यस्मिन्नर्थे "आत्मनि चैवं विचित्राश्च हि सर्वोपेता च तद्दर्शनात् सर्वधर्मोपपत्तेश्च स्वाभाविकी ज्ञानबलक्रिया च यत्र सप्तऋषीन् पर एकमाहुः" इत्यादिप्रमाणान्तरं च—

नश्यशक्तिर्मायामयी विनादोषान् ।
श्रुतमध्यावगम्यं तथा स्मृतं परमे सत्यरूपम् ॥

नैवासत्त्वं कश्चिदस्मिन् परेशे सर्वं युक्तं पूर्णशक्तेः सदैवेति । श्रुतिविरोधात् ॥ ४९ ॥

सूर्यादनुशिक्षितां बुद्धिमाह । गुणैरिति । योगी यथाकालं विहितकाले गुणैरिन्द्रियैः गुणान् शब्दादिविषयान् उपादत्ते विसृजति च तेषु विषयेषु न सज्जते नातिसक्तो भवति कथमिव गोपतिः सूर्यः गोभिः रश्मिभिः गा इव जलानीव ॥ ५० ॥

न केवलमसङ्गत्वमेव सूर्यात् शिक्षितमपि तु जीवपरमात्मवैलक्षण्यं चेति भावेनाह । बुद्धिसंस्थेनेति । तस्य जीवस्य शरीरगतः आत्मा परमात्मा स्थूलमतिभिः प्रमाणज्ञानरहितैः

* शुकपक्षीयविजयध्वजयोः बुद्धिसंस्थेनेति पाठः ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

बुद्धिसंस्थेन भेदेन बाह्यान्तःकरणविषयमिथ्याज्ञानेन व्यक्तं शरीरं तत्स्थो जीव इव साहश्येन सुखी दुःखीति लक्ष्यते दुःखाद्यधिकरणदेहगतत्वात्कथामम्बुस्थितार्कवत् यथा परमार्कस्वरूपानाभिन्नैर्बिम्बभूतो जले प्रतिबिम्बितार्कवत् अचेतनाशिरःपादादिरहितो वर्तुलश्चेति कल्प्यते तथेति तस्मात् "तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति" इत्यादिश्रुतितात्पर्यवेदिभिर्निर्मलचित्तैः सूक्ष्मेक्षणैः जीवपरयोर्वैलक्षण्यं ज्ञातव्यं योगिभिर्भाव्यमन्यथाऽसुरमतप्रवेश इति दृष्टान्तेऽप्येवमेव ज्ञातव्यं बिम्बप्रतिबिम्बयोरिव जीवपरयोर्भेदो व्यावहारिको न तु यथार्थ इति मतम्—

बुद्धिसंस्थस्त्वात्मभेदो व्यक्तिस्थो जीव उच्यते ।
तेनैव सह संस्थानात्परात्मा स्थूलबुद्धिभिः ॥
जीववल्लक्ष्यते विष्णुर्यथैवाम्बुस्थितार्कवत् ।
परमार्कः पारिमाण्याद्वर्तुलत्वादिना तथा ॥
अर्कस्वरूपानभिज्ञैः शिरःपादादिवर्जितः ।
अचेतनश्च कल्प्येत तत्तेजोमात्रदर्शिभिः ॥
सूर्यदेहादिभिन्नं हि तेजोमण्डलमेव तु ।
दृश्यते स्थूलमतिभिरेवमेव जनार्दन इति ॥

प्रमाणविरुद्धत्वादुपेक्षणीयम् ॥ ५१ ॥

मुक्तिसाधनेषु प्रथमतः आपाद्यं विरक्तिलक्षणं साधनमिति कपोतशिक्षितां विरक्तिमाह । नातिस्नेह इति ॥ ५२—५३ ॥

स्नेहगुणितहृदयाविस्पष्टदर्शयति । दृष्टिमित्यादिना ॥ ५४ ॥

शय्यासनादिषु मिथुनीभूय वर्तमानौ ॥ ५५—६५ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

यथाकालमित्युभयत्राप्यन्वयः क्षुधाद्यवसरानुरूपेणेत्यर्थः । विमुञ्चति त्यजति ॥ ५० ॥

बुध्यत इति । आत्मा जीवः परमात्मा वा शक्तिशक्तिमत्त्वादिरूपेण स्वेन भेदेनावस्थितो बुध्यत एव सूक्ष्ममतिभिः स्थूलमतिभिस्तु व्यक्तिस्थ उपाधिस्थोऽसौ तद्गतस्तद्वासक्त इव लक्ष्यते यथार्को विचित्रान्तःपुरादिशोभावन्मण्डलरश्म्यादिरूपेण स्वेन भेदेनेत्यादि पूर्ववत् ॥ ५१—७४ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

सिंहावलोकनन्यायेन पुनरप्यग्नेः सकाशाद्वैराग्यं शिक्षितमाह । कालेनेति । ओघवेगेन ओघवतां मारुतादीनामिव वेगो यस्य तेन आत्मनः सम्बन्धिनां भूतानां देहानामित्यर्थः । अर्चिषां ज्वालानाम् ॥ ४९ ॥

सूर्याच्छिक्षितमाह द्वाभ्याम् । गुणैरिन्द्रियैर्गुणान् विषयान् उपादत्ते यथाकालमर्थिन्यागते सति विमुञ्चति ददाति च न तेषु युज्यते मया लब्धा मया दत्ता इति वाभिनिवेशं न करोति गोभिः रश्मिभिः गा जलानि गोपतिः सूर्यो यथा ॥ ५० ॥

आत्मा परमात्मा स्वेन भेदेन स्वरूपशक्तिमायाशक्तिजीवशक्त्यात्मकेनावस्थितोऽर्कवद्बुध्यते अर्को यथा स्वमण्डलमेघकिरणात्मकेन भेदेनावस्थितो बुध्यत इत्यर्थः । स्थूलमतिभिस्तु व्यक्तिस्थो जातिपदार्थ इव तद्गतः व्यक्तिगतः उपाध्यवच्छिन्न आत्मा लक्ष्यते अर्कवत् अर्को यथा जलादिपरिच्छिन्नः ॥ ५१ ॥

कपोताच्छिक्षितमाह । नातीति। प्रसङ्ग उपलालनादि ॥५२–५५॥

तर्पयन्तौ सुरतालापवीक्षितादिभिः प्रीणयन्तौ ॥ ५६—५७ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

देहादीनां क्षणभङ्गुरत्वमग्नितः शिक्षितमिति सिंहावलोकनेनाह । कालेनेति । आत्मनः सम्बन्धिभूतानां देहादीनां ओघवद्वेगो यस्य तेन कालेन निमित्तेन प्रभवाप्ययौ जन्मविनाशौ नित्यावपि न दृश्येते यथा अग्नेः सम्बन्धिनामर्चिषाम् ॥ ४९ ॥

आदित्याच्छिक्षितमाह । गुणैरिति द्वाभ्याम् । गुणैर्हस्तादिभिरिन्द्रियैः गुणानन्नादिरूपान्विषयान् योगी साधकः यथा कालम् ग्रहणत्यागकालमनतिक्रम्य भजावति दातरि सति उपादत्ते अर्थिनि सति विमुञ्चति तेषु न युज्यते लब्धमिति दत्तमिति वाऽभिनिवेशं न करोति यथा गोभिः रश्मिभिः गाः जलानि गोपतिः सूर्यस्तद्वत् ॥ ५० ॥

व्यक्तिस्थे देहस्थे अन्तःकरणे—

बुद्धेर्गुणेनात्मगुणेन चैव ह्याराग्रमात्रो ह्यवरोऽपि दृष्टः ।
अणुर्ह्येष आत्मा चेतसा वेदितव्य

इत्यादिश्रुतिप्रोक्तेनाणुपरिमाणकेन स्वेन रूपेण अवस्थितः भेदेन देहेन्द्रियादिप्रकाशकत्वादिभिः वैलक्षण्येनैव बुध्यते अर्कवत् यथार्कः स्वल्पपरिमाणोऽपि बृहत्परिमाणे लोके प्रकाशकतया विलक्षण एव दृश्यते तद्वत्—

यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः ।
क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारतेति ॥

श्रीमुखवचनात् स्थूलमतिभिस्तु तद्गत इव लक्ष्यते बहुवचनेन स्थूलमतयः बहवो दर्शिताः तत्र केनचित्सङ्घातवादिना व्यक्तिरेवात्मेति लक्ष्यते अन्येन तद्गतः व्यक्तिगतः अन्तःकरणस्वरूप आत्मेति लक्ष्यते अपरेण तद्गत इव अन्तःकरण इव अन्यैः व्यक्तिगतः प्राणादिरूप आत्मेति लक्ष्यते इत्यर्थः । ते सर्वे नास्तिका उपेक्षणीया देहादेरात्मत्वाभावात् मायावादिना तु स्वतो भेदशून्यस्याप्यात्मनो भेदप्रतीतिरुपाधिवशादित्यादिदृष्टान्तेनैव सम्भावितमित्याह बुध्यत इति स्व स्वरूपेऽवस्थित आत्मा भेदेन न बुध्यते अभिव्यनक्तीति व्यक्तिरुपाधिः व्यक्तिस्थः उपाधौ प्रतिबिम्बितस्तु तद्गत इव उपाधिप्रविष्ट इव भेदेन स्थूलमतिभिर्लक्ष्यते अर्कवदित्यन्वय इति व्याख्यातं तदयुक्तम् ज्ञानमात्रेऽद्वितीये अन्यस्य उपाधितद्गतप्रतिबिम्बतद्द्रष्ट्रादेः पदार्थान्तरस्यासम्भवात् पदार्थस्य सूर्यादेः पदार्थान्तरे भिन्नदेशस्थे जलादौ प्रतिबिम्बो भवति सर्वगस्य नीरूपस्य निरवयवस्य प्रतिबिम्बासम्भवाच्च नच नीरूपस्य निरवयवस्य सर्वगतस्याकाशस्य जले प्रतिबिम्बो दृश्यते इति वाच्यम् आकाशस्थस्य सूर्यप्रभारञ्जितस्य सूक्ष्ममेघादिसमूहस्य कटाहवत्प्रतीयमानस्य सावयवस्य दूरदेशिनो वस्तुनः प्रतिबिम्बदर्शनात् आकाशस्य पञ्चीकृतभूतविशेषस्य नीरूपत्वाद्यसम्भवाच्च पदार्थान्तरस्य जलस्य विद्यमानत्वाच्च ॥ ५१ ॥

कपोताच्छिक्षितमाह । नातिस्नेह इत्यादिना । प्रसङ्गः

कपोती प्रथमं गर्भं गृह्णती काल आगते ।
अण्डानि सुषुवे नीडे स्वपत्युः सन्निधौ सती ॥ ५७ ॥
तेषु काले व्यजायन्त रचितावयवा हरेः ।
शक्तिभिर्दुर्विभाव्याभिः कोमलाङ्गतनूरुहाः ॥ ५८ ॥
प्रजाः पुपुषतुः प्रीतौ दम्पती पुत्रवत्सलौ ।
शृण्वन्तौ कूजितं तासां निर्वृतौ कलभाषितैः ॥ ५९ ॥
तासां पतत्रैः सुस्पर्शैः कूजितैर्मुग्धचेष्टितैः !
प्रत्युद्गमैरदीनानां पितरौ मुदमापतुः ॥ ६० ॥
स्नेहानुबद्धहृदयावन्योऽन्यं विष्णुमायया ।
विमोहितौ दीनधियौ शिशून् पुपुषतुः प्रजाः ॥ ६१ ॥
एकदा जग्मतुस्तासामन्नार्थं तौ कुटुम्बिनौ ।
परितः कानने तस्मिन्नर्थिनौ चेरतुश्चिरम् ॥ ६२ ॥
दृष्ट्वा ताँल्लुब्धकः कश्चिद्यदृच्छातो वनेचरः ।
जगृहे जालमातत्य चरतः स्वालयान्तिके ॥ ६३ ॥
कपोतश्च कपोती च प्रजापोषे सदोत्सुकौ ।
गतौ पोषणमादाय स्वनीडमुपजग्मतुः ॥ ६४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

आसक्तिः ॥ ५२—५३ ॥

कपोतौ पतिभार्यारूपौ स्नेहगुणिते प्रीतिनिबद्धे हृदये ययोस्तौ ॥ ५४ ॥

विस्रब्धौ परस्परं निःशङ्कौ ॥ ५५ ॥

सा कपोतभार्या भर्त्रानुकम्पिता तर्पयन्ती स्वचेष्टितैः प्रीणयन्ती सती यं यं वाञ्छति तं तं काममजितेन्द्रियः कपोतः समानयत्सम्पादयामास ॥ ५६—५७ ॥

भाषा टीका ।

काल के समूह के वेग से सब आत्मा के संबंधि भूतों के उत्पत्ति और प्रलय दोनों नित्य हैं तौ भी नहीं दीखते हैं जैसे कि अग्निकि ज्वाला का भेद नहीं दीखता है तैसे भ्रम से जानना चाहिये ॥ ४९ ॥

समय समय पर इंद्रियों से योगी विषयों को ग्रहण करता है और काल पाकर छोडता है उसमें युक्त नहीं होता है जैसे कि सूर्य किरणों से जलका ग्रहण करता है और छोडता है ॥ ५० ॥

जैसे एक ही सूर्य अनेक जल पात्रों में नाना दीखता है तैसे स्थूल दृष्टि वाले पुरुषों को मनुष्यादि देहों में आत्मा भी नाना प्रकार से प्रतीत होते हैं यह बात भी सूर्य से सीखी है ॥ ५१ ॥

किसी के साथ अत्यन्त स्नेह या आसक्ति नहीं करनी चाहिये कभी किसी ठिकाने करेगा तो दुखी होकर कबूतर की नाईंहोजावैगा ॥ ५२ ॥

कोइ एक कबूतर जंगल में पेड पर खोंता बनाकर अपनी स्त्री कबूतरी के साथ कितने ही वर्षों से रहता था ॥५३॥

वे दोनों कबूतर कबूतरी आपस में बडे प्रेम से गृहस्थ के धर्मों को करते दृष्टि से दृष्टि अंग में अंग बुद्धि में बुद्धि को जोड कर सदा रहते थे ॥ ५४ ॥

सोना बैठना चलना खडा होना बोलना खेलना खाना पीना इन सब बातों को बडे विश्वास से करतेहुये संग ही में जंगल में घूमते थे ॥ ५५ ॥

हे राजन्! कबूतरी पति की तृप्ति करने वाली कृपा करने वाली थी तब जो कुछ चाहती थी तिस चीज को वह अजितेन्द्रिय कामी कबूतर बडे कष्टको भी सह कर ला देता था ॥ ५६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तेषु जलभरितेष्वण्डेषु हरेः स्वभावकर्मादिशक्तिभी

श्रीधरस्वामिकृतभावार्थदीपिका ।

रचितावयवाः पचिताः कोमलान्यङ्गानि तनूरुहाश्च येषां ते ॥ ५८—५९ ॥

पतत्रैः पक्षैः अदीनानां हृष्टानाम् ॥ ६० ॥

शिशून् बालान् प्रजाः पुत्रान् ॥ ६१—६२ ॥

स्वालयान्तिके चरतः क्रीडतः तान् कपोतपुत्रान् जालं प्रसार्य ॥ ६३ ॥

उत्सुकत्वादेव तत्पोषणार्थं गतौ सन्तौ पोषणं भक्ष्यम् ॥ ६४—६५ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी ।

प्रथमं गर्भमिति प्रथमसन्ततावौत्कण्ठ्याधिक्येनासक्त्याधिक्यं व्यञ्जितं काले प्रसूतिसमये स्वपत्युः सन्निधाविति तस्यां तस्यासक्तिव्यञ्जनम् ॥ ५७ ॥

स्वभावकर्मादीत्यादिना कालशक्तिपरिग्रहः "कालकर्मस्वभावत" इत्युक्तेः दुर्विभाव्याभिः सूक्ष्मत्वेन दुर्ज्ञेयाभिः ॥ ५८ ॥

तासां प्रजानां कूजितं शब्दं कलभाषितैरव्यक्तमधुरालापैः ॥ ५९ ॥

मुग्धचेष्टितैः बालचेष्टाभिः प्रत्युद्गमैः सशब्दं सम्मुखागमैः ॥ ६० ॥

विष्णुमायया स्नेहानुबन्धः परस्परं स्नेहहृतौ हृदये ययो स्तौ दीनधियौ प्रजापोषणव्यग्रतया कृपणचित्तौ ॥ ६१ ॥

एवं वैषयिकं सुखमुक्त्वा "यत्तदग्रेऽमृतमिव परिणामे विषोपम"मिति न्यायेन तस्यैव दुःखत्वमाह । एकदेति यावत् समाप्ति । अर्थिनौ लुब्धौ अर्थी दोषं न पश्यतीतिवत् ॥ ६२ ॥

स्वालयान्तिके स्वनीडसन्निधौ यदृच्छात इति भुवोरनियतत्वं व्यञ्जितम् ॥ ६३ ॥

कपोतश्च कपोती चेति विग्रहः अतो विशेषणयोर्द्वित्वमविरुद्धम् ॥ ६४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

:०: शय्येति । विस्रब्धौ निःशङ्कौ वनराजिषु शय्यादिकं मिथुनीभूय चेरतुः ० । कपोतीति । गृह्णती बिभ्रती सती काले प्रसवकाले आगते सति नीडे स्वपत्युः सन्निधावेवाण्डानि सुषुवे ॥ ५७ ॥

तेष्वण्डेषु काले तत्परिपाककाले व्यजायन्त शिशव इति शेषः ते च दुर्विगाह्याभिरचिन्त्याभिर्हरेर्भगवतः शक्तिभिः कार्योपयुक्तापृथक्सिद्धविशेषणभूताभिः कालेनेत्यर्थः । आदिभिः प्राणानितिबहुवचनमविवक्षितं कालावयवादिनमासाद्यभिप्रायेण वा तत्प्रयुक्तं रचिता अवयवा येषां कोमलान्यङ्गानि तनूरुहाश्च येषां तथा भूता बभूवुरिति शेषः ॥ ५८ ॥

प्रजाः शिशून् तासां प्रजानां कूजितं शृण्वन्तौ कलभाषितैर्मधुरस्वनैर्निर्वृतौ सुखितौ ॥ ५९ ॥

सुखस्पर्शैः तासां पतत्रैः पक्षैः मुग्धचेष्टितैः सुन्दरचेष्टितैः तथाऽदीनानामकृशानां प्रत्युद्गमैः उत्पतनैश्च मुदं हर्षमापतुः ॥ ६० ॥

अन्योऽन्यं स्नेहनानुबद्धमनुरक्तं हृदयं ययोस्तौ दीनधियौ तत्पोषणार्थमभाव्यधियौ पुपुषतुः पोषणं चक्रतुः ॥ ६१ ॥

तासां प्रजानामन्नार्थमाहारमानेतुमित्यर्थः । अर्थिनौ तासामाहारमाकाङ्क्षमाणौ तस्मिन्नेव वने विचेरतुश्चेरतवन्तौ ॥ ६२ ॥

तदा कश्चिल्लुब्धको व्याधः तान् शिशून् दृष्ट्वा स्वालयान्तिके स्वनीडसमीपे चरतः तान् जालमातत्य प्रसार्य जगृहे ॥ ६३ ॥

कपोतश्चेति । पोषणमाहारमादाय ॥ ६४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

प्रजाः व्यजायन्त ॥ ५८—५९ ॥

अदीनानां हृष्टानाम् ॥ ६० ॥

शिशून् बालान् प्रजाः अपत्यानि ॥ ६१—६२ ॥

स्वालयान्तिके स्वनीडतलनिकटे चरतस्तान् बालान् जग्राह ॥ ६३ ॥

पोषणं भक्ष्यम् ॥ ६४—६५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हरेः शक्तिभिः कालादिभिः रचिता अवयवाः मस्तकादीनि अङ्गानि येषां ते कोमलानि अङ्गानि तनूरुहाश्च येषां ते ॥ ५८—५९ ॥

अदीनानां चपलानाम् ॥ ६० ॥

शिशून् अल्पकालान् प्रजाः पुत्रान् ॥ ६१—६२ ॥

तान् शिशून् ॥ ६३ ॥

पोषणं भक्ष्यम् ॥ ६४—६५ ॥

भाषा टीका ।

कभी कबूतरी ने गर्भ धारण किया फिर समय आने पर अपने पती के पास खोंतर में उसने अंडों को पैदा किया ॥ ५७ ॥

तिन अंडों में समय आने पर हरि भगवान् की दुर्विभावित शक्तियों से अवयव रचना किये हुये कोमल रोमों वाले बच्चे पैदा भये ॥ ५८ ॥

तब दोनों स्त्री पुरुष उन बच्चों के मधुरभाषणों से प्रसन्न होकर पुत्रों पर बड़े स्नेह युक्त होकर उनके शब्दों को सुनते हुये उनका पोषण करते थे ॥ ५९ ॥

शरीर में लगने से सुखदायक उनके पंखों से उनकी भोलापन से उनके शब्दों से उनके आगे पीछे चलने से उनके हर्ष को देखकर पिता माता दोनों आनंदित होते थे ॥ ६० ॥

विष्णु भगवान् की माया से वे दोनों आपस में बड़ी प्रीति से बंधे हुये मोहित होकर अति चिंता युक्त होकर छोटे बालकों को पोषण करते थे ॥ ६१ ॥

:०: ५५ श्लोकस्यात्र पाठ एतन्मते ।

कपोती स्वात्मजान् वीक्ष्य बालकान् जालसंवृतान् ।
तानभ्यधावत् क्रोशन्ती क्रोशतो भृशदुःखिता ॥ ६५ ॥
सा ऽसकृत्स्नेहगुणिता दीनचित्ताऽजमायया ।
स्वयं चाबध्यत शिचा बद्धान् पश्यन्त्यपस्मृतिः ॥ ६६ ॥
कपोतश्चाऽऽत्मजान् बद्धानात्मनोऽप्यधिकान् प्रियान् ।
भार्यां चाऽऽत्मसमां दीनो विललापातिदुःखितः ॥ ॥ ६७ ॥
अहो मे पश्यतापायमल्पपुण्यस्य दुर्मतेः ।
अतृप्तस्याकृतार्थस्य गृहस्त्रैवर्गिको हतः ॥ ६८ ॥
अनुरूपानुकूला च यस्य मे पतिदेवता ।
शून्ये गृहे मां सन्त्यज्य पुत्रैः स्वर्याति साधुभिः ॥ ६९ ॥

भाषा टीका ।

एक दिन उनके वास्ते चुगा लाने के वास्ते वे दोनों कुटुंबी गये सो चाराके फिकर से चारों ओर उसी वन में बहुत देर तक घूमते रह गये ॥ ६२ ॥

इहां उन बच्चों को अपने घरके पासमे चरते हुयों को देख कर कहीं जंगल में घूमते हुये एक व्याध ने जाल फैलाकर उनको पकड़ लिया ॥ ६३ ॥

उहां कपोत कपोती दोनों जो कि बालकों के पालन में सदा बड़े उत्कराठा वाले थे सो चारा लेकर अपने खोंता को गये ॥ ६४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

शिचा जालेन ॥ ६६ ॥

आत्मानुरूपां भार्यां च विलालप शुशोच ॥ ६७ ॥

विलापमाह त्रयेण । अहो इति । अतृप्तस्य दृष्टसुखे अकृतार्थस्याऽदृष्टमसम्पादयतः ॥ ६८—७० ॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

क्रोशतः मातरं दृष्ट्वा विलापं कुर्वतः तान् बालकान् अभ्यधावत् सम्मुखं जगाम ॥ ६५ ॥

बद्धान् पश्यन्त्यपि अजमायया नष्टस्मृतिः सती स्वयं च जालेनाबध्यत ॥ ६६ ॥

आत्मानुरूपां स्वरमणसंयोग्याम् ॥ ६७ ॥

दृष्टसुखे ऐहिकभोगे अदृष्टं परलोककृत्यम् ॥ ६८ ॥

अनुरूपेति युग्मकम् । यस्य मे पतिदेवता प्रतिव्रता स्त्री अनुरूपा भोगसम्पादने समर्था मां सन्त्यज्य पुत्रैः सह स्वः स्वर्गं याति सोऽहं किमर्थं जिजीविष इत्यन्वयः विधुरो विरही दुःखजीवितं जीवनं यस्य स तथा ॥ ६९—७० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

सिचा जालेन ॥ ६६—७४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

कपोती क्रोशतः मातृदर्शनेन उत्क्रोशतः जालसञ्चरणेन नितरां दुःखितान् शिशून् स्वयमपि क्रोशन्ती अभ्यधावत् ॥ ६५ ॥

सेति । सा कपोती असकृत्स्नेहेन गुणिता बद्धहृदयाऽत एव तद्बन्धनात्तमया दीनचित्ता सती बद्धान् पुत्रान् पश्यन्ती अपगता स्मृतिर्यस्याः सा स्वयमपि शिचा जालेनाबध्यत बद्धा बभूव ॥६६॥

कपोतश्चेति चस्त्वर्थः आत्मनः शरीरादप्यधिकप्रियानात्मजान् स्वशरीरेण समां तुल्यप्रियामात्मानुरूपां वा भार्यां च दृष्ट्वेति शेषः अतीव दुःखित इति मानसिकं दुःखमुक्तं विललापेति वाचिकम् ॥ ६७ ॥

विलापमेव प्रपञ्चयति त्रिभिः । अहो ममापायं व्यसनं पश्यत तमाविष्कर्तुमात्मानं विशिनष्टि । दुर्मतेर्दुष्टस्य विषयप्रवणा मतिर्यस्य तथाप्यतृप्तस्यात एवाकृतार्थस्य तत्रोभयत्र हेतुरल्पपुण्यस्य पुण्यलेशहीनस्य कोऽपाय इत्यत आह । गृह इति त्रैवर्गिकः धर्मार्थकामरूपत्रिवर्गसाधनमतः गृहाश्रमो हतो नष्टः ॥ ६८ ॥

नाशमेवोपपादयति । अनुरूपेति । पतिरेव देवता यस्याः सा मे भार्येति शेषः साधुभिः पुत्रैः सह स्वः स्वर्गं याति ॥ ६९ ॥

सोऽहं शून्ये गृहे दीनो मृतदारो मृतप्रजः ।
जिजीविषे किमर्थं वा विधुरो दुःखजीवितः ॥ ७० ॥
तांस्तथैवाऽऽवृतान् शिग्भिर्मृत्युग्रस्तान्विचेष्टतः ।
स्वयं च कृपणः शिक्षु पश्यन्नप्यबुधोऽपतत् ॥ ७१ ॥
तं लब्ध्वा लुब्धकः क्रूरः कपोतं गृहमेधिनम् ।
कपोतकान् कपोतीं च सिद्धार्थः प्रययौ गृहम् ॥ ७२ ॥
एवं कुटम्ब्यशान्तात्मा द्वन्द्वारामः पतत्रिवत् ।
पुष्णन् कुटुम्बं कृपणः सानुबन्धोऽवसीदति ॥ ७३ ॥
यः प्राप्य मानुषं लोकं मुक्तिद्वारमपावृतम् ।
गृहेषु खगवत्सक्तस्तमारूढच्युतं विदुः ॥ ७४ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
वैयासिक्याम् एकादशस्कन्धे
सप्तमोऽध्यायः ॥ ७ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

शिचा पञ्जिग्राहिजालेन ॥ ६६—७३

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

बद्धान् स्ववालान् पश्यन्ती अपस्मृतिः शोकेनाचेतना सती पतन्ती शिचा जालेनाबध्यत ॥ ६६ ॥

चकारात् शुशोच ॥ ६७—७० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

शिचा जालेन ॥ ६६—६७ ॥

अतृप्तस्य ऐहिकसुखे अकृतार्थस्य आमुष्मिकसुखे साधनमकृतवतः ॥ ६८—७० ॥

भाषा टीका ।

कबूतरी ने पहिले आकर जब अपने बालकों को जाल में बंधे हुये देखा तब चिल्लाते हुये उन को देखकर आपभी चिल्लाती हुई बडी दुःखित हो कर उन के पास को दौडी गई ॥ ६५ ॥

वह निरन्तर के प्रेम से बन्धी हुई भगवान् की माया से अत्यन्त दुखित हो गई उसकी स्मृति नष्ट हो गई तब बालकों को बन्धे हुये देख कर आप भी गिर कर जाल में बन्ध गई ॥ ६६ ॥

कबूतर ने भी जब अपने से भी अधिक प्रिय पुत्रों को अपने समान दुखित बन्धे हुये देखा तब दुखित हो कर बडा विलाप करने लगा ॥ ६७ ॥

अहो मैं बडा पापी हूं बडा दुर्बुद्धि हूं मेरे सत्यानाश होने को देखो मैं अभी मैथुनादि से तृप्त नहीं भया हूं मैंने कोई काम मनके नहीं कर सके मेरा धर्मार्थ काम का साधने का घर नष्ट हो गया ॥ ६८ ॥

मेरे अनुकूल मेरेसे रूप वाली देवता सरी के मेरे को मानने वाली मेरी भार्या शून्य घरमें मेरे को छोड कर सुन्दर पुत्रों के सहित स्वर्ग को चली जाती है ऐसा मैं मंद भागी हूं ॥ ६९ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तानावृतान् पश्यन्नपि शिक्षु जालेषु ॥ ७१—७२ ॥

दार्ष्टान्तिके योजयति । एवमिति ॥ ७३ ॥

एवं गृहासक्तिरिति स्वातन्त्र्यमनर्थहेतुर्मनुष्यस्य त्वतिनिन्दितेत्याह । यः प्राप्येति ॥ ७४ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
सप्तमोऽध्यायः ॥ ७ ॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

विचेष्टतः चेष्टाशून्यान् विविधं चेष्टमानान् वा ॥ ७१ ॥ ७२ ॥

अशान्तात्मा विक्षिप्तचित्तः सानुबन्धः पुत्रकलत्रादिसहितः ॥ ७३ ॥

अपावृतं निरावरणं मुक्तिद्वारं मुक्तिसाधनम् ॥ ७४ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धीये
श्रीराधारमणदासगोस्वामिकृतदीपिकादीपने टिप्पणे
सप्तमोऽध्यायः ॥ ७ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

इति श्रीमद्भागवतव्याख्याने एकादशस्कन्धीये
श्रीसुदर्शनसूरिकृतशुकपक्षीये
सप्तमोऽध्यायः ॥ ७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सोऽहं हतप्रजः हतदारः किमर्थं जिजीविषे जीवितुमिच्छामि ॥ ७० ॥

तान् शिग्जालैरावृतानत एव मृत्युग्रस्तानारब्धमरणान् विचेतसः मूर्च्छितान् पश्यन् कृपणो दीनः तत्र हेतुरबुधः मतः स्वयमपि शितु शिक्यां जालेऽपतत्प्रविवेश ॥ ७१ ॥

तमिति तं कपोतं लब्ध्वात एव सिद्धार्थः सिद्धप्रयोजनः स्वगृहं ययौ ॥ ७२ ॥

दृष्टान्तविवक्षितमर्थं दार्ष्टान्तिके योजयति। एवमिति। अशान्तात्मा अजितेन्द्रियः द्वन्द्वेनासमन्ताद्रमत इति तथा पतत्रिवत्सानुबन्धः सपुत्रकलत्रः अवसीदति क्लिश्यति ॥ ७३ ॥

असम्भावितविवेकानां तिरश्चामेवं विधा वृत्तिः कथं चित्तुक्ता लब्धपवर्गार्थसाधननृजन्मनां तु एवं विधा वृत्तिः सुतरां दुर्भगा इत्याह । य इति । लोकयत इति लोको देहस्तमपावृतं निष्प्रतिबन्धं मुक्तिद्वारं मुक्तिसाधनं मानुषं लोकं प्राप्यापि यो गृहेषु खगवत्कपोतवत्सक्तस्तमारूढच्युतं श्रेयोमार्गसोपानपङ्क्तिमारूढं ततो भ्रष्टं विदुः ॥ ७४ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
सप्तमोऽध्यायः ॥ ७ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

आरूढाद्यत्स्थानात् च्युतं पतितम् ॥ ७४ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
सप्तमोऽध्यायः ॥ ७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
सप्तमोऽध्यायः ॥ ७ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

विचेष्टमानान् स्पष्टमप्यत् ॥ ७१—७४ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
एकादशे सप्तमोऽयं सङ्गतः सङ्गतस्सताम् ॥७॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तान् शिग्जालैरावृतान् पश्यन्नपि शिक्यु जालेषु ॥ ७१-७२ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
सप्तमाध्यायार्थप्रकाशः ॥ ७ ॥

भाषा टीका ।

अब मेरी पत्नी मर गई पुत्र मर गये सो मैं दुखी एकेला वियोगी होकर शून्य घर में जीने की क्यों इच्छा करूं ॥ ७० ॥

ऐसा कहकर उनको जालों में बंधे हुये छट पटाते मरते वाले ऐसे देखकर देखता हुआ भी मूर्ख आप भी जाल में गिर पड़ा ॥ ७१ ॥

वह क्रूर व्याध कबूतर कबूतरी उन सबों को पाकर तो जोड़ा के मिलने से खुशी होकर घरको चला गया ॥ ७२ ॥

इसी प्रकार से जो पुरुष अशान्त है रागद्वेषादि में लगा है सो दुखी होकर कुटुंब का पोषण करता हुआ ऐसे ही पक्षी सरी का परिवार सहित नष्ट होजाता है ॥७३॥

जो पुरुष खुले हुये मुक्ति के द्वार मनुष्य लोक को प्राप्त होकर भी पक्षी सरी का घर में ही आसक्त रहता है उसको तो मोक्ष मार्ग में चढ़कर गिर गया ऐसा जानते हैं ॥ ७४ ॥

इति श्रीमद्भागवत एकादशस्कन्ध में सप्तमाध्याय
श्रीवृन्दावनस्थ पं० भागवताचार्यकृत
भाषा टीका समाप्ता ॥ ७ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे सप्तमोऽध्यायः ॥ ७ ॥

—:*:—

अथ अष्टमोऽध्यायः ।

———:*:———

ब्राह्मण उवाच ।

सुखमैन्द्रियकं राजन् ! स्वर्गे नरक एव च ।
देहिनां यद्यथा दुःखं तस्मान्नेच्छेत तद्बुधः ॥ १ ॥
ग्रासं सुमृष्टं विरसं महान्तं स्तोकमेव वा ।
यदृच्छयैवाऽऽपतितं ग्रसेदाजगरोऽक्रियः ॥ २ ॥
शयीताहानि भूरीणि निराहारोऽनुपक्रमः ।
यदि नोपनमेद्ग्रासो महाहिरिव दिष्टभुक् ॥ ३ ॥
ओजःसहोबलयुतं बिभ्रद्देहमकर्मकम् ।
शयानो वीतनिद्रश्च नेहेतेन्द्रियवानपि ॥ ४ ॥
मुनिः प्रसन्नगम्भीरो दुर्विगाह्यो दुरत्ययः ।
अनन्तपारो ह्यक्षोभ्यः स्तिमितोद इवार्णवः ॥ ५ ॥
समृद्धकामो हीनो वा नारायणपरो मुनिः ।
नोत्सर्पेत न शुष्येत सरिद्भिरिव सागरः ॥ ६ ॥
दृष्ट्वा स्त्रियं देवमायां तद्भावैरजितेन्द्रियः ।
प्रलोभितः पतत्यन्धे तमस्यग्नौ पतङ्गवत् ॥ ७ ॥
योषिद्धिरण्याभरणाम्बरादिद्रव्येषु मायारचितेषु मूढः ।
प्रलोभितात्मा ह्युपभोगबुद्ध्या पतङ्गवन्नश्यति नष्टदृष्टिः ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अष्टमेऽजगरादिभ्यो नवभ्यः शिक्षितं हरिः ॥
अवधूतगिरा प्राह विवेकायोद्धवं प्रति ।

प्रारब्धकर्मभोगस्यावश्यंभावित्वात्तदर्थोद्यमेनायुर्व्ययो वृथा कर्तव्य इत्यजगराच्छिक्षितमित्याह । सुखमित्यादिना । यदैन्द्रियकं सुखं तत्स्वर्गे नरके च भवत्येव यथा दुःखम् तस्माद्बुधः तन्नेच्छेत् ॥ १ ॥

शरीरनिर्वाहमात्रं तु यथा लब्धेन कर्तव्यमित्याह । ग्रासमिति । आजगरोऽजगरवृत्तिः अक्रियः उदासीनः ॥ २ ॥

यदा नापतति तदा किं कर्तव्यं तत्राऽऽह । शयीतेति । अनुपक्रमो निरुद्यमः दिष्टभुक् दैवमेव प्रापकमिति धैर्यवान् ॥ ३ ॥

ननु समर्थोऽपि शयीतैव किम् ओमित्याह । ओज इति । ओज इन्द्रियबलम् सहो मनोबलम् बलं शारीरमेव तद्युक्तमपि देहमकर्मकमेव बिभ्रच्छयान एव भवेत् वीतनिद्रः स्वार्थे जागृदृष्टिश्च भवेन्न पुनरीहेत इन्द्रियवानपीति दर्शनादिव्यापारमपि निवारयति ॥ ४ ॥

समुद्राच्छिक्षितमाह । मुनिरिति । बहिः प्रसन्नश्चासावन्तर्गम्भीरश्च दुर्विगाह्य एवं भूत इति परिकलयितुमशक्यः अलक्ष्याभिप्रायत्वात् दुरत्ययोऽनतिक्रमणीयः तेजस्वित्वात् अनन्तपारः कालतो देशतश्चापरिच्छेद्यः स्वरूपाविर्भावात् अक्षोभ्योऽविकार्यः रागाद्यभावात् स्तिमितोदो निश्चलोदकोऽर्णवो यथा तद्वदेतैर्गुणैर्भवेदित्यर्थः ॥ ५ ॥

किञ्च वर्षासु सरिद्भिः समृद्धोऽपि सागरो यथा नोत्सर्पेत ग्रीष्मे तद्विहीनोऽपि न शुष्येत तथा समृद्धकामस्तद्विहीनो वा

श्रीधरस्वामिकृतभावार्थदीपिका ।

न हृष्येन्न शोचेदित्यर्थः। अत्र हेतुः नारायणपरो नतु विषयपर इति ॥ ६ ॥

रूपगन्धस्पर्शशब्दरसैः पञ्चभिर्विषयैर्मोहिताः पतङ्गमधुकरगजहरिणमीना हता अतस्तेष्वनासक्तौ पञ्चैते गुरवः तदुक्तम्

पतङ्गमातङ्गकुरङ्गभृङ्गमीना हताः पञ्चभिरेव पञ्च ।
एकः प्रमादी स कथं न हन्यते यः सेवते पञ्चभिरेव पञ्चेति ॥

तत्र रूपविलासमोहितो नश्यतीति पतङ्गाच्छिक्षितमाह। दृष्ट्वेति। तस्या भावैः प्रलोभितः ॥ ७ ॥

स्त्रियमुपलक्षणीकृत्यैतत्प्रपञ्चयति। योषिदिति ॥ ८ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी ।

नवभ्यो गुरुभ्यः शिक्षितमर्थम् अवधूतस्य गिरा द्वारा निवेकाय विवेकं जनयितुं तदर्थोत्थाभिः भोगार्थप्रयत्नैः ऐन्द्रियकं विषयेन्द्रियसम्बन्धजन्यं सुखं तस्मात् विषयसुखस्य शूकरादिसाधारण्येन तुच्छत्वात् ॥ १ ॥

यथालब्धेन याद्दच्छिकतया प्राप्तेन ग्रासेन मिष्टं मधुरं विरसं कट्वम्लादिः नापततीत्यत्र ग्रास इति शेषः ॥ २ ॥ ३ ॥

ओमित्यभ्युपगमे बलं शारीरमेव ;तेजआदेरुक्तत्वात् भवेदित्यध्याहारः ॥ ४ ॥

बहिः प्रसन्नश्चेति अर्णवपक्षे जलप्रसन्नतावपि सत्याम् अन्तर्दृष्ट्यापि अतलस्पर्शः। मुनिपक्षे सर्वत्र चित्तप्रसन्नतावपि अन्तर्निजरहस्योपास्याप्रकाशकः अतएव एवम्भूत इति उभयपक्षेऽप्यनिर्णीयान्तस्तत्त्व इत्यर्थः। तेजस्वित्वादिति मुनिपक्षे समुद्रपक्षे तु जलनक्रादिमयत्वात् अनतिक्रमणीयत्वं रागाद्यनावादिति लाभालाभादिनेति एतैर्गुणैर्विशिष्टो भवेत् ॥ ५ ॥

तद्विहीनः सरिद्विहीनोऽपि समृद्धकामः संप्राप्तसम्भोगोऽपि तद्विहीनः सम्भोगविहीनः अत्र हर्षशोकाभावे नारायणपरः नारायणैकनिष्ठः ॥ ६ ॥

अतः रूपादीनां पतङ्गादिमोहकत्वात् तेषु रूपादिषु एते पतङ्गादयः तत् पञ्चानां मोहितत्वं गारुडे प्रोक्तं तत्र पञ्चसु गुरुषु मध्ये तस्याः स्त्रियः भावैः हावभावहेलादिभिः ॥ ७ ॥

एतत् रूपमोहितस्य नष्टत्वं योषिदादिषु परिणामतो दुःखहेतुषु उपभोगबुद्ध्या सुखहेतुत्वज्ञानेन नश्यति संसरति ॥ ८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

॥ १—३ ॥

अकर्मकं दृष्टार्थे प्रवृत्तिशून्यम् ॥ ४ ॥

दुर्विभाव्यः दुरासदः दुरत्ययः अलङ्घनीयः अनभिभाव्यः अनन्तपारः ज्ञानादिभिरियत्तया परिच्छेत्तुमशक्यः अक्षोभ्यः समाधिभेदं मर्षयितुमशक्यः ॥ ५-१४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथाजगराच्छिक्षितं वक्तुं तावद्दुःखायेव सुखाय प्रारब्धवशादेव प्राप्याय न यतेतेत्याह। सुखमिति। हे राजन्! यदा यतो यथैन्द्रियक मिन्द्रियप्रभवं सुखं देहिनां स्वर्गे नरके च प्रारब्धाद्भवत्येव नरकेऽपि हि किञ्चिदन्नपानादिजन्यं सुखं विद्यत एवेति तत्तुल्यतां स्वर्गसुखस्यापि वेदयितुं नरक इत्युक्तं तस्मादैन्द्रियकसुखस्य प्रारब्धमूलत्वात्तन्नेच्छेत् यथा दुःखमनाकाङ्क्षितमप्युपतिष्ठते तद्वत्सुखमपीति दुःखमिव सुखमपि नेच्छेतेत्यर्थः। बुधः सुखदुःखयोः प्रारब्धमूलत्वज्ञः ॥ १ ॥

अजगराच्छिक्षणीयान्याह। ग्रासमिति त्रिभिः। ग्रासमाहारं सुमृष्टं रसःसंयुक्तं महान्तं पर्याप्तं स्तोकमल्पमपर्याप्तं यदृच्छया दैवादापतितं प्राप्तं न तु प्रयत्नेन लब्धमित्येवकाराभिप्रायः ग्रसेदद्यात् आजगरीं अजगरसम्बन्धिनीं क्रिया वृत्तिर्यस्य सः अजगरवद्वर्तेतेति विवक्षितोऽर्थः आजगरोऽक्रिय इति पाठेऽजगरवृत्तिरक्रिय उदासीनः ॥ २ ॥

शयीतेति। यदि ग्रास आहारो नोपलभेत यदृच्छया नापतेत् तर्हि महाहिरिवाजगर इव दिष्टभुक् आहारप्राप्तिप्रतिबन्धकं प्रारब्धमनुभवन्ननुपक्रमः निरुद्यमः भूरीणि बहून्यप्यहानि तूष्णीं शयीत ॥ ३ ॥

ननु समर्थोऽपि शयीतैव किमित्यत आह। ओज इति। ओज इन्द्रियबलं सहो मनोबलं बलं शारीरं तद्युक्तमपि देहं बिभ्राणः अकर्मकं दृष्टार्थप्रवृत्तिशून्यं यथा तथा शयान एव भवेत् इन्द्रियवानपि प्रवृत्तिक्षमेन्द्रिययुक्तोऽपि वीतनिन्द्रः तत्त्वावमर्शने पारवश्यरहितः नेहेत देहसुखं नेच्छेदपि न व्याप्रियेतेति वा ॥ ४ ॥

समुद्राच्छिक्षणीयमाह द्वाभ्याम्। मुनिरिति। बहिः प्रसन्नः स चासावन्तर्गम्भीरश्च दुर्विगाह्य इत्थम्भूत इति निर्वक्तुमशक्यः दुर्विभाव्य इति यावत् दुर्विग्राह्य इति पाठे दुरासद इत्यर्थः ॥ ५ ॥

किञ्च वर्षासु सरिद्भिः समृद्धोऽपि नोत्सर्पेत ग्रीष्मे तद्विहीनोऽपि न शुष्येत तथा समृद्धकामः तद्विहीनो वा न हृष्येत न शोचेदित्यर्थः। तत्र हेतुर्नारायणपरः नतु विषयपर इति भावः ॥ ६ ॥

रूपरसगन्धस्पर्शशब्देषु पञ्चसु विषयेष्वासक्ताः पतङ्गमधुकरगजहरिणमीनाः पञ्च हता अतस्तेष्वनासक्तौ पञ्चैते गुरवः तदुक्तम्—

पतङ्गमातङ्गकुरङ्गभृङ्गमीना हताः पञ्चभिरेव पञ्च ।
एकः प्रमादी स कथं न हन्यते यः सेवते पञ्चभिरेव पञ्च ॥

तत्र रूपविलासमोहितो नश्यतीति पतङ्गाच्छिक्षितमित्याह। दृष्ट्वेति। देवमायां भगवन्मायां तद्वन्मोहकत्वात्तत्त्वेन रूपणं तद्भावैः तस्याः स्त्रियाः भावैः विभ्रमादिभिः प्रलोभितः अन्धे तमसि नरके पतति अग्नौ पतङ्गवद्यथा पतङ्गः सपक्षः कीटविशेषः दीपादिकं दृष्ट्वा तद्रूपेण प्रलोभित उपभोग्यबुद्ध्या तं प्राप्य तस्मिन् पतित्वा नश्यति तद्वदित्यर्थः ॥ ७ ॥

तदेवाह। योषिदिति। मायारचितेषु मायासृष्टेषु योषिति तस्याः हिरण्याभरणाम्बराणि आदिशब्दग्राह्याणि स्रक्चन्दनादीनि तेषु द्रव्येषूपभोगबुद्ध्या प्रलोभितात्मा विमोहितमनाः अत एव नष्टविवेकः पतङ्गवन्नश्यति ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

न कर्तुमीहसे किञ्चिदिति यदुराजप्रश्नं परिहरन्नेतत्संसारसुखं यथा दुःखशिरस्कत्वेन नाकाङ्क्ष्यं न साध्यं च तथा स्वर्गसुखमित्याह । सुखमिमि । यथैन्द्रियकं सुखं पतननिश्चयात्स्वर्गे नरके चास्ति तथा श्रोत्रादीन्द्रियविषयशब्दादिसुखमस्त्येवेति यस्तस्माद्बुधो दुःखशिरस्कं सुखं नेच्छेत कुत एव तत्साधने प्रवर्तेत इत्यन्वयः । अनेनैहिकसुखाय न प्रवर्तनीयमिति किं वक्तव्यमित्युक्तं भवति ॥ १ ॥

तर्हि देहयात्रा कथङ्कारं वर्तेत इत्यतोऽजगरादुपात्तबुद्धिमाह । ग्रासमिति । दिष्टेन दैवेन "दैवं दिष्टं भागधेय"मित्यभिधानं "ग्रासस्तु कवलार्थक" इति च विसृष्टं दत्तं यदृच्छयैवापातितमतर्कितत्वेनोपपन्नम् अक्रियः यत्नरहितः अजगरो यथा ग्रसेत्तथा मुनिरिति शेषः ॥ २ ॥

ननु यदृच्छयापि ग्रासालाभे किंकुर्यात्तत्राह । शयीतेति । अनुपक्रमः क्रियारम्भरहितः यदि यदृच्छयापि ग्रासो नोपनमेत् तर्हि महाहिरिव बहून्यहानि शयीत तत्र निमित्तं दिष्टभुगिति यदृच्छाप्राप्तभोगत्वादित्यर्थः ॥ ३ ॥

ननु तर्ह्यन्नबलस्य देहस्यान्नाभावे पतनं स्यादित्याशङ्क्य सत्यं बहिर्मुखस्यैतन्न योगारूढस्य तस्य भगवद्गुणगणामृतध्यानलक्षणपानपूर्णबलवद्देहत्वादिति भावेनाह । ओज इति । करचरणादीन्द्रियशक्तिमानपि योगारूढः शरीरयात्रार्थं नेहेत न चेष्टेत कीदृशः शयानः सर्ववृत्तिशून्यः तर्हि निद्रालुः स्यादत्राह । वीतनिद्र इति । निद्रानिरासव्यापारसद्भावादित्याह । बिभ्रदिति । अत्र भरणेन ध्यानं लक्षयति ओजः सहोबलात्मना ब्रह्मणा युक्तं देहं बिभ्रत् ध्यायन् अन्यत्र तादृशादृष्टनिर्मितम् ईशशक्तेरचिन्त्यत्वादित्यर्थः । अत एवाकर्मकं निश्चेष्टम् उद्देश्यरहितं वा ॥ ४ ॥

समुद्राच्छिक्षितां मतिमाह । मुनिरिति । अनन्तपारः अन्तपाररहितबुद्धिः अनन्तेन पारः पूर्तिस्तृप्तिलक्षणा यस्य स तथेति वा "पारं तीरान्तरं प्रोक्तं पारः पूर्तिस्तथा पुमा" नित्यभिधानम् अन्यत्रानिश्चिततीरान्तरः स्तिमितोदो निश्चलजलः निर्विकल्पकर्मा वा ॥ ५ ॥

समृद्धकामः समृद्धाभीष्टार्थः नोत्सर्पेत उत्सिक्तो न भवेत् हीनो वा द्रव्यैरिति शेषः न शुष्येत् यथा प्रावृषि समुद्रः समृद्धजलाभिः ग्रीष्मे शुष्कजलाभिः सरिद्भिः ॥ ६ ॥

शलभाच्छिक्षितां बुद्धिमाह । दृष्ट्वेति । देवस्य मायां मोहकशक्तिं भावैः शृङ्गारचेष्टाभिः अत्र—

महतां वनिताकामः पतत्यन्धे तमस्यलम् ।
अन्यत्र निरयं याति दुःखवान्स्याद्विपर्यय

इति वचनात् अधः पाते विशेषोऽस्तीति ज्ञातव्यं मायाशब्दस्यैन्द्रजालार्थमन्तरेण मोहकारणत्वार्थः कथमित्येतच्चोद्यं—

मोहकारणभूता तु मायेत्याहुर्मनीषिणः ॥
आवद्यमानं मेत्युक्तं तज्ज्ञापयति यत्स्वयम् ।

"कुत्र चिज्ज्ञानरूपं सल्लाभरूपं च भण्यते। मयं प्राचुर्यमुद्दिष्टं मायास्यात्प्रचुरेत्यपी"त्यनेन परिहर्तव्यं तस्माद्या विवक्षिता तामनुसृत्यार्थो वक्तव्य इति ज्ञायते ननु तर्हि मायाशब्दस्यानेकार्थवृत्तित्वात्कुत्र मुख्यार्थ इतीयं शङ्का—

स्वतन्त्रं परमार्थाख्यं स्वतन्त्रैका हरेर्मतिः ॥
सैव माया समुद्दिष्टा मुख्यतस्तत्स्वरूपिका ।

इत्यनेन परिहर्तव्या । परमार्थनिष्ठस्य स्वतन्त्रशब्दस्य गुणनिष्ठत्वं कथमित्येतत् "मतिमन्मतिभेदोऽपि न विष्णोः क्वचिदिष्यते" इत्यनेन परिहृतम् मायायाः ईशेच्छावाचित्वे जगतस्तन्मयत्वं कथमिति इदमपि—

पारमार्थ्येन नास्त्येव तदस्यास्तद्वशं यतः ॥
अनाद्यनन्तकालेऽपि विद्यमानमपि ध्रुवम् ।
अतो मायामयं प्राहुः सर्वं तद्वशगं यतः ॥

इति अमुना परिहृतं किं च विश्वस्य पराधीनत्वादसदादिशब्दवाच्यत्वं न त्वविद्यमानत्वात् तर्हि जगन्नास्त्येवेति कथम् अस्वतन्त्रत्वादित्युत्तरं प्रवाहरूपेण नित्यत्वात्सदातनत्वं युक्तं श्रौतत्वाद्विश्वस्य मिथ्यात्वं किं न स्यादितिचेन्न हरेरिच्छाधीनत्वान्मायामात्रत्वात् तर्हि श्रुतेः कागतिरितिचेन्न एकस्यैव परमार्थत्वादिति सर्वं प्रमाणसिद्धम्—

स्वाधीनं सदिति प्रोक्तं पराधीनमसत्स्मृतम् ॥
अविद्यमानमेतस्माज्जगदाहुर्विपश्चितः ।
अनाद्यनन्तकालेषु विद्यमानमपि ध्रुवम् ॥
अस्वातन्त्र्यात्तु नास्त्येवेत्येवं वाच्यं जगत्सदा ।
सदा वृत्तेर्विद्यमानमिति ब्रूयाद्यदि कश्चित ॥
तथापि नाशवच्चेदं प्रवाहाद्यस्य नित्यता ॥
अतो निवर्त्यमित्याहुः प्रपञ्चो ह्यस्ति यद्यपि ।
विष्णोरिच्छावशत्वाच्च मायामात्रमिति स्फुटम् ॥
परमार्थं चैकमेव स्वातन्त्र्याद्विष्णुमव्ययम् ।
यदिकल्पयतीदं यः स एव विनिवर्तयेत् ॥
विष्णुस्तस्मात्तद्वशत्वान्नास्तीति द्वैतमुच्यते ।
स्वातन्त्र्येण हरौ ज्ञाते पराधीनत्वनिश्चयात् ॥
इत्याहुरुपदेष्टार आचार्यास्तत्त्ववेदिनः ।
यथैव राजनि ज्ञाते नान्योऽस्तीति स्फुटं वचः ॥
स्वातन्त्र्यात्पारतन्त्र्याच्च तद्भृत्यादिषु सत्स्वपि ।
यथैकच्छत्रवांश्चैव एकवीर इतीव वा ॥
तथैव सर्वप्राधान्यादद्वितीयो हरिः स्मृतः ।
एवं मुक्ता विजानन्ति सायुज्ये प्रापिता विभोः ॥
अनन्तकालं पश्यन्तो जगदेतच्चराचरम् ।
तस्यैकस्य ह्यविज्ञानात्केवलभ्रान्तिरूपकम् ॥
जगदुक्त्वा तमो यान्ति त्वीशितव्येशशापतः ॥

इत्यनेन प्रपञ्चो यदिविद्येतेत्यादिश्रुतिरपि विवृता सत्यत्वार्थे—

पुत्रा मे यदि विद्यन्ते मरिष्यन्त्येव ते ध्रुवम् ।
यदि राज्यं करोत्येष नश्यत्येतदसंशयमिति ॥

धृतराष्ट्रस्य वचनाद्यदिशब्दस्य विपर्ययपर्यवसाने वस्तुत्वार्थः प्रतीयते तथापि-

यदिशब्दस्त्ववस्तुत्वे अस्वातन्त्र्ये च संशये ।
अवस्तुशब्दश्चाशक्ते ह्यल्पशक्तौ च कीर्त्यते

इत्यनेन यदिशब्दस्यावस्तुत्वार्थोऽपि ज्ञायते ॥ ७ ॥

प्रागुक्तश्लोकार्थमेव विवृणोति। योषिदिति। मायारचितेषु भगवदिच्छारचितेषु भोगसाधनेषु तल्पादिषु योषिज्जनेषूपभोगबुद्ध्या

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

विषयभोगसाधनबुद्ध्या प्रलोभितात्मा विवशमनाः शलभवन्नश्यतीत्यन्वयः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

॥ १—४ ॥

प्रसन्नगम्भीरः मर्णवपक्षे जलप्रसत्तावपि सत्यां दृष्ट्याप्यतलस्पर्शः मुनिपक्षे सर्वत्र चित्तप्रसत्तावपि निजरहस्योपासाप्रकाशकः अतएवोभयोरपि दुर्विगाह्यः अनिर्णेयान्तस्तत्त्वः एवं क्रमेण तत्तत्पक्षे दुरत्ययः आक्रान्तुमशक्यः जलादिमयत्वात् अभिभवितुमशक्यः तेजस्वित्वात् अनन्तपारः उभयत्रापरिच्छेद्यस्वरूपाविर्भावात् मक्षोभ्यः निश्चलमहाजलत्वात्साधारणैश्चालयितुमशक्यः तथा रागाद्यभावाद्विषयलाभालाभादिभिरिति ॥ ५-६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अष्टमेऽजगराद्याश्च गुरवो नव वर्णिताः ।
पिङ्गलायाः कथा यत्र नैराश्यसुखदोदिता ॥

स्वदेहनिर्वाहार्थं वृथा नातिचेष्टितव्यमित्यत्राजगर एव गुरुरित्याह । सुखमिति चतुर्भिः । यथा दुःखमवाञ्छितमपि स्यात् तथा सुखमपि भवेदेवेति किं तदिच्छयेत्यर्थः ॥ १ ॥

आजगरः अजगरवृत्तिः मक्रियः अल्पचेष्टः ॥ २—३ ॥

वीतनिद्र इति स्वार्थे भगवच्चिन्तनादौ तु सर्वदा सावधानः भवेत् यस्मात् देहनिर्वाहार्थोद्यमेन समयो मा वृथा यात्वित्येतदर्थमेवाजगरी वृत्तिराश्रिता न पुनः सैव स्वार्थो ज्ञेय इति भावः ॥ ४ ॥

समुद्राच्छिक्षितमाह । मुनिरिति द्वाभ्याम् । गम्भीरोऽपि पुरुषः सुसमर्थधिया केनाप्यवगताभिप्रायो भवेत्तस्मात् योगी दुर्विगाह्यः सर्वथैवालक्ष्यमनोऽन्तस्तत्त्वः स्यात् दुरत्ययः तेजस्वित्वादनतिक्रम्यः अनन्तपारः कदाप्यस्वास्थ्यसमयेऽपि क्वाप्यतिकष्टदेशेऽपि वैवश्यराहित्यादेवानुद्दीर्णास्वतत्त्वः स्यादित्यर्थः । विजितकामादित्वादक्षोभ्यः ॥ ५ ॥

किञ्च वर्षासु सरिद्भिः समृद्धोऽपि सागरो यथा नोत्सर्पते ग्रीष्मे तद्विहीनोऽपि न शुष्येत् तथा समृद्धकामः सम्पूर्णभोगोऽपि मुनिर्न कामेन हृष्येत् दीनोऽपि न दैन्येन शोचेत् यतो नारायणपरस्तन्माधुर्यानुभवलाभालाभाभ्यामेवास्य हर्षशोकौ स्याताम्॥६॥

रूपासक्तिर्नाशहेतुरिति पतङ्गाच्छिक्षितमाह । दृष्ट्वेति द्वाभ्याम्॥७॥

यद्यपि स्त्रीहिरण्यादिषु मध्ये स्त्रियां पञ्चापि विषयाः सन्ति तदपि योषिदादिषु प्रथमं दृष्टिरेव पततीति रूपस्यैव प्राधान्यम् ॥८॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अष्टमेऽध्याये नवभ्योऽजगरादिभ्यः शिक्षितमाहावधूतः तत्र तावदजगराच्छिक्षितमाह। सुखमिति चतुर्भिः।यथा दुःखमनिच्छितमेव भवति तथा यदैन्द्रियकं सुखं तत्स्वर्गे नरके च भवत्येव तस्मात्सुखस्तन्नेच्छेत् ॥ १ ॥

आजगरः अजगरवृत्तिः ॥ २ ॥

अनुपक्रमः जीविकारम्भरहितः दिष्टभुक् दैवविपाकभुक् ॥ ३ ॥

ओज इन्द्रियाणां सहो मनसो बलं देहस्य सामर्थ्यम् तद्युक्तमपि देहमकर्मकं जीविकार्थयत्नरहितं बिभ्रत् भोगापेक्षया शयान एव भवेत् मोक्षापेक्षया तु वीतनिद्र एव भवेत् किंबहुना इन्द्रियवानपि नेहेत इन्द्रियार्थेष्विति शेषः ॥ ४ ॥

समुद्राच्छिक्षितमाह । मुनिरिति द्वाभ्याम्।प्रसन्नश्चासौ गम्भीरश्च दुर्विगाह्यः दुरूहाभिप्रायः दुरत्ययः अनतिक्रमणीयः अनन्तपारः अनन्तं कालमसंख्यं सोमादिकं वा यज्ञेषु विश्वं वा प्रलये पिबतीत्यनन्तपाः विष्णुस्तं रातीत्यनन्तपारः अक्षोभ्यः अविकार्यः स्तिमितोदः निश्चलजलः अर्णव इव मुनिर्भवेत् ॥ ५ ॥

यथा सागरः वर्षासु सरिद्भिः नोत्सर्पेत अन्यत्र तद्विहीनोऽपि न शुष्येत् तथा मुनिरपि समृद्धकामस्तद्विहीनो वा न हृष्येत च शोचेत् हेतुगर्भं विशेषणं नारायणपर इति ॥ ६ ॥

पतङ्गाच्छिक्षितमाह । दृष्ट्वेति द्वाभ्याम्। तद्भावैः स्त्रीभावैः॥७॥८॥

भाषा टीका।

ब्राह्मण उवाच।

हे राजन् ! इन्द्रियों का सुख तो स्वर्ग में तथा नरक में बरोबर है जैसे कि प्राणियों को बिना चाहते दुःख आजाता है तैसे ही सुख भी आपही आजावैगा तिससे ज्ञानवान् पुरुष उस की चाहना से यत्न न करै ।। १ ॥

विरक्त पुरुष अजगर की क्रिया को धारण करै भोजन ग्रास चाहे मीठा मिलै चाहे फीका मिलै चाहै बहुत मिलै चाहै थोडा मिलै दैव इच्छा से जो मिल जाय तिसी को भोजन कर लेवै ॥ २ ॥

यदि कभी ग्रास न मिलै तो भी बिना आहारसे रहकर भी कोई उद्यम न करै प्रारब्ध का भोग समझकर अजगर सरीका बहुत दिन तक भूखाही सोया रहे ॥ ३ ॥

उसकी सब इंद्रिय समर्थ होवैं तो भी मन इंद्रिय शरीर के बल के सहित देह को धारण करके भी निद्रा से रहित होकर सोया रहै ॥ ४ ॥

मुनि को चाहिये कि प्रसन्न चित्त रहै गंभीर रहै अथाह बुद्धि रक्खै निर्भय रहै कोई उसके बुद्धि का पार न पावै किसी बात से क्षुभित न होवै निश्चल होकर रहै जैसे कि समुद्र होता है ये सब गुण समुद्र में भी होते हैं ॥ ५ ॥

मुनि को चाहै सब मनोरथ मिलजावैं चाहे नहीं कुछ मिलै तो भी नारायण में तत्पर रहने से थिर रहै जैसे कि समुद्र चौमासे में नदियों के मिलने से तथा अन्य दिनमें न मिलने से न उछलता है न सूखता है तैसा समान बना रहै ॥ ६ ॥

देवकी माया रूपी स्त्रि को देखकर अजितेंद्रिय पुरुष उसके भावों से लोभित होकर अंधेरे में गिर पडता है जैसे कि पतंगा अग्नि में गिर पडता है ॥ ७ ॥

स्तोकं स्तोकं ग्रसेद्ग्रासं देहो वर्तेत यावता ।
गृहानहिंसन्नातिष्ठेद्वृत्तिं माधुकरीं मुनिः ॥ ९ ॥
अणुभ्यश्च महद्भ्यश्च शास्त्रेभ्यः कुशलो नरः ।
सर्वतः सारमादद्यात्पुष्पेभ्य इव षट्पदः ॥ १० ॥
सायन्तनं श्वस्तनं वा न संगृह्णीत भिक्षितम् ।
पाणिपात्रोदरामत्रो मक्षिकेव न सङ्ग्रही ॥ ११ ॥
सायन्तनं श्वस्तनं वा न सङ्गृह्णीत भिक्षुकः ।
मक्षिका इव सङ्गृह्णन् सह तेन विनश्यति ॥ १२॥
पदापि युवतीं भिक्षुर्न स्पृशेद्दारवीमपि ।
स्पृशन् करीव बध्येत करिण्या अङ्गसङ्गतः ॥ १३ ॥
नाधिगच्छेत्स्त्रियं प्राज्ञः कर्हिचिन्मृत्युमात्मनः ।
बलाधिकैः स हन्येत गजैरन्यैर्गजो यथा ॥ १४ ॥
न देयं नोपभोग्यं च लुब्धैर्यद्दुःखसञ्चितम् ।
भुङ्क्ते तदपि तच्चान्यो मधुहेवार्थविन्मधु ॥ १५ ॥
सुदुःखोपार्जितैर्वित्तैराशासानां गृहाशिषः ।
मधु हेवाग्रतो भुङ्क्ते यतिर्वै गृहमेधिनाम् ॥ १६ ॥

भाषा टीका ।

मूढ पुरुष ? स्त्रिजन सुवर्ण सुंदर वस्त्रादि द्रव्यों जोकि दैव की माया से रचित हैं तिन को देखने से उपभोग की बुद्धि से ज्ञान नष्ट होजाने से पतंग सरीका फसकर नष्ट होजाता है ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

मधुकराच्छिक्षितमाह । स्तोकमिति । गृहान्गृहस्थानहिंसन्न-पीडयन् अयम्भावः यथा मधुकरो विशिष्टगन्धलोभेनैकस्मिन्नेव पद्मे वसन्नस्तमयसमये मुकुलिते तस्मिन्बध्यते एवं मुनिरपि गुणलोभेनैकमेव गृहमाश्रितस्तन्मोहेन बध्यत इति ॥ ९ ॥

किञ्च अणुभ्यश्चेति ॥ १० ॥

द्विविधो मधुकृत मधुकृन्तति पुष्पादाच्छिद्य गृह्णातीति मधुकृद्भ्रमरः मधुकरोत्याहारत्वेन स्वरूपेण चेति मधुमक्षिका च तत्र प्रथमाच्छिक्षितमुक्तं द्वितीयाच्छिक्षितमाह । सायमिदं भोक्ष्यामि श्व इदं भोक्ष्यामीति भिक्षितमन्नादि न संगृह्णीत किन्तु पाणिपात्रस्तन्मात्रग्राही यद्वा उदरमेवामत्रं पात्रं यस्य सः एकभिक्षायामुदरमात्रग्राही भवेत् संग्रही तु मक्षिकेव न भवति न जीवतीत्यर्थः ॥ ११ ॥

एतद्विवृणोति पुनः । सायन्तनमिति ॥ १२ ॥

स्पर्शासक्तिर्नाशहेतुरिति गजाच्छिक्षितमित्याह । पदाऽपीति । पादेनापि दारवीं दारुमयीमपि गजो हि करिणीं प्रदर्श्य निखाततृणापिहितगर्ते निपात्य बध्यते ॥ १३ ॥

किञ्च नाधिगच्छेदिति नोपगच्छेत् ॥ १४ ॥

त्यागभोगविहीनो धनसञ्चयः परगामी भवतीत्यत्र मधुहा गुरुरित्याह । न देयमिति । तदन्यो बलवान्भुङ्क्ते तदप्यन्यस्तच्चान्यः मधुहा मक्षिकाभिः सञ्चितं मधु यथा भुङ्क्ते तद्वत् ननु सुगुप्तं धनं कथमन्यो ज्ञास्यति हरिष्यति चेति तत्राऽऽह । अर्थवित् । लिङ्गैरर्थं तदुपायं च वेत्तीत्यर्थवित् यथा मधुहा तरुकोटरादिगतं मधु वेत्ति हरति च ॥ १५ ॥

स्वोद्यमं विनाऽपि भोगः सम्भवतीत्यत्रापि स एव गुरुरित्याह । सुदुःखेति । आशासानानामिति वक्तव्ये वर्णलोप आर्षः—

" यतिश्च ब्रह्मचारी च पक्वान्नस्वामिनावुभौ ।
तयोरन्नमदत्वा तु भुक्त्वा चान्द्रायणं चरेदि"ति ॥

गृहिणामावश्यकत्वेन दानविधानात् ॥ १६ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी।

यावता ग्रासेन ननु यद्येकत्रैव विशिष्टग्रासोपलब्धिः शक्या तर्हि स्तोकग्रासे को नियम इत्याशङ्क्य भावार्थमाह। अयमिति । तस्मिन् पद्मे मुकुलिते मुद्रिते सति तन्मोहेन गृहासक्त्या ॥ ९ ॥

किञ्च तस्मादेव मधुकरात् सारग्रहणं शिक्षितमित्याहेत्यर्थः ॥ १० ॥

तत्र द्विविधमधुकृतोर्मध्ये प्रथमाद्भ्रमरात् द्वितीयात् मक्षिकाविशेषात् यथा सङ्ग्रहकर्त्री मक्षिका न जीवति तद्वन्न जीवन्ति किन्तु भवतीत्यध्याहारादित्यर्थं इत्युक्तम् ॥ ११ ॥

एतत् सङ्ग्रहवाक्यं विवृणोति स्पष्टयति तथाच न पौनरुक्त्यं वस्तुतस्तु सङ्ग्राहित्वासङ्ग्राहित्वभेदेन मक्षिकाजातेरपि द्वैविध्यात् प्रथमपक्षे यथा मक्षिकाजातिविशेष आहारमात्रं करोति सङ्ग्रही तु न भवति तथा यतिरपि सङ्ग्रही न स्यादित्यर्थः । द्वितीये तु संग्राहिमक्षिकाजात्यन्तरवद्यदि सङ्गृह्णन् भवति तदा तद्वदेव नश्यतीत्यर्थः ॥ १२ ॥

करिणीं दारुमयीम् ॥ १३ ॥

आत्मनः स्वस्य मृत्युं मृत्युहेतुं स कामुकः कर्मभूतः बलाधिकैः कामुकान्तरैः कर्त्तृभिः ॥ १४ ॥

न देयमिति । लुब्धैर्धनादि न दीयते नच स्वयं भुज्यत इत्यर्थः । किन्तु तत् सञ्चितम् अन्यो बलवान् भुङ्क्ते लिङ्गैस्तत्स्थानमार्जनोपवेशनमुहुरीक्षणादि चिन्हैः अर्थं धनं तदुपायं तद्रक्षणोपायं च वेत्तीति ॥ १५ ॥

स एव मधुहेव आशासानानां कामयमानानां गृहमेधिनां गृहस्थानां सुदुःखोपार्जितैर्विसृष्टैर्हेतुभिः सिद्धाः गृहाशिषः भक्ष्याद्यर्थान् यतिरग्रतो भुङ्क्ते अतस्तदर्थं यतिनोद्यमो न कार्य इत्यर्थः ॥ १६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

न देयमिति । सञ्चितमन्यैर्ह्रियते ततः सञ्चयो न कार्य इत्यर्थः॥१५॥ दुःखेनान्यैरुपार्जितं तेभ्यो भिक्षित्वा भोक्तव्यमित्यर्थः ॥ १६-३१ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

मधुकराच्छिक्षणीयमाह स्तोकं स्तोकमिति द्वाभ्याम् । यावता ग्रासेन देहो वर्त्तेत जीवेत तावन्तमेव ग्रासं नत्वधिकमित्यर्थः।तत्रापि स्तोकं स्तोकमल्पमेव ग्रसेत् गृहान् गृहस्थाश्रमस्थितान् जनानहिंसन्नपीडयन् माधुकरीं वृत्तिमातिष्ठेदाश्रयेत यथा मधुकरः सुमनसः अपीडयन् तत्र तत्र किञ्चिदेव गृह्णन् क्वाप्यसज्जमानो वर्त्तेत तद्वन्मुनिरित्यर्थः । अन्यथैकस्मिन् पद्मे मधुलोभेन सक्तो मधुकरः तस्मिन् मुकुलिते निबद्धो भवत्येवं मुनिरपि गुणलोभेनैकमेव गृहमाश्रितस्तन्मोहेन बध्यत इत्यर्थः ॥ ९ ॥

किञ्च अणुभ्यश्चेति अणुभ्योऽल्पसारेभ्यः महद्भ्यो विपुलसारेभ्यः शास्त्रेभ्यःसारमाददीत यथा षट्पदोऽणुभ्यो महद्भ्यश्च पुष्पेभ्यः सारमादत्ते तद्वदित्यर्थः ॥ १० ॥

द्विविधो हि मधुकृत् मधु कृन्तति पुष्पादाच्छिद्य गृह्णातीति मधुकृत् भ्रमरः मधु करोति आहारत्वेन स्वेन रूपेणैवेति मधुकृत् मधुमक्षिका च तत्र प्रथमाच्छिक्षितमुक्तम् अथ मधुमक्षिकायाः शिक्षणीयमाह । सायन्तनमिति द्वाभ्याम् । सायन्तनश्वस्तनशब्दौ तत्तत्कालभोजनार्थपरौ इदं सायन्तनभोजनार्थमिदं श्व इत्येवं भिक्षितमन्नादि न संगृह्णीत किन्तु पाणी एवाञ्जलिरूपतामापन्नौ पात्रं भोजनपात्रं यस्य सः उदरमेवामत्रमन्ननिधानपात्रं यस्य सः मक्षिकेव न संग्रही यथा मक्षिका सङ्ग्राहिणी भवति तद्वत्संग्रही न भवेदित्यर्थः । संग्रही चेन्मधुमक्षिकावन्नश्यतीति भावः ॥ ११ ॥

एतद्विवृणोति पुनः । सायन्तनमिति। सहतेन संगृहीतेन सह विनश्यति ॥ १२ ॥

स्पर्शासक्तिर्नाशहेतुरिति गजाच्छिक्षणीयमित्याह । पदापीति । दारवीं दारुमयीमपि युवतीं स्त्रियं पदापि न स्पृशेत्स्पृशंस्तु बध्येत यथा करी गजः जिघृक्षुभिर्दारुमय्याः काष्ठतृणमृदाद्याच्छादितगर्तोपरिस्थापितायाः करिण्याः अङ्गसङ्गाद्यथा गर्ते पतितो बध्यते तद्वत् ॥ १३ ॥

किञ्च नाधिगच्छेदिति । प्राज्ञो विवेकवानात्मनः स्वस्य मृत्युं तत्तुल्यां स्त्रियं नाधिगच्छेन्नोपगच्छेत्सः अधिगच्छन् बलाधिकैर्हन्येत यथा गजो गजीमुपगच्छन् बलाधिकैर्हन्यते तद्वत् ॥ १४ ॥

दानभोगानुपयोज्यं धनमन्यगामीति मधुघ्नः शिक्षणीयमत स्तन्नार्जयेदित्याह । न देयमिति । लुब्धैर्दुःखेन सञ्चितमर्जितं यद्धनं न देयं नोपभोग्यं च तद्धनमन्योऽर्थवित्तद्धनग्रहणोपायाभिज्ञः भुङ्क्ते तदपि तस्मान्यः तस्यापि लोभाद्दानभोगानुपयुक्तः स्यात्ताह तस्मादन्यो बलवांस्तदाकृष्य भुङ्क्ते इत्यर्थः । मधुहेव स यथा मधुमक्षिकाभिः सञ्चितं मधु भुङ्क्ते तद्वत् ॥ १५ ॥

स्वोद्यमं विनैव भोजनलाभस्तस्मादेव शिक्षणीय इत्याह । सुदुःखेन बहुदुःखेनोपार्जितैर्वित्तैर्गृहेष्वाशिषः पानभोजनादिकामानाशासानानां कामयमानानाम् आशासानानामिति वक्तव्येनावर्णलोप आर्षः—

> यतिश्च ब्रह्मचारी च पक्वान्नस्वामिनावुभौ ।
> तयोरन्नमदत्त्वा तु भुक्त्वा चान्द्रायणं चरेदिति ॥

शास्त्रार्थविदां गृहमेधिनामग्रतो यतिर्भुङ्क्ते मधुहेव स यथा मक्षिकाणां स्वोपार्जितमध्वभिलाषिणीनामग्रत एव मधु भुङ्क्ते तद्वत् ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

मधुकरशिक्षितमतिमुपदिशति।स्तोकमिति । मधुकरस्य विद्यमानां वृत्तिं समातिष्ठन् मुनिर्गृहात् व्रजेदित्यन्वयः ॥ ९ ॥

अणुत्वमहत्त्वे संख्ययोच्येते नत्वर्थतः सारं भगवज्ज्ञानजननीं भक्तिम् ॥ १० ॥

भिक्षितं भिक्षया लब्धमन्नं सायन्तनं सायन्तनार्थं श्वस्तनं श्वस्तनार्थं च न संगृह्णीत कथं तर्हि भोजनमत्राह । पाणीति । पाणिपात्रत्वेनोदरामत्रत्वेन वा भुञ्जान इति शेषः । संग्रहे को दोष इत्यत्राह । मक्षिका इति । तेन धनेन सह विनश्यति चोरादिनेति शेषः ॥ ११ ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

गजातिक्रमुपास्तमत्राह । पदेति । करिण्या अङ्गसङ्गतः स्पृशन् करीव बध्यते ॥ १३ ॥

एतदेव विवृणोति । नाधिगच्छेदिति ॥ १४ ॥

मधुघ्नोऽपि का बुद्धिरार्जितेति तत्राह । न देयमिति । लुब्धैर्दुःखेन संचितं न देयं दानयोग्यं नोपभोग्यं स्वस्योपयोग्यं च न तत् एवं वित्तमर्थविदन्यो भुङ्क्ते कथमिव मधुहा मकरन्दसंग्रही मधुवत् ॥ १५ ॥

किमनेनात्मनो लब्धमत्राह । सुदुःखेति । यतिर्निर्जितेन्द्रियग्रामः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अणुभ्यश्चेति । त्रिविधो मधुकृत् एको भ्रमरजातिः असङ्ग्रहित्वसंग्रहित्वभेदेन द्वयी च मक्षिकाजातिरिति पद्यत्रयेण क्रमादुदाहरणानि ज्ञेयानि ॥ १०–१५ ॥

सुदुःखेति । यथादिदेशगृह्यमधुमक्षिकासंग्रहीतृविषयकं वाक्यं कामयमानानां गृहमेधिनां वित्तैर्हेतुभिः सिद्धा गृहाशिषोऽन्नादीनर्थान् यतिरग्रतो भुङ्क्त ॥ १९–२० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

मधुकराच्छिक्षितमाह द्वाभ्याम् । मधुकरो यथा विशिष्टगन्धलोभेनैकस्मिन्नेव पद्मे वसन्नस्तसमये तस्मिन्मुकुलिते सति बध्यते एवं मुनिरपि गुणलोभेनैकमेव गृहमाश्रितस्तन्मोहेन बध्यते तस्मात् स्तोकं स्तोकमल्पमल्पं ग्रासं गृह्णन् अश्नीयात् यावता देहो वर्त्तेतेति ग्रासानामाधिक्यन्यूनत्वे निषिद्धे गृहात् गृहस्थान् अहिंसन् अपीडयन् ॥ ९ ॥

मधुकरात् सारग्राहित्वमपि धर्मं शिक्षेदित्याह । अणुभ्यश्चेति ॥ १० ॥

मधुकरोतीति मधुकरशब्देन मधुमक्षिकाप्युच्यत इति ततः शिक्षितमाह । सायमिदम्भोक्ष्ये श्व इदं भोक्ष्ये इति भिक्षितमन्नादि न सङ्गृह्णीतेति किं पुनर्ह्यस्तनं पौर्वमासिकं पौर्ववार्षिकं वेति भावः । अत्र सायं श्वो वा भविष्यति यद्वस्तु दृश्यमन्नादि तस्याप्यसंग्रहो न सम्भवेदतः सायन्तनं श्वस्तनं वा निमन्त्रणं न संगृह्णीयादिति केचिदाहुः केन पात्रेण गृहे गृहे भिक्षां कुर्यादित्यत आह । पाणिपात्र इति । सर्वतो भिक्षितग्रासानानीय कुत्र स्थापयेदित्यत आह । उदरामत्र इति । उदरमेवामत्रं भिक्षानिधानभाण्डं यस्य स च सः ॥ ११ ॥

संग्रहे कृते सति किं भवेदित्याह । सायन्तनमिति ॥ १२ ॥

स्पर्शासक्तिर्नाशहेतुरिति गजाच्छिक्षितमित्याह द्वाभ्याम् । पदा पादेनापि दारवीं दारुमयीमपि गजो हि करिणीं प्रदर्श्य तृणादिपिहितगर्त्ते निपात्य बध्यते ॥ १३ ॥

इयं ममैव भोग्येति स्त्रियं नाधिगच्छेत् न विश्वस्तः स्यात् यतस्तयानीतैर्बलाधिकैर्जारैः स किल हन्येत ॥ १४ ॥

त्यागभोगहीनो धनसञ्चयः परगामी भवतीत्यत्र मधुहा मे गुरुरित्याह । न देयमिति । तदन्यो बली भुङ्क्ते तेनापि सञ्चितमन्यः तदप्यन्यः मधुहा मक्षिकाभिः सञ्चितं मधु यथा भुङ्क्ते तद्वत् ननु गुप्तं धनं कथमन्यो ज्ञात्वा हरेदित्यत आह अर्थविद् वित्तैरर्थं तदुपायं च वेत्तीत्यर्थवित् यथा मधुहा तरुकोटरादिगतमपि मधुमक्षिकानुगमनेन वेत्ति ॥ १५ ॥

स्वोद्यमं विनापि भोगः सम्भवेदित्यत्रापि स एव गुरुरित्याह । सुदुःखेति । आशासानामिति वक्तव्ये वर्णलोप आर्षः—

यतिश्च ब्रह्मचारी च पक्वान्नस्वामिनावुभौ ।

तयोरन्नमदत्त्वा तु भुक्त्वा चान्द्रायणं चरेदिति ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

मधुकृन्वाति पुष्पादाच्छिद्य गृह्णातीति मधुकृत्स द्विविधः भ्रमरः मधुमक्षिकालक्षणश्च तत्राद्याच्छिक्षितमाह । स्तोकमिति द्वाभ्याम् ॥ ९—१० ॥

द्वितीयाच्छिक्षितमाह । सायन्तनमिति द्वाभ्याम् । इदं सायं भोक्ष्यामीदं श्वः भोक्ष्यामीति भिक्षितमन्नादि न संगृह्णीत किन्तु पाणिपात्रोदरामत्रो भवेत् पाणिरेव भिक्षितान्नादिग्रहणपात्रं यस्य स चासौ उदरमेवामत्रं निधानपात्रं यस्य न भाण्डादि स तथा मक्षिकेव संग्रही तु न भवेत् ॥ ११ ॥

अन्यथात्वे दोषमाह । सायमिति ॥ १२ ॥

गजाच्छिक्षितमाह । पदापीति द्वाभ्याम् ॥ १३—१४ ॥

मधुघ्नः शिक्षितमाह । न देयमिति द्वाभ्याम् । लुब्धैर्दुःखेन सञ्चितमुपार्जितं धनं न पात्रे देयं भवति नच काले भोग्यं भवति अपितु अर्थवित् परधनतद्धरणप्रकारविदन्यो भुङ्क्ते तदप्यन्यः मधुहा व्याधः मक्षिकाभिः सञ्चितं मधु यथा भुङ्क्त तद्वत् ॥ १५ ॥

किञ्च आशासानानाम् कामयमानानां गृहाशिषः—

यतिश्च ब्रह्मचारी च पक्वान्नस्वामिनावुभौ ।

तयोरन्नमदत्त्वा तु भुक्त्वा चान्द्रायणं चरेदिति ॥

स्मृत्याज्ञया लब्धान् अन्नादीन् यतिः ब्रह्मचारी च भुङ्क्ते अग्रतः प्रथमतः परोपार्जितान्नादिना यतिः कालक्षेपं करोतीति भावः ॥ १६ ॥

भाषा टीका ।

भ्रमर की वृत्ति को धारण करने वाला मुनि जितने से देहका निर्वाह होवै उतनाही थोडा ग्रास ग्रहण करै किसी घरों मे जावै तौ भी किसी का मन दुखाकर भिक्षा न लेवै यह माधुकरी वृत्ति कही है ॥ ९ ॥

कुशल पुरुषों को चाहिये कि छोटे बडे सब शास्त्रों से सार को ग्रहण करै जैसे कि भौंरा पुष्पों से रसमात्र को लेता है पुष्पों को नहीं तोडता है ॥ १० ॥

भिक्षु पुरुष सवेरे से संध्या के वास्ते संध्या से सवेरे के वास्ते भिक्षा को नहीं रखे भिक्षा भोजन मागने को हाथही को पात्र

ग्राम्यगीतं न शृणुयाद्यतिर्वनचरः क्वचित् ।
शिक्षेत हरिणाद्बद्धान् मृगयोर्गीतमोहितात् ॥ १७ ॥
नृत्यवादित्रगीतानि जुषन् ग्राम्याणि योषिताम् ।
आसां क्रीडनको वश्य ऋष्यशृङ्गो मृगीसुतः ॥ १८ ॥
जिह्वयाऽतिप्रमाथिन्या जनो रसविमोहितः ।
मृत्युमृच्छत्यसद्बुद्धिर्मीनस्तु बडिशैर्यथा ॥ १९ ॥
इन्द्रियाणि जयन्त्याशु निराहारा मनीषिणः ।
वर्जयित्वा तु रसनं तन्निरन्नस्य वर्धते ॥ २० ॥
तावज्जितेन्द्रियो न स्याद्विजितान्येन्द्रियः पुमान् ।
न जयेद्रसनं यावज्जितं सर्वं जिते रसे ॥ २१ ॥
पिङ्गला नाम वेश्याऽऽसीद्विदेहनगरे पुरा ।
तस्या मे शिक्षितं किञ्चिन्निबोध नृपनन्दन ! ॥ २२ ॥
सा स्वैरिण्येकदा कान्तं सङ्केत उपनेष्यती ।
अभूत्काले बहिर्द्वारि बिभ्रती रूपमुत्तमम् ॥ २३ ॥
मार्ग आगच्छतो वीक्ष्य पुरुषान् पुरुषर्षभ ! ।
तान् शुल्कदान् वित्तवतः कान्तान् मेनेऽर्थकामुका ॥ २४ ॥

भाषा टीका।

बनावै रखने का बरतन उदर को बनावै जैसी मक्षिका करती है वैसा रहै संग्रह नहीं करै ॥ ११ ॥

सवेरे के या सांझ के भोजन को भिक्षु संग्रह करके न रखे यदि रखैगा तो मधु माखियों की नांई उस के साथही नष्ट हो जावैगा ॥ १२ ॥

त्यागी होकर लकडी की स्त्री की मूर्ति को पैरसे भी नहीं छूवै यदि छूवैगा तो जैसे जंगल मे हथिनी के संगसे हाथि बंध जाता है वैसे बंध जावैगा ॥ १३ ॥

ज्ञानी पुरुष अपने आत्मा के मृत्यु रूप स्त्री को कभी भी प्राप्त न होवै यदि ग्रहण करेगा तो विलिष्ट पुरुष उसको मारलेंगे जैसे एक हाथि को हथिनी के वास्ते बहुत हाथी मारते हैं तैसे ॥ १४ ॥

लोभी पुरुषों का दुःख से पैदा किया जो धन सो न देने को होता है न भोगने को होता है उस धनको कोइ दूसरा ही भोगता है जो कि उस के छिपाये हुये धनको भी जानने वाला है जैसे कि मधु मांखियों के छाता को टोडने वाला लेजाता है यह मधुहा का कार्य देखा है ॥ १५ ॥

बडे दुःखों से संसारी अपने घरके भोग के लिये जिस अन्नादि पदार्थ को रखते हैं गृहस्थों के पाहिले ही उस पदार्थ को सन्यासी यति पहिले ही भोगलेता है जैसे कि मधुहा मधु हरण करता है तैसे यह बात भी मधुहा से सीखी है ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

हरिणाच्छिक्षितमाह। ग्राम्येति। भगवद्गीतं तु शृणुयादेव मृगयोर्लुब्धकस्य ॥ १७ ॥

हरिणशब्दादेव हरिणीसुत ऋष्यशृङ्गोऽपि गुरुर्ज्ञातव्य इत्याह। नृत्येति। वश्यो बभूवेति शेषः ॥ १८ ॥

रसासक्तिर्नाशहेतुरिति मीनाच्छिक्षितमित्याह। जिह्वयेति। अतिप्रमाथिन्या मतिक्षोभिकया दुर्जयया ऋच्छति प्राप्नोति बडिशैरामिषक्लिप्तैर्लोहकण्टकैः ॥ १९ ॥

दुर्जयत्वमुपपादयति। इन्द्रियाणीति द्वाभ्याम्। अयं भावः यदाहारस्त्यज्यते तदान्येन्द्रियजयः केवलं भवति रसनेन्द्रियन्तु वर्धते यदि तु भुज्यते तर्हि पुनश्च रसासक्त्या सर्वेन्द्रियक्षोभः स्यात् अतो रसासक्तिं परित्यज्यौषधवद्भुञ्जीतेति प्राणवृत्त्यैव सन्तुष्येदित्यश्लोकमपि रसनस्यातिदुर्जयत्वज्ञापनायोक्तम् इति विशेषः ॥ २०-२१ ॥

पिङ्गलाया नैराश्यं शिक्षितमिति वक्तुं तदाख्यानमाह। पिङ्गलेत्यादिना। मे मया शिक्षितम् ॥ २२ ॥

स्वैरिणी कामचारिणी सङ्केते रतिस्थाने ॥ २३ ॥

तान्वित्तवतः सधनानतएव शुल्कदान्मूल्यदान् कान्तान् सुरताहीन् ॥ २४ ॥

श्रीराधारमणदासगोस्वामिभिर्विरचिता दीपिकादीपिनी टिप्पणी ।

विषयग्रामं सेवन्ते इति ग्राम्या विषयिणस्तेषां गीतं न शृणुयादिति विशेषणस्य व्यावर्त्तकत्वाद्भगवद्गीतं तु शृणुयादेवेति व्याख्यातं तदुक्तं पाद्मे "ब्राह्मणो वासुदेवाख्यां गायमानोऽनिशं परम् । हरेः सालोक्यमाप्नोति रुद्रगानाधिकं भवे"दिति ॥ १७ ॥

ग्राम्याणि इन्द्रियग्रामार्हाणि ॥ १८ ॥

मृत्युं संसारम् असती बहिर्मुखा बुद्धिर्यस्य स तथा ॥ १९ ॥

आश्विति उद्यमं विनैवेत्यर्थः । रसनन्तु वर्जयित्वेत्यन्वयः । ननु रसनेन्द्रियजयः कथं स्यादित्यपेक्षायां पद्यस्यार्थं भाव इति ॥ २० ॥

रसे जिते सति सर्वं जितमिति रसनेन्द्रियजयेन सर्वेन्द्रियजये योग्यत्वात् भूतवन्निर्देशः ॥ २१ ॥

तदाख्यानं पिङ्गलाख्यानं ज्ञानप्रकरणेऽप्यस्मिन् प्रसङ्गात् परमभक्तिमपि दर्शयति । पिङ्गलेति ॥ २२ ॥

उत्तमं रूपं बिभ्रती सती काले सन्ध्यायां बहिर्द्वारि स्थिताभूत् ॥ २३ ॥

हे पुरुषर्षभेति तस्याः दुराशाया माश्चर्यफलत्वाभिप्रायेण ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

हरिणाच्छिक्षणीयमाह।ग्राम्यगीतमिति।कश्चित्कदाचिदपि ग्राम्यगीतं न शृणुयात् मृगयोर्लुब्धकस्य गीतेन मोहिताद्धरिणाद्ग्राम्यगीतं न शृणुयादितीमां वृत्तिं शिक्षेत हरिणो हि मृगयोर्गीतमोहितस्तेन गृहीतो नश्यति तद्वद्यतिर्ग्राम्यगीतं श्रवणं नश्येदतस्तन्न शृणुयादित्यर्थः।ग्राम्येत्युक्तेर्भगवद्गीतं तु शृणुयादेवेत्यभिप्रायः ॥ १७ ॥

हरिणशब्देन हारिणीसुतऋष्यशृङ्गोऽपि विवक्षितः अत एव सोऽपि गुरुरित्यभिप्रेत्याह नृत्येति।मृगीसुतः ऋष्यशृङ्गः ग्रामे भवानि ग्राम्याणि योषितां नृत्यानि वादित्राणि मृदङ्गादिध्वनयस्तान् गीतानि च जुषन् सेवमानःपश्यन् शृण्वंश्चेति यावत् आसां योषितां क्रीडनकः क्रीडासाधनं वश्यश्चाभवदिति शेषः अतस्तानि न जुषेतेति भावः ॥ १८ ॥

रसनासक्तिर्नाशहेतुरितिमीनाच्छिक्षणीयमित्याह । जिह्वयेति-अतिप्रमाथिन्या दुर्जयया जिह्वया करणभूतया रसे तद्विषये विमोहितः अतएवासद्बुद्धिर्दुर्बुद्धिर्मृत्युमृच्छति प्राप्नोति यथामिषबुद्धिर्विमोहितो मीनो बाडिशैरामिषाङ्कितैर्लोहकण्टकैः विनश्यति तद्वत् ॥ १९ ॥

जिह्वायाः प्रमाथित्वमुपपादयति द्वाभ्याम् । इन्द्रियाणीति । मनीषिणः बुद्धिमन्तः इन्द्रियजयेच्छवः तावन्निराहारा इन्द्रियाणि वर्जयित्वा तु रसनं रसनेन्द्रियव्यतिरिक्तानीत्यर्थः । आशु जयन्ति रसनव्यतिरिक्तानीन्द्रियाणि निराहारमात्रेणैव जेतुं शक्यानि तेन तत्पाटवाद्रसनन्तु न तेन जेतुं शक्यं प्रत्युत निराहारेण रसनेन्द्रियस्यैवाप्यायनादिति भावः । तदाह तन्निरन्नस्य वर्द्धत इति तद्रसनं निरन्नस्य निराहारस्य वर्द्धते इति ॥ २० ॥

आस्तां रसनमजितमितराणि तु जितान्येवेत्यत आह । तावदिति । विजितान्यपानि रसनव्यतिरिक्तानीन्द्रियाणि येन तथाभूतोऽपि यावद्रसनं न जयस्तावज्जितेन्द्रियो न स्यादेव रसे रसनेन्द्रिये जिते सति तु सर्वमिन्द्रियं जितप्रायमेवेत्यर्थः ॥२१॥

पिङ्गलाया नैराश्यं शिक्षितमिति वक्तुं तदाख्यानमाचष्टे पिङ्गलेत्यादिना यावदध्यायसमाप्ति विदेहनगरे मिथिलापुरे तस्याः पिङ्गलातः मे मया शिक्षितं किञ्चिदस्ति तन्निबोध शृणु हे नृपनन्दन ! यदो ॥ २२ ॥

सेति । सा पिङ्गला स्वैरिणी संकेत इति कामचारिणी सङ्केते रतिस्थाने सङ्केतमिति पाठे अयं माद्यजन्तः संकेतितमिति यावत् उपनेष्यती'लक्षणहेत्वोः'इति शत्रन्तादुगिल्लक्षणो ङीप् उपनेतुमित्यर्थः । यद्वा एतावद्धनं यो दास्यति तेनैव संगमिष्यामीत्येवं विध संकेतमुपनेष्यती प्रापयतीति यावत् उत्तमं स्वलंकृतं रूपं बिभ्राणा काले स्वसंकेतकाले गृहद्वारि स्वगृहद्वारे अभूत्तस्थौ ॥ २३ ॥

मार्ग इति । हे पुरुषर्षभ ! तान् पुरुषान् वित्तवतः सधनानपि शुल्कदान् मूल्यदानपि न मेने नामन्यत तैः सह न रेम इत्यर्थः।कुतः यतः सार्थकामुका तैः प्रतिज्ञातार्थादप्यधिकवित्तकामुका ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हरिणाच्छ्रोत्रेन्द्रियजयो लभ्य इत्याह । ग्राम्येति । अहं वनचरो यतिर्ग्राम्याणां गीतं वचनं न शृणुयादितीममर्थं हरिणात् शिक्षे कीदृशात् मृगयोर्गीतमोहित्वेन बद्धात् ॥ १७ ॥

ग्राम्यगीतश्रवणे का हानिरिति तत्राह । नृत्येति । क्रीडनकान्धः क्रीडासाधनवदन्धः ॥ १८ ॥

मत्स्याज्जिह्वेन्द्रियजयप्रकारं कथयति । जिह्वयेति । असद्बुद्धिरतत्त्वज्ञः ॥ १९ ॥

रसजयो दुष्परिहर इत्युपपादयति । इन्द्रियाणीति । रसनं रसनेन्द्रियम् असौ रसना रस्ये स्वविषये वर्धते ॥ २० ॥

जिह्वेन्द्रियजय एवेन्द्रियजयो नान्य इत्याह । तावदिति । रसो रागः "रसो रागे विषे वीर्ये" इति यादवः ॥ २१ ॥

पिङ्गलाया वैराग्यमुपशिक्षितमिति वक्तुमुपक्रमते । पिङ्गलेति ॥ २२ ॥

सैकदा सङ्केते वित्तसमये कान्तमुपनेष्यती आत्मसमीपं प्रापयन्ती गृहद्वार्यभूदित्यन्वयः ॥ २३ ॥

मार्गे आगच्छतः पुरुषान्वीक्ष्य तान् पुरुषान् वित्तवतः शुल्कदान् कान्तान् मेने ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

रसे जिते सति सर्वं जितमिति तादृशस्य तस्य योग्यत्वात् भूतवन्निर्देशः ॥ २१ ॥

ज्ञानप्रकरणेऽप्यस्मिन् प्रसङ्गात्परमभक्तिमपि दर्शयति। पिङ्गलानामेति ॥ २२-३० ॥

आगतेष्वपयातेषु सा सङ्केतोपजीविनी ।
अप्यन्यो वित्तवान् कोऽपि मामुपैष्यति भूरिदः ॥ २५ ॥
एवं दुराशया ध्वस्तनिद्रा द्वार्यवलम्बती ।
निर्गच्छन्ती प्रविशती निशीथं समपद्यत ॥ २६ ॥
तस्या वित्ताशया शुष्यद्वक्त्राया दीनचेतसः ।
निर्वेदः परमो जज्ञे चिन्ताहेतुः सुखावहः ॥ २७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

प्राकृतगानमाधुर्यासक्तिरनर्थहेतुरिति हरिणाच्छिक्षितमाह । ग्राम्यगीतमिति । तेन भगवद्गीतं शृणुयादेव ॥ १७ ॥

ग्राम्यगीतासक्तेरुदाहरणमाह । नृत्येति ॥ १८ ॥

प्राकृतरसासक्तिरनर्थहेतुरिति मीनाच्छिक्षितमाह । जिह्वयेति· बडिशैरामिषाक्तैः ॥ १९ ॥

तदेवं रूपगन्धस्पर्शशब्दरसैः पञ्चभिर्विषयैः पतङ्गमधुकर-गजहरिणमीनाः पञ्च मोहिताः हताः तदुक्तम्—

पतङ्गमातङ्गकुरङ्गभृङ्गमीना हताः पञ्चभिरेव पञ्च ।
एकः प्रमादी स कथं न हन्यते यः सेवते पञ्चभिरेव पञ्चेति ॥

किन्त्वन्येन्द्रियाणां तृप्तिप्रदं रसनेन्द्रियमेवानर्थकारीत्यतस्तस्य जये प्रयत्नं कुर्वीतेत्याह । इन्द्रियाणीति द्वाभ्याम् । अयम्भावः यद्याहारस्त्यज्यते तर्ह्यन्येन्द्रियजयः केवलं भवति रसनेन्द्रियन्तु वर्द्धते यदि तु भुज्यते तर्हि पुनश्च रसासक्त्या सर्वेन्द्रियक्षोभः स्यात्तस्मात्तथा रसनेन्द्रियं जेतव्यं यथा तदनुवर्त्तीन्यन्यान्यपीन्द्रि-याणि जितानि स्युस्तादृशो रसनेन्द्रियस्य जयस्तु रसनयैव परिमितमहाप्रसादमात्रभोजनेन वा रसनावर्जितानिन्द्रियेण भग-वद्गुणनामकीर्त्तनरसास्वादाद्वा भवेत् यदुक्तम्—

रसवर्ज्जं रसोऽप्यस्य परं दृष्ट्वा निवर्त्तत इति ॥ २० ॥ २१ ॥

पिङ्गलाख्या वेश्यायाः शिक्षितमिति तदुपाख्यानमाह । पिङ्गलेति ॥२२॥

सङ्केते रतिस्थाने उपजेष्यती स्वसमीपमानेष्यन्ती आनेतु-मित्यर्थः ॥ २३ ॥

शुल्कदान् मूल्यं दत्वा सुरतग्राहिणः ॥ २४ ॥ २५ ॥

——

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हरिणाच्छिक्षितमाह । ग्राम्येति । मृगयोर्लुब्धकस्य ॥ १७ ॥

ग्राम्यगीतश्रवणेऽनर्थं दर्शयति । नृत्येति । वशः सन् क्रीडन-को बभूवेति शेषः ॥ १८ ॥

मीनाच्छिक्षितमाह । जिह्वयेति । अतिप्रमाथिन्या अलभ्यतो मनःक्षोभिकया बडिशैः आमिषादिलिप्तैर्लोहकण्टकैः ॥ १९ ॥

जिह्वायाः मनःक्षोभकत्वमुपपादयतीन्द्रियाणीति द्वाभ्याम् । ॥ २०—२१ ॥

पिङ्गलातः शिक्षितं वक्तुं तदाख्यानमाह । पिङ्गलेत्यादिना ॥२२॥ ॥ २३—२४—२५ ॥

——

भाषा टीका ।

वनमें रहने वाले यति को कामियों के भाषा के गीतों को नहीं सुनना चाहिये भगवान् के गीतों को तो सुनना चाहिये इस बात को व्याध के गीत सुनके मोहित हुवे बंधन में पड़े हरिण से सीखना चाहिये ॥ १७ ॥

ग्रामीण स्त्रियों के गीत बाजा नृत्य इनको सेवन नहीं करै इनके सेवन से मृगी सुत ऋष्य शृंग मुनि भी इन स्त्रियों के वश होगये ॥ १८ ॥

मनको बड़े मंथन करने वाली जीभके मारे मनुष्य रसों से मोहित होजाता है सो दुर्बुद्धि मृत्यु को प्राप्त होता है जैसे कि बंशी में खाने को मुख लगाने से मछली मरजाती है यह बात मछली से सिखी है ॥ १९ ॥

जो बुद्धिमान् पुरुष विषयों को भोग नहीं देते हैं सो इंद्रियों को जीत लेते हैं एक रसना जीभ इंद्रिय तो नहीं वश होती है वह तो आहार नहीं मिलने से और बढ़ती है ॥ २० ॥

जिस पुरुष ने सब इंद्रिय जीत भी लिये हों तौ भी जब तक रसना इंद्रिय को नहीं जीतता है तब तक जितें-द्रिय नहीं होसकेगा रसके जीतने से जानों सब ही जीत लिया ॥ २१ ॥

पूर्व काल में विदेह नगर मिथिला में एक पिंगलानाम की वेश्या थी हे नृपनंदन यदुजी ! उससे मैंने कुछ सीखा है तिस को आपश्रवण करो ॥ २२ ॥

वह व्यभिचारिणी एक दिन अपने मैथुन स्थान में कोई पुरुषों को लेजाने के वास्ते सुन्दर रूप बनाकर रात के वख़्त दरवाजे में खड़ी होरही थी ॥ २३ ॥

हे पुरुषश्रेष्ठ ! मार्ग में आते हुवे पुरुषों को जिसको देखे तिसको धन देने वाला होगा धनी होगा इस प्रकार से धन की कामना से यह मेरा पति होजावै ऐसे आशा करती रही ॥ २४ ॥

——

श्रीधरस्वामिकृतभावार्थदीपिका ।

अपिः सम्भावनायाम् अन्योऽपि मामुपैष्यत्येवं दुराशयेत्यु-त्तरेणान्वयः ॥ २५ ॥

द्वारेऽवलम्बमाना पुनः प्रविशती पुनर्निर्गच्छन्ती एवं कुर्वती निशीथमर्धरात्रं प्राप ॥ २६ ॥

तस्या निर्विण्णचित्ताया गीतं शृणु यथा मम ।
निर्वेद आशापाशानां पुरुषस्य यथा ह्यसिः ॥ २८ ॥
नह्यङ्गाजातनिर्वेदो देहबन्धं जिहासति ।
यथा विज्ञानरहितो मनुजो ममतां नृप ! ॥ २९ ॥

पिङ्गलोवाच ॥

अहो मे मोहविततिं पश्यताविजितात्मनः ।
या कान्तादसतः कामं कामये येन बालिशा ॥ ३० ॥
सन्तं समीपे रमणं रतिप्रदं वित्तप्रदं नित्यमिमं विहाय ।
अकामदं दुःखभयाधिशोकमोहप्रदं तुच्छमहं भजेऽज्ञा ॥ ३१ ॥
अहो मयाऽऽत्मा परितापितो वृथा साङ्केत्यवृत्त्याऽतिविगर्ह्यवार्तया ।
स्त्रैणान्नराद्यार्थतृषोऽनुशोच्यात् क्रीतेन वित्तं रतिमात्मनेच्छती ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

निर्वेदोऽलम्बुद्धिः चित्ताचिन्तैव हेतुर्यस्य सः ॥ २७ ॥

यथा यथावत् मम मत्तः शृणु ननु किंनिर्विण्णाया गीतश्रवणेन तत्राऽऽह हि यस्मात्पुरुषस्याऽऽशापाशानां निर्वेदोऽसिर्यथा तथा छेत्ता ॥ २८ ॥

तत्र हेतुः । नहीति । अङ्ग हेराजन् ! ॥ २९ ॥

अविजितात्मत्वे हेतुः याऽहं बालिशा विवेकशून्या कुतः येन कारणेनासतस्तुच्छान्नरात्कामं कामये ॥ ३० ॥

बालिशत्वं प्रपञ्चयति । सन्तमिति चतुर्भिः । समीपे सन्तमन्तर्यामित्वात् इममपरोक्षमीश्वरम् ॥ ३१ ॥

अतिविगर्ह्याऽतिनिन्द्या या वार्ता जीविका तया कुतः सांकेत्येन या वृत्तिस्तया बहुव्रीहिणा स्वविशेषणं वा परितापं प्रपञ्चयति । स्त्रैणादिति । स्त्रीलम्पटादत एवार्थतृषो लुब्धादत एवानुशोच्यान्नराद्याऽहं वित्तं रतिं चेच्छती मया वृथाऽऽत्मा परितापितः केन वित्तमिच्छती तेन नरेण क्रीतेन स्वयं विक्रीतेनाऽऽत्मना देहेन ॥ ३२ ॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

आगतेष्विति युग्मकम् एवं कुर्वतीति व्याख्यानान्निर्गच्छन्ती प्रविशतीति शत्रन्त एव पाठः ॥ २५ ॥ २६ ॥

अलं बुद्धिः स्वावज्ञया विषयेषु हेयत्वबुद्धिः परम इति लौकिकनिर्वेदव्यावृत्तिः तत्र हेतुः सुखावह इति सुखं श्रीकृष्णविषयकानुरागजानन्दम् आवहति प्रापयतीति तथा चित्तचिन्तैव हेतुर्यस्येत्यापाततोऽर्थमेव तस्य पूर्वसंस्कारहेतुकत्वात् ॥ २७ ॥

तस्या इत्यस्यैकं तस्या इति सम्बन्धसामान्यविवक्षया षष्ठी तयेत्यर्थः आशापाशानामिति 'अविद्याऽस्मितारागद्वेषाभिनिवेशाः' इत्यत्र रागशब्दोक्ता या आशास्ता एव पाशाः पाशवद्बन्धकास्तेषां निर्वेदोऽसिरिति धर्मलुप्ता तत्र हेतुत्वे ॥ २८ ॥ २९ ॥

याहं बालिशा तस्या अविजितात्मनो मे मोहविततिं यूयं पश्यत येन बालिशत्वेन हेतुनाऽसतः कान्तादहं कामं कामये इत्यन्वयः ॥ ३० ॥

श्रीदत्तात्रेयकृपादृष्टिप्रभावेण झटिति पूर्वसंस्कारोदयादेतादृशं तद्वाक्यं सन्तमित्यादि । अन्तर्यामित्वात् समीप एव सन्तं न तु दूरगं तत्रापि परमसुन्दरत्वेन रमणं प्रेष्ठं तत्रापि रतिसुखदं सैरिन्ध्र्यादिष्विव भूषणादिवित्तप्रदश्च तत्रापि नित्यमकालकलितं तत्रापि मम परोक्षं स्वयं प्रकाशत्वान्नतु परोक्षं तथाभूतमीश्वरं विहाय अकामदं यथार्थसुखाप्रदं प्रत्युत दुःखादिप्रदं तत्र हेतुस्तुच्छं तादृशमज्ञाहं भज इति बालिशत्वप्रपञ्चः ॥३१॥

साङ्केत्येन सङ्केतीकृतेन रतिसुखेन वा वृत्तिर्वर्त्तनं तया हेतुना या विनिन्द्या जीविका तयेति व्यधिकरणे तृतीयेति बहुव्रीहिणेति अतिविगर्ह्या वार्त्ता जीविका यस्यास्तया मयेति सामानाधिकरण्यभूतेन नरेण मूल्यं नीतेन स्वयं विक्रीतेन मूल्यं वित्तादिकं गृहीत्वा दत्तेन ॥ ३२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

अर्थतृषः अर्थतृष्णायुक्तात् वित्तं रतिसुखहेतुं वित्तम् ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इत्थमागतेषु सर्वेषु पुरुषेष्वपयातेषु प्रत्याख्यानाद्गतेषु तत्सु सा पिङ्गला सङ्केतोपजीविका सङ्केतेनैव उपजीवतीति तथा हेतुगर्भमिदमतः अपिः सम्भावनायां भूरिददातीति तथा स्वसङ्के-

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

तानुरूपवित्तदः कोऽपि पूर्वं सङ्केतितः तदन्यो वा कश्चिन्मामुपैष्यति ॥ २५ ॥

इत्येवं विधः दुष्ट आशयोऽभिप्रायः तेन ध्वस्ता निद्रा यस्याः सा द्वार्यवलम्बमाना पुनः पुनः प्रविशती निर्गच्छन्ती च निशीथमर्धरात्रं प्राप ॥ २६ ॥

तस्या इति । शुष्यद्वक्रं वदनं यस्या दीनमभास्वरं चेतो यस्याः तस्याः पिङ्गलायाः परमः सुखावहश्चिन्ताहेतुर्वक्ष्यमाणविचारहेतुश्च निर्वेदः परितापो जज्ञे जातः यद्वा चिन्ताऽर्थचिन्ता हेतुर्यस्य सः ॥२७ ॥

तदेति।तदा निर्वेददशायां निर्विण्णचित्ताथास्तस्या गीतं यथावत् मम मत्तः शृणु ननु निर्विण्णचित्तायाः किंगीतमवगमेत्यत आह। निर्वेद इति । हि यस्मात्पुरुषस्याशापाशानां निर्वेदो यथासिः खड्गस्तथा खड्गवच्छेदनसाधनमित्यर्थः ॥ २८ ॥

एतदेव हि व्यतिरेकमुखेनोपपादयति । नहीति । अङ्ग हे यदो ! न जातो निर्वेदो यस्य सः देहशब्दस्तदनुबन्धिनामप्युपलक्षणार्थः देहबन्धं देहतदनुबन्धिष्वनुबन्धमाशाम ॥ २९ ॥

तर्हि तद्गीतं भावयेत्यत आह । अहो इति । अविजित आत्मा मनो यया तस्याः हेतुगर्भमिदं मे मम मोहविततिं मोहविस्तारं तामेव दर्शयितुमात्मानं विशिनष्टि।येति ।याहं येन मोहेनासतस्तुच्छात्कामं कामयेऽतोऽहं बालिशा विवेकशून्या ॥ ३० ॥

बालिशत्वं प्रपञ्चयति । सन्तमिति चतुर्भिः । समीपे हृदय एव सन्तं वसन्तं तथाप्यपुरुषार्थतां व्युदस्यति रमणमिति।रमणं कान्तं निरतिशयप्रीतिविषयमित्यर्थः । तस्यैवेच्छाविषयत्वात् ननूदितायां हि तद्विषयप्रीतौ तस्य तद्विषयत्वं सैव तु कुत इत्यतो विशिनष्टि रतिप्रदमिति । रतिरनुरागः प्रीतिरिति यावत्तं प्रयच्छतीति तथा तं स्वविषयप्रीत्यावहमित्यर्थः । नन्वर्थकामाद्यभिलाषिण्याः किं तद्विषयप्रीत्येत्याशङ्क्य विशिनष्टि । वित्तप्रदमिति । वित्तशब्दः कामादेरप्युपलक्षकः अर्थिनां धर्मादिपुरुषार्थचतुष्टयप्रदमित्यर्थः । नित्यमुक्तविधत्वेन यावदात्मानुबन्धिनममुं भगवन्तं विहाय तद्विपरीतं तुच्छं नरमहं भजे भजामि वैपरीत्यं व्यञ्जयितुं विशिनष्टि । अकामदमिति । कामशब्दो धर्मादीनामुपलक्षकः प्रत्युत दुःखभयादिप्रदम् आधिर्मानसिकं दुःखम् इममिति पाठे भित्त्यां लिखितभगवत्प्रतिमादर्शनकृतसन्निहितनिर्देशः ॥ ३१ ॥

अहो इति।अतिविगर्ह्या वार्त्ता देहधारणात्मिका यतः तथा सांकेत्यते वा वृत्तिस्तया वृत्त्या वृथा व्यर्थमात्मा मनः देहो वा परितापितः परितापं प्रापितः परितापं प्रपञ्चयति।स्त्रैणादिति।स्त्रीलम्पटादर्थतृपः अर्थतृष्णायुक्तादतएवानुशोच्यान्नराद्याहं रतिं वित्तं च क्रीतेन तेन नरेण क्रीतेनात्मना देहेनेच्छती कामयमाना आसमिति शेषः ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अस्मादन्यो भूरिदो बहुद्रव्यप्रदः स्यादिति मत्वा ॥२५—२६॥

वित्ताशया वित्तातितृष्णया चिन्तायाश्छेदने हेतिः शस्त्रम् ॥२७॥

यथा गीतं तथा मम सकाशाच्छृणु श्रोतव्यत्वे हेतुमाह । निर्वेद इति । यथा निशितोऽसिः पाशानां छेदने हेतुर्विहितः तथा निर्वेदस्तृष्णालक्षणपाशानां हि यस्मात्तस्मात् ॥ २८ ॥

अत्रापि हेत्वन्तरमाह । नहीति ॥ २९ ॥

विततिर्विस्तारः बालिशा येन तस्मात् ॥ ३० ॥

कथं बालिशेत्यत्राह । सन्तमिति । नित्यमविनाशिनम् ॥३१॥

आत्मा मनः अतिगर्ह्या वार्ता किंवदन्ती यस्याः सा तथा तया संकेतस्य भावः सांकेत्यं द्रव्यं तेन वृत्तिराजीविका तया यथाहं वित्तमुद्दिश्य आत्मना देहेन अर्थतृषा विषयतृष्णया मनुशोच्यान् स्त्रैणान्नरान् क्रीत्वा रतिमिच्छन्त्यासं तथेति शेषः ॥ ३२॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

निर्वेदेन झटिति पूर्वोक्तसंस्कारोदयाच्छ्रीदत्तात्रेयकृपाप्रभावेण तादृशस्फूर्त्या सन्तं समीप इत्यादिचोक्तं रतिप्रदं प्रीतिविशेषस्य च दातारं सैरिन्ध्र्यादिभ्य इव वित्तप्रदं सर्वकामप्रदं च ॥ ३१—३४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

निशीथमर्द्धरात्रं प्राप ॥ २६ ॥

वित्तचिन्तैव हेतुर्यस्य सः ॥ २७ ॥

यथा मम यथावन्मत्तः आशा एव संसारबन्धस्य पाशाः इषुस्तासां छेदने निर्वेद एव असिर्भवेत् ॥ २८ ॥

तस्यावश्योपादेयत्वमाह । नहीति ॥ २९ ॥

कामं कन्दर्पं कामये येन कामेन हेतुना अहं बालिशा मूढा ॥ ३० ॥

समीपे ममान्तर्हृदये एव सन्तं रमणमिति इममेव कथमहं न रमयामीति भावः । रतिप्रदमिति अयमेव कथं मां न रमयतु किमन्येन पापिष्ठपुरुषेणेति भावः । वित्तप्रदमिति मह्यं रतितुष्टोऽयं वित्तमपि प्रचुरं दास्यत्येवेति भावः । अकामदं कामपूर्त्तिं दातुमसमर्थं भगवत्येतादृशी मतिरस्यास्तदा तस्यां रजन्यां तदङ्गणे यदृच्छयागतशयितस्य श्रीदत्तात्रेयस्य कृपाभरादभूदिति प्राञ्चः ॥ ३१ ॥

या अहं क्रीतेन विक्रीतेनात्मना स्त्रैणेन स्त्रैणात् स्त्रीलम्पटान्नरात् वित्तं रतिञ्च इच्छन्ती अभूवं यद्वा नरेण क्रीतो य आत्मा मद्देहस्तेन ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

निशीथमर्धरात्रं प्राप ॥ २६ ॥ २७ ॥

यथा पुरुषस्य बन्धनानां भेदकोऽसिस्तथाशापाशानां भेदकं निर्वेदकारणं तस्याः गीतं यथावत् मत्तः शृणु ॥ २८ ॥ २९ ॥

बालिशा विवेकशून्या ॥ ३० ॥

बालिशत्वमेवाह । सन्तमिति चतुर्भिः । समीपे सन्तमन्तर्यामिणम् इमं बुद्धिप्रेरकत्वादिना ज्ञातम् ॥ ३१ ॥

यदस्थिभिर्निर्मितवंशवंश्यस्थूणं त्वचा रोमनखैः पिनद्धम् ।
क्षरन्नवद्वारमगारमेतद्विण्मूत्रपूर्णं मदुपैति काऽन्या ॥ ३३ ॥
विदेहानां पुरे ह्यस्मिन्नहमेकैव मूढधीः ।
याऽन्यमिच्छन्त्यसत्यस्मादात्मदात्काममच्युतात् ॥ ३४ ॥
सुहृत्प्रेष्ठतमो नाथ आत्मा चायं शरीरिणाम् ।
तं विक्रीयाऽऽत्मनैवाहं रमेऽनेन यथा रमा ॥ ३५ ॥
कियत्प्रियन्ते व्यभजन् कामा ये कामदा नराः ।
आद्यन्तवन्तो भार्याया देवा वा कालविद्रुताः ॥ ३६ ॥
नूनं मे भगवान् प्रीतो विष्णुः केनापि कर्मणा ।
निर्वेदोऽयं दुराशाया यन्मे जातः सुखावहः ॥ ३७ ॥
मैवं स्युर्मन्दभाग्यायाः क्लेशा निर्वेदहेतवः ।
येनानुबन्धं निर्हृत्य पुरुषः शममृच्छति ॥ ३८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अहो मया वृथैवात्मा देहः परितापितः कथं भूतया सङ्केते गतिस्थाने भवा साङ्केत्या वृत्तिर्वर्तनं यस्यास्तया अत एवातिविगर्ह्यां वार्तां वृत्तिर्यस्यास्तया याहमर्थतृषः कामलुब्धात् स्त्रीलम्पटात् अत एवानुशोच्यात् निन्द्यतयानुचिन्त्यात् वित्तं रतिमिन्द्रियप्रीतिं च तेन स्त्रैणेन क्रीतेन स्वयं विक्रीतेनात्मना देहेनेच्छती ॥ ३२ ॥

———

भाषा टीका ।

पुरुषों के संकेत से जीविका करने वाली वह पिंगला जाने आने वाले पुरुषों को देखकर इससे दूसरा कोई हम को बहुत धन देने वाला आवैगा तौ भला होगा ऐसे विचारती थी ॥ २५ ॥

ऐसी खोटी आशा में उसकी निद्रा मारी गई दरवाजे में ही रह गई कभी भीतर आवे कभी वाहिर आवे ऐसी ही आधीरात उसको वीत गई ॥ २६ ॥

उसके धन की आशा से मुख सूख गया मन उसका दुखी होगया तब चिन्ता के होने से पीछे को सुख देने वाला परम वैराग्य उत्पन्न हुआ ॥ २७ ॥

वैराग्य चित्त होने वाली उस वेश्या का जैसा गीत है सो मेरे से आप सुनो क्योंकि निर्वेद जो है सो पुरुषों के आशा रूपी पाशों के काटने को तरवार सरीखा होता है ॥ २८ ॥

हे नृप ! जो विज्ञान रहित पुरुष है सो ममता को नहीं छोडता है इसी से बिना निर्वेद के भये देह बंधन को छोडना नहीं चाहता है ॥ २९ ॥

पिङ्गला उवाच ।

अहो मै बडी अजितेन्द्रिय हूं मेरे मोहके विस्तार को देखो जिस मैं मूर्खा ने उसी मोहके वस होकर असत्कांत से धन तथा सुख की कामना करी है ॥ ३० ॥

जो सदा काल पास में रहने वाले रति के देने वाले धन देने वाले इन नित्य रमण परमात्मा को छोडकर किसी कामना को नहीं देने वाले दुःख भय शोक आधि मनकी चिन्ता मोह इनके देने वाले तुच्छ संसारी मनुष्य को मैं सेवती हूं सो मैं बडी अज्ञानिनी हूं ॥ ३१ ॥

अहो मैने आज तक अपने शरीर मन को व्यर्थ ही संतापितहूं किया संकेत वृत्ति से अति खोटी मैथुन की वात से रही अर्थ की तृष्णा वाला शोचने योग्य स्त्री लंपट ऐसे पुरुष को अपने शरीर को वेचकर मैने रति की इच्छा करी है और धन की चाहना करी है सो मै वडी मंद भागिनी हूं ॥ ३२ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

अहो धिङ्मां याहमतिबीभत्सितं भजामीत्याह । यदिति । वंशो नाम स्थूणासु निहितस्तिर्यक् वेणुः वंश्यास्तस्मिन्नुभयतो निहिता वेणवः अस्थिभिरेव निर्मिता वंशादयो यस्मिन् तत् तत्र पृष्ठे दीर्घमस्थि यत् स वंशः पार्श्वास्थीनि वंश्यानि स्थूणा हस्तपादास्थीनि तथा त्वचा रोमभिर्नखैश्च पिनद्धं छादितं तथापि क्षरन्ति नव द्वाराणि यस्मिन् तत् एवम्भूतागाररूपं नरशरीरमेतत् मत्तोऽन्या का वा कान्तबुद्ध्या उपैति सेवते ॥ ३३ ॥

सत्सङ्गतौ सत्यामप्यहो मम मोह इत्याह । विदेहानामिति । याहमसती अच्युतादन्यं कामं भोगमिच्छती सा ॥ ३४ ॥

तेनोपकृतमादाय शिरसा ग्राम्यसङ्गताः ।
त्यक्त्वा दुराशाः शरणं व्रजामि तमधीश्वरम् ॥ ३९ ॥
सन्तुष्टा श्रद्दधत्येतद्यथा लाभेन जीवती ।
विहराम्यमुनैवाहमात्मना रमणेन वै ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सा एवं निर्विण्णा सती अतःपरमेवं करिष्यामीत्याह । सुहृदिति । अयमीश्वरः आत्मनैव आत्मानमेव निवेद्य तं विक्रीय विशेषेण क्रीत्वा अनेनैव सह रमे रमा लक्ष्मीर्यथा ॥ ३५ ॥

अन्यस्यासेव्यत्वं दर्शयति । कियदिति । आद्यन्तवन्तो ये कामा विषयाः कामदा नरा वा देवा वा कालकलिता भार्यायाः कियत् प्रियं कृतवन्तो न किञ्चित् अतो नेहामुत्र च तद्व्यतिरिक्तः कोऽपि सेव्योऽस्तीत्यर्थः ॥ ३६ ॥

एवं निश्चित्य स्वभाग्यमभिनन्दति । नूनमिति । दुष्टा आशा यस्यास्तस्या मे ॥ ३७ ॥

ननु धनाप्राप्त्या क्लिष्टाऽसि कथं विष्णुः प्रीतस्तत्राह । मैवमिति । मन्दभाग्या चेदहं स्यां तर्ह्यत्र निर्वेदहेतवः क्लेशा न स्युरित्यर्थः । येन निर्वेदेनानुबन्धं गृहादिकं निहत्य परित्यज्य ॥ ३८ ॥

अतस्तेन श्रीविष्णुनोपकृतं कृतमुपकारं निर्वेदलक्षणम् ग्राम्येषु नरेषु विषयेषु वा सङ्गताः ॥ ३९ ॥

कथं व्रजसि तदाह । सन्तुष्टेति ॥ ४० ॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

अतिबीभत्सितमतिकुत्सितं बध कुत्सायामित्यस्य रूपं तत्र देहपक्षे त्वगादिभिरुपपादितं स्थानीयैः ॥ ३३ ॥

अस्मादिति स्फूर्त्या साक्षादिव निर्देशः अच्युतात् स्वभक्तस्यापि कालभयनिवारकात् तदुक्तं पाद्मे "न च्यवन्ते तु यद्भक्ता महत्यां प्रलयापदि । अतोऽच्युतोऽखिले लोके विष्णुरेव न संशय इति ॥ ३४ ॥

आत्मनैव मूल्यभूतेन तथा चात्मानमेव निवेद्येति व्याख्यातं तमीश्वरं विक्रीय विशेषतः क्रीत्वा मूल्यं नीत्वेत्यर्थः । "अहं भक्तपराधीनः वशे कुर्वन्ति मां भक्त्या भक्तिवशः पुरुष" इत्यादि स्मृतिश्रुतेः ॥ ३५ ॥

अनेनैवेत्यवधारणोक्तमन्यस्याऽसेव्यत्वमभजनीयत्वम् अतो देवादीनां कालग्रस्तत्वेन प्रियं कर्तुमशक्यत्वात् ॥ ३६ ॥

एवमन्यस्यासेव्यत्वकथनेनेश्वरस्यैव सेव्यत्वं निश्चित्य केनापि सत्यसङ्कल्पलक्षणेन तत्र हेतुः यद्यस्मात् ॥ ३७ ॥

मन्दभाग्या चेदहं स्यामित्याशीकार्थत्वादित्यर्थं इत्युक्तं श्रमं बुद्धेर्मनवाप्तिष्ठाम् ॥ ३८ ॥

अतो विष्णोः प्रीतत्वात् तं कृतोपकारम् ॥ ३९ ॥

एतदुपकरणं श्रद्दधती विश्वसती आत्मना परमप्रेष्ठेन रमणेन कान्तेन ॥ ४० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

मत् मत्तोऽन्या अगारमिति पुरुषशरीरं विवक्षितम् अत्र वंशधारणक्षमे वंशवंश्ये स्थूणा च अस्थिभिर्निर्मिते यस्य तत् अस्थिनिर्मितवंशवंश्यस्थूणम् अस्थीन्येव वंश्ये स्थूणाचेत्यर्थः ॥ ३३—३४ ॥

अस्मात् स्वकान्तात् विक्रीय विशेषात्तं क्रीत्वा ॥ ३५ ॥
भार्याया इतिपञ्चमी ॥ ३६—३८ ॥
उपकृतमुपकारः उपकृतं निर्वेदः ग्राम्यसङ्गताः ग्राम्यविषयगोचरा दुराशाः ॥ ३९—४४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अहो धिङ्मां यतोऽतिजुगुप्सितं भजामीत्याह । यदिति । स्थूणाः स्तम्भा वंशो नाम स्थूणासु निहितस्तिर्यग्वेणुः वंश्यास्तास्मिन्नुभयतो निहिता वेणवः अस्थिभिरेव निर्मिता वंशादयो यस्मिन् तत्र यत्पृष्ठे दीर्घमस्थि स वंशः पार्श्वास्थीनि वंश्याः स्थूणाः पाणिपादास्थीनि इति विवेकः त्वचा चर्मणा लोमभिर्नखैश्च पिनद्धं छादितं तथा क्षरन्ति नव द्वाराणि यस्मिंस्तदेवं भूतागाररूपं विण्मूत्रपूर्णमेतन्नरशरीरं मन्मत्तोऽन्या का वा स्त्री कान्तबुद्ध्या उपैति प्राप्नोति भजते इति ॥ ३३ ॥

यत एवमतोऽहमेवास्मिन्पुरे ऽस्त्रीत्याह । विदेहानामिति । मैथिलानां पुरेऽहमेकैव मूढधीरसती व्यक्तं नूनं तत्र हेतुत्वेनात्मानं विशिनष्टि । याहमात्मदादात्मपर्यन्तवदान्यादच्युतादन्यं कान्त मिच्छती अत एवासती दुष्टा ॥ ३४ ॥

इत्थं निर्विद्यात्महितं निश्चिनोति सुहृदित्यादिभिरष्टभिः अयमच्युतः शरीरिणामात्मातएव प्रेष्ठतमः अतिप्रियतमः आत्मा हि निरतिशयप्रियः सुहृद्धितैषी हितकृदित्यर्थः । नाथो नायकश्च अतस्तमेवात्मानमच्युतमात्मना विक्रीयात्मसमर्पणेन स्ववशीकृत्य तेनाच्युतेन रमे यथा रमा लक्ष्मीस्तद्वत् ॥ ३५ ॥

अन्येषामसेव्यत्वं दर्शयति । कियदिति । आद्यन्तवन्तो ये कामाः काम्यन्त इति कामा विषयाः कामदाः नराः देवा वा कालविद्रुताः कालेनोपद्रुतास्ते भजिष्यमाणा भार्यायाः कियत्प्रियं व्यभजन् कृतवन्तो न किञ्चिदतः इहामुत्र च तद्व्यतिरिक्तः कोऽपि सेव्यो नास्तीत्यर्थः ॥ ३६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

आत्मनस्तदनुग्रहविषयतां सम्भावयति । नूनमिति । केनापि कर्मणाऽज्ञातसुकृतविशेषेण मे मह्यं भगवान् विष्णुर्नून प्रीतः कुतः यद्यस्मात् दुराशाया मे ममायं सुखावहो निर्वेदो जातः तत्प्रसादमन्तरेणेदृशो निर्वेदो दुर्लभ इति भावः ॥ ३७ ॥

तदेवाह । मैवामिति । एवमेवं सति भगवति प्रीते सतीत्यर्थः मन्दभाग्याया मम निर्वेदस्य हेतवः क्लेशाः मास्युर्न स्युरित्यर्थः किं निर्वेदमात्रेणेत्यतस्तं विशिनष्टि । येन निर्वेदनानुबन्धं देहगेहादिष्वहंममाभिमानरूपं पाशं निर्हृत्य परिहृत्य पुरुषः शमं शान्तिं मनःप्रसादमृच्छति प्राप्नोति ॥ ३८ ॥

यत एवमतस्तेन भगवतोपकृतं निर्वेदमिति शेषः तत्कृतोपकाररूपं निर्वेदमित्यर्थः । शिरसादाय धृत्वा ग्राम्यैः सह सङ्गतीस्ता दुराशाश्च त्यक्त्वा ग्राम्यसङ्गता इति पाठे ग्राम्यविषयगोचराः दुराशास्त्यक्त्वा तमेवाधीश्वरं भगवन्तं व्रजामि सेवे इत्यर्थः ॥ ३९ ॥

किञ्चैवं वर्तिष्ये इत्यभिसन्धत्ते । सन्तुष्टेति । श्रद्दधती श्रद्धां कुर्वती चिकीर्षितविषयत्वरायुक्ता सन्तुष्टा वित्ताद्यलाभप्रयुक्तासन्तोषरहिता यथालाभेन दैवाल्लब्धेन जीवन्त्यहमात्मना तेन रमणेन निरतिशयप्रियेणामुना भगवता सह विहरामि वै नूनम् ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यदर्थं ग्राम्यमाकाङ्क्षन्ते तदीदृशं हीत्याह । यदिति । त्वचा रोमनखैरित्येकं पदं स्थूणाः स्तम्भाः मदन्या कीदृशी एतद्द्वाख्यमगारं गृहमुपैतीत्यन्वयः वंशाः दीर्घदारुविशेषाः वंश्या वंशप्रोतास्तिरश्चीनवेणवः चरन्ति स्रवन्ति नव द्वाराणि यस्य तत्तथा अनेनान्यकान्तानां हेयत्वमुक्तं भवति ॥ ३३ ॥

इतोऽपि हेया इति भावेनाह । विदेहानामिति । स्वस्मात्स्वकीयात् स्वस्वामिन इत्यर्थः । अतो जगतः अतोऽन्यस्माद्ब्रह्मादित्यर्थः। अ निषेधे पुमान् विष्णाविति यादवः यद्वाऽतोऽस्मात्सर्वमनोवृत्तिप्रेरकत्वेन प्रसिद्धात् ॥ ३४ ॥

योऽयं सुहृत्प्रेष्ठानां प्रेष्ठः नाथते ऐश्वर्येण वर्तत इति नाथः शरीरिणामात्मा नियन्ता च तमात्मना मनसैव विक्रीयानेनाच्युतेन सह इयं पिङ्गला सामान्या वेश्या न भवति किन्तु विशिष्टाप्सरःस्वेका अन्यथा अस्या नैतादृशी बुद्धिरुत्पद्येत तदुक्तम्—

> भगवद्भार्यतायोग्याः काश्चिदप्सरसः स्त्रियः ॥
> रमावेशात्कदाचित्स्युस्तास्वेका पिङ्गला भवेत् ।
> तदन्यासां महादोषो भगवद्भर्तृतास्मृताविति ॥

॥ ३५ ॥

लोकसिद्धकान्तत्यागे लोकविलक्षणकान्तस्वीकारे अल्पबुद्धिगोचरकाभावात्त्वमनवद्यत्वं च निमित्तमित्याह । कियदिति । ते नरा भार्याया मे कियत्प्रियं व्यभजन् विभजेयुरित्यन्वयः तर्हि देवाः कान्ताः सन्तीत्यत्राह । देवा इति ॥ ३६ ॥

विश्वबन्धायिविवर्जिमिनि भगवति प्रसन्ने किमसुखमिति भावेनाह । नूनमिति । नूनमिदानीम् ॥ ३७ ॥

समद्भूतप्रभूतभगवद्भक्तिसुधा पिङ्गला पुनः शब्दादिविषयनिमित्तक्लेशा माभूवन्निति प्रार्थयते । मैवामिति । येन निर्वेदन संसारबन्धं निर्हृत्य परिहृत्य शमं भगवन्निष्ठालक्षणं सच्चिदानन्दलक्षणं सर्वविलक्षणं ब्रह्म प्राप्नोतीत्यन्वयः । कुतो माभूवन्निति अतो वाह । येनेति । पुरुषोऽनुबन्धं भगवद्भक्तिं निर्हृत्य भस्म कृत्वा शमं शमलं सुखोपरमं नरकमृच्छतीति एतस्मादिति शेषः ॥ ३८॥

तन्निष्ठामाह । तेनेति । तेन हरिणा उपकृतमनुगृहीतं निर्वेदं शिरसादाय ग्राम्यसङ्गता दुराशाः त्यक्त्वा ॥ ३९ ॥

एतदत्यन्तं श्रद्दधती श्रद्दधाना ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

आत्मना मूल्यभूतेन विशेषतः क्रीत्वा ॥ ३५—४० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अहो अतिबीभत्सं विष्ठागृहमेवाहं शृङ्गाररसं स्वभोग्यमविदमित्याह । यदगारम् अस्थिभिरेव निर्मितो वंशो वंश्याः स्थूणाश्च यस्मिंस्तत् तत्र पृष्ठे दीर्घमस्थि यत् स वंशः पार्श्वास्थीनि वंश्यानि हस्तपादास्थीनि स्थूणाः मत् मत्तोऽन्या का उपैति ॥ ३३ ॥

या अहमसती अच्युतादस्मात् सतृष्णा आत्मप्रदादन्यं पुरुषं कामं भोगमिच्छन्ती याचमाना ॥ ३४ ॥

तर्हि किमतः परं चिकिर्षसीति चेदेवं करोमीत्याह । सुहृदिति । आत्मना स्वदेहेनानेन दत्तेन तं विशेषेण क्रीत्वा अहं प्राप्तेन तेन प्रेष्ठतमेन सह रमे ॥ ३५ ॥

ये कामा विषयाः ये कामदा वा नराः देवाः ते सर्वे आद्यन्तवन्तः कालेनैव विद्रुताः अतो भार्यायाः कियत् प्रियं व्यजजन् कृतवन्तः न किञ्चित् अत इहामुत्र च तद्व्यतिरिक्तः कोऽपि मया न सेव्य इति भावः ॥ ३६ ॥

एवं निश्चित्य स्वभाग्यमभिनन्दति । नूनमिति । केनापि । कर्मणेति भो विरक्तवर्द ! कृपया अद्य मदङ्गणमेव सफलीकुरु अत्रैवास्व शेस्व किञ्चिद्भुङ्क्ष्व पिब चेति यदृच्छयैवागतं श्रीदत्तात्रेयमुक्त्वा तत्स्थानसंस्कारमार्जनलेपादिकं सायं काले तया कृतमिति प्राञ्चः ॥ ३७ ॥

ननु धनाप्राप्त्या क्लिश्यसि कथन्ते विष्णुः प्रीतस्तत्राह । मैवामिति। मे यदि मे विष्णुर्न प्रीतस्तदा मन्दभाग्याया वेश्यायाः क्लेशा निर्वेदहेतवो न स्युः येन निर्वेदेन अनुबन्धं गृहादिकं निर्हृत्य परित्यज्य ॥ ३८ ॥

अतस्तेन विष्णुना उपकृतं कृतमुपकारमिमं निर्वेदलक्षणं शिरसा गृहीत्वा ग्राम्येषु विषयेषु सङ्गताप्यहम् ॥ ३९ ॥

शरणं गता सती कीदृशी बुभूषसीत्यत आह । सन्तुष्टेति । एतत् श्रद्दधती विश्वसती एतदेव किं तत्राह । विहरामीति ॥ ४० ॥

संसारकूपे पतितं विषयैर्मुषितेक्षणम् ।
ग्रस्तं कालाहिनाऽऽत्मानं कोऽन्यस्त्रातुमधीश्वरः ॥ ४१ ॥
आत्मैव ह्यात्मनो गोप्ता निर्विद्येत यदाऽखिलात् ।
अप्रमत्त इदं पश्येद्ग्रस्तं कालाहिना जगत् ॥ ४२ ॥
ब्राह्मण उवाच ।
एवं व्यवसितमतिर्दुराशां कान्ततर्षजाम् ।
छित्त्वोपशममास्थाय शय्यामुपविवेश सा ॥ ४३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

मत्तोऽन्या यदेतत्पुरुषाकारमगारं कर्मफलभोगायतनं कान्तबुद्ध्या का उपैति सेवते कथंभूतम् वंशः स्थूणास्त्वर्पितस्तिर्यग्वेणुः वंश्या उभयतस्तस्मिन्नर्पिताः वेणवः स्थूणाः स्तम्भापरपर्यायाः शरीरे हस्तपादाख्या अस्थिभिर्निर्मिताः वंशादयो यस्मिंस्तत् त्वचा रोमनखैः पिनद्धमाच्छादितम् क्षरन्ति नव द्वाराणि यस्मिन् तत् भिन्नमाणमिति भावः ॥ ३३ ॥

अच्युतात् अन्यं कामस्भोगमिच्छती याहं सा विमूढधीरेकैव॥३४॥

एवं संसाराद्विरक्ता भगवत्यनुरक्तातः परम्भगवानेवाराधनीय इत्याह । सुहृदिति । अयं बुद्धिप्रेरकत्वाद्विना अपरोक्षीकृतः शरीरिणां जीवानामात्मा सत्ताप्रदः नाथः ऐश्वर्यप्रदः सुहृत्सर्वदानुकूलः अतएव प्रेष्ठतमः निरतिशयसुखप्रदः ममापि शरीरित्वाविशेषेणायं वात्मत्वादिना प्रेष्ठतमतयाराधनीय इति भावः आराधनप्रकारमाह । आत्मना स्वात्मनार्पितेन तं भगवन्तं विक्रीय वशीकृत्य रमा यथा तद्वदनेन रमे ॥ ३५ ॥

न्यायतः प्राप्तापत्यादयोऽपि तद्व्यतिरिक्ताः सर्वे हेया इत्याशयेनाह । कियदिति । कालविद्रुता देवाः तदनुग्रहलब्धा आद्यन्तवन्तो नराः पत्याद्याश्च तत्सङ्गलब्धाः कामा विषयाश्च भार्यायाः कियत्प्रियं व्यभजन् दत्तवन्तः न किमपीत्यर्थः । अतस्ते न सेव्या इति फलितोऽर्थः ॥ ३६ ॥

आकस्मिकविवेकोत्पत्तौ हेतुमाह । नूनमिति । केनापि कर्मणा निमित्तभूतेन भगवान् प्रीतः यत् येन बुद्धिप्रेरकेण भगवता हेतुभूतेन दुष्टा आशा यस्यास्तस्या अपमत्यङ्गतः सर्वक्लेशहरः सुखावहो निर्वेदो जातः ॥ ३७ ॥ .

केनापि कर्मणा प्रीत इत्यत्र गमकमाह । मैवमिति । मन्दभाग्यायाः तादृशकर्मवर्जितायाः क्लेशाः भवन्त्येव एवं निर्वेदहेतवस्तु मा स्युः न भवन्ति येन निर्वेदेनानुबन्धं गृहादिकम् निर्हृत्य समं भगवन्तमृच्छति किञ्चिन्मम साधु कर्मास्ति येन भगवान् प्रसन्नो निर्वेदं दत्तवान् इति भावः ॥ ३८ ॥

तेन भगवता उपकृतमुपकारं निर्वेदलक्षणं शिरसा आदाय ग्राम्यसङ्गताः ग्राम्येषु विषयेषु प्रविष्टाः दुराशाः त्यक्त्वा तमेव शरणं व्रजामि ॥ ३९ ॥

तदनन्तरकृत्यमाह । सन्तुष्टेति । अधीश्वरशरणागतिरेव परमपुरुषार्थः इत्येतत् श्रद्दधती सती आत्मना सर्वसत्ताप्रदेनामुनोपकर्त्री ॥ ४० ॥

भाषा टीका ।

बडे छोटे वासों से बना हुआ खंभों वाला घर जैसे होता है तैसे एक बडी बीच की पीठ में सीधी हड्डी और बगल में बहुत छोटी हड्डीयां हाथ पैर इनों से रचित यह शरीररूप फूंस का घर है चमडी रोम नख इन्हों से बधा है इंद्रिय रूपी नौ दरवाजे इसमें वह रहे हैं विष्ठा मूत्र से भरा है ऐसे इस शरीर को मेरे विना दूसरी कौन भजैगी तिससे मैं बडी अधम हूं ॥ ३३ ॥

इन विदेहों के पुर मे मैंहीं एक मूर्ख बुद्धि वाली हूं जो कि मैं सब कामनाओं के देने वाले इन अच्युत भगवान् को छोड कर दूसरे पुरुष से काम सुख चाहती हूं सो असती हूं ॥ ३४ ॥

यह भगवान् तो मेरे सुहृत् हैं प्रियहैं सब प्राणियों के अन्तर्यामी हैं उन ही को मैं अपने आत्मा को बेच कर जैसे लक्ष्मी जी तैसे इन के साथ रमण करूंगी ॥ ३५ ॥

जिन को कि मैंने कामना देने वाले मान रखा है वे कामना देने वाले भार्यां के क्या काम दे शकते हैं अथवा काल के मारे जो देवता सो भी क्या दे सकते हैं ॥ ३६ ॥

यह बात निश्चित है कि मेरे ऊपर विष्णु भगवान् किसी पुण्य कर्मसे प्रसन्न भये हैं जिससे कि खोटी आशावाली मेरे को भी ऐसा सुख देने वाला वैराग्य भया है ॥ ३७ ॥

जो मन्द भागिनी होगी उसको तो ऐसे वैराग्य के हेतु क्लेश कभी नहीं होंगे जिस से सब संसार संबंधों को छोड कर पुरुष शांति को प्राप्त हो जाता है ॥ ३८ ॥

अब मैं उन परमात्मा के उपकार को मस्तक से ग्रहण कर के ग्रामीण भोगों की दुराशाओं को छोड कर उन्हीं अधीश्वर के शरण जाऊंगी ॥ ३९ ॥

इसी बात से सन्तुष्ट हो कर जो कुछ मिल जाय तिसी से जीती हुई अपने आत्मा रमण इन्हीं भगवान् के साथ रमण करूंगी ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु ब्रह्मादीन् हित्वा अमुनैवेति कोऽयं नियमस्तत्राऽऽह । संसारेति । मुषितेक्षणमपहृतविवेकम् ॥ ४१ ॥

आशा हि परमं दुःखं नैराश्यं परमं सुखम् ।
यथा सञ्छिद्य कान्ताशां सुखं सुष्वाप पिङ्गला ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
वैयासिक्याम् एकादशस्कन्धे
अष्टमोऽध्यायः ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तर्हि किमात्मत्राणोपाधिना त्वं भजिष्यसि न तत्र सर्वतो निर्विद्य भगवद्भजने प्रवृत्तस्याऽऽत्मन एव समर्थत्वादित्याह । आत्मैवेति । यदा एवं जगत्पश्येत्ततश्चाप्रमत्तः सन्निखिलादिहामुत्र च भोगान्निर्विद्येत तदा ह्यात्मनैवाऽऽत्मनो गोप्ता तस्मान्ममायम् अतः केवलं प्रेम्णैव भजामीति भावः ॥ ४२ ॥

कान्तस्य तर्षोऽऽभिलाषस्ततो जाताम् ॥ ४३ ॥

फलितमाह । आशाहीति ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
अष्टमोऽध्यायः ॥ ८ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी ।

कोऽन्यस्त्रातुमधीश्वरः न कोऽपि तस्माद्ब्रह्मादीनां त्रातुमनीश्वरत्वात् पतित्वं न सङ्गच्छते इत्यमुनैवेत्युक्तम् ॥ ४१ ॥

तर्हीत्यादि । शङ्कासमाधानाभासः तत्र आत्मत्राणे एवं कालाहिग्रस्तं ततश्च तादृशज्ञानानन्तरम् अतः आत्मत्राणानपेक्षत्वात् ॥ ४२ ॥

उपशमं बुद्धेः श्रीकृष्णकान्तैकनिष्ठारूपं रागं तथा चास्या रागरूपा भक्तिर्न तु वैधीति सूचितं साधनानुष्ठानमन्तरैव रमेऽनेन यथा रमेति प्रेममयतृष्णाया एव दर्शितत्वात् रागरूपायाश्चेदं लक्षणं "इष्टे स्वारसिकी रागः परमाविष्टता भवेत् तन्मयी या भवेद्भक्तिः सात्ररागात्मिकोदिते"ति इष्टे स्वानुकूलविषये स्वारसिकी स्वाभाविकी या परमाविष्टता तद्धेतुः प्रेममयी तृष्णा स रागो भवेत् तन्मयी तदेकप्रेरिता वा श्रवणमननादिरूपा भक्तिः सा रागरूपेत्युच्यत इत्यर्थः ॥ ४३ ॥

सुष्वाप भगवदेकाश्रयणेन निर्वृता बभूवेत्यर्थः ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धीये
श्रीराधारमणदासगोस्वामिकृतदीपिकादीपने टिप्पणे
अष्टमोऽध्यायः ॥ ८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

इति श्रीमद्भागवतव्याख्याने एकादशस्कन्धीये
श्रीसुदर्शनसूरिकृतशुकपक्षीये
अष्टमोऽध्यायः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ननु सत्सु ब्रह्मादिष्वमुनैवेति किमर्थोऽवधारणेत्याशङ्क्याह । संसारेति । मुषितेक्षणमुपहृतविवेकं काल एवाहिस्तेन ग्रस्तं आत्मानं मां त्रातुमन्यः परमपुरुषादितरः को वाऽधीश्वरः समर्थः न कोऽपीत्यर्थः ॥ ४१ ॥

तदेवाह । आत्मेति । यदाऽखिलाद्विषयान्निर्विद्येताऽप्रमत्तोऽवहितः कृत्स्नमिदं जगत्कालाहिना ग्रस्तं च पश्येत्तदा तस्य तथा द्रष्टुर्निर्विद्यमानस्यात्मनः पुंसः गोप्ता आत्मैव परमात्मैव नान्य इत्यर्थः ॥ ४२ ॥

एवमिति । एवमित्थं व्यवसिता निश्चिता मतिर्यया सा कान्ते तर्षोऽभिलाषः तत्प्रभवां दुराशां परित्यज्येत्यध्याहारः चित्तोपशमं चित्तशान्तिमाश्रित्य सम्पाद्येतियावत् शय्यामुपविवेश ॥ ४३ ॥

फलितमाह । आशाहीति । यथाशब्दो नैराश्याशयोः सुखदुःखावहत्वे दृष्टान्तप्रदर्शनपरः ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
अष्टमोऽध्यायः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अस्मादन्यः कः आत्मानं त्रातुं मुषितेक्षणं नष्टज्ञानम् ॥ ४१ ॥

आत्मनः स्वस्य गोप्ता आत्मा परमात्मैव यदाखिलान्निर्विद्येत तदेतज्जगत्कालाहिना ग्रस्तं पश्येत् ॥ ४२ ॥

कान्ततर्षजाः कान्ततृष्णाजाताः ॥ ४३ ॥

इममितिहासं श्रद्धापयति । आशेति ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
अष्टमोऽध्यायः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

तमेव शरणं यामीत्यत्र हेतुः संसारेति ॥ ४१ ॥

आत्मा परमात्मा आत्मनो जीवस्य अखिलात् परमात्मव्यतिरिक्तात् निर्वेदे हेतुः अप्रमत्त इति ॥ ४२—४३ ॥

सुष्वाप भगवदेकाश्रयेणा निर्वृत्ता बभूवेत्यर्थः ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
अष्टमोऽध्यायः ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

ननु ब्रह्मादीन् हित्वा अमुनैवेति कोऽयमाग्रहस्तत्राह। संसारेति ॥ ४१ ॥

तर्हि किमात्मत्राणोपायंविना भजिष्यसीति तत्र नैवेत्याह। आत्मैवेति। यदा ह्यात्मा अखिलाद्भोगान्निर्विद्येत तत्र हेतुः इदं जगत् कालाहिना ग्रस्तं पश्येत् तदा आत्मैव आत्मनः स्वस्य गोप्ता संसाराद्रक्षिता भवेत् ममात्मा च सम्प्रत्येतादृश एवाभूदतोऽहं स्वत एव निस्तीर्णसंसारा अभूमैव तेनातः परं केवलं प्रेम्णैव तं भजिष्ये इति भावः ॥ ४२ ॥ ४३ ॥ ४४ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्।
एकादशे ऽष्टमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

तदन्यो रक्षिता नास्तीत्याह। संसारेति। मुषितेक्षणं मायावृतचक्षुषम् ॥ ४१ ॥

यदा अखिलात् ऐहिकामुष्मिकाद्विषयान्निर्विद्येत अप्रमत्तः सावधानः भगवदाराधने इति शेषः। कालाहिना इदं सर्वं जगत् ग्रस्तं च पश्येत् तदा आत्मनः एवं प्रवृत्तस्य जीवस्य आत्मा परमात्मैव गोप्ता नान्य इत्यर्थः ॥ ४२ ॥

कान्ततर्षजां प्रियजनाभिलाषोद्भवाम् ॥ ४३ ॥

निष्कर्षमाह। आशाहीति ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
अष्टमाध्यायार्थप्रकाशः ॥ ८ ॥

भाषा टीका।

विना इन नारायण के दूसरा कोइ ऐसा नहीं है जो की संसार कूप मे पडे हुवे विषयों से नष्ट ज्ञानवाले काल रूप सर्प से ग्रसित आत्मा को छुटा सकै ॥ ४१ ॥

जब सब बात से विरक्त होजावे तब अपने आत्मा का आप ही रक्षा करने वाला होजाता है तिससे सावधान होकर काल रूप सर्प से ग्रसित इस जगतको देखै ॥ ४२ ॥

ब्राह्मण उवाच।

पिंगला इस प्रकार से निश्चय करके पतियों की तृष्णा की दुराशा को छेदन करके शांति को प्राप्त होकर सो गई ॥ ४३ ॥

आशा परम दुख दायक है वैराग्य ही परमसुख दायक है जैसे कि कांत की आशा को छोडकर पिंगला वेश्या सुख पूर्वक सो गई ॥ ४४ ॥

इति श्रीमद्भागवत एकादशस्कन्ध में अष्टमाध्याय
श्रीवृन्दावनस्थ पं० भागवताचार्यकृत
भाषा टीका समाप्ता ॥ ८ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे अष्टमोऽध्यायः ॥ ८ ॥

—:*:—

अथ नवमोऽध्यायः ।

---:*:---

ब्राह्मण उवाच ।

परिग्रहो हि दुःखाय यद्यत्प्रियतमं नृणाम् ।
अनन्तं सुखमाप्नोति तद्विद्वान् यस्त्वकिञ्चनः ॥ १ ॥

सामिषं कुररं जघ्नुर्बलिनो ये निरामिषाः ।
तदामिषं परित्यज्य स सुखं समविन्दत ॥ २ ॥

न मे मानावमानौ स्तो न चिन्ता गेहपुत्रिणाम् ।
आत्मक्रीड आत्मरतिर्विचरामीह बालवत् ॥ ३ ॥

द्वावेव चिन्तया मुक्तौ परमानन्द आप्लुतौ ।
यो विमुग्धो जडो बालो यो गुणेभ्यः परङ्गतः ॥ ४ ॥

क्वचित्कुमारी त्वात्मानं वृणानान् गृहमागतान् ।
स्वयं तानर्हयामास क्वापि यातेषु बन्धुषु ॥ ५ ॥

तेषामभ्यवहारार्थं शालीन् रहसि *पार्थिव ! ।
अवघ्नन्त्याः प्रकोष्ठस्थाश्चक्रुः शङ्खाः स्वनं महत् ॥ ६ ॥

सा तज्जुगुप्सितं मत्वा महती व्रीडिता ततः ।
बभञ्जैकैकशः शङ्खान् द्वौ द्वौ पाण्योरशेषयत् ॥ ७ ॥

उभयोरप्यभूद्घोषो ह्यवघ्नन्त्याः स्म शङ्खयोः ।
तत्राप्येकं निरभिददेकस्मान्नाभवद्ध्वनिः ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

नवमे कुररादिभ्यो देहस्योपशिक्षितम् ॥
श्रुत्वा यदुः कृतार्थोऽभूदिति कृष्णेन वर्णितम् ।

कुररादिशिक्षितमाह । परिग्रहो हीति । यद्यत्प्रियतमं तस्य तस्य परिग्रहः तद्विद्वान् परिग्रहो दुःखमिति विद्वान् सन् यस्त्वकिञ्चनस्त्यक्तपरिग्रहो न तु दरिद्रः ॥ १ ॥

तदाह । सामिषमिति ॥ २ ॥

अर्भकशिक्षामाह । नेति । गेहपुत्रिणां तद्वतां या भवति चिन्ता सा च मे नास्ति आत्मनैव क्रीडा यस्य आत्मनि रतिः प्रीतिर्यस्य सः ॥ ३ ॥

नन्वज्ञसर्वज्ञयोः किं सादृश्यं नैश्चिन्त्यं परमसुखमित्याह । द्वाविति । विमुग्धोऽज्ञः जडोऽनुद्यमः एवंभूतो यो बालो यश्च प्रकृतेः परमीश्वरं प्राप्तस्तौ द्वौ ॥ ४ ॥

कुमार्याः शिक्षितं वक्तुमाख्यायिकामाह । क्वचिदित्यादिना वृणानान्स्ववरणायाऽऽगतान् बन्धुषु पित्रादिषु ॥ ५ ॥

शङ्खाः शङ्खवलयाः महद्यथा भवति तथा स्वनं चक्रुः ॥ ६ ॥

सा महती बुद्धिमती तत्स्वयं शाल्यवहननम् जुगुप्सितं दरिद्रताद्योतकम् एकैकशः क्रमेणैकैकमबभञ्ज स्वकरादपसारितवती ॥ ७ ॥

निरभिदत्पृथक्कृतवती ॥ ८ ॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

प्रियतमं धनवस्त्रादिकं तस्य सङ्ग्रहो दुःखाय भवति ॥ १ ॥

तदाह सङ्ग्रहतत्त्यागयोः दुःखसुखहेतुत्वमाह बलिनो यदा जघ्नुस्तदा स कुररः ॥ २ ॥

---

* हषदीति विजय० पाठः ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी।

आत्मनैव क्रीडासाधनेन द्वादशलक्षणविचारात्मिका क्रीडा यस्य सः आत्मनि स्वस्वरूपे रतिस्तुष्टिर्यस्य स तथा इह जगति ॥३॥

गुणानां प्रकृतिरूपत्वात् प्रकृतेरिति व्याख्यातम् ॥ ४ ॥

स्ववरणाय स्वस्याः कन्याया वरणं कर्तुम् ॥ ५

अर्हणमेवाह। तेषामिति। समग्रशङ्खानां प्रकोष्ठस्थत्वायोगात् मुख्यार्थबाधः कार्यकारणलक्षणो योगस्तथा रूढिश्चेति शङ्खशब्दस्य वलये लक्षणा स्वनशब्दस्य पुंस्त्वेन महदिति न तद्विशेषणमतः क्रियाविशेषणतया व्याख्यातम् ॥ ६ ॥

मत्वेति। पाद्यद्यर्पणादौ तद्धस्तस्थवलयानां तैर्हष्टत्वात् तच्छब्दं विना विघातमात्रशब्दस्यान्यकर्तृकत्वेनापि सम्भाव्यत्वाच्चैकैकशो बभञ्ज भञ्जने मौभाग्यच्युतेः अपसारितवतीति व्याख्यातं धातूनामनेकार्थत्वात् ॥ ७ ॥

तत्रापि शङ्खद्वयमध्येऽपि एकस्माच्छङ्खवलयात् ॥ ८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

॥ १—३ ॥
गुणेभ्यः परङ्गतः त्रिगुणातीतः ॥ ४—१५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथ कुररात्परिग्रहापरिग्रहयोर्दुःखसुखहेतुत्वं शिक्षणीयमित्याह। परिग्रह इति। नृणां यद्यत्प्रियतमं वस्तु तस्य परिग्रहः अतिदुःखाय भवति यस्तु तत्परिग्रहस्यातिदुःखहेतुत्वं विद्वान् जानन्नकिञ्चनो निष्परिग्रहः स्यात्सोऽनन्तं सुखमाप्नोति ॥ १ ॥

तथाहि। सामिषमिति। सामिषं परिगृहीतामिषमुखं कुररमुत्क्रोशाख्यं पक्षिविशेषमन्ये निरामिषा बलिनः बलीयांसः श्येनगृध्रादयः जघ्नुः सः कुररः सुखं समविन्दत प्राप ॥ २ ॥

अथार्भकाच्छिक्षितमाह। नम इति। मे मम मानापमानौ न स्तः गेहपुत्रिणां तद्वतां या चिन्ता भवति सा च मे नास्ति किन्त्वात्मनैव सह क्रीडा यस्य सः आत्मन्येव रतिः प्रीतिर्यस्य सः इह लोके विचरामि बालवत् यथा बालो मानापमानचिन्तारहितश्चरति तद्वदित्यर्थः। आत्मशब्दः परमात्मपरः ॥ ३ ॥

मानाद्यभावे बालदृष्टान्तः नत्वात्मक्रीडत्वात्मरतित्वयोरपीत्यभिप्रेत्य दृष्टान्तदार्ष्टान्तिकयोर्विवक्षितं साधर्म्यमाह। द्वावेवेति। चिन्ताशब्दो मानापमानयोरप्युपलक्षकः परमानन्दे आप्लुतौ मग्नौ कौ च तावित्यत आह। य इति। विमुग्धो जड इति च बालस्य विशेषणं विमुग्धो मूढः मानावमानानभिज्ञः जडः। अनुद्यमः देहादिपोषणचिन्ताप्रयुक्तोद्यमरहित इत्यर्थः। यश्च गुणेभ्यः परं गतः। त्रिगुणातीतः परमात्मसाक्षात्कर्ता ॥ ४ ॥

अथ कुमार्याः शिक्षितं वक्तुमाख्यायिकामाह। क्वचिदित्यादिना इव कङ्कण इत्यन्तेन। वृणानान्। "लक्षणहेत्वोरि"ति शानच् वरितुमित्यर्थः। गृहं प्रत्यागतान्वीक्ष्येत्यध्याहारः तान्स्वयमेवार्हयामासातिथ्येन सत्कारयामास। स्वयमेवेत्यत्र हेतुः बन्धुषु क्वापियातेषु सत्सु इति बन्धवोऽत्र मात्रादयः ॥ ५ ॥

तेषामागतानामभ्यवहारार्थं भोजनार्थं हे पार्थिव! रहसि एकान्ते शालीन् तण्डुलान् अवघ्नन्त्याः प्रकोष्ठस्थाः शङ्खाः शङ्खवलयाः सुमहद्यथा भवति तथा स्वनं ध्वनिं चक्रुः ॥ ६ ॥

सेति। कुमारी महती बुद्धिमती तच्छालिपवहननं जुगुप्सितं मत्वाऽहो इयं स्वयमेवावहन्ति किमस्याः बन्धवो न सन्ति नूनमियं दरिद्रेति मन्येरन्निति बुद्ध्या तदवहननमननुरूपं मत्वा इत्यर्थः। अत एव तेनो व्रीडिता च एकैकशः क्रमेणैकैकशङ्खं बभञ्ज करादपसारितवती द्वौ द्वौ तु शङ्खौ पाणयोरशेषयत् ॥ ७ ॥

ततः पुनरवघ्नन्त्याः शङ्खयोर्द्वयोरपि घोषो ऽभवत्ततः तत्रापि उभयोरप्येकमेकं निरभिदत्पृथक् कृतवती तदैकैकस्माच्छङ्खात् ध्वनिर्नाभवत् ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

तिरश्चीनात्कुररारूयखगात्किंविशिष्टं ज्ञानं शिक्षितमत्राह। परिग्रह इति। नृणां प्रियतमं यद्वित्तं तस्य परिग्रहः तस्य वित्तस्यान्ततो नाशाद्दुःखाय भवति ॥ १ ॥

ततः किं फलितमत्राह। तदिति। तत्तस्मात् यो विद्वान् सोऽकिंचनो भवेदिममर्थं चिह्नीकरोति। सामिषमिति ॥ २ ॥

तज्ज्ञानफलमाह। नम इति। इह पुत्रवतां या विशेषणादिचिन्ता सापि नास्ति ॥ ३ ॥

ननु तर्हि कीदृशस्य चिन्ता नास्तीत्यत्राह। द्वाविति। गुणेभ्यः सत्त्वादिभ्यः परं विलक्षणमीश्वरं मतो ज्ञाता परमात्मगुणामृतमनुभवन्नित्यर्थः ॥ ४ ॥

कुमार्याः शिक्षितज्ञानमाह। क्वचिदिति। वृण्वानान्वरणेच्छून् अर्हणमभ्यागतपूर्वम् ॥ ५ ॥

शालीन् कलमान् दृषदि व्रीहिकुट्टपाषाणे "शालयः कलमाद्याश्च षष्टिकाद्याश्च पुंस्यमी"त्यमरः यथा महत्परिमाणं भवति तथा स्वनं चक्रुरिति क्रियाविशेषणम् ॥ ६ ॥

महती विवाहोत्सवे वर्तमाना तद्योग्येत्यर्थः। अभ्यागतसमये व्रीहिताडनं दारिद्र्यसूचकमिति व्रीडिता लज्जिता ॥ ७ ॥

घोषो अवघ्नन्त्या इत्यसन्धिकार्येणाभ्यागतैः शङ्खस्वनो न श्रुत इति सूच्यते सन्धिश्च विवक्षावशात् क्रियत इति वैयाकरणैरुक्तत्वाच्च। निरभिनत् निरभिदत् ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

॥ १—६ ॥

सा तज्जुगुप्सितमिति पाद्यार्घ्यार्पणादौ तद्धस्तस्थितशङ्खवलयानां तैर्हष्टत्वात् तच्छब्दं विना विघातमात्रशब्दस्यान्यकर्तृकत्वेन सम्भाव्यत्वाच्च ॥ ७—१३ ॥

अन्वशिक्षमिमं तस्या उपदेशमरिन्दम ! ।
लोकाननुचरन्नेताँल्लोकतत्त्वविवित्सया ॥ ९ ॥
वासे बहूनां कलहो भवेद्वार्ता द्वयोरपि ।
एक एव चरेत्तस्मात्कुमार्या इव कङ्कणः ॥ १०

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

नवमे सप्त गुरवः कुरराद्याः प्रकीर्तिताः ।
देहोऽष्टमस्तदेवं स्युर्गुरवः पञ्चविंशतिः ॥
कुरराच्छिक्षितमाह । परिग्रह इति द्वाभ्याम् । यत् यत्प्रियतमं वस्तु तस्य तस्य परिग्रहः तत्तस्मात् यस्त्वकिञ्चनो निस्पृहः स एव विद्वान् अनन्तं सुखमाप्नोति ॥ १ ॥

तदाह । सामिषं मांसग्राहिणं स कुररः ॥ २ ॥

बालकाच्छिक्षितमाह । नेति ॥ ३ ॥ ४ ॥

कुमार्याः शिक्षितमाह तदाख्यानेन । क्वचिदिति । अर्हयामास आवृतसर्वाङ्गैव गृहान्निष्क्रम्य दर्भासनजलादिभिरातिथ्यं चक्रे बन्धुषु पितृमात्रादिषु ॥ ५ ॥

कदा ते आयास्यन्ति कदा तण्डुलान् करिष्यन्तीति मनसि कुर्वत्यास्तस्याश्चेष्टितमाह । तेषामिति । शङ्खाः शङ्खवलयाः ॥ ६ ॥

तत् शालयवहननं दारिद्र्यद्योतकत्वात् जुगुप्सितम् महती बुद्धिमती ॥ ७ ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

नवमेऽध्याये सप्तभ्यः कुररादिभ्यः स्वदेहतश्च शिक्षितमवधूतेनोक्तं तच्छ्रुत्वा श्रीयदुः कृतार्थो जात इति निरूप्यते । तत्रादौ कुरराच्छिक्षितमाह । परिग्रह इति द्वाभ्याम् । यद्यत्प्रियतमं तस्य तस्य परिग्रहः संग्रहः दुःखाय भवति तद्विद्वान् परिग्रहो दुःखायेति विद्वान् सन् योऽकिञ्चनः विज्ञानकिञ्चनो द्विविधः बाह्यपरिग्रहो दरिद्रश्च स द्विविधोऽपि अनन्तं मोक्षाख्यं सुखमाप्नोति तुशब्दादविदुषो ऽकिञ्चनस्य व्यावृत्तिः ॥ १ ॥

तदेवाह । सामिषमिति । परिग्रहत्यागेन लब्धलौकिकसुखात्कुररात्परिग्रहत्यागेन मोक्षलक्षणं सुखं भवतीति शिक्षितमिति फलितोऽर्थः ॥ २ ॥

अर्भकाच्छिक्षितमाह । न मे इति द्वाभ्याम् । गेहपुत्रिणां मानापमानौ स्तः चिन्ता चास्ति बालवन्निरभिमानिनो मे न अतः आत्मनि परमात्मनि क्रीडा यस्य आत्मनि तस्मिन्नेव रतिरनुरक्तिर्यस्य सोऽहमिह भूतले विचरामि ॥ ३ ॥

विमुग्धः विशेषतोऽप्रगल्भः जडः अनुद्भूतबोधः एवं विधो यो बालः यश्च गुणेभ्यः प्राकृतेभ्यः परं परमेश्वरं प्राप्तस्तौ द्वौ चिन्तया मुक्तौ अत एव परमानन्दे आप्लुतौ भवतः बालः स्वाऽस्थ्यलक्षणे परंगतः परसम्बन्धिनि मानन्दे निमग्नः इति विवेकः ॥ ४ ॥

कुमार्याः शिक्षितं वक्तुं तद्वृत्तमाह । क्वचिदित्यादिना । बन्धुषु पित्रादिषु क्वापि आवश्यककार्यवशाद्यातेषु सत्सु आत्मानं वृणानान् स्ववरणायागतान् स्वयमर्हयामास पूजयामास ॥ ५ ॥

तदेवाह । तेषामिति । शङ्खाः वलयरूपाः महत् यथा स्यात्तथा स्वनं शब्दं चक्रुः ॥ ६ ॥

सा महती दाम्यादिभिर्निर्नित्यं परिचर्यमाणाऽतस्तत्स्वयं शालयवहननं जुगुप्सितं मत्वा व्रीडिता सती एकैकशः क्रमेणैकमेकं वभञ्ज पाणिभ्यामपसारितवती ॥ ७ ॥

तत्र तयोर्मध्ये एकं निरभिदत् अपसारितवती ॥ ८—९ ॥

भाषा टीका ।

जो जो पदार्थ प्रिय हैं तिन का संग्रह करना मनुष्यों को बडा दुखदाई है जो इस बात को जानकर अकिंचन होकर रहता है सो अनन्त सुख को प्राप्त होता है ॥ १ ॥

एक कुरर पक्षी मांस को ले जाता था उस के पीछे बहुत पक्षी पडके उसको मारने लगे जब उसने उस मांस को छोड दिया तब वह उस आफत से छूट गया ॥ २ ॥

मेरे कोई मान अपमान का विचार नहीं है और घर वाले पुत्रों वालों की चिंता भी नहीं है तब आत्मा ही मे क्रीडा करके आत्मा ही में रति को करके मैं विचरता हूं यह गुण बालक को देखकर सीखा है ॥ ३ ॥

दो ही पुरुष चिंता से अलग रहते हैं औ परम आनन्द में मग्न रहते हैं जो विशेष अज्ञानी है जड है बाल है और जो बुद्धि के पार परमात्मा को प्राप्त होगया है ॥ ४ ॥

कोई कुमारी स्त्री थी उसके घर के सब किसी जगे चले गये थे उसी वखत कोई उसके वरण करने के प्रसंग में आये थे तब उस कुमारी ने उनका सत्कार किया ॥ ५ ॥

हे राजन् ! उनके भोजन के वास्ते एकांत में उसने धान कूटने चाहे तब उसके दोनों हाथों के शंख के कंकण बजने लगे ॥ ६ ॥

उसने उस बाजने को बुरा समुझ कर बुद्धिमती होने से लज्जा किया तब एक एक कंकण को उसने निकाल दिये दोनों हाथों में दो दो बांकी छोड़ दिये ॥ ७ ॥

दो दो के रहने से भी कूटते समय मे फिर शंखों का शब्द होने लगा तब तिन मे भी एक एक निकाले फिर जब एकही एक रह गये तब शब्द नहीं भया ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु कुमार्यास्तव च कथं सङ्गतिस्तत्राऽऽह । लोकानिति ॥९॥

मन एकत्र संयुञ्ज्याज्जितश्वासो जितासनः ।
वैराग्याभ्यासयोगेन ध्रियमाणमतन्द्रितः ॥ ११ ॥
यस्मिन्मनो लब्धपदं यदेतच्छनैः शनैर्मुञ्चति कर्मरेणून् ।
सत्त्वेन वृद्धेन रजस्तमश्च विधूय निर्वाणमुपैत्यनिन्धनम् ॥ १२ ॥
तदैवमात्मन्यवरुद्धचित्तो न वेद किञ्चिद्बहिरन्तरं वा ।
यथेषुकारो नृपतिं व्रजन्तमिषौ गतात्मा न ददर्श पार्श्वे ॥ १३ ॥
एकचार्यनिकेतः स्यादप्रमत्तो गुहाशयः ।
अलक्ष्यमाण आचारैर्मुनिरेकोऽल्पभाषणः ॥ १४ ॥
गृहारम्भोऽतिदुःखाय विफलश्चाध्रुवात्मनः ।
सर्पः परकृतं वेश्म प्रविश्य सुखमेधते ॥ १५ ॥
एको नारायणो देवः पूर्वसृष्टं स्वमायया ।
संहृत्य कालकलया कल्पान्त इदमीश्वरः ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

वास इति प्रथमान्तपाठे कलहहेतुः वार्ता गोष्ठी हेतुर्भवे-दित्यर्थः ॥ १० ॥

चित्तैकाग्रता द्वैतास्फूर्तिलक्षणसमाधिहेतुरिति शरकाराच्छि-क्षितमित्याह । मन इति । तत्रोपायमाह।जितेति।आसनजये श्वास-जयस्तस्य च जये श्वासाधीनं मनो निश्चलं भवति । ननु क्षणं निश्चलं सदपि मनो विषयवासनया यदि विक्षिप्यते सुषुप्ताविव सर्वथा लीयेत वा तदा किन्तत्राऽऽह।वैराग्येति।वैराग्येणाविक्षिप्य-माणमभ्यासयोगेन लक्ष्ये ध्रियमाणं स्थिरीक्रियमाणम् ॥ ११ ॥

एकत्रेति कुत्र तदाह । यस्मिन्निति । लयविक्षेपात्मकं मन एतद्यस्मिन्परमानन्दरूपे भगवति लब्धास्पदं सत्कर्मरेणून् कर्मवास-ना मुञ्चति तस्मिन् । ननु कर्मवासनात्यागेऽपि सुषुप्तिवल्लयो दुर्वारः न सत्त्वेनेति वृद्धेनोपशमात्मकेन रजस्तमसोरभावे-विक्षेपलयाभावान्निर्वाणमवृत्तिकं ध्येयाकारेणावस्थानमुपैति कुतः अनिन्धनम् इन्धनं गुणास्तत्कार्यं च तद्रहितम् तदुक्तं योगशास्त्रे—

मनसो वृत्तिशून्यस्य ब्रह्माकारतया स्थितिः ॥
याऽसम्प्रज्ञातनामासौ समाधिरभिधीयत इति ॥ १२ ॥

ततश्च न द्वैतस्फूर्तिरित्याह । तदेति । बहिर्दर्शनादिना अन्तरं स्मृत्या इषौ गतात्मा तस्य ऋजुकरणे दत्तचित्तो भेरीघोषैरान्तिके व्रजन्तं नृपतिं न वेद तद्वत् ॥ १३ ॥

सर्पाच्छिक्षितमाह । एकचारीति।योगिसम्मर्दस्यापि त्यागे कुमारी गुरुर्जनसङ्गत्यागे सर्पः स यथा जनाच्छङ्कमान एकाकी विच-रति नियतनिकेतरहितश्च सदाऽप्रमत्तश्चैकान्तवासी च आचारैर्ग-तिभिः सविषो निर्विषो वेति न लक्ष्यते च असहायश्च मितभाषी च तद्वन्मुनिर्वर्तेतेत्यर्थः ॥ १४ ॥

किं च गृहारम्भ इति । अध्रुवात्मनो नश्वरदेहस्य सुखं यथा भवति तथा वर्धते ॥ १५ ॥

कारकसामग्रीनिरपेक्षात्केवलादीश्वराद्विश्वसृष्टिसंहारावूर्ण-नाभिदृष्टान्तेन मया सम्भाविताविति वक्तुं प्रथमं संहारप्रकारमाह । एक इति सार्धत्रयेण । एकः कारकनिरपेक्षः पूर्वसृष्टमिदं जगत्कालकलया कालशक्त्या संहृत्य ॥ १६ ॥

———

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

इमं योगिभिरप्यसङ्गित्वलक्षणमुपदेशं कर्तव्यार्थं हे अरिन्दम ! त्वमपि आत्मनिष्ठाध्वंसकंजनसम्मर्दलक्षणमरिं नाश-येति भावः । लोकेषु जनेषु यद्धेयोपादेयवस्तुनस्तत्त्वं स्वरूपं तस्य विवित्सया जिज्ञासया "तत्त्वं वाद्यप्रभेदे स्यात् स्वरूपे परमात्मनी"ति विश्वः ॥ ९ ॥

फलितमाह । वास इति । सप्तम्यन्तपाठे कलहस्य वार्तायाश्च मुख्यार्थं एव प्रथमान्त पाठे तु वासस्य तदुभयरूपत्वं नास्ति किन्तु तद्धेतुत्वमिति लाक्षणिकार्थत्वादित्यर्थं इत्युक्तम् । कङ्कणाः कङ्कणमिति पाठद्वयं कौमुद्यां द्वयोरपि साधुत्वात् ॥ १० ॥

द्वैतस्य प्रपञ्चस्यास्फूर्तिरपरिज्ञानमेव लक्षणं स्वरूपं यस्य एवम्भूतो यः समाधिस्तस्य हेतुश्चित्तैकाग्रतैव तत्र चित्तैकाग्र-तायाम् तस्य श्वासस्य जये ध्रियमाणमित्यस्यैवाविक्षिप्यमाण-मित्यर्थस्तत्र वैराग्येण विक्षेपसम्भावना निरस्ता अभ्यास-योगेन लयोऽपि निरस्तः ॥ ११ ॥

तल्लक्ष्यमाह तत्कार्यञ्च रागादि तद्ध्येयाकारेणावस्थानं वृत्ति-शून्यस्य वितर्कादिचतुर्भेदरहितस्य मनसो ध्येयब्रह्माकारतया या स्थितिरेकाग्रतावस्थाऽसावसम्प्रज्ञातनामा समाधिरुच्यते

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी ।

यथाह भगवान् "पतञ्जलिः तस्यापि निरोधे सर्ववृत्तिनिरोधान्निर्बीजः समाधि"रिति अस्यार्थः तस्य सम्प्रज्ञानस्य प्रविलये सति सर्वचित्तवृत्तीनां परमात्मनि विलयात् निर्बीजोऽसम्प्रज्ञातसमाधिरिति ॥ १२ ॥

ततश्च ध्येयाकारेणावस्थानानन्तरं यदाऽसम्प्रज्ञातसमाधिर्भवति तदा आत्मनि परमात्मनि एवमेकाग्रतयाऽवरुद्धं निरुद्धं चित्तं येन सः वहिर्दर्शनादिना घटादि अन्तरं स्मृत्या सुखादि किञ्चिदपि न वेद ॥ १३ ॥

सङ्ख्यागतत्वेनाभेदात् पौनरुक्त्यमाशङ्क्य विशेषं व्याचष्टे योगीति। गुहाशय एकान्तवासी गतिभिः सक्रोधदंशनादिचेष्टाभिः एकचारित्वादिविशेषणानां सर्पासाधारणत्वात् क्रमप्राप्तत्वाच्च सर्पोऽत्र गुरुर्व्याख्यातः मुनिपक्षे आचारा जडवद्योगचर्यारूपास्तैर्विद्वानविद्वान् वेति न ज्ञायमानः ॥ १४ ॥

विफलः प्रत्युतातिदुःखायैव भवति तर्हि कुत्र वसेदित्यपेक्षायामाह । सर्प इति ॥ १५ ॥

एक इति सार्द्धकम् । कारकानिरपेक्षः स्वशक्तिव्यतिरिक्तकारकशून्यः नारायणः सर्वब्रह्माण्डान्तर्यामी महत्स्रष्टाख्यः पुरुषः अखिलानामाश्रयः लयस्थानं सन् एकः सजातीयचिद्रूपजीवभेदरहितः अद्वितीयो विजातीयप्रधानादिभेदरहितोऽभूत् तत्सर्वस्य तत्र लयेन पृथग् व्यपदेशानर्हत्वादित्यर्थः ॥ १६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

साक्षात्कर्त्रात्मानुभावेन स्वशक्तिभूतेन शक्तिषु गुणेषु त्रिषु साम्यं नीतासु सत्त्वादिभिर्युक्तत्वात् केवलानुभवानन्देति केवलशब्दो जाग्रद्दुःखसम्भेदव्यावर्त्तकः ॥ १६—१७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततः किमत आह । अन्वशिक्षमिति । हे अरिन्दम ! तस्याः कुमार्याः इममुपदेशमन्वशिक्षं ननु कुमार्यास्तव कथं सङ्गतिस्तत्राह । लोकानिति ॥ ९ ॥

को वा उपदेश इत्यत आह । वास इति । बहूनां वासे कलहो भवेत् द्वयोरपि वासे वार्त्ता मिथः संलापो भवेत् तस्मात्कलहवार्त्तयोरुभयोरपि योगविरोधित्वादेक एव चरेदिति नन्वयमर्थः किं कुमार्योपदिष्ट इत्यत आह । कुमार्या इवेति कङ्कणदृष्टान्तेनायमर्थो निर्णीत इति भावः ॥ १० ॥

बाह्याभ्यन्तरविजातीयप्रत्ययाव्यवहितसमाधिनिष्ठेन भवितव्यमितीषुकृतः शिक्षितमिति वक्तुं तावत्समाधिं विदधत् तदुपायाँश्चाह । मन इति । एकत्र शुभाश्रये मनः संयुञ्ज्यादिति समाधिविधिः युज समाधौ इति हि धातुः कथं मनः समाहितं स्यादित्यत्रोपायं वदन् विशिनष्टि । जितः श्वासः प्राणो येन सः "प्राणबन्धनं हि सौम्य मन" इति श्रुतेरिति भावः । तर्हि श्वासजयः कथमित्यतो विशिनष्टि । जितमासनं येन सः सत्यासनजये श्वासजयो भवतीति भावः । तथापि चञ्चलं मनः कथं स्थिरं स्यादित्यतस्तद्विशिनष्टि । वैराग्याभ्यासयोगेन ध्रियमाणं युज्यते इति योगो बलं वैराग्याभ्यासबलेन ध्रियमाणं मन एकत्रातन्द्रितः युञ्ज्यादिति सम्बन्धः अतन्द्रितः अवहितः ॥ ११ ॥

विषयवैलक्षण्यात्प्रतिबन्धककर्मवासनाक्षपणक्षमाद्रजस्तमोनिवर्हणसात्त्विकाहारादिप्रवृद्धसत्त्वगुणाच्च स्थिरं स्यादित्याह । यस्मिन्निति । यस्मिन् शुभाश्रये लब्धपदं लब्धास्पदं सदेतन्मनः कर्मरेणून् कर्मवासनाः मुञ्चति त्यजति तेन रजस्तमश्च निर्धूय प्रवृद्धेन सत्त्वेन च अनिन्धनं गुणास्तत्कार्यं च तद्रहितम् इध्यते दीप्यते प्रकाश्यते इतीन्धनं कर्मणि ल्युट् विषयान्तरागोचरमित्यर्थः । अत एव निर्वाणं लयं ध्येयाकारैकप्रावण्यात्मकमुपैति ॥ १२ ॥

एवमित्थमात्मनि परमपुरुषे ऽवरुद्धं नियमितचित्तं येन सः तदा बहिरन्तरशब्दौ तद्भावपरौ बाह्यमान्तरं च न वेद नानुसन्धत्ते अनेन समाधेर्विजातीयप्रत्ययाव्यवहितरूपत्वमुक्तम् अनिन्धनमित्यनेन प्रत्याहारः लब्धपदमित्यनेन धारणा जितासनजितश्वासशब्दाभ्यामासनप्राणायामौ कर्मरेणून्मुञ्चतीत्यादिना "धर्मेण पापमपनुदत्याहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृति"रित्यादिश्रुत्युक्तौ यमनियमौ विवक्षितौ निर्वाणशब्देन ध्यानमवरुद्धचित्तो न वेदेत्यत्र दृष्टान्तः यथेति । इषौ निर्मीयमाणे बाणशल्ये गतोऽवरुद्ध आत्मा मनो यस्य सः इषुकारः पार्श्वे व्रजन्तं भेर्यादिघोषैर्गच्छन्तं नृपतिं यथा न ददर्श तद्वत् ॥ १३ ॥

अथ सर्पाच्छिक्षितमाह । एकचारीति । योगिसम्मर्दत्यागे कुमारी गुरुर्जनसंमर्दत्यागे सर्पः स यथाशङ्कमानः एकाकी चरति नियतनिकेतरहितश्च सदा अप्रमत्तश्च एकान्तवासी चारैर्गतिभिरलक्ष्यमाणश्च तद्वन्मुनिरप्येकोऽसहायः अप्रमत्तत्वादीनामुपलक्षणमिदं किञ्चाल्पं मितं यथा तथा भाषते इति तथा ॥ १४ ॥

किञ्च गृहारम्भ इति । अध्रुवस्यात्मनो देहस्याति दुःखाय भवति निर्माणदशायामायासोपलब्धेरिति भावः । विफलश्च यावदपेक्षं भोगालाभादितिभावः । अत एव सर्पः परकृतं न तु स्वनिर्मितं वेश्म वल्मीकादिकं प्रविश्य सुखं यथा भवति तथा वर्त्तते ॥१५॥

"यथोर्णनाभिः सृजते गृह्णते चे"ति श्रुतिप्रसिद्धोर्णनाभिदृष्टान्तेनैकस्यैव भगवतो निमित्तोपादानकारणत्वेऽवधृते तद्वक्तुं "सदेव सौम्येदमग्र आसी"दित्यादिषु सृष्टेर्लयपूर्वकत्वश्रवणात्तावत्संहर्तृत्वमाह । एकइति सार्द्धैस्त्रिभिः । स्वमायया स्वसङ्कल्पेन तदैक्षत बहुस्याम्" इत्युक्तविधेन स्वशरीरभूतप्रकृत्या वा पूर्वसृष्टमिदं जगदेकः प्रलयं प्रति कारणान्तरसामग्र्यन्तररहितः कल्पान्ते कालकलया स्वापृथक्सिद्धविशेषणभूतेन कालेन संहृत्य एकोऽद्वितीयश्चाभूदिति सम्बन्धः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इदं कथं सम्भाव्यत इत्यत्राह । लोकानिति ॥ ९ ॥

एकाकित्वस्य विपक्षे बाधकमाह । वास इति । अत्र दुर्जनैः सह वासो निषिध्यते न तु सद्भिः तस्य विहितत्वात्—

असज्जनैस्तु संवासो न कर्तव्यः कथञ्चन ॥
यावद्यावच्च बहुभिः सज्जनैः स तु मुक्तिदः ।

इतिवचनात् ॥ १० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इषुकाराच्छिक्षितबुद्धिप्रकारमाह । मन इत्यादिना । एकत्र परमात्मनि ब्रह्मणि ॥ ११ ॥

मनोयोजनेन किम्फलं येनावश्यकर्तव्यं स्यादत्राह । यस्मिन्निति । यन्मनो दुष्कर्मरेणून् मुञ्चति । तद्बाह्यमचिन्मनोनिर्वाणं नाशमुपैति कथमिव अनिन्धनज्योतिरिवेति लुप्तोपमम्—

बाह्यं मनो विलीनं स्यान्मुक्तौ चिन्मात्रकं मनः ॥
तेनैवानुभवेत्सर्वं स्वात्माभिन्नेन मुक्तिगमिति

वचनात् बाह्यमेव नश्यति न चिन्मात्रं तन्नाशे विषयानुभावोक्तिर्विरुध्येतेति ॥ १२ ॥

अचिन्मनोनाशानन्तरं चिन्मनसा ध्यानप्रकारमाह । तदेवमिति ॥ १३ ॥

अनिकेतनत्वेन एकत्वेन च मञ्चरणा दुःखहेतुकर्मानारम्भश्च सर्पाच्छिक्षितमित्याह । एकचारीति । अत्र एकचारित्वादिकं विधेयं न तु विशेषणं गुहायां हृत्कमलमध्ये गूढायां परदेवतायाम् आशयोऽन्तःकरणं यस्य स तथा निरन्तरं भगवदुपासनापर इत्यर्थः । अल्पेनाशनादिना तोषणं तृप्तिर्यस्य स तथा ॥ १४ ॥

अध्रुवात्मनः अनित्यदेहस्य जीवस्य अत्र लुप्तोपमामाह । सर्प इति । अनेन निवासोपायोऽपि दर्शित इति ॥ १५ ॥

ऊर्णनाभेरुपशिक्षितमाह । एक इति । एकः केवलः निरपेक्षः नारायणो देवः स्वमायया स्वेच्छया कल्पान्ते कालकलया संहारकांशेन पूर्वसृष्टमिदं जगत्संहृत्य एकत्वसङ्ख्याविशिष्टोऽभूत् ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अप्रमत्तः सावधानः आचारैश्चेष्टाभिरलक्ष्यमाणः किं कर्त्तुमिच्छतीति ॥ १४—१५ ॥

एक इति सार्द्धकम् । नारायणो महत्स्रष्ट्राख्यः सर्वब्रह्माण्डान्तर्यामी पुरुषः एकः स्वशक्तिव्यतिरिक्तकारकशून्यः कालोऽपि कलायस्यास्तया स्वशक्तिरूपया कल्पादौ पूर्वं सृष्टमिदं तथैव कल्पान्ते संहृत्य अखिलानां तेषामाश्रयो लयस्थानं सत् अतएवैकः सजातीयचिद्रूपजीवभेदरहितः अद्वितीयो विजातीयप्रधानादिभेदरहितश्च सन् आत्माधारः स्वांशिरूपमहावैकुण्ठनाथाधारोऽभूत् तस्मिन्नेव प्रविष्ट आसीदित्यर्थः ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

लोकाननुचरन्निति । तद्दिने मया तत्रैव स्थितमिति सर्वेऽप्येते गुरवो मया स्वचक्षुषैव दृष्टा न तु सर्वज्ञत्वाज्ज्ञाता इति भावः ॥ ९ ॥

वासो वासे इति च द्वौ पाठौ अत्र दरिद्रकुमारी अप्राप्तपतिका झणत्काराभावार्थं यथा कङ्कणान् दूरीकरोति तथैव ज्ञानयोगः स्वाश्रितान् मुनीन् निःसङ्गानेव करोति यथा च राजकुमारी पतिमती पतिमभिसरन्ती झणत्काराद्यर्थं कङ्कणान् परिधत्ते तथैव श्रीमती भक्तिदेवी स्वाश्रितान् वैष्णवान् मधुरनामकीर्त्तनध्वनिरसार्थं तान् परस्परसङ्गिन एव विधत्ते नत्वसङ्गिन इति ज्ञेयं यदुक्तम्भगवता—

नैकात्मतां मे स्पृहयन्ति केचिन्मत्पादसेवाभिरता मदीहाः ।
येऽन्योन्यतो भागवताः प्रसज्य सभाजयन्ते मम पौरुषाणीति ॥१०॥

चित्तैकाग्र्यं शरकाराच्छिक्षितमित्याह । मन इति त्रिभिः । रागबलादेव मन इतस्ततश्चलतीत्यत आह । वैराग्येति । ध्रियमाणं भक्तिमिश्राष्टाङ्गयोगोक्तधारणाभ्यासेन ॥ ११ ॥

यस्मिन् यन्मनो लब्धपदं भवति तत्रस्थम् एतन्मनः कर्मरेणून् कर्मवासना मुञ्चति ततश्च सत्त्वेन वृद्धेन सत्त्वरजस्तमश्च विधूयेति रजस्तमसोरभावे विक्षेपलयशून्यं मनो निर्वाणसत्त्वस्यापि क्षीणीभूतत्वात् समस्तस्वीयवृत्तिशून्यं निर्वाणं परमानन्दमुपैति इन्धनं गुणास्तत्कार्यं च तद्रहितम् ॥ १२ ॥

आत्मनि भगवति इषौ गतात्मा तस्य ऋजुकरणार्थं तदेकाग्रचित्तत्वात्तन्मयीभवन्मनाः भेरीझङ्कारघोषैरन्तिके व्रजन्तमपि नृपतिं न वेद ॥ १३ ॥

सर्पाच्छिक्षितमाह । एकचारीति । योगिसंसर्गस्यापि त्यागे कुमारी गुरुः जनसङ्गत्यागे सर्पः स यथा जनाच्छङ्कमान एकाकी चरति नियतनिकेतरहितश्च सदा अप्रमत्तश्च एकान्तवासी च आचारैर्गत्यादिभिः सविषो निर्विषोवेति जनालक्ष्यश्च असहायश्च मितभाषी च तद्वन्मुनिर्वर्त्ततेत्यर्थः ॥ १४ १५ ॥

ईश्वरः केन प्रकारेण विश्वसृष्ट्यादिकं करोतीत्येतन्मया ऊर्णनाभेः सकाशाज्ज्ञातमित्याह षड्भिः । एकः स्वशक्तिव्यतिरिक्तकारकान्तरशून्यः नारायणः कारणार्णवशायी कालकलया कालशक्त्या संहृत्य एक एवेति ईश्वरान्तराभावादेकः सदैवः तदानीं तु महासमष्टिव्यष्टीनां नाशादद्वितीयोऽभूत् आत्मैव आधारो यस्य सः अखिलानां शक्तीनामाश्रयः ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

कलहः कलहहेतुः ॥ १० ॥

इषुकृतः शिक्षितमाह । मन इत्यादिना । अतन्द्रितः तन्द्राजये जितासनः आसनजये जितश्वासः सन् वैराग्ययोगेन विषयेभ्यो वार्यमाणमभ्यासयोगेन ध्रियमाणं स्थिरीक्रियमाणम् मन एकत्र सर्वप्रधाने भगवति संयुञ्ज्यात् ॥ ११

आश्रयस्य सर्वप्रधानत्वं जगदाधारतया दर्शयन् वैराग्याभ्यासयोगेनेति पदं विवृणोति । एतस्मिन्नेव । "द्यावापृथिव्यौ विधृतौ तिष्ठत" इत्यादिश्रुतिप्रसिद्धे पुरुषोत्तमे यदेतद्विश्वं यस्मिंस्तस्मिन्नेव परमानन्दरूपे मनः लब्धपदं प्राप्तास्पदं सत् वृद्धेन सत्त्वेन रजस्तमश्च शनैः शनैर्विधूय कर्मरेणून् कर्मसु रेणुवत्क्षुद्राणि काम्यानि निषिद्धानि च कर्माणीत्यर्थः । मुञ्चति अत एवानिन्धनमुभयलोकभोगसङ्कल्पवर्जितं सत् निर्वाणं ध्येयाकारैकप्रावण्यमुपैति ॥ १२ ॥

एवमुक्तप्रकारेणात्मनि परमात्मन्यवरुद्धचित्तो नियमितचित्तो यदा भवति तदा बहिरन्तरं वा किञ्चिदपि न वेद परमानन्दसंप्लवे लीनत्वात् यथा इषौ गतात्मा तदृजुकरणे निवे-

एक एवाद्वितीयोऽभूदात्माधारोऽखिलाश्रयः ।
कालेनाऽऽत्मानुभावेन साम्यं नीतासु शक्तिषु ।
सत्त्वादिष्वादिपुरुषः प्रधानपुरुषेश्वरः ॥ १७ ॥
परावराणां परम आस्ते कैवल्यसंज्ञितः ।
केवलानुभवानन्दसन्दोहो निरुपाधिकः ॥ १८ ॥
केवलात्मानुभावेन स्वमायां त्रिगुणात्मिकाम् ।
सङ्क्षोभयन् सृजत्यादौ तया सूत्रमरिन्दम ! ॥ १९ ॥
तामाहुस्त्रिगुणव्यक्तिं सृजन्तीं विश्वतोमुखम् ।
यस्मिन् प्रोतमिदम्विश्वं येन संसरते पुमान् ॥ २० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

निविष्टचित्तः इषुकारः पार्श्वे समीपे व्रजन्तं नृपतिं न वेद तद्वत् ॥ १३ ॥

सर्पाच्छिक्षितमाह । एकचारीति द्वाभ्याम् । एक एव चरेद्भिक्षुरित्येकचारित्वं भिक्ष्वन्तरापेक्षयोक्तम अत्र तु जनापेक्षया एकचारीति अनिकेतश्च सदाऽप्रमत्तश्च गुहाशयश्च गुहोपलक्षितपरकृतस्थानवासी चेत्यर्थः । आचारैः स्वासाधारणैः सदाचारैरलक्ष्यमाणः गुप्ताचार इत्यर्थः । एको मुख्यः ध्यानादावनुपम इत्यर्थः । स्वरतो वचनतश्चाल्पभाषणश्च मुनिः स्यात् सर्पवदिति शेषः ॥ १४ ॥

विपक्षे दोषमाह । गृहारम्भ इति । अध्रुवात्मनः अनित्यशरीरिणः गृहारम्भोऽतिदुःखाय भवति एवं बहुजनसङ्गप्रमत्तता स्वाचारख्यापनानि दुःखायैव भवन्तीत्यूह्यम् । परेणाश्वरादिना कृतगृहाविरूपं प्रविश्य सुखं यथा भवति तथा वर्द्धते ॥ १५ ॥

प्रकृतिपुरुषकालाद्यनन्तशक्तिधरान्निःसमानातिशयात् कारकसामग्रीनिरपेक्षाद्भगवतो मया विश्वसृष्टिसंहारादूर्णनाभिदृष्टान्तेन सम्भावितावितिं अकुणादो संहारप्रकारमाहैक इति सार्द्धैस्त्रिभिः । एकः निःसमातिशयः स्वशक्तिभूतया मायया प्रकृत्याख्यया पूर्वसृष्टमिदं विश्वं कालकलया कालाख्यया शक्त्या संहृत्य एक एवाभूदित्युत्तरेणान्वयः ॥ १६ ॥

भाषा टीका ।

हे अरिंदम यदु महाराज ! इस उपदेश को मैंने उस से सीखा है जब कि मैं लोक के तत्त्व की जानने की इच्छा से लोकों में घूमता रहा ॥ ६ ॥

इस से यह निश्चय हुआ कि बहुतों के साथ वास होने से कलह होता है दो के साथ में भी बातें होती हैं तिस से कुमारी के कङ्कण की नाईं विरक्त एकलाही विचरा करै ॥ १० ॥

योगी को चाहिये कि स्थिर होकर रहै वैराग्य रखै आसन स्थिर करने का अभ्यास करै प्राणायाम करै तिस से स्थिर किये हुये मन को एक ठिकाने परमात्मा में युक्त करै ॥ ११ ॥

जिस भगवत् स्वरूप में यह मन लगजाता है तब धीरे धीरे कर्मों की वासनाओं को छोड देता है फिर सत्त्वगुण के बढने से रजोगुण तमोगुणको दवा कर कोई बाह्य अवलम्बन नहीं रहने से मन शान्ति को प्राप्त हो जाता है ॥ १२ ॥

तवही परमात्मा के विषे चित्त के रुक जाने से बाहर भीतर कुछ भी नहीं जानता है जैसे कि तीर के बनाने वाला उसी में मन के लगे रहने से सामने ही राजा की फौज गई तौ भी नहीं जानता हुआ यह बात शरकार से सीखी है ॥ १३ ॥

एकला घूमें घर का नियम नहीं रखै सावधान से रहै गुफाओं में सोवै थोडा बोलै अपने आचारों से अलक्षित रहै ऐसा मुनी होवै ॥ १४ ॥

क्षणभंगुर शरीर के वास्ते घर का आरम्भ करना दुःख दायक है और व्यर्थ है तिस से सर्पतो परके बनाये हुये घर में रहकर सुख से बढता है यह बात सर्प से सीखी है ॥ १५ ॥

एक नारायण देव अपनी माया से पहिले सृजे हुये इस जगत् को काल की कला से कल्पांत मे संहार करते हैं ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एक एवाद्वितीयः सजातीयविजातीयभेदशून्योऽभूत् कारणभूतासु सत्त्वादिषु शक्तिष्वपि साम्यं नीतासु सतीषु गुणसाम्यं प्रधानं तदुपाधिः पुरुषश्च तयोरीश्वरः ॥ १७ ॥

परावराणाम्परे ब्रह्मादयः अवरेऽन्ये च मुक्ता जीवास्तेषाम्परमः प्राप्य आस्ते कुतः कैवल्यसंज्ञितो मोक्षशब्दाभिधेयः तत्र हेतुः केवलो निर्विषयः स्वप्रकाशः आनन्दानां सन्दोहः समूहः परमानन्द इत्यर्थः । कुतः निरुपाधिकः ॥ १८ ॥

यथोर्णनाभिर्हृदयादूर्णां सन्तत्य वक्त्रतः ।
तया विहृत्य भूयस्तां ग्रसत्येवं महेश्वरः ॥ २१ ॥
यत्र यत्र मनो देही धारयेत्सकलं धिया ।
स्नेहाद्द्वेषाद्भयाद्वापि याति तत्तत्सरूपताम् ॥ २२ ॥
कीटः पेशस्कृतं ध्यायन् कुड्यां तेन प्रवेशितः ।
याति तत्सात्मतां राजन् ! पूर्वरूपमसन्त्यजन् ॥ २३ ॥
एवं गुरुभ्य एतेभ्य एषा मे शिक्षिता मतिः ।
स्वात्मोपशिक्षितां बुद्धिं शृणु मे वदतः प्रभो ! ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अतः केवलादेव सृष्टिं दर्शयति । केवलेनाऽऽत्मानुभावेन कालेन सूत्रं क्रियाशक्तिप्रधानं महत्तत्त्वं सृजति जीवसंसारहेतुभूते सूत्रे सृष्टेऽपि त्वं मा भैरिति सम्बोधयति । अरिन्दम ! अरीन् रागादीन् दमयितुं समर्थ ॥ १९ ॥

सूत्रस्यैव व्यक्तिशब्देनोच्यमानस्य तामिति स्त्रीलिङ्गेन परामर्शः त्रिगुणव्यक्तिं गुणत्रयकार्यम् अत एव विश्वतोमुखं नानाविधं त्रिगुणात्मकं विश्वमहङ्कारद्वारेण सृजन्तीम् त्रिगुणकार्यस्य सूत्रसंज्ञायां कारणमाह । यस्मिन्निति । कारणभूते समष्टिरूपे यस्मिन्निदं विश्वं प्रोतं ग्रथितम् " वायुर्वै गौतम ! सूत्रं वायुना वै गौतम सूत्रेणायञ्च लोकः परश्च लोकः सर्वाणि च भूतानि संदृब्धानी " तिश्रुतेः येन वाय्वात्मना प्राणरूपेण जीवः संसरति ॥ २० ॥

तदेवं शिक्षितमर्थमुक्त्वा दृष्टान्तमाह । यथेति । हृदयादुद्गताम् वक्त्रतो वक्त्रेण सन्तत्य प्रसार्य विहृत्य क्रीडित्वा ॥ २१ ॥

भगवद्ध्यानपराणां तत्सारूप्यं न चित्रमिति पेशस्कृतो भ्रमरविशेषाज्ज्ञातमित्याह । यत्र यत्रेति । सकलमेकाग्रम् ॥ २२ ॥

कुड्यां प्रवेशितो निरुद्धो भयेन ध्यायन् सात्मतां तत्सारूप्यम् साम्यतामिति पाठे त्वार्षता पूर्वरूपमसंत्यजन्नित्यस्यायमभिप्रायः यदा तेनैव देहेनान्यसारूप्यं दृश्यते तदा किं वक्तव्यं देहान्तरेण सारूप्यं घटत इति ॥ २३ ॥

स्वदेहादेव शिक्षितमाह । स्वात्मेति । स्वात्मनो देहाच्छिक्षिताम् ॥ २४ ॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

आत्मानुभावेन स्वप्रभावरूपेण कालेन "प्रभावं पौरुषं प्राहुः कालमेके यतो भय"मिति कापिलेयोक्तेः सारूपं प्रधानञ्च आनन्दानां समूह इति व्याख्यानेन स्वरूपशक्तिवैचित्र्यादप्राकृतानन्तविशेषशालित्वमभिव्यञ्जितम् ॥ १७ ॥

केवलात् सजातीयविजातीयभेदशून्यात् ॥ १८ ॥

केवलेनाखण्डेन त्रिगुणात्मिकां प्रधानैकरूपां सङ्क्षोभयन् विषमगुणां कुर्वन् ॥ १९ ॥

तामिति स्त्रीलिङ्गेन परामर्श इति । तच्छब्देन क्वचिद्विधेयपरामर्शकत्वस्यापि सिद्धान्तितत्वात् नित्यं यत् कर्म स यमः इतिवत् अतएव गुणत्रयस्यादिकार्यत्वादेव हे गौतम ! वायुः समष्टिप्राणः सूत्रं सूत्रशब्दवाच्यः संसृष्टानि सङ्ग्रथितानि वाय्वात्मरूपेण वायोः स्वरूपभूतेन ॥ २० ॥

ऊर्णनाभिरत्र दीर्घसूक्ष्मः कीटविशेषः तस्यैव वक्त्रेणोद्गिरणनिगरणादृष्टेः उद्गतामुत्पन्नां वक्त्रेण द्वारेण तयोर्वा दार्ष्टान्तिके अतिदेशेनानुवदति । एवमिति ॥ २१ ॥

तत्सारूप्यं भगवत्समानरूपतां भ्रमरविशेषात् भृङ्गीति ख्यातात् यत्र यत्रेति स्नेहादिना भरतादौ मृगसारूप्यादेर्दृष्टत्वात् अन्ते या मतिः सा गतिरिति न्यायाच्चेति भावः ॥ २२ ॥

जीवतोऽपि सारूप्ये दृष्टान्तविशेषमुदाहरति । कीट इति । तेन पेशस्कृता साम्यतामिति पाठे त्वार्षतेति साम्यस्य समत्वरूपत्वात् समत्वेऽपि समत्वत्वसत्त्वेऽनवस्थापातात् ॥ २३ ॥

एषा मतिरिति जातावेकवचनम् ॥ २४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

ज्ञानानन्दयोः कर्मकृतत्वेन संसारिव्यावृत्तिमाह । निरुपाधिक इति ॥ १८ ॥

केवलात्मानुभावेनेति केवलशब्दः परिकरान्तरव्यावर्त्तकः सूत्रशब्दः महत्तत्त्वपरः सूत्रं हि बहुतन्तुकार्यं स्वस्मिन् प्रोतानां मणीनामाधारश्च एवमहङ्कारादितत्त्वाधारत्वात् त्रिगुणप्रकृतिकार्यत्वाच्च सूत्रत्वं महत्तत्त्वस्य ॥ १९—२१ ॥

तत्तत्स्वरूपतां स्वरूपमसाधारणधर्मः तत्तुल्यतां यातीत्यर्थः ॥ २२ ॥

कीटस्य पेशान्तरेण स्वरूपैक्याभावात् याति तत्साम्यतामित्यनन्तरोक्तेश्च कुड्यास्पदं छिद्रं तत्साम्यशब्दो व्यधिकरणो ॥ २३—२४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एकः पुनः स्रक्ष्यमाणजगदेकोपादानकारणभूतः "एकमेवाद्वितीयं तदैक्षत बहु स्याम्" इत्यत्रेवात्रैकशब्दः अविभक्तनामरूपसूक्ष्मचिदचिद्विशिष्टकारणावस्थब्रह्मपरः एकत्वं चात्र सृष्टिदशायां नामरूपविभागनिबन्धनं बहुत्वं तत्प्रतिसम्बन्धि विवक्षितं वैशेषिकादिभिर्नित्यतयोक्तानामाकाशादीनामपि संहाराभिप्राय एवकारः अद्वितीयः निमित्तकारणान्तररहितः एक एवेत्युपादानस्य प्रस्तुतत्वेन निमित्तस्य बुद्धिस्थत्वात्परतन्त्ररूपचिदचिदात्मकविशेषणानां विहितत्वान्निषेधस्य विहितव्यतिरिक्तविषयत्वात् । स्वमायां त्रिगुणात्मिकां सङ्क्षोभयन् येन संसरते पुमानिति प्रकृतिपुरुषनित्यरूपत्वसूचकोत्तरवाक्यसङ्कोचापेक्षितत्वादेक एवेत्यस्याविभक्तनामरूपत्वावगतेश्च सृजत्यादौ तथा सूत्रमित्यनेनाद्वितीयपदस्य निमित्तान्तराभावत्वमवगम्यते अत्रैकमेवाद्वितीय इत्यस्य सजातीयविजातीयभेदशून्य इति व्याख्यानमनुचिता कालकलया संहृत्येति विजातीयकालस्य तदा सद्भावावगमात् स्वमायां त्रिगुणात्मिकां सङ्क्षोभयन्निति सत्त्वादिशक्तिषु साम्यं नीतासु इति गुणसाम्यावस्थाचिद्द्रव्यसद्भावावगमाच्च प्रधानपुरुषेश्वर इति सूक्ष्मावस्थयोस्तयोस्तन्नियाम्यत्वेन तच्छरीरतयावस्थानावगमाच्च अतो यथोक्त एवार्थः । कस्तर्हि सूक्ष्मावस्थचिदचित्कालाधार इत्यतो विशिनष्टि । अखिलाश्रय इति । अखिलानां चिदचिदादीनां सार्वज्ञ्यसर्वशक्तित्वाद्यनुगुणानां चाश्रयः कस्तर्हि तस्याश्रय इत्यतो विशिनष्टि । आत्माधार इति। आत्मा स्वयमेवाधारो यस्य सः अनन्याधारः "स्वे महिम्नि प्रतिष्ठित" इति श्रुतेरिति भावः। कालकलयेदं संहृत्यैक एवाद्वितीयोऽभूदित्युक्तमेवोपपादयति कालेनात्मानुभावेनेति। स्वशक्तिभूतेन कालेन निमित्तभूतेन सत्त्वादिषु शक्तिषु साम्यं नीतासु सतीषु कार्योपयोग्यपृथक्सिद्धविशेषणभूतेषु सत्त्वरजस्तमःसु सृष्टिदशायां वैषम्येणावस्थितेषु तामवस्थां विहाय साम्यं प्राप्य स्वस्मिन् लीनेषु सत्स्वित्यर्थः । प्रधानपुरुषेश्वरः स्वस्मिन्नविभाज्यतया सूक्ष्मावस्थावस्थितयोः प्रधानपुरुषयोर्नियन्तृत्वेनावस्थितः आदिपुरुषः कृत्स्नजगत्कारणपुरुषः ॥ १७ ॥

अत एव परावराणां परमः कार्यकारणावस्थचिद्द्रव्याद्यधिभूतः कैवल्यसंज्ञितः आस्ते तिष्ठति कैवल्यं हि नामरूपविभागरहिततत्त्वरूपाव्याकृतत्वं तत्संज्ञितः सदेव सौम्येदं तर्ह्यव्याकृतमासीदिति सदव्याकृतादिशब्दवाच्य इत्यर्थः। केवलशब्दो जाड्यदुःखसम्भेदव्यावर्तकः सन्दोहो चितितस्तेन तयोः परिमितत्वव्यावृत्तिः जाड्यदुःखासम्भिन्नानवधिकज्ञानानन्दस्वरूप इत्यर्थः । निरुपाधिक इत्यनेन ज्ञानानन्दयोः कर्मकृतत्वव्युदासः तेन सांसारिकजीवव्यावृत्तिः ॥ १८ ॥

अथ सृष्टिप्रकारमाह । केवलात्मानुभावेनेति । केवलशब्दः परिकरान्तरव्यावर्तकः आत्मनः स्वस्यानुभावः तदैक्षत बहु स्यामित्युक्तविधः सङ्कल्पः तन्मात्रेणैवेत्यर्थः। स्वमायां स्वशरीरभूतां निरतिशयसूक्ष्मदशापन्नां मायां सङ्क्षोभयन् ईषत् स्थूलदशापत्तिद्वारा परिणामोन्मुखीं कुर्वन् हे अरिमन्द ! आदौ तावत्तया मायया सूत्रं सृजति सूत्रशब्दो महत्तत्त्वपरः सूत्रं हि बहुतन्तुकार्यं स्वस्मिन्प्रोतानां मणीनामाधारश्च एवमहङ्कारादितत्त्वाधारत्वात्त्रिगुणप्रकृतिकार्यत्वाच्च सूत्रत्वव्यपदेशः ॥ १९ ॥

तदेवाह । तमिति । तं महान्तं महत्तत्त्वमिति यावत् त्रिगुणव्यक्तिं त्रिगुणप्रकृतिकार्यभूतं सृजन्तमहङ्कारादिपृथिव्यन्ततत्त्वपरंपरामिति शेषः । अत एव विश्वतोमुखं सर्वेषु कार्येषु मुखं प्राधान्यमाश्रयत्वेन यस्य तमाहुः मुखशब्दः प्राधान्यवाचकः यद्वा विश्वतोमुखं यथा तथेति क्रियाविशेषणम् अनेकधा सृजन्तं तामाहुस्त्रिगुणव्यक्तिं सृजन्तीमिति पाठे प्रकृतिसूत्रोपस्थापकत्रिगुणव्यक्तिशब्दापेक्षया सृजन्तीमिति स्त्रीलिङ्गनिर्देश इति यस्मिन्महतीदं विश्वं प्रोतम् अनेन त्रिगुणव्यक्तिमित्यनेन च सूत्रत्वरूपणे निमित्तमुक्तं भवति येन यदारब्धेन बुद्धीन्द्रियमनःप्राणात्मकसूक्ष्मशरीरेण युक्तः पुमान् जीवः संसरति देवमनुष्यादिस्थूलशरीरसंयोगवियोगात्मकजन्ममरणरूपसंसारतत्प्रयुक्तज्ञानविज्ञानविकाशसङ्कोचौ च प्राप्नोतीत्यर्थः । अयमेव हि जीवस्य संसारो नाम यः प्रकृत्यारब्धदेहसम्बन्धतद्वियोगप्रयोगप्रयुक्तज्ञानसङ्कोचविकासरूपावस्थान्वयः अत्र प्रधानपुरुषेश्वरोऽखिलाश्रय इति चोक्त्वा येन संसरते पुमानित्युक्तेरिदमवगम्यते यत्परमात्मविशेषणीभूतजीवस्वभावस्य सङ्कोचविकासरूपावस्थाविशेष इति सृजन्तीं विश्वतो मुखमित्यनेन त्वहंकारादिपृथिव्यन्तसमष्टिपरंपरा देवादिसृष्टिप्रपञ्चश्च प्रधानगत इति एवं च विशिष्टस्योपादानत्वं साक्षादवस्थाश्रयत्वं प्रधानपुरुषयोरेव द्वारा तु परमात्मनोऽपीति फलितं सङ्क्षोभयन् सृजतीति कर्तृत्वनिर्देशेन निमित्तकारणत्वं तच्च विशेष्यांशस्यैवेति फलितम् ॥ २० ॥

तदेतदूर्णनाभिदृष्टान्तेनाववोधयतीत्यभिप्रत्याह। यथेति। ऊर्णा तन्तुसङ्घातप्रकृतिर्नाभौ यस्य सः कीटविशेषः स्वशरीरैकदेशभूताद्धृदयादुद्गतामूर्णां वक्त्रेण सन्तत्य प्रसार्य तयोर्णया विहृत्य विहारं कृत्वा क्रीडित्वेत्यर्थः । पुनस्तामूर्णां ग्रसति तथा महेश्वरोऽपि कार्यकारणयोरनन्यत्वाभिप्रायकस्तया तामिति स्त्रीलिङ्गनिर्देशः तया विहृत्येत्यनेन दार्ष्टान्तिके कार्यस्य जगतो भगवत्क्रीडोपकरणत्वं प्रदर्शितम् ऊर्णनाभिरूर्णां सन्तत्येति स्रष्टृत्वोक्त्या निमित्तकारणत्वम्। ननूर्णां सन्तत्येत्यनेनोर्णाया एव तन्तुसन्तानात्मिकावस्थाश्रयत्वावगमात्तद्विशेष्यांशे तदनवगमात्तस्यानुपादानत्ववद्दार्ष्टान्तिकेऽपि परमात्मशरीरभूतयोश्चिदचितोरुपादानत्वसिद्धावपि विशेष्यभूतपरमात्मनस्तदसिद्धिः। मैवं विशेषणांशस्यावस्थाश्रयत्व निर्वाहकत्वमात्रेणैव विशेष्यांशस्यापि उपादानत्वसिद्धेः नास्माभिर्विशेष्यांशस्याद्वारकावस्थाश्रयत्वमभ्युपगतं किन्तु सद्वारकावस्थाश्रयत्वं न च सद्वारकावस्थाश्रयत्वमपि न दृष्टान्तेऽवगम्यत इति वाच्यं विशेष्यांशोपादानत्वस्य विशेषणगतावस्थाश्रयत्वनिर्वाहकत्वरूपत्वेन तस्य दृष्टान्तेऽप्यवगमात् नहि तत्र विशेष्यांशभूतजीवमन्तरेणोर्णाया अवस्थाश्रयत्वासिद्धिः किञ्चोर्णनाभेरसर्वज्ञस्यासर्वशक्तेः कार्यान्तरात्मतयानुप्रवेशनसामर्थ्याभावेऽपि दार्ष्टान्तिके ब्रह्मणः सर्वशक्तेः सर्वज्ञस्य "तत्सृष्ट्वा तदेवानुप्राविशत् तदनुप्रविश्य सच्च त्यच्चाभवदि"ति तत्तत्कार्यानुप्रवेशतत्तद्रूपताभवनस्य श्रुतत्वादुपादानत्वं निर्व्यूढमेव किञ्च कारणावस्थप्रकृतिपुरुषशरीरकतया तन्नियन्तृत्वात् कार्यावस्थतच्छरीरकतया तन्नियन्तृत्वस्यान्यादृशत्वात् तन्नियन्तृत्वरूपावस्थाश्रयत्वमद्वारकमेव विशेष्यभूतब्रह्मनिष्ठमिति तन्निर्व्यूढमित्यलं बहुना निमित्तविस्तरेण ॥ २१ ॥

केनापि भावेन नित्यमुक्ताविभ्रंशिनारायणं ध्यायन् तत्सरूप्यं यातीति सुपेशस्कृदाख्यभ्रमरविशेषादवधृतमित्याह। यत्रेति । धिया

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

निश्चयात्मिकया बुद्ध्या यत्र यत्र विषये मनः सङ्कल्पविकल्पात्मकमन्तःकरणं सकलं निश्चलं यथा तथा यः स्नेहाद्यन्यतमेन भावेन धारयेत्सः तत्सरूपतां तत्समानरूपतां तत्तत्साधर्म्यमिति यावत् याति प्राप्नोति तत्तत्स्वरूपतामिति पाठे स्वरूपस्य भावः स्वरूपतामिदमित्थमिति प्रतीताविदमित्थमिति प्रतीतिविषयतां तत्तुल्यतामिति यावत् कीटस्य कीटान्तरेण स्वरूपैक्यासम्भवात् याति तत्साम्यतामित्यनन्तरोक्तश्लोकस्यायमेवार्थः ॥ २२ ॥

उक्तेऽर्थे दृष्टान्तमाह । कीट इति । तेन पेशस्कृता स्वकुड्यां प्रवेशितः निरुद्धः अत एव भयेन पेशस्कृतं ध्यायन् पूर्वरूपमसंत्यजन्नेव तत्सभतां याति तेन पेशस्कृता समता तत्समता तां तत्सात्म्यतामिति पाठे तेन साम्यं यस्य तस्य भावस्तत्ता तामित्यर्थः । तत्सात्मतामिति च पाठः तत्रात्मशब्दो देहपरः तेन सम आत्मा यस्य तस्य भावस्तत्ता तां तत्समानदेहत्वमित्यर्थः । तत्स्वात्मतामित्यपि पाठः तत्राप्यात्मशब्दः पूर्वदेहपरः तस्य स्वशब्देन षष्ठ्यन्तेन समासः तस्य तच्छब्देन कर्मधारयः तच्छब्दो ध्येयाकारपरामर्शकः तत्स्वात्मतां तत्सारूप्यं पूर्वरूपमसंत्यजन्नित्यनेन कैमुत्यन्यायो विवक्षितः पूर्वरूपमसंत्यजन्नेव याति किमुत संत्यजन्नित्यर्थः ॥ २३ ॥

तदेवमुक्तगुरुभ्यः शिक्षितानि प्रदर्श्येदं गुर्वन्तरात् शिक्षितस्योपलक्षणमित्यभिप्रेत्य स्वदेहाच्छिक्षितमाह । एवमिति । स्वात्मा स्वदेहः तस्माच्छिक्षितां बुद्धिं मे मत्तः शृणु ॥ २४ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कालादीनां तदा सत्त्वात् कथमिदमुपपद्यते इति तत्राह । अद्वितीय इति । एतादृशोऽन्यो नास्तीत्यभिप्रेत्योच्यते न तु सर्वात्मना सर्वनिषेधेन तथा सति सर्वस्य तेनैक्यमुपपन्नं स्यान्न च तद्युक्तं कुतोऽत्राह । अखिलाश्रय इति । नह्याधाराधेययोरैक्यं क्वापि दृष्टचरं नन्वेतद् दृष्टान्तेन तदाधारान्तरकल्पनं स्यादत्राह । आत्माधार इति । नन्वेतद्युक्तिविरुद्धमत्राह । ईश्वर इति । एतदेव विवृणोति । कालेनेति । आत्मनः स्वस्यानुभवेन तत्तत्कालोचितसृष्ट्यादिभावसूचकेन कालेन तदन्तर्यामिणा सत्त्वादिगुणवाच्यासु शक्तिषु साम्यं साम्यावस्थां नीतासु सतीषु प्रधानपुरुषयोर्ब्रह्मरुद्रयोरीश्वरः आस्ते तदा किन्नामेत्यत्राह । कैवल्येति । समाधिकरहित इति सत्त्वादिगुणानां शक्तिशब्दवाच्यत्वे किं प्रमाणमित्येतच्चोद्यम्—

प्रकृतिश्च गुणाश्चैव शक्तयस्ताश्च कनः स्मृताः ॥
विष्णोः स्वरूपभूता तु शकनाच्छक्तिरुच्यते ।

इत्यनेन परिहृतमिति ज्ञातव्यं कालप्रकृत्यादिप्रवर्तनोदासीनत्वाभिप्रायेणैक इति वा पुनरुक्तम्—

कालप्रकृतिजीवाद्यौ लये स्वप्रवर्तनात् ॥
तन्निमित्तस्य कार्यस्य विष्णुरेक इतीर्यते ।
स हि कालादिकं सर्वं वर्तयत्यमितद्युतिः ॥

इति वचनात् ॥ १७—१८ ॥

संहारप्रकारमुक्त्वा तस्मात्सृष्टिप्रकारमाह । केवलेति । निरुपाधिको जडदेहरहितः कालेन कालान्तर्यामिणा आत्मनः स्वस्मात् अनुभावो जन्मव्यक्तिर्यस्य स तथा तेन स्वमायां स्वाधीनप्रकृतिं संक्षोभयन् सृष्ट्यभिमुखीं कुर्वन् तया प्रकृत्या सूत्रं प्राणं ब्रह्माणं च सृजति मायायाः स्वरूपमाह । तामिति विश्वतो मुखं सर्वदिक्षु यथा मुखं भवति तथा सृजन्तीं यस्मिन् प्रकृतिस्वरूपे येन प्रधानेन प्रकृतौ विलीनः संसारमेतीति श्रुतिः कालेन सृष्ट्युपहितेन नैतावता सापेक्षत्वमात्मानुभावेन स्वसामर्थ्येनेति च ॥ १९–२० ॥

अत्रोदाहरति । यथेति । ऊर्णां लालां वक्त्रतो मुखेन सन्तत्य विसृत्य ग्रसति यथेच्छम् ॥ २१ ॥

पेशस्कृतः शिक्षितां बुद्धिमाह । यत्रेति । देही यत्र स्नेहसंश्लिष्टधिया मनो धारयेत् तत्तत्सरूपतां तस्य तस्य सदृशरूपतां याति अत्रेदं तात्पर्यं स्निग्धया धिया ध्यायति चेत् स्निग्धरूपं सुखरूपं याति द्विष्टधिया चिन्तयति चेद्द्विष्टरूपं दुःखरूपं यातीत्यादि योज्यं तदुक्तम्—

भयादपि हरिं भक्त्या चिन्तयंस्तत्सरूपताम् ॥
पेशस्कारिवदायाति द्विषन् द्वेषस्वरूपतामिति ।

द्विष अप्रीतावि धातोः सुखरूपस्यापि हरेर्द्वेषस्य दुःखरूपत्वात्तत्स्वरूपतां यातीतियुक्तम्—

सुखरूपस्य विद्वेषो दुःखरूप इतीर्यते ॥
तस्माद्दुःखं सदा याति द्वेषवान् पुरुषोत्तमे ।

इति च रावणादीनां रामादिद्वेषान्निर्दुःखानन्दभगवत्स्वरूपप्राप्त्युक्त्या सुखावाप्तिरिति श्रुतेः कागतिरिति चेदुच्यते तत्र रक्षोरूपादीनां द्वेषाद्दुःखावाप्तिर्जयादीनामेव तत्स्वरूपप्रवेशेन सुखावगतिः—

नृसिंहद्वेषतो दुःखं रक्षोरूपेण रावणः ॥
अगाच्च रामविद्वेषाच्छिशुपालस्तथैव च ।
ततो भक्त्या परं यातो द्वेषरूपात्तमोगतिरिति ॥
तस्मात्सर्वगुणोद्रेकिविद्वेषात्सर्वदोषवान् ॥
भवेदिति सरूपत्वं द्वेषादेः पुरुषस्य हीति

मानात् यथोपासनैः फलानवाप्तौ श्रुतिव्याकोपश्च स्यात् तं यथा यथोपासते तदेव भवतीति तं भूरिति देवा उपासाञ्चक्रिरे ते बभूवुस्तस्माद्धाप्येतर्हि सुप्तो भूर्भूरित्येव प्रश्वसित्यभूतिरित्यसुरास्तेह पराबभूवुरित्यादिश्रुतेः ॥ २२ ॥

अत्रोदाहरति । कीट इति । ननु भवदिष्टार्थे विषमुदाहरणं द्वेषात्तत्समताप्राप्त्यवगमादुच्यते मह्यं भोजनं दास्यतीति स्नेहस्य बाहुल्येन क्रमेणाल्पस्य द्वेषस्य सर्वात्मना निवर्तनेन स्नेहस्य प्रवर्धनेन च तत्समतावाप्तिरिति—

सत्यप्यत्यल्पविद्वेषे भोजनं दास्यतीति तु ।
स्नेहबाहुल्यतः कीटः पेशस्कारिसमो भवेत् ॥
द्वेषे सर्वात्मना नष्टे स्नेहे चैव विवर्धति ।
सरूपता तदैवस्यात्कीटस्यैवं हरेरपीति ॥

किञ्च हरेः फलदातृत्वविशेषात्पेशस्कृतस्तदभावादल्पद्वेषोऽपि हरेः प्रसादाजनक इत्यनयोर्न सर्वसाम्यं लोके च तथादर्शनात्—

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अत्यल्पोऽपि हरेर्द्वेषः स्नेहस्यानुदयङ्कुरः ।
सोऽयं विशेषो नान्यस्य फलदाता च केशवः ॥
नहि पेशस्कृतः किञ्चित्फलदातृत्वमिष्यते ।
स्वातन्त्र्याद्विद्विषां चैव केशवो न सुखप्रदः ॥

इतिवचनात् ॥ २३ ॥

उपसंहरति । एवामिति । स्वदेहाच्छिक्षितमतिमाह । स्वात्मेति । देहो मम गुरुरित्यवेहीत्यन्वयः ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

कालेनेति युग्मकम् । आत्मानुभावेन स्वप्रभावरूपया शक्त्या आदिपुरुषः महत्स्रष्टाख्यः प्रथमः पुरुषः प्रधानपुरुषेश्वरः प्रकृतेर्जीवानाञ्च नियन्ता परेषां स्वीयांशानाम् अवरेषां विभिन्नांशानाञ्च परममाश्रयोऽसौ कैवल्यसञ्ज्ञितस्तदाख्ययाम्नातः सन्नास्ते तदानीमासीदित्यर्थः । केवल एव कैवल्यः स्वार्थे ष्यञ् चातुर्वर्ण्यवत् तत्र केवलत्वे इति स्वगतभेदं दर्शयति केवलेति स्वरूपशक्तिवैशिष्ट्यात् केवलानां शुद्धानां स्वरूपभूतानामनुभावानां यः सन्दोहस्तद्रूपः केवलत्वं दर्शयति। निरुपाधिक इति। तदुक्तं तृतीये सुप्तशक्तिरसुप्तदृगिति ॥ १७—१८ ॥

स्वरूपशक्तिमेव स्थापयन् सृष्टिं योजयति । केवलेति । सृष्टिकाले महावैकुण्ठनाथादाविर्भूय स एव शुद्धस्वरूपप्रभावरूपया शक्त्या त्रिगुणात्मिकां प्रधानैकरूपां स्वमायां सङ्क्षोभयन् सूत्रं सृजति ॥ १९ ॥ २० ॥

तदेतच्च यत्किञ्चिदंशेन कीटविशेषं गुरुं मत्वा अवगतमित्याह । यथेति । ऊर्णनाभिरत्र दीर्घसूक्ष्मः कीटविशेषस्तस्यैव वक्त्रेणोद्गिरणनिगरणादृष्टेः ॥ २१—२३ ॥

एषा मतिरिति जातविवेकत्वम् ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

आत्मानुभावेन स्वप्रभावरूपेण कालेन शक्तिषु सत्त्वादिषु साम्यं नीतासु सतीषु प्रधानस्य मायायाः पुरुषाणां जीवानां च नियन्ता परावरेषां मुक्तबद्धजीवानां परम आराध्यः केवल एव कैवल्यः स्वार्थे ष्यञ् कैवल्य इति संज्ञा जाता यस्य सः ॥ १७ ॥

जगत्पालनादिव्यापाराभावात् केवलश्चानुभवानन्दसन्दोहरूपश्च सः उपाधिर्माया तस्यास्तदानीं सुप्तत्वान्निरुपाधिकः तदुक्तं तृतीये सुप्तशक्तिरसुप्तदृगिति ॥ १८ ॥

संहारं दर्शयित्वा सृष्टिं दर्शयति । केवलेन आत्मानुभावेन चिच्छक्तिप्रभावेण स्वमायां प्रधानं प्रबोध्य स्वांशेन संक्षोभयन् सूत्रं क्रियाशक्तिं प्रधानं महत्तत्त्वं सृजति ॥ १९ ॥

तामिति स्त्रीलिङ्गेन सूत्रस्यैव परामर्शः तत् सूत्रमेव त्रिगुणव्यक्तिं गुणानां कार्यमाहुरित्यर्थः । कीदृशीं विश्वतो मुखं नानाविधं त्रिगुणात्मकं विश्वमहंकारेण द्वारेण सृजन्तीं त्रिगुणकार्यस्य महत्तत्त्वस्य तस्य सूत्रसंज्ञायां कारणमाह । यस्मिन् कारणभूते सूत्रे समष्टिरूपप्राणे विश्वमिदं प्रोतं तथाच श्रुतिःवायुर्वै गौतम ! तत्सूत्रं वायुना गौतम सूत्रेणायं च लोकः परश्च लोकः सर्वाणि भूतानि संसृष्टानीति येन चाध्यात्मरूपेण प्राणेन जीवः संसरति ॥ २० ॥

ऊर्णनाभिर्माकडीति ख्यातः कीटविशेषः हृदयादुद्गतां वक्त्रतः वक्त्रेण सन्तत्य प्रसार्य विहृत्य क्रीडित्वा ॥ २१ ॥

भगवद्ध्यानपराणां तत्सारूप्यं न चित्रमिति पेशस्कृतो भ्रमरविशेषाज्ज्ञातमित्याह । यत्रेति द्वाभ्याम् । सकलमिति मनस एकस्यापि वृत्तेर्यदान्यगामित्वं न स्यात्तदैव देही ध्येयसारूप्यं लभते नान्यथेत्यर्थः ॥ २२ ॥

कीट इति । तेन पेशस्कृता तत्सात्मतां तत्समानरूपतां साम्यतामिति पाठे आर्षता पूर्वरूपं पूर्वदेहम् असन्त्यजन्निति ध्यातृदेह एव ध्येयतुल्याकारं स्यात् यथा ध्रुवादीनां कचित्तया ध्यातॄणां भक्तानां दृश्यमानो देहत्यागस्तु भक्तियोगस्य रहस्यत्वरक्षार्थं मतान्तरोत्खाताभावार्थं च भगवतैव मायया दर्श्यते यथा क्वचित् सच्चिदानन्दमयस्वदेहत्यागोऽपि तथा च तत्प्रमावाक्यं च मुनिद्वारा तथैव मायया प्रकाश्यते यथा "प्रारब्धकर्मनिर्वाणो न्यपतत् पाञ्चभौतिक" इति देहत्यागश्च तथैवामिति च ॥ २३ ॥

स्वदेहादपि शिक्षितमाह । स्वात्मेति ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

एक एव सजातीयभेदशून्य एव अद्वितीयः विजातीयभेदशून्यः अतएवात्माश्रयः अखिलाधारः अखिलानामविभक्तनामरूपाणां चिदचिच्छक्तीनामाधारः स्वगतभेदवान् अभूत् सत्त्वादिषु शक्तिष्वपि आत्मानुभावेन स्वशक्तिरूपेण प्रधानावस्थारूपं साम्यं गतासु सतीषु अत्रैकत्वादिना स्वभावत एवाभेदः अखिलाश्रयत्वेन स्वभावत एव भेदश्च दर्शितः एवं सति चिदचिद्ब्रह्मपदार्थानां स्वाभाविको भेदाभेदः सम्बन्धः यत्तु एक एवाद्वितीयः सजातीयविजातीयस्वगतभेदशून्योऽभूदिति तन्न अखिलाश्रय इति मूलग्रन्थविरोधात् ॥ १७ ॥

प्रधानपुरुषयोः प्रकृतिजीवात्मनोः ईश्वरः नियन्ता प्रधानपुरुषरूपाभ्यां स्वशक्तिभ्यां विश्वसृष्ट्यादि करोतीति भावः किं बहुना पराणां कारणभूतानां प्रकृतिकालादीनामवराणां कार्यभूतानां महद्बुद्धिपराद्धादीनां परमोऽवधिभूतः अत एव कैवल्यसंज्ञितः केवलपरमकारणपरैः स्वव्याकृतादिशब्दैरुच्यमानः आस्ते "सदेव सौम्य तद्धाव्याकृतमासी" दित्यादिश्रुतेः ॥ १८ ॥

केवलानां देहादिरहितानामनुशायिनां जीवानां सन्दोहः समूहो यस्मिन् सः निरुपाधिकः स्वगतानां जीवानामुपाधिभिः कर्मादिभिरसंस्पृष्टस्वरूपः आस्ते एवं भूतात्सजातीयभेदशून्यादनन्तशक्तेरेव सृष्टिं दर्शयति । केवलात्मेति । केवलः एकाद्वितीयादिशब्दवाच्यः निःसमानातिशयः विश्वहेतुस्तस्य य आत्मानुभावः एकोऽहं बहुस्यामित्येवं रूपोऽध्यवसायः तेन स्वशक्तिभूतां मायाम् ॥ १९ ॥

संक्षोभयन् सृष्ट्युन्मुखीं कुर्वन् तया सूत्रं क्रिया शक्तिं प्रधान

देहो गुरुर्मम विरक्तिविवेकहेतुर्बिभ्रत्स्म[1] सत्त्वनिधनं सततार्त्युदर्कम् ।
तत्त्वान्यनेन विमृशामि यथा तथापि पारक्यमित्यवसितो विचराम्यसङ्गः ॥ २५ ॥
जायात्मजार्थपशुभृत्यगृहाप्तवर्गान् पुष्णाति यत्प्रियचिकीर्षया [2] वितन्वन् ।
स्वान्ते सकृच्छ्रमवरुद्धधनः स देहः सृष्ट्वाऽस्य बीजमवसीदति वृक्षधर्मा ॥ २६ ॥
जिह्वैकतोऽमुमपकर्षति कर्हि तर्षा शिश्नोऽन्यतस्त्वगुदरं श्रवणं कुतश्चित् ।
घ्राणोऽन्यतश्चपलदृक् क्व च कर्मशक्तिर्बह्व्यः सपत्न्य इव गेहपतिं लुनन्ति ॥ २७ ॥
सृष्ट्वा पुराणि विविधान्यजयाऽऽत्मशक्त्या वृक्षान् सरीसृपपशून् खगदंशमत्स्यान् ।
तैस्तैरतुष्टहृदयः पुरुषं विधाय ब्रह्माऽवलोकधिषणं मुदमाप देवः ॥ २८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

महत्तत्त्वं सृजति कथम्भूतया माययेत्याकाङ्क्षायां मायां निरूपयति । तामित्यर्द्धेन । त्रयाणां सत्त्वादिगुणानां व्यक्तिं समुदायभूतां विश्वतो मुखं सर्वतोमुखं विश्वं सृजन्तीमाहुः । "अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपा" इत्याद्याः श्रुतयः कथम्भूतं सूत्रमित्याकाङ्क्षायां तन्निरूपयति । यस्मिन्नित्यर्द्धेन यस्मिन्सूत्रे इदं विश्व प्रोतं ग्रथितम् येन सूत्रेण स्वकार्यरूपे प्राणे प्रधानसूक्ष्मशरीरद्वारा पुमान् जीवः संसरति जन्ममरणप्रवाहरूपं संसारं प्राप्नोति तथाच श्रुतिः वायुर्वै गौतम सूत्रं वायुना वै गौतम सूत्रेणायं च लोकः परश्च लोकः सर्वाणि च भूतानि संदृब्धानीति ॥ २० ॥

शिक्षितमर्थमुक्त्वा दृष्टान्तमाह । यथेति । ऊर्णनाभिर्यथोर्णां हृदयादुद्धृतां वक्त्रतो वक्त्रेण सन्तत्य प्रसार्य तया विहृत्य भूयः पुनस्तां ग्रसति एवं महेश्वरः परमेश्वरो विश्वं वितत्य ग्रसति ॥ २१ ॥

भगवति स्नेहादिना मनोनियमनेन तत्सारूप्यं यातीति पेशस्कृतोऽवगतमित्याह । यत्र यत्रेति । सकलं सम्पूर्णम् ॥ २२ ॥

कुड्यां भित्तौ तदुपलक्षिते वृक्षादौ च प्रवेशितो निरुद्धः स तेन पेशस्कृता स्मरन् सारूप्यं यस्य कीटस्य स तथा तस्य भावस्तत्ता तां याति प्राप्नोति पूर्वरूपमसन्त्यजन्नित्यस्य कीटः पूर्वशरीरेणैव पेशस्कृच्छरीरसारूप्यं प्राप्नोतीत्यर्थः । मुमुक्षुस्तु प्राकृतशरीरं हित्वा अपहतपाप्मत्वादिगुणवत्त्वेनाप्राकृतशरीरित्वेन च भगवत्सादृश्यं प्राप्नोतीति विवेकः ॥ २३ ॥

चतुर्विंशतिगुरुभ्यः शिक्षितमुपसंहरति । एवमिति । स्वदेहाच्छिक्षितमाह । स्वात्मेत्यादिना । स्वात्मोपशिक्षितां स्वदेहादुपशिक्षिताम् ॥ २४ ॥

भाषा टीका ।

सकल जगत्के आश्रय सब आत्माओं के आधार परमात्मा एकही रहे उनके बरोबर दूसरा कोई नहीं रहा अपने प्रभाव रूप काल से सत्त्वादिगुणों की शक्ति सब जब समता को प्राप्त होगई तब प्रकृति पुरुष दोनों के ईश्वर परमात्मा आप ही रहे ॥ १७ ॥

बडे छोटे ब्रह्मादि मनुष्यादि सबके श्रेष्ठ कैवल्य नामक केवल आनंद अनुभव से परिपूर्ण रहे औप्राकृत उपाधि से रहित रहे ॥ १८ ॥

हे यदुजी ! फिर केवल अपने आत्मा ही के प्रभाव से तीनों गुणवाली माया को चलायमान करके सृष्टि के आदि काल में उसी माया के द्वारा परमात्मा ने महत्तत्व को सृजा है॥१९॥

जिसमें यह सब जगत् पोहा हुआ है जिससे जीवको संसार होता है जो नाना प्रकार के तीनों गुणों वाली माया है उसीको तीनो गुणों के कार्य होने से सूत्र कहते हैं ॥२०॥

यह बात मकरी को देखकर जाना है जैसे कि मकरी अपने मुखमें से सूतको निकालती है फिर उससे विहार करके फिर ग्रस लेती है ऐसे परमेश्वर का सृष्टि औसंहार करना है ॥ २१ ॥

कोई प्राणि स्नेह से अथवा द्वेष से अथवा भय से अच्छी तरह मनको जहां लगावैगा तिसी २ के स्वरूप को प्राप्त होजावैगा ॥ २२ ॥

जैसे कि भृङ्गी एक कीडा दूसरे कीडे को लाकर अपने दीवाल में प्रवेश करदेता है तब वह कीडा उसके भय से उसके ध्यान करने से अपने पूर्व रूप को न छोडकर उस पेशकारी के स्वरूप को प्राप्त होजाता है ॥ २३ ॥

हे प्रभो यदुराजा ! इस प्रकार से मैंने इतने गुरुओं से इन बुद्धियों को सीखा है अब अपने शरारीर से जो बुद्धि सीखी है तिसको मेरे कहने से आप श्रवण करो ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

गुरुत्वे हेतुः विरक्तिविवेकयोर्हेतुः विरक्तिहेतुत्वमाह । सत्त्वनिधनमुत्पत्तिविनाशौ बिभ्रत्स्म किञ्च सततं सन्ततमार्त्युदर्कं दुःखमेवोत्तरफलं बिभ्रद्यद्वा सततार्तिरेवोदर्कं उत्तरफलं यस्य तत्सत्त्वनिधनं बिभ्रत विवेकहेतुत्वमाह । तत्त्वानीति । यथा यथावत्

(१) विड्भस्म सत्त्वेति शुकपक्षीय पाठः ॥ (२) यत्प्रियचिकीर्षु तत्रेति विजयध्वज० वीरराः० सिद्धान्तप्रदीपेषु पाठः ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एवमत्युपकारित्वेऽपि देहे नैवाऽस्था कर्तव्येत्याह तथापीति । पारक्यं श्वसृगालादिभक्ष्यमिति निश्चितवान् ॥ २५ ॥

सततार्त्युदर्कतां प्रपञ्चयति । जायेति द्वाभ्याम् । यस्य देहस्य प्रियचिकीर्षया भोगसम्पादनेच्छया जायादीन्सर्गान्वितन्वन् पुष्णाति पुरुषः कथम्भूतः सकृच्छ्रं यथा भवति तथावरुद्धानि सञ्चितानि धनानि येन सः देहविशेषणं वा सदेहः स्वान्ते स्वस्यायुषोऽन्तेऽवसीदति नश्यति किञ्च देहनाशेऽपि न दुःखसमाप्तिरित्याह । अस्य पुरुषस्य देहान्तरबीजं कर्म सृष्ट्वेति । वृक्षस्येव धर्मो यस्य सः ॥ २६ ॥

किञ्च जिह्वेति । अमुं देहं तदभिमानिनं पुरुषं वा एकतो रसं प्रति जिह्वा अपकर्षन्त्याच्छिनत्ति कर्हि कदाचित्तर्षा पिपासा जलं प्रति शिश्नो व्यवायं प्रति त्वक् स्पर्शं प्रति उदरमन्नमात्रं प्रति श्रवणं शब्दं प्रति घ्राणो गन्धं प्रति चपलदृक् रूपं प्रति क्व कचित्स्वस्वविषयं प्रति कर्मशक्तिः अन्यदपि कर्मेन्द्रियम् लुनन्ति त्रोटयन्ति ॥ २७ ॥

तदेवं देहो गुरुरित्यादिभिस्त्रिभिर्विरक्तिविवेकहेतुत्वमुपपाद्येदानीमस्य देहस्यातिदुर्लभत्वं दर्शयन्नीश्वरनिष्ठां विधत्ते । सृष्ट्वेति द्वाभ्याम् । पुराणि शरीराणि पुरुषं पुरुषदेहम् ब्रह्मणोऽवलोकायाऽऽपरोक्ष्याय धिषणा बुद्धिर्यस्मिंस्तम् तदुक्तम्, तासां मे पौरुषी प्रियेति, श्रुतिश्च 'पुरुषत्वे चाविस्तरामात्मे' त्यादिः ईश्वरो हि करणाधिष्ठात्रीरग्न्यादिदेवता वागादिभिः सह सृष्टवान् ताश्च तं प्रति भोगार्थं शरीरमयाचन्त स च ताभ्यो गोशरीरमश्वशरीरं पुरुषशरीरं यथाक्रममानीतवान् ततस्ता देवताः सोऽस्त्रीवद्यथाऽऽयतनं चक्षुरादिस्थानमस्मिन्देहे प्रविशतेति तदाह । ताभ्य इत्यादि । तथा ताभ्यो गामानयत्ता अब्रुवन्न वै नोऽयमलमिति ताभ्योऽश्वमानयत्ता अब्रुवन्नवै नोऽयमलमिति ताभ्यः पुरुषमानयत्ता अब्रुवन्सुकृतं बतेति च ॥ २८ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी ।

देहो मानुषलक्षणोऽयं पूर्वार्धे विभ्रदित्यस्यानुक्तिगौरवमतो यद्वेति अनेन देहेनैव विमृशामि अन्यत्रैतादृशबुद्ध्याद्यभावाद आस्था विश्वासः ॥ २५ ॥

सकृच्छ्रं सपरिश्रमं स्वस्य देहस्य यदायुस्तस्यान्ते स देहोऽवसीदति नश्यति वृक्षधर्मेति वृक्षो यथा वृक्षान्तरबीजं सृष्ट्वा नश्यति तद्वत् ॥ २६ ॥

उदरं कर्तृ अन्नमात्रं स्वभरणार्थमाकर्षति स्वस्वविषयम् आदानगमनादिकं प्रति अन्यदपि कर्मेन्द्रियं हस्तपादादि एवं सर्वाणीन्द्रियाणि देहाभिमानिनं पुरुषं त्रोटयन्ति तत्रानुकूलो दृष्टान्तः बह्व्य इति ॥ २७ ॥

उपपाद्य हेतुरूपया युक्त्या संसाध्य तत्र सततार्त्युदर्कत्वाद्विरक्तिहेतुत्वं साधनीयं ज्ञानसामग्रीसद्भावात्तु विवेकहेतुत्वमिति ज्ञेयम् अयं प्रयोगः मनुष्यदेहो विरक्तिहेतुः सततार्त्युदर्कत्वात् रोगादिवत् यन्नैवं तन्नैवं यथा देवदेहः एवं मनुष्यदेहो विवेकहेतुः ज्ञानसामग्रीसद्भावात् देवदेहवत् यन्नैवं तन्नैवं यथा पश्वादिदेह इति अपरोक्षाय साक्षात्करणाय तन्मोदहेतुत्वं श्रुतिः पूर्वं व्याख्याता तदाह । निरुक्तकथायां श्रुतिप्रमाणमाह ताभ्यः करणाधिष्ठातृदेवताभ्यः गां गोशरीरमनयदसौ नोऽस्माकमयं गोदेहो भोगाद्यर्थं नैवालं न समर्थः एवमग्रेऽपि पुरुषं पुरुषशरीरं सुकृतं सुष्ठु कृतं बत हर्षे ॥ २८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

विड्भस्मसत्त्वानि यस्य निधनं विड्भस्मकृमिरूपावस्था वर्तत इति तत् विड्भस्मसत्त्वनिधनं विमृशामि अनेन तत्त्वानि च प्राकृतं हेयत्वेन विमृशामीत्यर्थः । पारक्यं क्रियाविशेषणम् परलोकानुगुणं विमृशामि विचारयामीत्यर्थः ॥ २५ ॥

यत्प्रियचिकीर्षुतया यस्य देहस्य प्रियचिकीर्षुतया सदेहः अस्य पुरुषस्य कर्मबीजं सृष्ट्वा वृक्षसमानधर्मा स्वान्तकालेऽवसीदतीत्यर्थः ॥ २६ ॥ २७ ॥

पुरुषं मनुष्यं विधाय देवः चतुर्मुखः ॥ २८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तावद्देहस्य गुरुत्वमाह । देह इति । गुरुत्वं हेतुत्वेन विशिनष्टि विवेकविरक्तिहेतुरिति । विवेको हेयोपादेयविभागः विरक्तिर्हेयविषये विरागः तयोर्हेतुः प्रवर्तकः तत्र विरक्तिहेतुत्वं वदन् विशिनष्टि । सत्त्वनिधनमुत्पत्तिविनाशौ विभ्रद्बिभ्राणः प्राप्नुवन्नित्यर्थः। सततार्त्युदर्कं सन्ततमार्तिर्दुःखमेवोदर्कमुत्तरोत्तरफलं बिभ्रत् यद्वा सततमार्तिरेव उदर्कं उत्तरकालो यस्य तत्सत्त्वनिधनं बिभ्रत् विवेकहेतुत्वमाह । तत्त्वानीति । अनेन देहेन तत्त्वानि प्राकृतानि यथावद्विमृशामि एवमुपकारित्वेऽपि तस्मिन्नास्थां न करोमीत्याह । तथापीति । पारक्यमिति श्वसृगालादिभक्ष्यमिति व्यवसितः निश्चयवानसङ्गः तस्मिन्नभिमानरहितश्चरामि ॥ २५ ॥

सततार्त्युदर्कतां प्रपञ्चयति । जायेति द्वाभ्याम् । यत्प्रियचिकीर्षुतया यस्य देहस्य प्रियं कर्तुमिच्छोर्भावस्तया तथा जायादिवर्गान् वितन्वन् सम्पादयन् अर्थकृच्छ्रे वित्तपरः पुष्णाति पुष्णातु ततः किमत आह । स्वान्त इति । यः पुमान् सकृच्छ्रं यथा तथाऽवरुद्धानि सञ्चितानि धनानि येन सः सदेहः देहसहितः देहीत्यर्थः। स्वान्ते स्वायुषोऽन्तेऽवसीदति क्लिश्यति नश्यति तेन देहेन वियुज्यते इत्यर्थः। देहवियोगेऽपि न दुःखपरिसमाप्तिरित्याह । अस्य देहान्तरस्य बीजं निदानभूतं कर्मात्मकं बीजं सृष्ट्वाऽवसीदतीति तत्कथं वृक्षस्येव धर्मो यस्य सः यथा विनङ्क्ष्यमाणो वृक्षो वृक्षान्तरबीजं सृष्ट्वा नश्यति तद्वदित्यर्थः ॥ २६ ॥

किञ्च एकतो रसं प्रति जिह्वाऽमुं देहिनमपकर्षति कर्हिचित्कदाचित्तर्षा पिपासा जलं प्रति शिश्नो व्यवायं प्रति त्वक् स्पर्शनं प्रति उदरमन्नं प्रति श्रवणं शब्दं प्रति घ्राणो गन्धं प्रति चपला दृग्दृष्टिः रूपं प्रति कर्मशक्तिर्वागादिकर्मेन्द्रियजालमपि क्व च तत्तत्प्रति नियतवचनादानगतिविसर्गादावपकर्षति इत्थं बह्व्यः सपत्न्यो गेहपतिं गृहस्वामिनमिव लुनन्ति त्रोटयन्ति ॥ २७ ॥

इत्थं देहस्य विवेकविरक्तिहेतुत्वमुपपाद्येदानीमस्यैव देहस्यातिदुर्लभत्वं दर्शयन्मुक्तिसाधननिष्ठां विधत्ते द्वाभ्याम् । सृष्ट्वेति । देवश्चतुर्मुखशरीरकः परमपुरुषः आत्मशक्त्या कार्योपयुक्तस्वापृथक्सिद्ध-

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

विशेषणभूतयाऽजया प्रकृत्या विविधानि पुराणि शरीराणि तेषां स्वास्वस्थानत्वसाम्यात्पुरशब्देन निर्देशः वैविध्यमेव दर्शयति द्वितीयान्तैः तत्र सरीसृपाः सर्पस्वभावा दंशा दंशनस्वभावाः जन्तवस्तांस्तावत्सृष्ट्वेति सम्बन्धः तैस्तैः सृष्टैरतुष्टहृदयं यस्य सः स्वस्याखिलचेतनोज्जीविषया प्रवृत्तत्वात्तेषां मुक्तिसाधनानुष्ठानानर्हत्वाच्चातुष्टहृदय इति भावः । पुरुषं मनुष्यं विधाय सृष्ट्वा मुदं हर्षमाप लेभे तत्र हेतुत्वेन पुरुषं विशिनष्टि । ब्रह्मावलोकधिषणं ब्रह्मदर्शनसमानाकारा धीरुपासनात्मिका मतिर्यस्मिन् ब्रह्मदर्शनसमानाकारोपासनात्मकयोगानुष्ठानयोग्यमित्यर्थः । ब्रह्मणोऽवलोकाय अपरोक्षाय धिषणा प्रीतियुक्ता मतिर्यस्मिन्निति वा ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कुतोऽत्राह । विरक्तीति । सत्त्वं बलज्ञानसमाहारो निधीयतेऽस्मिन् परमेश्वरे इति सत्त्वनिधनः तं सततमतिशयेनोरुचैरर्करूपः ज्ञानसुखरूपः इति सततात्मसुखार्को भगवांस्तं बिभ्रत् देहः विरक्तिविवेकहेतुत्वात्सत्त्वनिधनस्य सततात्मसुखार्कस्य हरेरभिव्यञ्जकत्वाच्च यथावत्तत्त्वविचारसाधनत्वाच्च गुरुत्वमित्यर्थः । तर्हि इयत्वं कुत इति तत्राह तथापीति । पारक्यं परकीयं मातृपित्रादेरधीनमित्यध्यवसितो निश्चितः ॥ २५ ॥

यो हरिणा करुणया मनुष्यजन्मप्रापितस्तेनानेन देहेन सर्वस्मात्प्रेष्ठं विना स्थते तस्यायं वृक्षबीजमिव संसारपरम्परारम्भकबीजमित्यनर्थहेतुरित्याह । जायेत्यादिना । जायादीनां प्रेयश्चिकीर्षया कर्माणि वितन्वन्यो जायादीन् पुष्णाति स वृक्षधर्मा वृक्षसमानोऽन्ते सुकृच्छ्रजायादिपोषणा पञ्चावरुद्धमनाः स्वकर्म बीजमिव स्थितं स्वदेहं सृष्ट्वाऽवसीदति नित्यक्लेशवान् भवतीत्यन्वयः यथैको वृक्षो बीजेन बीजान्तरपरम्परारम्भणहेतुस्तथायं देहोऽपि असज्जायादिपोषणलक्षणबीजैर्देहान्तरपरंपरारम्भकारणमित्यर्थः ॥ २६ ॥

अवसीदतीत्युक्तं विवृणोति । जिह्वेति । अमुं संसारिणं कर्मशक्तिः पापादिलक्षणापूर्वादृष्टशक्तिर्वा ॥ २७ ॥

अनेन सर्वभोगायतनेभ्यो विशिष्टज्ञानेन्द्रियादिमत्तया पुरुषार्थोपयोगित्वेनास्य श्रैष्ठ्यादनेन रसादिविषयान् विजित्य पुरुषार्थाय साधनानुष्ठानं विधेयमन्यथानर्थपरम्परा तदवस्थैवेत्युक्तं तत्र सर्वस्मादस्य शरीरस्य श्रैष्ठ्यं कथमवसीयत इति तत्राह । सृष्ट्वेति । अजया प्रकृत्या आत्मशक्त्या स्वाधीनसामर्थ्योपेतया पुराणि शरीराणि पुरुषं पुरुषशरीरमवबोधधिषणां ज्ञानाश्रयम् ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

देहो मानुषलक्षणोऽयम् अनेनैव देहेनैव विमृशामि अन्यत्रैतादृशबुद्ध्याद्यभावात् ॥ २५—३० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

गुरुत्वे हेतुः विरक्तिविवेकयोर्हेतुः तत्र विरक्तिहेतुत्वमाह । सत्त्वानिधनम् उत्पत्तिविनाशौ बिभ्रत् तत् कीदृशं सततार्त्तिरेव उदर्क उत्तरफलं यस्य तत् देहैकदेशः कुक्षिरपि द्वित्रिदिवसीयभक्ष्यमसंगृह्णन् विरक्त इवेति तस्मादव्ययसंग्रहं शिक्षेत विवेकहेतुत्वमाह । तत्त्वानीति । यथेति यथा तत्त्वानि विमृशामि तथैव श्रोत्रादीन्द्रियवता अनेनैव श्रीभगवत्प्रापकश्रवणकीर्त्तनादिमयं भक्तियोगमपि प्राप्नोमीत्यर्थः । यथा कश्चिद्रसिको महाभक्तः सर्वरसास्वाद्यपि रसाविष्टः किन्तु हरिरसासक्तोऽनुरागी स्यात् एवं जिह्वापि घृतादिसर्वरसास्वादिन्यपि न तत्तत्सम्पर्कवती किन्तु ताम्बूलरससम्पर्कवत्येव दृष्टा यत इयमरुणा स्यात् एवमत्युपकारिणि गुरावप्यस्मिन् देहे स्वीय इति स्थिर इति बुद्धिर्न कर्त्तव्येत्याह । पारक्यमद्य श्वो वा श्वसृगालादिभक्ष्यमित्यध्यवसितं निश्चयो यस्मिन् सः पारक्यमिति क्लीबत्वमार्षम् अतएवासङ्गः अत्रासक्तिरहितश्चरामि ॥ २५ ॥

ननु विरक्तिविवेकभक्तियोगप्रदातुः सर्वेष्वपि गुरुषु श्रेष्ठस्य देहस्यास्य नश्वरस्यापि सेवा परमासक्त्यैव कर्त्तुं युज्यते अन्यथा कृतघ्नत्वलक्षणो दोषः स्यादित्यतः कथमसङ्ग इति ब्रूषे सोऽयं विचित्रचरितोऽयं गुरुर्यतः परमासक्त्या सेव्यमानोऽप्ययं विवेकवैराग्यादिकं किमपि नोपदिशति प्रत्युत संसारमहान्धकूपे एव निःक्षिपतीत्याह । जायेतिद्वाभ्याम् । यस्य देहस्य प्रियञ्चिकीर्षया जायादीन् वितन्वन् विस्तारयन् सन् पुष्णाति यस्य देहस्य प्रीतिञ्चिकीर्षा चेदुत्पद्यते तर्हि जायादीन् सम्पाद्य तानेव पुष्णातीत्यर्थः । स देहः अवरुद्धधनः लुप्तविवेकादिवित्तः सन् स्वान्ते स्वस्यायुषोऽन्ते सकृच्छ्रं यथा स्यात्तथा अवसीदति नश्यति किञ्चास्य पुरुषस्य बीजं देहान्तरबीजं कर्म सृष्ट्वा येन पुनर्भवप्रवाहः स्यात् वृक्षस्यौषधिरूपस्येव धर्मो यस्य सः ॥ २६ ॥

तस्मादस्मै गुरवे देहाय केवलं प्राणधारणमात्रं भोजनं देयं तदप्यनासक्त्यैव एवमस्य गुरोर्गुरुशुश्रूषा असूयास्मै भोगाश्चेद्दीयन्ते तर्हि शृणु तत्त्वमित्याह । जिह्वेति । अमुं देहासक्तं पुरुषमेकतः रसं प्रति जिह्वा अपकर्षति अधः पातनार्थमाकर्षति आच्छिनत्ति कर्हि कदाचित्तर्षो पिपासा जलं प्रति शिश्नो व्यवायं प्रति एवं त्वगादयः स्पर्शादीन् प्रति कर्मशक्तिः कर्मेन्द्रियाणि च लुनन्ति त्रोटयन्ति ॥ २७ ॥

यस्मादयमपवर्गसाधक एक एव मनुष्यदेहः सृष्टस्तस्मादेनं नरकसाधनं न कुर्यादित्याह । सृष्ट्वेति । पुराणि शरीराणि पुरुषं मनुष्यदेहं ब्रह्मणः परमेश्वरस्यावलोके साक्षात्कारे धिषणा बुद्धिर्यत्र तं तथाच श्रुतिः पुरुषत्वे चाविस्तरामात्मेति तथा ताभ्यो गामानयत् ता अब्रुवन् नवै नोऽयमलमिति ताभ्योऽश्वमानयत् ता अब्रुवन् नवै नोऽयमलमिति ताभ्यः पुरुषमानयत् ता अब्रुवन् सुकृतं बतेति ॥ २८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तामेवाह । देहो गुरुरित्यादिना । देहस्य गुरुत्वं दर्शयितुं तं विशिनष्टि । विरक्तिविवेकहेतुरिति । विरक्तिहेतुत्वं दर्शयति । सत-

लब्ध्वा सुदुर्लभमिदं बहुसम्भवान्ते मानुष्यमर्थदमनित्यमपीह धीरः ।
तूर्णं यतेत न पतेदनुमृत्यु यावन्निःश्रेयसाय विषयः खलु सर्वतः स्यात् ॥ २९ ॥
एवं सञ्जातवैराग्यो विज्ञानालोक आत्मनि ।
विचरामि महीमेतां मुक्तसङ्गोऽनहङ्कृतिः ॥ ३० ॥
नह्येकस्माद्गुरोर्ज्ञानं सुस्थिरं स्यात्सुपुष्कलम् ।
ब्रह्मैतदद्वितीयं वै गीयते बहुधर्षिभिः ॥ ३१ ॥
श्रीभगवानुवाच ॥
इत्युक्त्वा स यदुं विप्रस्तमामन्त्र्य गभीरधीः ।
वन्दितोऽभ्यर्थितो राज्ञा ययौ प्रीतो यथागतम् ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तात्पर्यकं निरन्तरं दुःखमेवोत्तरोत्तरफलं यस्य तत्सत्त्वविधनमुत्पत्तिमरणं विभ्रत्स्म विवेकहेतुत्वं दर्शयति । तत्त्वानीति । यथा यथावत् तत्त्वानि चिदचिद्ब्रह्माख्यानि विमृशामि चिन्तयामि एवं यद्यपि शरीरमुपकारि तथापि पारक्यं श्वसृगालादिभक्ष्यमिति अवसितः कृतनिश्चयः असङ्गः देहादौ निःसङ्गो विचरामि ॥ २५ ॥

किञ्च संसृतिहेतुश्चायं देह इत्याह । जायेति । यस्य देहस्य प्रियचिकीर्षुतया सकृच्छ्रं यथा भवति तथा अवरुद्धधनः अवरुद्धं पित्रादिभ्यः संगृह्य स्वालये स्थापितं धनं येन स जनः जायादिकं वितन्वन् विस्तारयन् पुष्णाति सदेहः वृक्षधर्मा वृक्षवद्धर्मो यस्य सः अस्य संसारस्य पुनः पुनर्जन्ममरणरूपबीजं कर्म सृष्ट्वाऽवसीदति नश्यति ॥ २६ ॥

किञ्चेन्द्रियद्वारापि देहः संसृतिहेतुरित्याह । जिह्वैकत इति । अमुं जनं जिह्वा एकतो रसं प्रति अपकर्षति परमेश्वरभजनाद्वारयित्वा रसासक्तं करोति कर्हि क्वचित् तर्षा पिपासा एकतः पानं प्रति शिश्नोऽन्यतो व्यवायं प्रति त्वक् स्पर्शं प्रति उदरं भोजनं प्रति श्रवणं शब्दम्प्रति घ्राणो गन्धम्प्रति चपलदृग्रूपं प्रति क्व च क्वचित् स्वविषयं प्रति कर्मणि शक्तिर्यस्य तत्तथा कर्मेन्द्रियम् एकस्य बहुभिरपकर्षणे दृष्टान्तः यथा बह्व्यः सपत्न्यो गेहपतिं गृहकार्यासक्तं भर्तारं लुनन्ति स्वस्वकार्याभिमुखीकरणेन दृष्टकार्याद्वियुक्तं कुर्वन्तीत्यर्थस्तद्वत् ॥ २७ ॥

एवं देहस्य संसृतिहेतुत्वं द्वाभ्यां प्रदर्श्य मोक्षहेतुत्वं दर्शयति । सृष्ट्वेति द्वाभ्याम् । पुराणि शरीराणि पुरुषं पुरुषदेहम् ब्रह्मावलोकाय वृक्षसृपपश्वादिभङ्गगपक्षिपशुकदंशानाम धिषणा बुद्धिर्यस्मिन् तत् ॥ २८ ॥

भाषा टीका ।

वैराग्य तथा विवेक का हेतु यह शरीरहै सदा काल दुःख युक्त है उत्पत्ति नाश दोनों इस के होते हैं इस को मैं धारण करता हूं यह भी मेरा गुरु है इस देह से जैसे तैसे रहकर मैं तत्त्वों का विचार करता हूं फिरभी परायाहै ऐसा निश्चय करके सङ्ग छोडकर विचरता हूं ॥ २५ ॥

भार्या पुत्र धन पशु भृत्य घर कुटुम्बी इन सबों को इसी देह के प्रीति करने की इच्छा से पोषण करता है इतना विस्तार करता हुआ भी अन्त में धनादिक सबों को छोड कर फिर दूसरे देह का बीज बो कर वृक्षसरीका क्रिया वाला देह नष्ट होजाता है ॥ २६ ॥

इस देह को एक तरफ से रस के लिये जीभ खींचती है कभी प्यास खैंचती है कभी लिङ्ग इन्द्रिय मैथुन को खैंचता है त्वचा सुन्दर स्पर्श को खैंचता है उदर अन्न को खैंचता है श्रवण गीतादि सुनने को खैंचता है नाक सूंघने को खैंचता है कहीं चपलदृष्टि रूप को कहीं कर्मादिकों को हस्त पादादिक ऐसे बहुतसी सौतिन जैसी एक पती को खैंचे तैसे सब इन्द्रिय इस देह को हैरान करती हैं ॥ २७ ॥

परमात्मा ने सृष्टि के समय में अपनी शक्ति माया से वृक्ष सर्प पशु पक्षी डांश मच्छी आदि नाना प्रकार के शरीर बनाये परन्तु उन शरीरों से सन्तुष्ट नहीं भये फिर ब्रह्म के ज्ञान वाले इस मनुष्यशरीर को बनाया तब परमेश्वर सन्तुष्ट भये ॥ २८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तस्माद्बहूनां सम्भवानां जन्मनामन्ते मानुष्यमनित्यमप्यर्थदं पुरुषार्थप्रापकं दैवाल्लब्ध्वेदमनुमृत्यु अन्वनु निरन्तरं मृत्यवो यस्य तद्यावन्न पतेत्तावदेव तूर्णं शीघ्रं निःश्रेयसाय यतेत विषयः पुनः सर्वतः पश्वादियोनिष्वपि स्यादेव ॥ २९ ॥

तदेवं हेयोपादेयविवेकं बहुधा निरूप्येदानीं यदुक्तं त्वं तु कल्पः कविर्दक्ष इत्यादि तत्रोत्तरमाह । एवमिति । एवं बहुभ्यो गुरुभ्यः शिक्षितेन विशिष्टं ज्ञानमेवालोकः प्रदीपो यस्य सः

अवधूतवचः श्रुत्वा पूर्वेषां नः स पूर्वजः ।
सर्वसङ्गविनिर्मुक्तः समचित्तो बभूव ह ॥ ३३ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां
संहितायां वैयासिक्यामेकादशस्कन्धे
नवमोऽध्यायः ॥ ९ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सप्तम्यन्तं वा आत्मविशेषणम् आत्मनि स्थित एव महीं विचरामि ॥ ॥ ३० ॥

ननु किम्बहुभिर्गुरुभिर्नहि श्वेतकेतुभृगुप्रमुखैर्बहवो गुरव आश्रितास्तत्राऽऽह । नह्येकस्मादिति । बहुधा सप्रपञ्चनिष्प्रपञ्चभेदादिभिः असम्भावः नैते परमार्थोपदेशगुरवः किन्त्वन्वयव्यतिरेकाभ्यामात्मन्यसम्भावनादिमात्रनिवर्तकास्तेषां बहुत्वं युक्तमेवेति ज्ञानप्रदं गुरुमेकमेव वक्ष्यति मदभिज्ञं गुरुं शान्तमुपासीतेति उक्तश्च "तस्माद्गुरुम्प्रपद्येत जिज्ञासुः श्रेय उत्तमम्" इति ॥ ३१ ॥

विप्रो दत्तात्रेयः योगर्द्धिमापुरुभर्यां यदुर्हैहयाद्या इत्युक्तत्वात् यथागतं तथैव यदृच्छया ययावित्यर्थः ॥ ३२ ॥

भगवान् स्वीयं ब्रह्मवित्कुलमिति श्लाघते नः पूर्वेषां पूर्वज इति अत्र संग्रहश्लोकाः ।

> कपोतमीनहरिणकुमारीगजपन्नगाः ।
> पतङ्गः कुररश्चाष्टौ हेयार्थे गुरवो मताः ॥ १ ॥
> मधुकृन्मधुहर्ता च पिङ्गला च त्रयोऽस्त्रः ।
> उपादेयार्थविज्ञाने शेषाः पृथ्व्यादयो मताः ॥ २ ॥
> तदवान्तरभेदश्च तत्र तत्र स्फुटीकृतः ।
> अध्यायत्रितये चाष्ट नवाष्टावीरिताः क्रमात् ॥ ३ ॥ ३३ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
नवमोऽध्यायः ॥ ९ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी ।

तस्मात् मनुष्यदेहस्य दुर्लभत्वात् मानुष्यं मनुष्यदेहं दैवात् पूर्वसुकृतात् ॥ २९ ॥

तदेवं पञ्चविंशतिगुरुभ्यः शिक्षितार्थकथनप्रकारेण तत्र यदुप्रश्ने शिक्षितेन विश्वादिरूपः क्षमादिना आत्मनि स्वरूपे ब्रह्मणि स्थित एवेति न बाह्यविषये ममेच्छेति भावः ॥ ३० ॥

एते व्यावहारिकपदार्थाः अन्वयव्यतिरेकाभ्यां तत्तद्धर्माणां हेयोपादेयत्वाद्विधिनिषेधाभ्यामित्यर्थः । असम्भावना गुरूपदिष्टे सन्देहः आदिना विपरीतभावनाग्रहः ॥ ३१ ॥

यदृच्छयेति । साधुसङ्गस्य कर्मजत्वं पराहतम् ॥ ३२ ॥

समचित्तोऽभिन्नात्मनिष्ठो बभूव यद्वा स्वर्गापवर्गनिरयेषु समचित्तः एकान्तभक्तो बभूवेति कपोतादयोऽष्टौ हेयार्थे गुरव इति कपोतवत् सङ्गो हेयः मीनवद्रसासक्तिर्हेया हरिणवच्छब्दासक्तिर्हेया कुमारीकङ्कणवत् सजातीययोगिसङ्गोऽपि हेयः गजवत् स्पर्शासक्तिर्हेया सर्पवज्जनसङ्गनियतनिकेतादिकं हेयं पतङ्गवद्रूपासक्तिर्हेया कुररेण यथाऽऽमिषं त्यक्तं तथा धनादिपरिग्रहो हेय इत्यर्थः । मधुकृदादयस्त्रयो द्वयोर्हेयोपादेययोर्गुरवः तत्र मधुकृन्माधुकरीवृत्तिसारसङ्ग्रहावुपादेयौ तत्सजातीयमधुमक्षिकावत् सङ्ग्रहो हेयः मधुहर्तुः परदुःखदानेन सञ्चितग्रहणं हेयम् उद्यममन्तरैव देहनिर्वाहकभोग उपादेयः पिङ्गलाया आशामयी पूर्वावस्था हेया नैराश्यमुपादेयं पृथ्व्यादीनान्तु सहनादयः सर्व एव धर्मा उपादेयाः इति विवेचनीयं तेषां पृथ्व्यादीनामवान्तरभेद इति यथा पर्वतवृक्षभेदेन पृथ्व्या द्वैविध्यं यथा हरिणस्यावान्तरभेदः ऋष्यशृङ्ग इत्यादि यथास्माभिस्तत्र तत्र प्रकरणे स्फुटीकृतः व्याख्यानेन व्यक्तीकृत एव एवं प्रथमतः षडध्यायान् विहाय क्रमात् अध्यायानां यत्त्रितयं तस्मिन् तत्र सप्तमेऽष्ट गुरवः अष्टमे नव नवमे चाष्टौ गुरवः ईरिताः कथिताः ॥ ३३ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धीये
श्रीराधारमणदासगोस्वामिकृतदीपिकादीपने टिप्पणे
नवमोऽध्यायः ॥ ९ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

बहुसम्भवान्ते अनेकजन्मावसाने अनु मृत्यु यावन्नपतेत् तावद्यतेत विषयः खलु सर्वतः स्यात् निःश्रेयसयत्नस्य देशनियमो नास्तीत्यर्थः ॥ २९ ॥

आत्मनि विज्ञानमेव प्रकाशकं यस्य स विज्ञानालोकः ॥ ३० ॥

एतद्ब्रह्मेति ब्रह्मशब्दोऽत्र ज्ञानवाची इदं ज्ञानमद्वयं समाभ्यधिकरहितम् एतत्तुल्यं ज्ञानान्तरं नास्तीत्यर्थः ॥ ३१—३३ ॥

इति श्रीमद्भागवतव्याख्याने एकादशस्कन्धीये
श्रीसुदर्शनसूरिकृतशुकपक्षीये
नवमोऽध्यायः ॥ ९ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यत एवमतो बहूनां सम्भवानां जन्मनामन्तेऽतिदुर्लभमनित्यमप्यर्थदं समीहितपुरुषार्थप्रापकम् इदं समीहितमानुषं जन्म तुल्यसुखदुःखः सन्ननुमृत्यु अनुपृष्ठतो मृत्युर्यस्य तदिदं शरीरं यावन्न पतेन्न विपद्येत तावदेव तूर्णं झटिति निःश्रेयसाय मुक्तये यतेत यत्नं कुर्यान्नतु कामार्थमित्यर्थः । तस्य कामस्य सुलभत्वादिति भावः । तदाह । विषयः खलु सर्वतः स्यात्सर्वतः सर्वत्र श्वशूकरादिजन्मस्वपि विषयः स्यात्सुलभः स्यादित्यर्थः ॥२९॥

प्रश्नोत्तरमुपसंहरति । एवमिति । एवमित्थं मतिं शिक्षयन् जातं वैराग्यं यस्य सः आत्मनि विषयभूते विज्ञानमेवालोकः तत्स्वरूपस्वभावप्रकाशकं यस्य सः अत एवानहंकृतिर्देहात्माभिमानरहितः मुक्तः सङ्गो देहतदनुबन्धिषु येन तथाभूतोऽहमेतां महीं विचरामि पर्यटामीत्यर्थः ॥ ३० ॥

नन्वेकस्मादेव गुरोः किमेते सर्वेऽर्था न शिक्षिता इत्यत आह । नहीति । सुस्थिरं सुपुष्कलं च ज्ञानं नह्येकस्माद्गुरोः सकाशात्स्यात्किन्तु बहुभ्य एवेति भावः । तर्हि काप्यविश्वासाद्स्थिरेऽपि स्यादत आह । ब्रह्मैतादिति । ब्रह्मशब्दोऽत्र ज्ञानपरः इदं ज्ञानमद्वितीयं समानाधिकरहितम् एतस्य तुल्यं ज्ञानान्तरं नास्तीत्यर्थः ऋषिभिर्बहुधा गीयते वर्ण्यते पृथिवीवाय्वादिदृष्टान्तेन शिक्ष्यत इत्यर्थः । पृथिव्यादयः शिक्षागुरवो नतु ब्रह्मविद्योपदेष्टारः अतस्तद्बाहुल्यं न दोषायेति यद्वैतत् सर्वं गुरुमण्डलमिदमपि ब्रह्मैव परमपुरुष एव पृथिव्यादिगुरुमण्डलरूपेणावस्थितः स चैक एवेति भावः । अनेनाचार्यं मां विजानीयादिति विहिता देवताचार्ययोस्तादात्म्यबुद्धिः कर्त्तव्येति । सूचितम् ॥ ३१॥

अवधूतयदुसंवादमुपसंहरति श्रीभगवान् । इतीति । स विप्रो दत्तात्रेयः योगर्द्धिमापुरुभर्वी यदुहैहयाद्या इत्युक्तत्वात् यदुश्च हैहयाद्याश्चेति द्वन्द्वः गभीरधीरपाखानः आमन्त्र्य पृष्टा राज्ञा यदुना वन्दितोऽर्चितोऽत एव प्रीतः सन् यथागतं ययौ इति सम्बन्धः॥३२॥

तदुपदिष्टस्यानुष्ठितत्वं दर्शयति । अवधूतवच इति । सर्वेषां नोऽस्माकं पूर्वजः वृद्धः स यदुः सर्वस्मिन् देहे तदनुबन्धिनि च सङ्गाद्विनिर्मुक्तः समचित्तः शीतोष्णसुखदुःखादिषु तुल्यचित्तः यद्वा सर्वस्य ब्रह्मात्मकत्वदर्शनः मुक्तश्चेति शेषः बभूवेति निश्चितम् ॥ ३३ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
नवमोऽध्यायः ॥ ९ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इदानीं परमपुरुषार्थाय प्रयतनीयमित्यर्थतः सूचितं स्पष्टमाह । लब्ध्वेति । बहुसंभवान्ते बहुजन्मावसाने अनुमृत्यु पृष्ठतोऽनुगतान्तकं शरीरमाश्रयत्नोऽपि नानुष्ठेय इत्याह । विषय इति । धीरः अनित्यमर्थदमिदं शरीरं यावन्न पतेत्ततः पूर्वमेव निःश्रेयसाय यतेतेत्यन्वयः ॥ २९ ॥

निश्चितार्थमाह । एवमिति । आत्मनि विज्ञानालोकः परमात्मविषयविज्ञानलक्षणप्रदीपः प्रकाशः ॥ ३० ॥

एकस्माद्गुरोः स्वार्थे सिद्धे बाहुल्यस्य किंप्रयोजनं सर्वस्मादसंगत्वादिक एव तात्पर्यार्थ इत्यत्राह । नहीति । सुष्ठु पुष्कलं पूर्णं तत्र हेतुमाह । ब्रह्मेति । बहुधा गीयमानत्वादल्पबुद्धेर्निश्चयो न स्यादित्यर्थः ईदृशेन—

> एकस्मात्तु गुरोर्ज्ञानं जायते नैव कस्यचित् ॥
> एकस्मादेव जायेत योग्यो ब्रह्मपदस्य तु ।
> स्वयं तूपादिशेज्ज्ञानं वैरिञ्चिपदयोगिनः ॥
> अनुग्रहात्तेन चापि ज्ञानं दत्वा विमुक्तिदः ।
> ज्ञानं प्राप्य बहुभ्योऽपि न ते मुक्तिश्चतुर्मुखात् ॥
> ज्ञानमप्राप्य तेषां तु ज्ञानदो विष्णुरेवहीति ।

वाक्योक्तविशेषं सिंहावलोकनन्यायेन सूचयति ॥ ३१—३२ ॥

समे ब्रह्मणि चित्तं यस्य स तथा ॥ ३३ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
नवमोऽध्यायः ॥ ९ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

नन्वेक एव योग्यो गुरुः कर्तव्यः तस्मादेव सपरिकरं ज्ञानं सेत्स्यति किम्वा मतान्तरज्ञा एवान्ये प्रष्टव्याः किं गुर्वाभासैर्व्यावहारिकपदार्थैरित्याशङ्क्याह । न हीति । एकस्मान्मुख्याद्गुरोर्लब्धं सुपुष्कलं सुस्थिरं यज्ज्ञानं तदपि न स्यात् न सम्पद्यते कुतस्तत्राह । ब्रह्मेति । तत्तन्मतेन मतिभङ्गादित्यर्थः । तस्मान्महागुरूपदिष्टमतपोषाय तद्विरुद्धमतनिरसनाय च स्वबुद्ध्या मतकार्थे व्यावहारिकपदार्था एव गुरुत्वेन सम्भाविताः नतु कापिलादिमतान्तरस्थापका इति भावः ॥ ३१—३३

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
नवमोऽध्यायः ॥ ९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अनित्यमपि अर्थदं नित्यस्यापि वस्तुनः प्रापकं तस्मादिदं यावन्न पतेत् तावदेव निःश्रेयसाय यतेत यत इदम् अनुमृत्यु अन्वनु जातस्यास्य पश्चात् पश्चादेव वर्त्तमानो मृत्युर्यस्य तत् घुणभङ्गुरत्वेनैव निश्चितमित्यर्थः । विषयः पुनः सर्वतः श्वादियोनिष्वपि प्राप्तः स्यादेव ॥ २९ ॥

यदुक्तं त्वन्तु कल्पः कविर्दक्ष इत्यादि तत्रोत्तरमाह । एवमिति । आत्मनि यद्विज्ञानमपरोक्षानुभवस्तत्रैवावलोको दृष्टितात्पर्यं यस्य सः ॥ ३० ॥

ननु मदभिज्ञं गुरुं शान्तमुपासीतेति तस्माद्गुरुं प्रपद्येत जिज्ञासुः श्रेय उत्तममित्याद्युक्तिभ्य एक एव गुरुराश्रयणीयोऽवगम्यते । नापि श्वेतकेतुभृगुप्रमुखैर्बहवो गुरव आश्रिताः सत्यं ममापि मन्त्रोपदेष्टा गुरुरेक एव उपास्यो वर्त्तते । किन्तूपासनायामानुकूल्यप्रातिकूल्यदृष्टान्तभूता एते पदार्थाः परामृश्य गुरूकृता इत्यन्वयव्यतिरेकाभ्यां मे शिक्षागुरव एवैते ज्ञेयाः । तथाहि स्वामिचरणैरुपनिबद्धौ श्लोकौ । "कपोतमीनहरिणा कुमारीगजपन्नगाः । पतङ्गः कुररश्चाष्टौ हेयार्थे गुरवो मताः मधुकृन्मधुहर्त्ता च पिङ्गला च इषोस्त्रयः ।उपादेयार्थविज्ञाने शेषाः

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

पृथक्त्वायो मता" इति । शिक्षागुरूणान्तु बाहुल्यमेव प्रायो ज्ञानदार्ढ्यप्रयोजकमित्याह । नहीति । ननु शिक्षागुरवोऽप्यभिज्ञजना एव भवद्भिराश्रीयन्ते सत्यम् अभिज्ञजनानां हि गोतमादिनानामतानुसारित्वान्मया स्वसजातीयास्ते कुत्र कुत्र कत्यन्वेष्टव्या इत्याह । ब्रह्मेति । अद्वितीयं यद्ब्रह्म एतत् खलु सविशेषनिर्विशेषभेदविभेदैर्बहुधैव ऋषिभिर्गीयते इति "नासावृषिर्यस्य मतं न भिन्न" मित्यभियुक्तवाक्याच्च मया व्यावहारिका एव पदार्थाः शिक्षागुरवः कृता इति भावः ॥ ३१ ॥

विप्रो दत्तात्रेयः योगर्द्धिमापुरुमर्यो यदुहैहयाद्याः इत्युक्तेः । यथैवागतं तथैव यदृच्छया ययौ ॥ ३२—३३ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
एकादशस्य नवमः सङ्गतः सङ्गतः सताम् ॥ ९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अतः इह मनुष्यलोके धीरः बहुसम्भवान्ते विविधवृक्षादिजन्मान्ते जलबुद्बुदवत् स्वतोऽनित्यं तथापि मनुमृग्यु मन्वनु निरन्तरं मृत्यवो नाशहेतवो यस्य तदेवं भूतमपि अर्थदं पुरुषार्थदमिदं मानुष्यं देवाल्लब्ध्वा यावन्न पतेत् न म्रियेत तावदेव तूर्णं शीघ्रं निःश्रेयसाय मोक्षाय यतेत श्रोत्रादीनीन्द्रियाणि परब्रह्मगुणादिश्रवणप्रवणानि कुर्यादित्यर्थः । विषयः शब्दादिरूप इन्द्रियार्थस्तु खलु सर्वतः सर्वेषु देहेषु स्यादेव ॥ २९ ॥

इत्थं चतुर्विंशति गुरुभ्यो लब्धं ज्ञानं देहस्य विरक्तिविवेकहेतुत्वेन गुरुत्वं चोक्त्वा स्वं तु कल्पः कविर्देह इत्यादेरुक्तमाह । एवमिति । विज्ञानं गुरुप्रसादलब्धं विचिन्तं ज्ञानमेवालोकः प्रदीपो यस्मिन् तस्मिन् आत्मनि स्थितः महीं विचरामि ॥ ३० ॥

नन्वेकस्मादेव सहायभूतान्मुख्यगुरुमुखाच्छ्रुतं ज्ञानं स्थिरीस्यात् किं बहुभिः सहायभूतैर्गुरुभिरतः आह । नेति । एतल्लोकवेदप्रसिद्धं ब्रह्म ऋषिभिर्वेदैः एकोऽहं बहुस्यामित्यादिभिः अद्वितीयमेकधा कारणरूपेण बहुधा कार्यरूपेणाप्येवं द्वैताद्वैतं गीयते । किञ्च निःसमानातिशयत्वेन चिदचिच्छक्तिमद्ब्रह्मैकं पदार्थस्वरूपविवक्षयानेकमित्येवमेकमेवाद्वितीयं "द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते" इत्यादिभिर्वेदैर्गीयते यथा ऋषिभिः "अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके" इत्येवं वादिभिर्वेदाचार्यादिभिर्गीयते अत इत्थं भूतब्रह्मविषयक ज्ञानं मुख्यगुरुमुखात्सुगृहीतमपि सहायभूतादेकस्माद्गुरोः सुपुष्कलं सुस्थिरं नहि स्यात् "स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठमिति श्रुतेः मदभिज्ञं गुरुं शान्तमुपासीतेति वक्ष्यमाणाच्च मुख्यो गुरुरेकस्तत्प्रोक्तज्ञानदार्ढ्यार्थं बहवो महात्मानो गुरुत्वेनादरणीया इति भावः ॥ ३१ ॥

विप्रो दत्तात्रेयः यथा गतं तथैव यदृच्छया ययौ ॥ ३२-३३ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
नवमाध्यायार्थप्रकाशः ॥ ९ ॥

भाषा टीका ।

तिससे मनुष्य बहुत जन्मों के पीछे अनित्य भी इस मनुष्य शरीर को प्राप्त हो कर सुन्दर अर्थ का देने वाला है ऐसा समझ कर जब तक मरना नजीक नहीं आया है तबही मोक्ष के लिये यतन करे वह धीर पुरुष है विषय भोगों का यत्न न करे क्योंकि वे सब ठिकाने ही होते हैं ॥ २९ ॥

इस प्रकार विज्ञान के देखने वाला होकर देहादिक मे वैराग्य को प्राप्त होकर अहंकार को तथा सब के सङ्ग को छोड कर इस पृथ्वी में विचरताहूं ॥ ३० ॥

एक गुरू से ज्ञान अति दृढ नहीं होता है क्योंकि इस अद्वितीय ब्रह्म को भी ऋषियों ने बहुत प्रकार से गान किया है ॥ ३१ ॥

श्रीभगवानुवाच ॥

वे गम्भीर बुद्धि वाले ब्राह्मण दत्तात्रेय जी इस प्रकार से यदुमहाराज को कह कर उनसे विदा मांग कर यदुमहाराज से नमस्कृत पूजित हो कर अति प्रसन्न चित्त से जैसे आये हे तैसे ही चले गये ॥ ३२ ॥

हमारे बड़ों के बडे यदुमहाराज अवधूत जी के वचनों को श्रवण कर के सब के सङ्गों से छूट कर सम दृष्टि वाले होगये ॥ ३३ ॥

इति श्रीमद्भागवत एकादशस्कन्ध में नवमाध्याय
श्रीवृन्दावनस्थ पं० भागवताचार्यकृत
भाषा टीका समाप्ता ॥ ९ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे नवमोऽध्यायः ॥ ९ ॥

---:*:---

अथ दशमोऽध्यायः ।

———:*:———

श्रीभगवानुवाच ॥

मयोदितेष्ववहितः स्वधर्मेषु मदाश्रयः ।
वर्णाश्रमकुलाचारमकामात्मा समाचरेत् ॥ १ ॥
अन्वीक्षेत विशुद्धात्मा देहिनां विषयात्मनाम् ।
गुणेषु तत्त्वध्यानेन सर्वारम्भविपर्ययम् ॥ २ ॥
सुप्तस्य विषयालोको ध्यायतो वा मनोरथः ।
नानात्मकत्वाद्विफलस्तथा भेदात्मधीर्गुणैः ॥ ३ ॥
निवृत्तं कर्म सेवेत प्रवृत्तं मत्परस्त्यजेत् ।
जिज्ञासायां सम्प्रवृत्तो नाद्रियेत् कर्मचोदनाम् ॥ ४ ॥
यमानभीक्ष्णं सेवेत नियमान् मत्परः क्वचित् ।
मदभिज्ञं गुरुं शान्तमुपासीत मदात्मकम् ॥ ५ ॥
अमान्यमत्सरो दक्षो निर्ममो दृढसौहृदः ।
असत्वरोऽर्थजिज्ञासुरनसूयुरमोघवाक् ॥ ६ ॥
जायापत्यगृहक्षेत्रस्वजनद्रविणादिषु ।
उदासीनः समं पश्यन् सर्वेष्वर्थमिवाऽऽत्मनः ॥ ७ ॥
विलक्षणः स्थूलसूक्ष्माद्देहादात्मेक्षिता स्वदृक् ।
यथाऽग्निर्दारुणो दाह्याद्दाहकोऽन्यः प्रकाशकः ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

चतुर्विंशतिगुर्वाख्यानबन्धसम्भावनाभुवः ॥
उद्धवस्याऽऽत्मतत्त्वाप्त्यै साधनोक्तिरतः परैः ।
दशमे देहसम्बन्धात्संसृतिर्नाऽऽत्मनः स्वतः ॥
इत्येतद्वर्णयामास मतान्तरनिरासतः ।

तदेवमन्वयव्यतिरेकाभ्यामुत्पन्नविवेकज्ञानस्य तत्त्वज्ञानाधारित प्रारभ्य साधनान्युपदिशति भगवान् मयेति । मया पञ्चरात्राद्युक्तवैष्णवधर्मेष्ववहितोऽप्रमत्तः संस्तदविरोधेन वर्णाद्याचारमनुतिष्ठेत् ॥ १ ॥

कथमकामात्मता सम्भवति तत्राऽऽह । अन्वीक्षेतेति । स्वधर्मैर्विशुद्धचित्तः सन् देहिनां विषयेषु सत्यत्वाभिमानवशेन ये सर्वे आरम्भास्तेषां फलवैपरीत्यं पश्येत् एवं फलवैपरीत्यादकामः स्यात् ॥ २ ॥

किञ्च काम्यविषयाणां मिथ्यात्वादपीत्याह । सुप्तस्येति । विफलोऽर्थशून्यः अत्रैवम्प्रयोगः इन्द्रियैर्या बाहिनांना बुद्धिः सा विफला नानात्मकत्वात् ऐन्द्रियकत्वाच्च मनोजन्यस्वप्नमनोरथवदिति ॥ ३ ॥

मोक्षार्थी न प्रवर्तेत तत्र काम्यनिषिद्धयोः ॥
नित्यनैमित्तिके कुर्यात् प्रत्यवायजिहासयेति ।

स्मृतिरतः प्रवृत्तं काम्यं कर्म त्यजेन्निवृत्तं नित्यनैमित्तिकमेव कुर्यात् आत्मविचारे तु सम्यक् प्रवृत्तो निवृत्तकर्मचोदनामपि नाद्रियेत ॥ ४ ॥

किञ्च यमानहिंसादीनभीक्ष्णमादरेण सेवेत । शौचादींस्तु नियमान् कचिद्यदा शक्तिस्तदा आत्मज्ञानाविरोधेन यमान् द्वादश नियमांश्चैकोनविंशेऽध्याये वक्ष्यति । किञ्च यमेष्वप्यादर

श्रीधरस्वामिकृतभावार्थदीपिका ।

परित्यज्य गुरुमुपासीतेत्याह । मदभिज्ञमिति । मदात्मकं मद्रूपम् ॥ ५ ॥

गुरुसेवकस्य धर्मानाह । अमानीति । दक्षोऽनलसः निर्ममो जायादिषु ममताशून्यः गुरौ तु दृढसौहृदः असत्वरोऽव्यग्रः अमोघवाक् व्यर्थालापरहितः एतान्येव शिष्यस्य लक्षणानि ज्ञेयानि ॥ ६ ॥

ननु स्वजायादिषु कथं निर्ममः स्यात्तत्राऽऽह । जायेति । औदासीन्यहेतुं विवेकं दर्शयति । आत्मनोऽर्थं प्रयोजनं सर्वत्र सममिव पश्यन्निति अयम्भावः सर्वदेहेष्वात्मन एकत्वाज्जायादिदेहेऽप्यस्य स्वदेहे आत्मनोऽर्थः सुखादिः सम एव केन विशेषेणैतेष्वेव ममत्वाभिनिवेश इत्येवमुदासीनः सन् गुरुं प्रपद्येतेति ॥ ७ ॥

अहो कोऽसौ देहादिव्यतिरिक्त आत्मा यस्यैकत्वादर्थः सर्वेषु समः स्यात्तमाह । विलक्षण इति । स्थूलसूक्ष्मदेहद्वयादात्माऽन्यो यतो विलक्षणः देहो वैलक्षण्यं दर्शयति । ईक्षिता स्वदृगिति द्रष्टा हि दृश्याद्विलक्षणः स्वप्रकाशश्च जडाद्विलक्षणः तयोरन्यत्वे दृष्टान्तः यथाग्निर्दाहकः प्रकाशकश्च दाह्यात्प्रकाश्याच्च दारुणः काष्ठादन्यस्तद्वदिति ॥ ८ ॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

चतुर्विंशतिगुरूणां याऽऽख्या कथनं तेन लब्धा या सम्भावना आत्मानुभवे स्वयोग्यताध्यवसायस्तस्या भूयः स्थानस्योपचयस्यात्मप्राप्त्यै अतो नवमाध्यायात् परेऽध्याये: श्रीकृष्णकर्तृका साधनोक्तिर्वर्ण्यते स्वतः स्वरूपतो न इत्येतत् जीवसंसृतेरवास्तवत्वं मतान्तरानिरासतः मीमांसकमतनिराकरणेन तदेवं चतुर्विंशतिगुरुवर्णनप्रकारेण अन्वयव्यतिरेकाभ्यां हेयोपादेयत्वेन विधिनिषेधाभ्यां तदविरोधेन वैष्णवधर्माविरोधेन अकामात्मा निष्कामः ॥ १ ॥

स्वीकृतस्य पुनस्त्यागासहिष्णुत्वमभिनिवेशस्तेन ॥ २ ॥

मिथ्यात्वाद्दृष्टवत्कामः स्यादित्यनुषङ्गः अर्थशून्यः मिथ्याभूतः अत्र अर्थशून्यत्वे बहिर्नानाबुद्धिरिति भक्तिरूपाऽभेदात्मधीस्तु नानात्मिका न भवति भगवद्रूपालम्बनैकात्मकत्वात् ॥ ३ ॥

तत्र काम्यादिचतुर्विधकर्ममध्ये मत्पर इति क्रियाप्रवेशेऽपि योऽयं मदाश्रयं विना सर्वमपि तत्तद्व्यर्थमित्यभिप्रायात् सम्यक् प्रवृत्त इति प्रवृत्तेः परमवैराग्यपूर्वकत्वं सूचयति यथोक्तं श्रीगीतासु “आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते । योगारूढस्य तस्यैव शमः कारणमुच्यते । यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्जते । सर्वसङ्कल्पसंन्यासी योगारूढस्तदोच्यते” इति ॥ ४ ॥

यमानित्यत्रैकं मत्पर इति मदाश्रयं विना यमादीनामपि वैफल्यमिति सूचयति क्वचिदावश्यकमलमूत्रोत्सर्गादौ यथाशक्त्येव पाठः ॥ ५ ॥

मदभिज्ञमिति युग्मकम् आदरं कर्तव्यताभिनिवेशं मद्रूपमिति गुरावीश्वरदृष्टिं विधत्ते येऽमानित्वादयो गुरुसेवकस्यावश्यकर्तव्यत्वरूपा धर्मा एतान्येव शिष्यस्य द्योतकानि लक्षणान्यपि ज्ञानीत्यर्थः ॥ ६ ॥

जायादिषु उदासीनः ममताविशेषमभावयन् सुखादिरित्यर्थादिना दुःखहान्यादिकं ज्ञेयम् ॥ ७ ॥

ईक्षिता द्रष्टा स्वदृक् स्वप्रकाशः विलक्षणयोर्विरुद्धलक्षणयोर्देहात्मनोः अन्यत्वे भिन्नत्वे ॥ ८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

॥ १ ॥ २ ॥

भेदार्थधीः भेदविषयधीः आत्मनि देहभेदारोपः विफलः नानात्मकत्वात् आत्मन्यविद्यमानः मनुष्यत्वादिगोचरत्वात् ॥ ३ ॥

कर्मचोदनां काम्यकर्मचोदनाम् ॥ ४—६ ॥

सर्वेषु जायापत्यादिषु उदासीनः सर्वेषु समं साधारणं पश्येत् ममैवेदमिति न जानीयात् आत्मनोऽर्थमिव स्वकीयतयाभिमतोऽर्थोऽहि पुत्रादिभिर्भुज्यते एवं पुत्रादयोऽपि न ममैवेति पश्येदित्यर्थः ॥ ७—८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदेवमवधूतयदुसंवादमुखेन स्वबुद्धिः स्वयमेव शिक्षणीयेत्यभिधायाथ साक्षान्मुक्तिसाधनभूतब्रह्मोपासनात्मकं भक्तियोगं तदङ्गभूतौ कर्मज्ञानयोगावन्यानि च साधनानि उपदिशति श्रीभगवान् । मयेत्यादिना । मया सर्वेशेन परमकारुणिकेनोदितेषु पञ्चरात्रगीतादिमुखेनोपदिष्टेषु स्वधर्मेषु स्वरूपानुरूपधर्मेष्वर्चनवन्दनादिष्ववहितः प्रमादरहितः अप्रमादेन ताननुतिष्ठन्नित्यर्थः मदाश्रयः अहमेव सर्वान्तरात्मा आश्रयो यस्य सः मदाश्र-[illegible]प्रवृत्तिज्ञानवान् अकामात्मा न कामेष्वात्मा यस्य सः फलाभिसन्धिरहितः स यावद्देहं वर्णाश्रमकुलोचितमाचारं समाचरेदनुतिष्ठेत् ॥ १ ॥

कथमकामात्मता सम्भवेदित्यत आह । अन्वीक्षेतेति । शुद्धधर्मविशुद्ध आत्मा मनो यस्य सः तत्त्वध्यानेन तत्त्वमनारोपिताकारः स्वात्मपरमात्मयाथात्म्यानुचिन्तनेन विषयात्मनां विषयप्रवणचित्तानां देहिनां गुणेषु गुणपरिणामात्मकेषु शब्दादिविषयेषु निमित्तेषु तदर्थमित्यर्थः । ये सर्वे आरम्भा उद्योगास्तेषां विपर्ययं फलान्यत्वं सुखार्थारम्भाणामन्ततो दुःखफलकत्वमित्यर्थः । अन्वीक्षेत पश्येत् सर्वारम्भविपर्ययान्वीक्षणादकामात्मता सम्भवतीति भावः ॥ २ ॥

तत्त्वध्यानेनेत्यनेनाऽतत्त्वध्यानस्य कामात्मतापादकत्वद्वाराऽन्ततो दुःखहेतुत्वान्निष्फलत्वमिति सूचितं तदेव दृष्टान्तमुखेन विशदयति । सुप्तस्येति । यथा सुप्तस्य पुंसः विषयालोकः प्रियाप्रियविषयावभासः यथा वा ध्यायतो मनोरथश्च विफलः नहि स्वाप्नार्थकामादिमात्रेण फलित्वं नवा विषयध्यानात्मकमनोरथमात्रेण प्रत्युत तौ नानात्मकत्वात् विफलौ प्रियाप्रियरूपेण विषयाणां नानात्मकत्वात्तयोर्नानात्मकत्वमवगन्तव्यं विफलत्वं च पुरुषार्थशून्यत्वं तथा गुणैर्यो भेदः आत्मनि देवमनुष्यादिभेदः अर्थः शब्दादिविषयश्च तद्विषया धीर्नानात्मकत्वाद्विफला नानात्मकत्वा-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

दित्येतत् कार्यत्वानित्यत्वादीनामप्युपलक्षणं नानात्मकत्वात् कार्यत्वादनित्यत्वाद्विफलं इत्यर्थः । भेदात्मधीरिति पाठे भेदेन देवमनुष्यादिभेदेनात्मनि धीरित्यर्थः । आत्मनि देवादिदेहभेदारोपो विफलः नानात्मकत्वादात्मन्यविद्यमानतरतमदेवमनुष्यादिगोचरत्वादर्थानामन्ततो दुःखहेतुत्वाच्चेत्यर्थः ॥ ३ ॥

यत एवमतो मत्परः अहमेव पर उत्कृष्टः पुरुषार्थो यस्य सः निवृत्तं फलाभिवृत्तं निष्काममनन्यप्रयोजनमिति यावत्तत्कर्म सेवेताचरेत् प्रवृत्तं फलदानाय प्रवृत्तमैश्वर्यादिसाधनं काम्यमिति यावत्तत्कर्म त्यजेत् नन्विष्टसाधनताबोधके सति प्रवर्तके कथं तत्त्याग इत्यत आहार्धेन । जिज्ञासायामिति । जिज्ञासायां ब्रह्मविचारे संप्रवृत्तः पुमान् कर्मचोदनां काम्यकर्मचोदनां तत्फलस्वरूपास्थिरत्वबुद्ध्या नाद्रियेत ॥ ४ ॥

किन्तु यमान् बाह्यान्तःकरणनिग्रहोपायानभीक्ष्णं पौनः पुन्येनात्यादरेण सेवेत नियमान् शौचादींस्तु कञ्चिद्यथाशक्ति सेवेतानुतिष्ठेत् मत्परोऽनन्यप्रयोजनः किञ्च मदभिज्ञमिति । मदभिज्ञं मामीश्वरमभिजानातीति तथा ब्रह्मनिष्ठमित्यर्थः।मदात्मकं मत्सादात्म्यदृष्टिविषयं शान्तं जितेन्द्रियं गुरुमुपासीत ॥ ५ ॥

गुरूपासनस्य धर्मानाह । अमायीति । अमायी निष्कपटः अमत्सरः तस्मिन् तदनुबन्धिषु स्वार्थकामादिप्रयुक्तमात्सर्यरहितः दक्षस्तत्सेवायामुत्साही निर्ममः देहानुबन्धिषु ममाभिमानरहितः तदभिमानस्य तत्सेवापादनद्वारा गुरूपासनविरोधित्वादिति भावः। गुर्वादिषु सौहृदं यस्य सः दृढसौहृद इति पाठे दृढसौहृदवानित्यर्थः । असत्वरः न त्वरया सहितः अव्यग्रः अवहितमना इत्यर्थः । अर्थान् हेयोपादेयान् ज्ञातुमिच्छुः अनसूयदोषाविष्काररहितः अमोघवाग्वृथा प्रलापरहितः ॥ ६ ॥

कथं निर्ममता सम्भवेदत आह । जायेति । आदिशब्देन बन्ध्वादिसंग्रहः उदासीनः आसक्तिरहितः तेष्वौदासीन्येन निर्ममो भवतीति भावः । कथमौदासीन्यं सम्भवेदत आह । समं साधारणं पश्येत् ममैवैते जायादय इति न विजानीयात् आत्मनोऽर्थमिव स्वकीयतयाभिमतोऽर्थो हि पुत्रादिभिर्भुज्यते एवं पुत्रादयोऽपि न ममैवेति पश्येदित्यर्थः ॥ ७ ॥

भेदात्मधीरित्यनेन नात्मा देवमनुष्यादिशरीराकारः किन्तु ततोऽन्य इति सूचितं तदेव सदृष्टान्तं विशदयति । विलक्षण इति। आत्मा स्थूलसूक्ष्मदेहाद्विलक्षणः अन्यः भूतबुद्धीन्द्रियमनः प्राणसङ्घातात्मको देहः सूक्ष्मः तत्परिणामात्मकस्तु स्थूलः वैलक्षण्यावहाभ्यां धर्माभ्यामात्मानं विशिनष्टि । ईक्षिता द्रष्टा एतद्यो वेत्ति सततं क्षेत्रज्ञमिति तं विदुरिति मनुक्तेरिति भावः । देहस्त्वीक्ष्यो नेक्षिता इति भावः । स्वदृक् स्वमात्मानं पश्यतीति स्वप्रकाशः प्रत्यगित्यर्थः । देहस्तु परागिति भावः यथा दाह्यात् प्रकाश्यात् दारुणः काष्ठादग्निर्दाहकः प्रकाशकश्चान्यस्तद्वत् ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

मुमुक्षुणा हरेरपरोक्षज्ञानमापाद्यमिति इतिहासमुखेनोक्तं तत्साधनानि निरूपयत्यस्मिन्नध्याये । तत्रादौ वर्णाश्रमाचाराचरणप्रकारमाह । मयोदितेष्विति । अकामात्मा फलाभिसन्धिरहितमनाः भूत्वा ॥ १ ॥

सर्वसाधनेषु वैराग्यं प्रथममापाद्यमित्याह । अन्वीक्षेतेति अन्तःकरणशुद्धिहेतुना वर्णाश्रमादिविहिताचारेण विशुद्धात्मा पुमान् गुणेषु शब्दादिषु तत्त्वज्ञानेन पुरुषार्थसाधनतानिश्चयज्ञानेन विषयात्मनां विषयेष्वासक्तचित्तानां देहिनां सर्वेषां कर्मारम्भाणां विपर्ययं फलवैपरीत्यम् अन्वीक्षेतेत्यन्वयः । अन्वीक्षणं नाम यथावस्तु दर्शनं तदेव पुरुषार्थसाधनं नान्यत् ॥ २ ॥

शुक्तिरजतादिज्ञानवन्मुमुक्षुणा हेयमिदं ज्ञानमितिभावेनैतदुपपादयति।सुप्तस्येति।यथा सुप्तस्य जागृतत्वेन विषयाणामालोकोपायं ध्यायतो मनोरथश्च नानात्मकत्वाद्वस्तुयाथार्थ्यतेरन्यथात्वाद्विफलः अत एव अविद्यमानः तथान्यथागुणैः सत्त्वाद्यबुद्धिरूपगुणैः अस्वरूपैः कामक्रोधादिभिरभेदोऽहं क्रोध्यहं कामीत्यादिलक्षणो योऽसौ हेय इत्यर्थः—

वस्तुस्थितेरन्यथात्वं नानात्वमिति कीर्तितम् ॥
ज्ञानस्यैव तु नानात्वाच्च स्यात्कामाद्यहंमतिः ।
कामादिषु स्वधीस्थेषु केवलं जीवसंस्थितिः ॥
इति बुद्धिरभेदः स्यात्स न कार्यः कथञ्चन ।
अदुष्टकामश्चिद्रूपो जीवाभिन्नस्वरूपतः ॥
दुष्टकामो मनोधर्मस्तस्माद्धेयः सदैव सः ।

इतिप्रमाणेन हेयत्वं ज्ञायते इत्यर्थः ॥ ३ ॥

अकामात्मेत्युक्तं विवृणोति । निवृत्तमिति । फलानपेक्षया यथा वस्तुज्ञानपूर्वं यत्कर्म तन्निवृत्तं तदेव सेवेत कुर्यात् अनीदृशं यत्कर्म तत्प्रवृत्तं त्यजेन्न कुर्यात् अहमेव परो यस्य स मत्परः अनेनाकामात्मनो बुधस्य कर्मविधानं प्रतीतिविरुद्धमिति परास्तम्—

निष्कामं ज्ञानपूर्वं च निवृत्तमिति चोच्यते ॥
निवृत्तं सेवमानस्तु ब्रह्माभ्येति सनातनमिति ।

एवदत्र मानम् । ननु सकामस्य कर्मविधानात्तत्त्यागः कथमत्राह । जिज्ञासायामिति । जिज्ञासायां ब्रह्मविचारे कर्मचोदनां कर्मविधिं ब्रह्मज्ञानोत्पत्तौ प्रवृत्तानां सर्वशब्दानां कर्मादिविषयत्वाङ्गीकारे विरोधापत्त्या तत्रानादरलक्षणस्त्यागोऽविधीयते नतु सर्वात्मना अन्तःकरणशुद्धिद्वारा ज्ञानाङ्गत्वेनाङ्गीकारार्हत्वादित्यतो नाद्रियेतेत्युक्तम् ॥ ४ ॥

ननु यमादिचोदनापि नादरणीया किन्नेत्याह । यमानिति । यमनियमाः—

अहिंसा सत्यमस्तेयमसङ्गो ह्रीरसंचयः ॥
आस्तिक्यं ब्रह्मचर्यं च मौनं स्थैर्यं क्षमाभयम् ।
शौचं जपस्तपो होमः श्रद्धातिथ्यं मदर्चनम् ।
तीर्थाटनं परार्थेहा तुष्टिराचार्यसेवनमिति ।

वक्ष्यति कांश्चिद्विहितकाले निवृत्तादिवत् ज्ञानोत्पत्तौ गुरूपासनमप्यन्तरङ्गमित्याह । मदभिज्ञमिति । मय्येव आत्मा ध्यानसमर्था बुद्धिर्यस्य स तथा तम्—

मामेव नित्यं ध्यायेद्यो मदात्मा सम्प्रकीर्तितः ॥

इतिवचनात् ॥ ५ ॥

तस्य गुरुप्रसादजनकगुणानाह । अमानीत्यादिना । नितरां गमयतीति निगमो निर्णायकं वैष्णवशास्त्रं तस्मिन् ॥ ६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सर्वेषु जायापत्यादिष्वात्मनः स्वस्यार्थमिव प्रयोजनमुभयोः सम नतु विशेषं "पश्येत् द्योभयेच साहश्ये"इति च वायत्प्रयोजनं पश्येदिति वा ॥ ७ ॥

जीवपरमात्मानावपि परस्परं देहादेश्च भिन्नत्वेन ज्ञातव्याविति सदृष्टान्तमाह । विलक्षण इति । स्वदृक् स्वयंप्रकाशः द्रष्टिताक्ष्य सर्वस्य द्रष्टा आत्मा परमात्मा स्थूलसूक्ष्मदेहाद्विलक्षणो भिन्न आत्मा जीवश्च हरेर्देहादेश्च भिन्न इति ज्ञातव्याविति शेषः दाह्याद्दारुणो यः पावकः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तदेवं श्रीमदुद्धवमुपलक्षणीकृत्योपदिष्टमिति यथोक्तं तथा स्फुटमेवान्यान् प्रत्युपदिशति । मयेति ॥ १ ॥ २ ॥

गुणैरिन्द्रियैः भेदात्मधीर्बहिर्नानाबुद्धिः भक्तिरूपाभेदात्मधीस्तु नानात्मिका न भवति श्रीभगवद्रूपावलम्बनैकात्मत्वादिति ज्ञेयम् ॥ ३ ॥

मत्पर इति क्रियात्रयेऽपि योज्यं मदाश्रयं विना सर्वमपि तत्तद्व्यर्थमित्यभिप्रायात् संयच्छेदेन परमवैराग्यपूर्वत्वं सूचयति यथोक्तं श्रीगीतासु—

आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते ।
योगारूढस्य तस्यैव शमः कारणमुच्यते ॥
यदाहि नेन्द्रियार्थेषु न कर्मस्वनुषज्जते ।
सर्वसङ्कल्पसंन्यासी योगारूढस्तदोच्यते इति ॥ ४ ॥

अमानीत्यर्द्धकम् ॥ ५ ॥

मदभिज्ञमितियुग्मकम् । जायादिषु उदासीनः ममताविशेषमभावयन् यतः सर्वेषु जीवेषु सुखरूपं दुःखहानिरूपं चार्थमात्मन इव पश्यन् वाञ्छन् यतः समश्च पश्यन्निति ॥ ६ ॥ ७ ॥

ननु जायादिषु सम्बन्धवैशिष्ट्येन ममतावैशिष्ट्यात्स्थितानुसन्धानवैशिष्ट्यं दुर्निवारमित्याशङ्क्य वैमुख्येन तत्सम्बन्धं वारयति । विलक्षण इति चतुर्भिः ॥ ८—१२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

ज्ञानस्य साधनं देहसम्बन्धाद्बन्ध आत्मनः ।
दशमे जैमिनीयानां मतस्योक्तञ्च खण्डनम् ॥

शिक्षामुक्त्वा साधनमुपदिशति । मया स्वधर्मेषु पञ्चरात्राद्युक्तेषु मदीयधर्मेषु ॥ १ ॥

कथमकामात्मता सम्भवेत् तत्राह । अन्विति । गुणेषु विषयसुखेषु तत्त्वध्यानेन पुरुषार्थबुद्ध्या ये सर्वे आरम्भास्तेषां विपर्ययं फले वैपरीत्यमन्वीक्षेत पुनः पुनः पश्येत् अतएव विवेकी तत्प्राप्तिनिश्चयाभावान्निष्कामः स्यादिति भावः ॥ २ ॥

व्यावहारिकफलस्य नश्वरत्वात् प्राप्तिरप्यप्राप्तितुल्यैव पारमार्थिकफलन्तु कदिन्द्रियैर्नैव प्राप्यत इत्याह । सुप्तस्येति । नानात्मकत्वात् नानापदार्थालम्बनत्वाद्विफलः पारमार्थिकफलशून्यो यथा तथैव गुणैरिन्द्रियैर्भेदात्मसु नानाविषयेषु धीः नानापदार्थानालम्बनीकृत्य या धीः सेत्यथः । तत्रैव प्रयोगः इन्द्रियैर्गुणमयवस्तुषु पृथक् पृथक् बुद्धिः पारमार्थिकफलशून्या भद्राभद्रात्मकनानापदार्थालम्बनत्वात् मनोजन्यस्वप्नमनोरथवत् तस्मात् परमेश्वरैकालम्बना बुद्धिरेव पारमार्थिकफला तद्रूपगुणलीलाभक्त्यादीनां तत्तः पार्थक्याभावात् चिदेकमयत्वात् केवलभद्रात्मकत्वाच्च तदैक्यमेव ज्ञेयम् अतएवोक्तं'व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन ! बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनामिति ॥ ३ ॥

यस्मादेवं तस्मान्मत्परः मदेकालम्बनधीर्निष्कामः निवृत्तं नित्यं कर्म प्रवृत्तं काम्यं कर्म जिज्ञासायां सम्यगेव प्रवृत्तो जिज्ञासोत्तरदशायां योगारूढश्चेदित्यर्थः । कर्मचोदनां नित्यनैमित्तिकादिकर्मविधिमनधिकारान्नाद्रियेत यदुक्तम् "आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते । योगारूढस्य तस्यैव शमः कारणमुच्यते यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्जते । सर्वसङ्कल्पसन्न्यासी योगारूढस्तदोच्यते" इति ॥ ४ ॥

किन्तु यमानहिंसादीन् अभीक्ष्णमादरेण सेवेत नियमान् शौचादींस्तु कांश्चित् यथाशक्ति तांश्चैकोनविंशेऽध्याये वक्ष्यति किञ्च सर्वतोऽप्यधिकेनाग्रहेण गुरुमुपासीतेत्याह । मदभिज्ञमिति ॥ ५ ॥

गुरुसेवकस्य धर्मानाह । अमानीति । निर्ममः ममताशून्यः गुरादिष्टदेवेच दृढसौहृदः असत्वरः साध्यवस्तुप्राप्तौ त्वरामकुर्वन् ॥ ६ ॥

कीदृशेन विचारेण अन्यत्र निर्ममः स्यादित्यत आह । जायेति आत्मनः स्वस्य अर्थं स्वर्णरूप्यादिमुद्रारूपं धनमिव समं पश्यन् तत् यथा व्यावहारिकं यावत् यस्य करगतं व्यासावदेव तस्य ममतास्पदं नतु सर्वदैव तत्तदेवं जायादिकमपीति तत्र तत्र ममताया अनैकान्तिकत्वदर्शनात् निर्ममतैवोचिता यदुक्तं चित्रकेतुं प्रति । "यथा वस्तूनि पण्यानि हेमादीनीत्युपक्रम्य नित्यस्यार्थस्य सम्बन्धो ह्यनित्यो दृश्यते नृषु । यावद्यस्य हि सम्बन्धो ममत्वं तावदेव हीति" श्रीगुरुदेवेष्टदेवयोस्तु तादृशत्वासम्भवात्तत्र दृढसौहृद्यमेवोचितम् ॥ ७ ॥

स्वदेहेचाहन्तां नैव कुर्यादित्यत्र विचारमाह । विलक्षण इति । स्थूलसूक्ष्मदेहद्वयाज्जडात् दृश्याच्च आत्मा चेतयिता ईक्षिता द्रष्टा च विलक्षणः जीवात्मनोऽपि किञ्चित् किञ्चित् चेतयितृत्वादिकमस्त्येव यतः स्वदृक् स्वप्रकाशः स्वप्रकाशो ह्यात्मा प्रकाश्यात् जडात् दृश्याद्देहादन्य एवेत्यतस्तत्र कथमहंतां कुर्यादिति भावः । यद्यपि परमात्मैव स्वप्रकाशः जीवात्मातु परमात्मप्रकाश्य एव प्रसिद्धस्तथापि तस्य परमात्मप्रकाशितत्वे सति किञ्चित्स्वप्रकाशत्वमपि स्यात् । यथा सूर्यप्रकाशितत्वे सत्येव कनकरजतादेरपि किञ्चित् स्वपरप्रकाशकत्वं स्यादिति विलक्षणयोरन्यत्वे दृष्टान्तः यथाग्निर्दाह्यात् दारुणः काष्ठात् सकाशात् दाहको ह्यन्यः यतः प्रकाशकः प्रकाशकोऽग्निर्हि स्वतोऽन्यात् प्रकाश्यात् काष्ठादन्य एव यद्यप्यविद्यादशायां जीव इवाग्निः काष्ठस्यादाहकः काष्ठावृत एव तिष्ठंस्तथापि विद्यादशायां विद्वान् जीवो विद्याद्वारा अविद्याया दाहकोऽपि स्यात् काष्ठानावृतः प्रकटोऽग्निरिवेत्यर्थः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ज्ञानं गुर्वनुग्रहलब्धं बहुभिः सहायभूतैर्गुरुभिः सुपुष्कलं सुस्थिरं कर्त्तव्यमित्युक्तमथ स्वभक्त्युत्पादकं तदेव ज्ञानं तत्सिद्धये हेयोपादेयान् बहूनर्थान् तदुपदेष्टारं मुख्यं गुरुं च स्वयमेव

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

परमकारुणिकः श्रीभगवान् आह । मयोदितेष्वित्यादिना । महाश्रयः स्थितिप्रवृत्तिहेतुर्यस्य सः श्रीमद्गीतापञ्चरात्रादिकर्त्रा मयोदितेषूपदिष्टेषु स्वधर्मेषु अवहितः सावधानः सन् तदविरोधेन वर्णाद्याचारमकामात्मा नास्तिकामः फलाभिसन्धिरात्मनि मनसि यस्य सः ज्ञानोपयोगित्वेनानुतिष्ठेत् ॥ १ ॥

नन्वन्यजनकामात्मतादर्शनेन कदाचिदात्मनि कामः स्यात्तदा किङ्कर्तव्यमतआह अन्वीक्षेतेति । विशुद्धात्मा विशुद्धे तत्त्वे आत्मा मनो यस्य सः परमेश्वरध्यानपरः विषयात्मनां विषयेषु इन्द्रियार्थेषु आत्मा चित्तं येषां तेषां गुणेषु इन्द्रियार्थेषु शब्दादिषु साध्येषु सर्वारम्भाणां विपर्ययं वैपरीत्यमन्वीक्षेतालोचयेत् नतु तत्त्वध्याने एवमालोचने कर्तुरात्मनि अन्यजनकामात्मतादर्शनेनापि कामो न स्यादित्यर्थः ॥ २ ॥

किञ्च वर्णाद्याचारसमाचरणे फलाभिसन्धिः फलैः पोष्यस्य देहस्यात्मत्वे सति स्यात्तत्तु नास्तीत्याह सुप्तस्येति । सुप्तस्य मनुष्यस्य विषयालोकः शचीपतिरस्मीति दर्शनम् ध्यायतो रङ्कस्य नरेन्द्रोऽहमिति मनोरथो वा यथा विफलः तथा गुणैः स्वरूपावरणहेतुभूतैः भेदे आत्मभिन्ने देहे आत्मधीः देहोऽस्मीति बुद्धिर्विफला चेतनस्याचेतनत्वाभावात् अतो हि स्वात्मपरमात्मज्ञानसिद्ध्यै वर्णाद्याचारं समाचरेत्तु तत्र फलाभिसन्धिं कुर्यादिति भावः । ननु सुप्तस्य विषयालोकः स्वकृतः परप्रवर्तितो वेत्यत्र राद्धान्तमाह नानात्मकत्वादिति । नानारूपं विश्वं यस्यात्मा नानात्मा विश्वात्मा परमात्माहमस्यदात्मकत्वान्मदधीनस्थितिप्रवृत्तिकत्वात्स्वप्नस्यात्यल्पकर्मफलभोगसिद्ध्यै मत्प्रवर्तितो विषयालोको भवतीत्यर्थः अन्यथाऽनिष्टविषयावलोको न घटेतेति वेदान्तकौस्तुभे स्थितम् । यद्वा क्षेत्रज्ञस्यैकत्वात्ताद्विषया धीः सफला चेत्स्वस्य नानात्मकत्वात् पञ्चभूतात्मकत्वात्स्वर्गाद्यनर्हत्वेन भेदात्मधीर्विफलेति योजना ॥ ३ ॥

वर्णाद्याचारसमाचरणेविशेषमुपदिशति । निवृत्तमिति । अहं परः प्राप्यो यस्य स मत्परः मत्प्राप्तिकामः निवृत्तं मद्भावापत्तिलक्षणमुक्तिसाधनं कर्म सेवेत प्रवृत्तं त्रिवर्गसाधनं त्यजेत् तथा च स्मृतिः “मोक्षार्थी न प्रवर्तेत तत्र काम्यनिषिद्धयोः । नित्यनैमित्तिके कुर्यात्प्रत्यवायजिहासयेति ननु तर्हि प्रवृत्तकर्मविधिव्याकोपः स्यादित्यत्राह । जिज्ञासायामिति । तादृशविध्यधिकारी अन्यो बुभुक्षुः जिज्ञासायां ब्रह्मजिज्ञासायां ब्रह्मजिज्ञासोपलक्षिते ज्ञानाकारे सम्यक् प्रवृत्तः मुमुक्षुस्तु कर्मचोदनां प्रवृत्तकर्मविधिं नैवाद्रियेत ॥ ४ ॥

किञ्च मुमुक्षुर्यमान् अहिंसादीन् अभीक्ष्णं पौनःपुन्येन सेवेत नियमान् शौचादीन् कांचिन्मदाराधनयोग्यतासम्पादनादौ । ननु वारं वारं श्रीमन्मुखतो मया श्रुतं महाश्रयः मत्पर इति तत्कथं त्वां विजानीयामित्यत्राह । मदाभज्ञाममिति । मदात्मकमात्मनो मदधीनस्थितिप्रवृत्तिं शान्तमित्यर्थः ॥ ५ ॥

उक्तलक्षणाद्गुरोः शिष्यलक्षणकथनपूर्वकं स्वाविद्योत्पत्तिप्रकारमाह । अमानीति सप्तभिः । निर्ममः देहगेहादौ ममताशून्यः गुरौ हरौ तु दृढसौहृदः असत्वरः अचपलः अमोघवाक् सत्यवचनः ॥ ६ ॥

किञ्च जायादिषूदासीनः आत्मनोऽर्थं अथ उपयोगिदेहनिर्वाहं सर्वेषु समामिव पश्यन् गुरुमुपासीतेत्यन्वयः ॥ ७ ॥

तथा भेदात्मधीरित्यत्र देहविलक्षण आत्मा सूचितस्तमुपपादयति । विलक्षण इति । आत्मा जीवः ईक्षिता स्वदृक् स्वप्रकाशः दृश्यात्प्रकाश्यात्स्थूलात्सूक्ष्माच्च देहाद्विलक्षणः तत्र दृष्टान्तः यथेति दाह्यात्प्रकाश्याच्च दारुणः काष्ठात् दाहकः प्रकाशकोऽग्निरन्यस्तद्वत् ॥ ८ ॥

भाषा टीका।

श्री भगवानुवाच ॥

श्री भागवत पञ्चरात्रादिकों मे मेरे कहे हुये स्वधर्मों मे सावधान हो कर रहै मेराही भरोसा रखै निष्काम हो कर वर्णाश्रम धर्मों के अनुकूल आचारों को करा करे ॥ १ ॥

निर्मल चित्त होकर देखै कि विषयाभिलासी पुरुषों के जितने आरम्भ हैं वे सब विषयों में यथार्थ विचार करने से सब विपरीत होजाते हैं सुखके बदले सब प्राणियों को दुख ही मिलता है ॥ २ ॥

सोते हुये पुरुष को जैसे विषयों का देखना जैसे स्मरण करने वाले का मनोरथ नाना रूप होने से निष्फल होता है तैसे ही गुणों में भेद नाना प्रकार की वासना वाले पुरुषों के भी मनोरथ व्यर्थ ही हैं ॥ ३ ॥

मेरे में तत्पर पुरुष तो निवृत्त कर्मों का सेवन करै प्रवृत्त कर्मों को छोड देवै भगवद्भक्ति के विचार में प्रवृत्त होने पर काम्य कर्मों की विधिका बडा आग्रह न करै ॥ ४ ॥

यम नियम दोनों आगे कहैंगे तिनमें से यमों को तो निरन्तर सेवन करै नियमों को तो हमारे में तत्पर रहने से कुछ कुछ करता रहै मेरे स्वरूप को जानने वाले शान्त स्वरूप गुरूको मेरा स्वरूप ही के बरोबर माने ॥ ५ ॥

गुरु सेवा के समय में अपना मान नहीं चाहै किसी के शुभ कर्मों मे द्वेष नहीं करै आलस्य न रखै पदार्थों पर ममता न रखै सब के साथ सुहृदपना रखै धर्म कार्यों में व्यग्र न होवै अर्थ की जिज्ञासा करै किसी की निंदा न करै व्यर्थ भाषण नहीं करै ॥ ६ ॥

स्त्री पुत्र घर खेत स्वजन धनादिकों में उदासीन होकर दुःख सुख में अपने सरी की सम दृष्टि रख कर देखा करै ॥ ७ ॥

आत्मा तो इस स्थूल सूक्ष्म दोनों देहों से भिन्न है इन का देखने वाला है स्वयं प्रकाश है जैसे कि काष्ठ का अग्नि जलते हुये काष्ठ से जलाने वाला प्रकाशक भिन्न ही होता है ॥ ८ ॥

निरोधोत्पत्त्यणुबृहन्नानात्वं तत्कृतान् गुणान् ।
अन्तः प्रविष्ट आधत्त एवं देहगुणान् परः ॥ ९ ॥
योऽसौ गुणैर्विरचितो देहोऽयं पुरुषस्य हि ।
संसारस्तन्निबन्धोऽयं पुंसो विद्याच्छिदात्मनः ॥ १० ॥
तस्माज्जिज्ञासयाऽऽत्मानमात्मस्थं केवलं परम् ।
सङ्गम्य निरसेदेतद्वस्तुबुद्धिं यथाक्रमम् ॥ ११ ॥
आचार्योऽरणिराद्यः स्यादन्तेवास्युत्तरारणिः ।
तत्सन्धानं प्रवचनं विद्यासन्धिः सुखावहः ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अनेनैव दृष्टान्तेन नित्यत्वानादित्वविभुत्वैकत्वादयोऽपि सिध्यन्तीत्याह । निरोधेति । यथा दारुष्वन्तः प्रविष्टोऽग्निस्तत्कृतान्नाशादीन्प्राप्नोति न तु स्वतो नाशादिमान् एवं देहगुणाननित्यत्वादीन् देहात्परो नित्यादिस्वरूपोऽप्यात्माऽनुभवति ततश्च नित्यत्वादिभिरपि वैलक्षण्यादन्यत्वमिति भावः ॥ ९ ॥

नन्वग्नेर्दारुसंयोगात्तद्धर्मभाक्त्वं घटते आत्मनस्त्वसङ्गत्वात्कथं देहेन तद्धर्मैर्वा सम्बन्धः सम्बन्धे वा कुतस्तन्निवृत्तिस्तत्राऽऽह। योऽसाविति । पुरुषस्येश्वरस्याधीनैर्मायागुणैर्योऽसौ सूक्ष्मोऽयं च स्थूलो देहो विरचितः पुंसो जीवस्यायं संसारस्तन्निबन्धनस्तदध्यासकृतः हि यस्मादेवं तस्मादात्मविद्या तन्निवर्तिकेत्याह । आत्मनो विद्या विज्ञानं तस्य छित् छेत्री मोच्छिदिति वा पदच्छेदः ॥ १० ॥

यस्मादेवं तस्माज्जिज्ञासया विचारेण आत्मस्थमात्मनि कार्यकारणसंघात एव स्थितं सम्यग्ज्ञात्वा एतस्मिन् देहादौ वस्तुबुद्धिं स्थूलसूक्ष्मक्रमेण निरसेत् त्यजेत् ॥ ११ ॥

गुरोर्लब्धा विद्या अविद्यातत्कार्यनिरसनक्षमेति स्फुटीकर्तुं विद्योत्पत्तिमग्न्युत्पत्तिरूपेण निरूपयति । आचार्य इति । आद्योऽधरः तत्सन्धानं तयोर्मध्यमं मन्थनकाष्ठम् प्रवचनमुपदेशः विद्या तु सन्धिः सन्धौ भवन्नग्निरिव तथाच श्रुतिः "आचार्यः पूर्वरूपम् अन्तेवास्युत्तररूपम् विद्या सन्धिः प्रवचनं सन्धानमि"ति ॥ १२ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी ।

अनेनैव वह्न्यात्मकेन तत्कृतान् दारुलक्षणोपाधिकृतान् ततश्च नाशादेर्देहोपाधिकत्वे सति । स्वरूपधर्मैर्नित्यत्वादिभिरित्यादिना अनादित्वादिपरिग्रहः । वैलक्षण्यात् देहादेः सकाशाद्विरुद्धलक्षणत्वादन्यत्वं भिन्नत्वमित्यर्थः ॥ ९ ॥

तद्धर्मभाक्त्वम् । दारुधर्मनाशादिमत्त्वम् । तन्निवृत्तिः देहतद्धर्मसम्बन्धनिवृत्तिः सूक्ष्मः सप्तदशोपाध्यात्मकः तदुक्तं श्रीशङ्कराचार्यैः "पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम् । अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनमिति । अयं प्रत्यक्षतो दृश्यमानः संसारो जन्ममरणलक्षणः तदध्यासकृतः देहद्वयारोपकृतः । तस्मात् संसारस्य देहद्वयोपाधिकत्वात् । आत्मविद्या स्वस्वरूपज्ञानं तन्निवर्तिका संसारनाशिका तस्य संसारस्य ॥ १० ॥

यस्मादेवं संसारस्याध्यासकृतत्वम् ॥ ११ ॥

अविद्याऽज्ञानं तत्कार्यं गुणादि तन्निरसनक्षमा तथाच विद्याया अग्न्युत्पत्तिरूपकत्वे प्रमाणं श्रुतिः पूर्वरूपमधःकाष्ठं अन्तेवासी शिष्यः उत्तररूपमुपरि काष्ठं विद्या ज्ञानं सन्धिः सन्धौ जातोऽग्निः प्रवचनमुपदेशः सन्धीयते मध्यसन्धौ स्थाप्यते इति सन्धानं मध्यममन्थनकाष्ठम् ॥ १२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

निरोधेति । दाह्यमनुप्रविष्टोऽग्निः उत्पत्तिं विनाशमणुत्वं बृहत्त्वमित्येवं रूपं नानात्वं तत्कृतान् गुणान् बहुलत्वविरलत्वादीन् आधत्ते आसमन्ताद्धत्ते एवं देहात्परो जीवोऽपि देहमनु प्रविष्टो देहगुणान् धत्त इत्यर्थः ॥ ९ ॥ १० ॥

एतद्वस्तुबुद्धिं एतस्मिन्नुपादेयबुद्धिम् ॥ ११-१२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तर्हि देहान्यस्यात्मनः कथं हतोऽयमुत्पन्नोऽयं कृशोऽयं स्थूलोऽयमिति देहसामानाधिकरण्येन प्रतीतिरित्यत्राह । निरोधेति । यथा दाह्यं दार्वनुप्रविष्टोऽग्निर्निरोधं विनाशमुत्पत्तिमणुत्वं बृहत्त्वमित्येवं रूपं दारुगतं नानात्वं तत्कृतान् गुणान् बहुलत्वविरलत्वादीनाधत्ते आसमन्तात् धत्ते एवं देहात्परो जीवोऽपि देहमनुप्रविष्टो देहगुणानाधत्ते अनाद्यज्ञानप्रयुक्तदेहतादात्म्याभिमानेन तत्समानधर्मतया प्रतीयत इति भावः ॥ ९ ॥

न केवलं देहगुणाधानमेव देहानुप्रवेशप्रयुक्तमपि तु कृत्स्नोऽपि संसारो देहप्रयुक्त एवेति वदन् तन्निवृत्त्युपायं चाह । योऽसाविति । गुणैः प्राकृतैः सत्परिणामात्मकैः पृथिव्यादिभिः पुरुषस्य जीवस्य योऽसौ देवमनुष्यादिरूपो देहो विरचितः ह्यीश्वरस्य नात्र विवाद इति भावः । तन्निबन्धनस्तद्देहप्रयुक्त एवायं संसारः पुंसस्तस्य देहिनः छित् संसारच्छेत्री आत्मनः परमात्मनो विद्या उपा-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सता चिदात्मन इति पाठे विद्यादिति छेदः चिदात्मनः ज्ञानस्वरूपस्य पुंसो जीवस्यायं संसारः तन्निबन्धन इति विद्यात् जानीयात् इतीतिशब्दाध्याहारेण सम्बन्धः ॥ १० ॥

यस्मादेवं तस्माज्जिज्ञासया वेदान्तार्थविचारेणात्मस्थं जीवान्तरात्मतया स्थितमात्मानमन्तरात्मानं केवलं हेयप्रतिभटं परं परमपुरुषं सङ्गम्य गत्यर्था बुद्ध्यर्थाः समित्येकीकारे "आत्मेति तूपगच्छन्ति ग्राहयन्ति च" इत्युक्तन्यायेन जीवशरीरकत्वेन तद्विशेषणतया विशिष्टमेकं विदित्वेत्यर्थः । एतद्वस्तुबुद्धिमेतस्मिन् देहतदनुबन्ध्यादौ उपादेयत्वबुद्धिं यथाक्रमं निरसेत् तावद्देहे ततो जायापत्यादिषु इत्येवं क्रमेण निरसेदित्यर्थः । जिज्ञासया सङ्गम्येत्यनेन विचाराद्वेदनोत्पत्तिरुक्ता तथा च श्रूयते "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य" इति ॥ ११ ॥

तदेवाग्न्युत्पत्तिरूपकेण दर्शयति । आचार्य इति । आद्योऽरणिरधरारणिरन्तेवासी शिष्यः तत्संधानं तयोर्मध्ये मन्थनकाष्ठं प्रवचनमुपदेशः वेदान्तार्थविचार इति यावत् विद्या वेदना तु सन्धिः सन्धौ भवः अग्निरिति तथा च श्रुतिः "आचार्यः पूर्वरूपमन्तेवास्युत्तररूपं विद्या सन्धिः प्रवचनं संधान" मिति ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

प्राप्तस्य हि प्रतिषेध इति न्यायादनयोरभेदशङ्कायाः किं बीजमत्राह । निरोध इति । यथा जीवो निरोधादीस्तत्कृतान् देहकृतान् गुणानाधत्ते एवं परोऽपि देहमनुप्रविष्टो देहगुणानाधत्त इत्यन्वयः । निरोधो मरणमणुत्वं बृहत्वं नानात्वं सुरनरादिनानाजातिविशिष्टत्वमनयोर्वैलक्षण्याज्ञानं बीजमित्यर्थः ॥ ९ ॥

इदमेवाज्ञानं संसारकारणमित्याह । य इति । योऽसौ सत्त्वादिगुणैर्विरचितो देहः अयं पुरुषस्य जीवस्यायं हि यस्मादविद्यास्थितात्मनः अविद्यायामज्ञाने स्थितमनसः पुंसोऽयं संसारस्तन्निबन्धनः देहाभिमाननिमित्तकः ॥ १० ॥

> अदेहधर्मवान्विष्णुर्देहधर्मवदीर्यते ।
> जीवस्तद्देहधर्मोऽपि परतो देहधर्मवान् ॥
> स्वयं त्वनभिमानः सन्नज्ञानामेव दर्शयेत् ।
> विष्णुर्जीवस्त्वभिमानी जीवन्मुक्तिपदं व्रजेदिति ॥ —

वचनाद्विष्णोर्देहधर्मवदाभानमज्ञानां न तु ज्ञानिनां जीवस्य स्वतो देहधर्मरहितस्यापि देहाभिमानादिति विवेकलक्षणो विचारः कर्तव्य इत्युपसंहरति । तस्मादिति । उक्तप्रकारेण जिज्ञासया आत्मस्थं देहान्तःस्थितं केवलं दुर्भगदेहिभोग्यदुःखरहितमात्मानं श्रीनारायणं परं विलक्षणं सङ्गम्य ज्ञात्वास्य जीवस्य वस्तुबुद्धिं शक्रबुद्धिं निरसेत्त्यजेत् कथं यथाक्रमं जिज्ञासया ब्रह्मादिजीवविराजोः यथा स्वरूपतारतम्यं विचार्य ज्ञात्वा परब्रह्मभावबुद्धिं त्यजेदित्यर्थः—

> अवस्तवः शक्रमुखा इदं शकं वस्त्विह भण्यते ।
> तस्मादेकं परं ब्रह्म वस्तुशब्दोदितं सदेति ॥

लक्षणवचनात् ॥ ११ ॥

नतु ज्ञानोत्पत्त्यर्थं गुरूपासिः कर्तव्येत्युक्तं तत्र कथङ्कारं ज्ञानमुत्पद्यते येन जीवस्य ब्रह्मभावबुद्धिं तृणदहनं स्यादित्यतस्तत्प्रकारमाह । आचार्य इति ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

किञ्च दारुधर्मा नाशादयो वह्नौ यथा भ्रमादारोप्यन्ते एव न तु ते तत्र वर्तन्ते एवमेव देहधर्मा अपि नाशादय आत्मनीत्याह । निरोधेति । निरोधो नाशः दारुषु प्रविष्टोऽग्निस्तत्कृतांस्तन्निष्ठान् नाशादीन् गुणान् पुरुषभ्रमादेव धत्ते एवं देहगुणान् देहधर्मान् नाशादीन् देहात् पर आत्मा धत्ते यथा अग्निर्नष्ट उत्पन्नोऽल्पो महान् नानाकार इत्युच्यते तथैवात्मा नष्ट उत्पन्न इत्यादीति अत्र जीवात्मनां नानात्वे वास्तवेऽपि एकस्यापि जीवस्य देवादेर्युगपत् क्रमेण नानादेहगतत्वेन यन्नानात्वं तत्त्ववास्तवमेवेति ज्ञेयम् ॥ ९ ॥

नन्वग्नेर्दारुसंयोगात्तद्धर्मभाक्त्वं घटते आत्मनस्त्वसङ्गत्वात् कथं देहेन तद्धर्मैर्वा सम्बन्धः सम्बन्धे वा कुतस्तन्निवृत्तिस्तत्राह । योऽसाविति । पुरुषस्येश्वरस्याधीनैर्मायागुणैर्योऽसौ सूक्ष्मो देहः अयं च स्थूलो देहो विरचितः पुंसो जीवस्यायं संसारस्तन्निबन्धनस्तत्सम्बन्धाभावेऽपि तदध्यासकृतः तदीयातर्क्यशक्त्या अविद्यया निष्पादितो यो देहाध्यासरूपो नितरां बन्धस्तत्कृत इत्यर्थः । यस्मादेवं तस्मात्तत्प्रसादादेव विद्या तदीयैव विद्याशक्तिश्छित् तद्बन्धच्छेत्री आत्मनो जीवस्य ॥ १० ॥

तस्माज्जिज्ञासया विचारेण आत्मनि स्थूलसूक्ष्मदेहान्तर एव स्थितमात्मानं परं केवलमसङ्गिनम् अतिशयेन सङ्गम्य ज्ञात्वा एतस्मिन् देहबन्धे वस्तुबुद्धिं यथाक्रमं साधनबाहुल्यतः क्रमेण निरसेत् त्यजेत् ॥ ११ ॥

गुरोर्लब्धा विद्यैव अविद्यातत्कार्यनिरसनक्षमेति स्पष्टीकर्तुं विद्योत्पत्तिमग्न्युत्पत्तिरूपकेण निरूपयति । आचार्य इति । आद्यः अधरः तत्सन्धानं तयोर्मध्यं मन्थनकाष्ठं प्रवचनमुपदेशः विद्या तु सन्धिः सन्धौ भवश्चाग्निरिव तथा च श्रुतिः "आचार्यः पूर्वरूपम् अन्तेवास्युत्तररूपं विद्या सन्धिः प्रवचनं सन्धान" मिति ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

कथं तर्हि देवदत्तो जातो मृतश्चेत्यादिप्रतीतिरत्राह । निरोधेति । यथा दारुष्वन्तः प्रविष्टोऽग्निर्निरोधादिगुणास्पृष्टोऽपि तत्कृतान् गुणान् आधत्ते तद्वत् ॥ ९ ॥

किञ्च पुरुषस्य परमेश्वरस्य नियम्यभूतैर्गुणैः स्वकार्यद्वारा योऽसौ सूक्ष्मः अयं च स्थूलो देहो विरचितस्तन्निबन्धनस्तद्धेतुकः पुंसो जीवस्यायं जन्ममरणप्रवाहलक्षणः संसारः सृष्टास्य बीजमवसीदति वृक्षधर्मेत्युक्तत्वात् संसारनिवृत्तिस्तु परविद्ययेति कथम्भूतस्य पुरुषस्य अविद्याच्छिदात्मनः "आत्मा वा अरे द्रष्टव्य" इत्यादिश्रुतिप्रोक्तस्य परमात्मनो विद्यया अविद्याच्छेदस्तच्छक्तिगुणरचितदेहनिबन्धनसंसारनिवृत्तिरितिनिष्कर्षः ॥ १० ॥

यस्मात्परविद्यैव संसारच्छेदिनी तस्मादुपायान्तरं योगशास्त्रादिप्रोक्तं विहाय केवलं परमात्मानमात्मन्यंशभूते चेतने व्याप्तत्वेन स्थितमंशिनं जिज्ञासया वेदान्तविचारेण सङ्गम्य

वैशारदी साऽतिविशुद्धबुद्धिर्धुनोति मायां गुणसंप्रसूताम् ।
गुणांश्च संदह्य यदात्ममेतत्स्वयं च शाम्यत्यसमिद्यथाऽग्निः ॥ १३ ॥
अथैषां कर्मकर्तॄणां भोक्तॄणां सुखदुःखयोः ।
नानात्वमथ नित्यत्वं लोककालागमात्मनाम् ॥ १४ ॥
मन्यसे सर्वभावानां संस्था ह्यौत्पत्तिकी यथा ।
तत्तदाकृतिभेदेन जायते भिद्यते च धीः ॥ १५ ॥
एवमप्यङ्ग ! सर्वेषां देहिनां देहयोगतः ।
कालावयवतः सन्ति भावा जन्मादयोऽसकृत् ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

सम्यक् ज्ञात्वा एतद्वस्तुबुद्धिम एतस्मिन्देहगेहादौ आत्मात्मीयबुद्धिं प्रथमं देहे आत्मबुद्धिं तदनन्तरं गेहादौ आत्मीयबुद्धिमित्येवं क्रमेण निरसेत् त्यजेत् ॥ ११ ॥

जिज्ञासया परमात्मानं सङ्गम्येति विद्योत्पत्तिरुक्ता तामेवाग्न्युत्पत्तिरूपकेण स्फुटीकरोति । आचार्य इति । आचार्यो मदभिज्ञो गुरुः आद्योऽरणिः स्यात् अन्तेवासी शिष्यः उत्तरोऽरणिः सन्धानं मध्यमं काष्ठं प्रवचनमुपदेशः विद्या तु सुखं परमानन्दरूपमावहति प्रापयतीति तथा सन्धिः सन्धौ भवन्नग्निरिव यथा नित्य एवाग्निरुत्पद्यते तथा ज्ञातृत्वलक्षणं नित्यं ज्ञानं ब्रह्मविद्यात्मना गुरुप्रसादादुत्पद्यते इत्यर्थः । अनेन "आचार्यः पूर्वरूपमन्तेवास्युत्तररूपं विद्या सन्धिः प्रवचनं सन्धान"मिति श्रुतिरुपबृंहिता भवति ॥ १२ ॥

भाषा टीका।

अग्नि जैसे काष्ठ में रहने से उसके गुण छोटे बडे पन उत्पत्ति नाश आदि कों को प्राप्त होता है तैसेही देह से पर आत्मा भी देह के गुणों को प्राप्त होता है वस्तुतः वह भिन्न ही है ॥ ९ ॥

गुणों से रचा हुआ जो यह पुरुष का देह है तिसीके हेतु से जीव को संसार होता है आत्मा के उस संसार को निवर्तन करने वाली ब्रह्म विद्या ही है ॥ १० ॥

तिस हेतु से आत्मा का विचार करके देह में स्थित आत्मा को तिससे परे केवल ऐसा जान कर इस देह में जो यथार्थ बुद्धि है तिसको क्रम से छोड देवै ॥ ११ ॥

ब्रह्म विद्या रूप अग्नि के उत्पत्ति करने में आचार्य नीचे का अरणि काष्ठ है शिष्य उपर का अरणि काष्ठ है उपदेश करना उसका मध्यम काष्ठ है विद्या जो है सो तो अग्नि है ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अग्निसादृश्यमेवाऽऽह । वैशारदीति । विशारदोऽतिनिपुणस्तेन शिष्येण प्राप्ता तेन गुरुणोपदिष्टा वा अतिविशुद्धा बुद्धिर्गुणकार्यरूपां मायां निवर्तयति यदात्मकमेतद्विश्वं जीवस्य संसृतिनिमित्तं तान् गुणांश्च दग्ध्वा असमिरग्निरिन्धनः तस्मात्कार्येण कारणेन विद्यया च व्यवधानाभावात्साक्षात्परमानन्दरूपो भवतीति ॥ १३ ॥

एवं तावत्स्वप्रकाशज्ञानस्वरूपो नित्य एक एवाऽऽत्मा कर्तृत्वादयश्च धर्मास्तस्य देहोपाधिकास्तद्व्यतिरिक्तं सर्वमनित्यं मायामयं चातः सर्वतो विरक्तः सन्नात्मज्ञानेन मुच्यत इत्युक्तं विलक्षणः स्थूलसूक्ष्मादित्यादिना तदेव श्रुतिसमन्वयेन निर्णीतेऽप्यर्थे मतान्तरविरोधेन सन्देहो माभूदिति तन्मतं निराकर्तुमुद्भावयति । अथेति । अथ मन्यसे एषां जीवात्मनां कर्मकर्तॄणां सुखदुःखयोर्भोक्तॄणां च नानात्वमिति एवं हि जैमिनीया मन्यन्ते अहंप्रत्ययविषय एवात्मा स च प्रतिशरीरं भिन्नः कर्तृभोक्तृरूपश्च नतु तत्स्वरूपभूतो निर्विकार एकः परमात्माऽस्तीति यथाऽऽहुः—

अहंप्रत्ययविज्ञेयो ज्ञातव्यः सर्वदैवही' ति ॥

तथा वैराग्यं च न सम्भवति तथाहि । भोगस्थानानामनित्यत्वाद्वा वैराग्यं भवेत् भोगकालस्य वा तदुपायकर्मबोधकागमस्य वा भोक्तुरात्मनो वा नत्वेतदस्तीत्याह । अथ नित्यत्वं लोककालागमात्मनां मन्यस इति ॥ १४ ॥

न च सर्वभोग्यानां विच्छेदान्मायामयत्वाद्वा वैराग्यं स्यादित्याह । सर्वभावानां स्रक्चन्दनादीनां संस्था स्थितिरौत्पत्तिकी प्रवाहरूपेण नित्या तथा वदन्ति न कदाचिदनीदृशं जगदिति अतस्तत्कर्ता कश्चिदीश्वरो नास्तीति भावः । किं च यथा यथावत् न तु मायामयीत्यर्थः । नचाऽऽत्मस्वरूपभूतं नित्यमेकं ज्ञानमस्तीत्याह। तत्तदिति। घटपटाद्याकारभेदेन धीर्जायते अतोऽनित्या भिद्यते च अयं गूढोऽभिप्रायः नहि नित्यज्ञानरूप आत्माऽपि तु ज्ञानपरिणामवान् नच विकारित्वेनानित्यत्वप्रसङ्गः यथाऽऽहुः—

विक्रिया ज्ञानरूपास्य न नित्यत्वं विरोत्स्यते ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

इति अतो मुक्तावीन्द्रियादिरहितस्य परिणामासम्भवाज्जडत्वेन तत्प्राप्तेरपुरुषार्थत्वात्प्रवृत्तिरेव श्रेयसी न निवृत्तिरिति ॥ १५ ॥

तत्र तावत्तदुक्तमङ्गीकृत्य वैराग्योपपादनाय प्रवृत्तिमार्गस्यानर्थहेतुत्वं प्रपञ्चयति । एवमपीत्यादिना । लोकानां लोकपालानामित्यतः प्राक्तनेन ग्रन्थेन । भङ्ग हे उद्धव ! कालावयवतः संवत्सरादिरूपात् ॥ १६ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी ।

गुणसंप्रसूतां गुणकार्यरूपां मायां देहेन्द्रियादिकं यदात्मकं ये गुणा आत्मा स्वरूपं यस्य तदेतद्विश्वं तस्मात् मायादिकं नाशयित्वा विद्याया अपि शान्तत्वात् कार्येण देहेन्द्रियादिना कारणेन अज्ञानेन विद्यया च वाक्यजैक्यज्ञानेन व्यवधानाभावात् स्वरूपप्राप्तौ प्रतिबन्धाभावात् तदुक्तमभियुक्तैः—

> ऐक्यज्ञानं यदा जातं महावाक्येन चात्मनः ।
> तदा विद्या स्वकार्यैश्च नश्यत्येव न संशयः ॥

इति ॥ १३ ॥

एवं पूर्वोक्तप्रकारेण तावदिति वाक्यालङ्कारे आत्मेक्षिता स्वदृगित्युक्तेः स्वप्रकाशज्ञानरूपः निरोधात्परस्य गुणवृहदित्युक्तेर्नित्य इत्यादि श्रुतिसमन्वयेन श्रुतीनां तात्पर्यवृत्त्या ब्रह्मणि पर्यवसानेन अर्थे परमात्मस्वरूपे मतान्तरविरोधेन जैमिनिमतविप्रतिपत्त्या तन्मतं जैमिनिमतम् उद्भावयति अभ्युपगमेनोत्थापयति । अथेति युग्मकम् । अथेति मतान्तरोपन्यासे अहं ब्राह्मण इत्यादिप्रतीत्या ज्ञेय एव नतु ज्ञानैकरूपः अतएव प्रतिशरीरं भिन्नः यागादिकर्तृत्वात् तत्फलभोक्तृत्वात् कर्तृभोक्तृरूपश्च वेदान्तमतं निराचष्टे । नास्त्विति । तत्स्वरूपभूतस्तेषां जीवानां कल्पितानामधिष्ठानत्वेन मूलस्वरूपभूतः निर्विकारज्ञानस्वरूपः एकः परमात्मा नास्ति यथाहुर्जैमिनीयाः अहम्प्रत्ययेति अहमितिप्रत्ययो ज्ञातृविषय एव यो हि परामृशति स स्वात्मानमहमित्येव परामृशति तेनाहंप्रत्ययस्य ज्ञातृगोचरत्वं निःसंशयमेव यत्तु शरीरस्य स्थूलोऽहं कृशोऽहमित्यादिज्ञानसामानाधिकरण्यादहंप्रत्ययविषयत्वं तदत्यन्तसन्निकृष्टयोरेकत्वभ्रान्त्या उष्णतोयप्रतीतिवद्दारुदाहायःपिण्डप्रतीतिवच्च सङ्गमनीयं ममेदं शरीरं कृशमिति षष्ठ्याऽस्मदर्थस्यात्मनः शरीरव्यतिरेकेण विविक्ततः प्रतीतेः शरीरस्य चेदहङ्कारास्पदत्वप्रतीतेः तथा स्वर्गकामो यजेतेत्यादिश्रुतयोऽपि शरीरातिरिक्तं परलोकभोगयोग्यं कर्तारमन्तरेणानुपपद्यमानास्तमाक्षिपन्ति ताभिश्चाक्षिप्तं साक्षादेवोपनिषदः समर्पयन्ति "अविनाशी वा अरेऽयमात्मानुच्छित्तिधर्मे"त्यादयः इति सिद्धः शरीरातिरिक्तो मानसप्रत्यक्षरूपाहंप्रत्ययगम्यो ज्ञातेति तस्य ज्ञातृत्वं ज्ञेयत्वं च सिद्धं नचैकस्य कर्तृत्वं कर्मत्वञ्च स्वात्मनि क्रियाविरोधात् कथं सम्भवतीति वाच्यम् आत्मनः स्वकर्तृकायामेव क्रियायां कर्मव्यवहारस्य लोके वेदे च दृष्टत्वात् तत्र लोके तावद्भाष्य एव स्वसंवेद्यः सम्भवतीति कर्मतावाचीकृत्य प्रयोगः वेदेऽप्यात्मानमुपासीतात्मानं वेदात्मा ज्ञातव्य इत्याद्यनेकशः प्रयोगः तस्मान्मानसाहम्प्रत्ययविषय एवात्मेति सिद्धं तथाच श्रुतिः समानलीन आत्मा जनानामिति सर्वदैवहीत्यस्यायं भावः विषयज्ञानवेलायामपि न विषयज्ञानकर्तृतयात्मावभासः किन्तु मानसाहंप्रत्ययकर्मतयैव किं पुनः स्वरूपज्ञानवेलायामिति एवं सिद्धान्त्युक्तं ज्ञानरूपत्वादिकं प्रत्याक्षिप्य वैराग्यमपि तदुक्तमाक्षिपति तयेति तथाहि वैराग्यासम्भवमेव दर्शयति भोगकालस्य वा भोगकालस्यापि नित्यत्वाद्वैराग्यं भवेत् तदुपायेति तस्य स्वर्गादिभोगस्योपायभूतानि यानि यागादिकर्माणि तेषां बोधकस्यागमस्य स्वर्गकामो यजेत वृष्टिकामः कारीर्या यजेतेत्यादिशास्त्रस्याप्यनित्यत्वाद्वैराग्यं भवेत् नत्वेतदिति एतत् भोगस्थानादीनामनित्यत्वन्तु नास्तीत्यर्थः । भोग्यानां स्रक्चन्दनवनितादीनां विच्छेदादनित्यत्वान्मायामयत्वान्मिथ्यात्वाद्वा वैराग्यं स्यात्तदपि च नेत्याह । सर्वभावानामिति । तथा च जगतो नित्यत्वं जैमिनीया वदन्ति न कदाचिदिति जगत् कदाचिदपीदृशं नेति न किन्त्वीदृशमेवेति सृष्टिप्रलयाभावो दर्शितः अतः सर्वभावानां नित्यत्वात् विक्रियेति अस्यात्मनो ज्ञानरूपा विक्रिया नित्यत्वे न विरोत्स्यते विरोधं न प्राप्नोति यथा सूर्यो भूम्यादुपाधिं प्राप्य रश्मिद्वारा मेघरूपेण परिणमते स्वरूपेण तु नित्य एव तिष्ठति तद्वदिति ज्ञेयं तत्प्राप्तेर्मोक्षप्राप्तेः ॥ १४॥१५ ॥

तत्र मीमांसकमते तदुक्तम् उद्धवोक्तम् एवमपि गूढाभिप्रायेण मीमांसकमतस्वीकारेऽपि देहयोगतः देहसम्बन्धात् भावाः विकाराः ॥ १६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

वैशारदी विशारदा एतच्छरीरं यदात्मकं यन्निबन्धनं स्वयं च शाम्यति उपासनारूपध्यानात्मिका प्रतीतिः मुक्तौ नास्तीत्यर्थः ॥ १३ ॥

सर्वभावानां देवमनुष्यादीनां लोककालागमात्मनां देशकालागमस्वभावानां नानात्वानित्यत्वयोः नित्यत्वं प्रतिक्षिपति । संस्थेति । संस्था विनाशः औत्पत्तिकी जन्मप्रयुक्ता यथा तदपि मन्यसे इत्यर्थः । अथ देवादिनानात्वस्य देहगतत्वमाह तत्तदाकृतीति । देवाद्याकारभेदेन जीवा जायन्ते देवोऽहं मनुष्योऽहमिति तत्तदाकाराभिमानिनी धीश्च भिद्यत इत्यर्थः ॥ १४ ॥ १५ ॥

तत्रैव कालकृतं भेदान्तरमाह । एवमपीति । तत्रापि देवानामाकारभेद चेत्यर्थः ॥ १६—१८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदेवं वेदान्तार्थविचारादिक्रमेण उत्पन्नाया वेदनायाः साक्षात्प्रकृतितत्कार्यसम्बन्धनिवृत्तिसाधनत्वं यावत्प्रारब्धमङ्गमनुवर्तनीयत्वञ्चाह । वैशारदीति । या विशारदेन निपुणेन शिष्येण प्राप्ता तेन गुरुणोपदिष्टा याऽतिविशुद्धबुद्धिः सेति सम्बन्धः वेदनात्मिका

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अतिविशुद्धा बुद्धिर्गुणसंप्रसूतां गुणेभ्यः सत्त्वरजस्तमोभ्यः संप्रसूतां मायां विचित्रां संसृतिं धुनोति तथा एतद्देहतदनुबन्ध्यादिकं यदात्मं यदात्मकं यद्गुणपरिणामात्मकं तांश्च गुणांस्तन्मूलपुण्यापुण्यात्मककर्माणि च संदह्य स्वयं च शाम्यति उपायरूपा ध्यानात्मिका बुद्धिर्मुक्तौ नानुवर्त्तत इत्यर्थः। यावन्मुक्तिरहरहरनुवर्तनीयेति भावः । निवर्त्तिकाया यावन्निवर्त्यमेवानुवृत्तिरित्यत्र दृष्टान्तमाह । असमिमिति । यथाऽसमिद्धोऽग्निरिन्धनोऽग्निर्दाह्याभावात्स्वयमेव शाम्यति तद्वत् ॥ १३ ॥

नानात्मकत्वाद्विफलस्तथा भेदात्मधीर्गुणैरित्यनेन देवमनुष्यादिशरीराणां तदुपभोग्यानां शब्दादिविषयाणां च नानात्मकत्वेन विफलत्वमुक्तं तत्र शङ्कते । अथेति द्वाभ्याम् । अथ ननु कर्मकर्तॄणां काम्यकर्मानुतिष्ठतां तत्फलयोः सुखदुःखयोर्भोक्तॄणामेषां देवमनुष्यादीनां काम्यकर्मफलस्य सुखस्य दुःखमिश्रत्वाभिप्रायेण दुःखशब्दः प्रयुक्तः लोकः सुखानुभवतत्साधनानुष्ठानदेशः कालस्तत्कालः आगमः समीहितसाधनाद्यवबोधको वेदः आत्मा भोक्ता जीवस्तेषामिदं पूर्वोक्तभेदार्थयोरुपलक्षणं यद्यपि नानात्वमथापि नित्यत्वं स्थायित्वं मन्यस इति संबन्धः नहि कार्यत्वानित्यत्वादिकं नानात्वसमानियतं जीवस्वरूपाणामीश्वरगुणानां च नानात्वेऽपि नित्यत्वादकार्यत्वाच्चेति भावः ॥ १४ ॥

नित्यत्वमेवोपपादयति । मन्यस इति । सर्वभावानां सर्वपदार्थानां संस्था विनाशः औत्पत्तिकी जन्मप्रयुक्ता हि अतो देशादीनां जन्मादर्शनात्तत्प्रयुक्ता संस्था च नास्तीति तेषां नित्यत्वमेवेत्यर्थः यथेत्यनेन संस्थाया औत्पत्तिकत्वे भावादिदृष्टान्तोऽभिप्रेतः ननु देशादीनां नित्यत्वेऽपि भेदार्थयोरनित्यत्वं दृष्टमित्यत आह । तत्तदिति । तत्तदाकृतिभेदेन सत्त्वादिप्राकृतगुणप्रचुरतत्तद्देवाद्याकारभेदेन जायन्ते जीवा इति शेषः । तेषामेवैषां कर्मकर्तॄणां भोक्तॄणां सुखदुःखयोरिति प्रकृतत्वात् धीस्तेषां बुद्धिः तत्तत्सत्त्वरजस्तमोगुणानुगुणतत्तत्फलतत्साधनतदाराध्यदेवतादिविषयतारूपेण भिद्यते अयंभावः नानात्वात्कार्यत्वादनित्यत्वाच्च देवाद्याकाराणां तदुपभोग्याद्यानां चापुरुषार्थत्वेन प्रवृत्तिकर्मतच्चोदनयोस्त्यागानादरावुक्तौ तदनुपपन्नं देवाद्याकाराणामनित्यत्वेऽपि तदाकारभाजां जीवानां नित्यत्वादाकारपरंपरायास्तत्तदुपभोग्यविषयपरम्पराया अपि नित्यत्वाद्विषयानुभवदेशकालतत्साधनावबोधकागमानामपि तथात्वात्सर्वदा तत्तदभिलषितविषयसाधनतत्फलानुभवशीलानां प्रवृत्तिकर्मपुरुषार्थसाधनमेवेति न तत्त्याग उचितः दुःखसाधनं तु त्यज्यते एव प्रतिकूलत्वात् नहि कश्चिदनुन्मत्त आत्मने दुःखमुत्पादयितुमुत्सहत इति ॥ १५ ॥

तथापि प्रवृत्तिकर्मनिष्ठाप्रयुक्तदेवादिदेहसम्बधाः षड्भावविकारा दुःखगर्भा अवर्जनीया एवेति न प्रवृत्तिकर्म पुरुषार्थसाधनमित्यभिप्रेत्य शङ्कितं दूषयति । एवमपीति । अङ्ग हे उद्धव! एवमप्युक्तरीत्या प्रवृत्तिकर्मणः पुरुषार्थसाधनत्वोपपादनेऽपि सर्वेषां देहिनां देहसम्बन्धात्कालावयवतः कलाकाष्ठामुहूर्तादिसम्वत्सरान्तेभ्यः कालावयवेभ्यो निमित्तेभ्यः पौनःपुन्येन जन्मादयो भावाः सन्त्येव जन्माद्य इत्यादिशब्देन जरामरणादिसंग्रहः ततश्चावर्जनीयं दुःखमिति भावः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

विद्याबर्हिः सुखावहत्वं नित्यदुःखहेतुजीवब्रह्मैक्यबुद्धिशुष्कतरुदाहेन नित्यानन्दनिदानत्वादिति भावेनाह । वैशारदीति । विविधं शारं सुखदुःखलक्षणं संसारं द्यतीति विशारदो विष्णुस्तस्य विद्यमाना वैशारदी सा अतिविशुद्धा बुद्धिः अपरोक्षबुद्धिः गुणसंप्रसूतिमयोग्यकामादिजननीं मायापिशाचवत्स्थितां जीवस्वरूपाच्छादिकां निरस्य परमाच्छादिकां विधुनोति उद्घाटयति अयोग्यकामादिगुणांश्च सन्दह्य एतद्दुःखादिकं यदात्म्यं यस्या मायायाः स्वरूपाधीनं तादृशीं स्वयं सा बाह्यान्तःकरणजा बुद्धिश्च तदन्तःकरणं च दग्ध्वा असमिद्धिरिन्धनोऽग्निरिव शाम्यति स्वरूपज्ञानेनैव स्वरूपमीश्वरादिकं चानुभवति मुक्ताविति शेषः "पिशाचवत्स्थिता माया तूच्यते जीवगा सदा। दह्यन्ते तद्गुणाः सर्वे सा च प्रातिस्विकी नरः" इति प्रमाणवचनादुक्तं युक्तम् अनेन बाह्यान्तःकरणं नश्यति स्वरूपान्तःकरणजन्यज्ञानेन स्वस्वरूपेश्वरादिकमनुभवतीत्येतत् सम्यङ्नावगतमतोऽन्यत्प्रमाणं वक्तव्यमितीयं शङ्का—

> बाह्यान्तःकरणाज्जन्यं ज्ञानं नश्यति मुक्तिगे ।
> स्वरूपज्ञानतो भोगान् मुक्तौ भुङ्क्ते यथेष्टतः ॥

इत्यनेन परिहर्तव्येति ज्ञातव्यम्—

> एतच्छब्देन दुःखादिरपरोक्षतयोच्यते ।
> क्वचिद्विश्वं क्वचिद्ब्रह्म क्वचिन्निन्द्यमितीर्यते ॥

इतिवचनात् एतच्छब्देन दुःखादिकमत्रोच्यत इति युक्तं तमसोहाम्बुनाशवत् भेदज्ञानविनाशादात्मैकत्वमेव न नानात्वमत एव तेषां नित्यत्वं च व्यावहारिकमेवेति तद्व्याख्यानं तदुत्तरग्रन्थविरुद्धत्वान्न विदुषां परिषदि सामञ्जस्यं भजते ॥ १३ ॥

तत्कथमत्राह । अथेति । एषामिति प्रत्यक्षं लोककालागमात्मनामित्यनेन भेदे प्रत्यक्षमनुमानमागमं च प्रमाणयति लोके काले आगमे वेदे चात्मा मतिर्येषां ते तथा तेषां लोककालवेदज्ञानामित्यर्थः। अनेन ज्ञानतारतम्यं च सूचितं तस्मात्पुण्यकर्मकर्तॄणां मिश्रकर्मकर्तॄणामत एव सुखदुःखमिश्रभोक्तॄणामेषां नानात्वमथैषां नित्यत्वं च मन्यसे जानासि यदि त्वं तस्मान्न मया भेदसाधने प्रयतनीयमित्यतः आत्माभेदोऽनुपपन्न इति—

> देहापेक्षाश्च नित्याश्च बहवः सुखरूपिणः ।
> उत्तमा जीवसंघास्तु नीचा वै नित्यदुःखिनः ॥

इत्यत अनित्यत्वं जननं सुखैकभोक्तृत्वं च युज्यते इयं व्यवस्था कस्मादिति तत्राह । सर्वभावानामिति ! यथा सर्वेषां देवासुरमनुष्यादिजातिभिन्नानां भावानां जीवानां संस्था व्यवस्था योग्यता औत्पत्तिकी स्वाभाविकी हि यस्मात्तस्मात्तत्तदाकृतिभेदेन देवासुरादिशरीरभेदेन तथा जायते जीवसंघस्तस्य धीर्ज्ञानश्च योग्यतानुसारेण भिद्यते अनेनोत्तमयोग्यतावतां भेदज्ञानेऽधिकार इतरेषामुभयेषां यथासम्भवमन्यत्रेत्युक्तं भवति ॥ १४—१५ ॥

ननु दृश्यमानत्वान्नित्यानामपि जन्मादिकमस्तु तन्मायामयमिति माशङ्कीत्याह । एवमपीति । एवमपि नित्यत्वेऽपि अत्र जननादिलक्षणसंसारे सर्वेषां देहिनां कालावयवतः रात्रिदिनाद्यवच्छिन्नेषु कालावयवेषु देहयोगतः देहसम्बन्धेन जन्मादयो भावाः असकृत्सन्ति प्रवाहतः सत्या इत्यर्थः । देहापेक्षमनित्यत्वं जीवानामित्येतदत्राप्यनुसन्धेयम् ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

असमिद्यथाग्निरिति । स यथा भूतसूक्ष्मरूपेण तिष्ठन् स्पष्टं न तिष्ठति तथेत्यर्थः । नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते इति श्रुतेः ॥ १३ ॥

अथेति युग्मकम् । आत्मा एतन्मनः स चात्मने तदुपाहितं लिङ्गशरीरं मन्यस इति पूर्वमन्वान् प्रत्युपदिशतीति यदुक्तं तदेतत्तत्र नातिव्यक्तः नह्यसावनीश्वरवादी च भवतीति टीकायां विक्रियेति । यथा सूर्यो धूमाद्युपाधिं प्राप्य रश्मिद्वारा मेघस्वरूपेण परिणमते नित्यश्च तिष्ठति तद्वदिति ज्ञेयम् ॥१४—१६॥

——

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अग्निसादृश्यमेवाह । वैशारदी विशारदो भगवांस्तदीया अतिविशुद्धज्ञानरूपाविद्या या मायामविद्यां गुणात्मकमेतत् देहद्वयाध्यासरूपं संसारबन्धनं तान् गुणांश्च दग्ध्वा असमित् निरिन्धनोऽग्निर्यथा निर्वाति तथा स्वयं विद्यापि शाम्यति ततः केवलैव भक्त्या अभ्यस्तया शान्तिरतिं प्राप्य भगवत्सालोक्यं प्राप्नोति यदुक्तं भक्तिर्मुक्तैव निर्विघ्नेत्यात्तयुक्तविरक्तता । इतिशान्तिरतिमतां गुणीभूतभक्तिमतां ज्ञानिनां तु विद्याविद्यामतयोरुपरामे ततो मां तत्त्वतो ज्ञात्वेति गीतोक्तेर्भक्त्युत्थज्ञानेन परमात्मैक्यम्॥१३॥

व्यवस्थापितेऽप्यस्मिन्नर्थे ये विवदन्ते तेषां जैमिनीयानां मतमाश्रित्य विप्रतिपद्यसे चेत्तर्हि शृणु तत्त्वमित्याह । अथेत्यादिना । गुणव्यतिकरे सतीत्यन्तेनापरेषां कर्मकर्तॄणां सुखदुःखयोः कर्मफलयोश्च भोक्तॄणां जीवानां ये लोककालागमात्मानस्तेषां नानात्वं नानाविधत्वमथ नित्यत्वं नित्यत्वविशिष्टानामेव नानात्वमित्यर्थः। एवमपि देहिनामसकृज्जन्मादयः सन्त्येवेति तृतीयेनान्वयः।एवं हि ते वदन्ति वैराग्यमेव तावन्न सम्भवति तथा हि भोगस्थानानां नानाविधानामनित्यत्वाद्वैराग्यं भवेत् भोगकालस्य वा तदुपायबोधकागमस्य भोगसाधनस्य लिङ्गदेहस्य वा नत्वेतदस्तीत्याह । अथ नित्यत्वं लोककालागमात्मनामिति । नच भोग्यवस्तूनां विच्छेदनाशाभावत्वाद्वा वैराग्यं स्यादित्यत्याह । सर्वभावानां स्रक्चन्दनवनितादीनां संस्था सम्यक् स्थितिः औत्पत्तिकी प्रवाहरूपेण नित्येत्यर्थः । तथा च वदन्ति न कदाचिदनीदृशं जगदिति अतस्तत्कर्त्ता कश्चिदीश्वरोऽपि नास्तीति भावः । किञ्च यथा यथावदेव नतु मायामयीत्यर्थः । नचात्मस्वरूपभूतं नित्यमेकं ज्ञानमस्तीत्याह । तत्त्वदिति । घटपटाद्याकारभेदेन धीर्जायते अतोऽनित्या भिद्यते च अयंगूढोऽभिप्रायः नहि नित्यज्ञानरूप आत्मा अपितु ज्ञानपरिणामवान् नच विकारित्वेनानित्यप्रसङ्गः यथाहुः विक्रिया ज्ञानरूपास्य न नित्यत्वे विरुध्यते इति अतो मुक्ताविन्द्रियादिरहितस्य परिणामासम्भवाज्जडत्वेन तत्प्राप्तेरपुरुषार्थत्वात् प्रवृत्तिरेव श्रेयसी न निवृत्तिरिति ॥ १४—१५ ॥

तत्र तावत्तदुक्तमङ्गीकृत्य वैराग्यमुपपादयितुं प्रवृत्तिमार्गस्यानर्थहेतुत्वं प्रपञ्चयति । एवमपीत्यादिना लोकानां लोकपालानामित्यतः प्राक्तनेन ग्रन्थेन। अङ्ग हे उद्धव!कालावयवतः सम्वत्सरादिरूपात् जन्मादय इति । तत्रापि जन्ममरणयोरतिकष्टप्रदत्वं सार्वत्रिकं प्रसिद्धमेवेति भावः ॥१६ ॥

——

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

वैशारदीति । सा पूर्वोक्ता गुरुप्रसादलब्धा वैशारदी विशारदो विष्णुरहं तद्विषयिणी अतिविशुद्धा बुद्धिर्विद्या सा एतदहंममाभिमानलक्षणमज्ञानं यदात्मं यदाश्रयं तान् चकारादज्ञानं यज्ञादीन् गुणान् संदह्यतीन्नतोंश कृत्वा गुणसंप्रसूतां मायां गुणक्षोभोद्भूतां कार्यकारणरूपां प्रकृतिं धुनोति दूरीकरोति तदनन्तरं शाम्यति अज्ञानादिनिराकरणव्यापारं त्यजति तदनन्तरं तु स्वयमवतिष्ठते इति शेषः । यथाऽसमित् निरिन्धनोऽग्निः काष्ठसंदीपनव्यापारं त्यजति स्वयं महाभूतरूपेणावतिष्ठत्येव तद्वदित्यर्थः । अत्रेदं बोध्यं "सदा पश्यन्ति सूरयः । यचत् क्रीडन् रममाणः" इत्यादिश्रुत्या सदैवएव मुक्तो जीवः प्रतिपादितः अतो विद्या स्वयं मुक्तौ तिष्ठत्येव ये तु मुक्तौ निर्बोध एवात्मा तिष्ठतीत्याहुस्ते उपेक्षणीयाः श्रुतिविरुद्धवादित्वादित्यलं विस्तरेण ॥ १३ ॥

एवं भगवता भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्मेत्यादिश्रुतिप्रोक्तं तत्त्वत्रयं तत्र भोक्तुः स्वांशभूतस्य स्वरूपतो भिन्नस्यापि अयमात्मा ब्रह्म तत्त्वमसीत्यादि श्रुतिप्रोक्तं स्वाश्रयत्वेन स्वस्मादभिन्नत्वं च जायापत्यगृहादीनामनित्यत्वेन ततो वैराग्यं च वर्णाश्रमादिकर्मणां विद्योपयोगित्वं च संसारच्छिद्विद्यायाः नहि ज्ञातुर्विज्ञातेर्विपरिलोपो विद्यतेऽविनाशित्वादित्यादिश्रुतिसिद्धं नित्यत्वं च विद्यया स्वविषयिण्या स्वोक्तस्वजनानिष्टस्य मोक्षश्चोक्त तद्दाढ्यार्थं मीमांसकानां पक्षं निराकर्तुमुद्भावयति । अथेति द्वाभ्याम् । "विज्ञानं यज्ञं तनुते कर्माणि तनुतेऽपि च । तयोरन्यः पिप्पलं स्वाद्वत्ति ऐतदात्म्यमिदं सर्वमित्यादिश्रुतिभ्यः कर्मकर्तॄणां सुखदुःखयोर्भोक्तॄणामेषां जीवानां मम मते स्वरूपतो नानात्वेऽपि अयमात्मा ब्रह्म क्षेत्रज्ञं चापि मां विद्धीति श्रुतिस्मृतिभ्यां परमेश्वरायत्तसत्ताकत्वात्परमेश्वरादनानात्वं पृथिव्याः औषधीनामिव अथ त्वं तु नानात्वं परमेश्वरानङ्गीकारात्तन्निरपेक्षनानासत्ताकत्वं मन्यसे भोक्तृभेदात्तत्त्वद्वयं मन्यसे इत्यर्थः किञ्च —

> अनादिकालो भगवन्नान्तोऽस्य द्विज ! विद्यते ।
> अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा ॥
> अजो नित्यः शाश्वतोऽयम्पुराणः ।

इत्यादिस्मृतिभ्यः कालादीनामेव नित्यत्वं मम मतेऽस्ति "यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोक" इति श्रुतेर्नतु लोकस्यातो वैराग्यमुपपद्यते त्वन्त्वथ लोककालागमात्मनां नित्यत्वं मन्यसे लोकानां भोगस्थानानां भोगकालस्य भोगोपायबोधकस्यागमस्य वेदस्य आत्मनो भोक्तुश्च नित्यत्वादतोऽहि तव मते वैराग्यं न सङ्गच्छते इति भावः ॥ १४ ॥

किञ्च—

> ये हि संस्पर्शजा भोगा दुःखयोनय एव ते ।
> आद्यन्तवन्तः कौन्तेय ! न तेषु रमते बुधः ॥

इत्येवं मम मते सर्वभावानां स्रक्चन्दनादीनामत्यन्तक्षणभङ्गुरत्वाद्वैराग्यं सङ्गच्छते त्वन्तु सर्वभावानां यथा यथावदेव संस्था संस्थितिः औत्पत्तिकी प्रवाहरूपेण नित्या इति मन्यसे अतोऽपि तव मते वैराग्यं नोपपद्यते इति भावः । किञ्च धर्मलक्षणस्य ज्ञानस्य अनादिमायावृतस्य गुरुप्रसादाद्ब्रह्मविद्यारूपेणोत्पन्नस्य

अत्रापि कर्मणां कर्तुरस्वातन्त्र्यं च लक्ष्यते ।
भोक्तुश्च दुःखसुखयोः को न्वर्थो विवशं भजेत् ॥ १७ ॥
न देहिनां सुखं किञ्चिद्विद्यते विदुषामपि ।
तथा च दुःखं मूढानां वृथाऽहंकरणं परम् ॥ १८ ॥
यदि प्राप्तिं विघातं च जानन्ति सुखदुःखयोः ।
तेऽप्यद्धा न विदुर्योगं मृत्युर्न प्रभवेद्यथा ॥ १९ ॥
को न्वर्थः सुखयत्येनं कामो वा मृत्युरन्तिके ।
आघातं नीयमानस्य वध्यस्येव न तुष्टिदः ॥ २० ॥
श्रुतं च दृष्टवद्दुष्टं स्पर्धाऽसूयाऽत्ययव्ययैः ।
बह्वन्तरायकामत्वात्कृषिवच्चापि निष्फलम् ॥ २१ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

आत्मपरमात्मस्वरूपबोधरूपेण स्थितिरस्ति तस्मात्परमानन्दानुभवाय निवृत्तिमार्गेण मुक्तिरेव सम्पादनीयेति मम मतम् । त्वन्तु तत्तदाकारभेदेन घटपटाद्याकारभेदेन धीर्जायते अत एवानित्या भिद्यते चेति मन्यसे ज्ञानपरिणामवानात्मेत्यङ्गीकारान्मुक्तावनिन्द्रियस्य परिणामासम्भवेन निर्धर्मकस्य निरीश्वरस्य जडस्य निष्फलत्वात् प्रवृत्तिरेव श्रेयसीति मन्यसे इति भावः ॥ १५ ॥

अथ परपक्षं निराकरोति । तत्र यदुक्तं प्रवाहरूपेण भावानां नित्यत्वमतोऽपि वैराग्यं नोपपद्यते इति तत्राह । एवमिति । हे अङ्ग उद्धव ! एवं प्रवाहस्य नित्यत्वेऽपि देहिनां पाञ्चभौतिकजरामयादिदोषग्रस्तदेहवतां सर्वेषां कालावयवतः सम्वत्सरादिकालपरिच्छिन्ना एव स्रक्चन्दनादिभावाः सन्ति नतु स्वरूपेण नित्याः सन्तः सर्वेषु कालावयवेषूपतिष्ठन्ति प्रत्युतानित्या दुःखावहा भवन्तीत्यर्थः । किञ्च देहिनां देहविशेषसम्बन्धात्सन्ति नतु सर्वेषु देहेषु किञ्च नानादुःखावहजन्मादयोऽसकृत्सन्ति अतो वैराग्यं युक्तमिति भावः ॥ १६ ॥

भाषा टीका ।

यह विद्या रूप वैशारदी बुद्धि अत्यंत निर्मल होने से गुणों से पैदा हुई माया को तथा इस संसार के कारण गुणों को दहन करके शांत होजाती है जैसे कि बिना लकडी का अग्नि शांत होजाता है ॥ १३ ॥

कदाचित् तुम कर्म करने वाले सुख दुःखों के भोगने वाले इनों को नाना भेद नित्य रहना तथा इनके लोक इन के काल इनके बोधक शास्त्रों को नित्य मानते हो ॥ १४ ॥

सम्पूर्ण पदार्थों की स्थिति भी उत्पत्ति बरोबर मानते हो तिस तिस आकार के भेद से बुद्धियों का भी भेद है ऐसा मानते हो ॥ १५ ॥

हे उद्धव ! ऐसा होने पर भी सब प्राणि मात्र के काल के अवयव से देह योग से सबके जन्मादिक बारंवार होते रहते हैं तिससे सब अनित्य हैं ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अत्रापीति । स्वातन्त्र्यपक्षे दुष्कर्मणो दुःखभोगस्य वाऽसम्भवादित्यर्थः ॥ १७ ॥

ननु ये सम्यक्कर्म कर्तुं जानन्ति ते सुखिन एव ये तु न जानन्ति त एव दुःखिन इति चेत्तत्राऽऽह । नेति । विदुषामपि कश्चित्सुखं न विद्यते तथा मूढानामपि दुःखं न विद्यतेऽतो वयं कर्मकुशलत्वात्सुखिन इति तेषां केवलं वृथैवाहङ्कार इत्यर्थः ॥ १८ ॥

अङ्गीकृत्याप्याह । यदीति । तं योगमुपायं न विदुर्यथा साक्षान्मृत्युर्न प्रभवेत् ॥ १९ ॥

तथापि यावज्जीवं सुखं भविष्यतीति चेन्नेत्याह । को न्विति । यतोऽन्तिके वर्तमानो मृत्युः न तुष्टिदो न तुष्टिं ददाति आघातं वधस्थानं प्रति नीयमानस्य वध्यस्य स्रक्चन्दनादि यथा न सुखयेत् ॥ २० ॥

एवमस्मिँल्लोके सुखं नास्तीत्युक्तं लोकान्तरेऽपि तथैवेत्याह । श्रुतमिति । श्रुतं स्वर्गादि तदपि दुष्टम् स्पर्धा परसुखासहनमसूया परगुणे दोषाविष्करणमत्ययो नाशः व्ययोऽपचयस्तैर्दुष्टम् यद्वा । व्ययो नाशः अत्ययोऽन्यस्यातिशयः तं दृष्ट्वा तदप्राप्त्या दुःखमित्यर्थः । किञ्च । बहवोऽन्तराया वैगुण्यादिरूपा विघ्ना यस्मिन् कामे सुखे तस्य भावस्तत्त्वं तस्मात् कृषिर्यथा बहुविघ्ना तद्वत् बहुदुःखत्वेन श्रुतमपि निष्फलम् ॥ २१ ॥

अन्तरायैरविहतो यदि धर्मः स्वनुष्ठितः ।
तेनापि निर्जितं स्थानं यथा गच्छति तच्छृणु ॥ २२ ॥
इष्ट्वेह देवता यज्ञैः स्वर्लोकं याति याज्ञिकः ।
भुञ्जीत देववत्तत्र भोगान्दिव्यान्निजार्जितान् ॥ २३ ॥
स्वपुण्योपचिते शुभ्रे विमान उपगीयते ।
गन्धर्वैर्विहरन्मध्ये देवीनां हृद्यवेषधृक् ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

विघ्नवैगुण्याद्यभावमङ्गीकृत्यापि नाशदुःखं दुष्परिहरमित्याह । अन्तरायैरिति पञ्चभिः । निर्जितं साधितम् ॥ २२ ॥

यज्ञैर्देवता इन्द्रादिरूपा इष्ट्वा ॥ २३ ॥

स्वपुण्यैरुपचिते सर्वभोगसम्पन्ने देवीनां मध्ये विहरन् गन्धर्वैरुपगीयते ॥ २४ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी ।

अत्रापि जैमिन्यभिमतकर्तृभोक्तृपक्षेऽपि कर्मणां कर्तुरस्वातन्त्र्यं लक्ष्यते लोके दृश्यते तत्र हेतुगर्भितविशेषणमाह । कथम्भूतस्य कर्तुः तथा दुःखसुखयोर्भोक्तुश्चास्वातन्त्र्यं लक्ष्यते पूर्वचकारस्तथेत्यर्थे तत्रार्थिकार्थतया हेतुमाह । स्वातन्त्र्यपक्ष इत्यादि तस्मात् कोऽन्वर्थः पुरुषार्थो विवशमस्वतन्त्रं कर्त्तारं भोक्तारं भजेत् तत्र स्थिरीभवेदित्यर्थः ॥ १७ ॥

विदुषां कर्माभिज्ञानां दक्षादीनामपि क्वचिद्विहितेऽपि काम्यकर्मणि सुखं न विद्यते प्रत्युत स्वनाशपर्यन्तं दुःखमेव दृश्यते प्रमादादिना कर्मवैगुण्यादिति भावः । तथा मूढानां कर्म कर्त्तुमजानतां सरलानां क्वचित् कार्याकरणेऽपि दुःखं न विद्यते सारल्यादिगुणेन अकस्मात् तीर्थादिसम्बन्धजातपुण्येन च प्रत्युत सुखमेव दृश्यते अतः कर्मणां सुखदुःखाप्रयोजकत्वात् ॥ १८ ॥

साक्षान्मृत्युरिति जीवन्मुक्तमृत्युं व्यावर्त्तयति ॥ १९ ॥

एवं प्रवृत्तिमार्गानुगतम् ॥ २० ॥

पूर्वार्थे व्ययस्य नाशान्तर्भावात् विषयानुसन्धानाऽगोचरत्वाच्च व्यय इत्यधिकमतो यद्वेति ॥ २१ ॥

अन्तरायैर्विघ्नवैगुण्यादिभिरविहतस्तच्छून्योऽपि धर्मः यदि सुष्ठु कृतस्तदा तेन विघ्नवैगुण्याद्यभाववतापि स्वधर्मेण तच्छृणु ॥ २२ ॥

तत्र स्वर्लोके निजार्जितान् निजकर्मसाधितान् भोगान् वैषयिकसुखसाक्षात्कारान् भुञ्जीत कुरुते पाकं पचति तपस्तप्यतीत्यादिवत् सामान्यविशेषतया व्याप्यव्यापकत्वमुक्तार्थानामप्रयोगात् ॥ २३ ॥

उपगीयते प्रोत्साहनेन स्तूयते ॥ २४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

तेऽपि कर्मपारतन्त्र्यात् अस्वातन्त्र्यवेदिनोऽपि मोक्षोपायं न विदुः ॥ १९ ॥

मृत्युरन्तिके यस्मात्कोऽन्वर्थः आघातं हिंसास्थानम् ॥ २०-२१ ॥

सोऽपि धर्मोऽपि निजार्जितकर्मानुष्ठानदशायां निरुद्धम् ॥ २२-२४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

नचैषामवर्जनीयतया निपतितदुःखपरिहारसामर्थ्यमस्तीति यतस्तेषां कर्माधीनत्वेन स्वातन्त्र्याभावः अतः को वा प्रवृत्तिकर्मसाध्यं शब्दादिविषयं सेवेतेत्याह । तत्रेति । तत्रापि प्रवृत्तिकर्मणः कथं चित्पुरुषार्थसाधनत्वेऽपि रजस्तमोगुणान्यतरगुणानुसारिणां कर्मणां प्रवृत्तिकर्मणां कर्तुरतएव सुखदुःखानामभोक्तुरस्वातन्त्र्यं कर्मपारतन्त्र्यं लोके लक्ष्यते दृश्यत इत्यर्थः।अन्यथा न केनापि दुःखमनुभूयेतेति भावः । अतः को वा पुमान् विवशः परवशः सन्नर्थं शब्दादिविषयं भजेत्सेवेत न कोऽपीत्यर्थः ॥ १७ ॥

ननु ये सम्यक् कर्म कर्तुं जानन्ति ते सुखिन एव ये तु न जानन्ति त एव दुःखिन इत्यत्राह । नेति विदुषामपि किञ्चित्सुखं न विद्यते साधनानामनुष्ठानदशायां दुःखावहत्वात् फलानुभवदशायां पतनभयशङ्कया च तदावहत्वादिति भावः । तथा चैवं च दुःखमित्यस्यानुवृत्तं नेत्यादेः न दुःखं विद्यते अस्माकं कर्मकुशलत्वात्सुखिन एव वयमिति तेषां केवलं वृथैवाहङ्कार इत्यर्थः । यद्वा देहयोगेऽपि न ब्रह्मादिदेवानां जरामरणादयः सन्तीत्यत आह । नेति । विदुषां विबुधानां ब्रह्मादीनामित्यर्थः । सुखं न विद्यते तदैश्वर्यस्यापि द्विपरार्द्धावसानादिषु विभ्रंशशङ्कागर्भत्वेन दुःखमिश्रत्वान्निर्दुःखं सुखं न विद्यते इति भावः । किन्तु दुःखमेव तथाप्येवमपि मूढानां तेषां केवलं वृथाहङ्करणमहङ्कार इत्यर्थः ॥ १८ ॥

ननु विदुषां कीदृशं तन्मौढ्यमित्यत्राह । यदीति । यदि यद्यपि सुखदुःखयोः प्राप्तिं विघातं सुखप्राप्त्युपायं दुःखविघातोपायं च जानन्ति कर्मवश्यानामस्वतन्त्राणां सुखदुःखे शुभाशुभकर्ममूलके इति जानन्तीत्यर्थः । अपि तथापि ते योगं न विदुः अर्थेति स्फुटावधारणार्थः न विदुरेवेत्यर्थः । यथा यथानुष्ठितेन योगेन मृत्युर्न प्रभवेत्तथा तं न विदुर्मोक्षोपायं न विदुरित्यर्थः ॥ १९ ॥

तथापि तेषां यावज्जीवं सुखं भविष्यत्येवेत्यत आह । को न्विति । एवं जीवन्तं को वार्थः कामो वा सुखयति न कोऽपीत्यर्थः । अर्थो

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अर्थं कामः शब्दादिविषयः तत्र हेतुरन्तिके वर्तमानो मृत्युर्देहेन सह जातो वर्तमान इत्यर्थः । न तुष्टिदः न तोषदः नार्थकामयोः सुखजनकत्वापादक इत्यर्थः । आघातं हिंसास्थानं नीयमानस्य वध्यस्येव यथा वध्याय दीयमानः क्षीरान्नालङ्कारादिर्न सुखजनकत्वापादकस्तद्वदित्यर्थः ॥ २० ॥

काम्यकर्मफलेषु वैराग्योत्पादनाय तेषु दोषान्निवर्तयन्नपुरुषार्थतामाह । श्रुतमिति । चित्रया यजेत पशुकामः कारीर्या वृष्टिकामो यजेतेति श्रुतं दृष्टमैहलौकिकं पश्वादिफलं दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति श्रुतमदृष्टं स्वर्गादिफलं च स्पर्द्धादिभिर्बहुभिरन्तरायैर्विघ्नैश्चाक्रान्तत्वात् कृषिवन्निष्फलमपुरुषार्थरूपं कृषिशब्दस्तत्फलपरः तत्र स्पर्द्धा परसुखासहिष्णुताऽसूया परेषां गुणेषु सत्स्वपि दोषाविष्क्रियाऽत्ययो नाशः व्ययोऽपचयः तैः यद्वा व्ययो नाशः अत्ययोऽतिशयः यद्वा काम्यकर्माणि दोषान्निवर्तयति श्रुतमिति दृष्टं दृष्टफलकमदृष्टं स्वर्गादिफलकं कृषिवद्यथा कृषिर्बहुविघ्ना तद्वद्बहुविघ्नमत एव निष्फलञ्च ॥ २१ ॥

अन्तरायानाक्रान्तं सफलमेवेत्यत्र तत्फलस्याप्यस्थिरत्वं वक्तुं तावत्तत्प्रपञ्चश्रवणाय प्रेरयति । अन्तरायैरिति । तेन स्वनुष्ठितेन धर्मेण निर्जितं साधितं स्थानं यथा याहशं स्थानशब्दस्तत्रत्यानुभाव्यसुखस्याप्युपलक्षकः गच्छति प्राप्नोतीत्यर्थः । तच्छृणु तत्प्रकारप्रदर्शनपरं मद्वचः शृणित्यर्थः ॥ २२ ॥

इहास्मिल्लोँके देवता इन्द्रादिरूपा यज्ञैरिष्ट्वा आराध्य याज्ञिकः यज्ञानुष्ठानाहितविशेषः पुमान् तत्र स्वर्लोके निजार्जितान् स्वकीययज्ञादिकर्मचितान् दिव्यान् भोगान् देववदिन्द्रादिवद्भुञ्जीत ॥ २३ ॥

भोगप्रकारं दर्शयति । स्वपुण्योपचित इति । देवीनां देवस्त्रीणां मध्ये तासां हृद्यं मनोहरं वेषं रूपं भरतीति तथा ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ननु सदनुविद्धत्वात्सत्यत्वं न स्वत इत्याशङ्क्यार्थक्रियायोग्यत्वात्स्वाभाविकमेवेति भावेनाह । तत्रापीति । तत्रापि जन्मादिमति जगत्यपि कर्मणां कर्तुः जातावेकवचनम् अस्वातन्त्र्यं कर्मफलसुखदुःखानां भोक्तुरस्वातन्त्र्यं च उत्तमानामवरानियतत्वमवरजनस्योत्तमत्वं लक्ष्यते दृश्यते । भवतेति शेषः ततः किमत्राह । कोन्विति । कोन्वर्थः पुरुषार्थः सुखलक्षणः विवशं नीचवशं पुरुषं भजेत कोऽपि पुरुषार्थः कं पुरुषं पुरुषार्थः प्राप्नोतीत्यस्यापि इदमेव व्याख्येयं विशिष्टपुरुषवशं पुरुषं भजेदिति अत्र विशेषस्तु—

> स्वाधिकानां वशत्वात्तु परमं सुखमेव तु ॥
> तदन्येषां वशे यस्तु किंसुखं तस्य भण्यताम् ।
> स्वाधिकानां वशत्वं च तेषां भक्तिमतः सुखम् ॥
> तदन्येषां तु दुःखाय तस्माद्भक्त्यधिको भवेदि

त्यनेनावगन्तव्यः । अनेन मुक्तावन्यानियतत्वं संसारधर्मत्वात्तदर्थं न प्रयतनीयमिति शङ्का निरस्ता ॥ १७ ॥

अत्र कैमुत्यमाह । नेति । विदुषामपि देहिनां देहाभिमानिनां यदा सुखं न विद्यते तथा तदा दुःखमूढानाम् अहङ्कारिणां च सुखं नास्ति इति किं पुनः "पुनः शब्दः प्रस्तुतार्थे तथाशब्द उदीर्यते" इति वचनात् पुनः शब्दः तथाशब्दार्थे वर्तते दुःखमूढेभ्यो ऽप्यहङ्कारिणामात्मन्यविद्यमानगुणारोपवतां सुखं नास्तीति किम्पुनस्तरामिति च योज्यं यावद्देहाभिमानित्वम् आधिकं तावद्दुःखित्वं च ज्ञातव्यमित्यतो देहाभिमानिनश्च दुःखमूढा इत्युक्तं परमित्यनेनाभिमानित्वमेव प्रयोजनमिति ॥ १८ ॥

नन्वस्त्वज्ञानां दुःखादिकं तत्परिहारप्राप्त्युपायाभिज्ञानादग्निष्टोमादिना तदभिज्ञानां तौ सुखप्राप्तिदुःखपरिहारौ स्यातामित्येतदनूद्य परिहरति । यदीति । ये तु लोके विद्वत्त्वेन प्रसिद्धाः पुरुषाः यदि सुखस्य प्राप्तिं दुःखस्य विघातं परिहारं जानन्तीति मतं तेऽप्यद्धा सत्यं यथार्थयोगमुपायं न विदुः कुतो न विदुरत्राह । मृत्युरिति । यथा येनोपायेन मृत्युः संसारो न प्रभवेन्नाङ्कुरीकुर्यात्तं देहमानित्वे बहुतरदुःखग्रस्तत्वादित्यर्थः ॥ १९ ॥

नन्वर्थकामौ तयोरुपायः स्यातामत्राह । को न्विति । अन्तिके स्थितमृत्युमेनं पुरुषम् अत्र दृष्टान्तमाह । आघातमिति । आघातं मरणस्थानं प्रति नीयमानस्य वध्यस्य पुंसो यथा सुखं नास्ति तथेति ॥ २० ॥

ननु स्वर्गकामस्य सुखहेतुत्वादन्यथा तत्कर्मानुष्ठानं व्यर्थं स्यादतः कथं कामो वा न सुखयतीति तत्राह । श्रुतञ्चेति । कामस्य कर्मद्वारा सुखहेतुत्वेऽपि तन्नित्यं न क्षणिकत्वात् । दृष्टवत् कर्मनिर्मितमन्दिरादिवद्भिन्नकर्मीयशास्त्रासिद्धत्वं प्रयोजकं नच मुक्तियन्नित्यत्वमिति वाच्यं ज्ञानसाध्यत्वविशेषात् स्वर्गकामेनानुष्ठीयमानमग्निष्टोमादिकं निश्चितफलं न स्यात् बह्वन्तरायविहतकृष्यादिकामर्यादत्याह । स्पर्धेत्यादिना । यथा कृषिर्वाणिज्यादिकं मिथः स्पर्धासूयादिबह्वन्तरायैर्विहतं भवति स्पर्धादिप्रयुक्ताभिचारिककर्मणा उन्मादादिनाऽग्निष्टोमाद्यनुष्ठानमपि कुण्ठितम् अत्ययो विध्यतिक्रमणमव्ययोऽन्तराले मरणम् ॥ २१ ॥

ननु सत्कृष्यादिरिव स्वनुष्ठितोऽग्निष्टोमादिधर्मः कर्मफलजनकः किं न स्यादत्राह । अन्तरायैरिति । तेनैव धर्मेण अर्थकामयोः सुखहेतुत्वाभावेऽपि स्वनुष्ठितस्य धर्मस्य तद्धेतुत्वं स्यादितो वाह । अन्तरायैरिति ॥ २२ ॥

निजधर्मार्जितान् ॥ २३ ॥

देवीनामप्सरसाम् ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तस्मात्को नु अर्थः पुरुषार्थो विवशमस्वतन्त्रं तं भजेत् तत्र स्थिरीभवेदित्यर्थः ॥ १७ ॥

न देहिनामिति तैः तत्र विदुषामपीत्यादौ प्रमादेनापि कर्मवैगुण्यादिति भावः । मूढानामपीत्यादावकस्मात्तीर्थादिसम्बन्धजातपुण्यत्वादिति भावः ॥ १८—३० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

कर्मणां कर्त्तुरिति कर्मकरणे दुःखसुखयोर्भोक्तुरिति भोगेऽप्यस्वातन्त्र्यं लक्ष्यते स्वातन्त्र्ये हि कः खलु दुःखम्भुञ्जीत को वा विवेकी दुष्कर्म कुर्यादिति भावः । ततश्च विवशमस्वतन्त्रम् ॥१७॥

ननु यो दुष्कर्म कुर्यात्स विद्वानेव नोच्यते तस्य दुःखभोगोऽस्त्वावश्यक एव यस्तु विकर्माकुर्वन् कर्म कर्त्तुं जानीयात् तस्य न कदापि दुःखमितिचेन्मैवं शारीरदेहधारिणां मध्ये सर्वदैव सुखी सर्वदैव दुःखी वा कोऽपि न दृष्ट इत्याह । नेति । विदुषामपि कदाचित् सुखं न विद्यते किञ्चिदपि तथैव मूढानामपि कदाचित् दुःखं किञ्चिदपि भवेदित्यतो वयं कर्मकुशलत्वात् सदा सुखिन इति तेषां वृथैवाहङ्कार इत्यर्थः ॥ १८ ॥

विज्ञत्वमङ्गीकृत्याप्याह । यदीति । योगमुपायं तथा न विदुर्यथा साक्षान्मृत्युर्न प्रभवेत् ॥ १९ ॥

मृत्योः पूर्वन्तु सुखं वर्त्ततेति चेन्मैवमित्याह । कोन्विति । अर्थस्तज्जन्यः कामो वा यतः खल्वन्तिके मृत्युर्न तुष्टिदः आघातं वधस्थानं नीयमानस्य वध्यजनस्य सम्प्रति त्वं स्वर्णमुद्रासहस्रं गृहाणेति पायसपिष्टकादिकं यथेष्टं भुङ्क्ष्वेति च दीयमानोऽर्थो भोगश्च न यथा सुखप्रद इत्यर्थकामौ पुरुषार्थौ खण्डितौ ॥ २० ॥

इह लोके सुखं नास्तीत्युक्तं परलोकेऽपि नास्तीत्याह । श्रुतं च स्वर्गाद्यपि दुष्टं स्पर्द्धा परसुखासहनमसूया परगुणे दोषारोपः अक्षयो नाशः व्ययः भोगेन भोक्ष्यमाणस्य स्वर्गस्याल्पताप्रतिपादकः किञ्चित् किञ्चिन्नाशस्तैः बहवोऽन्तराया वैगुण्यादिरूपा विघ्ना यस्मिन् तस्मात् यज्ञादिकात् कामः सुखं यत्र तस्य भावस्तत्त्वं तस्मात् कृषिर्यथा कदाचिन्निष्फलापि भवेत् तद्वत् ॥ २१ ॥

विघ्नवैगुण्याद्यभावमङ्गीकृत्यापि नाशदुःखं दुष्परिहरमित्याह । अन्तरायैरिति पञ्चभिः । निर्जितं साधितम् ॥ २२—२३ ॥

देवीनामप्सरसाम् ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

नानात्वमस्तीति यदुक्तं तत्राह । अत्रापीति एकात्मकत्वानङ्गीकारेण नानात्वेऽपि कर्मणां प्रारम्भे अनुष्ठाने समाप्तौ च वैपरीत्यदर्शनात्तत्कर्तुरस्वातन्त्र्यं लक्ष्यते सुखदुःखाभिष्टस्य सुखस्याप्राप्त्या अनिष्टस्य दुःखस्य च प्राप्त्या भोक्तुः अस्वातन्त्र्यं लक्ष्यते एवम्भूतं विवशं प्रवृत्तिमार्गे अर्थधर्मकामानां मध्ये नु इति वितर्के कोऽर्थः पुरुषार्थः भजेत कोऽपि जीवो विवशः अर्थाः जडाः कस्मै जीवाय कमर्थं को दद्यादित्यर्थः ॥ १७ ॥

ननु कर्मानभिज्ञस्यार्थादिसिद्धिर्मास्तु कर्मज्ञ विदुषस्तु सत्रासाक्षात्स्यादेवात्राह। नेति। देहिनां देहादिपोषणादृष्ट्या कर्मविधायां कृतश्रमाणां विदुषां न किञ्चित्सुखं विद्यते मूढानां च दुःखं न विद्यते अतः तथा तादृशमहं कर्मसु विद्वान् सुखी असौ मूर्खः दुःखी इत्येवं रूपमहङ्करणं वृथा ॥ १८ ॥

किञ्च त्रैवर्गिकैः जन्ममरणदुःखमपरिहार्यमेवेत्याह । यदीति ॥ १९ ॥

किञ्चित्कर्मफलं लब्धमपि मृत्युभयभीतांस्तान्नैव सुखयतीत्याह । क इति । अर्थः कामसाधकः कामः इन्द्रियप्रीतिः एनं त्रैवर्गिकं पुरुषम् कः सुखयति न कोऽपि यतोऽन्तिके वर्त्तमानो मृत्युर्न तुष्टिं सुखयोग्यतां ददाति आघातं वधस्थानं प्रति नीयमानस्यैव कर्मणि षष्ठी ॥ २० ॥

कालादिषु नित्येषु लोकानामपि नित्यत्वमङ्गीकृत्य वैराग्यं नोपपद्यते इति यदुक्तं तत्राह । श्रुतं चेति । दृष्टवत् यथा दृष्टं प्रत्यक्षप्रमाणगोचरमिदं दुष्टं तद्वत् श्रुतं स्वर्गकामो यजेतेत्यादिश्रुतिप्रोक्तं स्वर्गादि तदपि स्पर्द्धादिभिर्दोषैर्दुष्टम् तत्र स्पर्द्धा परैश्वर्यासहनजा पराभिभवेच्छा असूया परगुणेषु दोषाविष्करणेच्छा अत्ययो नाशः व्ययोऽपक्षयः किञ्च बह्वन्तरायः बहुविघ्नयुक्तः कामो भोगो यस्मिन्स्वर्गादौ तस्य भावस्तत्त्वं तस्मात् किञ्च कृषिर्यथाऽत्यायाससाध्यापि कर्षकं कृष्यन्तरनिरपेक्षं न करोति अतो निष्फला तद्वन्निष्फलं भोगानन्तरं पुनरपि बहुश्रमसाध्यं स्थिरफलशून्यमित्यर्थः ॥ २१ ॥

एवं कर्मचितानां लोकानामनित्यत्वमुक्त्वा अथ कर्मभिस्तत्र गतस्य पातमाह । अन्तरायैरिति पञ्चभिः । अन्तरायैर्विघ्नैरविहतो नाशं न नीतः किन्तु सुष्ठु अनुष्ठितः तेन धर्मेण निर्जितं स्थानं स्वर्गादिकम् ॥ २२—२३ ॥

स्वपुण्यैः यज्ञादिभिः उपचिते सर्वसमृद्धिसम्पन्ने देवीनां मध्ये विहरन् गन्धर्वैरुपगीयते ॥ २४ ॥

भाषा टीका ।

इस लोकमे भी कर्म के करने वालों को परतंत्रता दीखती है सुख दुःख के भोगने मे भी परतंत्रही हैं तब ऐसे पुरुष का तो कोइ भी मनोरथ सिद्ध नहीं होगा ॥ १७ ॥

काम्य कर्म करने वाले विद्वानों को भी कोइ सुख नहीं दीखता है और न यागादि कर्म नहीं करने वाले मूर्खों को दुःख ही दीखता है तब काम्य कर्म करने वालों के व्यर्थ अहंकारही है ॥ १८ ॥

यदि वे लोग सुख दुःख की प्राप्ति करना तथा निवारण करना जानते हैं तो तब वे लोग ऐसा उपाय तो नहीं जानते हैं कि जिससे मरण न होवे ॥ १९ ॥

जिसके पास मे मृत्यु उपस्थित है उसको कौनसा प्रयोजन सुख देता है जैसे कि वध स्थान में मारने को जिसको लेजाते हैं उस को कोइ चंदनादि सुखदाई नहीं होता है ॥ २० ॥

जैसे यहां के सुख हैं तैसेही शास्त्र से श्रुत स्वर्गादिक सुख भी दुःख युक्तही हैं क्यों कि वहां भी दूसरे कि पराभव की इच्छा दूसरे की निंदा अन्त मे नाश होना आदि दुःख हैं कर्म करने मे बहुत से विघ्न होते हैं तिससे यहां की खेती सरीका निष्फलसाही दीखता है ॥ २१ ॥

यदि धर्म का अच्छी तरह से अनुष्ठान होजावै कोइ विघ्न नहीं होवैं तो तब तिस कर्म से प्राप्त हुये स्वर्गको जैसे जाते हैं तिस को तुम श्रवण करो ॥ २२ ॥

यहां पर यज्ञों से देवतों का यजन करके याज्ञिक लोग

स्त्रीभिः कामगयानेन किङ्किणीजालमालिना ।
क्रीडन्न वेदाऽऽत्मपातं सुराक्रीडेषु निर्वृतः ॥ २५ ॥
तावत्प्रमोदते स्वर्गे यावत्पुण्यं समाप्यते ।
क्षीणपुण्यः पतत्यर्वागनिच्छन् कालचालितः ॥ २६ ॥
यद्यधर्मरतः सङ्गादसतां वाऽजितेन्द्रियः ।
कामात्मा कृपणो लुब्धः स्त्रैणो भूतविहिंसकः ॥ २७ ॥
पशून् विधिनाऽऽलभ्य प्रेतभूतगणान् यजन् ।
नरकानवशो जन्तुर्गत्वा यात्युल्बणं तमः ॥ २८ ॥
कर्माणि दुःखोदर्काणि कुर्वन् देहेन तैः पुनः ।
देहमाभजते तत्र किं सुखं मर्त्यधर्मिणः ॥ २९ ॥
लोकानां लोकपालानां मद्भयं कल्पजीविनाम् ।
ब्रह्मणोऽपि भयं मत्तो द्विपरार्धपरायुषः ॥ ३० ॥
गुणाः सृजन्ति कर्माणि गुणोऽनुसृजते गुणान् ।
जीवस्तु गुणसंयुक्तो भुङ्क्ते कर्मफलान्यसौ ॥ ३१ ॥
यावत्स्याद्गुणवैषम्यं तावन्नानात्वमात्मनः ।
नानात्वमात्मनो यावत्पारतन्त्र्यं तदैव हि ॥ ३२ ॥

भाषा टीका ।

स्वर्ग को जाते हैं वहां पर अपने अर्जित भोगों को देवतों सरीका भोगता है ॥ २३ ॥

अपने पुण्य से बढाये हुये निर्मल विमान में चढता है देवियों के मध्यमे दिव्यवेष धारण करके रहता है और विहार करते मे गन्धर्व उसका गान करते हैं ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कामगेनेच्छया गच्छता विमानेन । किङ्किणीजालमालिना क्षुद्रघण्टिकासमूहशोभिना सह स्त्रीभिः सुराक्रीडेषु नन्दनादिषु क्रीडन्नात्मपातं न वेद ॥ २५ ॥

कालेन चालितः पातितः ॥ २६ ॥

प्रवृत्तिर्द्विविधा विध्यनुसारेण काम्ये कर्मणि वा तदुल्लङ्घनेन अधर्मे वा तत्र काम्यप्रवृत्तेर्गतिरुक्ताऽधर्मप्रवृत्तेर्गतिमाह । यदीति । यदि वेत्यन्वयः । अजितेन्द्रियत्वात्कामात्माऽतः कृपणोऽतो लुब्धो भोगतृष्णाकुलोऽतः स्त्रैणः स्त्रीलम्पटस्तदर्थं भूतविहिंसकः ॥ २७ ॥

किञ्च दुष्टजनप्रबोधितो धनाद्यर्थं पशूनविधिना हत्वा तमः स्थावरतां याति ॥ २८ ॥

एवं कर्मसु प्रवृत्तस्य न सुखं नच दुःखनिवृत्तिरित्युपसंहरति । कर्माणीति ॥ २९ ॥

तथापि लोकानां नित्यत्वादमर्त्यधर्मत्वाच्च लोकपालानां सुखमस्तीति चेत्तत्राऽऽह । लोकानामिति । द्वौ परार्धौ परमायुर्यस्य तस्य ब्रह्मणोऽपि तथा च श्रुतिः “भीषाऽस्माद्वातः पवते भीषोदेति सूर्यः । भीषाऽस्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चम” इति अतः प्रवृत्तिमार्गस्यैवमनर्थहेतुत्वाद्विरक्त्या ततो निवृत्तिरेव युक्तेति तात्पर्यार्थः ॥ ३० ॥

एतेनैव स्वयमीश्वरत्वाविष्कारेणेश्वराभावाङ्गीकारः परित्यक्तः अन्यदपि प्रौढ्या पूर्वमङ्गीकृतं निराकरोति चतुर्भिः । तत्र यदुक्तं कर्तृभोक्तृरूप एवाऽऽत्मेति तन्निराकरोति । गुणा इति । गुणा इन्द्रियाणि कर्माणि सृजन्ति न त्वात्मा आत्मैवेन्द्रियाणि प्रवर्तयन् कर्माणि करोतीति चेत्तत्राह । गुण इति । गुणः सत्त्वादिर्गुणानिन्द्रियाण्यनुसृजते प्रवर्तयति न त्वात्मा अत आत्मनः कर्तृत्वं तावन्नास्ति भोक्तृत्वमप्यौपाधिकमित्याह । जीवस्त्विति । गुणसंयुक्त इन्द्रियादिसंयुक्तः कुत इत्यत आह । असौ तेष्वहङ्कारवानित्यर्थः ॥ ३१ ॥

यच्चोक्तमात्मनो नानात्वं तदप्यौपाधिकमित्याह । यावत्स्यादिति । गुणानां वैषम्यमहङ्कारादिकार्यरूपम् नन्वात्मन एकत्वे कथं पारतन्त्र्यमुक्तं कथं वा लोकपालादीनामपि मद्भयमित्युक्तं तत्राऽऽह । नानात्वमिति ॥ ३२ ॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

आत्मपातं स्वर्गात् स्वभ्रंशम् ॥ २५ ॥

अर्वागधः कालेन भोगसमाप्त्यवच्छेदकेन ॥ २६ ॥

यदीति युग्मकम् । काम्यकर्मणि पशुयागादौ तल्लङ्घनेन विध्यतिक्रमणेन तत्र द्विविधप्रवृत्त्योर्मध्ये तदर्थं स्त्रीप्राप्त्यर्थम् अविधिना स्वैराचारेण ॥ २७—२८ ॥

तत्र प्रवृत्तौ ॥ २९ ॥

यद्यपि कर्तृत्वभोक्तृत्वे न स्वतः तथा भोग्यस्य भोगकालस्य च नित्यत्वं नास्ति तथापि लोकानां भोगस्थानानां तथाच ब्रह्मादीनां भये प्रमाणं श्रुतिः अस्मात् परमेश्वराद्भीषा भीत्या अतः कालकलितत्वात् अनर्थहेतुत्वाद्दुःखजनकत्वात् ततः प्रवृत्तिमार्गात् तात्पर्यार्थः महावाक्यार्थः इति तदभिप्रेतगूढाभिप्रायस्योत्तरम् ॥ ३० ॥

एतेन भीषास्मादित्यादिश्रुत्यात्मकपुराणरूपस्ववाक्यप्रमाणेनेत्यर्थः । तत्कर्त्ता कश्चिदीश्वरोऽपि नास्तीत्युक्तयेश्वराभावाङ्गीकारः कृतः सोऽपि परित्यक्तः न त्वात्मेति भयस्कान्तस्यैवात्मनः सान्निध्येनैव तत्प्रेरकत्वात् नतु स्वेच्छयेति भावः । स्वात्मनः सन्निकृष्टत्वात् इन्द्रियादेस्तु स्वस्वरूपत्वाभावेन विप्रकृष्टत्वादात्मनोऽहःशब्दव्यपदेश्यत्वं न सङ्गच्छते किन्तु तप्तायःपिण्डवत् तत्तादात्म्येन तु तत् सङ्गच्छते इति तेषु देहेन्द्रियादिष्वहङ्कारवानित्यर्थं इत्युक्तम् ॥ ३१ ॥

औपाधिकम् अहङ्कारादिकार्यौपाधिकं नतु स्वरूपनिबन्धनं यावदिति सार्द्धकम् ॥ ३२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

सुराक्रीडेषु देवोद्यानेषु ॥ २५—२९ ॥

मत् मत्तः अस्मात् ॥ ३०—३१ ॥

आत्मनः नानात्वं देवमनुष्यादिरूपदेहप्रयुक्तं नानात्वं पारतन्त्र्यं कर्मपारतन्त्र्यम् ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

स्त्रीभिःसह विहरन् किङ्किणीजालमालिना क्षुद्रघण्टिकासमूहमालालंकृतेन कामं यथेच्छं गच्छता यानेन विमानेन सुराक्रीडेषु सुराणां क्रीडास्थानेषु मेर्वादिद्रोणीषु देवोद्यानेषु वा सञ्चरन्निति शेषः। क्रीडंश्च निर्वृतः सुखितश्चात्मपातमात्मनः स्वस्य पातं पुण्यान्ते ततो भ्रंशं न वेद न जानाति ॥ २५ ॥

किन्तु यावत्पुण्यं समाप्यते तावत्स्वर्गे प्रमोदते ततः किमित्यत्राह । क्षीणपुण्य इति । क्षीणं पुण्यं यस्य सः अनिच्छन्नपि कालेन बलिना निमित्तेन चालितः अर्वागधःपतति एवमिहामुत्र परिवर्तत इति भावः ॥ २६ ॥

एवमिष्टादिकारिणां गतिरुक्ता अथ प्रसङ्गादनिष्टादिकारिणां गतिमाह । यदीति । असतां सङ्गादधर्मे रत आसक्तः अजितेन्द्रियश्च तत्र हेतुः कामात्मा कामेषु शब्दादिषु विषयेष्वात्मा चित्तं यस्य सः अत एव कृपणः अतो लुब्धो भोगतृष्णाकुलः स्त्रैणः स्त्रीलम्पटः तदर्थं भूतानां विहिंसकः ॥ २७ ॥

किञ्च दुष्टजनप्रलोभितो धनाद्यर्थं पशूनविधिना हत्वा प्रेतगणान् भूतगणांश्च यजन्नवशः निजकर्मवश्यः जन्तुः जीवः नरकान् क्रमेण गत्वा प्राप्य अत्युल्बणं तम तमः प्रचुरं स्थावरं जन्म यातीति सम्बन्धः ॥ २८ ॥

इष्टादिकारितदन्येषां साधारण्येन सुखाभावमाह । कर्माणीति । देहेन पुण्यापुण्यात्मकानि दुःखोत्तरफलानि कुर्वन् तत्तद्देहावसाने तैः कर्मभिर्हेतुभिस्तत्तत्फलोपभोगानुगुणं देहमाभजते तत्रैवं सति मर्त्यधर्मिणो मरणशीलस्य किंसुखं न किञ्चिदपि सुखमित्यर्थः ॥ २९ ॥

तथापि लोकानां शाश्वतत्वात् लोकपालानां चामर्त्यधर्मत्वात्तेषां सुखमस्त्येवेत्यत आह । लोकानामिति । मद्भयं मत्तो भयं कल्पजीविनामाकल्पान्तं जीवतामपि किं बहुना द्वे परार्द्धे परमायुर्यस्य तस्य ब्रह्मणोऽपि मत्तः कालात्मनो भयं लोकाद्यः सर्वे कालचालिता अनित्या एवेति न तेषामपि निर्दुःखं सुखमिति भावः ॥ ३० ॥

तदेवं प्रवृत्तिकर्मणस्त्याज्यत्वज्ञापनाय तत्र बहुधा दोषाः कीर्त्तिताः कर्माणि देहेन सृजन् पुनस्तैर्देहमाभजते इत्यनेनोत्तरोत्तरदेहकर्मणोः पूर्वपूर्वकर्मदेहनिमित्तत्वमुक्तं तत्रापि कर्मणां कर्त्तुरस्वातन्त्र्यं च लक्ष्यते भोक्तुश्च दुःखसुखयोरित्यनेन सत्त्वरजस्तमोगुणानुविधायिप्रवृत्तिकर्मकर्तृत्वं तत्प्रयुक्तं पारवश्यं तत्प्रयुक्तं च सुखदुःखभोक्तृत्वं ततश्च पुनः स्वस्वगुणानुगुणप्रवृत्तिकर्मवासनाप्रयुक्तरुच्यनुसारेण प्रवृत्तिकर्मकर्तृत्वमित्यादिका चक्रवत्परिवृत्तिरुक्ता तत्र विलक्षणः स्थूलसूक्ष्माद्देहादात्मेतीतेति देहाद्भिन्नत्वेनोक्तस्य ज्ञानैकरसस्वरूपस्य निष्क्रियस्यात्मनः कथं च तत्सुखदुःखभोक्तृत्वापादकमित्याशङ्कायामात्मनस्तथात्वेऽप्यामोक्षं तस्य प्राकृतगुणयोगेन तद्वश्यत्वाद्गुणानां च यावन्मोक्षं क्षयोदयात्मकसाम्यवैषम्यस्वरूपावस्थाशीलत्वात्सर्वमुपपन्नमित्याह। गुणा इति । गुणाः प्राकृताः कर्माणि सृजन्तीति प्रयोजककर्तॄणां गुणानां सृष्टौ स्वातन्त्र्यविवक्षया सृजन्तीति कर्तृत्वनिर्देशः स्वस्वानुगुणकर्मवासनाप्रयुक्तदेहारम्भचिकीर्षाप्रयत्नज्ञानजननद्वारा सृजन्तीत्यर्थः। अतो नात्र गुणानामेव कर्तृत्वं न त्वात्मन इति भ्रमितव्यं गुणाः गुणपरिणामात्मकः सेन्द्रियो देहः गुणाननु अनुसृत्यसृजते कर्माणीत्यनुवर्तते अनेन गुणानां देहारम्भापादनद्वारा आत्मनः कर्तृत्वापादकत्वं देहस्य चात्मगुणानुविधायिचिकीर्षाद्यनुगुणप्रवृत्तिशीलत्वं चोक्तम् असौ प्राकृतगुणयोगी तद्वश्यो जीवस्तु कर्मफलानि स्वप्रवर्त्यदेहनिष्पादितानां कर्मणां पुण्यपापात्मकानां फलानि सुखदुःखात्मकानि भुङ्क्ते ॥ ३१ ॥

तर्हि त्वत्तो भयानुवृत्तिः कियत्पर्यन्तेत्यत्र यावद्गुणवैषम्यतत्प्रयुक्तनानाविधदेहतन्निष्पाद्यकर्मकर्तृत्वतत्प्रयुक्तपारतन्त्र्यतत्प्रयुक्तसुखदुःखभोक्तृत्वपरम्परानुवृत्तिस्तावदित्याह । यावदिति । गुणानां प्राकृतानां वैषम्यं यावत्स्यात्तावदात्मनो ज्ञानैकरसस्यापि नानात्वं देवमनुष्यादिरूपदेहप्रयुक्तनानात्वं तावद्देहसम्बन्ध इत्यर्थः ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यावन्नानात्वं तावत्पारतन्त्र्यं कर्मकर्तृत्वप्रयुक्तं गुणकर्मवश्यत्वं स्यात् ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सुराक्रीडेषु देवक्रीडास्थानवनेषु ॥ २५ ॥

समाप्यते क्षीयते ॥ २६ ॥

स्वतो ऽसुराणां वैष्णवाचार्यैर्यज्ञं कृत्वा स्वर्गं गत्वा कर्मफलं भुक्त्वा मर्त्यलोकमागतानां गतिमाह । यदीति ॥ २७ ॥

आलभ्य हिंसित्वा ॥ २८ ॥

मनुष्ययाज्ञिकस्य स्थितिमाह । कर्माणीति । मर्त्यधर्मिणो मरणधर्मिणः पुरुषस्य तत्र देहे किं सुखं लभ्यते न किमपीत्यर्थः ॥ २९ ॥

न केवलं लोकत्रयस्यानित्यफलत्वं तत उपरितनानां सत्यलोकपर्यन्तानामप्येवमेवेत्याह । लोकानामिति ॥ ३० ॥

एवं मनुष्यादिब्रह्मपर्यन्तं लोकानां लोकपालानां च सृष्ट्यादिकर्त्रा कालाख्येन भगवता मायागुणोपादानत्वेन तत्कर्मानुगुणं प्रवर्त्यते तस्मादस्य ज्ञानमेवात्यन्तदुःखनिवर्तकत्वेन नित्यं सुखदायीति भावेनोपसंहरति । गुणा इति । गुणाः सत्त्वादयः प्रकृतेः कर्मफलभोक्तृत्वमिति मतं प्रत्याह । जीवस्त्विति । तुशब्देनाचेतनस्य भोक्तृत्वानुपपत्तिं दर्शयति सत्त्वादिगुणयुक्तः ॥ ३१ ॥

एवं जीवपरभेदं प्रतिपाद्य तदभेदमतमनूद्य दूषयति । यावदित्यारभ्य तावदीश्वरतो भयमित्यन्तग्रन्थः पूर्वपक्षिणः य एतन्मतम् उपासीरन् सेवन्ते तेऽन्धे तमसि मुह्यन्ति दुःखोद्रेकात् ॥ ३२—३३ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

गुणा इति तैः नत्र एतेनेति पूर्वदर्शितभीषास्मादित्यादिश्रुत्यात्मकपुराणस्वरूपस्ववाक्यप्रामाण्येनेत्यर्थः । न त्वात्मेति । मयस्कान्तस्येवात्मनः सान्निध्येनैव तत्तत्प्रेरकत्वान्नतु स्वेच्छयेति भावः । यद्वा अथ जीवस्य स्वतः कर्मकर्तृभोक्तृरूपत्वं तन्मतं साङ्ख्यमतेन निराकरोति । गुणा इति । तत्तत्स्वभाव एव तत्र तत्र कारणमिति भावः ॥ ३१ ॥

यावदिति सार्द्धकम् । नानात्वं चाद्वयवादिमतेन निराकरोति यावदित्यर्द्धेन । तत्रैवाद्वयवादिनां सिद्धान्तनिर्वाहं दर्शयति । नानात्वमित्येकेन । अयमर्थः एक एव खलु चिदेकलक्षणसत्तामात्रस्वरूप आत्मा स एवात्मन्यनाद्यविद्यया गुणमयीं मायां तद्वैषम्यजातकार्यवर्गं च कल्पयन्नस्मदर्थमेकं युष्मदर्थांश्च बहून् कल्पयति स्वप्नवत् तत्रास्मदर्थः स्वस्वरूपः पुरुषः युष्मदर्थास्त्रिविधाः पुरुषान्तररूपाः जडरूपा ईश्वराख्यपुरुषविशेषरूपाश्चेति ततस्तस्यामविद्यायां गतायां नानात्वाभावादीश्वरो नाम यो वस्तुतो नास्ति स नास्त्येव किमुत तत्पारतन्त्र्यं किमुततरां ततो भयं किमुततमां यान्यपारतन्त्र्यादिकामिति तदेवं मतद्वयेन नहि कदाचिदनीदृशं जगदिति ज्ञानं नित्यं नास्तीति परिहृतं तत्तदुपाधेर्जन्मनाशदर्शनात्स्वज्ञानस्य त्वनाशदर्शनादिति भावः ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

कामेन इच्छया गच्छता विमानेन ॥ २५ ॥

कालेन चालितः पातितः ॥ २६ ॥

कर्मणामधिकारी द्विविधः धार्मिकोऽधार्मिकश्च तत्र प्रथमस्य गतिरुक्ता द्वितीयस्य गतिमाह । यदीति । वाशब्दात्स्वतोऽपि कश्चिदजितेन्द्रियः स्यादित्यर्थः । कामात्मातएव कृपणो दीनः अत एव लुब्धो भोगतृष्णाकुलः स्त्रैणः स्त्रीलम्पटः तदर्थम्भूतविहिंसकः ॥ २७ ॥

अविधिना "श्येनेनाभिचरन् यजेत" त्यादिविरुद्धविधिना उल्वणं तमः स्थावरत्वम् ॥ २८ ॥

एवं कर्मसु प्रवृत्तस्य नास्ति सुखमित्युपसंहरति । कर्माणीति ॥ २९ ॥

यच्च तुष्यतु दुर्जन इतिन्यायेनाङ्गीकृतं स्वर्गादीनां नित्यत्वं तन्निराकरोति । लोकानामिति । स्वर्गलोकस्य तत्पालानां च नैव नित्यत्वमित्याह । लोकानामिति । मत् मत्तः तथा च श्रुतिः—

> भीषास्माद्वातः पवते भीषोदेति सूर्यः ।
> भीषास्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चमः ॥

इति एतेनैव स्वयमीश्वरत्वाविष्कारेणेश्वराभावाङ्गीकारः परित्यक्तः ॥ ३० ॥

नरकानवशो जन्तुर्गत्वेत्युक्तं तत्र जीवस्यैवं वैवश्यं किम्प्रयुक्तमित्यपेक्षायामाह । गुणा इति । गुणा इन्द्रियाणि कर्तॄणि कर्माणि देवपूजादीनि स्वपरस्त्रीसम्भोगशब्दादिग्रहणकृषिवाणिज्यादीनि चादृष्टदृष्टफलानि सृजन्ति कुर्वन्ति तांश्च गुणान् सदसदिन्द्रियाणि गुणाः सत्त्वादिः सृजते जीवस्तु गुणैः सदसदिन्द्रियैः सत्त्वादिभिश्च संयुक्तो भद्राभद्राणि कर्मफलानि भुङ्क्ते ॥ ३१ ॥

गुणैरिन्द्रियैः कृत्वा उच्चनीचगतिप्राप्तिलक्षणं वैषम्यं यावत्स्यात् तावदात्मन एकस्यापि जीवस्य नानात्वं देवतिर्यगादिरूपत्वं स्यात् यावदेवं नानात्वं तावत् पारतन्त्र्यं कर्माधीनत्वम् ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

कामगेन इच्छानुरूपगतिना विमानेन किङ्किणीजालानां क्षुद्रघण्टिकाघटितस्थानविशेषाणां मालाः यस्मिन् तेन सुराक्रीडेषु देवक्रीडास्थलेषु स्त्रीभिः सह क्रीडन् आत्मपातं न वेद नित्योऽप्यात्मा प्राकृतवस्तुसंगो न नित्योऽतस्ततो वैराग्यमुचितमिति भावः ॥ २५ ॥

कालचालित इति । नित्योऽपि कालः स केवलं प्राकृतवस्तुसंयोगहेतुरेव नास्ति किन्तु तद्वियोगहेतुरपीत्यर्थः ॥ २६ ॥

एवं विहिते काम्ये कर्मणि प्रवृत्तस्य गतिरुक्ता निषिद्धे प्रवृत्तस्य गतिमाह । यदीति द्वाभ्याम् । यदि वाऽसतां सङ्गादधर्मे

यावदस्यास्वतन्त्रत्वं तावदीश्वरतो भयम् ।
य एतत्समुपासीरंस्ते मुह्यन्ति शुचाऽर्पिताः ॥ ३३ ॥
काल आत्मागमो लोकः स्वभावो धर्म एव च ।
इति मां बहुधा प्राहुर्गुणव्यतिकरे सति ॥ ३४ ॥

उद्धव उवाच ।

गुणेषु वर्त्तमानोऽपि देहजेष्वनपावृतः ।
गुणैर्न बध्यते देही बध्यते वा कथं विभो ! ॥ ३५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

निषिद्धे कर्मणि रतः प्रवृत्तः यतो भूतविहिंसकः यतस्त्रैणः यतः अविजितेन्द्रियः अतः कामात्मा ; अतः कृपणः अतो लुब्धः ॥ २७ ॥

किञ्च पशून् अविधिना आलभ्य हत्वा प्रेतभूतगणान् यजन् नरकान् गत्वा उल्बणमतिघोरं पुनः पुनः संसारप्रदं तमो याति ॥२८॥

प्रवृत्तिमार्गस्थजीवगतिमुपसंहरति । कर्माणीति । दुःखमुदर्कमुत्तरोत्तरफलं येषां तानि विहितनिषिद्धरूपाणि यदुक्तं तत्तदाकृतिभेदेन जायते म्रियते च धीरिति तत्र दूषणं नोक्तम् सोऽयं देवदत्तः एतावन्तं कालं सुखमहमस्वाप्समित्यादिप्रत्यभिज्ञानस्य ज्ञाननित्यतासूचकस्य प्रसिद्धत्वात् ॥ २९ ॥

अस्तु निरीश्वरमतं दोषग्रस्तं सेश्वरपक्षेऽपीश्वरोऽस्तीत्यत्र निश्चितं परमेश्वरं भोक्तृभोग्यनियन्तारं भगवानाह । लोकानामिति द्वौ परार्द्धौ परमायुर्यस्य तस्य "भीषास्माद्वातः पवते भीषोदेति सूर्यः । भीषास्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चम" इति श्रुतिरप्यत्रानुसन्धेया ॥ ३० ॥

ननु भोग्यविषये नास्ति विवादः भोक्तृविषये त्वस्ति तत्र देहेन्द्रियादिषु जीवः क इत्यत्राह । गुणा इति । जीवस्तु जीवयति सचेष्टदेहेन्द्रियादिकं करोतीति जीवश्चेतनः कर्मफलानि भुङ्क्ते ननु कर्मफलभोक्ता जीवोऽस्तु कर्मकर्ता क इत्याकाङ्क्षायामाह । असाविति । असौ जीव एव कर्माणि दुःखोदर्काणि कुर्वन् देहेन तैः पुनरियुक्तत्वात् "कर्ता शास्त्रार्थवत्त्वात्" इति सूत्राच्च 'विज्ञानं यज्ञं तनुते' इति श्रुतेश्च ननु ज्ञानस्वरूपस्य केवलस्य कथं कर्तृत्वादि सङ्गच्छते इत्यत्र करणान्याह । गुणा इति । गुणाः इन्द्रियाणि जीवेन प्रवर्त्तितानि करणानि कर्माणि सृजन्ति ननु केषाञ्चिदिन्द्रियाणां सात्त्विके कर्मणि केषां चिद्राजसे केषाञ्चित्तामसे प्रवृत्तिस्तत्र किङ्कारणं तत्राह । गुण इति । गुणाः सत्त्वादिः गुणा इन्द्रियाणि अनुसृजन्ते तत्र तत्र प्रवर्तयति नन्वन्यस्य करणमन्यः कथं प्रवर्तयति तत्राह । गुणसंयुक्तः सत्त्वादिगुणैः सम्यक् युक्तः गुणपरतन्त्र इत्यर्थः ॥ ३१ ॥

अत एव आत्मनः स्वभावतो नानात्वेऽपि यावद्गुणवैषम्यं तावन्नानात्वम् अयं सात्त्विकः अयं राजसः अयं तु तामस इत्येवं नानात्वमित्यर्थः । किञ्च यावदात्मनः नानात्वं तदैव तावदेव इह निश्चये पारतन्त्र्यं गुणवश्यत्वम् ॥ ३२ ॥

भाषा टीका ।

नूपुरों के समूह की माला वाले इच्छाचारी विमान पर चढकर आनंदित होकर देवतों के स्थानों में क्रीडा करता हुआ उहां से अपने गिरने की खबर नहीं रखता है ॥ २५ ॥

जब तक पुण्य समाप्त न होवे तब तक स्वर्ग में आनंद करता है जब पुण्यक्षय होता है तब नहीं चाहने पर भी कालके हेतु से चालित होने से फिर नीचे को गिर पड़ता है ॥२६॥

यदि अधर्मियों के संग से अधर्म में रत होता है अथवा स्त्रैण अजितेन्द्रिय है कामाभिलाषी है कृपण है लोभी है तो प्राणियों का हिंसक होता है ॥ २७ ॥

बिना विधि से पशुओं को मारकर प्रेत भूत गणों का यजन करता है तब वह जन्तु परवश होकर नरकों में जाकर घोर तमोगुण से स्थावर योनि को प्राप्त होता है ॥२८॥

इस प्रकार से मनुष्य देह में दुःख के हेतु कर्म करता है फिर उन कर्मों से दूसरी देह को प्राप्त होता है तब मर्त्य धर्मा मनुष्य को क्या सुख है ॥ २९ ॥

जितने लोक और लोक पाल और जो कल्प जीवी हैं तिनको भी मेरा भय है द्विपरार्ध आयु वाले ब्रह्माको भी मेरे से भय है ॥ ३० ॥

इंद्रियों द्वारा सब कर्म किये जाते हैं उन इंद्रियों की उत्पत्ति सत्वादि गुणों से होती है परन्तु उन इंद्रियों के सम्बन्ध से आत्मा कर्म फलों का भोक्ता होता है ॥ ३१ ॥

जब तक गुणों की विषमता रहेगी तब तक जीवात्मा में देव मनुष्यादि शत्रु मित्रादि भेद रहता है जब तक आत्म स्वरूप में देवादि भेद ज्ञान है तब तक उपास्य परमात्मा के ज्ञान न होने से कर्मों के पर तंत्र रहता है ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

यच्च गूढमभिप्रेतं प्रवृत्तिरेव श्रेयसीति तत्राऽऽह । य एतदिति । एतद्गुणवैषम्यं तत्कृतं भोगं कर्मचेत्यर्थः । उपासीरन् सेवेरन् ते लोकादीनामनित्यत्वाच्छुचाऽर्पिताः प्रोताः सन्तो मुह्यन्ति ॥ ३३ ॥

कथं वर्त्तेत विहरेत्कैर्वा ज्ञायेत लक्षणैः ।
किं भुञ्जीतोत विसृजेच्छयीतासीत याति वा ॥ ३६ ॥
एतदच्युत ! मे ब्रूहि प्रश्नं प्रश्नविदाम्बर ! ।
नित्यमुक्तो नित्यबद्ध एक एवेति मे भ्रमः ॥ ३७ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां
संहितायां वैयासिक्यामेकादशस्कन्धे
दशमोऽध्यायः ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

न केवलमनित्यतामात्रं किन्तु मायामयत्वमपीत्याह । काल इति । स्वभावो देवत्वादिपरिणामहेतुः धर्मस्तद्भोगकारणम् । गुणव्यतिकरे मायाक्षोभे सति मामेव प्राहुर्न मद्व्यतिरिक्ताः सन्ति ॥ ३४ ॥

ततो निवृत्तिरेव मुक्तिहेतुत्वाच्छ्रेयसीति सिद्धम् एवं तावदेक एवाऽऽत्मा तस्य च गुणकार्यदेहसम्बन्धकृतः संसारः आत्मज्ञानाच्च मुक्तिरित्युक्तं विलक्षणः स्थूलसूक्ष्मादित्यादिना तदेव च मतान्तरनिरासेन दृढीकृतमथैषामित्यादिना तत्र पृच्छति । गुणेष्विति । अयमर्थः गुणेष्वसत्सु मुक्तिः सत्स्वेव वा आद्य ज्ञानसाधनाभावान्न मुक्तिः द्वितीये च गुणेषु वर्तमानोऽपि तत्कार्यदेहजेषु कर्मसु सुखादिषु च कथं न बध्येत तथापि तैराकाशवदनावृतत्वान्न बध्यत इति चेत्तर्हि बन्धो न सम्भवतीत्याह । अनपावृतः कथं बध्यत इति ॥ ३५ ॥

यदि तु सत्स्वेव तदहङ्कारेण बध्यते तन्निवृत्त्या च मुच्यत इति मतं तर्हि तत्कथं ज्ञातव्यमिति पृच्छति । बद्धो मुक्तो वा कथं वर्तेतेत्यादि किं भुञ्जीत कथं भुञ्जीतेत्यर्थः ॥ ३६ ॥

एतत् एतद्विषयं प्रश्नम् किञ्च एक एवाऽऽत्माऽनादिगुणसंबन्धान्नित्यबद्धः मुक्तेर्जन्यत्वेऽनित्यत्वप्रसङ्गान्नित्यमुक्त इत्यप्यङ्गीकार्यं स्यात् तत्र मे भ्रमो भवतीत्याह । नित्यबद्ध इति ॥ ३७ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
दशमोऽध्यायः ॥ १० ॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

य एतदित्यर्द्धकम् सेवेरन् धर्माधर्माभ्यासेनेति शेषः मुह्यन्ति दुःखेन मूर्च्छामाप्नुवन्ति ॥ ३३ ॥

तदभ्युपगतां नित्यतां निराकृत्य तदभ्युपगतं यथार्थत्वमपि निराकरोति । न केवलमिति । कालादिचतुष्टयं जैमिनिमतानुवादोक्तं विश्वव्यवहारनिमित्तं मामेव प्राहुः अधिष्ठाने मयि कल्पितं वदन्तीत्यर्थः । स्वभावधर्मौ तु पूर्वतोऽधिकौ तत्र कालो भोगकालः आत्मा भोक्ता आगमो भोगोपायबोधकं शास्त्रं लोकः स्वर्गादिः स्वभावो व्याख्यातः धर्मः तद्भोगकारणं देवत्वादिभोगकारणमपूर्वं ततः कालादेर्मिथ्यात्वात् ॥ ३४ ॥

तदेव च संसारस्य मिथ्यात्वमात्मज्ञानस्यैव मोक्षहेतुत्वञ्च तत्र निवृत्तेर्मुक्तिहेतुत्वे गुणानां मायामयत्वात् गुणेषु वर्त्तमान इत्यनुपपन्नमतोऽयमर्थः । आद्ये गुणासत्त्वपक्षे द्वितीये च प्रातीतिकगुणसत्त्वपक्षे यद्यपि गुणेषु वर्त्तमानस्तथापि तैर्गुणैः अहं कर्ता भोक्तेति कथं बध्यते बद्धत्वेन प्रतीयते ॥ ३५ ॥

उत अपि किं विसृजेत् कथञ्च विसृजेत् कथं शयीत शयनं कुर्यात् आसीत उपविशेत् याति गच्छति ॥ ३६ ॥

एतद्विषयं बद्धमुक्तविषयं मुक्तेर्जन्यत्व इति यज्जन्यं तदनित्यमिति व्याप्तेरनित्यत्वप्रसक्तेः तत्र एकस्यैव नित्यबद्धमुक्तत्वे ॥ ३७ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धीये
श्रीराधारमणदासगोस्वामिकृतदीपिकादीपने टिप्पणे
दशमोऽध्यायः ॥ १० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

यावद्देहात्माभिमानं कर्मपारवश्यात् सवत्यस्वतन्त्रत्वं कर्मवश्यत्वं यावच्चावत्कर्मफलप्रदादीश्वराद्भयम् एतच्छरीरमुपासीरन् आत्मत्वेनानुसंदधते ते मुह्यन्तीत्यर्थः ॥ ३३ ॥

देशकालधर्माधर्मेत उपासायां हि सुखदुःखभयादिहेयशङ्कायां भयादिहेतवः कालादयोऽपि तदधीना इत्याह । काल इति । आत्मा शरीरं पुण्यपापानुष्ठाता वा आगमः मार्गः स्वभावः क्षुरकण्टकविषाग्निचन्दनचन्द्रिकादिवस्तुस्वभावः गुणव्यतिकरे सृष्टिवेलायाम् ॥ ३४ ॥

त्रिगुणमये शरीरे वर्त्तमानस्य बद्धस्य गुणातीतत्वमसम्भावितमिति चोदयति । गुणेषु वर्त्तमानोऽपीति ॥ ३५—३७ ॥

इति श्रीमद्भागवतव्याख्याने एकादशस्कन्धीये
श्रीसुदर्शनसूरिकृतशुकपक्षीये
दशमोऽध्यायः ॥ १० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यावच्चास्य देहिनः अस्वतन्त्रत्वं स्वतन्त्रत्वाद्दन्यत्पारतन्त्र्यमित्यर्थः । तावदीश्वरतो मत्तो भयं सुखलेशगर्भदुःखप्रचुरसंसारमयमहमापादयामीत्यर्थः । कस्तर्हि गुणवैषम्यादिपरम्परानिवृत्त्युपाय इत्यत्र मदुपासनैवेत्यभिप्रेत्य देहोपासनस्य शोकमोहहेतुत्वमाह । य इति । एतच्छरीरं ये पुरुषा उपासीरन्नात्मत्वेनानुसंदधते तत्सुखार्थं प्रयतन्ते चेत्यपि बोध्यं ते शुचा शोकेनार्पिताः सङ्गताः मुह्यन्तीति शोकनिवृत्त्युपायविषयमोहं प्राप्नुवन्तीत्यर्थः ॥ ३३ ॥

ननु प्रतिकूलदेशकालस्वभावादय एव भयहेतवो न त्वमित्यत आह । काल इति । कालादयोऽपि मदधीना एवेति भावः । तत्रात्मा शरीरं पुण्यपापानुष्ठाता वा आगमः मार्गं उपायः विधिप्रतिषेधात्मकं शास्त्रं वा स्वभावः क्षुरकण्टकविषाग्निचन्दनचन्द्रिकादिवस्तुस्वभाव इत्येतान् बहुधा बहुप्रकारान् गुणव्यतिकरे सृष्टिदशायां मां प्राहुर्मदधीनान्प्राहुरतोऽहमेव भयाभयकृदित्यर्थः ॥ ३४ ॥

विलक्षणः स्थूलसूक्ष्माद्देहादात्मोचिता स्वदृगित्यात्मनां देहवैधर्म्यमुक्तं तदनुप्रवेशकृतं तद्गुणाधानात्मकं बन्धनञ्च वैशारदी सातिविशुद्धबुद्धिरित्यादिना गुणकर्मबन्धनिवृत्त्युपायः परमात्मोपासनमित्युक्तम् अत्रापि य एतत् समुपासीरन्नित्यनेन देहोपासनस्य बन्धहेतुत्वोपपादनेन परमात्मोपासनस्य तन्निवृत्त्युपायत्वं सूचितं तस्माज्जिज्ञासयात्मानमात्मस्थं केवलं परमित्येवं देहावस्थितयोरपि जीवपरयोर्धार्यत्वधारकत्वहेयास्पदत्वतत्प्रतिभटत्वादिविलक्षणधर्मयोगित्वेन भेदश्चोक्तः तदेतदघटमानमिव मत्वा पृच्छति । गुणेष्विति । गुणशब्दोऽत्र तत्कार्यदेवादिदेहशब्दादिविषयपरः सत्त्वादिगुणमूलककर्मपरश्च तत्र देहेष्वधिष्ठातृतया शब्दादिषु भोक्तृत्वेन देहजेषु गुणमूलककर्मसु कर्तृतयावस्थितोऽपि देही जीवः कथमित्यपकृष्यते गुणैरनपावृतः कथम् "अनृतेन हि प्रत्यूढास्तेषां सत्यानां सतामनृतमपिधान"मिति जीवानां कर्मणा तिरोहितस्वभावत्वश्रवणात् त्रिगुणमये शरीरे वर्तमानस्य बद्धस्य कर्मणा तिरोहितस्वभावस्य च जीवस्यानादिसंसारिणो वैशारदी बुद्धिरपि न गुणकर्मनिरोधं दहतीति गुणातीतत्वमसम्भावितमिति भावः । अतः गुणैर्गुणकर्ममूलैः सुखदुःखादिभिः कथं न युज्यते युज्यत एवेति भावः । वस्तुतो देहाद्विलक्षणत्वेऽप्यावरणस्यौपाधिकत्वेऽपि अनादित्वान्नित्यत्वाज्जीवस्य कर्मवश्यत्वं तदावृतत्वं तत्प्रयुक्तसुखदुःखभाक्त्वं च दुर्वारं नहि नित्यस्यान्तवत्त्वसम्भव इति भावः । ननु कर्मवश्यत्वादिकमनाद्यन्तवच्चेत्यत आह । बध्यते वा कथमिति । तर्हि ईश्वरवदात्मनः स्वदृश इतितुश्च न बन्धसम्भव इति भावः ॥ ३५ ॥

अन्यदपि पृच्छति । कथं वर्तेतेति । विद्वानिति कर्तृपदमध्याहृत्यैवं वैशारदबुद्ध्युदयानुगुणा वृत्तिः कीदृशीति प्रश्नः तामेव प्रपञ्चयन्पृच्छति । विहरेदिति । कथमित्यनुषज्यते कैर्वा लक्षणैः श्रापकैर्विद्वानयमिति ज्ञायते प्रश्नान्तरं किं भुञ्जीतेति । किंशब्दः प्रश्नार्थकः उत विसृजेद्भोजनं विसृजेदेव वेति प्रश्नः किं शयीतैव अथवा आसीतैव अथवा याति सञ्चरन्नेव वर्तेतेत्यर्थः । यद्वा किंशब्दः कथमर्थकः कथं भुञ्जीतेत्यर्थः । यद्वा किंभुञ्जीतेति भोज्यवस्तुविषयकः प्रश्नः किं विसृजेदित्यभोज्यवस्तुविषयकः शयीतेत्यादीनामध्याहृतेन कथमित्यनेन सम्बन्धः ॥ ३६ ॥

एतदिति । हे अच्युत ! मे मम एतं प्रश्नं ब्रूहि प्रति ब्रूहि नाहं प्रभुरिति भावोऽत्र इत्याशयेन सम्बोधयति । प्रश्नविदां वरेति प्रश्नशब्दः प्रतिवचनपरः तस्य प्रश्नपूर्वकत्वात् एतदिति पाठे एतद्दनपावरणादौ यः प्रश्नस्तं प्रश्नं ब्रूहीत्यर्थः । तर्हीत्थमाक्षिपता त्वया किमवधृतमित्यत आह । नित्यबद्ध इति । एकशब्दोऽन्यार्थकः एको ऽन्यार्थे प्रधाने चेत्यर्थपरिगणनानुशासनात् नित्यबद्धो जीवोऽन्यः नित्यमुक्तस्त्वन्यः किंचिदवधृतमपि तु न बद्धस्य कदाचिदपि मुक्तिः सम्भविष्यति निर्मुक्तस्य पूर्वं बन्धः कथं समभवदिति मे भ्रमः यद्वा तस्माज्जिज्ञासयात्मानमात्मस्थं केवलं परमित्युक्तजीवेश्वरभेददृढीकरणाय तयोरैक्यमाशङ्कते । नित्यबद्ध इति । अस्मिन् पक्षे संख्यायामेवैकशब्दो वर्तते योऽयं नित्यमुक्त ईश्वरः स एव स्वाविद्यया नित्यबद्ध इति मे भ्रम इत्यनेनैक्यप्रमितिकारणाभावात्तदपि निश्चेतुं न प्रभवामीति सूचितम् ॥ ३७ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
दशमोऽध्यायः ॥ १० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तर्हि स्वसिद्धान्तः क इति तत्राह । काल इति । गुणव्यतिकरे असति मुक्तिदशायां बहुधा कालादिभिर्नामभिर्मामुपासते इति प्राहुर्वेदाश्च इति शेषः—

> कालः सर्वगुणोद्रेकादाप्तत्वाद्वात्मनामकः ॥
> आगमोऽवगतेरस्य लोको ज्ञानस्वरूपतः ।
> स्ववशत्वात्स्वभावोऽयं धारणाद्धर्म इत्यपि ॥
> उपासते सदा मुक्ताः परानन्दैकभागिनः ।
> तदेतत्तत्त्वमज्ञात्वा प्राहुर्दुर्मतयः परे ॥
> यावत्स्याद्गुणवैषम्यं तावन्नानात्वमात्मनः ।
> भेदबुद्धिस्तु यावत्स्यात्तावदीश्वरतन्त्रता ॥
> यावदीश्वरतन्त्रत्वं तावत्तस्माद्भयं भवेत् ।
> उपासत य एवं तु नित्यं शोके पतन्ति ते ॥
> महातत्त्वक्ययनानन्दे तस्मान्नैवेति चिन्तयेत् ।
> तस्मान्नित्यं तु नानात्वं जीवानामीशतन्त्रता ॥
> स्वाधिकानां वशत्वं च मुक्तावपि सदेष्यते ।
> एवं ज्ञात्वा विमुच्यन्ते परानन्दं व्रजन्ति चेति ॥

प्रमाणात्कालादिनामानि हरेरेव 'सुखार्थानीत्यतो गुणपूर्णस्य हरेः दुःखसमुद्रमग्नेन जीवेनैक्यं दूरतोपाकृतमितिभावः कलकामधेनाविति धातोः कमनीयानां गुणानां धेनुराधार इति कालः सर्वेषां सर्वस्माद्वाप्तत्वात्प्रेष्ठत्वादात्मा अवगच्छति जानाति सर्वमित्यागमः लुकुप्रकाश इति धातोः प्रकाशपरपर्यायज्ञानस्वरूपत्वात् लोकः स्वाधीनो भावः सत्तालक्षणो यस्य सः स्वभावः स्वतन्त्र इत्यर्थः । धारयति सर्वमिति धर्मः ॥ ३४ ॥

भगवदुक्त्या सम्यक् ज्ञातजीवपरभेदोऽप्युद्धवः स्थूलमतीनामपि निस्तुषं विविच्य भेदं ज्ञापयितुं पृच्छति । गुणेष्विति । स्वतोऽनपावृतः अदेही परमात्मा देहजेषु गुणेषु स्पर्शादि-

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

विषयेषु वर्तमानोऽपि गुणैर्विषयैर्न बध्यते उत बध्यते द्वितीये कथं बध्यते इति ॥ ३५ ॥

कोऽर्थ इति तत्राह । कथमिति । यदि बद्धस्तर्हि केन प्रकारेण वर्त्तेत लोके बद्धस्य प्रवृत्त्यदर्शनात् चेष्टादिलिङ्गाभावेन तज्ज्ञानं च दुरापादमिति भावेनाह । कैरिति । बद्धस्यापि भोगाभावे मरणं स्यादतः किम्भुञ्जीतेति भुञ्जानस्य हानोपादाने दृष्टे तत्रायं किञ्जहाति बद्धः शयनाद्यन्यतमं करोति तत्रायं किंकरोति ॥ ३६ ॥

ब्रूहि परिहारेण स्पष्टीकुरु एवं पृच्छतस्तव कोऽभिप्रायः इत्यत एकजीववादिमतमवलम्ब्य प्रश्नबीजमाह । नित्येति । कुत एतदिति चेन्न न मोक्षो न बन्धनमित्यादिपरिहारात् "शिष्योऽपि पूर्वपक्षस्थस्तदेवात्ममतं ब्रुवन् । नैव दूष्यत्यसत्येन स्थिरत्वार्थं हि तद्वच" इति वचनादुद्धवस्य नासत्यतादोषोऽपि ॥ ३७ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
दशमोऽध्यायः ॥ १० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तदेतत् पूर्वोक्तं त्रयमपि मतान्तरं निन्दति । य एतदित्यर्द्धकेन ॥ ३३ ॥

यतः काल इति कालादिचतुष्टयं जैमिनिमतानुवादोक्तं विश्वव्यवहारसिद्धिनिमित्तं तत् पारिशेष्यात् स्वभावः साङ्ख्यमतं गुणादेः प्रत्येकं विलक्षणकार्यकरत्वं धर्मस्त्वद्वयमतं सत्तामात्रम् अपूर्ववाचित्वेतु कर्मेत्येवावक्ष्यत् सुखदुःखभोगकारणत्वस्य विवक्षितत्वात् ततश्च मामेव ते प्राहुः किन्तु काल इत्यादिरूपेण तद्यथावन्मद्रूपेण तत्रापि बहुधा प्रत्येकं कारणं प्राचुर्येण मिथश्च कैमुत्येन नत्वखण्डकारणत्वेन मामेकं प्राहुरित्यर्थः "तेऽपि मामेव कौन्तेय ! यजन्त्यविधिपूर्वकम् । अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च । नतु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते" इतिवत् तत्र हेतुः गुणव्यतिकरे गुणैस्तमआदिभिरासङ्गे पराभूतत्वे सतीति तत्पराभवादेव श्रुतिस्मृतियुक्तिविरुद्धानीश्वरवादिनो भूत्वा ते तथा वदन्तीत्यर्थः । ईश्वरकारणवादिनान्तु प्रायस्तान्यपि न दूषणायेति भावः । तथाहि "यदंशविद्धाः प्रचरन्ति कर्मसु नैवान्यदा लोहमिवाप्रतप्त"मिति न्यायेन परमात्मस्वरूपेश्वरांशत्वात् स्वस्वजडवर्गप्रवर्त्तकत्वात् चिदात्मनां जीवानां स्वरूपसिद्धे अपि कर्त्तृत्वभोक्तृत्वे उपाधिं विना न स्पष्टीभवतः तत्सान्निध्येनोपाधितो जाते च ये ताभ्यां न साक्षात् सम्बन्धः किन्त्वज्ञानेनैव तस्माद्यथैषामित्यत्र कर्मेति सुखदुःखयोरिति च विशेषितं तथा प्रत्यात्मं नानात्वं भवतु किन्तु परमात्मरूपेणैकत्वमेव तथा लोकस्याव्यक्ताख्यकारणरूपेण भवतु नाम नित्यत्वं किन्तु स्थूलरूपेणानित्यत्वमेव तथात्मनामुपाध्यंशेन नास्ति सर्वथा नित्यत्वं किन्तु स्वरूपेणैव तथा कालस्य तत्प्रभावरूपतया आगमस्य च तन्निश्वासात्मतया नित्यत्वमस्तु प्रलये यत्र प्रचारो नास्त्येव तथा गुणादेरपि स्वभावः कारणं भवतु अविद्योपहित आत्मा वा किन्तु सर्वकारणेश्वरशक्त्यात्मकत्वेनैवेति तदेवं सर्वस्येश्वराश्रयैकसिद्धितया तस्य चेश्वरस्य च श्रुतिस्मृतिविद्वदनुभवप्रामाण्येन सद्रूपतया मत्तोऽन्यत्र रक्तानां भयमिति वैराग्यमेव श्रेयः तदेतज्जैमिनिमतनिरासायात्रैवोक्तं लोकानां लोकपालानामित्यनेन मतान्तरनिरासाय चान्यत्रोक्तं "आरुह्य कृच्छ्रेण परं पदं ततः पतन्त्यधोऽनादृतयुष्मदङ्घ्रय" इत्यनेनेति तात्पर्यम् ॥ ३४ ॥

देहजेषु गुणेषु वर्त्तमानोऽपि कथं तैर्न बध्यते इत्यन्वयः वर्त्तमानत्वेऽप्यनावृतश्चेत् कथं वा बध्यत इत्यन्वयः । अन्यत्तैः तत्र गुणेष्वसत्सु मुक्तिरित्यत्र बन्धस्तु स्तम्भत्वन्यायेन स्वत एव ज्ञेयः ॥३५—३७॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
दशमोऽध्यायः ॥ १० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तस्मात् प्रवृत्तिरेव श्रेयसीति ये आहुस्तानाक्षिपति ये एतत् कर्मैव उपासीरन् सेवेरन् ते शुचार्पिताः शोकप्रोताः सन्तो मुह्यन्ति ॥ ३३ ॥

लोककालागमात्मनां सर्वेषामेव नित्यत्वमितियत्परमतमङ्गीकृत्योक्तं तत्राह । काल इति । स्वभावो देवत्वादिपरिणामहेतुः । धर्मस्तद्भोगहेतुः इति गुणव्यतिकरे मायाक्षोभे सत्येव मामेव बहुधाभूतं तेषां मन्मायाशक्तिकार्यत्वादाहुः तस्मादस्य जीवस्य कर्मबन्धविमोचनार्थं यतनीयमिति मतं साधितम् ॥ ३४ ॥

ननु च भवन्मते मोक्ष एव पुरुषार्थोऽवगतः स च भक्तिज्ञानवैराग्याभ्यासाद्भवति तस्मिन् सति पुरुषो मुक्त उच्यते इति मया न बुद्ध्यत इत्याह । गुणेष्विति । मुक्तस्यापि दत्तात्रेयभरतादेर्भोजनशयनाटनादिश्रवणात् स्थूलसूक्ष्मदेहद्वयं तिष्ठत्येव तस्मिंश्च स्थिते सति देहजेषु गुणेषु वर्त्तमानोऽपि तैर्गुणैर्देही कथं न बध्यते तथापि तैराकाशवत् चिन्मयत्वादनावृतो जीवो न बध्यते इति चेत् तर्हि बन्धो न सम्भवतीत्याह । अनावृतः कथं बध्यत इति ॥ ३५ ॥

यदि तु सत्स्वपि गुणेषु विषयेन्द्रियादिषु तदभिमानेन बध्यते तन्निवृत्त्या च मुच्यते इति मतं तर्हि मया तथा कथं ज्ञातव्यमिति पृच्छति । कथं वर्त्तेतेत्यादिना । वर्त्तनविहरणभोजनमूत्रपुरीषविसर्जनशयनासनगमनानि कर्म्माणि मुक्तस्य बद्धस्य च तुल्यान्येव दृश्यन्ते । तानि च निरभिमानानि साभिमानानीति मया कैर्लक्षणैर्ज्ञातव्यानि इति ॥ ३६ ॥

नित्यमुक्तो दत्तात्रेयभरतादिर्नित्यबद्धो देवदत्तयज्ञदत्तादिस्तुल्यैहिकक्रियत्वादेक एवेति भ्रम इति वैलक्षण्यं तु मया ग्रहीतुमशक्यमप्यक्त्यैव तत्त्वयाहं ज्ञापयितव्य इति भावः । अत्र नित्यपदमनधिकार्थम् ॥ ३७ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
एकादशस्य दशमः सङ्गतः सङ्गतः सताम् ॥ १० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

महोवत भगवन्नस्य गुणाभिभूतस्य गुणावश्यत्वमस्तु तावत् यदुक्तं लोकानां लोकपालानां मद्भयमिति तन्निवृत्तिः कदेत्यत आह । यावदिति । यावत् अस्वन्त्रत्वं गुणपारतन्त्र्यम् तावदीश्वरतो मत्तो भयं संसारभयम्भवति तदेवाह । एतदस्वन्त्रत्वं ये उपासीरन् ते शुचार्पिताः जन्ममरणादिसन्तापेनार्दिताः सन्तो मुह्यन्ति संसारे एव भ्रमन्ति त्यक्तगुणपारतन्त्र्यास्तु मुच्यन्ते इत्यर्थः ॥ ३३ ॥

ननु कर्तृभोक्तॄणां नानात्वं मन्यसे इत्याक्षेपस्तेषां नानास्वरूपाणामपि केनचित्प्रकारेण नानात्वे सति घटेत तदनानात्वं कीदृशमत्र चेतनाऽचेतनानन्तशक्तिभिःसमानातिशयोऽहमेकः अनश्चेतनाचेतनपदार्थानामेकपदार्थे ऽन्तर्भावादनानात्वमित्याह । काल इति । गुणव्यतिकरे सति मामेव सर्वशक्तिमेव कालोऽचेतनविशेषः आत्मा चेतनः लोकः चिदचित्समुदायः धर्मः सर्वोऽपि वेदे प्रोक्तो निवृत्तिप्रवृत्तिरूपः इति नाना "सर्वं खल्विदं ब्रह्म तज्जलानिति"त्यादीनि वाक्यानि प्राहुरिति दिक् ॥ ३४ ॥

गुणवश्याः संसारे भ्रमन्ति त्यक्तगुणपारतन्त्र्या विमुच्यन्ते इत्युक्तं तत्र पृच्छति । गुणेष्विति । अनपावृतो विस्तृतज्ञानो जीवः हे विभो ! हे सर्वव्यापक कथं बध्यते देहजेषु स्वस्ववृत्तिरूपेण देहे वर्तमानेषु सत्त्वादिगुणेषु वर्तमानो देही गुणैः कथं वा न बध्यते कथं गुणपारतन्त्र्यं त्यक्त्वा मुक्तो भवतीत्यर्थः ॥ ३५ ॥

गुणैर्बद्धो यः सांसारिकसुखकामः यश्च मुक्तिकामः कथं वर्तेत किम्भुञ्जीत उत अपि कथं विसृजेत् अनिष्टमिति शेषः ॥ ३६ ॥

किञ्च—

सदा पश्यन्ति सूरय इति—

असुर्या नाम ते लोका अन्धेन तमसा वृताः ।

तांस्ते प्रेत्याभिगच्छन्ति ये केचात्महनो जनाः ॥

इति च वेदे श्रूयते तत्र एकः नित्यमुक्त एव एकः नित्यबद्ध एव इति मे भ्रमः तदंशभूतानां क्षेत्रज्ञानां समस्वभावानां मध्ये केन हेतुना केषांचिन्नित्यमुक्तत्वं केषाञ्चिन्नित्यबद्धत्वमिति मे मम महान् संशय इत्यर्थः । हे अच्युत ! नित्यविग्रह हे प्रश्नविदां प्रश्नाभिप्रायाभिज्ञानां मध्ये वर श्रेष्ठ मे एतत्प्रश्नं प्रश्नसमूहं ब्रूहि॥ ३७ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धीय
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
दशमाध्यायार्थप्रकाशः ॥ १० ॥

भाषा टीका ।

जब तक इस जीव को स्वस्वरूप पर स्वरूप ज्ञान के बिना परतंत्रता है तब तक संसार में रहने से ईश्वर से भय है तिस से जो लोग इस संसारादिक देहादिक में ही ममता रखते हैं वे सदा शोक युक्त रहते हैं ॥ ३३ ॥

गुणों के क्षोभ होने से काल आत्मा आगम लोक स्वभाव धर्म इस प्रकार से मेरेको बहुत प्रकार कहते हैं अर्थात् इन सब का कारण मही हूं ॥ ३४ ॥

उद्धव उवाच ।

हे विभो ! श्रीकृष्णचन्द्र इस देह में से उत्पन्न होने वाले गुणों में वर्तमान रहकर भी इनसे लिप्त न होकर कैसे नहीं बंधता है अथवा कैसे बंध जाता है सो कहिये ॥ ३५ ॥

इस देह में रहकर बंध ने छूटने वाला पुरुष कैसा वर्तता है कैसे विहार करता है अथवा किन लक्षणों से जाना जाता है कैसे भोजन करता है कैसे वस्तुओं को छोडता है कैसे सोता है कैसे बैठता है कैसे जाता है ॥ ३६ ॥

हे प्रश्नवेत्ताओं में श्रेष्ठ ! अच्युत ! भगवन् मेरे इस प्रश्न का उत्तर कहिये और नित्य मुक्त जीव तथा नित्यबद्ध जीव एक ही होगा करके मेरे को भ्रम है तिसको भी आप दूर कीजिये ॥ ३७ ॥

इति श्रीमद्भागवत एकादशस्कन्ध में दसमाध्याय
श्रीवृन्दावनस्थ पं० भागवताचार्यकृत
भाषा टीका समाप्ता ॥ १० ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे दशमोऽध्यायः ॥ १० ॥

—:*:—

अथैकादशोऽध्यायः ।

———:*:———

श्रीभगवानुवाच ॥

बद्धो मुक्त इति व्याख्या गुणतो मे न वस्तुतः ।
गुणस्य मायामूलत्वान्न मे मोक्षो न बन्धनम् ॥ १ ॥
शोकमोहौ सुखं दुःखं देहापत्तिश्च मायया ।
स्वप्नो यथाऽऽत्मनः ख्यातिः संसृतिर्न तु वास्तवी ॥ २ ॥
विद्याऽविद्ये मम तनू विद्ध्युद्धव ! शरीरिणाम् ।
मोक्षबन्धकरी आद्ये मायया मे विनिर्मिते ॥ ३ ॥
एकस्यैव ममांशस्य जीवस्यैव महामते ! ।
बन्धोऽस्याविद्ययाऽनादिर्विद्यया च तथेतरः ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एकादशे तु बद्धानां मुक्तानां चाथ लक्षणम् ॥
साधूनां च तथा भक्तेर्लक्षणं हरिणेरितम् ।

नित्यमुक्तो नित्यबद्ध एक एवेति मे भ्रम इति यदुक्तं तत्किं वस्तुतो विरोधः प्रतीतितो वा नाद्यः बन्धमोक्षयोर्वास्तवत्वाभावादित्याह । बद्धो मुक्त इति द्वाभ्याम् । आत्मा बद्धो मुक्तश्च मे गुणतो मदधीनसत्त्वादिगुणोपाधितो न तु वस्तुतः नन्वौपाधिकत्वेऽपि तण्डुलपाकादिवद्वास्तवत्वं किं न स्यात्तत्राऽऽह । गुणस्य मायामूलत्वाद्बन्धनं नास्ति अत एव मोक्षश्च नास्ति ननु कथं सर्वशास्त्रविरुद्धमुच्यते तत्राऽऽह । इति मे व्याख्येति । एवं मत्कृतो निर्णयः अल्पमतिकुतर्कैरित्यर्थः । अथवैवमन्वयः आत्मा बद्धो मुक्त इति या व्याख्या उक्तिः सा मे गुणतो मद्गुणपारतन्त्र्यात् अत्र हेतुत्वेन गुणनियन्तरि स्वस्मिंस्तद्व्यतिरेकमाह । अत एव न मे बन्धनं मोक्षो वेति अन्यत्समानम् ॥ १ ॥

एवं कारणभूतगुणानां मायामयत्वात्तत्कार्यसंसृतिर्मायेति प्रपञ्चयति।शोकमोहाविति । यथा स्वप्न आत्मनो बुद्धेरेव ख्यातिर्विवर्तस्तद्वत् ॥ २ ॥

अतो वस्तुविरोधस्तावन्नास्ति प्रतीतिस्त्वौपाधिकी घटत इत्याह । विद्याऽविद्ये इति । तन्यते मोक्षबन्धावाभ्यामिति तनू शक्ती कुतः मे मायया विनिर्मिते मायावृत्तिरूपत्वात् मोक्षबन्धकरीत्येकवचनं द्विवचनार्थं ननु तत्कार्यत्वे बन्धमोक्षयोरनादित्वनित्यत्वे न स्याताम् न आद्ये अनादी अतो यावदविद्यां प्रवर्तयामि तावद्बन्धो यदा विद्यां ददामि तदा मोक्षः स्फुरतीत्यर्थः तथा च स्कन्दपुराणे—

बन्धको भवपाशेन भवपाशाच्च मोचकः ।
कैवल्यदः परं ब्रह्म विष्णुरेव सनातनः ॥

इति ॥ ३ ॥

तत्र शरीरिणामिति । बहुवचननिर्देशाद्विषयभेदेनाविरोध उक्त इति भ्रान्तिं व्यावर्तयन्बन्धमोक्षव्यवस्थामुपपादयति । एकस्यैवेति । तर्हि किमात्माभेदात्तवापि बन्धो नहीत्याह । अस्य जीवस्यैवेति । नन्वात्माभेदे जीवो नाम कोऽन्योऽस्ति पृथक् कथं च बन्धमोक्षसुखदुःखादिव्यवस्था तत्राह । ममांशस्येति । अयम्भावः यथैकस्यापि चन्द्रादेर्जलाद्युपाधिना बिम्बप्रतिबिम्बरूपो भेदो यथा च तत्र जलकृताः कम्पादयः प्रतिबिम्बस्यैव यथा च प्रतिबिम्बानामप्युपाधिभेदादेकस्मिन्नुदकुम्भे मग्ने तद्गतप्रतिबिम्बस्यैव बिम्बैक्यं नान्यगतस्य तथाऽविद्यायाम् प्रतिबिम्बस्य मदंशस्य जीवस्यैव तत्कृतो बन्धस्तस्य चोपाधितोभेदान्नाव्यवस्थेति । तथाचाऽऽहुः—

यथैकस्मिन्घटाकाशे रजोधूमादिभिर्युते ।
न सर्वे संप्रयुज्यन्ते तथा जीवाः सुखादिभिः ॥

इति एतच्चातिरहस्यं स्वबुद्ध्या निश्चेतव्यमिति सम्बोधयति । हे महामते ! इतरो मोक्षः ॥ ४ ॥

———

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

तत् एकस्यैव बद्धमुक्तत्वं प्रतीतितः भ्रान्त्या नाद्यः वस्तुविरोधपक्षो न सम्भवति मे गुणत इति गुणा जीवस्य नैव मे इति वक्ष्यमाणत्वात् नियन्तृनियम्यभावेन सम्बन्धं व्याचष्टे

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी ।

मदधीनेति बन्धमोक्षयोरौपाधिकत्वेऽपि यथा स्थाल्यग्नितापात् पयसोऽपि ताप इत्यादिन्यायेन स्थाल्याद्युपाधिकत्वेऽपि वन्हिः संयोगेन तण्डुलपाको वास्तवो भवति तद्वद्बन्धमोक्षयोर्वास्तवत्वं किं न स्यादित्यर्थः । मायामूलत्वाद्दार्ष्टान्तिके गुणलक्षणोपाधेर्मिथ्यात्वात् अतएव बन्धाभावादेव पूर्वार्थे शास्त्रानादर इति व्याख्येत्यस्याः स्थानपतितत्वं चातोऽयथेति उक्तिः शास्त्रेषु वर्णनम् अत्र बन्धमोक्षव्यवस्थायां हेतुत्वेनेति व्यतिरेकव्याप्तिघटितेनेत्यर्थः । तद्व्यतिरेकं बन्धमोक्षाभावम् अतएव बन्धमोक्षयोर्गुणपारतन्त्र्यप्रयुक्तत्वादेव अयं प्रयोगः असौ बन्धमोक्षविषयः गुणपरतन्त्रत्वात् अमुकवत् यन्नैवं तन्नैवं यथाहमिति ॥ १ ॥

गुणानां मायामयत्वात् मायया तत्सम्बन्धस्य मिथ्यैव स्फोरणादित्यर्थः।तत्कार्या संसृतिः गुणकार्यरूपा सुखदुःखादिसंसृतिर्माया मिथ्यैव विवर्तोऽत्त्विकान्यथाभावः यथा रज्वां भुजङ्गबुद्धिः ॥ २ ॥

अतः बन्धमोक्षयोर्मिथ्यात्वात् वस्तुतो विरोध एकस्यैव बन्धमोक्षलक्षणो नास्ति किन्तु बन्धमोक्षयोः प्रतीतिः स्फूर्त्तिस्तूपाधिकृता घटत इत्याहेत्यर्थः । तन्येते स्फूर्त्तिविषयीभूते क्रियेते आभ्यां विद्याविद्याभ्यामिति तथा शक्ती बहिरङ्गे विनिर्मिते प्रसारिते मायावृत्तिरूपत्वादाभासशक्तेः कार्यरूपत्वात् बन्धमोक्षकरी बन्धमोक्षकर्यौ तत्कार्यत्वे विद्याविद्ययो मायाकार्यत्वे अनादी इति विद्याविद्ययोरनादित्वात् वस्तुतो नित्यमुक्तत्वेऽपि प्रतीतितोऽनादिबन्धत्वमिति युगपदुभयत्वं घटत इत्यर्थः प्रवर्त्तयामि प्रसारयामि तावद्वस्तुतोऽसन्नपि बन्धः स्फुरति बहिर्मुखस्य प्रतीयते यदा विद्यां स्वरूपज्ञानं ददामि तदा स्वरूपतया सन्नेव मोक्षः स्फुरति बन्धक इति भयं द्वितीयाभिनिवेशतः स्यादिति न्यायेन भवरोगस्य मूलनिदानं तु वैमुख्यमेवेति बन्धस्य मायाकार्यत्वेऽपि भगवद्धेतुकत्वाद्भगवानेव मायया भवपाशेन बहिर्मुखस्य बन्धकः सम्मुखस्य तु मोचकः विष्णुरेवेति मोक्षदातृत्वे देवतान्तरस्यानधिकारः सूचितः ॥ ३ ॥

तत्र बन्धमोक्षव्यवस्थायां विषयभेदेन अधिकारिभेदेनेति यावत् बन्धमोक्षव्यवस्थामेकस्यैव बन्धमोक्षविषयत्वानियममुपपादयति युक्त्या साधयति आत्माऽभेदादात्मनः एकत्वात् शङ्कते नन्विति आत्मनोऽभेदे एकत्वे सति अन्य आत्मनो भिन्नः कोऽस्ति न कोऽपि नान्योऽतोऽस्ति द्रष्टेत्यादि श्रुतेः पृथक्त्वेऽप्येकस्य बन्धमोक्षादिव्यवस्था च कथमित्यर्थः । अंशस्येत्युक्त्या पृथक्त्वं नाङ्गीकृतं किन्तु अंशिनोऽपि कथं न बन्धादि एकस्यैव बन्धादिकं च कथमित्याक्षेपेण परिहारार्थमयं भाव इति तत्र बिम्बप्रतिबिम्बयोर्मध्ये प्रतिबिम्बस्यैव नतु बिम्बस्येति बिम्बस्थानीयेश्वरस्य न बन्धादिकमित्यर्थः । एवमीश्वरे शङ्कां परिहृत्य जीवे बन्धादिव्यवस्थां दृष्टान्तेन साधयति यथा चेति तत्र बिम्बप्रतिबिम्बयोर्मध्ये उपाधिभेदेन उदकुम्भलक्षणोपाधिनानात्वेन तद्वतेति भग्नोदकुम्भगतप्रतिबिम्बस्यैव तत्कृतोऽविद्याकृतः तस्य च अविद्याप्रतिबिम्बितजीवस्य उपाधिना भेदात् अविद्याकार्यदेहाद्युपाधिनानात्वात् सर्वे घटाकाशाः एतश्च बन्धमोक्षव्यवस्थापनम् ॥ ४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

गुणेषु वर्त्तमानस्यैव गुणानिरसनप्रकारं वक्ष्यन् गुणमयप्रकृतौ वर्त्तमानस्य परमात्मभूतस्य स्वस्य जीवस्येव गुणबद्धत्वशङ्कां शमयितुं प्रथमं स्वस्वभावमाह । बद्धो मुक्त इति । गुणतो बद्धः गुणतो मुक्त इत्याख्या नित्यनिर्दोषस्य मम वस्तुत एव नास्ति सत्यमेव नास्ति इत्यर्थः । नत्वनेन श्लोकेन परस्यैवात्मनो गुणबन्धमभ्युपगम्य तस्यापारमार्थ्यमुच्यते एकस्यैव ममांशस्येत्युत्तरश्लोकेन जीवस्यैव बन्ध इति वक्ष्यमाणत्वात् ॥१॥

एवं स्वस्य गुणत्रयबन्धाभावमुक्त्वा जीवस्यापि संसारबन्धस्य औपाधिकत्वादनित्यत्वमित्याह । शोकेति । मायया प्रकृत्या स्वाप्नशरीरसम्बन्धसुखदुःखादिप्रतीतिवत् संसृतिरवास्तवी नाशित्वात् "अनाद्यौ परमार्थश्च प्राज्ञैरभ्युपगम्यत" इतिवास्तवत्वस्याविनाशरूपत्वात् स्वप्नप्रपञ्चस्य चेश्वरसृष्टत्वं दृश्यमानप्रपञ्चस्येव श्रूयते "न तत्र रथा न रथयोगा न पन्थानो भवन्त्यथ रथान् रथयोगान् पथः सृजते य एषु सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाण" इति ॥ २ ॥

अथ त्रिगुणात्मकप्रकृतिसम्बन्धस्य स्वरूपाज्ञानरूपाविद्यया तन्निवृत्तिश्च विद्यया विद्याविद्ये च स्वाधीने इत्याह । विद्याविद्ये इति । तनू तनुवन्मदधीने मायया सङ्कल्परूपज्ञानेन माया वयुनं ज्ञानमिति हि नैघण्टुकाः एवमविद्याकृतप्रकृतिवश्यत्वरूपो बन्धो जीवस्यैव बन्धश्चानादिः ॥ ३ ॥

अनादेरपि तस्य अन्तवत्त्वं विद्ययेत्याह । एकस्यैवेति । एकस्य शरीरापेक्षया प्रधानभूतस्य निर्विकारत्वादेकरूपस्येति वा अंशस्य शरीरतया विशेषणत्वेनांशस्य विशिष्टैकदेशो हि विशेषणम् एकदेशश्चांशः परमात्मा च जीवविशिष्टः "यस्यात्मा शरीर" मिति जीवशरीरकत्वश्रुतेः जीवस्यैव बन्धः नतु तदन्तर्यामिणः परमात्मनः ॥ ४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथ गुणेषु वर्तमानस्यैव गुणातीतस्वरूपप्रकारं वक्ष्यन् तावज्जीवेश्वरैक्यं प्रतिक्षेप्तुं गुणमयप्रकृतौ वर्तमानस्य परमात्मभूतस्य स्वस्य गुणकर्मबद्धत्वशङ्कां शमयितुं स्वस्वभावमाह । बद्धो मुक्त इति । गुणतः त्रिगुणकर्मभिर्बद्धः तेभ्यो मुक्त इति च व्याख्या निर्दोषस्य मम वस्तुत एव नास्ति गुणत इति सार्वविभक्तिकस्तसिः मे इत्यनेन—

प्रधानक्षेत्रज्ञपतिर्गुणेशः ।
क्षरं प्रधानममृताक्षरं हरः ॥
क्षरात्मानावीशते देव एकः ।

इत्यादिश्रुत्युक्तविधं प्रकृतिपुरुषेश्वरत्वमभिप्रेतं वस्तुतो मे नास्तीत्येतदेवोपपादयति । गुणस्येति । गुणस्य सत्त्वादिगुणमूलककर्मणो मायामूलत्वान्मायानियाम्यप्रकृतिसम्बन्धमूलकत्वान्मम मायानियन्तुर्न तद्गुणैर्बन्धः अत एव मोक्षोऽपि नास्ति किन्तु गुणकर्मवश्यस्य जीवस्यैव तौ इत्यर्थः । नत्वनेन श्लोकेन परस्यैवात्मनो गुणकर्मसम्बन्धमभ्युपेत्य तस्यापारमार्थिकत्वमुच्यते एक-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

स्यैव ममांशस्येत्युत्तरश्लोकेन जीवस्यैव बन्ध इति वक्ष्यमाणत्वात् ॥ १ ॥

एवं स्वस्य गुणत्रयकर्मबन्धाभावमुक्त्वा जीवस्यापि संसारबन्ध औपाधिकत्वादनित्य इत्याह । शोकेति । मायया मन्निबन्धनया प्रकृत्या जीवस्य शोकादयो भवन्ति अतो यथा स्वप्ने आत्मनः ख्यातिः शरीरसम्बन्धसुखदुःखादिप्रतीतिस्तद्वत्संसृतिर्न तु वास्तवी अवास्तवी आत्मवस्तुस्वरूपप्रयुक्ता नित्या न भवति किन्त्वौपाधिकी अनित्येत्यर्थः । कथमनादेरनित्यत्वमिति न शङ्कनीयम् आद्यन्तरहितस्यैव नित्यत्वात् केवलानादित्वमात्रस्य नित्यत्वप्रयोजकत्वाभावादिति भावः । एतेन कथमनपावृतः कथं वा गुणैर्न युज्यते इति प्रश्नस्योत्तरमुक्तं भवति दृष्टान्तेऽपि स्वाप्नप्रपञ्चस्यावास्तवत्वं नामानित्यत्वमेव नतु मिथ्यात्वं तस्यापि जाग्रत्प्रपञ्चस्येव "न तत्र रथा न रथयोगा न पन्थानो भवन्ति अथ रथान् रथयोगान् पथः सृजते य एतेषु सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाण" इतीश्वरसृष्टत्वश्रवणादिति ॥ २ ॥

कस्तर्ह्यौपाधिकस्यापि संसृतिबन्धस्य कारणं किञ्च तन्निवृत्तिकारणमित्यत आह । विद्याविद्ये इति । विद्या मदुपासना अविद्या स्वात्मपरमात्मयाथात्म्याज्ञानं ते मम तनू तनुवन्मदधीने मायया सङ्कल्परूपज्ञानेन "माया तु वयुनं ज्ञानम्" इति नैघण्टुकाः त्रिगुणात्मकप्रकृतिसम्बन्धः स्वरूपाज्ञानरूपाऽविद्यया तन्निवृत्तिस्तु विद्यया विद्याविद्ये च मत्सङ्कल्पायत्ते इत्यर्थः । ते च शरीरिणां जीवानां मोक्षबन्धकारी विद्या मोक्षकरी अविद्या च बन्धकरीत्यर्थः ॥ ३ ॥

गुणस्य मायामूलत्वान्न मे मोक्षो न बन्धनमित्यनेन सूचितं जीवस्यैव बन्धमोक्षभाक्त्वं विशदयति । एकस्यैवेति । हे महामते ! एकस्य शरीरापेक्षया प्रधानभूतस्य एवकारेण शरीरव्यावृत्तिः जीवस्यैवेति एवकारेणेश्वरव्यावृत्तिः ममांशस्य मच्छरीरतया मद्विशेषणत्वेन मदंशस्य विशिष्टैकदेशे विशेषणमेकशब्दांशः परमात्मा च जीवविशिष्टः "यस्यात्मा शरीर"मिति जीवशरीरकत्वश्रुतेः तथा इतरो मोक्षः विद्यया एवमविद्याकृतप्रकृतिवश्यत्वरूपो बन्धो जीवस्यैव बन्धश्चानादिरनादेरपि तस्यान्तवत्त्वं विद्ययेत्युक्तम् ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भेदज्ञानमेव मुक्तिसाधनं तत्साधनं भक्तिस्तस्या वैराग्यमित्येतत्सर्वमेतस्मिन्नध्याये कथयति । तत्रादौ गुणेष्वित्यादिना यदुक्तवस्य चोद्यं तत्परिहरति । बद्ध इत्यादिना । बद्धो मुक्त इति व्याख्या जीवस्येति शेषः । हिशब्द एवार्थे जीवस्यैवेत्यर्थः । स्वतः चिद्रूपस्य कथं घटत इत्यत्राह । गुणत इति । सत्त्वादिगुणसम्बन्धान्नित्यस्वरूपस्य एतत्सम्बन्धः कथमत्राह । म इति । गुणानाञ्जीवस्य च मम वशत्वान्मदधीनप्रवृत्तित्वाच्च दुर्घटघटकशक्तिमत्त्वान्ममेत्यर्थः । तर्हि शैवलावृतशरीरवत् कदाप्यस्य सुखमत्राह । न वस्तुत इति । वस्तुवृत्त्या नास्ति तन्निवर्तकेश्वरेच्छाधीनत्वान्न मिथ्येत्यर्थः । गुणसम्बन्धत्वाद्भगवत एव तौ किं न स्यातामत्राह । गुणस्येति । जातिविवक्षया एकवचनं गुणानां मायामूलत्वात्तत्प्रवर्तकत्वेन सम्बन्धः अतोऽहं निर्गुण इत्यतो बन्धमोक्षौ न स्त इति भावः । ब्रह्मण एव मायामयौ बन्धमोक्षौ नाविद्यमानजीवस्येत्यङ्गीकर्तुमुचितं प्रतीतत्वान्नाप्रामाणिकोऽध्याहारो युक्त इतीदं चोद्यम् अमायत्वान्निर्गुणोऽहं बन्धमोक्षौ नचापि मे । मदधीनस्य जीवस्य बन्धमोक्षौ सदैव त्विति" स्पष्टप्रमाणवचनेन परिहृतमिति त्वन्मनोरथकल्पनामात्रं न प्रकाशयेति ॥ १ ॥

जीवस्य संसारो वास्तवो न चेत्तर्हि कस्मादयमस्येत्याशङ्क्याज्ञानादिति सोदाहरणमाह । शोकमोहाविति । मायया अज्ञानेन यथा स्वप्ने स्वप्नोऽयमित्यज्ञानेनात्मनः शोकमोहादिख्यातिस्तथा स्वरूपाज्ञानेन शोकादि नतु स्वरूपस्य तस्य सुखात्मकत्वात्तस्मादर्थक्रियाकारित्वेन संसृतिः सत्यपि न वास्तवी प्रतिहन्तुमशक्या भवतीत्यर्थः—

स्वप्नोऽयमित्यविज्ञानात्स्वप्ने दुःखमुपाश्नुते ॥
निजस्वरूपानुभवराहित्यात्तद्वदेव तु ।
जाग्रद्दुःखमपि प्रोक्तं विष्णुतत्त्वं न पश्यतः ॥
तस्मात्तदस्वभावत्वात्सदप्येतदवास्तवमिति ।

वचनात् स्वप्नदृष्टान्तेन संसारस्य न मिथ्यात्वमुच्यत इति ॥ २ ॥

अत्र मायानिष्कृतिः किं न स्यात्तथा प्रसिद्धेरित्यतस्तन्निराकरणमाह । विद्याविद्ये इति । मम तनू प्रतिमावत् स्थिते किं कार्ये इत्यत्राह । शरीरिणां देहिनां बन्धमोक्षकरी आद्ये अनादितो विद्यमाने मे मायया प्रकृत्या निर्मिते ममेच्छावशङ्गते च सात्त्वात्स्वरूपत्वे—

विद्याविद्ये मम तनू प्रतिमावत्सदोदिते ।
सदा तद्व्यतिरिक्तस्य नित्यज्ञानसुखात्मनः ॥
मदिच्छावशगे नित्यमविद्यानिर्मिता गुणाः ।
सत्त्वाद्या मदधीनत्वादविद्याया न मे गुणाः ॥
अविद्या चैव विद्या च गुणाः सत्त्वादिका अपि ।
देहोत्पत्तिः सुखं दुःखं सर्वमेतन्मदिच्छया ॥
अतोऽहं बन्धमोक्षाभ्यां रहितो नित्यमेव तु ।
मुक्तशब्दोदितो बन्धराहित्यान्न विमोक्षत इति ॥

प्रमाणविरोध आपद्यते मोक्षबन्धकत्वं चाभिमानिदेवतासामर्थ्यात्तत्र श्रियाभिमतप्राकृतसत्त्वगुणजाता विद्या दुर्गादिकृततमोगुणजाता त्वविद्या तदुक्तम्—

श्रीस्तु विद्या समुद्दिष्टा दुर्गाविद्या प्रकीर्तिता ।
ते त्वनादी हरेरिच्छानियते सर्वदेत्विति ॥ ३ ॥

अदेही बध्यते चेत्कथं बध्यत इति परमात्मविषयप्रश्नः मे गुणतो बन्धमोक्षाविति परिहारोऽपि तत्र जीवस्यैव ताविति भवद्भिरुच्यते अत इदं कथं सङ्गच्छत इति तटस्थशङ्कां परिहरन्नुपसंहरति । एकस्येति । जीवः परमात्मेति द्विविधं तत्त्वं तयोरेकस्यैव जीवस्य बन्धमोक्षौ स क इत्यतो ममांशस्येति स किंस्वरूपांश इत्यतो जीवस्येति जीवो भिन्नांश इति "भिन्नांशस्यैव जीवस्य बन्धमोक्षौ न मे क्वचित् । अभिन्नांशास्तु मत्स्याद्यास्तेजसः कालवह्निवत् । जीवाभिन्नांशकास्तत्र तेजसः प्रतिबिम्बवदिति" अनेन

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सिद्धं किमुक्तं स्यादत्राह । एवमिति । एवमुक्तविधस्य जीवस्याविद्ययानादिबन्धस्तथा विद्ययेतरत् मोक्षलक्षणं भवः स्व इत्यर्थः । अतः परमात्मा कथं बध्यत इति प्रश्नो नोपपन्न इति भावः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

गुणस्य मायामूलत्वादिति मायया तत्सम्बन्धस्य मिथ्यैव स्फोरणादित्यर्थः । अन्यत्तैः तत्र द्वितीयव्याख्याने मे मतामिति शेषः ॥ १—२ ॥

कथं तत्राह । विद्येति । अतो वस्तुतो नित्यमुक्तोऽपि प्रतीतितोनादिबद्ध इति युगपदुभयत्वं घटत इत्यर्थः । अत्र मे मम मायया शक्त्या कर्व्यौ तनू स्वदृष्टान्तरूपत्वात्स्वांशरूपे अत एवानादी ये निर्मिते प्रसारिते ते एव मम शरीरिणां मदीयानां मोक्षबन्धकर्व्यौ भवतः इति स्थिते सा यमराजवद्रूपका भयं द्वितीयाभिनिवेशतः स्यादिति न्यायेन यस्य यावन्मद्वैमुख्यं तस्य तावदविद्यां प्रसार्य स्वरूपावरणपूर्वकं गुणावेशं कुर्वती बन्धं करोति मत्साम्मुख्ये तु गुणावेशत्याजनपूर्वकं स्वरूपस्फुरणं कुर्वती मोक्षं करोतीति ज्ञेयम् अतस्तस्या एव तयोः कर्तृत्वेऽपि मद्धेतुकत्वाद्बन्धको भवपाशेनेत्याद्युच्यत इति भावः । बन्धमोक्षकरी इति "सुपां सुलुक् पूर्वसवर्ण" इत्यादिना पूर्वसवर्णश्छान्दसः ॥ ३ ॥

एवं शरीरिणां प्रातीतिके बन्धे सति प्रत्येकमेवं व्यवस्थेत्याह । एकस्यैवेति । ममांशस्य रश्मिपरमाणुस्थानीयस्य अत एव तस्य जीवस्यैव नतु मण्डलस्थानीयस्य मम अत एव चैकस्यैव नतु सर्वस्येत्यर्थः ॥ ४—५ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

"एकादशे बद्धमुक्तवैलक्षण्यमस्य शिक्षणम् ।
साधूनां लक्षणं भक्तेरङ्गान्यप्युक्तवान् हरिः ॥

कथं मोक्षः कथं बन्ध इति तत्र प्रश्नोऽयं वस्तुतो न घटत इत्याह । बद्ध इति । मे गुणतः मदधीनसत्त्वादिगुणैर्बद्ध इति ततो मुक्त इति व्याख्या वस्तुतो न सम्भवति कुतः गुणस्य गुणसम्बन्धस्य मायामूलत्वान्मायया अविद्यया दुस्तर्कशक्त्या दुर्घटस्य देहेन्द्रियादिगुणसम्बन्धस्य मिथ्यैव स्फोरणादित्यर्थः । अत एव मे मम मते इति शेषः । न बन्धनं बन्धनाभावादेव न मोक्षश्च ॥ १ ॥

तत्र बन्धस्य मिथ्यात्वप्रकारं दर्शयति । शोकमोहाविति । देहापत्तिर्देहाद्देहान्तरप्राप्तिः देहस्य आपत्तिरापत् मृत्युर्वा मायया मायिकोपाधिसम्बन्धेन अविद्यया मायिकोपाध्यन्तःकरणे सूक्ष्मदेहे जीवस्य अभिमानादेव तदीयधर्माणां शोकमोहादीनामपि स्वीयत्वेन ग्रहणमित्यर्थः । अतः शोकमोहादिमत्त्वलक्षणा संसृतिर्न वास्तवी न वस्तुभूता शोकमोहादीनां मायासृष्टत्वेन सत्यत्वेऽपि तत्सम्बन्धस्य जीवे अविद्याकल्पितत्वान्मिथ्यात्वमित्यर्थः । यथा आत्मनो बुद्धेः ख्यातिर्विवर्त्तः स्वप्नो मिथ्या तथा ॥ २ ॥

ननु केयमविद्या यया मिथ्याभूतोऽपि गुणसम्बन्धः स्फोरितस्तत्राह । विद्याविद्ये मम तनू तन्वेते बन्धमोक्षाभ्यामिति तनू शक्ती शरीरिणां बन्धमोक्षकरी बन्धमोक्षकर्व्यौ अविद्या बन्धकरीत्यर्थः । इमे च मे मम मायया महा शक्त्या विनिर्मिते सृष्टे किञ्च मायावृत्तित्वादेव तयोर्मायासृष्टत्वमौपचारिकमेवोच्यते इत्याह । आद्ये अनादी अनाद्यनन्तमव्यक्तं नित्यं कारणमव्ययमिति द्वादशोक्तेः पुंसोऽस्ति प्रकृतिर्नित्येति वैद्यकोक्तेश्च मायाशक्तिरिव तद्वृत्ती विद्याविद्ये अपि नित्ये एव तदेवं मायायास्तिस्रो वृत्तयः प्रधानमविद्या विद्या च प्रधानेनोपाधिः सत्त्व एव सृज्यते अविद्यया तद्ध्यासो मिथ्या भूतः विद्यया तदुपराम इति तिसृणां कार्यम् ॥ ३ ॥

ताभ्यामेव मदीयशक्तिभ्यामविद्याविद्याभ्यां मदीयजीवशक्तेर्दैर्घ्यास्यप्रसारणाप्रसारणाभ्यां वस्तुभूतावपि बन्धमोक्षौ प्रत्यायितौ मदीयसृष्ट्यादिलीलाशक्तिप्रेरणवशादेवेत्याह । एकस्यैवेति । अंशस्य विभिन्नांशशब्दवाच्यस्य 'प्रकृतिं विद्धि मे परां जीवभूतां महाबाहो ययेदं धार्यते जगदिति' मदुक्तेर्जीवस्य मच्छक्तित्वेऽपि ममैवांशो जीवलोके जीवभूतः सनातन" इति मदुक्तेरंशत्वं चेत्यर्थः । अत्र शरीरिणामिति पूर्वोक्त नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामानिति श्रुतेश्च जीवानां बहुत्वेऽपि कथमेकस्येत्युक्तम् उच्यते एकस्या अपि तटस्थाख्यजीवशक्तेर्वृत्तिबाहुल्यादेव बहवो जीवा इत्युच्यन्ते यथा एकस्या अपि बहिरङ्गाख्याया मायाशक्तेः प्रधानमविद्याविद्या चेति द्वे वृत्ती तयोश्चापि प्रतिजीवं वृत्तिबाहुल्याद्बहुत्वमेव यथा च मायावृत्तीनां मायाशब्दवाच्यत्वं तथैव जीववृत्तीनामपि जीवशब्दवाच्यत्वं किञ्च जीवशक्तिमायाशक्त्योर्वृत्तीनामपि नित्यत्वमेव ज्ञेयं नित्यो नित्यानामिति बन्धमोक्षकरी आद्ये इत्यादिवचनेभ्यः अविद्याध्वंसे सति जीवस्य निर्वाण इत्यादिवाक्येषु ध्वंसनिर्वाणशब्दाभ्यामुपरामश्चायुज्ये उच्येते ब्रह्मणा सह युज्यत इति सयुक् तस्य भावः सायुज्यमिति जीवस्य न तत्र स्वरूपध्वंसः किञ्च—

> विष्णुशक्तिः परा प्रोक्ता क्षेत्रज्ञाख्या तथापरा ।
> अविद्या कर्मसंज्ञान्या तृतीया शक्तिरिष्यते ॥
> यया क्षेत्रज्ञशक्तिः सा तारतम्येन वर्त्तते इति ॥

विष्णुपुराणोक्तेः प्रायो वशीभूता सृष्टिलीलासिद्ध्यर्थमित्याह । बन्ध इति । अस्य अविद्यया बन्धः स च कर्मणोऽनादित्वादनादिः मोक्षसम्भवात् सान्तः इतरो मोक्षः जन्यत्वात् सादिरनश्वरत्वादनन्तो ज्ञेयः ॥ ४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

जीवः कथं बद्ध्यते पुनः स कथं मुक्तो भवतीति प्रश्नस्योत्तरमाह । बद्ध इति । जीवः गुणतो बद्धः मे मत्तो मुक्तो भवति इति व्याख्या सिद्धान्तोक्तिः "मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते" इति स्ववचनान्तराच्च ननु ज्ञानस्वरूपो जीवः स्वत एव किं न विमुच्यते इत्यत आह । न वस्तुतः । न स्वत इति अत्र बन्धमोक्षव्यवहारो नास्ति स एवान्येषां विमुक्तिहेतुरहमस्मीत्याह । न मे मोक्षो न बन्धनामिति । ननु गुणस्याचेतनस्य चेतनबन्ध-

अथ बद्धस्य मुक्तस्य वैलक्षण्यं वदामि ते ।
विरुद्धधर्मिणोस्तात ! स्थितयोरेकधर्मिणि ॥ ५ ॥
सुपर्णावेतौ सदृशौ सखायौ यदृच्छयैतौ कृतनीडौ च वृक्षे ।
एकस्तयोः खादति पिप्पलान्नमन्यो निरन्नोऽपि बलेन भूयान् ॥ ६ ॥
आत्मानमन्यं च स वेद विद्वानपिप्पलादो न तु पिप्पलादः ।
योऽविद्यया युक् स तु नित्यबद्धो विद्यामयो यः स तु नित्यमुक्तः ॥ ७ ॥
देहस्थोऽपि न देहस्थो विद्वान् स्वप्नाद्यथोत्थितः ।
अदेहस्थोऽपि देहस्थः कुमतिः स्वप्नदृग्यथा ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

कर्तृत्वं त्वां प्रत्यबन्धकत्वं कथं घटेतेत्यत आह । गुणस्य माया-मूलत्वादिति मम प्रकृतिमूलत्वात् ॥ १ ॥

मायाया बहुनर्थहेतुतां दर्शयति । शोक इति । "न तत्र रथा न रथयोगा न पन्थानो भवन्ति अथ रथान् रथयोगान् पथः सृजते य एष सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाणः" इति श्रुतिप्रोक्तपरमपुरुषस्य स्वप्नेऽपि कर्मविशेषफलप्रदातुर्मे मायया आत्मनो जीवस्य यथा दृशो मम सम्राडस्मीत्यादिरूपा ख्यातिः प्रतीतिः भवति तथा एवं शोकादयः किं बहुना संसृतिः जन्ममरणप्रवाहरूपः संसारः माययैव सा स्वप्ने ख्यातिः संसृतिश्च अवास्तवी स्वरूपधर्मभूता नेत्यर्थः ॥ २ ॥

यदुक्तं नित्यमुक्तो नित्यबद्ध एक एवेति मे भ्रम इति तत्र विद्याविद्याभ्यां सर्वं सङ्गच्छत इत्याह । विद्येत्यादिना । हे उद्धव ! शरीरिणां बन्धमोक्षकरी बद्धमुक्तव्यवस्थानुसारिण्या मे माययेच्छया विनिर्मिते प्रवर्तिते कथम्भूते आद्ये पूर्वसिद्धे स्वस्यैव बन्धमोक्षासाधारणहेतुत्वं द्योतयितुमाह । मम तनू मदावेशे विद्याविद्ये ज्ञानाज्ञानापरपर्याये भवतः ॥ ३ ॥

हे महामते ! मदुक्तसिद्धान्तश्रवणधारणादौ कुशल ! ममांशस्य एकस्यैव अविद्यया बन्धः कथंभूतः अनादिः साधनाभावेऽनन्तोऽपि ज्ञेयः तस्मात्स नित्यबद्ध इति फलितोऽर्थः एकवचनं जातिविषयं तथा ममांशस्य एकस्यैव विद्यया च इतरः मोक्षः कथंभूतः अनादिरनादिमुक्तस्य बन्धासंभवात्स नित्यमुक्त इत्युच्यते अतस्तद्विषयको भ्रमो न कर्तव्य इति फलितोऽर्थः अथाचेतनवर्गाद्विलक्षणेनाहमर्थभूतं जीवात्मानं प्रतिपादयितुमंशं विशिनष्टि । जीवस्येति । सामान्योक्तिः नित्यबद्धस्य अन्येषां च सामान्यतोऽहंप्रत्ययगोचरत्वात् अस्य अहंप्रत्ययगोचरस्य ननु अहंप्रत्ययगोचरश्चिज्जडसङ्घातः प्रतीयते स एवाविद्यया बद्धः किमित्यत आह । जीवस्येति । जीवयति देहेन्द्रियमनोबुद्ध्यादिकमचेतनवर्गं चेष्टयतीति जीवस्तस्याचिद्वर्गाभिन्नस्य ज्ञानस्वरूपस्येत्यर्थः । एतेन चिज्जडग्रन्थिर्जीव इति मायावादिमतस्य निर्मूलत्वं द्योतितम् ॥ ४ ॥

भाषा टीका ।

श्री भगवान् उवाच मैं सब जीवों से सदा भिन्न हूं फिर इस शरीर मे रहने से भी गुणों से मेरे को बद्ध या मुक्त कोई नहीं यथार्थ कह सकता है क्यों कि गुण तो मेरी माया से होते हैं तिस से मेरा न मोक्ष है न बंध है ॥ १ ॥

और जीव के भी शोक मोह सुख दुःख देह योग यह सब हमारे संकल्प रूप माया से होते हैं वे भी जीव स्वरूप मे नित्य नहीं हैं जैसे कि स्वप्न में अनेक प्रकार की सृष्टि परमेश्वर करता है तैसेही जीव का संसार भी जब तक गुणों का सम्बन्ध है तबही तक रहता है नित्य नहीं है ॥ २ ॥

हे उद्धव ! अनादि काल से हमारी माया से निर्मित गुणों को विस्तार करने वाली जीवों के बंध मोक्ष देने वाली विद्या अविद्या ऐसी | हमारी दो शक्ती हैं ॥ ३ ॥

हे महामति ! उद्धवजी स्वरूप से नाना होने पर भी निर्विकार चेतनता रूप से एकही प्रकार तथा मेरा विशेषण भूत जो जीव है तिसको हमारी अविद्या से अनादि बंध है विद्या से उसका मोक्ष हो जाता है ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तदेवम् व्यवस्थामुपपाद्य कथं वर्तेतेत्यादिवैलक्षण्यप्रश्नस्योत्तरमाह । अथेति । तच्च वैलक्षण्यं द्विविधं जीवेश्वरयोरेकं जीवानां चैकं तत्र जीवेश्वरयोर्वैलक्षण्यमाह । विरुद्धधर्मिणोरिति सार्धद्वयेन । शोकानन्दधर्मवतोरेकस्मिन्धर्मिणि शरीरे नियम्यनियन्तृत्वेन स्थितयोः ॥ ५ ॥

सुपर्णौ वृक्षात्पक्षिणाविव देहात्पृथग्भूतौ । सदृशौ चिद्रूपत्वात् सखायौ अवियोगादैकमत्याच्च यदृच्छयाऽनिरुक्तया मायया वृश्च्यत इति वृक्षो देहः 'ऊर्ध्वमूलमवाक्शाखं वृक्षं यो वेद संप्रती'ति श्रुतेः —

ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम् ।
छन्दांसि यस्य पर्णानि यस्तं वेद स वेदविदि'ति ॥

स्मृतेश्च तस्मिन् कृतं नीडं निकेतं हृदयरूपं याभ्याम्

श्रीधरस्वामिकृतभावार्थदीपिका ।

तौ तयोर्मध्ये एको जीवः पिप्पलान्नम् पिप्पलोऽश्वत्थो देहस्तस्मिन्नदनीयं कर्मफलमित्यर्थः । खादति भक्षयति अन्य ईश्वरो निरन्नोऽभोक्तापि निजानन्दतृप्तो बलेन ज्ञानादिशक्त्या भूयानधिकः श्रुतिश्च—

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीतीति ॥ ६ ॥

बन्धमोक्षव्यवस्थामेवाह । आत्मानमिति अतो योऽविद्यया युग्युक्तः स तु नित्यबद्धोऽनादिबद्धः यस्तु विद्याप्रधानः स तु नित्यमुक्तः मायाया अनावरकत्वादाश्रयाव्यामोहकत्वाच्च ॥ ७ ॥

इदानीं बद्धमुक्तजीवानामेव मिथो वैलक्षण्यमाह । देहस्थोऽपीति दशभिः । विद्वान्मुक्तः संस्कारवशेन देहस्थोऽपि देहस्थो न भवति यथा स्वप्नादुत्थितः स्मर्यमाणे स्वप्नदेहे स्थितोऽपि तत्रस्थो न भवति तद्गतसुखदुःखाद्यभावात् तद्वत् तथा वस्तुतोऽदेहस्थोऽपि कुमतिरविद्वान् देहस्थस्तन्निमित्तसुखदुःखभाक् यथा स्वप्नदेहगत इति ॥ ८ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी ।

वैलक्षण्यप्रश्नस्य बद्धमुक्तयोः परस्परं विरुद्धलक्षणाक्रान्तत्वलक्षणस्य प्रश्नस्य ॥ ५ ॥

चिद्रूपत्वात् सदृशाविति चिद्रूपत्वेनैव क्वचिदभेदनिर्देश इति भावः । अवियोगात् देहाधिकरणे परस्परं वियोगाभावात् ऐकमत्यात् एका समाना हृदयावस्थानव्यवसायलक्षणा मतिर्ययोस्तयोर्भावस्तत्त्वं तस्माच्च सखायौ वृश्च्यते कालेन छिद्यते इति वृक्षो देहः ऊर्ध्वं सर्वोत्तमः श्रीनारायणो मूलं यस्य तं अवाक् ततोऽर्वाचीनाः कार्योपाधिहिरण्यगर्भादयः शाखा इव शाखा यस्य तं यः संप्रति वेद स तत्त्वं वेदेति श्रुत्यर्थः । एवं स्मृतावश्वत्थमिति नश्वरत्वात् श्वः प्रभातपर्यन्तमपि स्थास्यतीति विश्वासानर्हत्वादश्वत्थं प्राहुः प्रवाहरूपेणाविच्छेदादव्ययं च प्राहुरिति तस्मिन् वृक्षे तयोर्जीवेश्वरयोर्मध्ये सयुजा सयुजौ समानं रूपं चिद्रूपत्वं युञ्जाते भजतः इति सदृशाविल्यनेन समानोऽर्थः समानमेकं "रथाश्वा नो गुः समानपद" इतिवत् अभिचाकशीति साक्षितया प्रकाशते ॥ ६ ॥

विद्या चात्र स्वरूपशक्तिवृत्तिरेव भक्तिरस्तु तौ तथा व्याख्यातत्वात् नन्वीश्वरस्यापि मायया सृष्ट्यादिकर्तृत्वात् कुतो न बन्ध इति चेत्तत्राह । मामया इति मायां व्युदस्य चिच्छक्त्या कैवल्ये स्थित आत्मनीति श्रीमदर्जुनोक्तेस्तस्य मायाश्रयत्वेऽपि न बन्ध इति भावः ॥ ७ ॥

इदानीं जीवेश्वरयोर्वैलक्षण्यनिरूपणानन्तरं तद्वतेति स्वप्नदेहगतसुखाद्यभावात् वस्तुतः वस्तुस्वरूपविचारेणेत्यर्थः । तन्निमित्तेति अध्यासेन देहोपाधिकसुखदुःखभागित्यर्थः ॥ ८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

इत्येतद्दृढयितुं जीवपरयोः स्वरूपस्वभाववैलक्षण्यस्य विवक्षितत्वमाह । अथ बद्धस्येति । मुक्तस्य नित्यनिर्दोषस्य परमात्मनः स तु नित्यमुक्त इत्यनन्तरोक्तेः एकधर्मिणि शरीरे ॥ ५ ॥

सुपर्णौ शोभनप्रयत्नादिगुणकौ सदृशौ अनेन श्रुतिगतसयुजा इति पदार्थ उक्तः समानगुणयोगो हि सयुक्त्वं सखायौ उपकार्योपकारकभावेन स्थितौ यदृच्छया लोकदृष्टहेत्वन्तररहितमिति भावः वृक्षः शरीरं नीडो हृदयकमलं पिप्पलं प्रकृतिः ऊर्ध्वमूलमधः शाखमित्युक्तेः अन्नं शब्दादिभोग्यं निरन्नः कर्मकृतभोगरहितः एकस्यैव इत्यवकारेण भोक्तृत्वरूपवैषम्यमुक्तम् ॥ ६ ॥

अथ श्रुत्यन्तरसिद्धज्ञत्वाज्ञत्ववैषम्यमाह । आत्मानमिति । विद्यामयः स्वाभाविकज्ञानमयः ईश्वरः नित्यमुक्तशब्देन कदाचिन्मुक्तजीवात् व्यावृत्तिः एवं स्वस्य गुणवश्यत्वाभाव उक्तः ॥ ७ ॥

अथ प्रश्नस्य प्रतिवचनमारभते । देहस्थोऽपीति । न देहस्थः अदेहस्थतुल्यः आत्माभिमानाभावात् स्वप्नाद्यथोत्थितः स्वप्नोत्थितस्य हि स्वाप्नशरीरात्माभिमानो नास्ति अदेहस्थोऽपि । गर्भमहाप्रलयादिदशायामनिष्पन्नदेहोऽपि देहस्थः बद्ध इत्यर्थः । स्वप्नशरीरे आत्मत्वाभिमानवशात् स्वप्नदृष्टान्त उक्तः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एतदेव द्रढयितुं जीवपरयोः स्वभाववैलक्षण्यं विवक्षितमाह । अथेति । बद्धस्य जीवात्मनः मुक्तस्य नित्यनिर्दोषस्य परमात्मनः स तु नित्यमुक्त इत्यनन्तरोक्तेः ते तुभ्यं वदामीति कथंभूतयोः हे तात ! एकधर्मिणि एकस्मिन् शरीरे स्थितयोः विरुद्धधर्मिणोः एकस्मिन्नेव काले भोक्तृत्वाभोक्तृत्वज्ञत्वाज्ञत्वादिविरुद्धधर्माश्रययोः ॥ ५ ॥

प्रतिज्ञातमेव वैलक्षण्यम्—

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति ॥

इति श्रुतिप्रसिद्धवृक्षपक्षिरूपकेणोपपादयति । सुपर्णाविति ॥ सुपर्णौ शोभनौ पर्णौ पक्षौ ययोस्तौ तत्र जीवस्य पर्णौ धर्माधर्मौ परमात्मनस्तु निरस्तनिखिलदोषत्वसमस्तकल्याणगुणात्मकत्वरूपौ एतौ जीवेश्वररूपपक्षिणौ सदृशौ शोभनप्रयत्नादिगुणकौ अनेन सयुक्शब्दार्थ उक्तः समानगुणयोगो हि सयुक्त्वं सखायौ उपकार्योपकारकभावेन स्थितौ यदृच्छया लोकदृष्टहेत्वन्तररहितमिति भावः । वृक्षः शरीरं नीडो हृदयकमलं कृतं हृदयकमलरूपं निवासस्थानं याभ्यां तौ "हृद्ययमात्मा प्रतिष्ठित" इति जीवस्यापि हृदयकमलावस्थितत्वं श्रूयते तयोर्जीवेश्वररूपयोः पक्षिणोरेकः जीवरूपः पक्षी पिप्पलान्नं पिप्पलं प्रकृतिम् ऊर्ध्वमूलमधःशाखमश्वत्थमिति प्रकृतेः पिप्पलत्वरूपणात् पिप्पलस्यान्नमद्यत इत्यन्नं भोग्यं फलवस्त्रादिकारूपं शब्दादिविषयं खादन्ननुभवति अन्य ईश्वररूपः पक्षी तु निरन्नः पुण्यापुण्यफलसुखदुःखादिभोगरहितः बलेन सार्वज्ञ्यसर्वशक्त्यादिना भूयान् अपरिच्छिन्नोऽपि स्वस्वरूपस्वभावसंकोचरहितः प्रकाशत इत्यर्थः । अनेनानश्नन्नन्यो अभिचाकशीतीत्यस्यार्थः उक्तः ॥ ६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

किञ्च वाक्यौ द्वावजावीशानीशौ अज्ञो ह्येको भोगार्थयुक्तेत्यादिश्रुत्यन्तरसिद्धसत्त्वाश्रतयवैलक्षण्यमाह । आत्मानमिति । यो विद्वान् सर्वज्ञः अपिप्पलादः अभोक्ता च स आत्मानमन्यमप्रधानम्पुरुषञ्च वेद यथावत्साक्षात्करोति पिप्पलादो भोक्ता जीवस्त्वात्मानमन्यं स्वसखं परमात्मानं च न वेद किन्तु देहमेवात्मतयाभिमन्यत इति भावः । किञ्च योऽविद्यया स्वपरयाथात्म्याज्ञानेन युज्यते इति युक् स तु नित्यबद्धः यश्च विद्यामयः विद्यन्मय इतिपाठेऽपि स एवार्थः स तु नित्यमुक्तः नित्यं हेयप्रतिभट ईश्वर इति । नित्यमुक्तशब्देन कदाचिन्मुक्ताज्जीवाद्व्यावृत्तिः ॥ ७ ॥

अथ कथं वर्ततेत्यस्योत्तरं वदन् विद्वत्प्रसङ्गादविदुषोऽपि वृत्तिमाह । देहस्थोऽपीति । विद्वान्देहस्थोऽपि न देहस्थः अदेहस्थतुल्यः देहात्माभिमानमकुर्वन्वर्ततेत्यर्थः । यथा स्वप्नादुत्थितस्तद्वत् स्वप्नोत्थितस्य हि स्वप्नशरीरे आत्माभिमानो नास्तीति स दृष्टान्तितः कुमतिर्देहात्माभिमानी स्वदेहस्थोऽपि गर्भमहाप्रलयादिदशायामनिष्पन्नदेहोऽपि देहस्थः बद्ध एवेत्यर्थः यथा स्वप्नदृक् तद्वत् स्वप्नद्रष्टुः स्वाप्नशरीरे आत्माभिमानसद्भावात्स दृष्टान्तितः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

एकस्मिन् भोगायतने स्थितयोर्जीवपरयोरेकस्य जीवस्यैव तौ स्त इति यदुच्यते तत्र विवेकज्ञानं कथं स्यादत्राह । अथेति । यतो जीवस्यैव बन्धमोक्षौ अथ तस्माद्बद्धस्य जीवस्य मुक्तस्य विष्णोर्वैलक्षण्यं अज्ञातन्त्र्यादिज्ञातन्त्र्यादिलक्षणं ते तुभ्यं वदामीत्यन्वयः मुक्तनामत्वं च हरेरेव मुख्यं नित्य*शुद्धमुक्तेत्यादिपदानां हरावेवेत्यन्वयादित्यादिषु पुरुषोत्तमध्यानवचनात् सिद्धम्—

मुक्तस्य तु न मे मोक्षो बन्धाभावात् कथञ्चन ॥
मुक्त इत्यपि नामैतद्दीप्यतेऽसौ दिवाकरः ।
इति यद्वन्धराहित्यान्न तु ऋच्छादिदीप्तिवत् ॥
कादाचित्कतया वाच्यं बन्धाभावादमोक्षतः ।
जीवस्य बन्धमोक्षस्तु मत्प्रसादात्कदाचनेति ॥
तत्रोक्तवचनान्मोक्तार्थसिद्धिः बद्धस्य जीवस्य ।
बद्धजीवा इमे सैव पूर्वबन्धसमन्वयात् ॥
नित्यमुक्तस्ततो विष्णुर्मुक्तनाम्ना सदोदितः ।
अबद्धत्वादमोक्षोऽपि दीप्यतेऽसौ रविर्यथेति ॥

स्पष्टप्रमाणात् सति वैलक्षण्ये बद्धाबद्धव्यवस्था वक्तुं शक्या तदेव कथमित्यत उक्तं विरुद्धधर्मिणोरिति ॥ ५ ॥

तत्र प्रथममेकधर्मिणोरित्युक्तं विवृणोति । सुपर्णाविति । पृ पालनपूरणयोरिति धातोः सुष्ठु पालकत्वात् पूर्णत्वाद्धरिः पालकत्वादपूर्णत्वाच्च जीवोऽपि सुपर्ण इत्युच्यते अयं च विरुद्धधर्मस्वन्तर्भूयते चिदानन्दत्वेन सदृशौ वृक्षसमानधर्मे देहे स्थितत्वाच्च सखायौ यदृच्छयाप्यदृष्टप्रेरकेच्छया अथ विरुद्धधर्मानाह । एक इति । पिप्पलं कर्मफलं जीवादन्यो हरिर्निरन्नो भोगरहितोऽपि बलेन भूयान् पुष्टः अदननिमित्तं यदन्नास्तीत्यर्थः । आत्मानं स्वम् अन्यं जीवं च अन्यो भगवद्विषयज्ञानविधुरः बद्धो भगवदधीनः अनेन श्लोकद्वयेन, द्वा सुपर्णा सयुजा सखायेत्यादिश्रुतिर्विवृता अनश्नन्नन्योऽभिचाकशीतीत्यादौ यदशनाद्यभावेन हरेरदनस्यानशुच्यते तद्दुःखाद्यनशनमेव न तु सुखानदनमित्यादि सर्वम्—

अनत्तृत्वं हरेर्दुःखानत्तृत्वादुच्यते सदा ॥
विषयान्विनापि पूर्णत्वात्स्वरूपानन्दभोगिनः ।
शुभमत्त्येव हि सदा सर्वत्रापि स्थितं विभुः ॥
स्वादोरदनयोरत्ति जीवोऽस्वाद्यपि यत्सदा ।
अनारतम्पारवश्यात्स्वाद्वत्तीति ततः श्रुतिरिति ॥
अस्वादुस्वादुयोरत्ति जीवो नैवं जनार्दनः ।
अतो नात्तीति वचनमश्नतोऽपि शुभं सदेति ॥
साशनानशनत्वेन नरदेवौ यथो दितौ ।
अत्ति विनाप्ययावैवंयात्तथा नात्तिहरेर्भुज इति ॥

बहुप्रमाणसिद्धोऽयमर्थः तदेवात्रोक्तं निरन्नोऽपि बलेन भूयानितीति स्वयं त्वरत्वेव तथापि नादननिबन्धनं तस्य बलं कुतः—

यत्रा सुपर्णा अमृतस्य भागमनिमेषं विदथाभिस्वरन्ति ॥
इनो विश्वस्य भुवनस्य गोपा स मा धीरः पाकमत्राविवेश ।
यस्मिन्वृक्षे मध्वदः सुपर्णा निविशन्ते सुवते चाधिविश्वे ॥
तस्येदाहुः पिप्पलं स्वाद्वग्रे तन्नोन्नशद्यः पितरं नवेदेत्यादि ।

वाक्यशेषात् वृक्षे स्थित्वा मध्वदः सुपर्णा यस्मिन्ननश्नन्ति सुपर्णौ अधिविश्वे सुपर्णाः निविशन्ते तदाधारत्वेन सुवते च तस्यैव सुपर्णस्य स्वादुपिप्पलम् अन्यस्तु स्वादुवदश्नाति न स्वादु यावत्पितरं परमात्मानं न वेदेति—

सुपर्णौ द्वौ शरीरस्थौ जीवश्च परमस्तथा ॥
पारवश्यादनाज्जीवस्तत्रात्तीति श्रुतौ श्रुतः ।
स्ववशेनादनाद्विष्णुर्नात्तीत्यत्तापि सन् श्रुतः ।
स एव हि शुभस्यात्ता जीवोऽस्थस्यैव वेदनादिति ॥

वचनादत्र जीवपरमात्मानावेवोच्येते न सामान्यपक्षिणाविति ज्ञायते सर्वं वा अत्तीति तददितेरदितित्वं यस्य ब्रह्म च क्षत्रञ्चोभे भवत ओदनः "अत्ता चराचरग्रहणात्" अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव चेत्यादेश्च अत्तृत्वस्य लिङ्गत्वेनोक्तत्वाल्लिङ्गयोरुभयसम्प्रतिपन्नत्वेन निर्णयहेतुत्वाद्धरेर्न सर्वात्मनानत्तृत्वमत्रोच्यते किन्तु अशुभानत्तृत्वेनानत्तृत्वश्रुतेः कृतार्थत्वेन प्रामाण्यसम्भवाच्छ्रुतिशरणानामस्माकं न कापि क्षतिरिति—

जीवो मुक्तोऽपि नो जीवान् परमात्मानमेव च ।
वेत्ति सर्वात्मना विष्णुर्वेत्त्येकः पुरुषोत्तमः ॥
तस्य प्रसादतः किञ्चिद्ब्रह्माद्या अपि जानते ।
अन्यजीवोऽनपेक्ष्यैको जानाति तु चतुर्मुखः ।
समास्तेन तदन्ये तु लेशज्ञानाः क्रमात्स्मृताः ॥

इत्यनेन आत्मानमन्यं च स वेदेत्येतद्विवृतं सर्वज्ञत्वाविज्ञं हर्य-

---

* विष्णोर्मुक्तशब्दवाच्यत्वे दैवीमीमांसासूत्रं प्रमाणत्वेनोदाहरति । नित्यशुद्धेति अन्वयादित्यस्य शक्तितात्पर्यलक्षणासम्बन्धादित्यर्थः ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कनिष्ठं तदुक्तं तान्यहं वेद सर्वाणि न त्वं वेत्थ परन्तपेत्यादि मुक्तेष्वतिव्याप्तमिदं लिङ्गमितिचेन्न—

अज्ञा जीवास्तु कथ्यन्ते मुक्ता अल्पप्रवेदनात् ।
ज्ञ इत्येवोच्यते नित्यं सर्ववेत्तृत्वतो हरिरिति

वचनात्—

अनाद्यविद्ययान्धत्वं जीवस्य यदि योग्यता ।
प्रयत्नश्चानुकूलः स्यादन्तवद्भवति ध्रुवम् ॥
नित्यमेवान्यथान्धत्वमयोग्या मानुषादयः ।
बद्धत्वं सर्वजीवानां नियमान्नित्यमेव तु ॥
बद्धत्वं विष्णवधीनत्वमन्धत्वं तददर्शनम् ।
अतः क्वचिदनित्यत्वमन्धताया भविष्यति ॥
मुक्तस्यापि तु बद्धत्वमस्ति यस्य हरेर्वशः ।
मुक्ताख्या दुःखमोक्षात्स्याद्बद्धाख्या हर्यधीनतः ॥
नित्यबद्धा अपि ततो मुक्ता दुःखविमोक्षतः ।
नित्यमुक्तस्त्वेक एव हरिर्नारायणः प्रभुः ॥

इत्यनेन सोपपत्तिकेन यो विद्ययान्धः स तु नित्यमुक्त इत्येतद्विवृतम्—

शतं सहस्राणि चतुर्दशेह परा गतिर्जीवगणस्य दैत्य ! ।
आरोहणं तत्कृतमेव विद्धि स्थानं तथा निःसरणं च तेषाम् ॥

इति जीवगुणस्य गतिबाहुल्यप्रवेशनिर्गमनप्रतीतेर्नित्यमुक्तत्वं हरेर्लिङ्गं न हरेरन्यत्र गमनतः स एव नित्यमुक्तः ननु मुक्तैः सेव्यत्वं मुक्तमुक्तं तत्कथमितिचेन्न कृष्णो मुक्तैरिज्यते वीतमोहैः मुक्तानां परमा गतिरिति वचनात् तर्ह्येषां कदा तु मुक्ताख्येति चेन्न सर्वात्मना पञ्चदशकलानां त्यागानन्तरं तदाख्या तदुक्तम्—

कलाः पञ्चदश त्यक्त्वा श्वेतद्वीपनिवासिनाम् ॥

मुक्ताख्येति पश्चादपि स्वतन्त्रा इयतो विष्णवधीनास्त इति यत्प्रसादात्कृता मोक्षः तदधीनत्वमस्तु नान्याधीनतास्त्यतः स्वाधिकानां वशे स्थिता इति । अन्याधीनत्वादधिकं दुःखं नास्तीत्यत उक्तं नचास्मादधिकं किञ्चित्सुखमस्ति हरेर्विनेति । अतो नित्यमुक्तत्वं च स्वतन्त्रत्वं नान्यनिष्ठमित्युपसंहरति ।
नित्यमुक्तः स एवैकः स्वतन्त्रः संयतः सदेति ॥ ६—७ ॥

ननु उभयोर्देहस्थत्वाविशेषादेकस्य मुक्तत्वेन सुखादनमितरस्य बद्धत्वेन दुःखादनञ्चेत्याशङ्क्य विद्वत्ताविद्वत्त्वे कारणमिति भावेनाह । देहस्थोऽपीति । विद्वान्नित्यनिर्दुःखानन्दानुभवः सर्वज्ञः श्रीहरिर्देहस्थोऽपि देहाभिमानाभावान्न देहस्थोऽपि तत एव दुःखं चं नाश्नाति कथं स्वप्नादुत्थितः पुरुषस्तद्गतदुःखादिकं नास्ति तथेति कुमतिरविद्वान् जीवो देहाभिमानित्वाद्देहादन्योऽपि देहदेहस्थो यथा स्वप्नदृक् तद्दुःखादिकं भुङ्क्ते तथेति ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तादृशभेदं वैलक्षण्येनैव दर्शयति । सुपर्णाविति द्वाभ्याम् । अत्र सदृशाविति तदेवमेवाभेदनिर्देशः क्वचिदिति भावः । श्रुतौ सयुजेति समानं रूपं चिद्रूपत्वं युङ्क्ते भजत इति समानोऽर्थः ॥६॥

विद्यामय इत्यत्र विद्या स्वरूपशक्तिवृत्तिरेव । व्याख्यातं चाक्रूरस्तुतौ ॥ ७—१७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

यदुक्तं कैर्वा ज्ञायेत लक्षणैरिति तत्राह । अथेति । अयं जीवो बद्धः अयं जीवो मुक्त इति यथोच्यते तथा जीवात्मा बद्धः परमात्मा मुक्त इत्यपि अयमात्मा अपहतपाप्मेति यदुच्यत एवेत्यतः प्रथमं जीवात्मपरमात्मनोर्वैलक्षण्यमाकर्णयेत्याह । सार्द्धद्वयेन । विरुद्धधर्मिणोः शोकानन्दधर्मवतोः एकस्मिन् धर्मिणि शरीरे नियम्यनियन्तृत्वेन स्थितयोः ॥ ५ ॥

सुपर्णौ वृक्षात् पक्षिणाविव देहात् पृथग्भूतौ सदृशौ चिद्रूपत्वात् सखायौ सह योगात् । यदृच्छयेति वृक्षे तयोरासक्त्यनासक्तिपूर्वकनीडकरणे तदीयपिप्पलाशभोजित्वाभोजित्वे च हेत्वभाव उक्तः मायया वृश्च्यत इति वृक्षो देहः ऊर्ध्वमूलमधःशाखं वृक्षं यो वेद सम्प्रतीति श्रुतेः ऊर्ध्वमूलमधःशाखमश्वत्थम्प्राहुरव्ययमिति स्मृतेश्च तस्मिन् वृक्षे आसक्त्यनासक्तिपूर्वकं कृतं निकेतनं हृदयरूपं याभ्यां तौ तयोर्मध्ये एको जीवः पिप्पलाशं पिप्पलोऽश्वत्थो देहस्तस्मिन्नदनीयं कर्मफलमित्यर्थः । स्वादति भुङ्क्ते अन्यः परमात्मा निरन्नः अभोक्तापि निजानन्दतृप्तो बलेन ज्ञानादिशक्त्या भूयानधिकः श्रुतिश्च—

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीतीति ॥ ॥६ ॥

स परमात्मा आत्मानं स्वम् अन्यं जीवं च वेद न पिप्पलं कर्मफलमश्नाति सः पिप्पलादो जीवस्तु न तु स्वमन्यं च वेद युक् युक्तः स नित्यबद्धो जीवः विद्यामय इति विद्याशब्देनात्रान्तरङ्गा चिच्छक्तिरुच्यते न तु बहिरङ्ग मायाशक्तिवृत्तिः तथा च गोपालतापनीश्रुतिः । द्वौ सुपर्णौ भवतो ब्रह्मणोऽंशभूतस्तथेतरो भोक्ता भवति अन्यो हि साक्षी भवतीति भोक्ताभोक्तारौ वृक्षधर्मे तिष्ठतः यत्र विद्याविद्ये न विशामो विद्याविद्याभ्यां भिन्नो विद्यामयो हि यः स कथं विषयी भवतीति स्मृतिश्च छायातपौ यत्र न गृध्रपक्षाविति छायातपौ अविद्याविद्ये इति व्याख्या ॥ ७ ॥

अथ बद्धमुक्तयोर्जीवयोर्मिथो वैलक्षण्यमाह । देहस्थोऽपीति दशभिः । तत्र त्रिभिः कथं वर्तेतेत्यस्योत्तरमाह । विद्वान् मुक्तः संस्कारवशेन देहस्थोऽपि देहस्थो न भवति यथा स्वप्नादुत्थितः याचितानुवृत्तिन्यायेन स्मर्यमाणे स्वप्नदेहे स्थितोऽपि तत्रस्थो न भवति तद्गतसुखदुःखयोः स्वनिष्ठत्वेनाप्रतीतेः तथा वस्तुतो न देहस्थोऽपि कुमतिरविद्वान् देहस्थः तन्निमित्तसुखदुःखभाक् यथा स्वप्नदृक् स्वप्नान् पश्यन् स्वप्नदेहगतः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

कथं वर्तेतेत्यादिप्रश्नोत्तरं वदन् जीवेश्वरयोः परस्परं बद्धमुक्तादीनां जीवानां च वैलक्षण्यं दर्शयति । अथेत्यादिना । विरुद्धधर्मिणोः अल्पज्ञत्वसर्वज्ञत्वादिधर्मवतोः एकधर्मिणि समानस्थाने नियम्यनियन्तृत्वादिना स्थितयोः ॥ ५ ॥

एतौ प्रेर्यप्रेरकत्वादिना विद्वदनुभवप्रसिद्धौ एकस्य कर्मफलभोगार्थमपरस्य तत्फलदानाद्यर्थमेवं सूतं स्वस्वानुरूपतया

इन्द्रियैरिन्द्रियार्थेषु गुणैरपि गुणेषु च।
गृह्यमाणेष्वहं कुर्यान्न विद्वान् यस्त्वविक्रियः॥ ९॥
दैवाधीने शरीरेऽस्मिन् गुणभाव्येन कर्मणा।
वर्तमानोऽबुधस्तत्र कर्ताऽस्मीति निबध्यते॥ १०॥
एवं विरक्तः शयन आसनाटनमज्जने।
दर्शनस्पर्शनघ्राणभोजनश्रवणादिषु॥ ११॥
न तथा बद्ध्यते विद्वांस्तत्र तत्रादयन् गुणान्।
प्रकृतिस्थोऽप्यसंसक्तो यथा खं सविताऽनिलः॥ १२॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

शोभनं पर्णं पतनं ययोस्तादृशौ ज्ञानस्वरूपत्वज्ञातृत्वाह-मर्थत्वेन सादृश्यात् सखायौ प्रवर्त्यप्रवर्त्तकत्वात् ऊर्ध्वमूलो-ऽवाक्शाख एषोऽश्वत्थः सनातनः। ऊर्ध्वमूलमधः शाखमश्वत्थं प्राहुरव्ययमिति श्रुतिस्मृतिप्रसिद्धे वृक्षे समष्टिव्यष्टिदेहे यदृच्छया कृतं हृत्कमलरूपं नीडं याभ्यां तौ तयोर्मध्ये एकः जीवाख्यः सुपर्णः पिप्पलः समष्टिव्यष्टिरूपो देहः ब्रह्मादिपिपीलिकान्तश्चा-स्वस्थानं तत्राद्यते इत्यन्न कर्मफलं खादति भक्षयति अन्य ईश्व-राख्यः सुपर्णस्तु निरन्नः पिप्पलान्नं न खादति परमानन्दरू-पत्वात् बलेन सर्वेश्वरत्वसर्वात्मत्वादिना भूयान् अत्र "द्वा-सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते। तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति इति श्रुतिरनुसन्धेया॥६॥

ईश्वरस्य सर्वज्ञत्वं जीवस्याज्ञत्वं चाह। आत्मानमित्यर्द्धेन ज्ञानाज्ञानाभ्यां नित्यमुक्तनित्यबद्धयोर्वैलक्षण्यमुक्तमिदानीं नित्यं कर्मफलप्रेप्सुर्नित्यबद्धः नित्यं विद्याप्रधानः स नित्यमुक्त इत्याहा-र्द्धेन। य इति। अविद्यया कर्मरूपया युक्तः युक्तः—

अविद्या कर्मसंज्ञान्या तृतीया शक्तिरिष्यते।
यया क्षेत्रज्ञशक्तिः सा वेष्टिता नृप! सर्वगा॥
संसारतापानखिलानवाप्नोत्यतिसन्ततान्।
तया तिरोहितत्वाच्च शक्तिः क्षेत्रज्ञसंज्ञिता॥
सर्वभूतेषु भूपाल! तारतम्येन वर्त्ततेइति।

स्मृतेः विद्यामयो विद्याप्रधानः॥ ७॥

अथ सामान्यतो बुभुक्षुं मुमुक्षुं च परस्परविलक्षणतया प्रतिपादयति। देहस्थ इत्यादिना। विद्वान् कालानवच्छिन्नस्वस्वरू-पस्थितिवित् प्रारब्धकर्मवशाद्देहस्थोऽपि न देहस्थः देहसमकालस्थि-तिमान्न भवति नित्यो नित्यानामिति श्रुतिप्रोक्तनित्यस्थितिमानहं देहपरिच्छेद्यसत्ताको नास्मीति जानातीत्यर्थः। स्वप्नादुत्थितः प्रबुद्धः यथा स्वाप्नदेहं परिच्छेद्यमात्मनः स्थितिं नैव मन्यते तद्वत् कुमतिः कुत्सिते देहादावहमित्यादिमतिर्यस्य सः अदेहस्थोऽपि देहसमका-लस्थितिशून्योऽपि देहस्थ एव देहाभिन्नस्वस्वरूपंमन्य एव यथा स्वप्नदृक् स्वप्नद्रष्टा॥ ८॥

भाषा टीका।

हे तात उद्धवजी! अब मैं बद्ध तथा मुक्त दोनों की विल-क्षणता को तुम से कहता हूं वे दोनों एक धर्म वाले भौतिक शरीर मे रहते हैं और स्वयं बुद्धि से विलक्षण धर्मवाले हैं ५

इस शरीर रूपी वृक्ष मे जीवात्मा परमात्मा दोनो पक्षी रूपी के हैं दैवयोग से इन ने इस वृक्ष मे खोंतर बनाया है दोंनो बरोबर रहते हैं तिनमे से एक जीव तो कर्म फल को भो-गता है और ईश्वर तो कुछ नहीं खाकर भी अधिक सदा प्रका-श करता है॥ ६॥

सर्वज्ञ वह परमात्मा तो अपने को तथा जीवको दोनों को जानता है और कर्मफल को नहीं भोगता है और विद्या नित्य ज्ञान मय है वह नित्यही मुक्त है जो अज्ञानी जीव है यह तो कर्मफल को भोगता है औ अविद्या से युक्त है वह देह संबन्ध रहने तक नित्यही बद्ध है॥ ७॥

इस प्रकार से इस देह में रहकर भी जो ज्ञानी है वह तो अपने को देह में नहीं रहा सरीका ही समुझता है जैसे स्वप्न में से उठा पुरुष उस देह से मोह नहीं करता है और जो अज्ञानी है वह तो प्रत्यक्षिक में देह में नहीं रहने पर भी अपने को देहस्थ समुझता है जैसे स्वप्न में देखता हुआ पुरुष उसी बुद्धिमें रहता है॥ ८॥

श्रीधरस्वामिकृतभावार्थदीपिका।

अथ हेतुन्वेन वैलक्षण्यान्तरमाह द्वाभ्याम् इन्द्रियैरिन्द्रियार्थेषु गृह्यमाणेष्वपि यस्तु विद्वान् स नाहंकुर्यादहं गृह्णामीति मतिं न कुर्यादित्यर्थः। कुतः गुणैर्गुणेषु गृह्यमाणेषु यत एवाविक्रियो रागादिशून्यः तदुक्तम् गीतासु—

तत्त्ववित्तु महाबाहो! गुणकर्मविभागयोः।
गुणा गुणेषु वर्तन्ते इति मत्वा न सज्जत इति॥ ९॥

अबुधस्तु पूर्वकर्माधीनेऽस्मिन् शरीरे वर्तमानो गुणैरिन्द्रियै-र्भाव्येन कर्मणा तत्र देहादौ निबध्यते कुतः कर्ताऽस्मीत्यहं-कारेण तदुक्तम् तत्रैव

वैशारद्येक्षयाऽसंगशितया छिन्नसंशयः ।
प्रतिबुद्ध इव स्वप्नान्नानात्वाद्विनिवर्तते ॥ १३ ॥
यस्य स्युर्वीतसंकल्पाः प्राणेन्द्रियमनोधियाम् ।
वृत्तयः स विनिर्मुक्तो देहस्थोऽपि हि तद्गुणैः ॥ १४ ॥
यस्यात्मा हिंस्यते हिंस्रैर्येन किंचिद्यदृच्छया ।
अर्च्यते वा क्वचित्तत्र न व्यतिक्रियते बुधः ॥ १५ ॥
न स्तुवीत न निन्देत कुर्वतः साध्वसाधु वा ।
वदतो गुणदोषाभ्यां वर्जितः समदृङ्मुनिः ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः ।
अहङ्कारविमूढात्मा कर्ताऽहमिति मन्यते इति ॥

एतैस्त्रिभिः श्लोकैः कथं वर्तेतेत्यस्य प्रश्नस्य सुखदुःखशून्यो निराभिमानश्च देहे वर्तत इत्युत्तरमुक्तं भवति ॥ १० ॥

वैलक्षण्यान्तरं वदन्भुञ्जीतेत्यादिप्रश्नोत्तरमाह । एवमिति त्रिभिः । अन्यगतमेव कर्म मां बध्नातीत्येवं विरक्तो विद्वान् तथा अविद्वानिव शयनासनादिषु न बध्यते कुतः तत्र तत्र विषयेषु गुणानिन्द्रियाण्यादयन् भोजयंस्तत्साक्षित्वेन वर्तमानो न तु स्वयमदन् एतदेव कुतस्तत्राऽऽह । प्रकृतिस्थोऽपीति । सार्धेन । यथा खं सर्वत्र स्थितमपि न सज्जते यथा सविता जले प्रतिबिम्बितोऽपि यथाऽनिलः सर्वत्र संचरन्नपि तद्वत् ॥ ११-१२॥

असङ्गेन वैराग्येण शितया तीक्ष्णया छिन्नाः संशया असम्भावनादयो यस्य सः नानात्वाद्देहादिप्रपञ्चात् ॥ १३ ॥

कथं विहरेदित्यस्योत्तरत्वेन वैलक्षण्यान्तरमाह । यस्य स्युरिति । तद्गुणैर्देहगुणैः संकल्पशून्याभिः प्राणादिवृत्तिभिर्विहरन् मुक्त इत्यर्थः ॥ १४ ॥

एवं तावद्बद्धमुक्तयोः स्वसंवेद्यमेव वैलक्षण्यमुक्तमिदानीं केषां ज्ञायेत लक्षणैरित्यस्योत्तरतया परैरपि सुज्ञेयं वैलक्षण्यमाह यस्यात्मेति त्रिभिः हिंस्रैर्दुर्जनैरन्यैर्वा प्राणिभिर्यस्याऽऽत्मा देहः पीड्यते यदृच्छया येन केनापि क्वचित्किञ्चिदर्च्यते वा स बुधश्चेत्तत्र न व्यतिक्रियते नाति विक्रियत इत्यर्थः । तदुक्तम् याज्ञवल्क्येन—

"यः कण्टकैर्वितुदति चन्दनैर्यश्च लिम्पति ।
अक्रुद्धोऽपरितुष्टश्च समस्तस्य च तस्य चेति ॥ १५ ॥

किञ्च साध्वसाधु वा कुर्वतो वदतो वा जनान्न स्तुवीत न च निन्देत यो लौकिकव्यवहारे विमुखः स मुक्त इत्यर्थः ॥ १६

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी ।

अत्र मुक्तस्य देहस्थत्वेऽपि तद्गतसुखदुःखाद्यभाक्त्वे बद्धस्यादेहस्थत्वेऽपि तन्निमित्तसुखदुःखादिभाक्त्वे च निरहङ्कारत्वादेव देहस्थत्वेऽपि सुखाद्यभाक्त्वमिति निरहङ्कारत्वस्य तत्र हेतुत्वम् एवं यो निरहङ्कारः स मुक्त इति बद्धाद्वैलक्षण्यञ्चार्थः ॥ ९ ॥

भाव्येन सूज्येन सत् अहङ्कारेण बद्धत्वं तत्र गीतायामुक्तं साहङ्कारत्वादेव वस्तुतोऽदेहस्थत्वेऽपि तद्गतसुखदुःखादिभाक्त्वमिति साहङ्कारत्वस्य तत्र हेतुत्वम् एवं यः साहङ्कारः स बद्ध इति मुक्ताद्वैलक्षण्यं चेत्यर्थः ॥ १० ॥

एवमिति सार्धकं तथेत्यस्य व्याख्यानम् अविद्वानिवेति तत्साक्षित्वेन इन्द्रियसाक्षित्वेन ॥ ११ ॥ १२ ॥

एतदेव साक्षित्वेन वर्तमानत्वमेव प्रकृतिस्थोऽपीति सार्धकम् असंसक्तेन नानात्वान्निवृत्तेः साक्षित्वमित्यर्थः ॥ १३ ॥

वैलक्षण्यान्तरं बद्धान्मुक्तस्यान्यद्वैशिष्ट्यं यस्य प्राणेन्द्रियमनोधियां वृत्तयः क्षुत्पिपासादर्शनश्रवणादिसङ्कल्पनिश्चयरूपाः पुरुषकर्तृकसदसत्सङ्कल्पशून्या भवन्ति स देहस्थोऽपि देहगुणैर्जन्मनाशादिभिर्मुक्तः तथाच सङ्कल्पशून्याभिरित्यादि व्याख्यातम् ॥ १४ ॥

स्वसंवेद्यं बद्धमुक्तयोरेव सुज्ञेयम् अन्यैः पश्वादिभिर्वा नातिविक्रियते हर्षशोकादिपरवशो न स्यात् तत परवेद्यलक्षणं तस्य तोदकस्य तस्य लिम्पकस्योपरि यथासङ्ख्यमक्रुद्धोऽपरितुष्टश्च किन्तु तयोरपि समः स मुक्तः परैरपि सुज्ञेय इत्यर्थः ॥ १५ ॥

किञ्च अन्यदपि परवेद्यं लक्षणमाहेत्यर्थः । लौकिक व्यवहारे विमुखत्वमेव यथा कथञ्चित् परवेद्यं लक्षणमित्यर्थः ॥ १६ ॥

सुदर्शनसूरिकृतशुकपक्षीयम् ।

अदेहस्थत्वमेव विवृणोति । इन्द्रियैरिति । गुणैः गुणभूतैरिन्द्रियैः इन्द्रियार्थेषु गुणेषु गृह्यमाणेषु अविक्रियः हर्षविषादादिरहितो भोक्ता अभिमानं न करोतीत्यर्थः ॥ ९ ॥

कुमतेर्देहस्थितिं विवृणोति । दैवाधीन इति । गुणेन भाव्यते सम्भाव्यत इति गुणभाव्यं तेन अबुधः अज्ञः ॥ १० ॥ ११ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

प्रकृतिस्थः अविकृतः संसर्गे सत्यपि अविकृतत्वे दृष्टान्तत्रयं यथाखमित्यादि ॥ १२ ॥

वैशारद्या विशारदया नानात्वात् देवत्वादिभेदात् विनिवर्तते देवोऽहमित्याद्यभिमानं न करोति ॥ १३ ॥

वीतसङ्कल्पाः इदं संपाद्यमिदं द्रष्टव्यमिदं परिहर्तव्यमित्यभिसंधानरहिताः ॥१४—१६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अदेहस्थत्वमेव विवृणोति । इन्द्रियैरिति । यस्तु विद्वान्स गुणैः प्रकृतिपरिणामात्मकैरिन्द्रियैर्गुणेषु इन्द्रियार्थेषु शब्दादिष्वनुकूलप्रतिकूलेषु गृह्यमाणेषु सत्स्वविक्रियः हर्षविषादादिरहितः नाहं कुर्यादात्मनि कर्तृत्वभोक्तृत्वाभिमानं न कुर्यादित्यर्थः ॥ ९ ॥

कुमतेर्देहस्थितिं विवृणोति । दैवाधीन इति । गुणैः प्राकृतैः तत्कार्यभूतैरिन्द्रियैर्वा भाव्यते सम्पाद्यते इति तथा तेन कर्मणा हेतुना वर्तमानोऽपि अबुधः देहस्य दैवाधीनतां प्राचीनकर्मनिमित्ततां तत्र स्थितिं च तथा देहविलक्षणमात्मानं च अजानन् देहमात्मानं मन्वान इत्यर्थः । अत एव कर्तास्मीति निबध्यते देहात्माभिमानकर्तृत्वभोक्तृत्वाभिमानैर्बद्धो भवतीत्यर्थः ॥ १० ॥

कथं विहरेदित्यादीनां विशेषप्रश्नानामुत्तरमाह । एवमिति । इत्थं कुमतेर्वृत्त्यनुचिन्तनेन विरक्तो देहतदनुबन्धिष्वासक्तिरहित इत्यर्थः । अशनं व्याप्तिः "अशूङ् व्याप्तौ" इत्यनुशासनात् शयनादिषु कर्मसु यथोचितं वर्तमान एवेति शेषः—

युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु ।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ॥

इत्यत्र भगवतैवोक्तत्वात् ॥ ११ ॥

तत्र तत्र शब्दादिविषयेषु गुणान् गुणपरिणामात्मकानीन्द्रियाण्यादयन् भक्षयन्ननुभावयन्नीश्वरायत्तसत्ताकस्थितिप्रवृत्तिमत्स्विन्द्रियेष्वेव कर्तृत्वभोक्तृत्वादिकमनुचिन्तयन्नित्यर्थः । तदेवाह । न तथेति । विद्वान्—

तत्त्ववित्तु महाबाहो ! गुणकर्मविभागयोः ।
गुणा गुणेषु वर्तन्त इति मत्वा न सज्जते ॥

इत्युक्तविधमतिमान् तथा न बध्यते इत्यर्थः । गुणानादयन्नित्यनेनौदासीन्यमात्मनि कर्तृत्वभोक्तृत्वादिकं तु शरीरेऽनुसंधेयमिति फलितम् ईश्वरस्याकर्तृत्वमनुसन्धेयमिति वक्ष्यते मयि सर्वाणि कर्माणि निरपेक्षः समाचरेदिति ननु कर्माणि कुर्वतस्तत्फलभूतानि सुखदुःखादीन्यनुभवतो देहे वर्तमानस्य कथमौदासीन्यरूपमविक्रियत्वं सम्भवेदत आह । प्रकृतिस्थोऽपीति । प्रकृतिस्तत्परिणामात्मको देहस्तत्स्थोऽप्यसंसक्तः तदभिनिवेशरहितः तत्प्रयुक्तसुखदुःखादिष्वविक्रिय इति यावत् तत्स्थत्वेऽपि तत्प्रयुक्तैरविकृतत्वे दृष्टान्तत्रयं यथाखं सवितानिल इति । यथा खमाकाशः सर्वत्रावस्थितोऽपि व्यापकगतदोषैर्न विक्रियते यथा सविता स्वप्रभया व्याप्नुवन्नपि तद्वत्प्रकृतिस्थोऽपि प्रकृत्यनभिनिवेशेनातत्स्थतुल्यो भवतीत्यर्थः ॥ १२ ॥

किंचायमसङ्गेन देहाद्यनभिनिवेशेन निशितया वैशारद्या विशारदया ईक्षया बुद्धया छिन्नाः संशया यस्य सः स्वप्नात्प्रतिबुद्ध इव नानात्वाद्देवत्वादिभेदाद्विनिवर्तते देवोऽहमित्याद्यभिमानं न करोतीत्यर्थः । देहादहं विलक्षणो न वा किमहं स्वतन्त्र उतेश्वरपरतन्त्रः किम्वाहमीश्वर एवोत तस्माद्भिन्न इत्यादयः संशयाः ॥ १३ ॥

अथ कैर्वा ज्ञायेत लक्षणैरित्यस्योत्तरमाह । यस्येति । यस्य प्राणादीनां वृत्तयो व्यापारा वीतसंकल्पाः स्युः इदमदनीयमिदं द्रष्टव्यमिदं सम्पाद्यमिदं परिहर्तव्यमित्याद्यभिसन्धिरहिताः स्युरित्यर्थः । स एव देहस्थोऽपि तद्गुणैर्विनिर्मुक्तो ज्ञेयः ॥ १४ ॥

यस्यात्मा देहः हिंस्रैर्दुर्जनैर्हिंस्यते पीड्यते अथवा येन केन चिद्यदृच्छया किञ्चिदर्च्यते सत्क्रियते तथापि तत्र हननार्चनादौ न व्यतिक्रियते नातीव विक्रियते स एव बुधः विद्वानिति ज्ञेयः ॥ १५ ॥

किञ्च यः साध्वसाधु वा कुर्वतो वदतो वा जनान्न स्तुवीत न निन्देत गुणदोषाभ्यां रहितः मानापमानयोस्तुल्यदृष्टिः स निश्चयः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

एतदेव विवृणोति । इन्द्रियैरिति । गुणैर्हरेरप्रधानैर्जीवैः श्रोत्रादीन्द्रियैः गुणेष्वप्रधानेष्वर्थेषु विषयेषु गृह्यमाणेषु सत्सु यस्त्वविक्रियः कृशोऽहं छिन्नोऽहमित्यादिविकाररहितो विद्वान् परमात्मा स नाहङ्कुर्यादित्यन्वयः—

शरीरस्थोऽपि विद्वत्त्वान्न विष्णुर्बध्यते क्वचित् ।
अविद्वत्त्वात्तु तत्रैव देहे जीवस्तु बध्यते ॥
स्वप्नदृग्यदिमे जीवा हरिः स्वप्नोत्थितो यथा ।
सदा तमोविहीनोऽपि ज्ञापनार्थमुदीर्यते ॥

त्यनेन—

आत्मनो वशगैर्जीवैरात्मनो वशगेषु च ।
दुःखेषु गृह्यमाणेषु मनआदिभिरिन्द्रियैः ॥
अहं दुःखीति नैवेशो ह्यहङ्कुर्यात्परः पुमान् ।
जीवगत्वेन तद्दुःखं विष्णुः पश्यति सर्वदा ।
अतो न दुःखभाग्विष्णुः स्वातन्त्र्यात्पुरुषोत्तमः ॥
पारतन्त्र्यादहं दुःखीत्येवं जीवः प्रपश्यति ।
तस्मात्स दुःखभागुक्तो यावदीशः प्रसीदतीति ॥

अनेन चानयोः श्लोकयोरर्थो विवृत इति जीवगत्वेन तद्दुःखं विष्णुः पश्यति सर्वदेत्यनेन अभिचाकशीतीत्यस्यार्थः सूचित इति ॥ ९ ॥

जीवस्याहमस्मीत्यभिमान एवानर्थप्रवाहहेतुरित्याह । दैवेति । दैवाधीनेऽस्मिन् शरीरे वर्तमानोऽबुधोऽज्ञो जीवः अस्मिन्कर्मण्यहं गुणभूतोऽस्वतन्त्र ईशाधीनः इति भाव्येन भावनीयेन कर्मणा अहमेव कर्तास्मीति मन्यमानस्तत्र शरीरे नितरां बध्यते इति—

अस्वतन्त्रः स्वतन्त्रोऽस्मीत्येवं जीवः प्रभावयन् ॥
बध्यते हीशकोपेन राजभावेन भृत्यवदिति ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

वचनात्स्वातन्त्र्यकर्तृत्वाभिमानोऽत्र विवक्षित इति । अत्रास्वस्वातन्त्र्यं दैवाधीनमित्यनेन सूचितम् ॥ १० ॥

कालोऽपि शरीरशीर्णतामीरयतीति शरीरस्य कालाधीनत्वं च तर्हि कथं कारं न बध्यत इति तत्राह । एवमिति । एवं शयनादिषु स्वस्य स्वातन्त्र्याभिमानेन बध्यमानस्तत एवापारदुःखमनुभुञ्जन् विद्वानेषु विरक्तः तत्र तत्र हरिः स्वातन्त्र्यं विद्वांस्तत्र तत्र शरीरयात्रार्थं गुणान् विषयानाददन् स्वीकुर्वंस्तथा कर्तृत्वाभिमानिवन्न बध्यत इत्यन्वयः गुणान् पुण्यलक्षणानाददत् उपार्जयन्निति वा भेदज्ञानिन एव बद्धत्वं नाभेदज्ञानिन इत्यनेनोच्यते इति किं न स्यादितिचेन्न—

नित्यबद्धोऽपि जीवोऽयमात्मनो नित्यबद्धताम् ॥
विष्णुना नित्यमुक्तत्वं तस्य वेत्ता समुच्यते ।
तदधीनत्वबन्धे तु विद्यमानेऽप्यदुःखभाक् ॥
देहस्थोऽपि न दुःखी स्यादन्यथातिक्रमु मुक्तिगः ।

इतिवचनात् जीवभिन्नविष्णुज्ञानाद्बन्धमोक्ष इत्यस्योपपत्तेः एतद्ध्यानफलमाह । प्रकृतिस्थोऽपीति । असङ्गेन वैराग्येण शितया तेजितया वैशारद्या विशारदमूलया विष्णोरनुग्रहादुत्पन्नया ईक्षया अपरोक्षज्ञानेन छिन्नसंशयोऽत एवासंसक्तः प्रकृतिस्थः शरीरस्थोऽपि ज्ञानी स्वप्नात्प्रतिबुद्ध इव नानात्वान्मिथ्याज्ञानान्निवर्तेत इत्यन्वयः । "नानात्वमिति वै मिथ्याज्ञानं क्वचिदुच्यते वस्तुयाथात्म्यतोऽन्यत्वाज्ज्ञानस्योऽभ्यो विवक्षित" इति वचनात् नानात्वशब्दस्य मिथ्याज्ञानवाचित्वस्य प्रसिद्धेः उक्तं युक्तं ॥ ११—१३ ॥

वाय्वाकाशयोः सर्वत्र सत्त्वेऽपि तन्निमित्तलेपान्वयो यथा नास्ति तथेति पूर्वोक्तजीवन्मुक्तस्य स्थामेव विशदयति । यस्येति यस्य प्राणेन्द्रियमनोधियां चेष्टादिलक्षणा वृत्तयः वीतसङ्कल्पाः फलानुसन्धानरहिताः स्युः स देहस्थोऽपि तद्गुणैर्देहधर्मैर्निर्मुक्तो नारिकेलकपालमुक्तान्तस्थनारिकेलवदित्यन्वयः ॥ १४ ॥

यावच्छरीरपातं जीवन्मुक्तः कथंकारं तिष्ठतीत्यत्राह । यस्येति । आत्मा देहः मनो वा हिंस्रैर्हिंसाशीलैः प्राणिभिः येन किञ्चित्केन चिद्यदृच्छया प्राप्तेन चन्दनादिना तत्र तस्यामवस्थायां स बुधः न विक्रियत इति ॥ १५ ॥

एतद्विशदयति । न स्तुवीतेति । कुर्वतः पुरुषान् साध्वादि वदतो वा गुणदोषाभ्याम् अल्पेन तुच्छेन गुणेन दोषमात्रेण च वर्जितो न तु गुणमात्रेण वर्जित इत्यर्थः । दोषश्चैव गुणश्चो-भावीशतन्त्रौ न मे वशावित्यादि*वाक्याविरोधः सर्वगुणवर्जित ति अङ्गीकार इति भावः ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

इन्द्रियैर्गुणैरिन्द्रियार्थेष्वपि गुणेषु गृह्यमाणेषु न अहंकुर्यात् अहं गृह्णामीति मतिं न कुर्यात् निरहंकारित्वे लिङ्गमविक्रियः तद्विकाररहितः विकारवत्त्वेऽप्यहं न किमपि करोमीति वाचैव ब्रुवन् कपटी महावञ्चो ज्ञेयः ॥ ९ ॥

---

* इति जानन्नदोषी स्याद्वर्जितोऽल्पगुणो न चेति शेषतात्पर्यम् ।

दैवाधीने पूर्वकर्माधीनेऽस्मिन् शरीरे वर्त्तमानः गुणैरिन्द्रियैभाण्ठ्येन कृतेन कर्मणा निबध्यते कुतः कर्त्ताऽस्मीत्यहंकारेण यदुक्तम्—

अहंकारविमूढात्मा कर्ताहमिति मन्यत इति ॥ १० ॥

किं भुञ्जीतेति यदुक्तं तत्राह । एवमितित्रिभिः । न तथा बध्यत इति शयनासनादिषु यथा अविद्वांस्तत्र तत्रासक्त्या तत्तदुपायापायोत्थाभ्यां हर्षशोकाभ्यां बध्यते तथा न बध्यते तेन बाधितानुवृत्तिन्यायेन किंचिन्मात्रहर्षशोकवत्त्वेऽपि न क्षतिः यतो विरक्तः तत्र तत्र विषयेषु गुणानिन्द्रियाणि आददन् भोजयन् तत्साक्षित्वेन वर्त्तमानः नतु स्वयमदन् ॥ ११ ॥

एतदेव कुतस्तत्राह । प्रकृतिस्थोऽपीतिसार्द्धेन । यथा खं सर्वत्र स्थितमपि न सज्जति यथा सविता सर्वत्र किरणजालं प्रसारयन्नपि यथाचानिलः सर्वत्र संचरन्नपि तद्वत् ॥ १२ ॥

असंगेन वैराग्येण शितया तीक्ष्णया छिन्नाः संशया असम्भावनादयो यस्य सः नानात्वात् नानादेहप्रपञ्चात् ॥ १३ ॥

यदुक्तं कथं विहरेदिति तत्राह । यस्येति । तद्गुणैर्देहधर्मैः शोकमोहादिभिर्विनिर्मुक्तः सन् संकल्पशून्याभिः प्राणादिवृत्तिभिर्विहरतीति भावः ॥ १४ ॥

यदुक्तं कैर्वा ज्ञायेत लक्षणैरिति तत्र सर्वज्ञेयानि मुक्तलक्षणान्याह । यस्येति त्रिभिः । हिंस्रैर्दुर्जनैर्यस्यात्मा देहो हिंस्यते उपानत्प्रहारादिभिः पीड्यते यदृच्छया हेतुना विनैव येन केनापि स्रक्चन्दनादिना किंचिदर्च्यते वा तत्र न व्यतिक्रियते नाति विक्रियते दुर्जनान् प्रति न क्रुध्यति सुजनान् प्रति न तुष्यति चेत्यर्थः । यदुक्तं याज्ञवल्क्येन—

यः कण्टकैर्वितुदति चन्दनैश्च विलिम्पति ।
अक्रुद्धोऽपरितुष्टश्च समस्तस्य च तस्य चेति ॥ १५ ॥

साध्वसाधु कुर्वतो वदतो वा जनान् न स्तुवीत नच निन्देत्॥१६॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यस्तु विद्वान् यदासीत तदधीनमासीदिति श्रुतिप्रोक्तपराधीनत्वज्ञानवान् तथात्मपरमात्मज्ञानवान् अविक्रियः रागद्वेषरहितः सन् इन्द्रियैः श्रोत्रादिभिः करणैरिन्द्रियार्थेषु शब्दादिषु गुणैः सत्त्वादिभिः गुणेषु जागरणादिषु हिताहितेषु गृह्यमाणेषु सत्सु अहं न कुर्यात् अहं गृह्णामीति संसारप्रापिकां मतिं न कुर्यात् चकारान्मम कर्मव्याजेन भगवान् सर्वं कारयतीति मुक्त्यर्थिकां मतिं कुर्यात् ॥ ९ ॥

अबुधः परमेश्वराधीनताऽनभिज्ञः तथात्मपरमात्मानभिज्ञः दैवाधीने क्षणभङ्गुरेऽस्मिन् शरीरे वर्त्तमानः आत्मत्वेन सज्जमानः तत्र संसारे निबध्यते नतु मुच्यते केन बध्यते इत्याकाङ्क्षायामाह । गुणाः इन्द्रियाणि भाव्यन्ते येन तेन कर्मणा किञ्च स्वातन्त्र्येणाहमेव कर्ताऽस्मीत्यहङ्कारेण ॥ १० ॥

कथं वर्तेतेत्यस्योत्तरमुक्त्वा किम्भुञ्जीतेत्याद्युत्तरमाह । एवमित्यादित्रिभिः । यथा अबुधः बध्यते एवं विद्वान् सर्वं भगवदधीनमिन्द्रियतोषकं कर्म संसारहेतुः संसारसुखमनित्यत्वादिदोषबहुलमित्यादिज्ञानवान् न बध्यते संसारे न निमज्जति अन्वयः सांसारिकं सुखं बहुदोषवदेवं शयनादिषु विरक्तः ॥ ११ ॥

न कुर्यान्न वदेत्किंचिन्न ध्यायेत्साध्वसाधु वा ।
आत्मारामोऽनया वृत्त्या विचरेज्जडवन्मुनिः ॥ १७ ॥
शब्दब्रह्मणि निष्णातो न निष्णायात्परे यदि ।
श्रमस्तस्य श्रमफलो ह्यधेनुमिव रक्षतः ॥ १८ ॥
गां दुग्धदोहामसतीं च भार्यां देहं पराधीनमसत्प्रजां च ।
वित्तं त्वतीर्थीकृतमङ्ग ! वाचं हीनां मया रक्षति दुःख दुःखी ॥ १९ ॥
यस्यां न मे पावनमङ्गकर्म स्थित्युद्भवप्राणनिरोधमस्य ।
लीलावतारेप्सितजन्म वा स्याद्वन्ध्यां गिरं तां बिभृयान्न धीरः ॥ २० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

निष्कल्मषत्वादिना खादितुल्यः तत्र तत्र पदार्थलाभे गुणान् भोगान् यत्करोषि यदश्नासि तत्कुरुष्व मदर्पणमित्येवं वादिनं मां भोजयन् अनर्पिते संसारे वासंसक्तः यतः प्रकृतिस्थः । स्वभावस्थः सर्वं भगवदायत्तं सर्वं भगवदात्मकमित्येवं वित् ॥ १२ ॥

नानात्वात् अब्रह्मात्मकतया वादिभिः प्रवर्त्तितो यो नानाभावः ब्रह्मनिरपेक्षपृथक्पृथगात्मसत्ता तस्माद् वैशारद्यैक्षया ऐतदात्म्यमिदं सर्वमित्येवं ज्ञानेन असङ्गशितया वैराग्यनिर्धौतया विनिवर्तते ॥ १३ ॥

केवां ज्ञायेत लक्षणैरित्यस्योत्तरमाह । यस्येति चतुर्भिः । देहस्थोऽपि तद्गुणैर्विनिर्मुक्तो ज्ञेयः ॥ १४ ॥

यस्य आत्मा देहः हिंस्रैर्दुःस्वस्वभावैः कचित्किञ्चित् हिंस्यते पीड्यते अथवा येन केनचित् कचित् किञ्चित् यदृच्छया अर्च्यते तत्र तिरस्कारे सत्कारे वा न व्यतिक्रियते नातिविक्रियते स बुधो ज्ञेयः ॥ १५ ॥

यः साध्वसाधु वा न्याय्यमन्याय्यं वा कुर्वतो वदतो वा न स्तुवीत नच निन्देत् यतः साध्वसाधुकर्तृवक्तृनिष्ठाभ्यां गुणदोषाभ्यां वर्जितः अनभिभूतः स मुनिः समदृक् ज्ञेयः ॥ १६ ॥

भाषा टीका ।

ओ कि विकार को नहीं प्राप्त होने वाला विद्वान् है सो तो इन्द्रियों से इन्द्रियों के विषयों को ग्रहण करे सो भी सत्वादिगुणों से गुणों में वर्तमान् होवै तौ भी सब विषयों को ग्रहण करने पर अहङ्कार नहीं करता है ॥ ९ ॥

प्रारब्ध के आधीन इस शरीर में गुणों से होने वाले कर्म से वर्तमान् अज्ञानी पुरुष मै कर्ता हूं कर के अभिमान करने से बँध जाता है ॥ १० ॥

विरक्त पुरुष तो शयन आसन चलना हाना देखना छूना सूंघना सुनना खाना इत्यादिक में ॥ ११ ॥

विद्वान् होने से तहां तहां विषयों को भोगता हुआ भी शरीर में स्थित होकर भी आसक्ती न रखने से उन गुणों में नहीं बंधता है जैसे कि आकाश सूर्त पवन के सर्वत्र रहने पर भी नहीं बंधते हैं ॥ १२ ॥

वैराग्य से तीक्ष्ण करी हुई जो निपुण दृष्टि तिस से जिस के सब संशय छूट गये हैं वह पुरुष जैसे स्वप्न से जगा हुआ पुरुष भ्रम से छूट जाता है तैसे नाना भ्रम से छूट जाता है ॥ १३ ॥

जिस पुरुष के प्राण इंद्रिय मन बुद्धि इनकी वृत्ति संकल्पों से रहित होंगी वह पुरुष देह मे रहने से भी उन गुणों से छूटाही रहैगा ॥ १४ ॥

ज्ञानी पुरुष तो कोई चाहै उसके शरीर मे ताड़न करै चाहै कोई सत्पुरुष कहीं पूजन भी करै तो भी शोक वा हर्ष विकार को नहीं प्राप्त होता है ॥ १५ ॥

अपने को कोई भला करै या बुरा करै तो उन दोनों मे न किसी की प्रसंसा करै ना निंदा करै कोई अपने गुण कहै वा दोष कहै वह मुनि सम दृष्टि होकर दोनो से वर्जित ही रहै ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अपि च न कुर्यादिति यो दैहिकेऽपि कर्मण्युदासीनः स मुक्तः इतरो बद्ध इत्यर्थः । एतान्येव सर्वाणि मुमुक्षोः साधनानि ज्ञातव्यानि ॥ १७ ॥

यस्तु केवलं शब्दब्रह्मण्यभिज्ञः पाण्डित्यमात्रश्लाघी न तूक्तैः साधनैस्तदर्थनिष्ठो भवेत्तं निन्दति । शब्दब्रह्मणि निष्णातोऽर्थतः पारं गतोऽपि परे ब्रह्मणि न निष्णायाद्ध्यानाद्यभियोगं न कुर्यात्तस्य शास्त्रश्रमः श्रमैकफलो न तु पुरुषार्थपर्यवसायी अधेनुं चिरप्रसूताम् ॥ १८ ॥

एतदेवान्यार्थनिदर्शनैः प्रपञ्चयति । गामिति । दुह्यत इति दोहः पयो दुग्धो दोहः नोत्तरत्र दोहोऽस्ति यस्यास्तामर्थशून्यामसतीं भार्यां कामशून्यां देहं पराधीनं प्रतिक्षणदुःखहेतुमसत्प्रजां दृष्टादृष्टसाधनशून्यं पुत्रम् अतीर्थीकृतमागते पात्रेऽदत्तं वित्तं दुष्कीर्त्तिदुरितापादकं अङ्ग हे उद्धव ! दुःखानन्तरं दुःखमेव यस्य स रक्षति ॥ १९ ॥

मया हीनां वाचमित्युक्तम् विवृणोति । यस्यां वाचि मे जगतः

श्रीधरस्वामिकृतभावार्थदीपिका ।

शोभकं चरित्रं न स्यात् किं तत् अस्य विश्वस्य स्थित्यादिरूपम् तद्धेतुरित्यर्थः लीलावतारैरीप्सितं जगतः प्रेमास्पदं श्रीरामकृष्णादिजन्म वा न स्यात् तां निष्फलां गिरं धीरो धीमान् न धारयेत् ॥ २० ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी ।

देहार्थं साध्वसाधु कर्म यो न कुर्यान्न वदेन्न ध्यायेदपि तथाच यो दैहिकेऽपि कर्मण्युदासीन इति व्याख्यातम् एतानि निरहङ्कारत्वविरक्तत्वादीन्येव सिद्धस्यासाधारणलक्षणान्यपि साधकस्य मुमुक्षोः साधनानि मुक्त्यर्थमनुष्ठेयानीति ज्ञातव्यानीत्यर्थः ॥ १७ ॥

उक्तैः साधनैः निरहङ्कारत्वविरक्तत्वादिभिस्तदर्थनिष्ठस्य वेदस्य प्रतिपाद्योऽर्थो यः परमात्मा तन्निष्ठो न भवेत् ध्यानाद्यभियोगं ध्यानाद्यभिनिवेशम् आदिना नामसङ्कीर्त्तनादिभक्त्यङ्गपरिग्रहः पुरुषार्थपर्यवसायी मुक्तिसाधकः ॥ १८ ॥

एतदेव ध्यानाद्यभावे शास्त्राभ्यासस्य श्रमैकफलत्वमेव मन्यार्थनिदर्शनैरन्यपदार्थदृष्टान्तैः असतीं व्यभिचारिणीत्वात् कामशून्यां दृष्टादृष्टफलशून्यं दृष्टमैहिकं फलं धनार्जनादि अदृष्टं श्राद्धादिजन्यं तच्छून्यं मया हीनां मदीयलीलादिशून्यां वैदिकीमपि वाचम् ॥ १९ ॥

स्थित्यादिरूपं तत्रावतारचरित्राणां प्रस्तुतत्वात् तेषां साक्षात् स्थित्यादिरूपत्वासम्भवाल्लक्षणया तद्धेतुरिति व्याख्यातम् एवेत्यर्थ इत्युक्तं स्थितिरत्र धारणं प्रेमास्पदं प्रेमविषयं निष्फलां गिरं वेदलक्षणामपि तदुक्तं श्रीनारदेन इदं हि पुंसस्तपसः श्रुतस्य वेत्यादि अतएव गीतं कलियुगपावनावतारेण श्रीभगवता—

श्रुतमप्यौपनिषदं दूरे हरिकथामृतात् ।
यत्र सन्ति द्रवच्चित्तकम्पाश्रुपुलकोद्गमा इति ॥ २० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

न कुर्यादिति स्वस्मिन् साध्वसाधु कारिषु स्वयम्मनोवाक्कायैर्न साध्वसाधुकारीति न विक्रियत इत्यर्थः ॥ १७ ॥

गुणेषु वर्त्तमानस्य गुणातीतत्वं नाम न शयनासनभोजनादिविरहः किन्तु अहंकाररागद्वेषराहित्यमुपकार्यापकारिषु तुल्यचित्तत्वं दर्शनस्पर्शनादिषु तृणलोष्ठदर्शनादिषु सम्पाद्यतावुद्धिविरहश्चेति प्रतिवचनमुक्तं भवति एवं विधस्य पुरुषस्य शास्त्रजन्ययोगजन्यज्ञानद्वयमप्युपादेयमित्याह । शब्दब्रह्मणीति । परे ब्रह्मणि समाधिपर्यन्तज्ञाना ॥ १८ ॥

अतीर्थीकृतमात्मानुगुणार्हितं मया हीनां मत्प्रतिपादनहीनां वाचं दुःखदुःखी रक्षति ॥ १९ ॥

मया हीनां वाचमित्येतद्विवृणोति । यस्यामिति ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

किञ्चात्मारामः स्वल्पमपि किञ्चिल्लौकिकं कर्म साध्वसाधु वा न कुर्यान्न वदेन्न ध्यायेच्च किन्तु मुनिर्मननशीलोऽनया देहस्थोऽपि न देहस्थ इत्यादिनोक्तविधया वृत्त्या जडवद्विचरेत् ॥ १७ ॥

तदेव गुणेषु वर्त्तमानस्य गुणातीतत्वं नाम न शयनासनभोजनादिविरहः किन्त्वहङ्काररागद्वेषराहित्यमुपकारापकारादिषु तुल्यचित्तत्वं दर्शनस्पर्शनादिषु कर्तृत्वाभिमानशून्यत्वं सुवर्णलोष्ठादिष्विष्टानिष्टबुद्धिविरहश्चेति प्रतिवचनमुक्तं भवति अथैवं विधस्य पुरुषस्य शास्त्रजन्यमुपासनात्मकं चेति ज्ञानद्वयमुपादेयमित्याह । शब्दब्रह्मणीति । निष्णातः पारं गतोऽपि यदि परे ब्रह्मणि परब्रह्मविषयकसमाधिपर्यन्तज्ञाने न निष्णायात्परिनिष्ठितो न भवेत्तर्हि तस्य श्रमोऽध्ययनाध्यापनादिश्रमः श्रमफलः श्रम एव फलं यस्य सः निरर्थकः श्रम इत्यर्थः । तत्र दृष्टान्तः अधेनुं चिरप्रसूतां निःक्षीरां गामित्यर्थः । तां रक्षतो यथा रक्षा श्रमैकफला तद्वत् ॥ १८ ॥

एतदेव दृष्टान्तान्तरैश्च प्रपञ्चयति । गामिति । दुह्यत इति दोहः पयः दुग्धः दोहो यस्याः सा दुग्धदोहा दोहोऽस्ति यस्यास्तां गामसतीं कामशून्यां दुष्टां भार्यां च पराधीनं प्रतिक्षणं दुःखहेतुं देहमसत्प्रजां दृष्टादृष्टशून्यं दुरात्मानं पुत्रं च अतीर्थीकृतमागते पात्रेऽदत्तं वित्तं दुष्कीर्तिदुरितापादकम् अङ्ग हे उद्धव ! मया हीनां मत्प्रतिपादनरहितां वाचं च यो रक्षति स दुःखदुःखी दुःखानन्तरमेव दुःखमस्यास्तीति तथा ॥ १९ ॥

मया हीनां वाचमित्येतदेव विवृणोति । यस्यामिति । अङ्ग हे उद्धव ! अस्य जगतः स्थित्युत्पत्तिसंहारात्मकं पावनं शृण्वतो वदतश्च पावनकरं मे मम कर्म चरित्रं यस्यां वाचि प्रतिपाद्यं न स्यात् लीलया येऽवताराः ते तथा लीलापदेनास्यावताराणां कर्मनिमित्तत्वव्युदासः तेषु ईप्सितं जगतः प्रेमास्पदं रामकृष्णादिजन्म वा न स्यात्तां वन्ध्यां निष्फलां गिरं धीमान्न धारयेत् पावनमित्यनेन स्वजन्मकर्मप्रतिपादनरहितायाः प्रत्युतापवित्रतावहत्वं च सूचितम् अथवा लीलावतारेप्सितजन्मेति समाहारद्वन्द्वः तत्रेप्सिताः प्रियतमाः भक्ता इत्यर्थः । जन्मग्रहणं कर्मणोऽप्युपलक्षणं भगवद्भागवतजन्मकर्मादिकमित्यर्थः ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तन्मतं कथमाह । न कुर्यादिति । आत्मारामो मुनिः साधु कुर्याद्वदेद्ध्यायेच्च असाधु न कुर्यान्न वदेन्न ध्यायेच्च शुभजीवानुद्दिश्येति शेषः। अतीतानागतज्ञानी त्रैलोक्योद्धरणक्षम इत्यादेः साधु न कुर्यादित्यर्थो नोपपद्यते इति आत्माराम इत्यत्राऽऽत्मशब्देन परमात्मा एवोच्यते न जीवाद्यन्यतमः ॥ १७ ॥

तदेकानिष्ठेन भक्त्याधीतवेदादिशब्दराशिः फलवान् स्यादन्यथा निष्फल एवेत्याह । शब्देति । परे ब्रह्मणि न निष्णायान्निष्ठितो नियतो न स्याद्यदि तर्हि तस्य पुंसः श्रमः वेदाध्ययनायासो श्रममज्ञानं तमसि परिभ्रमणं वा फलमस्येति श्रमफलः स्यात् अधेनुमदोग्ध्रीं गां रक्षत इव यथा तथास्य तदाज्ञान-

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

परिश्रम एवावशिष्यते नतु जीवनफलमिति भावः । यद्वा श्रमफलः प्रयत्नफलः श्रमः कायक्लेशः—

*स्थितिशब्देन नियमः क्वचिज्जीवनमुच्यते ।
स्थितत्वं क्वचिच्चैव कश्चिद्गतिविरोधितेति ॥

अत्र निष्णातः निष्णायादिति शब्देन नियम उच्यत इति भावः अधेन्वा चरति माययैष वाचं शुश्रुवाँ अफलामपुष्पामिति श्रुतेः ॥ १८ ॥

एतमेवार्थं दृष्टान्तबाहुल्येन द्रढयति । गां दुग्धेति । पराधीनं परप्रेष्यं कुर्वन्तं देहम् अतीर्थीकृतं विषयविषयोपरक्तं कृष्णा गोषु सम्पन्नक्षीरतमा सती सा सती साध्वी पतिव्रता पराङ्गः परपिण्डादः परजातः परेधितः सोऽयं मनुष्यलोकः पुत्रेण जय्यः अनपत्यं परं मन्ये कदपत्याच्छुचां पदात् नार्थस्य धर्मैकान्तस्य कामो लाभाय हि स्मृतः वाचस्तु गोविन्दगुणास्तवे फलमित्यादेः यस्त्वेवं विधं गवादिकं रक्षति स दुःखेऽन्धतमसि नित्यदुःखानुभवो वर्तत इत्यर्थः ॥ १९ ॥

अन्यदेवताप्रसङ्गपरवाचो रक्षणे फलं किं न स्यादत्राह । यस्यामिति । यस्य जगतः स्थित्युद्भवप्राणनिरोधलक्षणं कर्म "दुग्धदोहां तु गां रक्षेत् क्षीरमात्रप्रयोजनः । यथा तद्वदरेरन्यवाचो धारणमिष्यते" इति वचनादन्यविषयवाचा नित्यानन्दलक्षणमोक्षफलं न स्यादतो मुमुक्षुः तन्न कुर्यादतो तत्त्वजिज्ञासानर्थकरीति मज्जिज्ञासैव पुरुषार्थसाधनं तद्वन्तमुद्दिश्य न कुर्यान्न वदेदिति विधीयते तत्त्वजिज्ञासुरिति ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

पूर्वं ज्ञानयोगमुक्त्वाधुना भक्तियोगमुद्भावयितुमाह । शब्दब्रह्मणीति । अत्र परब्रह्मपदेन परत्वमात्रमुच्यते नतु ब्रह्मत्वभगवत्त्वादिविवेकेनेति ज्ञेयं सर्वत्र तत्सामान्यात् ॥ १८ ॥

तदेवं शब्दब्रह्माभ्यासस्य परब्रह्माभ्यासः प्रयोजनमित्युक्तं सर्वेष्वेवांशेषु विशेषत उपनिषद्भागे शब्दब्रह्मणस्तत्प्रतिपादकत्वे स्थितेऽपि तद्विचारकोटिभिरपि परब्रह्मनिष्ठा न जायते किन्तु यस्य तस्मिन्नंशे श्रीभगवदाकारपरब्रह्मलीलादिकं प्रतिपाद्यते तदभ्यासेनैव भगवदाकारे च निष्ठा जायते तदुक्तं संसारसिन्धुमतिदुस्तरमुत्तितीर्षोर्नान्यः प्लव इत्यादि श्रेयःसृतिं भक्तिमुदस्येत्यादि च अत एव मदीयलीलाशून्यां वैदिकीमपि वाचं नाभ्यसेदित्याह द्वाभ्याम् । गामिति । मया श्रीभगवता हीनां मम लीलादिशून्याम् ॥ १९ ॥

यस्यामिति । तां निष्फलां गिरं वेदलक्षणामपि तदुक्तं श्रीनारदेन इदं हि पुंसस्तपसः श्रुतस्य वेत्यादि अत एव गीतं कलियुगपावनावतारेण श्रीभगवता "श्रुतमप्यौपनिषदं दूरे हरिकथामृतात् । यन्न सन्ति द्रवच्चित्तकम्पाश्रुपुलकोद्गमा" इति ॥ २० ॥

* स्थितिः जीवनं प्राणां रक्षणम् ।

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अनया वृत्त्या अनेन स्वभावेन मुक्तलक्षणं भिन्नं बद्धलक्षणं च ज्ञेयम् ॥ १७ ॥

किंच भगवति सच्चिदानन्दमयाकारत्वभावनया भक्तिं कुर्वीत तदैवायमुक्तलक्षणो मुक्तजीवः सिद्धेदन्यथा तु पतेदित्याह । शब्दे वेदशास्त्रे ब्रह्मणि तत्प्रतिपाद्यनिर्विशेषे ब्रह्मणि च निष्णातः विशिष्टज्ञानकुशलः विशिष्टानुभवकुशलश्च किंतु परे ताभ्यां सकाशादपि परमाश्रयत्वेन श्रेष्ठे भगवति न निष्णायात् भक्तिकौशलः यावन्न भवेत् निष्णातशब्दस्य कुशलार्थत्वाद्भगवति सच्चिदानन्दाकारत्वभावनया भक्तिरेवात्र कुशलता यां विना तस्य श्रमः श्रमैकफलो व्यर्थ एव नतु पुरुषार्थप्रापकः दुग्धकामस्य अधेनुं वन्ध्यां चिरप्रसूतां वा रक्षतो यथा श्रमः अत्र शब्दब्रह्मणि वेदे निष्णातोऽपि परे ब्रह्मणि निर्विशेषे इति व्याख्यायामेकदेशान्वय उत्तरश्लोकार्थतात्पर्यविरोधश्च स्यात् ॥ १८ ॥

दृश्यश्रव्यादीन् विषयान् मत्संबद्धानेव स्वीकुर्यान्नतु मत्संबन्धशून्यानतदेव मयि निष्णातत्वमिति वक्तुं सर्वेन्द्रियव्यापारोपलक्षणकमेकं वागिन्द्रियव्यापारमेव लक्षीकृत्य सबहुतरदृष्टान्तमाह । गामिति । दुह्यत इति दोहः पयः दुग्धो दोहो नोत्तरत्र दोह्योऽस्ति यस्याः तां कस्माच्चिन्मूल्यप्रदानेन विनैव प्राप्तां रक्षति पाति गौरियं महत्तबहुतरघासादिचारणैर्दुग्धवती पुनः प्रसूतिमती च भविष्यतीति बुद्ध्या दुग्धलोभी दुःखदुःखी ऐहिकदुःखवान् आयत्यां तस्या गोर्दुग्धालाभदर्शनादुपेक्षणजन्यपापात् पारत्रिकं च यद्दुःखं तद्वान् एवमसतीं भार्यां सतीजनकृतधर्मोपदेशादियमायत्यां सती भविष्यतीति बुद्ध्या सन्तानकामलोभी रक्षतीत्येवमसत्प्रजामित्यादावपि व्याख्येयं देहं पराधीनं प्रतिक्षणं दुःखहेतुम् असत्प्रजां दृष्टादृष्टफलशून्यं पुत्रम् आगते पात्रे अदत्तं दुर्वित्तं दुष्कीर्तिदुरितापादकम् अङ्ग हे उद्धव ! दुःखानन्तरं दुःखमेव यस्य स एव रक्षति॥१९॥

ननु त्वत्संहितैव सा वाक् का किं तत्त्वमस्यादिजीवब्रह्मैक्यप्रतिपादिका वा काचिदन्यैव वेति तां स्पष्टमावेदयेत्यपेक्षायामाह । यस्यां मम कर्म चरितं विश्वस्य स्थितिरुद्भवः प्राणनिरोधः संहारश्च यत्र तत् ततोऽप्युत्कृष्टतमत्वेन विमृश्याह । लीलावतारेषु ईप्सितं सर्वजगत्सुभगं मज्जन्म जन्मोपलक्षितबाल्यलीलादिकं यत्र तच्चरितं न स्यात्तां गिरं वेदलक्षणामपि वन्ध्यां विफलां धीरः पण्डितो न बिभृयादपण्डित एव बिभृयात् ॥ २० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

किञ्चित् ऐहिकामुष्मिकफलविषयं साध्वसाधु वा न कुर्यात् न वदेत् न ध्यायेत् देहवाङ्मनसां नियमनं भगवति कुर्यात् अनया वृत्त्या जडवद्बालवद्विचरेत्स मुनिः आत्मारामः आत्मनि परब्रह्मणि रमणशीलो ज्ञेयः अनेनैव कथं विहरेदित्यस्यापि प्रतिवचनं ज्ञेयम् किञ्च मुमुक्षुचेष्टितात् वैपरीत्येन बुभुक्षुचेष्टितमप्युक्तं भवति ॥ १७ ॥

एवं जिज्ञासयाऽपोह्य नानात्वभ्रममात्मनि ।
उपारमेत विरजं मनो मय्यर्प्य सर्वगे ॥ २१ ॥
यद्यनीशो धारयितुं मनो ब्रह्मणि निश्चलम् ।
मयि सर्वाणि कर्माणि निरपेक्षः समाचर ॥ २२ ॥
श्रद्धालुर्मे कथाः शृण्वन् सुभद्रा लोकपावनीः ।
गायन्ननुस्मरन् कर्म जन्म चाभिनयन्मुहुः ॥ २३ ॥
मदर्थे धर्मकामार्थानाचरन्मदपाश्रयः ।
लभते निश्चलां भक्तिं मय्युद्धव ! सनातने ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एवं परब्रह्मणि निष्ठापर्यन्तं मुमुक्षुबोधितमुक्तवस्प्राप्ति भगवतोपदिष्टमिदानीं तदभावे वेदधारणश्रमो निरर्थक एवेत्याह । शब्दब्रह्मणीति । परे परब्रह्मणि न निष्णायात् तद्ध्यानं न कुर्यात् तस्य शब्दब्रह्मधारणाश्रमः श्रमफलः श्रम एव केवलं फलं यस्य सः अधेनुं यथानर्हं रक्षतः रक्षा यथा श्रमैकफला तद्वत् ॥ १८ ॥

दुह्यते इति दोहः पयः दुग्धो दोहो यस्यास्तां स्वीकरणानन्तरं पयो नष्टामतिवृद्धाम् असतीर्शीकृतमपात्रे दत्तं पात्रे च न दत्तं तदुक्तं महाभारते—

न्यायागतस्य वित्तस्य बोद्धव्यौ द्वौ व्यतिक्रमौ ।
अपात्रे प्रतिपत्तिश्च पात्रे चाप्रतिपादनम् इति ॥

मया वेदार्थभूतेन हीनाम् अन्यार्थपरत्वेन गृहीतामित्यर्थः । हे अङ्ग ! दुःखदुःखी एव रक्षति दुःखानामपि दुःखं दुःखदुःखं तदस्यास्तीति स तथा ॥ १९ ॥

यस्यां गिरि अस्य चिदचिदात्मकस्य प्रपञ्चस्य स्थित्यादिरूपं पावनं सर्वपवित्रीकरणं मे कर्म लीलावतारेषु मद्धकेप्सितं जन्म वा न स्यात्तां धीरः मुमुक्षुर्न बिभृयात् ॥ २० ॥

भाषा टीका ।

ज्ञानी पुरुष न कुछ विशेष कार्य करै न कुछ कहै न कोई लौकिक भली बुरी बात की चिन्ता करै इस वृत्ति से रह कर आत्माराम मुनि होकर जडकी नाईं विचरा करै ॥ १७ ॥

केवल वेदादिक शब्द में निपुण होकर भी परब्रह्म के आराधन में यदि कुशल न होवै तो उसका पठन पाठनादिक सब श्रम ही मात्र है जैसे दूध की आशा से वांझ गऊ का सेवा करना है तैसे ॥ १८ ॥

जिस के फिर दूध नहीं होनेवाला है ऐसी गऊ दुष्ट भार्या पर के अधीन शरीर और कुपात्र पुत्र धर्मादि उपयोग रहित धन हे उद्धव जी ! मेरे संबंध विना वाणी इतनी वातों का संग्रह करने वाला सदा बडा दुःख पाता है ॥ १९ ॥

हे उद्धव जी ! जो धीर पुरुष है सो ऐसी वांझ वाणी की धारणा न करै जिस वाणीमें इस जगत् की उत्पत्तिस्थिति प्रलयरूपी पवित्र लीला न होवे और हमारे जन्म चरित्र तथा लीला अवतारादि चरित्र न होवैं वही वाणी केवल वांझ है ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

उक्तम् ज्ञानमार्गमुपसंहरति । एवम् निश्चित्य विचारेणाऽऽत्मनि नानात्वभ्रमं देहाद्यध्यासं निरस्य निर्मलं मनो मयि सर्वगे परिपूर्णे समर्प्य संधार्य उपारमेत न शास्त्रपाण्डित्यमात्रेणेत्यर्थः ॥ २१ ॥

यद्यनीशोऽशक्तस्तर्हीत्थमिदं मद्भक्त्यैव कृतार्थो भविष्यसीत्याह । मयीति ॥ २२ ॥

मदर्पणेन कर्मणा विशुद्धसत्त्वस्यान्तरङ्गां भक्तिमाह । श्रद्धालुरिति द्वाभ्याम् । अभिनयन्स्वयमनुकुर्वन् ॥ २३ ॥

आचरन् सेवमानः ॥ २४ ॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

ज्ञानमार्गं भक्तिसहितं तामन्तरा तदनिष्पत्तेः विचारेण बद्धो मुक्त इति व्याख्या गुणतो मे न वस्तुत इत्यादिपूर्वोक्तप्रकारेण देहाद्यध्यासं ब्राह्मणोऽहमित्यन्तर्धर्माध्यासः अयं पुत्र एषाहमिति बाह्यधर्माध्यासः आदिना गृह्यते तमध्यासं निरस्य त्यक्त्वा तत्कथार्थं मल्लीलादिश्रवणेन धारयित्वा उपारमेत साधनप्रयासाद्विरमेत् नतु शास्त्रपाण्डित्यमात्रेणात्मश्लाघी भवेदित्यर्थः ॥ २१ ॥

इदं ज्ञानमिश्रभक्त्यनुष्ठानमशक्तो मद्भक्त्यैवेत्येवकारेण ज्ञानसाङ्कर्यव्युदासः कृतार्थ इति ज्ञानस्यानुषङ्गसिद्धत्वादित्यर्थः ॥२२॥

अन्तरङ्गां ज्ञानकर्माद्यनावृतां शुद्धामित्यर्थः । श्रद्धालुरिति युग्मकं स्वयमनुकुर्वन्निति जन्मकर्मलीलयोर्मध्ये ये ह्यंशा निजानुगमनीयभावसिद्धभक्तगतास्तान् स्वयमनुकुर्वन् भगवद्गतांस्तु अन्यद्वारानुकुर्वन्नित्यर्थः । धर्मो गोदानादिर्वक्ष्यमाणस्तमपि मदर्थे मदीयजन्मादिमहोत्सवाङ्गत्वेनाचरन् कामो महाप्रमादसेवननिवासादि-

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी ।

लक्षणस्तमपि मदीयसेवार्थमन्मन्दिरवासादिलक्षणत्वेनैव यश्चार्थो धनसङ्ग्रहस्तमपि मदर्थं मत्सेवोपयोगित्वेनैवाचरन् सेवमानः तामेव कथाश्रवणादिलक्षणां निश्चलां सर्वदाव्यवच्छिन्नामव्यभिचारिणीं लभते तत्सुखेन कैवल्यादेरप्यनादरात् नच भजनीयस्य चञ्चलता तस्याश्चलता शङ्क्या यतः सनातने ॥ २३ ॥ २४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

एवमिति । नानात्वभ्रमं देहादात्मानं विविच्य परमात्मनि च भक्तिं कृत्वा लौकिके कर्मण्युपरमेदित्यर्थः मदर्थं इति काम शब्दः शास्त्राविरुद्धकामपरः ॥ २४—२७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

प्रश्नस्योत्तरमुपसंहरन् विधेयं विदधाति । एवमिति । एवमित्थं जिज्ञासया विचारेण जीवात्मनि नानात्वभ्रमं देवमनुष्यादिनानात्वभ्रममपोह्य देहाज्जीवात्मानं विविच्येत्यर्थः । कृत्स्नचिदचिदात्मनि मयि विरजं विगतरजोगुणमाहारादिभिः सात्त्विकैः सत्त्वैकप्रचुरं मनोऽर्प्य निधाय मयि भक्तिं कुर्वित्यर्थः । लौकिककर्मणः उपरमेदित्यर्थः ॥ २१ ॥

नैर्मल्यमेव मनसः सम्पादयितुं दुःशकं कुतस्तत्रापि भक्तिरित्यस्याभिप्रायमालक्ष्य भक्तियोगोत्पादकानुपायानुपदिशति यदीति । मयि ब्रह्मणि निश्चलं यथा तथा मनो धारयितुं यद्यशक्तः असमर्थस्तर्हि सर्वाणि वर्णाश्रमोचितानि कर्माणि निरपेक्षः सर्वान्तरात्मप्रयोजककर्तृभूतपरमात्मप्रवर्तितदेहेन्द्रियकर्तृकाणि नतु मत्कर्तृकाणीत्यध्यवसायेन तत्फलापेक्षारहितः समाचर कुरु ॥ २२ ॥

किञ्च श्रद्धालुरिति । सुभद्रा जगन्मङ्गलावहाः शृण्वतो वदश्च लोकस्य पावनकरीर्मम कथाः शृण्वन् गायंश्च जन्म श्रीरामकृष्णादिजन्मानुस्मरन् कर्म चेष्टितमभिनयन् स्वयमनुकुर्वन् ॥ २३ ॥

मदर्थं धर्मकामार्थानाचरन् सेवमानः धर्मस्य चेश्वराराधनार्थता नाम तत्प्रीणनद्वारा अपवर्गार्थता कामानां तदर्थत्वं तदुपभुक्तस्रगन्धवासोऽलङ्कारचर्वणोच्छिष्टभोजनत्वादिरूपमर्थानां तदाराधनोपयोगित्वं मदुपाश्रयः मामाश्रित इत्याश्रयः माश्रियतेऽनेनेत्या श्रय इति च अत्रुमेयोपाश्रयोः यस्य सः ईश्वर एव प्राप्यः प्रापकश्चेत्यध्यवसायीत्यर्थः । एवं भूतश्चेत्सनातने सर्वकारणे मयि हे उद्धव ! निश्चलां भक्तिं लभते ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

उपसंहरति । एवमिति । वस्त्वयथार्थज्ञानं नानात्वभ्रममेवं तत्त्वजिज्ञासयापोह्य निरस्य उपारमेत प्रवृत्तिमार्गादिति शेषः नानात्वभ्रमो भेदभ्रम इति मतम्—

जीवस्येशत्वविज्ञानं जीवानामेकता तथा ।
ईशस्य बहुताज्ञानमीशस्यानीशता तथा ॥
जगतोऽसत्यताज्ञानं नानात्वभ्रम उच्यते ।
इत्यनेन विरुद्धत्वान्न ग्राह्यं च बुभूषुभिः ॥

इति ॥ २१ ॥

नन्वस्तु जीवन्मुक्तस्य समर्थस्य हरौ निरन्तरं मनो निधायोपाधिसहितरस्य मुमुक्षोरुपासनोपायः कथमिति तत्राह । यदीति । कृतानि मयि समर्प्य कुर्वाणानि मद्विषयत्वेन समाचर ॥ २२ ॥

निष्कामत्वेन मामुद्दिश्य कर्म कुर्वाणस्येत्थं भावमाह । श्रद्धालुरिति ॥ २३ ॥

मत्कथाश्रवणादिना किं फलं स्यादित्यत उक्तं लभत इति । निरन्तरस्मृतिफलां भक्तिं लभते ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तदेवं भक्त्यैव ज्ञानं सिद्ध्यतीत्युक्तं तं च ज्ञानमार्गमुपसंहरति । एवमिति । जिज्ञासया बद्धो मुक्त इति व्याख्या गुणतो मे न वस्तुत इत्यादिपूर्वोक्तप्रकारकविचारेण आत्मनि शुद्धजीवे नानात्वं देवत्वमनुष्यत्वादिभेदमपोह्य एवं मल्लीलादिश्रवणेन मनो मयि ब्रह्माकारे सर्वगे अर्प्य धारयित्वा उपारमेत् ॥ २१ ॥

तदेवं ज्ञानमिश्रां भक्तिमुपदिश्य तदनादरेणानुषङ्गिकासिद्धज्ञानगुणां शुद्धामेव भक्तिमुपदिशति चतुर्भिः । यदीति । निश्चये टीकायां यस्ते पदं त्वमविता यति विघ्नमूर्ध्नीत्यादिवत् अत्र खलु ज्ञानेच्छुरेव प्राकृतः श्रीमदुद्धवं प्रति च तादृशत्वमारोप्यैवेदमुच्यते ततश्च श्रेयःसृतिं भक्तिमुदस्य ते इत्यादिप्रमाणेन भक्तिं विना केवलज्ञानमार्गेण ब्रह्मणि मनो धारयितुं निश्चितमेवानीशो भवति नतोऽपि स्वतो ज्ञानादिसर्वगुणसेवितं भक्तिमार्गमेवाश्रयेति तत्सोपानमुपदिशति । यदीत्यादिना अथवा प्राक्तनभक्तिबलाभावात् ब्रह्मज्ञानेच्छुर्यदि तत्र मनो धारयितुमनीशः स्यात् तदाधुनाप्येवं कुर्विति योज्यं समाचर अपेय निरपेक्षः वाञ्छान्तररहितः किम्वा तदेवमपि यस्य लीलाकथायां श्रद्धा न स्यात् तस्य ब्रह्मधारणायामप्यशक्तिः स्यात् किमुत भगवद्धारणायामिति व्यञ्जयेन शुद्धभक्तावेव पर्यवसाययितुमाह । यद्यनीश इति ॥ २२ ॥

श्रद्धालुत्वे च सति शुद्धां भक्तिमाह । श्रद्धालुरिति युग्मकेन अभिनयन् जन्मकर्मलीलयोर्मध्ये येऽशां निजाभीष्टभावभक्तगतास्तान् स्वयमनुकुर्वन् भगवद्गतान् भक्तान्तरगतांश्च तानन्यैर्द्वारानुकुर्वन्नित्यर्थः ॥ २३ ॥

किञ्च यो धर्मो गोदानादिलक्षणस्तमपि मदर्थं मदीयजन्मादिमहोत्सवाङ्गत्वेनैव यश्च कामो महाप्रासादवासादिलक्षणस्तमपि मदर्थं मदीयसेवार्थमन्मन्दिरवासादिलक्षणत्वेनैव यश्चार्थो धनसङ्ग्रहस्तमपि मदर्थं मत्सेवामात्रोपयोगित्वेनैवाचरन् सेवमानः मदपाश्रयः आश्रयान्तरशून्यचेताश्च सन् तामेव कथाश्रवणादिलक्षणां भक्तिं मयि निश्चलां सर्व-

सत्संगलब्धया भक्त्या मयि मां स उपासिता ।
स वै मे दर्शितं सद्भिरञ्जसा विन्दते पदम् ॥२५॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

दाप्यव्यभिचारिणीं लभते तत्सुखेन कैवल्यादावप्यनादरात् नच भजनीयस्य चलतया वा सा चलिष्यतीति मन्तव्यमित्याह । सनातन इति ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

ज्ञानमार्गमुपसंहरति । एवं जिज्ञासया उक्तलक्षणप्रकारेण विचारेण आत्मनि स्वस्मिन् नानात्वभ्रमं देहद्वयाभिमानलक्षणं देवत्वमनुष्यत्वादिभेदमपोह्य निरस्य उक्तलक्षणया भक्त्या च मयि विरजं विपक्कमायाकषायं मनः समर्प्य भक्त्युत्थेन ज्ञानेन उपारमेत तत्सायुज्यं प्राप्नुयात् तथाचोक्तम्

> भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः ।
> ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् ॥

इति ॥ २१ ॥

एवं च मदर्पितनिष्कामकर्मणैवान्तःकरणशुद्धिरन्तःकरणशुद्ध्यधीनमेव भक्तिसहितं ज्ञानं तेन च ब्रह्मणि निश्चलमनोधारणा ततो ब्रह्मभूतः प्रसन्नात्मेत्यादिमदुक्तेर्विरामसमये विद्यालीनाया मद्भक्तेः प्राप्तिकृतया च विपक्कषायस्य मनसो मयि सम्यक् निदिध्यासनं ततो भक्त्युत्थेन शुद्धज्ञानेन सायुज्यमिति क्रमस्तत्र कश्चिद्यदि निश्चलमनोधारणात्मिकां चतुर्थीं भूमिकामध्यारोढुं न शक्नुयात्तदा स्वान्तःकरणस्य सम्यक् शुद्धभावमनुमाय तच्छुद्ध्यर्थं पुनरपि मदर्पितनिष्कामकर्माण्येव कुर्यादित्युद्धवं लक्ष्यीकृत्याह । यद्यनीश इति । सर्वाणि नित्यनैमित्तिकानिवृत्तकर्माणि ॥ २२ ॥

तदेवं सार्द्धैश्चतुर्भिर्ज्ञानयोगमुक्त्वा भक्तियोगमाह । श्रद्धालुरित्यादिना मया स्या ह्यकुतोभय इत्यन्तेन अत्र शीलार्थेकेनालुच्प्रत्ययेन भक्तानैसर्गिकश्रद्धावन्तो ज्ञानिप्रभृतयो व्यावृत्ताः प्रथमत एव श्रद्धालुरिति पदोपन्यासो भक्ताविहश्रद्धवानेवाधिकारीति ज्ञापयति यदुक्तं "यदृच्छया मत्कथादौ जातश्रद्धस्तु यः पुमान् । ननिर्विण्णोनाति सक्तो भक्तियोगोऽस्य सिद्धिद इति । तावत्कर्माणि कुर्वीत न निर्विद्येत यावता मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायते" इति । ज्ञानकर्माधिकारिभ्योऽस्य भेदश्च सुभद्राः इत्यिपयःपरस्त्रीचौर्य्यवेणुगानरासाद्या गायन्ननुस्मरंश्चेति ज्ञानस्य पौनःपुन्यं स्वत एव भवेदिति भावः । कर्म कालियदमनादिकं जन्म नन्दोत्सवादिकं नाटकादिरीत्या अभिनयन् चकारात् गायन्ननुस्मरंश्च ॥ २३ ॥

मदर्थे मत्सेवार्थं मज्जन्मयात्रा दिवसे मन्त्ररूपश्रीगुरुदेवाराधनदिवसे च धर्मा ब्राह्मणवैष्णवसम्प्रदानकान्नवस्त्रादिदानानि कामा वैष्णवसमाजभाजनमधुरमहान्नपानादिसजलसक्चन्दनताम्बूलोपभोगवसनपरिधानाद्याः अर्थो विष्णुवैष्णवसेवार्थद्रव्याहरणानि आचरन् कुर्वन् निश्चलां साधनसाध्यदशयोः स्थिरां नैष्ठिकीं सनातने इति तदाराध्यस्य मद्विग्रहस्य सनातनत्वात्तद्भक्तिरपि सनातनी निश्चलैवेति भावः ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

आत्मनि अनादिकालतः प्रवृत्तं नानात्वभ्रमं ब्रह्मात्मकत्वज्ञानाभावेन प्रत्येकं स्वतन्त्रसत्ताकत्वं भ्रान्तिः देहेन्द्रियादिलक्षणात्मज्ञानाभावेन देह एवात्मेत्यभिमानेन वाक्ययुवादिनानात्वभ्रान्तिश्च एवं जिज्ञासया अपोह्य विरजं भावितं मनः सर्वगे मयि अर्प्य वेदनोपासनध्यानापरपर्य्यायां भक्तिं प्राप्य कर्मादिरूपाद्बहुसाधनायासात् उपरमेत् ॥ २१ ॥

ब्रह्मणि मयि यदि मनो धारयितुमनीशः तर्हि कर्मफले निरपेक्षः सर्वाणि मनः शोधकानि कर्माणि समाचर ॥२२॥

विशेषतो मे कथाः शृण्वन् गायन् मे जन्म कर्म च अनुस्मरन् अभिनयन् स्वयमनुकुर्वन् ॥ २३ ॥

किं बहुना धर्मकामार्थान् त्रिवर्गमपि मदर्थं आचरन् वेदनोपासनध्यानाद्यपरपर्य्यायां भक्तिं लभते ॥ २४ ॥

भाषा टीका ।

इस प्रकार के विचार से आत्मा में जो नाना प्रकार के भ्रम हैं तिनको दूर करके निर्मल मनको सर्व व्यापक हमारे विषय अर्पण करके संसार से निवृत्त होजावै ॥ २१ ॥

यदि मनको निश्चल करके ब्रह्म के विषय धारण न कर सके तब तो वर्णाश्रम विहित सब कर्मों को मेरे में अर्पण करके निरपेक्ष होकर आचरण करै ॥ २२ ॥

सुन्दर कल्याण देने वाली लोकों को पवित्र करने वाली हमारी कथा ओं को श्रद्धालु होकर सुना करै हमारे जन्म कर्म का गाता हुआ स्मरण करता हुआ वारम्बार अभिनन्दन करता रहै॥२३॥

मेरे आश्रय होकर मेरे लिये धर्म अर्थ काम इनको करता हुआ पुरुष हे उद्धव ! सनातन मेरे विषय में निश्चल भक्ति को प्राप्त होता है ॥ २४ ॥

श्रीमद्गिरिधरस्वामिकृतभावार्थदीपिका ।

ततश्चानेन प्रकारेण मयि सत्सङ्गेन लब्धया भक्त्या स भक्तो मामुपासिता ध्याता भवति स च ध्यानशीलः सद्भिर्दर्शितं वै निश्चितं सुखेनैव मे पदं स्वरूपं प्राप्नोति ॥ २५ ॥

उद्धव उवाच

❀ साधुस्तवोत्तमश्लोक ! मतः कीदृग्विधः प्रभो ! ।
भक्तिस्त्वय्युपयुज्येत कीदृशी सद्भिरादृता ॥ २६ ॥
एतन्मे पुरुषाध्यक्ष ! लोकाध्यक्ष ! जगत्प्रभो ! ।
प्रणतायाऽनुरक्ताय प्रपन्नाय च कथ्यताम् ॥ २७ ॥
त्वं ब्रह्म परमं व्योम पुरुषः प्रकृतेः परः ।
अवतीर्णोऽसि भगवन् ! स्वेच्छोपात्तपृथग्वपुः ॥ २८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सत्सङ्गलब्धया भक्त्येत्युक्तं तत्र सतां भक्तेश्च विशेषं पृच्छति । साधुरिति । साधवः स्वस्वमतिकल्पिताः सन्ति बहवस्तव तु कीदृशः संमतः भक्तिरपि बहुविधा लोके कीदृशी पुनस्त्वय्युपयुज्येत सद्भिश्च नारदादिभिरादृता ॥ २६ ॥

एतच्च कथ्यताम् इदं चाति गुह्यं त्वयैव वक्तव्यमित्यैश्वर्यमाविष्कुर्वन्नाह हे पुरुषाध्यक्षेत्यादिना ब्रह्मादिनियन्तः ॥ २७ ॥

अत्र हेतुः त्वमिति । व्योमवदसंगः यतः प्रकृतेः परः स्वेषां भक्तानामिच्छयोपात्तं पृथक्परिमितं वपुर्येन सः ॥ २८ ॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

ततश्च भक्तेर्नैश्चल्यानन्तरम् अनेन कथाश्रवणादिरूपेण प्रकारेण ध्याताऽनवरतस्फूर्त्तिमान् ॥ २५ ॥

विशेषं विशिष्टं लक्षणम् उपयुज्येत इव आधिक्येन युज्येत नारदादिभिरादृता इति भक्तेस्तत्त्वं त एव जानन्ति तेषां च माहात्म्यं भवानेवेति भेदेन पृष्टम् ॥ २६ ॥

एतच्च सद्भक्त्योर्विशिष्टलक्षणं च लोको वैकुण्ठः जगच्चानन्तब्रह्माण्डात्मकं प्रणताय भक्ताय अनुरक्ताय स्निग्धाय प्रपन्नाय स्वैकशरणाय ॥ २७ ॥

अत्र पुरुषाध्यक्षत्वादौ यतो हेतोः प्रकृतेः परः प्रकृतेः परत्वादेवासङ्गत्वमित्यर्थः । स्वेषां भक्तानाम् उपात्तं जगति प्रकटीकृतं परिमितं स्वाभाविकाचिन्त्यशक्त्या विभुत्वेऽपि परिच्छिन्नम् ॥ २८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

व्योमशब्दो व्योमवन्निर्मलत्वपरः बलभद्रकृष्णप्रद्युम्नादिरूपेण पृथक्त्वम् ॥ २८—३० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

उक्तसर्वोपायनिदानभूतं सत्सङ्गात्मकं कारणान्तरं वदन् इत्थमुपायैरुपकृतस्य भक्तियोगस्य साक्षात्स्वपरप्राप्त्युपायत्वमाह । सत्संगलब्धयेति । सतां साधूनां सङ्गेन लब्धया मयि भक्त्या मां मामेव यो निषेवते स मे मम स्थानमञ्जसा सुखेन विन्दते लभते सद्भिर्दर्शितं वै इत्थं निश्चितं त्वित्यर्थः ॥ २५ ॥

सत्सङ्गलब्धया भक्त्येत्युक्तं तत्र सतां भक्तेश्च विशेषं पृच्छति । साधुरिति । हे प्रभो! साधुः कीदृग्विधस्ते तव मतः अभिमतः सद्भिरादृता आदरपूर्वमनुष्ठिता भक्तिः कीदृशी त्वय्युपयुज्येत साधवः स्वमतिपरिकल्पिताः सन्ति बहवः तव तु कीदृशः सम्मतः तथा भक्तिरपि बहुविधा लोके कीदृशी पुनस्त्वय्युपयुज्येत सद्भिश्च नारदादिभिरादृता ॥ २६ ॥

एतत्तु प्रपन्नाय मे मह्यं कथ्यताम् इदं चातिगुह्यं दुर्विज्ञेयं च त्वयैव वक्तव्यमित्यभिप्रायेण सम्बोधयन् विशिनष्टि । हे पुरुषाध्यक्ष ! त्वं ब्रह्मेत्यादिना पुरुषग्रहणं प्रधानस्याप्युपलक्षणं प्रधानपुरुषयोर्नियन्तरित्यर्थः । अनेन यत्किंचिज्ज्ञानं कर्म च त्वदायत्तमेवेति कार्त्स्न्येन ज्ञानकर्ममार्गौ त्वयैव ज्ञायेते न त्वदन्यः कश्चिदुपदेष्टा विद्यत इति भावः ॥ २७ ॥

पुरुषाध्यक्षत्वोपयोगिसार्वज्ञ्यसर्वशक्त्यादिकल्याणगुणानुगुणं बृहत्त्वमाह । त्वं ब्रह्मेति न केवलमुक्तविधः किन्तु निरस्तनिखिलदोषोऽपीत्याह । परमव्योम व्योमवन्निर्मलत्वपरो व्योमशब्दः परमशब्दो मलप्रतिभटत्वपरः निर्मलस्वरूप इत्यर्थः । पुरुषाध्यक्षत्वस्य भेदगर्भत्वाज्जीवेश्वरयोरभेदव्युदासाय विशिनष्टि पुरुषः प्रकृतेः पर इति । प्रकृतिशब्दोऽत्र भूमिरापोऽनलो वायुरपरेयमितस्त्वन्यामिति श्लोकद्वयोक्तचिदचिदात्मकप्रकृतिद्वयपरः परशब्देनान्यत्वमुत्कृष्टत्वं च तन्त्रेण विवक्षितं परित्राणाय साधूनामवतीर्णस्य तवैतत्कथनमुचितमित्याशयेनाह । अवतीर्णोऽसीति । हे भगवन्! स्वेच्छया उपात्तानि परिगृहीतानि पृथङ्नानाविधानि वपूंषि श्रीरामप्रद्युम्नानिरुद्धादिरूपाणि येन तथा भूतो ऽवतीर्णोऽसि स्वेच्छापदेन वपुषां कर्मनिमित्तत्वव्युदासः ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सापि सत्सङ्गलब्धा चेत् भगवदपरोक्षज्ञानमुत्पद्यते न स्वयोग्यमुक्तिमपि जनयतीत्याह । सत्सङ्गेति । पदं वैकुण्ठादिस्थानम् ॥ २५ ॥

सद्भिरिति प्रस्तुतसल्लक्षणज्ञोऽप्युद्धवो लोकोपकाराय तल्लक्षणं पृच्छति । साधुस्त्व इति । साधुत्वासाधुत्वयोर्मनः शुद्ध्यशु-

---

* साधुस्त्व उत्तमश्लोक ! मनः कीदृग्विधं ! प्रभो !   भक्तिस्त्वय्युपयुञ्जीत कीदृशी सद्भिरादृता ॥२६॥ इति विजयध्वजपाठः ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

छिन्निमित्तत्वात्साधुत्वे वर्तमानानां पुंसां मनः कीदृग्विधं भवति साधवः किंलक्षणा इत्यर्थः । कीदृशी किंलक्षणा भक्तिस्त्वय्युपयुज्येत त्वत्कुत्तमप्रसादयोगजननी सद्भिरादृता सम्भाविता "आदृतौ सादरार्चिता"वित्यमरः ॥ २६ ॥

एतत्सङ्क्षयोर्लक्षणम् ॥ २७ ॥

स्पष्टार्थस्य दुरवबोधत्वाद्दुष्परिहर इति नेत्याह । त्वम्ब्रह्मेति । स्वेच्छयोपात्तं स्वीकृतं पृथग्वपुः शोभनाकारं वासुदेवादिशरीरं येन सः स्वेच्छोपात्तपृथग्वपुः शुभाकारे तनौ वपुरिति यादवः—

नित्यानन्दशरीरोऽपि वसुदेवादिदेहगः ॥
प्रदर्शयज्जनि स्वस्य नित्यं देहादिवर्जितः ।
वसुदेवादिदेहेषु प्रवेशास्तस्य भण्यते ॥
देहोपादाननिमित्त तु नह्यन्यो देह इष्यते ।
अन्याभिमतदेहेषु प्रविष्टः सर्वदा हरिः ॥
नान्यानभिमतो देहो विष्णोरस्ति कदाचन ।
अतोऽशरीरो भगवान् पुत्रताभिमतिस्तु या ॥
वसुदेवादिकानां तु सैव मिथ्या मतिर्भवेत् ।
अन्याहंभावयुग्देह एवासौ हरिराश्रितः ॥
न तदन्येषु देहेषु कचित्तस्य प्रवेशनम् ।
मम पुत्रस्त्वयमिति भ्रामणाय यदा हरेः ॥
वसुदेवादिदेहेषु तनूप्राप्तिस्तु सा गतिः ।
अनुपात्तशरीरस्य तनूप्राप्तिरितीष्यते ॥

तद्देहं पितृदेहत्वे उपात्ते मतो हरेरिति एतदाकिल्यर्थे मानम्॥२८॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

नन्वेवं भूतभक्तिमार्गे प्रवृत्तिर्निष्ठा वा कथं स्यादित्याशङ्क्य तत्र हेतुमाह । सत्सङ्गेति । भक्त्या भक्तिरुच्या स भक्तो मामुपासिता भजमानो भवति ॥ २५ ॥

उत्तमाधिकारेण युज्येत सैव सद्भिरादृता साधूनां स्वभक्तानां माहात्म्यं त्वमेव सुष्ठु जानासि भक्तेस्तत्त्वन्तु ते साधव एवेति भेदेन पृष्टम् ॥ २६ ॥

हे पुरुषाध्यक्ष ! महत्स्रष्ट्राद्यवतारिन् लोको वैकुण्ठः जगच्चानन्तब्रह्माण्डात्मकं प्रणताय भक्ताय अनुरक्ताय स्निग्धाय प्रपन्नाय स्वैकशरणाय ॥ २७ ॥

साक्षाद्भगवानेव त्वमवतीर्णोऽसि भगवत एव वैभवमाह । ब्रह्म त्वं परमव्योमाख्यो वैकुण्ठस्त्वं प्रकृतेः परः पुरुषोऽपि त्वमिति । भगवानपि कथं भूतः सन्नवतीर्णः स्वेच्छामयस्वेच्छानुसारेण स्वेषां सर्वेषामेव भक्तानामिच्छायै तां पूरयितुमुपात्तानि तत्तत आकृष्टानि पृथग्वपूंषि निजतत्तदाविर्भावा येन तथाभूतः सन्निति तं प्रति यथाह जाम्बवान् यस्येषदुत्कलितरोषकटाक्षमोक्षैरित्यादि तथा च देवाः केतुस्त्रिविक्रमयुत इत्यादि यथा च ब्रह्मा नारायणस्त्वमित्यादौ नारायणोऽङ्गमिति यथा च देवाः स्यान्नस्तवाङ्घ्रिरित्यादि अत एवाक्रूरः अद्भुतानीहेत्यादि अत एव गोविन्दभुजगुप्तायामित्यादि ॥ २८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

एवं भूतायां भक्तौ कः प्रवर्तक इत्यपेक्षायामाह । सत्संगेति । भक्त्या उक्तलक्षणया नैष्ठिकया उपासिता भजमानो भवति ततश्च सद्भिरेव दर्शितं पदं मच्चरणं मद्धाम वा अञ्जसा शीघ्रं रुच्यासक्तिरतिप्रेमभूमिकारूढः सन् विन्दते प्राप्नोति ॥ २५ ॥

भक्तिप्रादुर्भावकं साधुमेव श्रुत्वा तल्लक्षणं पृच्छति । साधुरिति । मतस्तव सम्मतः सद्भिरादृतापि भक्तिस्त्वयि कीदृगुपयुज्येत ॥ २६ ॥

पुरुषाणां महत्स्रष्ट्रादीनामध्यक्षेत्यपारमैश्वर्यं लोकस्य महावैकुण्ठलोकस्याध्यक्षेत्यपारा संपत् तदपि जगत्यस्मिन्मायिकेऽपि लोकोद्धारणार्थं कृपया प्रकर्षेण भवसि प्रादुर्भवसीत्यपारं कारुण्यं चोक्तं प्रणताय मह्यं प्रणतत्वेऽप्यहं न जगज्जनवत् किं त्वनुरागीत्याह । अनुरक्ताय अनुरक्तत्वेऽपि नाहमर्जुनादिवद्देवान्तरोपासक इत्याह । प्रपन्नायेति ॥ २७ ॥

किञ्च त्वद्भक्तिप्रवर्तकः साधुस्त्वत्स्वरूपाद्भिन्नोऽपित्वत्स्वरूपभूत एवेत्याह । त्वमिति । व्योमवदसंगः यतः प्रकृतेः परः तदपि प्राकृतेऽस्मिन् लोके कृपया जीवोद्धारार्थमवतीर्णोऽसि कीदृशः स्वैर्भक्तैरिच्छयोपात्तानि गृहीतानि पृथग्भूतानि वपूंषि यतः सः स्वस्वरूपभूतानि वपूंष्येव त्वं स्वभक्तिप्रवर्तनार्थं भक्तेभ्यो ददासीत्यर्थः।यदुक्तं नारदेन प्रयुज्यमाने मयि तां शुद्धां भागवतीं तनुमिति अत एव त्वद्भक्तं गुरुं लोकास्त्वत्स्वरूपत्वेनैव ध्यायन्तीति भावः । यद्वा त्वमात्मारामत्वात् जगत्यस्मिन्नुदासीनोऽपि स्वभक्तिप्रचारणार्थमवतरस्येवेत्याह । त्वमिति । स्वेच्छया उपात्तानि पृथक् पृथग्वपूंषि श्रीकपिलदत्तात्रेयश्रीनारदाद्याकारा येन सः यदुक्तं बहुमूर्त्यैकमूर्तिकमिति ॥ २८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

स लब्धभक्तिः इत्थं सत्सङ्गलब्धया मयि भक्त्या मामुपासिता भवति स वै स एव सद्भिः "स तु तत्पदमाप्नोति यस्माद्भूयो न जायते निरञ्जनः परमं साम्यमुपैती"त्यादिभिर्वेदैर्दर्शितं मे पदं विन्दते लभते नान्यः ॥ २५ ॥

सत्सङ्गलब्धया भक्त्येति साधुसङ्गस्य भक्तिप्रापकत्वं भक्तेर्भगवत्पदप्रापकत्वं श्रुत्वा साधूनां भक्तेश्च विशेषं पृच्छति । साधुरिति ॥ २६ ॥

पुरुषाध्यक्ष ! ब्रह्मादिनियन्तः लोकाध्यक्ष ! सर्वलोकस्वामिन् जगत्प्रभो ! सर्वविश्वस्वामिन् ॥ २७ ॥

यतः हे भगवन् ! त्वं ब्रह्म बृहद्गुणशक्त्याद्याश्रयः परमव्योम सर्वचेतनाचेतनवासस्थानं प्रकृतेः परः पुरुषः कार्यकारणरूपप्रकृतिविलक्षणविग्रहवान् स्वेच्छोपात्तपृथग्वपुः स्वेच्छया स्वकीया ये प्रह्लादगजपतिवैरोचनिप्रभृतयस्तदिच्छया उपात्तानि गृहीतानि पृथक् नानाकाराणि वपूंषि येन सः अवतीर्णोऽसि ॥ २८ ॥

भाषा टीका ।

सत्संग से प्राप्त भई जो मेरे विषय में भक्ति तिस से वह मेरी उपासना करैगा तब तो सत्पुरुषों का दिखाया जो हमारा स्थान तिस को प्राप्त हो जावैगा ॥ २५ ॥

श्रीभगवानुवाच ।

कृपालुरकृतद्रोहस्तितिक्षुः सर्वदेहिनाम् ।
सत्यसारोऽनवद्यात्मा समः सर्वोपकारकः ॥ २९ ॥
कामैरहतधीर्दान्तः मृदुः शुचिरकिञ्चनः ।
अनीहो मितभुक् शान्तः स्थिरो मच्छरणो मुनिः ॥ ३० ॥
अप्रमत्तो गभीरात्मा धृतिमान् जितषड्गुणः ।
अमानी मानदः कल्पो मैत्रः कारुणिकः कविः ॥ ३१ ॥
आज्ञायैवं गुणान् दोषान् मयादिष्टानपि स्वकान् ।
धर्मान् संत्यज्य यः सर्वान् मां भजेत स सत्तमः ॥ ३२ ॥
ज्ञात्वाऽज्ञात्वाऽथ ये वै मां यावान् यश्चास्मि यादृशः ।
भजन्त्यनन्यभावेन ते मे भक्ततमा मताः ॥ ३३ ॥
मल्लिङ्गमद्भक्तजनदर्शनस्पर्शनार्चनम् ।
परिचर्या स्तुतिः प्रह्वगुणकर्मानुकीर्तनम् ॥ ३४ ॥
मत्कथाश्रवणे श्रद्धा मदनुध्यानमुद्धव ! ।
सर्वलाभोपहरणं दास्येनाऽऽत्मनिवेदनम् ॥ ३५ ॥
मज्जन्मकर्मकथनं मम पर्वानुमोदनम् ।
गीतताण्डववादित्रगोष्ठीभिर्मद्गृहोत्सवः ॥ ३६ ॥

भाषा टीका ।

उद्धव उवाच ।

हे प्रभो ! हे उत्तमश्लोक ! किस प्रकार का साधु आपको सम्मत है और सत्पुरुषों से आदृत कौनसी भक्ति है कि जिस का आप के विषे उपयोग होता है ॥ २६ ॥

हे पुरुषाध्यक्ष ! हे लोकाध्यक्ष ! हे जगत् प्रभो ! मैं आप का नम्र अनुरागी शरणागत भक्त हूं मेरे से इस बात को आप कहिये ॥ २७ ॥

आप ब्रह्म हो परमव्योम वैकुण्ठनाथ हो प्रकृति पुरुष दोनों से परे पुरुष हो हे भगवन् ! अपनी इच्छा से नाना प्रकार के रूपधारण करने वाले आप ने यह अवतार भक्त-हितार्थ लिया है ॥ २८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तत्र त्रिंशल्लक्षणैः साधुं निरूपयति । कृपालुरिति पञ्चभिः । कृपालुः परदुःखासहिष्णुः सर्वदेहिनां केषांचिदप्यकृतद्रोहः तितिक्षुः क्षमावान् सत्यं सारः स्थिरं बलं वा यस्य सः अनवद्यात्माऽसूयादिरहितः सुखदुःखयोः समो हर्षविषादरहितः यथाशक्ति सर्वेषामुपकारकः ॥ २९ ॥

कामैर्विषयैरक्षुभिताचित्तः दान्तः संयतबाह्येन्द्रियः मृदुरकठिनचित्तः शुचिः सदाचारः अकिञ्चनोऽपरिग्रहः अनीहो दृष्टक्रियाशून्यः मितभुक् लघ्वाहारः शान्तो नियतान्तःकरणः स्थिरः स्वधर्मे मच्छरणो मदेकाश्रयः मुनिर्मननशीलः ॥ ३० ॥

अप्रमत्तः सावधानः गभीरात्मा निर्विकारः धृतिमान्विपद्यप्यकृपणः जितषड्गुणः क्षुत्पिपासे शोकमोहौ जरामृत्यू षडूर्मयः एते जिता येन सः अमानी न मानाकाङ्क्षी अन्येभ्यो मानदः कल्पः परबोधने दक्षः मैत्रोऽवञ्चकः कारुणिकः करुणयैव प्रवर्तमानो न दृष्टलोभेन कविः सम्यक् ज्ञानी ॥ ३१ ॥

किञ्च मया वेदरूपेणादिष्टानपि स्वधर्मान् सन्त्यज्य यो मां भजेत सोऽप्येवं पूर्वोक्तवत्सत्तमः किमज्ञानान्नास्तिक्याद्वा न धर्माचरणे सत्त्वशुद्ध्यादीन् गुणान्विपक्षे नरकपातादीन् दोषांश्चाऽऽज्ञाय ज्ञात्वाऽपि मद्ध्यानविक्षेपकतया मद्भक्त्यैव सर्वं भविष्यतीति दृढनिश्चयेनैव धर्मान् सन्त्यज्य । यद्वा भक्तिदार्ढ्येन निवृत्ताधिकारतया सन्त्यज्य । अथवा । विद्धैकादश्युपवासकृष्णैकादश्युपवासनिषेधश्राद्धादयो ये भक्तिविरुद्धा धर्मास्तान् सन्त्यज्येत्यर्थः ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

किञ्च यावान् देशकालापरिच्छिन्नः यश्च सर्वात्मा यादृशः सच्चिदानन्दादिरूपः तं मां ज्ञात्वा अज्ञात्वाऽपि यद्वा विशेषतः पुनः पुनर्ज्ञात्वा एकान्तभावेन ये भजन्तीति ॥ ३३ ॥

साधुलक्षणमुक्तं भक्तेर्लक्षणमाह । मल्लिङ्गेत्यष्टभिः लिङ्गानि प्रतिमादीनि ॥ ३४ ॥

सर्वलाभोपहरणं सर्वस्य लब्धस्य समर्पणम् ॥ ३५ ॥

पर्वाणि जन्माष्टम्यादीनि तदनुमोदनम् ॥ ३६ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी ।

तत्र साधुभक्त्योर्मध्ये पञ्चभिरिति तत्रापि श्लोकत्रयेणादौ मिश्रभक्तिमन्तं साधुं निरूपयति ॥ २९ ॥

कामैर्विषयैः । दृष्टादृष्टक्रियाशून्यः दृष्टा क्रिया दृष्टफलिका लौकिकी अदृष्टा चाऽदृष्टफलिका वैदिकी अग्निहोत्रादिलक्षणा ताभ्यां शून्य इत्यर्थः । स्वधर्मे भगवदर्पिते निष्कामे वर्णाश्रमलक्षणे स्थिर इति व्याख्येयम् अनीहत्वेनोक्तत्वात् । आत्मस्मृतौ सावधानः ॥ ३० ॥

निर्विकारः निष्कामत्वेन हर्षशोकादिविकारशून्यः दृष्टलोभेन भोजनादिलोभेन । सम्यक् ज्ञानी भक्तिबलेनात्मसाक्षात्कारसमर्थः । इति कर्मज्ञानमिश्रावरसाधुनिरूपणं स्वधर्मे स्थिरत्वात् सम्यग् ज्ञानित्वाच्च ॥ ३१ ॥

किञ्च । मध्यमं शुद्धभक्तिमन्तं साधुं निरूपयतीत्यर्थः । सोऽपि कृपालुत्वादिगुणशून्योऽपि । पूर्वोक्तवत् कृपालुत्वादिगुणविशिष्टमिश्रभक्तवत् । सत्तमः कर्मज्ञानाद्यनावरणेन शुद्धभक्तिमात्रनिष्ठत्वात् । तथाच यस्तु कृपालुत्वादिगुणान् लब्ध्वा धर्मज्ञानपरित्यागेन केवलं मां भजति स तु परमसत्तम इति भावः । विपक्षे धर्मोऽनाचरणे । दोषान् धर्मत्यागजन्यान् मनोमालिन्यादीन् "नाचरेद्यस्तु वेदोक्तं स्वयमज्ञोऽजितेन्द्रिय" इत्यादेः । धर्मानुष्ठानस्य ध्यानविक्षेपकत्वात् । सर्वे धर्मसाध्याः सत्त्वशुद्ध्यादिगुणाः । पूर्वोक्ते भक्तस्य निश्चय एव धर्मत्यागे हेतुर्ननु तत्र मानमित्यत्रारसायद्वेति भक्तिदार्ढ्येन भक्तौ विश्वासेन निवृत्ताधिकारत्वात् । तदुक्तं भगवता । "तावत्कर्माणि कुर्वीत न निर्विद्येत यावता । मत्कथाश्रवणादौ वा यावच्छ्रद्धा न जायते" इति तथाच तत्त्यागे मानमुक्तम् । वैष्णवस्य स्मार्तधर्मानुष्ठानमयुक्तमिति बोधयितुं पुनरथवेति विद्धैकादश्युपवासः स्मार्तमते विद्धाप्यविद्धा विशेषा परतो द्वादशी न चेदित्यादेः तथा कृष्णैकादश्यामनुपवासोऽपि तन्मत एव "सङ्क्रान्तौ रविवारे च कृष्णपक्षदिने तथा । एकादश्यां न कुर्वन्ति उपवासं न पारणम्" इत्यादेः । सङ्क्रान्तावुपवासेन याचनेन युधिष्ठिर ! । एकादश्याञ्च कृष्णायां ज्येष्ठः पुत्रो विनश्यती"त्यादेश्चावैष्णवविषयत्वात् तथाऽनिषेधेन मांसादिना श्राद्धम् आदिना तिर्यक्पुण्ड्रादिपरिग्रहः धर्मशब्दस्य सङ्कुचितवृत्त्यभ्युपगमादित्यर्थ इत्युक्तम् ॥ ३२ ॥

किञ्चेति शुद्धदास्यादिभावेन भजन्ननन्यस्तु सर्वोत्तम इत्याहेत्यर्थः । ज्ञात्वेति ऐश्वर्येण दास्यभावो विवक्षितः अज्ञात्वेत्यनेन तु केवलमाधुर्येण श्रीव्रजेन्द्रनन्दनत्वाद्यास्वादनो भावोऽभिप्रेतः भक्तिशास्त्रविश्वासेन साधकस्य ज्ञानवैशिष्ट्येनैकान्तित्वमुपपद्यतेत्यभिप्रायेण तु यद्वेति । तथाच वैधी भक्तिरेव साधकावस्थायां प्रचुरेति व्यञ्जितम् रागस्य दौर्लभ्यादिति ज्ञेयम् । किञ्च भक्तपदनिर्देशात् भक्तेः स्वरूपाधिक्यं भावभक्त्यैव विवक्षितं तमपनिर्देशेन च सर्वोत्तमत्वं मे मता इत्यनेन तत्रैव स्वसम्मतवैशिष्ट्यम् अत एव प्रकरणप्राप्तमेकवचनं हित्वा ये ते इति गौरवेण बहुवचनं निर्दिष्टम् एवञ्च तद्भावसिद्धप्रेमसु तु परमवैशिष्ट्यं कैमुत्येनाभिप्रेतमिति च ज्ञेयम् ॥ ३३ ॥

प्रतिमादीनीत्यादिना मन्दिरपूजादिग्रहः तेषामपि गौणलिङ्गत्वात् मल्लिङ्गमद्भक्तेत्यत्र षष्ठ्या लुक् छान्दसः उत्तरार्द्धेऽप्यन्वयात् प्रह्वत्वं नमस्कारः भावप्रधानोऽयं निर्देशः ॥ ३४ ॥

लाभेत्यत्र कर्मणि प्रत्ययः । दास्येनेति वैधभक्तौ दास्यस्य प्राधान्यात् । उपलक्षणं चैतद्भावान्तरेणाप्यात्मनिवेदनस्य आत्मार्पितोऽत्र भवतोऽत्र विभो ! विधेहीत्याद्युक्तेः ॥ ३५ ॥

अनुमोदनमभिनयेन श्लाघनम् ॥ ३६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

जिताः षड्गुणाः क्षुत्पिपासे शोकमोहौ जरामृत्यू षडूर्मयो येन सः ॥ ३१ ॥

धर्मान् कामान् ॥ ३२ ॥

यः यत्स्वरूपः यादृशः यत्स्वभावः यावान् यद्विभूतिकः ॥ ३३ ॥

मल्लिङ्गम् अर्चारूपं प्रह्वशब्दः प्रणामपरः ॥ ३४—३६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तावत्साधुरेवं विधो मम मत इत्याह । कृपालुरिति पञ्चभिः । कृपालुः स्वार्थनिरपेक्षपरदुःखासहिष्णुः तन्निराचिकीर्षुर्वा सर्वदेहिनां कुत्रापि देहे न कृतो द्रोहो येन सः तितिक्षुर्द्वन्द्वसहिष्णुः सत्यं सारं बलं स्थिरं वा यस्य सः अनवद्यः द्वेषासूयादिरहितः आत्मा मनो यस्य सः समः स्वपरेषु समदृष्टिः सर्वानुपकरोत्येवेति सर्वोपकारकः ॥ २९ ॥

कामैरहताऽक्षुभिता धीर्यस्य सः दान्तः निगृहीतेन्द्रियः मृदुर्मृदुचित्तः शुचिर्बाह्याभ्यन्तरशौचवान् तत्र बाह्यं स्नानादिजन्यमान्तरं विष्णुचिन्तनजम् अकिंचनः अनन्यप्रयोजनः अनीहः लौकिकव्यापाररहितः दृष्टादृष्टफलेच्छारहितो वा मितं यथा तथा भुङ्क्ते इति तथा शान्तो निगृहीतान्तःकरणः स्थिरः स्थिरचित्तः अहमेव शरणं रक्षिता प्राप्त्युपायश्च यस्य सः मुनिः शुभाश्रयसंशीलनशीलः ॥ ३० ॥

अप्रमत्तः सावधानः गभीरात्मा अनवगाह्याभिप्रायः धृतिमानापत्सु धैर्यसमन्वितः जिताः षड्गुणाः अशनायापिपासाशोकमोहजरामृत्यवो येन सः मनोजयस्य प्राणजयपूर्वकत्वाज्जितप्राणस्याशनायादिजयः सुकर एवेति भावः । अमानी स्वदेहसत्कारानभिलाषी अन्येभ्यो मानदः सत्कारकारकः कल्पः हितो-

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

पदेशदक्षः मैत्रोऽवञ्चकः कारुणिकः करुणयैव प्रवर्त्तमानः न स्वार्थलाभेन कविः चिदचिदीश्वरतत्त्वत्रययाथात्म्यज्ञः ॥ ३१ ॥

किञ्च आज्ञायेति । मयादिष्टानुपदिष्टान् वेदमुखेनोक्तान् गुणान्दोषांश्च आज्ञाय विज्ञाय विरोधिस्वरूपस्यापि ज्ञेयत्वाद्दोषानित्युक्तम् सर्वान्स्वकान्वर्णाश्रमोचितान् धर्मान्सन्त्यज्य सर्वधर्मान्परित्यज्येत्यत्रेवात्रापि यथासंप्रदायं त्यागो विवक्षितः यः मामुपायोपेयभावेन भजेत्स च सत्तमः साधूत्तमः ॥ ३२ ॥

किंच ज्ञात्वेति । यः यत्स्वरूपः यादृशः यत्स्वभावः यावान्याद्विभूतिकश्चास्मि तथा पुनः पुनर्विचार्य्य वै मामेवानन्यभावेन नान्यस्मिन् प्रयोजनान्तरोपायान्तरदेवतान्तरादौ यो भावस्तेन भजन्ति ते भक्ततमाः वैशब्दो निश्चयद्योतकः ॥ ३३ ॥

एवं साधुलक्षणमुक्तमथैवं विधानां सतां संगाचिह्नभूतानि भक्तियोगानुग्राहकाणि तल्लक्षणान्याह । मल्लिङ्गेत्यादिभिरष्टभिः मल्लिङ्गमर्चारूपं मल्लिङ्गमद्भक्तजनदर्शनादीनि भक्तियोगानुग्राहकाणि तल्लक्षणानीत्यष्टमान्ते ऽध्याहर्त्तव्यं परिचर्या पादपीडनादिरूपा प्रह्वशब्दः प्रणामपरः गुणकर्मानुकीर्तनम् ॥३४॥

मदनुध्यानं मद्विषयकानुध्यानं सर्वलाभोपहरणं सर्वस्य लब्धस्य समर्पणं दास्येन स्वाभाविकेन आत्मनः स्वस्य निवेदनं समर्पणं मच्छेषत्वाध्यवसायः ॥ ३५ ॥

मम जन्मकर्मकथनं श्रोतृसन्निधाविति शेषः मम पर्वसु जयन्त्यादिष्वनुमोदनम् उत्सवकरणेनेति शेषः गीतादिभिर्मद्गृहेषु मदालयेषूत्सवः ॥ ३६ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भगवान्सल्लक्षणं वक्तीत्याह । भगवानिति । सर्वदेहिनामकृतद्रोहः अनवद्यः आत्मा मनो यस्य स तथा ॥ २९ ॥

संक्षिप्तं किंचनशब्दयोग्यं धनं न विद्यते इत्यकिंचनः संकोचार्थे मृदुति यादवः अनीहो निषिद्धाचरणवर्जितः किञ्च वैष्णवधर्मेस्थिरः निश्चलः अहमेव शरणं यस्य स मच्छरणः मुनिः मद्गुणमननशीलः ॥ ३० ॥

अप्रमत्तो विहिताचारे प्रमादरहितः गभीरात्मा अनवगाह्यमनोगतिः आपदि धृतिमान् जिताः षट् कामादि गुणाः षडिन्द्रियविषया वा येन स तथा अमानी आत्मन्यविद्यमानगुणाभिमानरहितः मानदः ज्ञानोपदेष्टा कल्पः विहितक्रियाकरणनिपुणः कृपालुत्वं मनोधर्मः कारुणिकत्वं कायिकधर्म इति पृथगुक्तं कविः सर्वज्ञः ॥ ३१ ॥

सामान्यलक्षणमुक्त्वा विशेषलक्षणमाह । आज्ञायेति । चशब्द एवार्थे यो मया मदीयैर्वादिष्टान् गुणान् दोषान् अपि आज्ञाय सम्यग्ज्ञात्वैव स्वकान् स्वविहितान् धर्मान् भागवतसंज्ञान् मयि संत्यज्य समर्प्य मां भजेत्स एव सत्तम इत्यन्वयः ॥ ३२ ॥

भक्तेरनेकविधत्वेऽपि उत्तमोत्तमायाः शुश्रूषितत्वेन पृष्टत्वात्तं प्रश्नं परिहरति । ज्ञात्वेति । अथ सतां लक्षणकथनानन्तरमा-

त्यान्तिकभक्तलक्षणमुच्यते यद्वा शास्त्रगुरूपदेशतो भगवन्माहात्म्यं ज्ञात्वाथ च विशेषतो ज्ञात्वेति वीप्सया माहात्म्यज्ञानेन पुनः पुनर्विशेषं द्योतयति तदुक्तम्—

ज्ञात्वापि मम माहात्म्यं तत्रोत्सुकतया पुनः ॥

विशेषाच्च विशेषेण ज्ञात्वा मामश्नुतेऽधिकमिति परिमाणतो यावानस्मि स्वरूपतो योऽस्मि लक्षणतो यादृशोऽस्मीति तत्वेन येऽनन्यभावेनातुलमभक्त्या मां चैवं भजन्ति ते भक्ततमाः निरतिशयभक्ता मया नानात्वेन ज्ञाता इत्यन्वयः अत्र तमप्प्रत्ययेन भक्तानां बाहुविध्यप्रकाशनेन भक्तेरपि तथात्वं सूचयतीति ॥ ३३ ॥

इदानीं सर्वसाधारणं भक्तिलक्षणमाह । मल्लिङ्गेति । अत्र कर्तव्यपदमध्याहृत्यान्वेतव्यं विधिप्रकारत्वात् । सर्वलाभोपहरणं सर्वलाभस्य द्रव्यस्योपहरणं हरावर्पणं दास्येन सहात्मनिवेदनमात्मसमर्पणं यद्वा दास्येन सहात्मनि मनसि निवेदनम् ॥३४॥३५॥

पर्वानुमोदनम् उत्सवानुष्ठानम् उत्सवं दृष्ट्वा हर्षो वा ॥३६॥३७॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ॥

अथ साधनतारतम्येन साधूनां तारतम्यमाह पञ्चभिस्तत्रावरं मिश्रभक्तिसाधकमाह । कृपालुरिति त्रिकेण । अत्र मच्छरण इति विशेषणम् उत्तरत्र स च सत्तम इति चकारेण तु पूर्वोक्तो यथा सत्तमस्तथायमपि सत्तम इति व्यक्तेरेवमेव भूतो मच्छरणः सत्तम इत्याक्षिप्यते अन्यत्नैः तत्र स्थिरः स्वधर्मे इति स्वकान् धर्मान् संत्यज्येत्युत्तरोक्तात्किञ्चित्त्वोपपादनार्थम् अत्रैव मूलेन सर्वानिति पदेन कोऽपि न त्यक्तः अस्तु तावद्विरुद्धानां वार्त्तेति भावः ॥ २९—३१ ॥

मध्यममभिश्रसाक्षाद्भक्तिसाधकमाह । आज्ञायैवमिति । निवृत्ताधिकारतया सन्त्यज्येत्यन्ता व्याख्या ग्राह्या यथा च श्रीहयशीर्षपञ्चरात्रोक्तनारायणव्यूहस्तवः—

ये त्यक्तलोकधर्म्मार्था विष्णुभक्तिवशं गताः ।
ध्यायन्ति परमात्मानं तेभ्योऽपीह नमो नम इति ॥

अत्र त्वेवं व्याख्या यदि च स्वात्मनि तत्तद्गुणयोगाभावस्तथापि एवं पूर्वोक्तप्रकारेण गुणान् कृपालुत्वादीन् दोषांस्तद्विपरीतांश्चाज्ञाय हेयोपादेयत्वेन निश्चित्यापि यो मया तेषु गुणेषु मध्ये तत्रादिष्टानपि स्वकान् नित्यनैमित्तिकलक्षणान् सर्वानेव वर्णाश्रमविहितान् तदुपलक्षणं ज्ञानमपि मदनन्यभक्तिविघातकतया सन्त्यज्य मां भजेत् स च सत्तमः चकारात्पूर्वोऽपि सत्तम इत्युक्तस्य तत्तद्गुणाभावेऽपि पूर्वसाम्यं बोधयति ततो यस्तु तत्तद्गुणान् लब्ध्वा धर्मज्ञानपरित्यागेन मां भजति केवलं स तु परमसत्तम एवेति व्यक्त्यानन्यभक्तस्य पूर्वत आधिक्यं दर्शितम् अत्र अद्वेष्टा सर्वभूतानामित्यादिश्रीभगवद्गीताद्वादशाध्यायप्रकरणमप्यनुसन्धेयं सत्तम इत्यनेन तदवरत्रापि सत्तरत्वं सत्त्वमप्यस्तीति दर्शितम् अस्तु तावत्सदाचारस्य तद्भक्तस्य सर्वमनन्यदेवताभक्तत्वमात्रेण दुराचारस्यापि सत्त्वान्यपर्यायं साधुत्वं विधीयते अपि चेत्सुदुराचार इत्यादौ अत्र च साधुसङ्गप्रस्तावे यत्तादृशं लक्षणं नोत्थापितं तत्खलु तादृशसङ्गस्य भक्त्युन्मुखेऽनुपयुक्तताभिप्रायेण यथोक्तं श्रीप्रह्लादेन । सङ्गेन साधुभक्तानामिति साधुरत्र सदाचारः ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

मदेवमीश्वरबुद्ध्या विधिमार्गभक्तयोस्तारतम्यमुक्तम् तत्रैवोत्तरस्यानन्यत्वेन श्रेष्ठत्वं दर्शितं तत्रैवार्चनमार्गे त्रिविधत्वं लभ्यते पाद्मोत्तरखण्डात् तत्र महत्त्वं तापादिपञ्चसंस्कारित्वादौ मध्यमत्वम् —

तापः पुण्ड्रं तथा नाम मन्त्रो यागश्च पञ्चमः ।
अमी पञ्चैव संस्काराः पारमैकान्त्यहेतवः ॥

इत्यत्र कनिष्ठत्वं शङ्खचक्राद्यूर्ध्वपुण्ड्रधारणाद्यात्मलक्षणम् । तन्नमस्करणं चैव वैष्णवत्वमिहोच्यते इत्यत्र अथ शुद्धदास्यसख्यादिभावमात्रेण योऽनन्यः स तु सर्वोत्तम इत्याह । ज्ञात्वेति ज्ञात्वा अज्ञात्वा वा ये केवलमनन्यभावेन श्रीव्रजराजनन्दनत्वाद्यालम्बनो यः स्वाभीप्सितो दास्यादीनामेकतरो भावः तेनैव भजन्ति न कदाचिदन्येनेत्यर्थः । ते तु मे मया भक्ततमा मताः साधुस्तवेत्याद्यनुसारेण ते मे भक्ततमा मता इत्यन्तिमस्यैव स्वमतस्यातिशयो दर्शितः अत एव योगेश्वरैरपि चतुर्थे प्रार्थितम् । प्रेयान्न तेऽन्य इत्यादिना ज्ञात्वाज्ञात्वेत्यत्राज्ञानज्ञानयोर्हेयोपादेयत्वं निषिद्धं भक्ततमा इत्यत्र पूर्ववाक्यस्थं सत्पदानिर्देशमातिक्रम्य विशेषतो भक्तपदनिर्देशात् भक्तेः स्वरूपाधिक्यमत्रैव विवक्षितं मे मता इत्यत्र मम तु विशिष्टा सम्मतिरत्रैवेति सूचितम् ईदृशानुक्तचरत्वात् अत एव प्रकरणप्राप्तमेकवचननिर्देशमप्यतिक्रम्य गौरवेणैव ये त इति बहुवचनं निर्दिष्टं ततः किमुत तद्भावसिद्धप्रेमाण इति भावः ॥ ३३ ॥

मल्लिङ्गमद्भक्तजनेति षष्ठीलुक् छान्दसः उत्तरार्द्धेऽप्यन्वयात् प्रह्वेति प्रह्वत्वं नमस्कारः ॥ ३४ ॥

दास्येनात्मनिवेदनमिति वैधभक्तौ दास्यस्य प्राधान्यात् ॥ ३५-३८॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

कर्मज्ञानादिमिश्रा केवला चेति भक्तेर्द्वैविध्यात्तत्प्रसक्तः साधुरपि द्विविधस्तत्र प्रथममाह त्रिभिः । कृपालुः परस्य संसारदुःखासहिष्णुः स्वद्रोहिण्यपि जने अकृतद्रोहः सर्वदेहिनां स्वमवजानतामपि तितिक्षुरपराधक्षन्ता सत्यमेव सारो बलं यस्य सः अनवद्यात्मा असूयादिदोषरहितः समः सुखदुःखाभ्यां मानापमानाभ्यां च तुल्यः ॥ २९ ॥

कामैरक्षुभितचित्तः दान्तः संयतबाह्येन्द्रियः मृदुः अकठोरचित्तः शुचिः सदाचारः अकिञ्चनः अपरिग्रहः अनीहः व्यावहारिकक्रियाशून्यः मितभुक् पवित्रलघ्वाहारः शान्तः शान्तिरतिमान् स्थिरः स्वधर्मे स्वकर्मसु फलोदयपर्यन्तमव्यग्रः आफलोदयकृत् स्थिर इति तल्लक्षणात् मच्छरणः मदेकाश्रयः मुनिर्मननशीलः ॥ ३० ॥

अप्रमत्तः सावधानः गभीरात्मा अन्यैर्दुरवगाह्यस्वभावः धृतिमान् निर्विकारः जितषड्गुणः क्षुत्पिपासाद्यूर्मिरहितः अमानी मानाकाङ्क्षाशून्यः अन्येभ्यो मानदः कल्पः परबोधने दक्षः मैत्रः अवञ्चकः कारुणिकः करुणयैव प्रवर्त्तमानः कविर्बन्धमोक्षज्ञः इत्यष्टाविंशतिगुणवानयं सत्तम इत्युत्तरस्यानुषङ्गः अतः शान्त इति जितषड्गुण इति पदाभ्यामयं सिद्धभक्तो निर्वाणवाञ्छाशून्यत्वात् भक्तात्मारामः शान्तभक्त इति संज्ञाभ्यामुच्यते अयं स्वपूर्वदशायां ज्ञानमिश्रभक्तिमान् तत्पूर्वदशायां कर्ममिश्रभक्तिमानासीदतस्तदा तदास्य भक्तेः प्राधान्यं सिद्धदशायां तु कर्मज्ञानाद्यनादरणाच्छुद्धभक्त एवायमुच्यते इत्यतः सत्तम इति ज्ञानमिश्रभक्तिमान् सत्तरः कर्ममिश्रभक्तिमान् सन्नित्यवगम्यते अतोऽयं स्वसाङ्गिनं स्वतुल्यं चिकीर्षुः प्रथमं कर्ममिश्रां भक्तिमुपदिशति ततस्तेनोपदिष्टः स च निष्कामः कर्ममिश्रामेव भक्तिं कुर्वन् कर्माणि त्यजेत् योगी कर्मभिस्त्यज्यते हि स इति न्यायेनारूढदशायामनादृतत्वात् अत एव कर्मणामुपरामे सति ज्ञानमिश्रां भक्तिं लभते । ततस्तत्पाकदशायां भक्तेः प्राबल्ये सति ज्ञानेऽप्यनादृतत्वादुपरमत्याये सति भक्तात्मारामः इति शान्तभक्त इति संज्ञाभ्यां स चाप्युच्यमानो भवति तस्य ज्ञानेऽनादरो यथा भक्तिरसामृतसिन्धूद्धृता तदुक्तिः "अस्मिन् सुखघनमूर्तौ परमात्मनि वृष्णिपत्तने स्फुरति । आत्मारामतया मे वृथा गतो बत चिरं कालः" इति । हरेर्गुणाक्षिप्तमतिर्भगवान् बादरायणिरिति प्रथमे च तद्दशायां भक्तिबाधितस्य ज्ञानस्य सत्त्वेऽपि तस्य भक्त्यनावरकत्वात्—

अन्याभिलाषिताशून्यं ज्ञानकर्माद्यनावृतम् ।
आनुकूल्येन कृष्णानुशीलनं भक्तिरुच्यत इति ॥

शुद्धभक्तिलक्षणस्य तत्र नाव्याप्तिर्ज्ञेया ॥ ३१ ॥

अथ केवलाया भक्तेः प्रवर्त्तकं साधुं लक्षयति । आज्ञायेति । यथा धर्मान् नैव सन्त्यज्य सत्तम उक्तः एवं मया वेदरूपेणादिष्टानपि सर्वान् धर्मान् सन्त्यज्य मद्भक्तावेव श्रद्धाविशेषवत्तया सम्यक् प्रकारेणैव त्यक्त्वा यो मां भजेत् किमज्ञानान्नास्तिक्याद्वा न धर्माचरणे सत्त्वशुद्ध्यादीन् गुणान् विपक्षे दोषांश्च आज्ञाय सम्यगेव ज्ञात्वापि भक्त्यैव मे सर्वं भविष्यतीति दृढनिश्चयेनैव धर्मान् सन्त्यज्येति स्वामिचरणाः स च सत्तम इति पूर्वाधिकारी धर्मांश्च सन्त्यज्य भजेदयं तु सन्त्यज्यैवेति भेदः तथा पूर्वः कृपालुत्वादिसम्पूर्णगुणवानेव सत्तमः अयं तु विशेषणान्तरानुपादानात् तावत्संख्याकगुणवत्त्वाभावेऽपि सत्तमः नचास्य तावद्गुणाभाव एवेत्याशङ्कनीयम्—

भक्तिः परेशानुभवो विरक्तिरन्यत्र चैषत्रिक एककाल इति ।
यस्यास्ति भक्तिर्भगवत्यकिञ्चना सर्वैर्गुणैस्तत्र समासते सुराः॥

इत्यादिश्रवणादचिरेणैव सर्वदोषोपशमनपूर्वकसर्वगुणोदयस्य तत्रावश्यंभावित्वात् किञ्च पूर्वो जितषड्गुणत्वात् सिद्धदशावस्थ एव सत्तमः अयंतु तादृशत्वानुक्तेः साधकदशावस्थोऽपि सत्तम इत्यस्य पूर्वत एतावान् व्यञ्जित उत्कर्षः प्रथमत एव शुद्धभक्तिमत्त्वाज्ज्ञेयः ॥ ३२ ॥

अयं सिद्धदशावस्थत्वे तु परममहोत्कृष्ट एवोच्यत इत्याह । ज्ञात्वाज्ञात्वेति । वीप्सा भक्त्याहमेकया ग्राह्य इति मदुक्तेः भक्तितारतम्येन मन्माधुर्यमधिकाधिकं प्रतिक्षणमनुभवगोचरीकृत्येत्यर्थः । यावान् कालदेशाभ्यामपरिच्छिन्नोऽप्यहं भक्तेच्छावशात् परिच्छिन्नश्च यश्च साक्षात् परब्रह्माप्यहं श्यामसुन्दराकारो वसुदेवपुत्रश्च यादृशः आत्माराम आप्तकामोऽप्यहं भक्तप्रेमवैवश्यादनात्मारामोऽनाप्तकामश्च अनन्यभावेनैकान्तिकत्वेनेति वा ते इति गौरवेण बहुत्वम् भक्ततमा मता इति पूर्वोक्तलक्षणः सत्तम एव मया मद्भक्तवृन्देनोच्यते अयंतु मे भक्ततमो मया सम्मत इत्यर्थः ॥ ३३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

यदुक्तं भक्तिस्त्वयि कीदृश्युपयुक्तेति तत्राह । मल्लिङ्गमद्भक्तजनेत्यत्र षष्ठीलुगार्षः उत्तरार्द्धेऽप्यन्वयात् प्रह्वेति प्रह्वत्वं नमस्कारः ॥ ३४ ॥

सर्वलाभोपहरणं भगवतैव स्वसेवार्थं स्वयमानीतमिति बुद्ध्या सर्वलब्धवस्तुनो ममतास्पदस्य तस्मै समर्पणं दास्येन हेतुना आत्मनो जीवस्य देहस्य चाहंतास्पदस्यापि समर्पणम् ॥ ३५ ॥

जन्मकर्मकथनमिति । मत्कीर्त्तनकथनयो रागस्वरतालादियुक्तत्वायुक्तत्वाभ्यां भेदो ज्ञेयः पर्वाणि जन्माष्टम्यादीनि तेषामनुमोदनमेवाह द्वाभ्याम् । गीतादिभिः मद्गृहाधिकरणक उत्सवः ॥ ३६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

साधुलक्षणमाह । कृपालुरिति पञ्चभिः । कृपालुः परदुःखदुःखितमनाः सर्वदेहिनामनुकूलप्रतिकूलानामकृतद्रोहः अतः तितिक्षुः सत्यं यथार्थाचरणं सारो बलं यस्य अनवद्यात्मा विशुद्धबुद्धिः समो निर्द्वन्द्वः सर्वेषां साध्वसाधूनामुपकारकः तस्य दौर्लभ्यमुक्तमितिहाससमुच्चये—

सुलभाः पुरुषा लोके साधवः साधुकारिषु ।
दुर्लभः पुरुषो लोके यश्च साधुरसाधुष्विति ॥ २९ ॥

काम्यन्ते क्रियादिभिरिति कामाः भोगास्तैर्योग्यैरपि अहतधीः अलुब्धमतिः दान्तः नियतबाह्यकरणः मृदुः कोमलस्वभावः शुचिः बाह्याभ्यन्तरशुद्धयर्थं कृतशास्त्रीयानुष्ठानः अकिंचनः मयि कृतात्मात्मीयभरन्यासः अनीहः त्यक्तत्रिवर्गचेष्टः मितभुक् स्वल्पभुक् शान्तः संयतान्तःकरणः स्थिरः भगवद्धर्मादचालयः मच्छरणः अहं गृहवदाश्रयः सर्वापद्भ्यो रक्षिता च यस्य सः मुनिर्मद्ध्याननिष्ठः ॥ ३० ॥

अप्रमत्तः अवहितः गभीरात्मा विपुलबुद्धिः धृतिमान् प्रसाद्दसिकः जितषड्गुणः "क्षुधापिपासे प्राणनिष्ठे शोकमोहौ मनोऽनुगौ । जन्ममृत्यू शरीरस्य न मे ज्ञानस्वरूपिणः" इत्येवं जितषड्र्मिः स्वयममानी परेषां मानदः कल्पः हितोपदेशे दक्षः मैत्रः हिताचरणेन जनाह्लादकः कारुणिकः परदुःखनिराकरणस्वभावः कविः क्रान्तदर्शी सिद्धान्तविदित्यर्थः ॥ ३१ ॥

एवं मयादिष्टान् मयोदितेष्ववहितः स्वधर्मेषु मदाश्रय इत्यादिना मयोपदिष्टान्स्वकान् धर्मान् गुणान्मुक्तौ गुणभूतान् आज्ञाय तैर्यो मां भजेत ससत्तमः किंकृत्यं अथैषामित्यादिना मया दिष्टान् दोषान् संत्यज्य ॥ ३२ ॥

स्वरूपतो योऽस्मि गुणशक्तितो यादृशोऽस्मि इयत्ताज्ञानहठत्यागतो यावान् ज्ञातुं शक्योऽस्मि तथा मां ज्ञात्वा ज्ञात्वा पुनः पुनर्ज्ञात्वा च अनन्यभावेन भजन्ति ते भक्ततमाः मे मताः संमताः ॥ ३३ ॥

अथ भक्तिलक्षणमाह । मल्लिङ्गेत्यष्टभिः । लिङ्गानि पूजाधिष्ठानानि ॥ ३४ ॥

लभ्यन्ते इति लाभानि गृहवनोपवनवस्त्रालंकारादीनि द्रव्याणि तेषामुपहरणं समर्पणं देवपित्राद्यर्थं कमप्यंशं विहाय निवेदयेदिति सूचयितुं सर्वपदप्रयोगः ॥ ३५ ॥

मम जन्मकर्मकथनमित्यनेनैव तत्तिथीनां जन्माष्टम्यादीनामनुमोदनमप्युक्तं मम पर्वानुमोदनं मम रासोत्सवादिपर्वणि पूर्णमास्यादीनि तदनुमोदनम् ॥ ३६ ॥

भाषा टीका ।

श्री भगवान् उवाच ।

जो कृपा करने वाला होवै किसी का द्रोह नहीं करै सब की सब बातों का सहने वाला सत्य बोलने वाला पाप रहित समदृष्टि वाला सब के उपकार करने वाला ॥ २९ ॥

कामों में से दुःख नहीं पाने वाला बाहिर की इन्द्रियों को जीतने वाला कोमल चित्तवाला पवित्र अकिञ्चन विशेष चेष्टारहित परिमित भोजन करने वाला भीतर की इन्द्रियों के जीतने वाला स्थिर बुद्धिवाला मेरे आश्रय रहने वाला मुनि ॥ ३० ॥

प्रमाद नहीं करने वाला गम्भीर बुद्धिवाला धीरज वाला राग द्वेषादि छैः गुणों को जीतने वाला आप मान रहित दूसरे को मान देने वाला ज्ञान देने में समर्थ कृपा वाला पण्डित होवै वह साधु है ॥ ३१ ॥

ऐसे गुण दोषों को जानकर मेरे सिखाये हैं तौभी भक्ति से विरोधि होवैं तो सब अपने धर्मों को छोड कर जो मेरे ही को भजता है वह उत्तम साधु मेरा सम्मत है ॥ ३२ ॥

हम जैसे हैं जितने वडे हैं जो हैं इस बात को जानकर अथवा नहीं भी यथार्थ जानकर जो पुरुष अनन्यभाव से हमको भजते हैं वे भक्तों में श्रेष्ठ मेरे मत में हैं ॥ ३३ ॥

मेरी मूर्त्तियों का दर्शन मेरे भक्तों का दर्शन तथा स्पर्शन तथा अर्चन सेवा स्तुति नमस्कार गुण कर्मों का कीर्तन ॥३४॥

हे उद्धवजी मेरी कथा के श्रवण में श्रद्धा मेरा अनुचिन्तन करना लाई हुई सब युक्त पदार्थों का मेरे अर्पण करना दास्य भाव से आत्मा का निवेदन करना ॥ ३५ ॥

मेरे जन्म कर्मों के चरित्रों का कथन करना मेरे एकादश्यादिपर्वोत्सवों का अनुमोदन करना गीत नृत्य बाजों से भक्तजन वैष्णव गोष्ठी से मेरे मंदिर का उत्सव करना यह सब मेरे में करने की उत्तम भक्ति के लक्षण हैं ॥ ३६ ॥

यात्राबलिविधानं च सर्ववार्षिकपर्वसु ।
वैदिकी तान्त्रिकी दीक्षा मदीयव्रतधारणम् ॥ ३७ ॥
ममार्चास्थापने श्रद्धा स्वतः संहत्य चोद्यमः ।
उद्यानोपवनाक्रीड़पुरमन्दिरकर्मणि ॥ ३८ ॥
सम्मार्जनोपलेपाभ्यां सेकमण्डलवर्तनैः ।
गृहशुश्रूषणं मह्यं दासवद्यदमायया ॥ ३९ ॥
अमानित्वमदम्भित्वं कृतस्यापरिकीर्तनम् ।
अपि दीपावलोकं मे नोपयुञ्ज्यान्निवेदितम् ॥ ४० ॥
यद्यदिष्टतमं लोके यच्चातिप्रियमात्मनः ।
तत्तन्निवेदयेन्मह्यं तदानन्त्याय कल्पते ॥ ४१ ॥
सूर्योऽग्निर्ब्राह्मणो गावो वैष्णवः खं मरुज्जलम् ।
भूरात्मा सर्वभूतानि भद्र ! पूजापदानि मे ॥ ४२ ॥
सूर्ये तु विद्यया त्रय्या हविषाग्नौ यजेत माम् ।
आतिथ्येन तु विप्राग्र्ये गोष्वङ्ग ! यवसादिना ॥ ४३ ॥
वैष्णवे बन्धुसत्कृत्या हृदि खे ध्याननिष्ठया ।
वायौ मुख्यधिया तोये द्रव्यैस्तोयपुरस्कृतैः ॥ ४४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

बलिविधानं पुष्पोपहारादिसमर्पणम् सर्ववार्षिकपर्वसु चातुर्मास्यैकादश्यादिषु विशेषतः ॥ ३७ ॥

उद्यानादिकरणे सामर्थ्ये सति स्वतः असति चान्यैः सम्भूयोद्यमः उद्यानं पुष्पप्रधानम् उपवनं फलप्रधानं वनम् आक्रीडं क्रीडास्थानम् ॥ ३८ ॥

सम्मार्जनं रजसोऽपाकरणम् उपलेपो गोमयादिभिरालेपनम् सेकस्तैरेव प्रोक्षणम् मण्डलवर्तनं सर्वतोभद्रादिकरणम् मह्यं मम ॥ ३९ ॥

कृतस्य धर्मस्यापरिकीर्तनं स्वयमन्येन वा निवेदितं न स्वीकुर्यात् एतच्च साधारणं स्थावराविषयं रागप्राप्तविषयं वा भक्त्यात्तु ग्राह्यमेव—

षड्भिर्मासोपवासैस्तु यत्फलं परिकीर्तितम् ।
विष्णोर्नैवेद्यसिक्थेन पुण्यं तद्भुञ्जतां कलौ ॥
हृदि रूपं मुखे नाम नैवेद्यमुदरे हरेः ।
पादोदकं च निर्माल्यं मस्तके यस्य सोऽच्युतः ॥

इत्यादिवचनेभ्यः यद्वा अन्यस्मै निवेदितं मे नोपयुञ्ज्यात् मह्यं न निवेदयेदित्यर्थः—

विष्णोर्निवेदितान्नेन यष्टव्यं देवतान्तरम् ।
पितृभ्यश्चैवतद्देयं तदानन्त्याय कल्पते ॥
पितृशेषं तु यो दद्याद्धरये परमात्मने ।
रेतोधाः पितरस्तस्य भवन्ति क्लेशभागिनः ॥

इत्यादिवचनेभ्यः ॥ ४०—४१ ॥

इदानीमेकादश पूजाधिष्ठानान्याह । सूर्य इति हे भद्र ! ॥ ४२ ॥

अधिष्ठानभेदेन पूजासाधनान्याह । सूर्ये इति त्रिभिः । त्रय्या विद्यया सूक्तैरुपस्थानादिना अङ्ग हे उद्धव ! यवसादिना तृणादिना ॥ ४३ ॥

बन्धुसत्कृत्या बन्धुवत्सम्मानेन हृदि खे हृदयाकाशे मुख्यधिया प्राणदृष्ट्या तोये तोयादिभिर्द्रव्यैस्तर्पणादिना ॥ ४४ ॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

यात्रा दोलाचन्दनक्रीडाद्युत्सवः एकादश्यादिष्वित्यादिना पवित्रादमनकहोलिका दीपमालादिपरिग्रहः ॥ ३७ ॥

सम्भूय मिलित्वा ॥ ३८ ॥

तैर्गोमयादिभिरेव दासवदिति लौकिको दासो दृष्टान्तितः अमायया वित्तशाठ्यादिकं विना ॥ ३९ ॥

अदम्भित्वं लोकेषु मिथ्यास्वभक्तिस्थापनराहित्यम् एतच्च निवेदितस्यास्वीकरणञ्च साधारणं कस्याप्यनिजमेवं भूतं यत् स्थावरं कालान्तरस्थात् भगवदुपयोगार्हत्वात्तन्निवेदितमप्यग्राह्यं

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी ।

पथिकादिपूज्यमानमहारण्यदेवालयादौ कस्याप्यधिकारिणोऽभावात् किम्वा चौरादिप्रसादो महां देयोऽन्यस्त्वन्यस्मै इति लोभेन प्राप्तो यस्तद्विषयम् असाधारणमप्यावरं चेत्तदा त्वधिकारीच्छायां स्वाधिकारे वा सति भक्त्या तु ग्राह्यमेव साधारणोक्त्यादिसङ्कोचकल्पने मानाभावाद्धेति ॥ ४० ॥

यच्चेति । चकारान्मम प्रियं च ॥ ४१ ॥

पूजाधिष्ठानानीति तद्विभूतिष्वपि तेषु यद्दिदृक्षया सम्बन्धो न विचारणीयः किन्तु मम पूजाधिष्ठानदृष्ट्यैवेत्यर्थः ॥ ४२ ॥

अधिष्ठानभेदेनेति । तत्तदधिष्ठानविशेषेण तत्पूजोपकरणविशेषानाहेत्यर्थः । सूक्तैर्वैदिकवाक्यैः चित्रं देवानामित्यारभ्य सूर्य आत्मा जगतस्तस्थुषश्चेति ओं तच्चक्षुर्देवहितमित्यादिभिः आदिना गायत्र्या पुष्पमिश्राञ्जलिनिःक्षेपः तर्पणादिनेत्यादिना पुष्पाञ्जलिपरिग्रहः ॥ ४३ ॥ ४४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

पर्व उत्सवः तान्त्रिकी भगवच्छास्त्रोक्ता दीक्षा यज्ञादिभिर्भोगैश्चाराधनसंकल्पः ॥ ३७ ॥

स्वत उद्यमः एकस्यैवोद्यमः संहत्य सहायान्तरमपेक्ष्योद्यमः उद्यानमायतनान्तर्गतम् उपवनं नद्यादिसमीपगतम् आक्रीडः पुष्पोपचयादिक्रीडनार्हः ॥ ३८ ॥ ३९ ॥

अमायेत्येतद्विवृणोति । अमानित्वमित्यर्थेन दीपावलोकं दीपावलोकमपि मम निवेदितं नोपयुञ्ज्यात् छत्रचामरतालवृन्तपवनादीनामनुपयोज्यत्वप्रदर्शनार्थमिदम् ॥ ४०—४२ ॥

अथवा आसत्येनेत्यादिमन्त्रैः ॥ ४३ ॥

आकाशे पूजनं हृदयाकाशान्तरे ध्यानमित्याह हृदीति । मुख्यधिया मुख्यप्राण इतिबुद्ध्या ॥ ४४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यात्रा दिव्यदेशयात्रा सांवत्सरिकपर्वसु चातुर्मास्यैकादश्यादिषु बलिविधानं विशेषतः पूजाविधानम् उत्तमा तान्त्रिकी भगवच्छास्त्रोक्ता दीक्षा पञ्चसंस्कारसम्पत्तिः वैदिकीति पाठे अध्वर्युर्गृहपतिं दीक्षयित्वा यजमानं दीक्षयेतेत्युक्तविधा यज्ञार्थदीक्षा मदीयव्रतान्येकादश्युपवासादीनि तेषां धारणम् ॥ ३७ ॥

मम याचां पूजामूर्तिस्तस्याः स्थापने श्रद्धा आदरः सत्यां शक्तौ स्वतस्तदभावे इतरैः सह संहत्य सम्भूय उद्यमश्च उद्यानेत्यादेर्ममेत्यादिः तत्रोद्यानमायतनान्तर्गतं वनम् उपवनमायतनसमीपवनम् आक्रीडाः पुष्पोपचयादिक्रीडनार्हाणि स्थानानि गोपुराण्यथायतनस्य परितः स्थितानि तद्वत्यानि मन्दिराणि तेषां कर्मणि निर्माणे स्वतः संहत्य चोद्यम इति पूर्वेण सम्बन्धः ॥ ३८ ॥

सम्मार्जनं धूल्यपाकरणम् उपलेपनं गोमयादिभिः सेकस्तैरेव प्रोक्षणं मण्डलवर्तनं सर्वतोभद्रस्वस्तिकचक्राम्बुजादिमण्डलकरणम् एभिरमायया दासवन्मद्य मम गृहशुश्रूषणं गृहालङ्कारः ॥३९॥

अमानित्वं तु अहङ्कारराहित्यम् अदम्भित्वमयञ्चकत्वं कृतस्य धर्मस्यापरिकीर्तनं धर्मः क्षरति कीर्तनादिति स्मृतेः मे मह्यं स्वयमन्येन वा निवेदितं दीपावलोकं नोपयुञ्ज्यात्स्वव्यापारोपयोगिनं न कुर्यात्किन्त्वन्यदेव दीपारोपणं कुर्यादित्यर्थः । दीपावलोकग्रहणं तालवृन्तव्यजनादीनामप्यनुपयोज्यत्वप्रदर्शनपरः ॥ ४० ॥

किञ्च लोके यद्यदिष्टतमं कमनीयं वस्तु यच्चात्मनः स्वस्य प्रियतमं तत्तन्मह्यं निवेदयेदेवं चेत्तदानन्त्याय ममापरिमितप्रीतयेऽक्षय्यफलाय वा कल्पते ॥ ४१ ॥

अथ भक्तिलक्षणान्येव पूजाविधानानि वक्तुं तदधिष्ठानान्याह । सूर्य इति । हे भद्र ! सूर्यादीनि सर्वभूतान्तानि एकादश मम पूजापदानि ॥ ४२ ॥

तत्रोद्देशक्रमेण पूजाप्रकारानाह । सूर्ये त्वित्यादिना । त्रय्या विद्यया आसत्येनेत्यादिभिर्मन्त्रैरग्नावाहवनीयादौ तान्त्रिके च हविषा चरुपुरोडाशाज्यादिरूपेण मां यजेतेति सम्बन्धः विप्राग्र्ये ब्राह्मणश्रेष्ठे आतिथ्येन विप्राग्नौ इति पाठे विप्रशरीरान्तर्गतजाठराग्नौ अङ्ग हे उद्धव ! गोषु यवसादिभिः यवसं तृणमादिशब्देन पिण्याकादिसंग्रहो ज्ञेयः ॥ ४३ ॥

वैष्णवे विष्णोर्भक्ते बन्धुसत्कृतिर्बन्धाविव सत्कारस्तथा आकाशे पूजा नाम हृदयाकाशान्तरे ध्यानमित्याह । हृदि खे ध्याननिष्ठयेति यजेत मामित्युत्तरत्र सम्बन्धः मुख्यधिया मुख्यप्राणधिया तोये तु तोयपुरस्कृतैस्तिलयवादिभिरित्यर्थः । द्रव्यैर्गन्धपुष्पदूर्वादिभिः ॥ ४४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अर्चा प्रतिमा उद्यमः करणादौ प्रयत्नः उद्यानोपवनादिकर्मण्युद्यमो वा सद्मनि सम्मार्जनोपलेपाभ्यामुद्यमो वा ॥ ३८ ॥

मह्यं मम यत् गृहशुश्रूषणं तदमायया सेकमण्डलवर्तनैः एकेन मुख्येन मण्डलेन सहितैः अवान्तरमण्डलकरणैः कर्तव्यमिति शेषः सेकमण्डलवर्तनैरिति केचित्पठन्ति चन्दनादिजलप्रोक्षणं सेकः मण्डलमलङ्कारः वर्तनं प्रदक्षिणावर्तनं विशेषजीवनं प्राक्तं वर्तनं गमनन्तर्थेति च ॥ ३९ ॥

मे निवेदितं दीपावलोकं नोपयुञ्ज्यात् स्वप्रयोजनाय न स्वीकुर्यात् ॥ ४० ॥

हविराद्यर्पणे सुष्ठूपायमाह । यद्यदिति । आनन्त्याय अनश्वरफलाय मोक्षायेत्यर्थः । अनन्तं वैष्णवं कृतमिति स्मृतेः ॥ ४१ ॥

अधिकारिणां योग्यतया अनेकविधत्वेन फलविशेषाय मदर्चनाधिष्ठानं चोपदिशामीत्याह । सूर्य इति । हे भद्र ॥ ४२ ॥

तत्तत्साधनं चार्चनार्थमाह । सूर्ये त्विति । गोष्ठे स्थिता गा यवसादिना पूजयेदिति शेषः ॥ ४३ ॥

बन्धुर्जामाताऽयमिति सत्कृत्या सत्कारेण हृदि खे हृदयाकाशे ध्याननिष्ठया उत्कृष्टध्यानेन वायौ मुख्यप्राणे मुख्यधिया सर्वदेवोत्तमो वायुरिति ज्ञानेन तदुक्तम्—

सर्वदेवोत्तमो वायुरिति ज्ञानाञ्चापरम् ।
प्रियमस्ति हरेः किञ्चित्तथा वायोर्हरेर्विदः ॥
इति हरेरुत्तमत्वविदः वायोरपीत्यर्थः कुतः ।
भारतीवायुलक्ष्मीनामात्मनश्च यथाक्रमम् ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

आधिक्यज्ञानतो विष्णुः सर्वतः सम्प्रसीदतीति ।

वचनात् वायुर्भीमो भीमनादो महौजाः इत्यनेनापि हेतुपूर्वकत्वेन वायोः सर्वदेवोत्तमत्वमुक्तं एवार्थः तस्माद्वायुरेव व्यष्टिवपुः समष्टिरयं पुनः मृत्युं जयति च एवं वेदेऽनेन वायुज्ञानस्यापमृत्युं जयत्वोक्तेश्च—

पञ्चभूतमनोबुद्धिरुद्राणां प्रतिदेहकम् ।
व्याहृतश्चापि नेतृत्वाद्वायुर्व्यष्टिः समष्टिक इति ॥

वचनेन वायोर्व्यष्टिं समष्टिं च सम्यक् ज्ञात्वा मनो युञ्ज्यात् द्रव्यैः पुष्पैः ॥ ४४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

दासवदिति यथा लौकिको दासः स इत्यन्यवदपि तथैव कर्तव्यमित्यर्थः । अमायया वञ्चित्तवित्तशाठ्यादिकं विना ॥ ३९ ॥

मदभिमतं लोकेषु मिथ्याख्यभक्तिख्यापनराहित्यं नोपयुञ्ज्यात् स्वार्थं न व्यवहरेत् अन्यतः तत्र साधारणं कल्प्यादिजं पथिकादिपूज्यमानमहारण्यदेवालयादावधिकार्यभावात् स्थावरं कालान्तरस्थायि भगवदुपयोगयोग्यत्वात् यथा दीपावलोकः रागो लोभः भक्त्या तु ग्राह्यमेवेति असाधारणमस्थावरं चेत् तत्राप्यधिकारिच्छायां सत्यां स्वाधिकृतत्वे सति चेति भावः ॥ ४० ॥

यद्यदिति । चकारान्मम प्रियं च ॥ ४१ ॥

तत्रनित्यमेव संबध्यमाना ये सूर्यादयस्तेऽपि बहिर्दृष्ट्या न संबध्याः किन्तु मदधिष्ठानदृष्ट्यैवेत्युपदिशन् तत्र तत्र योग्यानुपासनाविशेषानप्युपदिशति । सूर्य इत्यादिभिः व्याख्या टीकावत् ॥ ४२ ॥

किंवा सूर्य इति युग्मकं सूर्यान्तर्यामितोषणार्थं प्रदीपठितव्येत्यर्थः । यथातिथौ क्रियते तथैवाहरहश्च गृहागते विप्राग्न्ये कर्त्तव्यमित्यर्थः । विप्राग्न्यं तु भागवतशास्त्राद्विचार्यं विप्राद्द्विषड्गुणयुतादित्यादेः अन्यत्रादरमात्रं कार्यमिति ज्ञेयं वैष्णव इति विप्रत्वादिरहितेऽपि तत्सामान्येऽपि न तु पूर्ववत्तदग्न्यवेत्यर्थः वायोर्यत्सर्वजीवनहेतुत्वं तत्तु तदन्तर्यामिशक्त्यैवेति भावनयेत्यर्थः । खादिषु भूतेषु तेजसोऽनुक्तिः सूर्याग्निभ्यां चरितार्थत्वात् ॥ ४३ ॥ ४४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

सर्वेषु वार्षिकेषु वत्सरसम्बन्धिषु पर्वसु फाल्गुनपूर्णिमादिषु या दोलादियात्रास्तासु बलिविधानं विविधवस्त्रालंकारमिष्टान्नस्रक्चन्दनपुष्पादिपूजोपहारकरणं व्रतान्येकादश्यादीनि ॥ ३७ ॥

अर्चा प्रतिमा उद्यानादिकरणे सामर्थ्ये सति स्वत एव असति अन्यैः सम्भूयाप्युद्यमः आक्रीडं क्रीडास्थानं पुरं चक्रवेष्टनम् ॥ ३८ ॥

सम्मार्जनं तृणधूल्याद्यपसारणं प्रथमं गोमयमृज्जलैरुपलेपो द्वितीयः स्थले शुष्के सति सेकः पुष्पोदकैस्तृतीयः मण्डलवर्त्तनं सर्वतोभद्रादिनिर्माणं चतुर्थं तैरेवं मम गृहस्य शुश्रूषणं सेवा दासवत् लौकिकेन राजकीयदासेन राज्ञो गृहस्य यथा तद्वदपि तदपि तथेत्यर्थः । अमायया वञ्चित्तशाठ्यराहित्येन ॥ ३९ ॥

अमानित्वमनहंकारः मदभिमतं लोके मिथ्याख्यभक्तिख्यापनराहित्यं मे मह्यं निवेदितं दीपावलोकमपि नोपयुञ्ज्यात् मह्यं दत्तस्यास्यार्वेदीपस्य च स्वव्यवहारमात्रे उपयोगो न कर्तव्यं इत्यर्थः किन्तु परमार्थसिद्ध्यर्थं वैष्णवेभ्यो दत्त्वा स्वयमुपभुञ्जीतेत्यर्थः

षड्भिर्मासोपवासैश्च यत्फलं परिकीर्त्तितम् ।
विष्णुनैवेद्यसिक्थेन पुण्यं तद्भुञ्जतां कलौ ।
हृदि रूपं मुखे नाम नैवेद्यमुदरे हरेः ।
पादोदकं च निर्माल्यं मस्तके यस्य सोऽच्युतः ॥

इत्यादिवचनेभ्यः ॥ ४० ॥

लोके शास्त्रे च यदिष्टतमं तन्मह्यं निवेदयेत् तेन इमंमञ्जर्यवादीनि शास्त्रविहितान्यपि लोके इष्टतमत्वाभावात् तथा मद्यादीनि संकर्षणप्रियाण्यपि शास्त्रे इष्टतमत्वाभावान्न निवेदयेदिति भावः । तत्रापि यच्च आत्मनः स्वस्यातिप्रियं तत्तु विशेषतो निवेदनीयमित्यर्थः ॥ ४१ ॥

स्वां कुत्र पूजयेदित्यपेक्षायामेकादश पूजाधिष्ठानान्याह । सूर्य इति ॥ ४२ ॥

तत्र तत्राधिष्ठितं स्वेष्टदेवं केन प्रकारेण पूजयेदित्यपेक्षायामाह । सूर्य इति त्रिभिः त्रय्या विद्यया सूक्तैरुपस्थानमनस्कारादिना यवसादिना तृणप्रदानकण्डूयनादिभिः ॥ ४३ ॥

बन्धुसत्कृत्या स्त्रीबन्ध्वादिवत्सक्तिपूर्वकसम्मानेन हृदि खे स्वहृदयाकाशे ध्यानेन मुख्यधिया प्राणोऽयं मुख्य इति बुद्ध्या तोये द्रव्यैर्जलपुष्पतुलस्यादिभिः ॥ ४४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यात्रासु रथयात्राप्रभृतिषु बलिविधानं पुष्पोपहारादिसमर्पणं तच्च सर्ववार्षिकेषु पर्वसु प्रतिवर्षं तत्तत्तिथिषु ॥ ३७ ॥

शक्तौ स्वतः अशक्तौ भागवतान्तरैः संभूयोद्यमः ॥ ३८ ॥

सेकः सुगन्धिजलैः प्रोक्षणं मण्डलानां सर्वतोभद्रादीनां वर्तनं स्थापनम् ॥ ३९ ॥

निवेदितमन्यस्मै समर्पितं दीपावलोकमपि मे नोपयुञ्ज्यात्

विष्णोर्निवेदितान्नेन यष्टव्यं देवतान्तरम् ।
पितृभ्यश्चैव तद्देयं तदानन्त्याय कल्पते ॥
पितृशेषं तु यो दद्याद्धरये परमात्मने ।
रेतोधाः पितरस्तस्य भवन्ति क्लेशभागिनः ॥

इत्यादिवचनेभ्यः ॥ ४० ॥ ४१ ॥

भद्रिकङ्कत्वनेनोपादिष्टानि स्वाधिष्ठान्याह । सूर्य इति हे भद्र ! “दानं मानसमेतं ज्ञानमगर्वं क्षमान्वितं शौर्यं सत्यं प्रियवाक् सहितं चत्वारि यत्र स चतुर्भद्रः” इति महाभारते चतुर्भद्रलक्षणम् पूजापदानि पूजाधिष्ठानानि ॥ ४२ ॥

त्रय्या विद्यया आसत्येत्यादिरूपया ॥ ४३ ॥

मुख्यधिया प्राणबुद्ध्या ॥ ४४ ॥

स्थण्डिले मन्त्रहृदयैर्भोगैरात्मानमात्मनि ।
क्षेत्रज्ञं सर्वभूतेषु समत्वेन यजेत माम् ॥ ४५ ॥
धिष्ण्येष्वेष्विति मद्रूपं शङ्खचक्रगदाम्बुजैः ।
युक्तं चतुर्भुजं शान्तं ध्यायन्नर्चेत्समाहितः ॥ ४६ ॥
इष्टापूर्तेन मामेवं यो यजेत समाहितः ।
लभते मयि सद्भक्तिं मत्स्मृतिः साधुसेवया ॥ ४७ ॥
प्रायेण भक्तियोगेन सत्सङ्गेन विनोद्धव ! ।
नोपायो विद्यते सध्र्यङ् प्रायणं हि सतामहम् ॥ ४८ ॥
अथैतत्परमं गुह्यं शृण्वतो यदुनन्दन ! ।
सुगोप्यमपि वक्ष्यामि त्वं मे भृत्यः सुहृत्सखा ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां
संहितायां वैयासिक्यामेकादशस्कन्धे
एकादशोऽध्यायः ॥ ११ ॥

भाषा टीका ।

संपूर्ण वार्षिक पर्वों में यात्रा बलिका विधान करना वैदिक पञ्च संस्कार पूर्वक अष्टाक्षर तथा तान्त्रिकद्वयमन्त्रादि ग्रहण पूर्वक दीक्षा लेना मेरे एकादशी जन्माष्टमी आदि व्रतों का धारण करना ॥ ३७ ॥

मेरी मूर्ति के स्थापन करने में श्रद्धा रखनी एकेला अथवा औरों के साथ मिलकर मंदिर का उद्यम करना बाग बगीचा पुष्प वाटिका ग्राम मंदिर कर्म में उद्यम करना ॥३८॥

मंदिर का मार्जन करना लीपना सेचन करना रंगवल्ली से मंडल बनाना निष्काम होकर दास की नाई मेरे मंदिर का कार्य करना ॥ ३९ ॥

अभिमान नहीं करना दंभ नहीं करना किए हुवे पुण्य का नहीं कहना दीपकादिक भी मेरे अर्पण करे पीछे उसमें अपना स्वत्व नहीं रखना ॥ ४० ॥

जो जो वस्तु लोक में अत्यंत इष्ट होवे और अपने को अति प्रिय लगे परंतु शास्त्र में निषिद्ध न होवे तो उस वस्तु का मेरे को अर्पण करे तो अनंत फल की प्राप्ति होवै ॥ ४१ ॥

हे भद्र ! उद्धवजी सूर्य अग्नि ब्राह्मण गउ वैष्णव आकाश वायु जल पृथिवी आत्मा संपूर्ण प्राणि मात्र इतने सब मेरे निमित्त से पूजा करने के स्थान हैं ॥ ४२ ॥

हे उद्धवजी सूर्य में वेद मन्त्रों के द्वारा उपस्थान से पूजन करै अग्नि में हविष से मेरा पूजन करै उत्तम ब्राह्मण में आतिथ्य भोजनादिक से गउन में घांस जल आदिक से ॥४३॥

वैष्णव में बंधु सरीका पूर्ण सत्कार से हृदयाकाश में ध्यान करके वायु मे मुख्य प्राण की दृष्टि से जल में तर्पण पुष्पादिकों से मेरा पूजन करै ॥ ४४ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

स्थण्डिले भुवि मन्त्रहृदयैः रहस्यमन्त्रन्यासैः ॥ ४५ ॥

सर्वाधिष्ठानेषु ध्येयमाह । धिष्ण्येष्विति । इत्यनेन मन्त्रप्रकारेण एषु धिष्ण्येषु ॥ ४६ ॥

उक्तायाः भक्तेः फलमाह । इष्टापूर्तेति । सद्भक्तिं दृढां भक्तिम् अस्याः भक्तेरन्तरङ्गसाधनमाह । इयं मत्स्मृतिः साधुसेवया भवति । यद्वा स्मृतिर्ज्ञानम् ततश्च दृढभक्तिमतः पुंसः साधुसेवया मज्ज्ञानं भवतीत्यर्थः ॥ ४७ ॥

ज्ञानभक्तिमार्गावुक्तौ तत्र ज्ञानमार्गादपि भक्तिमार्गः श्रेष्ठ इत्याह । प्रायेणेति । सत्सङ्गेन यो भक्तियोगस्तेन विनोपायः संसारतरणे न विद्यते सत्सङ्गेनेत्यत्र हेतुमाह । हि यस्मात्सतामहं प्रायणं प्रकृष्टमयनमाश्रयः अतः सत्सङ्गो मय्यन्तरङ्ग इत्यर्थः ॥४८॥

इदानीं सांख्ययोगादीनि साधनान्तरसव्यपेक्षाणि सव्यभिचाराणि च सत्सङ्गस्तु स्वतन्त्र एव समर्थः फलाव्यभिचारी चेति दर्शयितुमाह । अथेति । एतद्वक्ष्यमाणं परमं गुह्यमतः शृण्वित्यर्थः ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
एकादशोऽध्यायः ॥ ११ ॥

———

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

रहस्यमन्त्रन्यासैः ॐ हृदयाय नमः शिरसे स्वाहा शिखायै वषट् कवचाय हुमिति गोप्यमन्त्राणां पृथिव्यां स्थापनैः आत्मनि देहे आत्मानं त्वंपदार्थम् अयं ममात्मा तदधिष्ठानमिति बुद्ध्या भोगैर्यजेत क्षेत्रज्ञमन्तर्यामिरूपं मां सर्वभूतेषु सुखदुःखयोः समत्वदृष्ट्या यजेत ॥ ४५ ॥

सर्वाधिष्ठानेषु सूर्याद्येकादशसु अत्र सर्वत्र चतुर्भुजरूपध्याने सत्यपि पूजाप्रकारस्य द्वैविध्यं गवादिषु तु मन्दिरवापादिना यथा तदधिष्ठातृप्रतिमायाः परिचर्या स्यात्तथैव यवसादिना परिचर्या हृदयाकाशजलादौ तु साक्षात्तदधिष्ठातुरेवोपासनेति यवसादेरभक्ष्यत्वेन चतुर्भुजसम्प्रदानकत्वाऽसम्भवात् ॥ ४६ ॥

उक्तायाः साधनरूपायाः भक्तेः फलं प्रेमलक्षणां भक्तिम् अत्रेष्टशब्देन सप्तमस्कन्धोक्तानि अग्निहोत्रदर्शपौर्णमासचातुर्मास्यपशुयागवैश्वदेवबलिहरणान्युच्यन्ते पूर्तशब्देन सुरालयारामकूपवापीतडागप्रपान्नसत्राद्युच्यन्ते तत्राग्निहोत्रादीनां भक्तौ प्रवेशोऽन्तर्यामिरूपभगवदधिष्ठानत्वेनाग्न्यादिसन्तर्पणात् कूपारामादीनाञ्च तत्परिचर्यार्थं क्रियमाणत्वात् तत्र प्रवेशः अस्या दृढायाः अन्तरङ्गसाधनं मुख्याङ्गं सत्सङ्गः मत्स्मृतिः दृढा भक्तिः एकाङ्गरूपायाः स्मृतेः यावद्भक्तिसाधकत्वं सार्वाणिकमतो यद्वेति ज्ञानमत्र साक्षात्कारः ॥ ४७ ॥

तत्र मार्गद्वयमध्ये प्रायेणेति वितर्के यद्वा सर्वत्र साधारण्येनेति भक्तियोगस्य विशेषणम् ॥ ४८ ॥

साङ्ख्ययोगादीनीत्यादिना धर्मादीनां परिग्रहः तत्र साङ्ख्यं वैराग्यादिसापेक्षं योगः समाधिर्यमाद्यपेक्षः धर्मादीन्यपि धनक्लेशाद्यपेक्षाणि सव्यभिचारीणि भक्त्यभावे फलव्यभिचारवन्ति च स्वतन्त्रः वैराग्याद्यनपेक्ष एव साध्यं जनयितुं समर्थः फले भगवत्प्रसादलक्षणेऽव्यभिचारी च अथ अत एव परमं गुह्यम् अतो गुह्यत्वात् कृष्णसुहृत् व्रजसन्देशप्रापणलक्षणहितकर्ता सखा यन्त्रणाशून्यमित्रवृत्तिमान् ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धीये
श्रीराधारमणदासगोस्वामिकृतदीपिकादीपने टिप्पणे
एकादशोऽध्यायः ॥ ११ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

भोगैरात्मानमात्मनीति व्रतं विना नात्मा क्लेशयितव्य इत्यर्थः । समत्वं रागद्वेषराहित्यम् ॥ ४५ ॥

एषु सूर्यादिषु धिष्ण्येषु स्थानेषु ध्यायन्नर्चेदित्यन्वयः ॥४६–४८ ॥

गुह्यं श्रावयमर्थः ॥ ४९ ॥

इति श्रीमद्भागवतव्याख्याने एकादशस्कन्धीये
श्रीसुदर्शनसूरिकृतशुकपक्षीये
एकादशोऽध्यायः ॥ ११ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सूर्यात्मेत्यत्र सूर्यशब्देन चक्राब्जादिमण्डलसंस्कृतो देशो विवक्षितः तदाह । स्थण्डिल इति । मन्त्रहृदयैर्मूलमन्त्रहृदयाद्यङ्गमन्त्रन्यासैरात्मनि स्वात्मन्यात्मानं मां भोगैः शास्त्राविरुद्धकामैर्यजेत व्रतं विना नात्मा क्लेशयितव्य इत्यर्थः । सर्वभूतेषु देवमनुष्यादिशरीरेषु क्षेत्रज्ञं जीवशरीरकं मां समत्वेन रागद्वेषादिराहित्येन यजेत ॥ ४५ ॥

एतेषु सूर्यादिषु धिष्ण्येषु स्थानेष्वपि मद्रूपमेव ध्यायन्समाहितोऽवहितचित्तः समर्चेत् ॥ ४६ ॥

किञ्च इष्टं वैदिकं कर्म पूर्तं स्मार्तं तयोः समाहारस्तेन यः समाहितो मामेव यजेत सोऽपि मल्लिङ्गादिदर्शनादिकैरिव मयि सद्भक्तिं प्रेमात्मिकामविच्छिन्नां भक्तिं लभते उक्तसर्वलक्षणोपकृता सद्भक्तिः साधुसेवाफलमेवेत्युपसंहरति । मत्स्मृतिः साधुसेवयेति । मत्स्मृतिर्मद्भक्तिः सत्सङ्गमूलैव ॥ ४७ ॥

न ततोऽन्यः कश्चिन्मत्प्राप्त्युपायो विद्यते इत्याह । प्रायेणेति । हे उद्धव ! सत्सङ्गलब्धेन भक्तियोगेन विना समीचीनो मत्प्राप्त्युपायो न विद्यते प्रायेणेत्यनेन क्वचिन्न्यासयोगस्यापि उपायत्वं सत्सङ्गलब्धत्वं च विवक्षितं सत्सङ्गेनेत्यत्र हेतुमाह । हि यस्मादहं सतां प्रायणम् उपाय उपेयश्च ईयते इत्ययनं यन्त्यनेनेत्ययनमिति व्युत्पत्तिद्वयस्य विवक्षितत्वादुपायोपेयभावेनाभितोऽहं तदधीनः सत्सङ्गादेव मद्वशीकार इति भावः ॥ ४८ ॥

अथेत्थं निरूपितबह्वङ्गभक्तियोगस्य दुष्करत्वाभिप्रायमालक्ष्य प्रायणमित्यनेन सूचितं स्ववशीकरणोपायं न्यासयोगं विवक्षुस्तावत्तस्य परमगोप्यत्वमधिकारिविशेषायैवोपदेश्यत्वं च ख्यापयन् शुश्रूषामुत्पादयँश्च तत्कथनं प्रतिजानीते । अथैतदिति । सुगोप्यस्याप्युक्तौ हेतुतयोपात्तं भृत्यः सुहृत्सखेति विशेषणत्रयम् ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
एकादशोऽध्यायः ॥ ११ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

मन्त्रहृदयैर्नमोऽन्तैर्मन्त्रैः आत्मनि स्वशरीरे मनसि वा आत्मानमन्तर्यामिणं क्षेत्रज्ञं जीवान्तर्यामिणं सर्वभूतेषु समत्वेन एकप्रकारेण विकारमन्तरेण स्थितं भोगैः स्रग्गन्धादिभिः भोगो राज्ये धने सौख्ये इति आत्मशब्देनात्र जीवः किं न स्यात्तस्य पूजनस्य तन्त्रेषु विहितत्वात् क्षेत्रज्ञः पुरुषो ह्यात्मा संसारी चेतनो मत इत्यभिधानाच्चेति चेन्न—

"आत्मनिष्ठो हरिः पूज्य आत्मनामाशनादिकैः ।
तत्सम्बन्धादात्मशब्दो जीवस्याप्युपचारतः इति ॥

वचनादात्मा मुख्यो हरिरेवेति ज्ञायते तत्र विधानस्य हरेरधिष्ठानत्वेन पीठार्चनवत्तदर्चनोपपत्त्या सार्थकत्वात् ॥ ४५ ॥

एतेष्वधिष्ठानेषु ध्यानप्रकारमाह । धिष्ण्येष्विति । धिष्ण्येषु स्थानेषु ॥ ४६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

पूजाफलमाह । इष्टेति ॥ ४७ ॥

प्रायेणोत्यवधार्य्यां साङ्ख्येन यथार्थज्ञानेन सतां प्रकर्षेणायनमाश्रयः ॥ ४८ ॥

उत्तराध्याये वक्ष्यमाणार्थप्राशस्त्यं कथयति । अथेति । वक्तव्ये हेतुमाह । भृत्य इति । ज्ञानेन भर्तुं योग्यः सुपूजितं ह्यमनो यस्य सुहृत् आपदि हितकर्तृत्वात्सखा ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्

एकादशोऽध्यायः ॥ ११ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अयं ममात्मा तदधिष्ठानमिति बुद्ध्या भोगैरित्यादिक्षेत्रज्ञमन्तर्यामिरूपं मां समत्वेन सुखदुःखयोः द्वयोः समत्वदृष्ट्या ॥ ४५ ॥

धिष्ण्येति अत्र सर्वत्र चतुर्भुजस्यैवानुसंधाने सत्यपि द्विधा गतिः एकाधिष्ठानपरिचर्य्यैवाधिष्ठातुरुपासनालक्षणा मन्दिरलेपनादिना तदधिष्ठातृप्रतिष्ठाया इव यथा वैष्णवे बन्धुसत्कृत्या गोष्वङ्गयवसादिनेत्यादि यतो बन्धुसत्कारो वैष्णवविषयकः ईश्वरे तु प्रभुभाव उपदिश्यते ईश्वरे तदधीनेष्वित्यादौ तथा गोसम्प्रदानकमेव यवसादिभोजनदानं प्रयुज्यते न तु श्रीचतुर्भुजसंप्रदानकम् असम्भवत्वात् यद्यदिष्टतमं लोक इत्यादिपूर्वमुक्तम् अथान्या तु साक्षादधिष्ठातुरुपासनालक्षणा यथा हृदि खे ध्याननिष्ठया तोये द्रव्यैस्तोयपुरस्कृतैरित्यादि अत्राग्न्यादौ तदन्तर्यामिरूपस्यैव चिन्तनं कार्य्यं न जातुनिजप्रेमसेवाविशेषाभयस्वाभीष्टरूपविशेषस्य स तु सर्वथा परमसुकुमारत्वादिबुद्धिजनितया प्रीत्यैव सेवनीयः यथोक्तं श्रीभगवतैव वस्त्रोपवीताभरणेत्यादि तेषां तथा भक्तिरीत्या परमेश्वरस्यापि तथा बुद्धिः श्रूयते यथा नारदीये ।

> भक्तिग्राह्यो हृषीकेशो न धनैर्धरणीसुराः ।
> भक्त्या संपूजितो विष्णुः प्रददाति समीहितम् ॥
> जलेनापि जगन्नाथः पूजितः क्लेशहा हरिः ।
> परितोषं व्रजत्याशु तृषार्त्तः सुजलैर्यथेति ॥

अत्रैव दृष्टान्त उपजीव्यः वैपरीत्ये दोषश्च यथा ग्रीष्मे जलस्थस्य पूजा प्रशस्ता वर्षासु निन्दिता यदुक्तं गारुडे ।

> शुचिशुक्रगते काले ये ऽर्चयिष्यन्ति केशवम् ।
> जलस्थं विविधैः पुष्पैर्मुच्यन्ते यमयातनात् ॥
> घनागमे प्रकुर्वन्ति जलस्थं वै जनार्दनम् ।
> ये जना नृपतिश्रेष्ठ ! तेषां वै नरकं ध्रुवमिति ॥

एवमन्यत्रापि परिचर्य्याविधौ तत्तद्देशकालसुखदानि यतश्च विहितानि तद्विपरीतानि निषिद्धानि च विष्णुयामले विष्णोः सर्वर्तुचर्य्या चेति अत उक्तं यद्यदिष्टतममिति तथा तत्र तत्रेष्टमन्त्रध्यानस्थानं च सर्वर्त्तुसुखमयमनोहररूपरसगन्धस्पर्शशब्दमयत्वेनैव ध्यातुं विहितमस्ति अन्यथा तत्तदाग्रहवैयर्थ्यं स्यात् तस्मादग्न्यादौ तत्तदन्तर्यामिरूप एव भाव्य इति स्थितम् ॥ ४६॥

इष्टापूर्त्तेनेति । अत्रेष्टशब्देन सप्तमस्कन्धोक्तरीत्याग्निहोत्रदर्शपौर्णमासचातुर्मास्ययागपशुयागवैश्वदेवबलिहरणान्युच्यन्ते पूर्त्तशब्देन सुरालयारामकूपवापीतडागप्रपान्नसत्राण्युच्यन्ते एवमुक्तप्रकारेणेष्टापूर्त्तेन यो मां यजेत स मत्स्मृतिस्तत्र साधुसेवया सतां प्रसंगेन सद्भक्तिम् अन्तरङ्गभक्तिनिष्ठां प्राप्नोतीत्यर्थः।तत्राग्निहोत्रादीनां भक्तौ प्रवेशोऽग्न्यन्तर्यामिरूपभगवदधिष्ठानत्वेनाग्न्यादिसंतर्पणात् कूपारामादीनां च तत्परिचर्य्यार्थक्रियमाणत्वात्तत्र प्रवेशः ॥ ४७ ॥

प्रायेणेति वितर्के यद्वा सर्वत्र साधारणेन भक्तियोगेन विना उपायो न विद्यते तल्लक्षणाद्यपायः सत्संगेन विना न विद्यत इत्येवार्थः तत्र हेतुः प्रायणाम् ॥ ४८ ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे

एकादशोऽध्यायः ॥ ११ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

स्थण्डिले प्रक्षिप्तसंस्कृतायां भुवि मन्त्रहृदयैः रहस्यमन्त्रन्यासैः आत्मनि देहे आत्मानं जीवं भोगैरयं ममात्मापि मत्प्रेमोरधिष्ठानमिति बुद्ध्यैव दत्तैर्भोगैर्नतु लोभेन सर्वभूतेषु क्षेत्रज्ञमन्तर्यामिणं यजेत ॥ ४५ ॥

इत्येषु इत्यनेन प्रकारेण एषु धिष्ण्येषु चतुर्भुजामिति प्रायिकत्वेनोक्तं वस्तुतः श्रीरामाद्युपासका अपि स्वस्वमन्त्रध्येयं स्वरूपमेव ॥ ४६ ॥

इष्टापूर्त्तेनेति इष्टं हविषाग्नौ यजेत मामित्युपलक्षितं पूजादिकं पूर्त्तम् उद्यानोपवनेत्याद्युक्तं तेन सद्भक्तिं सतीमुत्तमां प्रेमलक्षणां मत्स्मृतिः मत्कर्तृका स्मृतिः साधुसेवयेति यस्तु साधूनाधिक्येन सेवते तं त्वहं सदा स्मरामीत्यर्थः ॥ ४७ ॥

ज्ञानभक्तिमार्गावुक्तौ वस्तुतस्तु संसारतरणाद्युपेयवस्तुना भक्तिरेवोपाय इत्याह । प्रायेणेति वितर्के इति सन्दर्भः यद्वा सत्सङ्गेन हेतुनैव यः प्रायेण भक्तियोगस्तेन विना नोपायो विद्यते प्रधानभूता केवला चेति द्विविधा भक्तिः साधुसङ्गेनैव भवेदिति व्याख्यातमेव । यत्र मोक्षसाधकं भक्तिमिश्रं ज्ञानं तत्र गुणभूता भक्तिर्या सा तु साधुसङ्गं विनापि भवेदित्यतोऽत्र प्रायग्रहणं तस्या भक्तेः तज्ज्ञानमेव कारणं यथा कर्षकस्य करवानादिना यत्पृथ्वीश्वरोपासनं तस्य कारणं कृषिरेव अन्यथा तस्या वैफल्यादिति प्रथमस्कन्ध एव व्याख्यातम् एवं च यत्कर्मभिर्यत्तपसेत्यादिभगवदुक्तेर्ज्ञानादिकं विनापि भक्तिः सर्वफलदात्री भक्त्या तु विना ज्ञानादिकं न मोक्षादिसाधकमिति तत्र तत्रापि भक्तिरेव तत्तत्फलदायिनी व्याख्येयेत्यतोऽन्य उपायोऽजागलस्तनन्यायेनैवेति केचिदाहुस्तत्रैव भगवदुक्तिरपि प्रमाणम्—

> तापत्रयेणाभिहतस्य घोरे सन्तप्यमानस्य भवाध्वनीह ।
> पश्यामि नान्यच्छरणं तवाङ्घ्रिद्वन्द्वातपत्रादमृताभिवर्षादि॥

त्वद्ध्रुवोक्तिरपि संसारसिन्धुमतिदुस्तरमुत्तितीर्षोर्नान्यः प्लवो भगवतः पुरुषोत्तमस्य । लीलाकथारसनिषेवणमन्तरेण पुंसो भवेद्विविधदुःखदवार्दितस्येति शुकोक्तिरपि—

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

किंवा योगेन सांख्येन न्याससवाध्याययोरपि ।
किम्वा श्रेयोभिरन्यैश्च न यत्रात्मप्रदो हरिः ॥

इति नारदोक्तेरपि सम्यक् प्राणयां सम्यक् प्रकृष्टमाश्रयः ॥ ४८ ॥
ब्रूयुः स्निग्धस्य शिष्यस्य गुरवो गुह्यमप्युतेति स्मृतेस्तुभ्यमहमनन्यप्रकाश्यमपि वस्तु वच्मीत्याह । अथैतादिति । सांख्ययोगादीनि साधनान्तरसव्यपेक्षाणि सव्यभिचारीणि च सत्सङ्गस्तु स्वतन्त्र एव समर्थः फलाव्यभिचारी चेति स्वाभिचरणाः ॥ ४९ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
एकादशे सङ्गतोऽत्रैकादशः सङ्गतः सताम् ॥ ११ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

स्थण्डिले भुवि मन्त्रहृदयैः रहस्यमन्त्रन्यासैः तत्प्रकारः गोपालतापन्यादिव्याख्यानादौ द्रष्टव्यः ॥ ४५ ॥
एतेषु सूर्यादिषु चतुर्भुजमित्युपलक्षणम्—
द्विभुजं ज्ञानमुद्राढ्यं वनमालिनमीश्वरम् ।
दिव्यालङ्करणोपेतं रत्नपङ्कजमाश्रितम् ॥
गोपगोपीगवावीतं सुरद्रुमलताश्रितम् ।
चिन्तयंश्चेतसा कृष्णं मुक्तो भवति संसृतेरिति ॥
श्रुत्युक्तस्य द्विभुजस्यापि ॥ ४६ ॥
इष्टापूर्तेन कर्मणा यो मामेव यजेत् तस्य साधुसेवया मत्स्मृतिर्मद्विषयकं ज्ञानं ततः स मयि भक्तिं लभते इत्यन्वयः ॥४७॥
हे उद्धव ! प्रायः सत्सङ्गेन लभ्यो यो भक्तियोगस्तेन विनोपायः मत्प्राप्त्युपायो न विद्यते यतः सतां प्रायणं प्रकृष्टमयनमाश्रयोऽहमेव सत्सङ्गादपि कस्यचित् मद्भक्तिर्न भवतीति भक्तेर्दौर्लभ्यसूचनाय प्रायोक्तिः ॥ ४८ ॥
एतद्वक्ष्यमाणं सत्सङ्गप्रभावं परमं गुह्यं वक्ष्यामि त्वं मे सुहृत्सखापि सन् भृत्यः अतः शृणु ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
एकादशाध्यायार्थप्रकाशः ॥ ११ ॥

भाषा टीका ।

पृथिवी की वेदी पर मन्त्रोंके न्यासों से उत्तम सात्त्विक प्रिय भोगादि कों से आत्मा में सम्पूर्ण भूतों में क्षेत्रज्ञ रूप परमेश्वर जान कर सम दृष्टि से मेरा यजन करै ॥ ४५ ॥

इन सब स्थानों में शंख चक्र गदा पद्म धारण किये हुये चार भुजा वाले शांत मेरे स्वरूप को ध्यान करके साव धान होकर अर्चन करै ॥ ४६ ॥

इस प्रकार से यज्ञादिकों से या मंदिर प्रतिष्ठादिक स जो सावधान चित्त होकर मेरा यजन करता है वह मेरे विषै उत्तम भक्ति को प्राप्त होता है और यदि इसी प्रकार साधु सेवा भी करै तो उसको सदा काल मेरा स्मरण बना रहता है ॥ ४७ ॥

हे उद्धव ! प्राय करके भक्ति योग के बिना सत्पुरुषों के संग बिना मुक्ति का उत्तम सहज उपाय दूसरा नहीं है क्योंकि सत्पुरुषों का तो केवल मैं ही आश्रय हूं ॥ ४८ ॥

हे यदुनंदन ! तुम श्रद्धा से सुनते हो तिस से अब मैं एक परम गुप्त बात भी कहता हूं क्योंकि तुम हमारे भृत्य भी हो सुहृद भी हो सखा भी हो एसा न होता तो नहीं कहते ॥ ४९ ॥

इति श्रीमद्भागवत एकादशस्कन्ध में एकादशाध्याय
भाषा टीका समाप्ता ॥ ११ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे एकादशोऽध्यायः ॥ ११ ॥

—:*:—

अथ द्वादशोऽध्यायः ।

---:*:---

श्रीभगवानुवाच ।

न रोधयति मां योगो न साङ्ख्यं धर्म एव च ।
न स्वाध्यायस्तपस्त्यागो नेष्टापूर्तं न दक्षिणा ॥ १ ॥
व्रतानि यज्ञश्छन्दांसि तीर्थानि नियमा यमाः ।
यथाऽवरुन्धे सत्सङ्गः सर्वसङ्गापहो हि माम् ॥ २ ॥
सत्सङ्गेन हि दैतेया यातुधाना मृगाः खगाः ।
गन्धर्वाप्सरसो नागाः सिद्धाश्चारणगुह्यकाः ॥ ३ ॥
विद्याधरा मनुष्येषु वैश्याः शूद्राः स्त्रियोऽन्त्यजाः ।
रजस्तमःप्रकृतयस्तस्मिंस्तस्मिन् युगेऽनघ ! ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

द्वादशे साधुसङ्गस्य महिमा वर्णितः पुरा ।
कर्मानुष्ठानतत्त्यागव्यवस्था च ततः परम् ॥

न रोधयति न वशीकरोति योग आसनप्राणायामादिः साङ्ख्यं तत्त्वानां विवेकः धर्मः सामान्यतोऽहिंसादिः स्वाध्यायो वेदजपः तपः कृच्छ्रादि त्यागः संन्यासः इष्टापूर्तमिष्टं च पूर्तं च तत्रेष्टमग्निहोत्रादि पूर्तं कूपारामादिनिर्माणम् दक्षिणाशब्देन सामान्यतो दानं लक्ष्यते ॥ १ ॥

व्रतानि एकादश्युपवासादीनि यज्ञो देवपूजा छन्दांसि रहस्यमन्त्राः अवरुन्धे वशीकरोति ॥२॥

यातुधाना राक्षसाः ॥ ३—४ ॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

ततः परं साधुसङ्गमहिमावर्णनानन्तरम् ॥ ० ॥

न रोधयतीति युग्मकं यथा सत्सङ्गो मां वशीकरोति तथा योगादयो नेत्युक्त्या तेऽपि किञ्चिद्वशीकुर्वन्तीत्यायातं तथाच भक्तिमिश्रा एव ते ज्ञेयाः न साधारणाः अतएव व्रतान्येकादश्यादीनीति टीकाकृद्भिर्व्याख्यातं नचैतावता नित्यव्रतानामकर्त्तव्यत्वप्रसङ्ग इति वाच्यम् एकस्य फलाधिक्यप्रशंसयान्यस्य नित्यत्वनिराकरणायोगात् कर्माधिकारिणः विप्रमुखहुतप्रसंशयाग्निहोत्राऽपरित्यागवत् भक्त्यधिकारिणश्च भक्तपूजाभ्यधिकत्वश्रवणात् हर्यर्चनाऽपरित्यागवच्च तत्त्यागायोगाच्च अन्यथा वैष्णवो यदि भुञ्जीत एकादश्यां प्रमादतः । विष्णवर्चनं वृथा तस्य नरकं घोरमाप्नुयादिति गौतमीयादि वचनव्याकोपः स्यात् ॥ १ ॥ २ ॥

सत्सङ्गेनेति सार्द्धयुग्मकम् ॥ ३ ॥ ४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

न रोधयति इत्थं न करोति न वशीकरोतीति यावत् ॥१-४॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इत्थं बह्वङ्गके बहुवयःकालादिसाध्ये दुष्करे भक्तियोगे उपदिष्टे तत्साध्यतल्लिप्साऽशक्तिभ्यामाविलमानसमुद्धवमालक्ष्य सुकरोपायमात्मनिःक्षेपापरपर्यायं न्यासयोगात्मकं वर्णयिष्यंस्तावत्तस्यानितरोपायसाध्यसाधनत्वख्यापनाय कैमुत्यन्यायेन तदुपायनिष्ठसत्सङ्गस्यैवानितरसाध्यसाधनतामाह । नेति । मां न रोधयति न इत्थं करोति न वशीकरोतीति यावत् । योगः वर्णाश्रमोचितकर्मयोगः प्राणायामयोगो वा सांख्यं प्रकृतिविविक्तात्मोपासनं धर्मः अहिंसादिरूपः स्वाध्यायो वेदाध्ययनं तपोऽनशनादि इष्टं यागादि वैदिकं कर्म पूर्तं स्मार्त्तं तयोः समाहारः त्यागः सामान्यतो दानं दक्षिणा क्रत्वादिषादृगुणयार्थं दानम् ॥ १ ॥

व्रतान्येकादश्युपवासादीनि यज्ञाः पञ्च महायज्ञाः छन्दांसि रहस्यमन्त्राः तीर्थानि गङ्गादीनि नियमाः शौचाचमनादयः । यमाः बाह्याभ्यन्तरेन्द्रियनियमनोपायाः यथा सत्सङ्गो मामवरुन्धे

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

वशीकरोति तथैते मां नावरुन्धते कुतः हि यस्मात्सत्सङ्गः सर्वसङ्गापहः मनसः सर्वेषु मद्व्यतिरिक्तेषु सङ्गमपहन्तीति तथा मनसः सर्वसङ्गापहारेण मदेकसङ्गावहः योगादयस्तु नैवं विधा इति भावः ॥ २ ॥

यद्यपि योगसांख्यादीनां चित्तनैर्मल्यैकाग्रतापादनद्वारा भक्तियोगोत्पादनेन तद्द्वारा भगवद्वशीकारकारणत्ववत्सत्सङ्गतेरपि गुरूपसत्त्यापादनादिप्रणाड्यैव तद्वशीकारकारणत्वं न साक्षादिति न विशेषस्तथापि सतामात्मनां कथं चित्सम्बन्धिनां च स्वविद्यामाहात्म्यप्रसन्नपरमपुरुषसङ्कल्पेन मोक्षकत्वप्रतिपादनाय यथावरुन्धे सत्सङ्ग इत्युक्तं तदाह । सत्सङ्गेनेति । सतः सङ्गः सम्बन्धः स च तद्विद्यायोनिवंश्यत्वतदभिमानविषयदेशप्रभवत्वतद्दर्शनस्पर्शनादिविषयत्वादिरूपेण बहुविधः "नास्याब्रह्मवित्कुले भवती"ति श्रुतेः—

स यं स्पृशति पाणिभ्यां यं यं पश्यति चक्षुषा ।
स्थावराण्यपि मुच्यन्ते किंपुनर्बान्धवा जनाः ॥

इत्यभियुक्तोक्तेश्च यातुधाना राक्षसाः नागा गजाः ॥ ३ ॥

रजस्तमःप्रकृतय इत्यनेनात्यन्तमोक्षोपायशून्यत्वमभिप्रेतम् ॥४॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भगवद्गुणोत्कर्षज्ञानपूर्विका भक्तिरेव परमपुरुषार्थान्तरङ्गमितीममर्थं समर्थयते तत्रादौ गुणोत्कर्षज्ञानाननुरक्तयोगादीनां विवक्षितपुरुषार्थसाधनत्वं न भवतीत्याह । न रोधयतीति । योगो ध्यानं रोधयति वशीकरोति । त्यागो दानं यथा मयि सङ्गः गुणस्मृप्रीतिर्भक्तिपूर्विका सर्वपूर्णगुणत्वमतिर्यथा मामवरुन्धे वशीकरोति तथा योगादयो न रोधयन्ति—

सङ्गस्तु गुणसम्प्रीतिर्गुणावरत्वेति निश्चयात् ।
स चेद्दृशो भवेत्तेन मुच्यते नात्र संशयः ॥
अपरोक्षदृशेर्हेतुर्भवेत्स स्याद्यदि क्षमः ।
अन्यथा सुखभागेव मद्दृशिर्मोक्षकारणमिति ॥

वचनादुक्त एवार्थः न तु सम्बन्धमात्रम् ॥ १—२ ॥

भगवान् उक्तमर्थं प्रख्यापयति । मत्सङ्गेनेति । दैतेयाः प्रह्लादादयः बहवो मत्सङ्गेन मत्पदं प्राप्ताः त्वाष्ट्रको वृत्रः अवन्तिकोऽद्भुतो भिक्षुः यातुधानाः इत्याद्युक्तं शृङ्गग्राहिकतया दर्शयितुं विभीषण इत्यादिषु पुनर्वचनं वणिक् तुलाधारः मयो नामा शूद्रः ते गोप्यादयो मामुपागता इत्यन्वयः ॥ ३—६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अथ सर्वस्यैव भागवतचिन्हधारिमात्रस्य तु यथायोग्यं सेवाविधानं तत्र महाभागवतसेवा द्विविधा प्रसङ्गरूपा परिचर्यारूपा च तत्र प्रसङ्गरूपामाह । न रोधयतीति । पूर्वाध्यायान्ते मत्स्मृतिः साधुसेवयेत्यनेन सत्सङ्गस्य सेवापेक्षत्वमुक्तं अत तस्य स्वातन्त्र्येण यथेष्टफलदातृत्वं सर्वापेक्षया परमसामर्थ्यञ्च यत्तु परमगुह्यत्वमुपदिष्टम् अथैतदित्यादिना तेद्तत् परमगुह्यत्वमाह । न रोधयतीति युग्मकेन । अत्र तु हविषाग्नौ यजते मामित्यादौ अग्निहोत्राद्युपलक्षितं पूर्त्तमुद्यानोपवनाक्रीडत्याद्युपलक्षितं ज्ञेयं ततश्च यथा सत्सङ्गो मामवरुन्धे वशीकरोति तथा योगो न साङ्ख्यमित्यादिकोऽन्वयः ततस्तेऽपि किञ्चिद्वशीकुर्वन्तीत्यर्थलब्धेर्भगवत्परा एव ज्ञेयाः न साधारणाः अतएव व्रतान्येकादश्यादीनीति टीकाकारः नचैतावता तेषां नित्यानां वैष्णवव्रतानामकर्त्तव्यत्वं प्राप्तम् एकस्य फलातिशयसामर्थ्यप्रशंसयेतरस्य नित्यत्वनिराकरणायोगात् तथा कर्माधिकारिणः नह्यग्निमुखतोऽयं वै भगवान् सर्वयज्ञभुक् इज्यते हविषा राजन् ! यथा विप्रमुखे हुतैरिति श्रुत्वापि पूर्वोक्तमग्निहोत्रादिना यजेदित्यादि विधिं न परित्यक्तुं शक्नुवन्ति तद्वत् भक्त्यधिकारिणश्च यथा मद्भक्तपूजाभ्यधिकेति श्रुत्वापि दीक्षानन्तरं नित्यतया प्राप्तां भगवत्पूजां त्यक्तुं न शक्नुवन्ति तद्वदिति अत एव षड्भिर्मासोपवासैस्तु यत्फलं परिकीर्तितं विष्णोर्नैवेद्यसिक्थेन तत्फलं भुञ्जतां कलावित्यपि न बाधकम् एकादश्यादौ हि नित्यत्वेऽप्यानुषङ्गिकमेव महाफलदत्वं तत्र तत्र गतम् अतएव नित्यत्वकरणार्थमपि तादृशवैष्णवं व्रतमवश्यमेव कर्त्तव्यमित्यागतं नित्यं वैष्णवव्रतत्वादिकं एकादश्यादाववर्चनप्रसङ्गे किञ्चिद्दर्शयिष्यामः अतः पूर्वाध्याये टीकाकारैरपि आज्ञायैव गुणान् दोषानित्यत्र विद्धैकादशीकृष्णैकादश्यनुपवासनिवेद्यभास्त्रादयो ये भक्तिविरुद्धा धर्मास्तान् संत्यज्येत्यर्थ इत्युक्तं प्रथमे श्रीभीष्मयुधिष्ठिरसम्वादे भगवद्धर्मानित्यत्र हरितोषणान् द्वादश्यादिनियमरूपानिति व्याख्यातं व्रतानि चरेद्धरितोषणानीत्यत्र तृतीये एकादश्यादीनीति अतएव भगवन्महाप्रसादैकव्रतस्य श्रीमदम्बरीषस्य सच्छिरोमणेराचारदर्शनया तदेव निश्चीयते अतएव श्रीगौतमेनापि निर्णीय स्वतन्त्रे लिखितं वैष्णवो यदि भुञ्जीत एकादश्यां प्रमादतः । विष्णवर्चनं वृथा तस्य नरकं घोरमाप्नुयादिति ॥ १ ॥ २ ॥

अथ प्रस्तुतमनुसरामः वशीकरणमत्र द्विविधं मुख्यं गौणञ्च तत्र मुख्येन प्रेम लभ्यते अस्त्वेवमङ्ग भजतां भगवान् मुकुन्दो मुक्तिं ददाति कर्हिचित् स्म न भक्तियोगमिति न्यायेन । अतएव गौणेनान्यत् फलं तत्र मुख्यं श्रीगोप्यादौ गौणं वाणादौ उत्तर एव स्वीकरणं फलदानोन्मुखीकरणतयोपचर्यते तद्वशीकरणे दृष्टान्तानाह । सत्सङ्गेनेत्यादि चतुर्भिः । तत्र सत्सङ्गेनेति सार्द्धयुग्मकं दैतेयास्तदुपलक्षिताः असुरा दानवाश्च राक्षसजातिषु दिग्दर्शनम् ॥ ३ ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

द्वादशे साधुसंगस्य महिमोक्तो व्रजौकसाम् ।
प्रेम्णः सर्वमहोत्कर्षः सूचिता संशयच्छिदा ॥

योगः आसनप्राणायामादिः सांख्यमात्मानात्मविवेकः धर्मोऽहिंसादिः स्वाध्यायो वेदपाठः तपः कृच्छ्रादि त्यागः संन्यासः इष्टापूर्त्तम् इष्टं च पूर्त्तं च तत्रेष्टमग्निहोत्रादि पूर्त्तं कूपारामादिनिर्माणं दक्षिणाशब्देन सामान्यतो दानं लक्ष्यते ॥ १ ॥

व्रतानि चातुर्मास्यादीनि यज्ञो देवपूजा छन्दांसि रहस्यमन्त्राः न राधयन्तीति प्रत्येकेनान्वयाद्येकत्वं व्रतानीत्यादौ वचनविपरिणामेन न रोधयन्तीत्यर्थः । रुधेर्वशीकरणार्थकत्वात् योगादयो

बहवो मत्पदं प्राप्तास्त्वाष्ट्रकायाधवादयः ।
वृषपर्वा बलिर्बाणो मयश्चाथ विभीषणः ॥ ५ ॥
सुग्रीवो हनुमानृक्षो गजो गृध्रो वणिक्पथः ।
व्याधः कुब्जा व्रजे गोप्यो यज्ञपत्न्यस्तथापरे ॥ ६ ॥
तेनाधीतश्रुतिगणा नोपासितमहत्तमाः ।
अव्रतातप्ततपसः मत्सङ्गान्मामुपागताः ॥ ७ ॥
केवलेन हि भावेन गोप्यो गावो नगा मृगाः ।
येऽन्ये मूढधियो नागाः सिद्धा मामीयुरञ्जसा ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

न मद्वशीकारप्रयोजका इति तैरहमष्टाङ्गयोगिप्रभृतिभिर्न वशीकृतो न प्राप्तः स्यामिति फलितोऽर्थः । न साधयति मां योगो न सांख्यं धर्म उद्धव ! न स्वाध्यायस्तपस्त्यागो यथा भक्तिर्ममोर्जिता । भक्त्याहमेकया ग्राह्य इत्यग्रिमवाक्येनैकार्थ्यात् योगादयो न मत्प्राप्त्युपाया इत्यतो नोपायो विद्यत इति पूर्वोक्तिरेव दृढीकृता सत्संगो यथाऽवरुन्धे वशीकरोतीत्यग्रयन्तप्रयोगेण भक्त्युत्पत्तेः पूर्वमपि स एव स्वयं मां वशीकुर्यात् किं पुनर्भक्तिजनयित्वेत्यर्थो लभ्यते । अत्र यथाशब्दस्तत्र च यथा शब्दो यथावदित्यर्थ एव प्रयुक्तः । भक्त्याहमेकया ग्राह्य इत्यग्रिमवाक्ये एकयेति पदप्रयोगादित्येके योगादीनामपि भक्तिमिश्रत्वात् किञ्चिद्वशीकारत्वमस्त्येवेत्यतो यथाशब्दः सार्थक इत्यपरे प्राहुः सर्वसङ्गापहः सार्वत्रिकासक्तिनिरासक इति वशीकारे हेतुः ॥ ॥ २ ॥

वशीकरणमत्रगौणं मुख्यं च यथा सम्भवं बाणादौ श्रीगोप्यादौ च दर्शयति । सत्संगेनेति चतुर्भिः । सन्तः प्रधानीभूतभक्तिमन्तः केवलभक्तिमन्तश्च तत्र पूर्वेषां संगिभिर्भगवद्वशीकारो गौणः उत्तरेषां तु मुख्य इति ज्ञेयं यातुधाना राक्षसाः ॥ ३ ॥ ४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

द्वादशे साधुसङ्गस्य महिमा तदनन्तरं शरणागतिः शरण्यस्य सर्वात्मत्वं च वर्ण्यते । प्रतिज्ञातमाह । नेत्यादिना । न रोधयति न हृदि स्थापयति स्वाध्यायादयः सिद्धान्तोपयोगिन एव । यथा सत्सङ्गो मां रोधयति तथा न मां रोधयन्ति यदा तदा सिद्धान्तविरुद्धं योगादिशास्त्रत्रयं च सुतरां नैव रोधयतीति द्वयोरन्वयः । तत्र योगः पतञ्जलिनामकेन केनापि ऋषिणा प्रतिपादितः चित्तवृत्तिनिरोधलक्षणः सांख्यं भगवद्व्यतिरिक्तकपिलकृतं तत्त्वसंख्यानम् धर्मो जैमिन्युक्तः स्वाध्यायो विधिप्राप्तोपनयनपूर्वको वेदाभ्यासः तपः आलोचनात्मकं ज्ञानं त्यागो वैराग्यम् इष्टापूर्तम् इष्टं च पूर्तं च तत्रेष्टं श्रौतं पूर्तं स्मार्तं कर्म दक्षिणा दानम् ॥ १ ॥

व्रतानि हरिवासरोपवासादीनि यज्ञः पूजा छन्दांसि रहस्यमन्त्राः यथा स्वाध्यायादिन्यासमन्त्राः यथा स्वाध्यायादितात्पर्यार्थावधारणहेतुतया सत्सङ्गः मां सर्वेषां स्वाध्यायादीनां फलभूतमवरुन्धेत् आत्मसात्करोति यतः सर्वेषूकेषु स्वाध्यायादिसाधनेषु यः सङ्गः मनोऽध्यासङ्गः तात्पर्याग्रहकत्वरूपो दोषस्तदपहः ॥ २ ॥

यातुधानाः राक्षसाः ॥ ३—४ ॥

भाषा टीका ।

श्रीभगवान् उवाच ।

सब संसारी संगों का दूर करने वाला सत्संग जैसे मेरे को वश करता है तैसे योग तथा सांख्य धर्म वेदाध्ययन तप त्याग यज्ञयागादिक मंदिर निर्माणादिक दक्षिणा व्रत यज्ञ वेद मन्त्र जप तीर्थ यम नियम ये सब मेरे को वश नहीं कर सकते हैं ॥ १—२ ॥

हे अनघ उद्धवजी ! सत्संगही से दैत्य राक्षस मृग पक्षी गंधर्व अप्सरा नाग सिद्ध चारण गुह्यक विद्याधर मनुष्यों में वैश्य शूद्र स्त्री अन्त्यज रजोगुण तमोगुण स्वभाव वाले तिस तिस युग में मेरे पदको प्राप्त भये हैं ॥ ३—४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

त्वाष्ट्रो वृत्रः कायाधवः प्रल्हादः ॥ ५ ॥

ऋक्षो जाम्बवान् गृध्रो जटायुः वणिक्पथस्तुलाधारः व्याधो धर्मव्याधः यज्ञपत्न्यो दीक्षितभार्याः ॥ ६ ॥

तेषां सत्सङ्गव्यतिरिक्तसाधनान्तराभावमाह । त इति । न अधीताः श्रुतिगणा यैः तदर्थं च नोपासिता महत्तमा यैस्ते तथा किञ्च अव्रतातप्ततपसः न व्रतानि येषां न तप्तानि तपांसि यैस्ते च ते च तथा मत्सङ्गादिति सद्भिः सङ्गो नाम मयैव सङ्ग इत्यभिप्रेत्योक्तम् यद्वा स्वसङ्गस्यापि सत्सङ्गत्वं विवक्ष्यते स्वस्यापि सत्वात् यद्वा मदीयसङ्गादित्यर्थः ॥ ७ ॥

तत्र वृत्रादीनां भवतु नाम कथञ्चित्साधनान्तरं गोपीप्रभृतीनां तु नान्यदस्तीत्याह । केवलेनेति । सत्सङ्गलब्धेन केवलेन भावेन प्रीत्या नगा यमलार्जुनादयः नागाः कालियादयः यद्वा तदानीं

श्रीधरस्वामिकृतभावार्थदीपिका ।

लतानां सर्वतरुगुल्मादीनामपि भगवति भावोऽस्तीति गम्यते तदुक्तं भगवतैव—

अहो अमी देववरामरार्चितं पादाम्बुजं ते सुमनःफलार्हणाम्
नमन्त्युपादाय शिखाभिरात्मनस्तमोऽपहत्यै तरुजन्म यत्कृतमि-त्यादि सिद्धाः कृतार्थाः सन्त ईयुः प्रापुः ॥ ८ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी ।

कयाधोर्दानव्या अपत्यं कायाधवः प्रह्लादः तत्र वृत्रस्य सत्सङ्गः प्राग्जन्मनि श्रीनारदाङ्गिरसोः सङ्गः प्रह्लादस्य तु गर्भे श्रीनारदसङ्गः आदिशब्दगृहीतान् कतिचिद्गणयति वृषपर्वा दानवः अस्य जातमात्रस्य मातृपरित्यक्तत्वान्मुनिपालितत्वेन मुनिसङ्गः पुराणान्तरप्रसिद्धो ज्ञेयः बलेः श्रीप्रह्लादसङ्गः बाणस्यापि बलिशम्भुसङ्गः मयस्यापि सभानिर्माणादौ पाण्डवसङ्गः विभीषणस्य हनुमत्सङ्गः ॥ ५ ॥

सुग्रीवस्य हनुमत्सङ्गः हनुमतस्तयोर्भगवद्रूपसत्सङ्गः गजेन्द्रस्य पूर्वजन्मनि सत्सङ्ग उत्तरजन्मान्ते भगवत्सङ्गः गृध्रस्य गरुडदशरथादिसङ्गः वणिक्पथस्य महाभारते जाजलिमुनिगर्वप्रसङ्गे प्रोक्तमहिम्नः श्रीनारदादिसङ्गोऽन्वेषणीयः धर्मव्याधस्य हि आदिवाराहे इयं कथा वसुनामा कश्चिद्वैष्णवो राजासीत् तेन च मृगभ्रान्त्या हतः कश्चिद्ब्राह्मणो ब्रह्मराक्षसः सन् राज्ञः प्रापञ्चिकविष्णुलोकगमनसमये शरीराविष्टो बभूव तद्रोगान्ते राजतां प्राप्तस्य तस्य ब्रह्मपराख्यस्तवपाठतेजसा यदि देहान्निर्गतस्तदा तत्कृतधर्मव्याधसंज्ञः सन् जगन्नाथं दृष्ट्वा स्तुत्वा तत्सायुज्यमापेति कुब्जायाः पूर्वजन्मनि नारदसङ्गः श्रीहरिवंशप्रसिद्ध एव गोपीनां च साधनसिद्धानां नित्यसिद्धगोपीसङ्ग एव यज्ञपत्नीनां च श्रीकृष्णगुणकथकलोकसङ्गः अपरे दैतेयादयः ॥ ६ ॥

तदर्थं श्रुतिगणाध्ययनार्थं पूर्वार्थे सत्सङ्गे स्वसङ्गत्वमारोपितं तन्नाभिधातो दुर्बलगतो यद्वेति तथाच स्वस्यापि सत्त्वात् स्वसङ्गोऽपि सत्सङ्ग इति विवक्षितं किन्तु प्रसिद्धिविच्युतिस्तु तदवस्थैव सच्छब्देन वैष्णवानामेव प्रसिद्धत्वादतः पुनर्यद्वेति अत्र मम ये सम्बन्धिनस्तेषां सङ्गादिति मध्यपदलोपी समासः अतएव मदीयसङ्गादित्यर्थ इत्युक्तम् ॥ ७ ॥

तत्र तेषु सत्सु मध्ये सत्सङ्गलब्धेनेति प्रकरणवशादध्याहृतं पूर्वार्थे नगनागशब्दाभ्यां प्रधानानामेव कृतार्थताऽभिप्रेता न सर्वेषामतो यद्वेति ॥ ८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

त्वाष्ट्रः त्वष्टुः पुत्रः बाणो मयश्च प्रसिद्धौ बाणमयाभ्यामन्ये विभीषणादयो मोक्ष्यन्त एवेति भगवत्सङ्कल्पस्य दृढत्वाम्मामुपागता इत्युक्तिः ॥ ५ ॥

गृध्रो जटायुः अत्र तस्य मुमुक्षुत्वं श्रीमति रामायणे अपरावर्तिनामिति पदस्य मुक्तिविषयत्वे सति घटते नतु युद्धात् परावृत्तिपरत्वे वणिक्पथः तुलाधारः व्याधः धर्मव्याधः भगवदीयैस्त्वपीक्षणवेणुस्वनापहृतहृदयतया तमेव ध्यायतां प्रकृतिविशेषमोक्षः सम्भवतीत्यनेनैव वचनबलेनाभ्युपगन्तव्यम् ॥ ६—७ ॥

नगा इति मृगविशेषणं वंशस्वनाकृष्टतया निश्चलाः यद्वाऽपि वृक्षाः परिम्लाना इति न्यायेन अन्तः संज्ञा वृक्षाणामपि तत्संनिकर्षविप्रकर्षज्ञानितया भगवदनुकम्प्यत्वसम्भवः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

त्वाष्ट्रो वृत्रासुरः कायाधवः प्रह्लादः तावादी येषां ते बहवो मत्पदं प्राप्ता इति सम्बन्धः यद्वा दैतेयादिषु कांश्चित्साधून्निर्दिशति त्वाष्ट्रकायाधवादय इत्यादिना बाणो मयश्च प्रसिद्धौ ॥ ५ ॥

अथ मृगेषु साधूनाह । सुग्रीवो हनुमानिति ऋक्षो जाम्बवान् पशुष्वाह । गज इति गजो गजेन्द्रः अथ पक्षिष्वाह । गृध्र इति गृध्रो जटायुः तस्य तु मुमुक्षुत्वं श्रीमति रामायणे—

> या गतिर्यज्ञशीलानामाहिताग्नेश्च या गतिः ।
> अपरावर्तिनां या च या च भूमिप्रदायिनाम् ॥
> मया त्वं समनुज्ञातो गच्छ लोकाननुत्तमानिति ।

प्रसिद्धम् अपरावर्तिनां या गतिरनुत्तमान् लोकान् गच्छेति मुक्तिविषयत्व एव घटते नतु युद्धे अपरावर्तिगतिपरत्वे तत्प्राप्यलोकानामनुत्तमत्वाभावात् अथ वैश्येष्वाह वणिक्पथ इति । वणिक्पथः तुलाधाराख्यः अन्त्यजेष्वाह व्याध इति व्याधो धर्मव्याधः स्त्रीष्वाह कुब्जा व्रजे गोप्यो यज्ञपत्न्य इति । यज्ञपत्न्यो ब्राह्मण्यः कुब्जादीनां केनापि भावेन भगवत्सम्बन्धसद्भावात् भागवतत्वमस्त्येव तथा पर इत्येतदनुक्तसंग्राहकं ज्ञेयम् ॥ ६ ॥

ते त्वाष्ट्रकायाधवादिसम्बन्धिनः न अधीताः श्रुतिगणा यैस्ते न उपासिता महत्तमाः साधवो यैस्ते न सन्ति व्रतानि येषां ते न तप्तं तपो यैस्ते अत्र सन्धिरार्षः किन्तु सतां त्वाष्ट्रादीनां सङ्गान्मामुपागताः प्राप्ताः स्वसङ्कल्पस्य दृढत्वख्यापनाय मामुपागता इत्युक्तं मोक्ष्यन्त एवेत इत्यर्थः । नाधीतश्रुतिगणा इत्यादिविशेषणैरुपायान्तरशून्यत्वमेव ख्याप्यते ॥ ७ ॥

ननु युक्तमेतद्भगवद्याथात्म्याभिज्ञानां त्वाष्ट्रादीनां तत्सम्बन्धिनामन्येषां च मुक्तिरिति । इदं त्वयुक्तं यत्केवलं कामनादिभावेन त्वामनुवृत्तवतीनां गोप्यादीनामिति अतो न तासां मुक्तिः कुतस्तत्सम्बन्धिनामित्यत आह । केवलेनेति । भावोऽत्र कामभयद्वेषादिरूपाभिप्रायविशेषपरः भावनापरपर्यायदर्शनस्पर्शनादिरूपधात्वर्थपरश्च तस्य कैवल्यं नाम परत्वमुत्कृष्टत्वमिति यावत् तद्यथायोग्यं योज्यं तत्र गोप्यः केवलेन तीव्रेण भावेन कामात्मकेन गावो नगा मृगाश्च तस्य सादरं मदीक्षणस्पर्शनादिरूपेण भावेन ये चान्ये मूढधियः तमोगुणावृतधियः केवलतमोगुणप्रधाना इत्यर्थः केवलेन भावेन भगवद्द्वेषात्मकेन नगा यमलार्जुनादयः नागाः कालीयादयः तेऽपि सिद्धा मुक्त्यर्हाः मदीक्षणस्पर्शनादिभिर्निरस्ताखिलमुक्तिप्रतिबन्धकाः सन्तोऽञ्जसाऽनायासेन मामीयुः प्रापुः नगा इति मृगविशेषणं वा तत्र नगाः निश्चलाः वंशस्वनाकृष्टचित्त-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

तयेति भावः। यद्वा मापिवृक्षाःपरिम्लाना इति न्यायेनान्तःसंज्ञानां वृक्षाणामपि तत्सन्निकर्षविप्रकर्षादिकत्वे सति हर्षम्लान्यादि- तथा कथंचिद्भावसम्भवाभिप्रायेण नगा इत्युक्तमिति सर्वत- रुगुल्मलतादिपर एव नगशब्दः गवादय एव केनापि भावेन मामीयुः किम्पुनर्गोप्यः अतस्तास्तत्तत्सम्बन्धिनश्च मामापुरेवेति भावः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

साधनं विना त्वामुपागताश्चेत्सर्वे किं नाप्नुवन्तीति तत्राह। मत्सङ्गादिति। गुणसम्प्रीतिरपि न वेदादिभ्य उत्पन्नेत्याह। नाधीतेति ॥ ७ ॥

तर्हि केनेत्यत्राह। केवलेनेति। केवलेन निर्दोषेण भावेन भक्तियोगेन केवलेनेति विशेषणान्न द्वेषयुक्ता भक्तिर्मुक्तिसाधनं ज्ञात्वापि हरिविद्वेषी तमो याति न संशय इति वचनात् भावे- नापरोक्षज्ञानोत्पादकस्वभावेनेति विशेषणाद्विशेषरूपाज्ञानेऽपि मोक्षो नियतः—

> विशेषरूपस्याज्ञोऽपि गुणास्त्वेति निश्चयः।
> गुणसम्प्रीतिमान्नित्यं तं दृष्ट्वा मुक्तिमेष्यतीत्युक्तेः ॥

ज्ञानोत्पत्तेः पूर्वमपि भगवल्लीलाद्यनुकारेण परमानन्दः स्यादि- त्यतो भावेनेति अथवा सुखभागेव स्याद्यावद्दर्शनोपग इति स्मृतेः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

त्वाष्ट्रेत्यादि। वृत्रस्य सत्संगः प्राग्जन्मनि श्रीनारदाङ्गिरसोः संगः श्रीसंकर्षणसंगश्च प्रसिद्धः कयाधुपुत्रः श्रीप्रह्लादो दैत्यः अस्य गर्भे श्रीनारदसंगः आदिशब्दगृहीतान् पूर्वोक्तजातिक्रमेण कांश्चिद्गणयति। वृषेति। वृषपर्वा दानवः अयं हि जातमात्रो मातृ- परित्यक्तो मुनिपालितो विष्णुभक्तो बभूवेति पुराणान्तरप्रसिद्धिः बलेः श्रीप्रह्लादसंगः श्रीवामनसंगश्च तदनन्तरमेव भक्त्युद्बोध- दर्शनात् बाणस्य बलिमहेशभगवत्संगः अस्य भुजकर्तनानन्तरं ज्ञातविष्णुमहिम्नो महाभागवतमहेशप्राप्तिरेव स्वप्राप्तिरित्यु- च्यते मयो दानवः अस्य सभानिर्माणादौ पाण्डवसंगो भग- वत्संगश्च अन्ते तत्प्राप्तिस्तु ज्ञेया विभीषणो यातुधानः अस्य हनुमत्संगो भगवत्संगश्च ॥ ५ ॥

सुग्रीवाद्या गजान्ता मृगाः तत्र ऋक्षस्य भगवत्संगः गजो गजेन्द्रः अस्य पूर्वजन्मनि सत्संगः उत्तरजन्मान्ते भगवत्संगः गृध्रस्य श्रीगरुडदशरथादिसंगः श्रीसीतादर्शनं श्रीभगवद्दर्शनं च गन्ध- र्वादिष्वनतिप्रसिद्धत्वेनानुदाहृत्य मनुष्येषु वैश्यादीनुदाहरति। वणिक्पथ इति। अस्य महाभारते जाजलिमुनिगर्वप्रसंगे प्रोक्त- महिम्नः सत्संगोऽन्वेषणीयः धर्मव्याधः शूद्रोऽन्त्यजोऽपि अत्रादि- वाराहकल्पेयं कश्चित्प्राचीने कलियुगे वसुनाम्ना वैष्णवेन राज्ञा प्राग्जन्मनि मृगभ्रान्त्या निहतो ब्राह्मणो ब्रह्मराक्षसतां प्राप्तस्तस्य प्रायश्चित्तार्थविष्णुलोकविशेषगमनसमये तच्छरीरं प्रविष्टः पुनश्च तस्य तद्भोगान्ते राजतां प्राप्तस्य देहात् तत्कर्तृक- ब्रह्मपराख्यस्तवपाठतेजसा निर्गतस्तत्कृतधर्मव्याध इति नाम्ना हिंसातिशयविमुखः पर्यवसाने इष्टनीलाद्रिनाथस्तं च स्तुत- वान् प्राप्ततदालिङ्गनस्तत्सायुज्यमवापेति कुब्जाया भगवत्संगः पूर्वजन्मनि च श्रीनारदसंग इति माथुरहरिवंशप्रसिद्धिः गोप्योऽत्र साधारण्यः श्रीकृष्णव्रजे तदानीं विवाहादिना समागताः आसां तान्नित्यप्रेयसीवृन्दसंगः श्रीकृष्णदर्शनादिरूपो भगवत्सं- गश्च यज्ञपत्नीनां श्रीकृष्णगुणकथकलोकसंगस्तत्संगश्च अपरे दैतयादयोऽन्ये च ॥ ६ ॥

ते नेति। पूर्ववदध्ययनादिकं भगवत्प्रीणनमेव ग्राह्यम् अत्रैकेषां वृत्रादीनां प्राग्जन्मादौ साधनान्तरं यत्तदपि सत्संगानुषङ्गसिद्ध- मित्यभिप्रेत्य सत्संगस्यैव तत्फलमुक्तम् धर्मव्याधादीनां तु केव- लस्यैव तस्येति ज्ञेयं मत्संगशब्देनात्र मम संगो मदीयानां च संग इत्यभिधाप्यते उभयत्रापि मत्संबन्धित्वादित्यभिप्रायेण तत्र स्वस्यापि सत्त्वात्सत्संगप्रकरणे स्वसंगोऽप्यन्तर्भावितः यत्तु पुरा भागवतसंगेनैव भगवत्कृपा भवतीत्युक्तम् तत्तु तत्सांमुख्यजन्मन्येव अत्र तु स एव भागवतसंगः साधनविशेषत्वेनोच्यत इति न दोषः यदि वात्र कुत्रचित्सांमुख्यजन्मकारणमपि भगवत्संगो भवेत् तदाप्येवमाचक्ष्महे स्वरक्षार्थमवतारमङ्गीकृत्य यत्कदाचित् सर्वत्र कृपां वितनोति भगवान् तच्च सत्संबन्धेनैवेत्यतो नाभ्युपगम- हानिरिति अत्र सत्संगस्य संगन्तृभावतारतम्याद्वशीकरणतार- तम्यं ज्ञेयं महत्तमाः भुल्यध्यापकाः ॥ ७ ॥

अथ मुख्यं वशीकरणमसंभावितसाधनान्तरेण सत्संग- मात्रेण श्रीगोप्यादीनां दर्शयति। केवलेनेति—भावेन प्रकरण- प्राप्तसत्संगमात्रजन्मना प्रीत्या भावोऽत्र वशीकारमुख्यत्वे चिन्हं वशे कुर्वन्ति मां भक्त्या सत्स्त्रियः सत्पतिं यथेत्यादेः भक्त्या- हमेकया ग्राह्य इत्यादेश्च गावोऽपि श्रीगोपीवदागन्तुक एव ज्ञेयाः मृगा अपि पूर्ववत् यमलार्जुनयोः प्राप्तिस्तदानीतनतत्स्वामि- कभगवत्प्राप्त्यावश्यंभाविनित्यप्राप्तिमपेक्ष्योक्ता सिद्धाः पूर्ववत् द्विविधात्संगात् स तु तेषां भावो योगादिभिरप्राप्य एवेति यथा- वरुन्धे इत्यत्र यथाशब्दार्थस्य परा काष्ठा ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

त्वाष्ट्रो वृत्रः कायाधवः प्रह्लादः अनयोर्जन्मतः प्रागेव नारद- संगः वृषपर्वेत्ययं जातमात्र एव मातृपरित्यक्तो मुनिपालितो विष्णुभक्तोऽभूदिति पौराणिकी प्रसिद्धिः बलेः प्रह्लादसंगः बाणस्य बाहुच्छेदसमये कृपालोर्महादेवस्य सङ्गः मयस्य सभानिर्माणे पाण्डवसंगः विभीषणस्य हनुमत्संगः ॥ ५ ॥

सुग्रीवादीनां त्रयाणां लक्ष्मणसंगः गजो गजेन्द्रः अस्य पूर्वजन्मनि नारदादिसङ्गः गृध्रो जटायुरस्य गरुडदशरथादिसङ्गः वणिक्पथस्तुलाधारो भारतप्रसिद्धः अस्य सत्सङ्गो मृग्यः व्याधः धर्मव्याधः अस्य प्राग्ब्रह्मराक्षसतां प्राप्तस्य वाराहपु- राणदृष्टेन वैष्णवेन राज्ञा सह सङ्गः कुब्जायाः पूर्वजन्मनि नारद- सङ्ग इति माथुरहरिवंशे प्रसिद्धं गोप्यो मुनिचर्यादयः पूर्वजन्मनि कृतबहुसाधुसङ्गा एव एतज्जन्मनि नित्यसिद्धगोपी- सङ्गिन्यः यज्ञपत्नीनां व्रजस्थश्रीकृष्णदूतीभिर्मालिकताम्बूलिकादि- स्त्रीभिः क्रयविक्रयाद्यर्थं मथुराप्रस्थानसमये सङ्गः ॥ ६ ॥

यं न योगेन साङ्ख्येन दानव्रततपोऽध्वरैः ।
व्याख्यास्वाध्यायसंन्यासैः प्राप्नुयाद्यत्नवानपि ॥ ९ ॥
रामेण सार्धं मथुरां प्रणीते श्वाफल्किना मय्यनुरक्तचित्ताः ।
विगाढभावेन न मे वियोगतीव्राधयोऽन्यं ददृशुः सुखाय ॥ १० ॥
तास्ताः क्षपाः प्रेष्ठतमेन नीता मयैव वृन्दावनगोचरेण ।
क्षणार्धवत्ताः पुनरङ्ग ! तासां हीना मया कल्पसमा बभूवुः ॥ ११ ॥
ता नाविदन्मय्यनुषङ्गबद्धधियः स्वमात्मानमदस्तथेदम् ।
यथा समाधौ मुनयोऽब्धितोये नद्यः प्रविष्टा इव नामरूपे ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तेषां साधुसङ्गोत्था यथा प्रकृतिप्रधानीभूता केवला च भक्तिरेव नतु साधनान्तरमित्याह । न इति । न अधीताः श्रुतिगणा यैस्तदर्थं च न उपासिता महत्तमाः श्रुत्यर्थग्राहयितारो मुनयो यैस्ते न व्रतानि येषां न तप्तानि तपांसि यैस्ते च तेच तथा किन्तु सत्सङ्गेनैव हेतुना भक्त्या सत्सङ्गात् मत्संगं प्राप्य मामुपागताः प्राप्ताः सद्भिः सङ्गो नाम ममैव सङ्ग इत्यर्थः ॥७॥

तत्रापि गोपीप्रभृतीनां सर्वतोऽप्यतिवैशिष्ट्यमाह । केवलेन ज्ञानकर्माद्यमिश्रेण निष्कामेण भावेन शृङ्गारवात्सल्यसख्यदास्यभावशालिना भक्तियोगेन । गोप्यः शृङ्गाररसेन गावो वात्सल्यरसेन नगा गोवर्द्धनादिपर्वताः सख्यरसेन मृगा अपि मूढधियो वृन्दावनस्थतरुगुल्माद्या नागाः कालियाद्या दास्यरसेन मामीयुः अत्र गोप्यादयः सिद्धा एव पूर्वरागाद्यनन्तरं मामीयुरिति केवलेन भावेन तेषां मत्प्राप्तिमस्त्वमनादितो नित्यसिद्धमेवेत्यर्थो ऽवसीयते अन्यथा सिद्धा इति पदस्य वैयर्थ्यं स्यात् ॥८॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

कायाधवः कयाधुपुत्रः प्रह्लादः ॥ ५ ॥
वणिक्पथः तुलाधारः व्याधः धर्मव्याधः ॥ ६ ॥

न अधीताः श्रुतिगणाः यैस्ते तथा तदध्ययनार्थं नोपासिता महत्तमा यैस्ते तथा न सन्ति व्रतानि येषां न तप्तानि तपांसि यैः ते च ते च तथा मत्प्रापकः सङ्गः मत्सङ्गः शाकपार्थिवादित्वात्समासः ॥ ७ ॥

केवलेन हि सत्सङ्गेन लब्धो यो भावः भक्तिस्तेन ॥ ८ ॥

———

भाषा टीका ।

वृत्रासुर प्रह्लादजी आदिक वृषपर्वा बली बाणासुर मय दानव विभीषणजी सुग्रीवजी हनुमान्जी जांबवान् गजराज जटायु तुलाधार धर्मव्याध कुब्जा व्रज में गोपिका यज्ञ पत्नी ऐसे और भी मुक्त होगये ॥ ५—६ ॥

उनने न वेद पढे थे न किसी महत्पुरुष का उपासना किया न व्रत किये न तप किया केवल सत्संग से मेरे को प्राप्त होगये ॥ ७ ॥

एक केवल प्रेम भाव से गोपिका गउ वृक्ष मृग और भी जो मूर्ख बुद्धि वाले नाग आदिक सिद्ध होकर अनायास से मेरे को प्राप्त होगये ॥ ८ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

स्वप्राप्तेर्दुर्लभतामाह । यमिति । योगादिभिः कृतप्रयत्नोऽपि यं न प्राप्नुयात्तं मामीयुरिति पूर्वेणान्वयः अत्र च प्रथमं या गोप्यः पश्चादन्ये वा श्रीकृष्णेन सह सङ्गतास्ते सन्तस्तत्सङ्गोऽन्येषां सत्सङ्गस्तेन च तेषां भक्तिरिति ज्ञातव्यम् ॥ ९ ॥

गोपीनां भावं प्रपञ्चयति । रामेणेति चतुर्भिः । श्वाफल्किना अक्रूरेण मयि प्रणीते सति मे मत्तोऽन्यं सुखाय न ददृशुः कुतः वियोगेन तीव्रो दुःसह आधिर्यासां ताः अत्र हेतुः मय्येव गाढनातिदृढेन भावेन प्रेम्णाऽनुरक्तानि संसक्तानि चित्तानि यासां ताः ॥ १० ॥

तीव्राधित्वं व्यनक्ति । तास्ता इति । मया सह या एव क्षपा रात्रयः क्षणार्धवन्नीतास्ता एव पुनर्मया हीनास्तासां कल्पसमा बभूवुः कथम्भूताः तास्ताः वाचामगोचरा इत्यर्थः ॥११॥

किञ्च एवं तीव्राधयस्ता मोहमिषेण समाधिं प्राप्ता इत्याह । ता इति । मय्यनुषङ्गेणाऽऽसक्त्या बद्धा धियो याभिस्ताः स्वमात्मानं स्वदेहमदो दूरस्थमिदं सन्निहितं च नाविदन् यद्वा स्वं पतिपुत्रादि ममतास्पदम् आत्मानमहङ्कारास्पदं देहम् अदः परं लोकमिदमिमं लोकं च नाविदन्निति । यथा मुनयः समाधौ नामरूपे न विदुस्तद्वत् किन्त्वब्धितोये नद्य इव मयि प्रविष्टा इत्यन्वयः ॥ १२ ॥

———

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी ।

अत्र च गोप्यादिप्रकरणे ॥ ९ ॥

भावं वियोगे प्रेमोद्रेकं प्रणीते सति मथुरां प्रति प्रापिते

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी ।

सति मत्तोऽन्यं निजसख्यादिकमपि सुखाय न ददृशुः प्रियसखीमालापि ज्वालायते इत्याद्युक्तेः किन्त्वतीतनिर्देशेनाधुना तु सुखाय पश्यन्तीति वियोगो नास्तीत्यर्थः । अत्र वियोगतीव्राधित्वे ॥ १० ॥

तास्ता इति तच्छब्दयोरनुभूतार्थगोचरत्वाद्यच्छब्दानपेक्षत्वम् अतएव वाचामगोचरा इति व्याख्यातम् ॥ ११ ॥

मोहमिषेणात्यपन्हुत्याऽप्रकटलीलाभिनिवेशेन प्रकटलीलाऽननुसन्धानलक्षणमोहस्य वास्तवत्वमभिव्यज्यते समाधेस्तूपमानमात्रत्वं स्तनापदेशं फलयुग्ममेव धत्ते मृदुः काञ्चनवल्लिरेषेतिवत् प्रकृतं यन्निषिध्यान्यत् स्थाप्यते सा त्वपन्हुतिरिति तल्लक्षणात् पूर्वार्थे दूरस्थसन्निहितयोर्विशेष्यासम्बन्धत्वाज्ज्ञेयत्वानर्हत्वाच्च यद्वेति पतिपुत्राद्यज्ञाने दृष्टान्तो यथा मुनय इति भगवन्मात्राभिनिवेशे दृष्टान्तः अब्धितोये नद्य इवेति ॥ १२ ॥

———

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

यमिति यच्छब्दो भगवत्परः ॥ ९ ॥

श्वाफल्किना अक्रूरेण ॥ १०—११ ॥

तथेदमिति शरीरमुच्यते नद्यः प्रविष्टा इवेति नदीनां नामरूपावेदनमचेतनत्वादपि गोपीनां तु भगवद्ध्यानपारवश्यादिति स्व ॥ १२ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

मामिति विवक्षितमात्मानं विशिनष्टि । यमिति । योगादिभिः कृतप्रयत्नोऽपि यं न प्राप्नुयात्तं दुर्लभं मामापुरिति सम्बन्धः व्रतान्येकादश्युपवासादीनि तपः कृच्छ्रचान्द्रायणादिरूपं व्याख्या शास्त्राध्यापनं स्वाध्यायोऽध्ययनं सन्न्यासस्तुर्याश्रमपरिग्रह इति॥९॥ केवलेन हि भावेनेति विवक्षितं गोपीनां भावं प्रपञ्चयति । रामेणेति चतुर्भिः । श्वाफल्किनाक्रूरेण मयि रामेण बलभद्रेण सार्द्धं सह मथुरां प्रणीते प्रापिते सति मत्तोऽन्यं सुखाय न ददृशुः कुतः वियोगेन तीव्रो दुःसहः आधिर्यासां ताः तत्र हेतुः मयि विगाढेनातिदृढेन भावेन प्रेम्णाऽनुरक्तानि संसक्तानि चित्तानि यासां ताः ॥ १० ॥

तीव्राधित्वं व्यनक्ति । तास्ता इति । या या इति पाठान्तरम् अङ्ग हे उद्धव ! वृन्दावनगोचरेण प्रियतमेन च मया सह याभिर्याः क्षपाः रात्रयः क्षणार्द्धवन्नीताः यापिताः तास्ता एव पुनर्मया हीनाः तासां गोपीनां कल्पसमा बभूवुः ॥ ११ ॥

किञ्चेत्थं तीव्राधयो मोहव्याजेन समाधिङ्गताः किञ्चिदपि न विदुरित्याह । ता इति । मदनुषङ्गेणासक्त्या बद्धा धीर्याभिस्ताः गोप्यः स्वमात्मानं स्वदेहमदो दूरस्थम् इदं संनिहितं च नाविदन् यथा मुनयः समाधौ स्वात्मानं न विदुर्यथावाब्धितोये प्रविष्टा नद्यः स्वनामरूपे न विदुः तद्वन्नदीनां नामरूपावेदनमुचितमचेतनत्वाद्गोपीनां तु भगवद्ध्यानपारवश्यादिति वैषम्यम् ॥ १२ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भक्तिरहितं ज्ञानमपि न मत्प्रापकं किमुतान्यत्साधनजातमिति भावनाह । यमिति । यं मां साधुवद्यत्नवानपि—

हरिसङ्गविहीनस्तु हरेर्दर्शनवानपि ।
न मुच्यतोऽखिलज्ञोऽपि तमो याति विनिश्चयात् ॥
गुणैरन्यैर्विहीनस्तु तद्भक्तेष्वपि चक्रमात् ।
सङ्गवान्सुखभागेव स्याद्गुणैर्मुक्तिमेति वा ॥
स्वभक्तसङ्गहीनस्य व्युत्क्रमात्सङ्गिनोऽपि वा ।
स्वसङ्गविघ्नकृद्विष्णुस्तत्सङ्गं त्वेषु तत्र चेति ॥

अनेन भगवद्भक्तेस्तद्भक्तभक्तेरन्वयव्यतिरेकौ दर्शिताविति ध्वनितमित्यनेन श्लोकेन ज्ञायते—

गोपिकाद्या दिवं गत्वा हरिं ज्ञात्वा यथातथम् ।
परम्पदं ययुः पूर्वसङ्गादेव सुमोचिता इति

वचनाद्भक्तिजनितज्ञानेन मुक्तिमाप्नोति न केवलज्ञानेनेत्यभिप्रायेण न सांख्येनेत्युक्तम् उपलक्षणमेतत् दानादिष्वप्यनुसन्धेयमेतत्—

श्रोतव्यं च श्रुतश्चैव वक्तव्यं कार्यमेव च ।
निवर्त्य च हरेः पूजेत्येवं कुर्यान्न चाक्रमात् ॥
एवङ्कर्ता तु संन्यासी सर्वोत्सर्गाद्धरौ स्मृतः ।
अन्यथा नैव संन्यासी निष्क्रियोऽपि शिला यथेत्येवं

लक्षणवान् संन्यासी न तु शिलावन्निष्क्रिय इत्यभिप्रेत्य वेणुमात्रभृत्संन्यासी न मामाप्नोतीति किञ्च—

नाहं कर्ता तु सर्वस्य कर्तैको विष्णुरव्ययः ।
इति विरवा तु संन्यासी नान्यथा तु कथञ्चन ॥
मयि सर्वाणि कर्माणि सन्यस्याध्यात्मचेतसा ।
निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वर इति

लक्षणान्तरवानेव सन्यासी न रक्तपटधारीत्यर्थः ॥ ९ ॥

गोपीनामपि भक्तिरपरोक्षज्ञानान्तरङ्गा न तु रतिनिमित्तेति प्रकटयितुं वक्ति । रामेणेति । ता गोप्यो मत्तोऽन्यद्वस्तु सुखाय न ददृशुरित्यन्वयः ॥ १० ॥

अत्र हेतुमाह । यासामिति ताः क्षपाः ॥ ११ ॥

स्वमात्मानं स्वस्वरूपम् अदः स्वर्गमिदं जगत् तत्र दृष्टान्तमाह। यथेति । समाधौ मुनयो नामरूपे यथा न विदन्ति अब्धितोये प्रविष्टा नद्यश्च अनेन भक्त्यतिशयो दर्शित इति ॥ १२ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तामेव व्यनक्ति । यमिति । यं भावम् अत्रापि योगादयो भगवत्परा एव योगादिभिर्यत्नवानपीत्यनेन तत्प्राप्त्यर्थप्रयुज्यमानत्वावगमात् ॥ ९ ॥

अथ साधकचरीणां गोपीनां प्रथमतत्प्राप्तिप्रस्तावेन नित्यप्रेयसीनामपि तन्महावियोगान्तरप्राप्ति तस्य वियोगस्यातीतत्वनिर्देशाद्द्रढयति द्वाभ्याम् । विगाढभावेन तीव्राधयः सत्यो मत्तोऽन्यं निजसखादिकमपि न सुखाय ददृशुः प्रियसखीमालापि ज्वालायते

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इतिवत् तत्राधुना तु सुखाय पश्यन्तीति वियोगो नास्तीत्यर्थः ॥ १० ॥

एवं तास्ताः क्षपा मया हीनाः सत्यस्तासां कल्पसमा बभूवुः अधुना तु तादृश्यो न भवन्तीति नास्त्येव वियोग इत्यर्थः । पूर्वं तेवतस्यैवोद्धवं प्रति मयि ताः प्रेयसां प्रेष्ठे इत्यादौ वर्तमानप्रयोगाः कृता इति सोऽयमर्थः स्पष्ट एव प्रतिपत्तव्यः ॥ ११ ॥

ततश्च प्रकटाप्रकटलीलयोः पृथक्प्रतिपत्त्यैवाप्रकटभावमापद्य स्वनामरूपयोरेव ताः स्थिता इत्याह । तास्तथाभूतविरहोत्कण्ठातिशयेनाभिव्यक्तदुर्धरमहाभावाः सत्यः अथागमिष्यत्यदीर्घेण कालेनेत्यादिभवदुक्तानुसारेण अह्यम्बुजाक्षापससार भो भवानित्यादिद्वारकावासिप्रजावचनानुसारेण च कदाचित्तासां दर्शनार्थं गते मयि लब्धो योऽनुषङ्गो महामोदेन भावाभिव्यक्तिकारी पुनः संयोगस्तेन बद्धा धीर्यासां तथा भूताः सत्यः स्वं ममतास्पदम् आत्मानमहंकारास्पदम् अदः अप्रकटलीलानुगतत्वेनाभिमतं वा तथा इदं प्रकटलीलानुगतत्वेनाभिमतं वा यथा स्यात्तथा तदानीं नाविदन् किंतु द्वयोरैक्येनाविदुरित्यर्थः । प्रकटाप्रकटतयाभिन्नं प्रकाशद्वयमभिमानद्वयं लीलाद्वयं चाभेदेनैवाजानन्निति विवक्षितं ततश्च नाम च रूपं चेति समाहारद्वन्द्वेन नामरूपात्मनि अप्रकटप्रकाशविशेषे प्रविष्टा इव न तु प्रविष्टाः वस्तुभेदादित्यर्थः । तत्राहंकारास्पदे प्रविष्टा इवेति वस्तुभेदेन योजयति यथा समाधौ समाध्युपाधौ तुरीयाख्यात्मनि मुनयो जाग्रदाद्युपाधितया विश्वतैजसप्राज्ञाख्या मुनीनामात्मानः प्रविष्टा इव किन्तु तेषां तुरीयं त्रिषु संततमिति न्यायेनोपाधिनैव तुरीयाद्भिन्नतया ख्यातानां तदुपाधिपरित्याग एव प्रवेशतयोपचर्य्यते तथा तासां मत्प्राप्त्यन्तरायतत्तत्परित्याग एव प्रवेशतयोपचर्य्यत इत्यर्थः । अथ ममतास्पदे प्रविष्टा इवेत्यपि सम्यगंशाप्रवेशेन योजयति । यथाब्धितोये नद्यः प्रविष्टा इव भवन्ति पृथिव्यामविच्छेदात् तद्वत्तयोः प्रकाशयोर्मिथो विच्छेदाज्ञानात् प्रविष्टा इवेति ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

केवलस्य भक्तियोगस्य सत्सङ्ग एव हेतुर्न तु सुकृतान्तरं किमपीत्याह । यमिति । यत्नवानपि योगादीनां सम्यगनुष्ठाननिरतोऽपि ॥ ९ ॥

तत्रापि गोपीनां भावस्य सर्वोपरि विराजमानत्वमाह । रामेणेति चतुर्भिः । श्वाफल्किना अक्रूरेण मयि मथुरां प्रकर्षेण नीते सति मे मत्तोऽन्यं सुखाय न ददृशुः यतोऽनुरक्तचित्ताः प्रेम्णः षष्ठीभूमिका योऽनुरागस्तन्मयीभूतानि चित्तानि यासां ताः तत्रापि विशिष्टो गाढो भावः अनुरागोत्तरभूमिकागतो महाभावभेदो रूढाभिव्यक्तेन हेतुना वियोगे सति तीव्र आधिर्यासां ताः अत्र ददृशुरिति भूतनिर्देशादधुना तु दन्तवक्त्रवधान्ते मया सह संयुक्ता एव वर्त्तन्ते इति द्योतितम् ॥ १० ॥

कल्पस्य क्षणता योगे वियोगे तद्विपर्य्यय इति प्रेम्णः सप्तम्या भूमिकाया महाभावभेदस्य रूढभावस्य लक्षणं सर्वतो विलक्षणं दर्शयति । तास्ता इति । मया सह रासक्षपा ब्रह्मरात्रिपरिमिता अपि क्षणार्द्धवत् याभिर्नीताः । तासां मया वृन्दावनगोचरेण वृन्दावनस्थेन अथ च वृन्दावने गोभिः सह चरता हीनास्ताः क्षपाः प्रहरचतुष्टयपरिमिता अपि यापयितुमशक्यत्वात् कल्पैर्बहुभिः समाः ॥ ११ ॥

मोहाद्यभावेऽपि सर्वविस्मरणमिति विगाढभावस्यापरमप्यनुभावमुज्ज्वलनीलमणियुक्तं दर्शयति । मयि अनुषङ्गेण नितरां सङ्गेन बद्धा धियो याभिस्ताः । अत्र बद्धपदेन कृष्णस्य त्रिजगन्मोहनविचित्रलीलस्तम्भत्वम् अनुषङ्गस्य बलवद्दामत्वं धीवृत्तीनां कृष्णवाञ्छितसम्पादककामधेनुघटात्वमारोपितं स्वमात्मानं देहं न विदुः रासाभिसारादौ क्व स्थितं क्व वा यान्तमिति नानुसन्दधुः तथा अदः परलोकं धर्मातिक्रमादिति भावः । इदमिमं लोकं लज्जाभयाद्यतिक्रमादिति भावः । समाधौ मुनय इति । तेषां यथा सर्वविस्मरणे ब्रह्मानुभवोऽभिरिच्यते तथैतासां मदनुभव इति सर्वविस्मरणांशे दृष्टान्तः न तु प्राप्यांशे गोपीप्राप्यप्रेममुनिप्राप्यनिर्वाणयोरहो महदेवान्तरं यस्मान्ममत्वाममते तयोः तथाहि सर्वसन्तापनिवर्त्तकात् परमाह्लादकात् दृश्यमानात् चन्द्रादपि सकाशात् सर्वगुणहीनोऽपि दृश्यमानः पतिपुत्रादिको यत् सुखमधिकं दत्ते तत्र ममतैव यदि कारणं तदा किं पुनः सर्वगुणमण्डिते स्वभावादेव निरवधिकसुखप्रदे श्रीकृष्णे परब्रह्मणि निरवधिकैव ममता सुखाधिक्ये कारणं भक्तानामिति अत एवोक्तम्

> ब्रह्मानन्दो भवेदेष चेत्परार्द्धगुणीकृतः ।
> नैति भक्तिसुखाम्भोधेः परमाणुतुलामपीति ॥

ब्रह्म च भक्तेष्वासक्तं तद्वश्यं च मुनिषु तु नैवासक्तं न तद्वश्यं चेति नद्यो यथाब्धितोये प्रविष्टा नामरूपे स्वीये न विदुरिति रसचर्वणांशे दृष्टान्तः ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यं माम् ॥ ९ ॥

गोपीनां भावं प्रपञ्चयति । रामेणेति चतुर्भिः । विगाढभावेन दृढप्रेम्णा अनुरक्तं चित्तं यासां ताः वियोगेन तीव्रो दुःसहः आधिर्यासां ताः मे मत्तोऽन्यं सुखाय न ददृशुः ॥ १० ॥

मया सह तास्ताः प्रसिद्धाः क्षपाः क्षणार्द्धवन्नीताः मया हीनाः पुनस्तास्तासां कल्पसमा बभूवुः ॥ ११ ॥

किञ्च ताः मयि अनुषङ्गेण आसक्त्या बद्धा धियो याभिस्ताः अत एव अब्धितोये नद्य इव मयि प्रविष्टाः स्वमात्मानं देहमिदं च लोकमदः परं च लोकं नाविन्दन् यथा समाधौ मुनयो न विदुस्तद्वत् ॥ १२ ॥

भाषा टीका ।

योग से सांख्य से दानों से तप से यज्ञों से व्याख्यानों से स्वाध्याय से सन्यास से बड़े यत्नकरने वाला भी जिस मेरे को नहीं प्राप्त होसकता है तिस मेरे को गोपिकादिक केवल भाव से प्राप्त होगये ॥ ९ ॥

मत्कामा रमणं जारमस्वरूपविदोऽबलाः ।
ब्रह्म मां परमं प्रापुः सङ्गाच्छतसहस्रशः ॥ १३ ॥
तस्मात्त्वमुद्धवोत्सृज्य चोदनां प्रतिचोदनाम् ।
प्रवृत्तं च निवृत्तं च श्रोतव्यं श्रुतमेव च ॥ १४ ॥
मामेकमेव शरणमात्मानं सर्वदेहिनाम् ।
याहि सर्वात्मभावेन मया स्या ह्यकुतोभयः ॥ १५ ॥

उद्धव उवाच ।

संशयः शृण्वतो वाचं तव योगेश्वरेश्वर ! ।
न निवर्तत आत्मस्थो येन भ्राम्यति मे मनः ॥ १६ ॥

भाषा टीका ।

जिस समय अक्रूरजी हमको बलदेवजी के सहित मथुरा को लेगये तब गोपियोंने मेरे में चित्त के अनुराग होने से अतिगाढ प्रेम के वश होने से मेरे वियोग होने से तीव्र वेदना के होजाने से मेरे विना और किसी वस्तु को सुख दायक नहीं समुझा ॥ १० ॥

हे उद्धवजी ! मेरे साथ वृन्दावन में विचरने से प्रिय मेरे संग होनेसे उन बडी रातों को गोपियों ने क्षणमात्र के तुल्य मान-लिया था फिर मेरे विना होने से वेही रातें कल्प सरी की गोपिकाओं को हो गईं ॥ ११ ॥

मेरे विषय में मन के अत्यन्त लगजाने से उन गोपियों ने न अपने शरीर का ख्याल किया न पराये का जैसे कि मुनि जन समाधि में सब भूलजाते हैं और जैसे सब नदी समुद्र में मिलजाने से अपने नाम रूप दोनों को छोडदेती हैं तैसे ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एवं ता अबलाः केवलं मत्कामा अस्वरूपविदः स्वरूपं तु न जानन्ति तथाऽपि सत्सङ्गाज्जारं ब्रह्म जारबुद्धिवेद्यमपि ब्रह्म स्वरूपमेव मां परमं प्रापुरित्यर्थः ॥ १३ ॥

यस्मादेवं भूतो मद्भजनप्रभावस्तस्मात्त्वं चोदनां श्रुतिं च प्रतिचोदनां स्मृतिं च यद्वा विधिं च निषेधं चोत्सृज्य मां शरणं याहि ॥ १४ ॥

मयैवाकुतो भयः स्याः भव ॥ १५ ॥

पूर्वं तावन्मयोदितः स्वधर्मेष्वित्यादिना कर्म कर्तव्य-मित्युक्तमिदानीं तु सर्वं त्यक्त्वा मां शरणं याहीत्युच्यते तत्र किमात्मनः कर्तृत्वादीस्ति नास्ति वेत्यात्मस्थ आत्मविषयः संशयो न निवर्तते यद्वा कर्म कार्यं त्याज्यं वेत्यात्मस्थो हृदिस्थः संशयो न निवर्तते इति पृच्छति । संशय इति । येन संशयेन ॥ १६ ॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

स्वरूपं परमेश्वरत्वलक्षणं सत्सङ्गान्नित्यसिद्धानां गोपीनां संगात् जारबुद्धिवेद्यमपीति अपि नाप्राकृते तद्बुद्धे रसाभासत्वेऽपि श्रीकृष्णे तु अचिन्त्यशक्तेर्भूषणत्वमिति व्यञ्जितं परमं प्रापुरिति प्राप्तौ परमत्वस्य वैशिष्ट्यात्मकस्य विधेयत्वात् तदुक्तमभियुक्तैः "नेष्टा यदाङ्गिनि रसे कविभिः परोढा तद्गोकुलाम्बुजदृशां कुलमन्तरेण । आशंसया रसविधेरवतारितानां कंसारिणा रसिकमण्डलशेखरेणेति" । तदेवाह रमणं रतिक्रीडासुखदं मां श्रीकृष्णाख्यमेवेति तस्य ब्रह्मणो निराकारत्वं प्रत्याख्यातम् ॥ १३ ॥

पूर्वार्थे चोदनाशब्दस्य विधिरूपवेदैकदेशपरत्वेऽपि प्रतिचोदनाशब्दस्य स्मृतिपरत्वं न कुत्रापि प्रसिद्धमतो यद्वेति चोदनाशब्दस्य प्रवर्त्तनार्थत्वात्तद्विरोधिनिवर्त्तनार्थस्य प्रतिशब्दवशाद्ग्रहणं प्रत्याख्यानवत् तथाच प्रतिचोदनाशब्दस्य निषेधार्थो मुख्य एवेति तथा व्याख्यातं प्रवृत्तं वह्निमार्गं निवृत्तमुत्तरमार्गम् आवर्त्तेत प्रवृत्तेन निवृत्तेनाऽश्नुतेऽमृतमित्युक्तेः अयं योगसाङ्ख्यादिमेया श्रोतव्यः अयं च श्रुतत्वादनुष्ठेय इत्युभयमप्यर्थं त्यक्त्वा शुद्धभक्तस्य द्वयोरप्यनुपादेयत्वात् केवलं मामेव शरणं याहीति पूर्वं प्रतिपादिता सत्सङ्गादिलक्षणा भक्तिरेव दृढीकृता सर्वात्मभावेनेति अन्यामिश्रत्वमपि त्याजितं नच तत्तत्परित्यागे किमपि दूषणमित्याह मयैवेति ॥ १४ ॥ १५ ॥

अत्र विप्रतिपत्तौ पूर्वार्थे मीमांसकमतप्रत्याख्यानपूर्वकं कर्तृत्वाद्यभावः विलक्षणः स्थूलसूक्ष्माद्देहादात्मेत्यादिना स्वदृगित्यादिग्रन्थकेन पूर्वमेवोपपादित इति तद्विषयकप्रश्नो विज्ञस्योद्धवस्य न युक्त इत्यतो यद्वेति तथाचैकान्तभक्तेन कर्म कर्तव्यं वा त्याज्यमिति प्रश्नस्य पूर्वमकृतत्वादपूर्वत्वमिति ज्ञेयम् ॥ १६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

अतः जारं चोरमत्तारम् अतः परमं गुह्यमित्यन्वयः ॥ १३ ॥
तस्मान्मत्समाश्रयणस्य मोक्षहेतुत्वात् प्रतिचोदनां निषेधं

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

यद्वा स्वमान्यचोदनाया अपवादरूपा विशेषचोदना तामुत्सृज्येति उपायतया बुद्धित्यागो विवक्षितः उपायत्वग्रहणं तत्र वर्जयेदिति प्रपत्तिशास्त्रेषु दृष्टत्वात् यास्यसि मामित्यनुषङ्गः ॥ १४–१५ ॥

एवमुपायविषये श्रोतव्यं सर्वं श्रुतम् अत उद्धवः आत्मविषये श्रोतव्यान्तरं शुश्रूषमाणः पृच्छति । संशय इति ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

न केवलं स्वात्मादिकं नाविदन् किन्तु केवलमबला अज्ञाना त्स्वरूपाविदस्तथापि मत्कामाः मय्येव कामो यासां ताः जारं रमणं लोकप्रतीत्या चोरभर्त्तारं वस्तुतः परब्रह्मभूतं मां प्रापुः सत्सङ्गेन हि हैतया इत्युपक्रान्तमुपसंहरति । सङ्गाच्छतसहस्रशः प्रापुरिति सम्बन्धः ॥ १३ ॥

इत्थमुपदेक्ष्यमाणशरणागत्याख्यन्यासयोगप्रभावख्यापनाय तद्योगनिष्ठसत्सङ्गस्यैवाऽनितरसाध्यसाधनतामभिधायाथ तं योगमुपदिशति तस्मादिति । हे उद्धव ! तस्माच्छरणागतियोगनिष्ठसत्सङ्गतेरेवं विभवत्वात् चोदनां विधिं प्रतिचोदनां निषेधं यद्वा चोदनां न हिंस्यात्सर्वा भूतानीत्यादिरूपां सामान्यभावनां प्रतिचोदनामग्नीषोमीयं पशुमालभेतेत्यादिरूपामपवादात्मिकां विशेषचोदनाम् उत्सृज्येत्यनेन विधिनिषेधात्मकशास्त्रत्याग उक्तः प्रवृत्तिं च निवृत्तिञ्चेत्यनेन विधिनिषेधात्मकशास्त्रबोध्यप्रवृत्तिनिवृत्तित्यागः श्रोतव्यमित्यनेनानन्यसाध्यस्वाभीष्टोपायान्तरशुश्रूषात्यागः श्रोतव्यमुत्सृज्येत्यनेन तदुपायतया श्रुतेषु कर्मज्ञानभक्तियोगेषु उपायत्वबुद्धित्यागः तत्र विध्यात्मकशास्त्रत्यागो नाम तस्मिन् स्वाभीष्टसाधनतावबोधकत्वबुद्धित्यागः निषेधात्मकशास्त्रत्यागस्तु निषिद्धसेवानिवृत्तेरुपायत्वावबोधकत्वबुद्धित्यागरूपः प्रवृत्तिनिवृत्तित्यागस्तु शास्त्रबोध्ययोः प्रवृत्तिनिवृत्त्योर्दुष्करत्वानुसन्धानेनोपायत्वबुद्धितश्चिकीर्षाप्रयत्नादित्यागात्मकः अनेन कृत्यकरणाऽशक्तस्याकृत्यकरणान्निवर्तितुमप्यशक्तस्यापि मच्छरणागतिरभीष्टोपायभूतेति ध्वनितम् ॥ १४ ॥

मामित्यनेन सार्वज्ञ्यसर्वशक्त्याद्याश्रयणसौकर्यापादकाश्रितकार्यापादकवात्सल्यसौशील्यस्वामित्वज्ञानशक्तिपूर्त्यादिकल्याणगुणयोगित्वमभिप्रेतम् एकमित्यनेन फलोपाययोरैक्यं विवक्षितम् एवकारेण प्रपदने स्वस्य कर्तृत्वव्यावृत्तिः एकवचनेन स्वानुष्ठितशरणागतियोगेऽप्युपायत्वबुद्धिव्युदासः तत्र हेतुत्वेनात्मानं विशिनष्टि । आत्मानं सर्वदेहिनामिति सर्वान्तरात्मभूतेन मनःपर्यन्तसर्वेन्द्रियप्रचोदयित्रा मयैव प्रकृतोपायानुष्ठानस्य कारितत्वादत्रोपायताबुद्धिर्न कार्येति भावः । मामेवेत्येवकारोऽन्वेतव्यः तेनासार्वज्ञ्यादिगुणयोगिचतुर्मुखादिजीवव्यावृत्तिः एवकारस्य स्वसमभिव्याहृतपदार्थविपरीतपदार्थव्यावृत्तिपरत्वात् सर्वात्मभावेन शरणं याहि उपाये गृहरक्षित्रोः शब्दः शरणमित्ययमित्युक्तेरत्रोचितत्वादुपायपरः शरणशब्दः याहि या प्रापणे प्राप्तेर्गतिपूर्वकत्वाद्गत्यर्था बुद्ध्यर्था इति न्यायाद्व्यवस्येत्यर्थः । सर्वात्मभावेन यः सर्व आत्मनः स्वस्य भावः उपेयत्वापितृत्वरक्षकत्वशेषित्वादिनिरूपितोपेतृत्वपुत्रत्वरक्ष्यत्वशेषत्वादिसम्बन्धज्ञानं तेन एवं चेत् कुतोऽपि भयं नास्ति यस्य सः अकृत्यकरणकृत्याकरणादिमत्प्राप्तिप्रतिबन्धकभयरहितः मां मुक्तोपभोग्यं प्राप्स्यसि प्राप्स्यसि ॥ १५ ॥

आत्मानं सर्वदेहिनामित्यनेन स्वस्य सर्वान्तरात्मतया सर्वेन्द्रियप्रचोदयितृत्वमुक्तं तत्प्रकारजिज्ञासया पृच्छति । संशय इति । हे योगेश्वरेश्वर ! योगनिर्वाहकाधिपते तव वाचं शृण्वतो मम उपायविषयः संशयो निवृत्तः आत्मस्थः आत्मविषयस्तु न निवर्तते ततः किमित्यतो विशिनष्टि । येनात्मस्थेन संशयेन मे मनो भ्राम्यति अतस्तं संशयं निराकुर्विति भावः । किं सर्वेन्द्रियप्राणनियमनादिकं जीवकर्तृकमुत त्वत्कर्तृकं त्वत्कर्तृकत्वेऽपि कस्य देवमनुष्यादिभावात्मकः संसारः कश्चेन्द्रियादीनामाधारः किं जीव उत शरीरं किम्वा त्वं कश्च सुखदुःखहेतुपुण्यापुण्यारम्भकः कश्च सुखदुःखयोर्भोक्ता कश्च संसारनिवृत्त्युपाय इत्येवं विधः आत्मस्थः संशयः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तत्फलमाह । मत्कामा इति । मामेव कामयन्त इति मत्कामाः अस्वरूपविदोऽबलाः जारं मां रमणं मत्वा संगान्मां परमं ज्ञात्वा मामापुरित्यन्वयः । आसां ब्रह्मज्ञानं कथमुदभूत् उच्यते संसारं जरयतीति जारः तं नित्यानन्दप्रदत्वेन रमयतीति रमणः तं सर्वतो विलक्षणस्वभावस्यास्य विष्णोः स्वरूपं विदन्तीत्यस्वरूपविदः इत्येवं गुणसम्प्रीतितो मां ब्रह्म ज्ञात्वेति गोपिकाद्या दिवं गत्वा हरिं ज्ञात्वा यथा तथामित्येतदत्रापि प्रमाणत्वेनोदाहर्तव्यमिति ज्ञातव्यम् ॥ १३ ॥

यतो मुमुक्षूणामहमेव शरणमतस्त्वमपि मां शरणं व्रजेत्युपसंहरति । तस्मादिति । प्रतिकर्मचोदितां चोदनां नानाकर्मविधिमुत्सृज्य प्रवृत्त्यादिकं च मयि समर्प्य सर्वदेहिनामात्मानं स्वामिनं यस्मिन्नकुतोभयमस्ति तमेकं मां सर्वात्मभावेन सर्वस्वामिबुद्धिक्रियया शरणं याहीत्यन्वयः ॥ १४—१५ ॥

प्रथमतो वायौ मुख्यभिधेत्युक्त्वा विशेषतो गोपिकाप्रशंसनं कृतमिति संशयबीजं हृदि कृत्वोद्धवश्चोदयति । संशय इति भक्तेषु वायोः सर्वोत्तमत्वमुक्त्वा विशेषतो गोपीस्तुवतस्तव वाचं शृण्वतो ममात्मस्थो मनोगतः संशयो वायुरुत्तमो गोप्यो वेत्येवमाकारो न निवर्तते प्रत्युत येन वचनेन मे मनो भ्राम्यति निर्धारितैककोटिस्थितं नेत्यन्वयः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ॥

तदेवं प्रकटाप्रकटयोर्द्वयोरपि लीलयोस्तासां स्वप्राप्तौ भाव एव कारणं दर्शितं ततश्चाप्रकटलीलायां प्रविष्टा अपि यद्विशेषणाधिक्येन तं प्रापुस्तद्दर्शयन्नान्यदप्यनुवदति । मत्कामा इति अयमर्थः यथा भीष्ममुदारं दर्शनीयं कटं करोतीत्यत्र क्रिया खलु विशेष्यस्य कृतिं प्रत्यापयन्ती विशेषणानामपि प्रत्यापयति कटं करोति तं च भीष्ममित्यादिरीत्या तथात्रापि प्रतीयते विशेष्यं चात्र ब्रह्मैव सर्वविशेषाश्रयणीयपरमवस्तुतया तेषु तस्याभेदनानुगमात् तदेवं स्थिते अनुवादमनुक्त्वैव न विधेयमुदीरयेदित्युक्तदिशा पाठानुरोधेनात्र न विधेयं निर्णीयते किन्त्वर्था-

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

नुरोधेन तस्यैव बलवत्त्वात् यथा यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोतीत्यत्र पच्यन्तां विविधाः पाकाः इत्यादौ सर्वदोहश्च गृह्यतामित्यत्र अग्निहोत्रं जुहोति यवागूंच पचतीत्यत्र च पर्णमयीत्वादीनामेव विधेयत्वं तद्वत् तादृगर्थस्यैवाकाङ्क्षापूर्तेरर्थानुरोधस्य बलवत्त्वं ततश्च पूर्वोक्तरीत्या ताः ब्रह्म प्रापुः किं निर्विशेषतयाविर्भूतं न किंतु परमं परा मा लक्ष्मीर्यस्मिन् तदिति श्रीभगवद्रूपमेवेत्यर्थः । परमं यो महद्ब्रह्मेति सहस्रनामस्तोत्रात् तादृशत्वं च "शुभाश्रयः सचित्तस्य सर्वगस्य तथात्मन" इति श्रीविष्णुपुराणरीत्यान्यत्रापि भगवदाविर्भावे संभवतीत्याशङ्क्याह मां श्रीकृष्णाख्यमेव प्रापुः यथोक्तं तासु स्वयमेव मय्यावेश्य मनः कृष्ण इत्यादि मयि भक्तिर्हीत्यादि च तत्र च मां निजभावविशेषमयभेदेन द्विधा प्रापुरिति बोधयितुं तासां तत्तद्विशेषणसाहित्येन सविशेषणद्वयमाह । मत्कामा रमणमिति । जारस्वरूपाविद इति रमणशब्देनात्र पतिरेवोच्यते नन्दनशब्देन पुत्र इव रूढ्या यौगिकत्वबाधात् यथा मित्रानन्दनशब्देन मित्रापुत्र एवोच्यते नतु मित्रापतिः मित्रारमणशब्देन च मित्रापतिर्नतु मित्रापुत्रस्तद्वदत्रापि जारशब्देनोपपतिरेवोच्यते नतु पतिः कोषकारमते च तत्रैव रूढः रमणं स्यात्पटोलस्य मूलेऽपि रमणः प्रिये इति विश्वप्रकाशात् स्त्रीजातिसंबन्धेन रमणशब्दवत् प्रियशब्देन पतिरेवोच्यते तथैव प्रसिद्धेः धवः प्रियःपतिर्भर्त्ता जारस्तूपपतिः समावित्यमरकोशाज्जारःपापपतिरिति त्रिकाण्डशेषाच्च पतित्वं तूद्वाहेन कन्यायाः स्वीकारित्वमिति लोक एव भगवति तु स्वभावेनापि दृश्यते परमव्योमाधिपस्य महालक्ष्मीपतित्वं ह्यनादिसिद्धमिति ततश्च अस्वरूपविद इति स्वरूपं नित्यमेव मत्प्रेयसीत्वलक्षणमवतारसमये मदीयलीलाशक्त्या मोहितत्वान्न विदन्ति यास्तथा सत्यो जारं जारबुद्धिवेद्यं सन्तं मां प्रापुः तथापि रमणत्वप्राप्तौ हेतुः मत्कामाः इति मयि कामः कथमस्माकमस्मिन् पतित्वं स्वप्नवद्विलीयेत श्रीकृष्ण एव जागरणवत्प्रादुर्भवेदित्यभिलाषो यासां तथा सत्यो मां रमणं प्रापुः तादृगभिलाषश्चासां स्पष्ट एवोपलभ्यते यथा अपि बत मधुपुर्यामार्यपुत्रोऽधुनास्ते इत्यत्र तस्य स्त्रिया एव वयमिति व्यज्य तत्र च किङ्करीणामिति श्यामसुन्दर ते दास्य इति यद्वैन्यात् किङ्करीत्वेनापि निश्चित्य भुजमगुरुसुगन्धं मूर्ध्न्यधास्यत् कदानु इत्यनेन तदेवासावसङ्कोचाङ्गीकारेण कदा स्वाङ्गीकरिष्यतीति श्रीराधा स्वयमेव प्रार्थितवतीति तथा कात्यायनि महामाये इत्यादौ गोप्यः किमाचरदित्यादौ यत् पत्यपत्यसुहृदामित्यादौ च श्रीभगवतश्च स्वमतं तदेवोद्धवायोपदिष्टं वल्लभ्यो मे मदात्मिका इति अत्र यात यूयमित्याद्यनुसारेण श्रीनन्दराजे निजपितृत्वाभिमननेन स्वस्मिन् गोपत्वमननात् ब्राह्मणस्य मम ब्राह्मणीतिवत् खलु वल्लभस्य मम वल्लवीरूपास्ता इति श्रीशुकदेवेन च कृष्णवध्व इत्येवोक्तं तदेवं जारबुद्धेर्हेयत्वं रमणबुद्धेस्तूपादेयत्वं जारबुद्धिवेद्यमपीति व्याख्याय श्रीस्वामिभिरवगमितं भर्त्रभिलाषप्राप्तिः अवश्यमवगन्तव्या अन्यथा ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहमिति श्रीगीतोपनिषद्वचः यथेति यदभिलाषेणेत्येवार्थः तस्माद्रमणतया विद्यते इति प्रतिज्ञाहानिर्न स्यात् तत्क्रतुन्यायात् अहं भक्तपराधीन इति स्वेच्छामयस्येति प्रतिज्ञाहानिश्च स्यात् स्वयमेवेदं दृष्टान्तद्वारा बोधितं मय्यावेश्य मनः कृष्ण इत्यादावनन्तरं या मया क्रीडता रात्र्यां वनेऽस्मिन् ब्रज आस्थिताः अलब्धरासाः कल्याण्यो मापुर्मद्वीर्यचिन्तया इति अथ स्वस्वान्तर्गृहगतानां तासां तान् पतीन् तांश्च देहांस्त्यक्तवतीनामौपपत्यं न सम्भवतीति हे कल्याण्य इत्यनेन भवतीनां न तद्गृहपरित्याग इति वैशिष्ट्यमवगमितं तदेतदभिप्रेत्यैव पूर्वमपि तमुद्धवं प्रति धारयन्त्यतिकृच्छ्रेण प्रायः प्राणान् कथञ्चन प्रत्यागमनसन्देशैरित्युक्त्वा तासां प्राणधारणे आग्रहो दर्शितः जारतया प्रतीतत्वेन रमणत्वेन च मत्प्राप्तौ मम कारुण्यं तु परमसहायमित्याह । अबला इति । तादृशमत्प्रेमकैवल्येन तासु स्वस्वरूपानुसन्धानबलतिरोधानात् न विद्यते बलं मत्साहाय्यं विनान्यत् यासां तादृश्य इति अतएव ममातिकरुणोदयादिति भावः । आस्तां नित्यप्रेयसीनां वार्त्ता तासां सङ्गादन्या अपि शतसहस्रशस्तथा मां प्रापुरिति किञ्च ब्रह्मत्वं परमेश्वरत्वञ्च तत्र स्वाभाविकमेवेति तादृशप्रेमविशेषेण तयो रावरणमेव नतु निर्धूननं परमाधुर्यस्य तु परमोल्लासः अथ जारत्वं तु तत्रासत्यं दुःखमयजुगुप्सितान्यसम्बन्धाविष्कृतं चेति तेन प्रेमविशेषेण निर्धूननमेव नतु पूर्ववदावरणमात्रं परमरमणत्वस्य तु परमोल्लास इति अत्र पद्य विशेषः श्रीकृष्णसन्दर्भे द्रष्टव्यः ॥ १३ ॥

तदेवं तदभीष्टतमां श्रीगोपीनामपि स्वप्राप्तिं कथयित्वा तस्यापि तां क्रोडीकुर्वन्नुपसंहरति । तस्मादिति युग्मकेन । यस्मान्मदीयत्वेन लब्धसद्भावानां तेषां नारदाङ्गिरःप्रभृतीनामपि सङ्गमात्रस्यैतावन्महिमा तस्मात्सद्गुणपरमाश्रयत्वेन परमसन्तं तदभीष्टं मामेकमेव शरणं याहि शरणागतिपर्यन्ततया भजेत्यर्थः ततश्च हि निश्चितं मया त्वमकुतोभयः स्याः भविष्यसि तत्र कैमुत्यायात्मनः स्वभावतः सर्वहितत्वं दर्शयति सर्वदेहिनामात्मानं परमात्मानमिति एकमेव शरणमित्येव दर्शयति सर्वात्मभावेनेति तदेव विवृणोति । उत्सृज्येत्यादिना । श्रोतव्यं श्रुतमेवेति ज्ञानाश्रयत्वमपि निराकरोति तत्रैकमिति तदात्वे एवेति कालान्तरे चाश्रयान्तरस्य भावनामपि निषेधति स्म ॥ १४ ॥ १५ ॥

पूर्वं तावच्छ्रीभगवता मयोदितेष्वित्यादिना कर्ममिश्रा भक्तिरुक्ता ततश्च तत्परत्वे सति निवृत्तं कर्म सेवेतेत्यादिना सर्वमेव कर्म त्याजितं किंतु ज्ञानमित्यादिना ज्ञानमिश्रा विहिता ज्ञानार्थमात्मतत्त्वनिरूपणं च सुष्ठु कृतम् श्रीमदुद्धवेनापि गुणेषु वर्त्तमानोऽपीत्यादिना पृष्टा बद्धो मुक्त इत्यादिना श्रीभगवदुक्तः सिद्धान्तोऽवधारितः तत्तु ज्ञानं भक्तिं विना न सिद्ध्यतीति स्वयं भगवतैव पुनः शब्दब्रह्मणि निष्णात इत्यादिनोट्टङ्कितम् श्रद्धालुरित्यादिना भक्तिं च दर्शयित्वा तस्या भक्तेर्जन्मनि सिद्धौ च कारणं सत्संग एवेति दर्शितं पुनरुद्धवेन साधुस्तवेत्यादिना तौ विशेषतः पृष्टौ श्रीभगवता च तावुपदिश्य प्राधान्येन भक्तियोगेनेत्यादिना केवलः सत्संग एव दृढीकृतोऽतिशायितश्च तस्मात्त्वमुद्धवेत्यादिना कर्म च ज्ञानं च सम्यगेव त्याजितं तदेवं यद्यपि संशयावसरो नास्ति तथाप्याह । संशय इति । तव वाचं शृण्वतोऽवधारयतो ममात्मस्थः संशयः मयोदितेष्ववहित इत्यादिकाध्यायत्रयगतमहावाक्यार्थपर्यालोचनासामर्थ्ये न निवर्त्तते कुतः येन यतो मम मनो भ्राम्यति वैयग्र्यावि-

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

शेषाविष्टमस्ति तस्मात्पुनः सम्यक्त्वेनोपदिश्यतामिति भावः । संशयोऽत्र तत्तत्प्रकरणानामेकतात्पर्यताग्रहणे वैफल्यं शृण्वतः इति शृण्वतोऽपीत्यर्थः ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ततश्च ता मां प्रापुरित्याह । मत्कामा मां कामयन्त इति ताः मां परमं ब्रह्म प्रापुः कीदृशं रमणं ताभिः सह रममाणं ता रमयन्तं च वीक्ष्य रन्तुं मनश्चक्रे इति आत्मारामोऽप्यरीरमदिति शुकोक्तेः किम्पतिस्वरूपं न जारम् उपपतिस्वरूपम् कीदृश्यः असरूपविदः मन्महामाधुर्यमात्रानुभावित्वादैश्वर्यलक्षणं मत्स्वरूपविशेषं न विदन्तीति ताः । यद्वा अन्ये भक्तजना इव मत्स्वरूपं मत्सारूप्यं न विन्दन्ते न प्राप्नुवन्ति तत्प्राप्तौ ताभिर्मद्विहारासिद्धेरिति यद्वा ताः स्वस्वरूपं सौन्दर्यादिकं न जानन्ति किन्तु मत्सौन्दर्यादिकमेवानुभवन्तीति ताः यद्वा न विद्यन्ते स्वरूपविदः स्वरूपज्ञा यासां ताः ॥ १३ ॥

तदेवं श्रीमदुद्धवेन साधुलक्षणं पृष्टः श्रीभगवांस्तारतम्येन त्रिविधं साधु लक्षयित्वा तत्तत्सङ्गप्रादुर्भूतां प्रधानीभूतां फलं च भक्तिं सामान्यतो निरूप्य भक्तेः स्ववशीकारं विवक्षुः कैमुत्येन सत्सङ्गस्यैव वशीकारित्वमुक्त्वा सत्सङ्गिनो भक्तांश्च निर्दिश्यान्ते गोप्यादिनिष्ठं केवलं भक्तियोगं दुर्लभत्वेन स्तुत्वा सहस्रैव रामेण सार्द्धमित्यादिना तत्रापि गोपीविषयकस्वप्रेमवाष्पं सदाजाज्वल्यमानङ्गारम्भयिष्यैणा हृदि मुद्रितमप्यधीरतयैवोद्घटय्य तासामेव भक्तियोगस्य स्ववशीकारसर्वोत्कर्षपरावधित्वं तासामेव साधुत्वस्यापि सर्वमहामहोत्कृष्टकक्षाविश्रामित्वमभिव्यज्य केवले तदनुष्ठिते भक्तियोग एवोद्धवं प्रवर्त्तयितुमाह । तस्मादिति । चोदनां विधिं प्रतिचोदनां प्रतिषेधं च विहितं कर्म निषिद्धं च कर्म त्यक्त्वेत्यर्थः तर्हि किं संन्यासं कुर्वे न प्रवृत्तं गृहस्थानां धर्मं च निवृत्तं सन्यासिनां धर्मं च त्यक्त्वा तत्रापि श्रोतव्यं श्रुतं च त्यक्त्वेति भाविधर्मश्रवणमनाकाङ्क्ष्य भूतश्रवणं च विस्मृत्येत्यर्थः । सर्वात्मभावेन सर्वो य आत्मनो मनसो भावो दास्यसख्यादिस्तेनैकमेवमामालम्बनीकृत्य शरणं याहि मयैव अकुतोभयः स्या इति तव नास्ति कर्माधिकारो नापि ज्ञानाधिकारस्तदपि तं तमात्मन्यारोप्य प्रत्यवायभयं संसारभयं च मन्यसे चेत्तदा तद्भयद्वयात्राताऽहं विद्यमान एवास्मीत्यर्थः ॥ १४—१५ ॥

संशयो न निवर्त्तत इत्येतत्पूर्वक्षण एव मयि सर्वाणि कर्माणि निरपेक्षः समाचरेदिति वदता त्वया मह्यं कर्माधिकारो दत्तः तत्पूर्वं तु—

> यदिदं मनसा वाचा चक्षुर्भ्यां श्रवणादिभिः ।
> नश्वरङ्गृह्यमाणं च विद्धि मायामनोमयमिति ॥
> तस्माद्युक्तेन्द्रियग्रामो युक्तचित्त इदं जगत् ।
> आत्मनीक्षस्व विततमात्मानं मय्यधीश्वरे ॥

इत्युक्तवता मह्यं ज्ञानाधिकार एव दत्तः अधुना तु सर्वं त्यक्त्वा मां शरणं याहीति भक्त्यधिकारं ददासि न जाने पुनरग्रे कमधिकारं मह्यं दास्यसीति सख्यरसोद्भूता वक्रोक्तिर्द्योतिता ॥१६॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अबलाः सत्सङ्गेतरबलरहिताः मत्कामाः श्रीकृष्ण एवास्मत्सुखहेतुर्नान्यत्किञ्चिदित्येवं मयि कामः सङ्कल्पो यासां ताः मच्छरणाः स्वबुद्ध्या जारमुपपतिं शास्त्रतस्तु परमं ब्रह्ममामेव प्रापुरित्यर्थः ॥ ॥ १३ ॥

यस्मात् शरणागतिरित्थं महाफला तस्मात् हे उद्धव ! त्वमपि चोदनां प्रतिचोदनां विधिनिषेधरूपं शास्त्रं प्रवृत्तं च निवृत्तं च त्रिवर्गोपायं मोक्षोपायं च शास्त्रार्थं श्रोतव्यं श्रुतं च हेयोपादेयानुष्ठानसिद्धये गुरुमुखात् श्रोतव्यं सुज्ञातं च उत्सृज्य ॥१४॥

सर्वात्मभावेन सर्वेषु चोदनादिषु हितकारित्वाहितकारित्वरूपो य आत्मभावः आत्मनो निश्चयः तेन श्रीकृष्ण एव हितमहितं स्वेच्छया कर्तुमकर्तुं समर्थ इत्येवं भूतेन मामेव शरणं याहि सर्वेषु ब्रह्मादिषु सत्सु स्वस्यैव शरणत्वे हेतुमाह । एकमेव निःसमानातिशयं तत्रापि हेतुमामाह । सर्वेषां देहिनां ब्रह्मादीनामात्मानं ननु सर्वतो निवृत्तस्य मे कुतश्चिद्भयं स्यादित्यत्राह । मयैव हि निश्चितम् अकुतोभयः स्याः ॥ १५ ॥

सर्वदेहिनामात्मानमिति तव वाचं शृण्वतो मे आत्मनि सर्वात्मनि त्वयि विषये स्थितः कथमसौ सर्वात्मा इत्येवंरूपः संशयः न निवर्तते ॥ १६ ॥

भाषा टीका ।

वे स्त्री जाति गोपिका गण मेरे स्वरूप को न जान कर भी जार पुरुष की बुद्धि से भी रमण बुद्धि से हजार हां सत्संग से परं ब्रह्म मेरे को प्राप्त हो गईं ॥ १३ ॥

तिस कारण से हे उद्धव ! तुम सब वैदिक विधि तथा स्मृति विधि सबों को छोडकर प्रवृत्त निवृत्त दोनों कर्मों को छोडकर सुना हुआ तथा सुनने योग्य इनको भी छोड कर ॥ १४ ॥

सब प्राणि के एक आत्मा अन्तर्यामी मेरे को सर्वात्मभाव से एकही आश्रय समझ कर शरण प्राप्त होजावो तब मेरे रक्षक होने से सब धर्माधर्मों से तुम निर्भय होजाओगे ॥ १५ ॥

उद्धव उवाच ।

हे योगेश्वरों के ईश्वर आप के विचित्र वचनों के सुनने से मेरे मन में स्थित सन्देह निवृत्त नहीं होता है और मेरा मन भ्रमता है ॥ १६ ॥

श्रीभगवानुवाच ।

स एष जीवो विवरप्रसूतिः प्राणेन घोषेण गुहां प्रविष्टः ।
मनोमयं सूक्ष्ममुपेत्य रूपं मात्रास्वरो वर्ण इति स्थविष्ठः ॥ १७ ॥
यथाऽनलः खेऽनिलबन्धुरूष्मा बलेन दारुण्यधिमथ्यमानः ।
अणुः प्रजातो हविषा समिध्यते तथैव मे व्यक्तिरियं हि वाणी ॥ १८ ॥
एवं गदिः कर्म गतिर्विसर्गो घ्राणो रसो दृक् स्पर्शः श्रुतिश्च ।
सङ्कल्पविज्ञानमथाभिमानः सूत्रं रजःसत्त्वतमोविकारः ॥ १९ ॥
अयं हि जीवस्त्रिवृदब्जयोनिरव्यक्त एको वयसा स आद्यः ।
विश्लिष्टशक्तिर्बहुधेव भाति बीजानि योनिं प्रतिपद्य यद्वत् ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

उत्तरं स एष इत्यष्टभिः अयम्भावः ईश्वरस्तावत्स्वमायावशात्प्रपञ्चात्मना भाति तत्प्रपञ्चाध्यासाच्च जीवानामनाद्यविद्यया कर्तृत्वादि ततो विधिप्रतिषेधाधिकारस्तदानीं सत्त्वशुद्ध्यर्थं कर्माणि कुर्वित्युक्तम् सत्त्वे च शुद्धे पुनः कर्मजाड्यपरिहाराय भक्तिविक्षेपककर्मादरं परित्यज्य दृढविश्वासेन भजेत्युक्तम् जातायां तु विद्यायां न किञ्चित्कर्तव्यमस्तीति तत्र तावदीश्वराद्वागादीन्द्रियद्वारा जीवसंसृतिकारणभूतं प्रपञ्चोद्गममाह सार्धैश्चतुर्भिः । स एषोऽपरोक्षः जीवयतीति जीवः परमेश्वरः अपरोक्षत्वे हेतुः विवरेष्वाधारादिचक्रेषु प्रसूतिरिव प्रसूतिरभिव्यक्तिर्यस्य सः तामेवाभिव्यक्तिमाह । घोषेणेति । घोषेण पराख्येन नादवता प्राणेन सह गुहामाधारचक्रं प्रविष्टः सन्मनोमयं सूक्ष्मं रूपं पश्यन्त्याख्यं मध्यमाख्यं च मणिपूरचक्रे विशुद्धिचक्रे चोपेत्य प्राप्य वक्त्रे मात्रा ह्रस्वादिः स्वर उदात्तादिर्वर्णः ककारादिरित्येवं वैखर्याख्यः स्थविष्ठोऽतिस्थूलो नानावेदशाखात्मको भवति । तथाच श्रुतिः—

चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः ।
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्तीति ॥

अभियुक्तश्लोकश्च—

> सा सा मित्रावरुणसदनादुच्चरन्ती त्रिषष्टिं
> वर्णानन्तः प्रकटकरणैः प्राणसङ्गात्प्रसूते ॥
> तां पश्यन्तीं प्रथममुदितां मध्यमां बुद्धिसंस्थां
> वाचं वक्त्रे करणविशदां वैखरीं च प्रपद्ये ॥

इति ॥ १७ ॥

अव्यक्तस्य सतः सूक्ष्ममध्यमक्रमेणाभिव्यक्तौ दृष्टान्तः । यथेति । यथाऽग्निः खे ऊष्मा अव्यक्तोष्मरूपः दारुण्यधिकं मथ्यमानोऽनिलसहायः सन्नणुः सूक्ष्मविस्फुलिङ्गादिरूपो भवति पुनः प्रकृष्टो जातो हविषा संवर्धते तथैवेयं वाणी ममाभिव्यक्तिः ॥ १८ ॥

उक्तां वाग्वृत्तिमुपसंहरन्नितरेन्द्रियवृत्तिष्वतिदिशति । एवं गदिर्गदनं भाषणं मे व्यक्तिरित्युपसंहारः कर्म हस्तयोर्वृत्तिर्गतिः पादयोर्विसर्गः पायूपस्थयोरिति कर्मेन्द्रियाणाम् घ्राणोऽवघ्राणं रसो रसनं दृक् दर्शनं स्पर्शः स्पर्शनं श्रुतिः श्रवणमिति ज्ञानेन्द्रियाणाम् सङ्कल्पो मनसो विज्ञानं बुद्धिचित्तयोरभिमानोऽहङ्कारस्य सूत्रं प्रधानस्य सत्त्वरजस्तमसां विकारोऽधिदैवादिस्त्रिविधः प्रपञ्चो मे व्यक्तिरिति पूर्वेणान्वयः ॥ १९ ॥

तस्मादीश्वरव्यक्तिरूपः प्रपञ्चो नेश्वराद्भिन्नोऽस्तीत्याह । अयमिति । अयं जीव ईश्वर आदावव्यक्त एक एव वयसा कालेन विश्लिष्टा विभक्ता वागादीन्द्रियरूपाः शक्तयो यस्य यद्वा विशेषेण श्लिष्टा आलिङ्गिता मायाशक्तिर्येन सः बहुप्रकार इवाऽऽभाति यतः स एवाद्यः त्रिवृत् त्रिगुणाश्रयः अब्जयोनिर्लोकपद्मस्य कारणभूतः एकस्य बहुधा भाने दृष्टान्तः योनिं क्षेत्रं प्रतिपद्य प्राप्य बीजानि यद्वदिति ॥ २० ॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

अयं भावः अष्टानां पद्यानामयमभिप्रायः स्वमायावशात् स्वमायां वशीकृत्येत्यर्थः । प्रपञ्चात्मना बहिरङ्गशक्तिद्वारा विश्वरूपेणेत्यर्थः । अतस्मिंस्तद्बुद्धिरध्यासः देहादिरहमस्मीति तस्मात् ततोऽध्यस्तकर्तृत्वादेः तदानीं विधिप्रतिषेधाधिकारकाले तत्र एवं व्यवस्थायां सत्याम् आधारचक्रं हिरण्यगर्भस्येति ज्ञेयं तत्र मनोमयं पश्यन्त्याख्यं नाभिस्थे मणिपूरकचक्रे सूक्ष्मरूपं मध्यमाख्यं हृदयस्थे विशुद्धचक्रे चोपेत्येत्यर्थः । तथाच वाचः परादिरूपे प्रमाणं श्रुतिः वाक् वाचः परिमितानि संख्यातानि पराख्यादीनि चत्वारि पदानि स्वरूपाणि सन्ति तेषां मध्ये त्रीणि परा पश्यन्ती मध्यमाख्यानि रूपाणि गुहा गुहायां शरीरमध्ये मूलाधारनाभिहृदयेषु निहितानि स्थितानि नेङ्गयन्ति स्वरूपं न प्रकाशयन्ति वाचस्तुरीयरूपं वैखर्याख्यं मनुष्या वदन्त्येव नतु तत्तु तत्त्वतो जानन्ति अथ श्लोके या सा प्रसिद्धा पराख्या मित्रोऽग्निः वरुणः सोमस्तयोः सदनमाधारचक्रं तस्मात् प्राणसङ्गेनोच्चरन्ती स्वयमेवोद्भवन्ती पराख्या अन्तःकरणाभ्यां मनोबुद्धिभ्यां प्रकटकरणेन वागिन्द्रियेण च त्रिषष्टिवर्णान्

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी ।

प्रसूते प्रसूयते अतस्तां प्रथममुदितां पराख्याम् अन्तः पश्यति नतूच्चारयतियां तां मनःस्थां पश्यन्त्याख्यां तथा बुद्धिसंस्थामुच्चारधर्माति विचारयुक्तां मध्यमां करणविशदां स्थानप्रयत्ननिर्मलां वैखरीमहं प्रपद्ये त्रिषष्टिमिति ह्रस्वदीर्घप्लुतभेदेनाऽणो नव प्लुतत्वाभावात् ऋ ऌ वर्णाश्चत्वारः ह्रस्वत्वाभावादेचोऽष्टौ उदात्तादिस्वरास्तु तदन्तर्गता एव विसर्गानुस्वारजिह्वामूलीयोपध्मानीयाश्चत्वारः एवं पञ्चविंशतिः स्पर्शाश्च तावन्तः एवं पञ्चाशत् यवलाः सानुनासिका निरनुनासिकाश्चेति षट् रेफ एकः नकारस्य दन्त्यमूर्द्धन्यत्वभेदे द्विः पाठात् शषसहळक्षाः षट् एवं त्रिषष्टिरिति ॥ १७ ॥

अव्यक्तस्य सर्वागोचरस्य सतो ब्रह्मणः खे काष्ठचिन्हे तत्र परास्त्वव्यक्तैवेति अव्यक्तोष्मरूपतयोपमीयते पश्यन्ती तु सूक्ष्मविस्फुलिङ्गादिरूपतया मध्यमा प्रकृष्टजाततया वैखरीतु समिद्धतयेति ज्ञेयम् ॥ १८ ॥

एवं गतिरित्युपसंहारो निगमनं विज्ञानं निश्चयात्मकं बुद्धेः अनुसन्धानन्तु चित्तस्येति ज्ञेयं मे व्यक्तिः ममाभिव्यक्तिरूपः ॥ १९ ॥

मयामिति सार्द्धकम् अयं प्रपञ्चाभिव्यक्तिरूपः जीवयति चेतयतीति जीव ईश्वरः पूर्वार्थे वागादीन्द्रियाणां बहुप्रकारान्तर्गतत्वाद्विशेषणमधिकमतो यद्वेति तस्मात् मायेश्वरस्यैव बहुप्रकारेण भानात् तन्मायाविलासितत्वात् ईश्वरमायारचितत्वात् तदाश्रयमीश्वराधिष्ठानकं तत ईश्वरात् ॥ २० ॥ २१ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

विवरप्रसूतिः विवरे हृदयच्छिद्रे प्रसूतिः प्रकाशो यस्य सः गुहां प्रविष्टो जीवः प्राणेन घोषेण शब्देन चोपलक्षितः शरीरस्थितिकाले जीवः प्राणं घोषं च न जहातीत्यर्थः।यदेतत्कर्णावपिधाय शृणोति नैनं घोषं शृणोति स यदोत्क्रमिष्यन् भवतीति हि श्रूयते प्राणवायुविघट्टितशरीरच्छिद्र प्रभवः स घोषः मनोमयं स्वमनोग्राह्यं सूक्ष्मं पार्श्वस्थैरनुपलभ्यं रूपमुपेत्य स्थितः पश्चादुच्चारणवेलायाम् उरः कण्ठः शिरस्तथेति प्रकारेण तात्वादिस्थानप्रयत्नवशात् स्थविष्ठो भवतीत्यर्थः। मात्रा ह्रस्वादिः स्वर उदात्तादि ॥१७॥

पूर्वं सूक्ष्मतयानाभिव्यक्तस्य क्रमेण स्थूलतयाभिव्यक्तौ दृष्टान्तमाह । यथानल इति । खे काष्ठोदरे ऊष्मा मथनदशायां सूक्ष्ममात्रतयोपलब्धेः मे व्यक्तिः मदधीनत्वेनाभिव्यक्ता ॥ १८ ॥

एवं शब्दप्रसङ्गादुच्चारणं प्रस्तुतं ततश्च वागिन्द्रियव्यापार उक्तो भवति अथान्येषामिन्द्रियाणां व्यापारानाह । एवं गदिरिति । ज्ञानेन्द्रियाण्याह। घ्राण इति । संकल्पविज्ञानं संकल्परूपज्ञानं मनोव्यापारः अहंकारकार्यो ऽनात्मन्यात्मबुद्धिरभिमानः सूत्रं महान् स ह्यध्यवसायहेतुः महान् वै बुद्धिलक्षण इति वचनात् एतत्सर्वं रजःसत्त्वतमोविकारः ॥ १९ ॥

त्रिवृत् गुणत्रयवश्यः अब्जयोनिः अप्सु जातं ब्रह्माण्डमब्जं तदन्तर्योनिर्यस्य सोऽब्जयोनिः एकः एकरूपः वृद्धिपरिणामादिरहितः मे मदधीनः वयसा कालेन विसृष्टशक्तिः देहानुबन्धिष्वहङ्कारममकाररूपेण विप्रकीर्णचैतन्यशक्तिः बहुधा देवमनुष्यादिरूपेण यथा बीजानि योनिं भूमिं प्रतिपद्याङ्कुरादिरूपेण बहुधा विभान्ति तद्वत् ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तत्र सर्वेन्द्रियव्यापाराणामात्मायत्ततां विवक्षुस्तावद्वागिन्द्रियव्यापारस्य उत्पत्तिक्रममात्मायत्ततां चाह । स एष जीव इति । विवरप्रसूतिः विवरे हृदयच्छिद्रे प्रसूतिः प्रकाशो यस्य सः गुहां हृदयगुहां प्रविष्टः "हृदि ह्ययमात्मा प्रतिष्ठित" इति श्रुतेरिति भावः। स एष जीवः प्राणेन घोषेण च उपलक्षितः शरीरस्थितिकाले जीवः प्राणं तद्घोषं च न जहातीत्यर्थः। यदेतत्कर्णौ पिधाय शृणोति नैनं घोषं शृणोति स यदोत्क्रमिष्यन् भवतीति श्रूयते मनोमयमित्यस्य स घोष इत्यादिः प्राणवायुसङ्घट्टितशरीरच्छिद्रप्रभवः स घोषः तावन्मनोमयं मनोग्राह्यमत एव सूक्ष्मं पार्श्वस्थैरनुपलभ्यमानं रूपमुपेत्य स्थितः पश्चादुच्चारणवेलायाम् उरःकण्ठःशिरस्तथेति प्रकारेण तात्वादिस्थानप्रयत्नवशात् मात्रादिरूपेण स्थविष्ठः स्थूलतमो भवति तत्र मात्रा ह्रस्वादिः वर्णः ककारादिः स्वर उदात्तादिरिति ॥ १७ ॥

पूर्वं सूक्ष्मतयानभिव्यक्तस्य क्रमेण स्थूलतयोपलभ्यमानत्वे दृष्टान्तमाह । यथेत्यादिना समिध्यत इत्यन्तेन ग्रन्थेन। यथाऽनलः काष्ठोदरस्थोऽग्निः सूक्ष्मः सन्नात्ममन्थनारम्भदशायामुष्मात्मकस्ततो दारुण्यधिकबलेन मथ्यमानः खे आकाशेऽनिलसहायः सन्नणुर्विस्फुलिङ्गादिरूपो भवति ततः क्रमेण प्रकृष्टो जातो हविषा समिध्यते सम्यग्दीप्यते तथैव वागिन्द्रियव्यापाररूपा वाणी मे व्यक्तिराकारः शरीरं मदधीनेत्यर्थः । प्राणेन घोषेणेत्यनेन जीवप्राणयोः परस्परायत्ता स्थितिरिति सूच्यते विवरप्रसूतिरित्यनेन जीवस्य शरीरावस्थितिदशायां सङ्कुचितप्रकाशत्वमुच्यते तेनाज्ञत्वं फलितं तेन च वागिन्द्रियव्यापारानुगुणतच्चोदनाऽसमर्थत्वं च व्यज्यते वाणी चेति चकारोऽन्वेतव्यः तेन दृष्टान्तभूतस्याग्नेरप्यात्मव्यक्तित्वमभिप्रेतम् ॥ १८ ॥

वागिन्द्रियव्यापारस्यात्मायत्तत्वमुक्तम् अथान्येषां कर्मज्ञानेन्द्रियाणां चात्मायत्तव्यापारवत्त्वमाह । एवमिति । गतिः पादेन्द्रियव्यापारः कर्म पाणीन्द्रियव्यापारः रतिरुपस्थस्य विसर्गः मूत्रपुरीषोत्सर्गः पायोः घ्राणं गन्धोपादानं घ्राणेन्द्रियस्य रसः रसग्रहः रसनेन्द्रियस्य दृक् भावे क्विप् दर्शनं चक्षुरिन्द्रियस्य स्पर्शस्त्वगिन्द्रियस्य श्रुतिः श्रवणं शब्दग्रहणं श्रोत्रेन्द्रियस्य सङ्कल्पविज्ञानं सङ्कल्परूपं विशेषज्ञानं मनोव्यापारः अभिमानः अनात्मन्यात्मबुद्धिरूपः सचाहङ्कारस्य व्यापारः सूत्रं महत्तत्त्वं तस्य मणीनां तन्तोरिव बहुकार्याधारत्वादिति भावः। तेन च तद्व्यापारोऽध्यवसायो लक्ष्यते तथाऽन्यश्च यो गुणत्रयपरिणामात्मको देहेन्द्रियादिगणः स च मे व्यक्तिरिति पूर्वश्लोकेन सम्बन्धो ज्ञेयः ॥ १९ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

कस्य तर्हि देवमनुष्यादिभावात्मकः संसार इत्यत आह । अयं हीति । संसारस्याहेतुकत्वशङ्कां वारयितुं विशिनष्टि । त्रिवृदिति । गुणत्रयवश्य इत्यर्थः । त्रयाणां गुणानां वृत् वर्तनं यस्मिन्निति व्युत्पत्तेः अब्जयोनिरप्सु जातं ब्रह्माण्डम् अत्र तद्योनिरुत्पत्तिस्थानं यस्य सः गुणपारवश्याद्ब्रह्माण्डान्तरुत्पत्तिनिधनवानित्यर्थः । अव्यक्तः सूक्ष्मरूपः अणुरितियावत् स्वरूपतस्त्वेकएकरूपः वृद्धिपरिणामादिरहितः आद्यो नित्यश्च वयसा कालेन विश्लिष्टशक्तिः देहतदनुबन्ध्यादिष्वहङ्कारममकाररूपेण प्रक्षीणचैतन्यशक्तिः बहुधा देवमनुष्यादिरूपेण भाति अत्र दृष्टान्तः यथा बीजानि योनिमुत्पत्तियोग्यं क्षेत्रं प्रतिपद्य प्राप्य बहुधा भान्ति तद्वदित्यर्थः । एकजातीयानामपि जीवानां योनिं प्रतिपन्नानां योन्यनुगुणं वृद्धिह्रासादिरूपबहुधाभानं हि दृश्यत इति भावः ॥ २० ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

गोपिका अपि मामापुः किमु वाय्वाद्या इति गोपिकाप्रशंसनं कृतमिति परिहारं हृदि कृत्वा वायुरेव सर्वैर्गुणैः सर्वोत्तमः स एव हिरण्यगर्भश्चेति दर्शयितुं भगवान् हिरण्यगर्भस्य सर्वोत्तमत्वं वक्ति । स एष इति । यो विवरप्रसूतिः विशेषेण वराणामहङ्काराद्यभिमानिनां प्रसूतिरुत्पत्तिः यस्मात्स तथा उत्पादक इत्यर्थः । एष जीवः जीव प्राणधारणे इति धातोः प्रकृष्टानन्दबलत्वात्स्य हरेर्विशेषाधिष्ठानत्वात्तन्नामा ब्रह्मा प्राणेन विष्णुना घोषेण वेदात्मिकया प्रकृत्या लक्ष्म्या च सह गुहां रुद्रादीनां हृदयगुहां प्रविष्टः सन्मनोमयं रुद्रादीनां मनसि नियन्तृत्वेन स्थितमत एव सूक्ष्मं परमाणुकल्पं रूपमुपैति । किञ्च मात्रा स्वरो वर्ण इति मात्रास्वरवर्णत्रयात्मकवेदाख्यं स्थविष्ठं रूपमुपैति ॥ १७ ॥

अनेन वेदादीनि विष्णुप्रकृतिब्रह्मणामभिव्यक्तिस्थानानीत्युक्तं तत्र प्रकृतिब्रह्मणोर्विशेषेण वेदादिकं मम व्यक्तिस्थानमित्याह । यथेति । अनिलो बन्धुर्यस्य स तथा ऊष्मोष्णः अनलो दारुणि स्वबलेन मथ्यमानो अणुत्वेन प्रजातो हविषा घृतेन यथा समिध्यते तथेयं वेदवाणी मे व्यक्तिः व्यक्तिस्थानं वेदवाण्येव विशेषतो मत्तत्त्वव्यञ्जिकेत्यर्थः ॥ १८ ॥

प्रकृत्यादीनां व्यक्तिस्थानत्वेऽपि मम श्रोत्रादीन्यपि वेदादिवद्विशेषतो व्यक्तिस्थानानीत्याह । एवमिति । पदादीनि गत्यादिशब्दवाच्यानि इन्द्रियेन्द्रियविषययोरुभयोर्ग्रहणायैवमुक्तं संकल्पो मनः विज्ञानं बुद्धिः अभिमानोऽन्तःकरणवृत्तिविशेषव्यञ्जकः तस्य रूपान्तरं सूत्रं वायुः सत्त्वसहितं तमः विकारो ब्रह्माण्डः एतानि हरेरधिष्ठानरूपाणि भवन्तीति ज्ञातव्यानि तदभिमानिन्यो देवताश्च यस्तमसि तिष्ठन् श्रोत्रे तिष्ठन्नित्यादेः ॥ १९ ॥

विवरप्रसूतिरित्युक्तं कारणत्वं गुहां प्रविष्ट इत्युक्तव्याप्तिं च विविच्य सोदाहरणमाह । अयं हीति । मां रमां चान्तरेण वर्णाद्यात्मकवेदादिसर्वशब्दवाच्योऽयमब्जयोनिर्ब्रह्मा नियामकत्वेन सर्वोत्तमत्वाज्जीवस्त्रिवृज्ज्ञानानन्दबलात्मको व्यक्तः सूक्ष्मः जगतामाद्य एक एवाहंकारादिपृथिव्यन्तानि स्वसृष्टानि कार्याण्यनुप्रविश्य विशेषेण श्लिष्टशक्तिरनपगतसामर्थ्य एव तत्तन्नियामकरूपैर्बहुधैव भाति तत्त्वाभिमानिनामितिशेषः कथमिव यद्वद्यथा कलमादिबीजानि योनिं भूमिलक्षणां प्रतिपद्य बह्वङ्कुराणि भवन्तीति एवं परमात्मानुगृहीतो ब्रह्माहङ्कारादिषु बहुधा-व्यक्तीभवतीति यो विवरप्रसूतिर्योनिद्वारा प्रसूयते एष जीव इति संज्ञां लभत इत्यन्यथा व्याकुर्वते तन्मतम्—

सुपर्णशेषरुद्रादिप्रसूतिस्तु चतुर्मुखः ।
सर्वजीवोत्तमो जीवो गुणैर्ज्ञानसुखादिभिः ॥
विष्णुभक्त्यादिभिः सर्वैर्नियमात्सर्वकालिकम् ।
मुक्तावपि न सन्देहः सहि देवेन विष्णुना ॥
प्राणः प्राणेन जगतामीशेन रमया तथा ।
वेदात्मिकया च सहितः सूक्ष्मः सन्मनसि स्थितः ॥
वीन्द्रादीनान्तु सर्वेषां मात्रावर्णस्वरेषु च ।
स्थूलरूपी सदा तिष्ठन्नेव श्रोत्रादिकेषु च ॥
सर्वेषां प्रेरको ह्येको ज्ञानानन्दबलैस्त्रिवृत् ।
नित्यशक्तिः सर्वगः सन् बहुधैव प्रतीयते ॥
तस्मिन्नोतमिदं सर्वं पटे तन्तुवत् ।
स एव वायुरुद्दिष्टो वायुर्हि ब्रह्मतामगात् ॥
विशेषेण हरेर्व्यक्तिस्थानान्येतानि सर्वशः ।
मनआदीन्यहङ्कारो ब्रह्मा वेदात्मिका रमा ॥
त्रिगुणात्मिका च सैवश्रीः सैवोक्ता संविदात्मिका ।
तस्या अपि नियन्तैको विष्णुः सर्वेश्वरेश्वरः ॥
यथा दारुषु सूक्ष्मः सन्मथितोऽग्निः समिध्यते ।
तथा वेदादिषु हरिर्मथितः सम्प्रदृश्यते ॥
व्यक्तिस्थानान्यथैतानि वेदादीनि हरेर्विदुः ।

इत्यनेन प्रमाणवाक्येन निरस्तमिति नास्माभिस्तद्दूषणाय प्रयत्यते मनसि व्यक्तितां यामि तस्माद्व्यक्तिर्हि मे मन इत्येतत्स्पष्टं च ॥ २० ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

वैयग्र्यं च द्विविधम् एकं पूर्वत्र एवानुगतया स्वत्यागभीत्या अन्यत्संप्रति जातया रामेण सार्धमित्याद्युक्तस्य हन्त तासामनेन संगमः कुत्र कथं विद्यत इति विशेषं ज्ञातुमत्युत्कण्ठया तत्र स एष इत्यस्यार्थद्वयेन द्विविधं वैयग्र्यमपनेतुं स्वत्यागभीत्या कृतं तत्तत्प्रकरणैकतात्पर्याग्रहणवैयग्र्यं प्रथमेनार्थेन निराकरोति यथापूर्वोक्तं तस्मात्त्वमुद्धवोत्सृज्येति पर्यवसानं सर्ववेदार्थं पुनः संक्षेपतस्तन्नेतृत्वं तदाश्रयत्वं च तथा विध मय्येवेति दर्शयितुं सर्वेषां वेदानां शब्दरूपेण स्वाविर्भावरूपत्वमाह । स एष इति द्वाभ्याम् आधारचक्रादिकमत्र चतुर्भ्यो मुखेभ्यः प्रथमतो वेदाविर्भावसमये चतुर्मुखस्यैवेति ज्ञेयम् अत एव नादो वेदशब्दात्मको भवतीत्यादिटीका च संगच्छते व्याख्यास्यते चैकविंशे आकाशात् घोषवान् प्राण इत्यत्र प्राणस्तदुपाधिर्हिरण्यगर्भरूपः घोषवान् नादोपादानवानिति अनन्तपारामित्यत्र न समष्टिप्राणादिमयस्य कालतो देशतश्चापरिच्छेदाविति श्रुत्यभियुक्तश्लोकौ दृष्टान्तावत्र लौकिकवाङ्मयत्वात् तत्र श्रुतौ वाक्परिमितानि शास्त्राणि निर्णीतानि चत्वारि पराख्यादीनि पदानि रूपाणि तेषां मध्ये आद्यो त्रीणि गुहायां

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

शरीरे आधारनाभिहृदयेषु स्फुरन्त्यपि नेङ्गयन्ति स्वरूपं न प्रकाशयन्तीति पदार्थः अथ श्लोके या सा पराख्या शिवेऽग्निः वरुणः सोमः तयोः सदनमाधारचक्रं तस्मात्प्राणसंगेनोद्गरन्ती स्वयमेव सूक्ष्ममुद्भवन्तीति त्रिषष्टिं वर्णान् प्रसूयते कैः अन्तःकरणाभ्यां प्रकटकरणेन च अन्तः । तां प्रथममुदितां सतीं पश्यन्त्याख्यां अन्तःपश्यति नतूच्चारयति यां तां प्रथमां तथा बुद्धिसंस्थाम् उच्चारयामीति विचारयुक्तां मध्यमां करणविशदां स्थानप्रयत्ननिर्मलां वैखरीं प्रपद्ये त्रिषष्टिमिति ह्रस्वदीर्घप्लुतभेदेनाणो नव प्लुतत्वाभावात् ऋलृवर्णाश्चत्वारः ह्रस्वत्वाभावादेचोऽष्टौ उदात्तादिस्वरास्तु तदन्तर्गता एव विसर्गानुस्वारजिह्वामूलीयोपध्मानीयाश्चत्वारः एवं पञ्चविंशतिः स्पर्शाश्च तावन्तः एवं पञ्चाशत् यवलाः सानुनासिका निरनुनासिकाश्चेति षट् रेफ एकः नकारस्य दन्त्यमूर्धन्यत्वभेदेन द्विःपाठात् शषसहलक्षाः षट् एवं त्रिषष्टिरिति म द्वितीयं वैयर्थ्यं द्वितीयेनार्थेन निराकरोति । स एष इति । स एष मल्लक्षणो जीवो जगतो जीवनहेतुः विशेषतो अजस्य जीवनहेतुर्वा परमेश्वरः प्राणेन मत्प्राणतुल्येन घोषेण अजेन सह विवरप्रसूतिः विवरात् अप्रकटलीलातः प्रसूतिः प्रकटलीलायामेवाभिव्यक्तिर्यस्य तथाभूतः सन् पुनर्गुहामप्रकटलीलामेव प्रविष्टः कीदृशः सन् किं कृत्वा मात्रा मम चक्षुरादीनि स्वरो भाषा गानादिः वर्णो रूपम् इति इत्थं स्थविष्ठः स्वपरिजनानां प्रकट एव सन् बहिरङ्गभक्तानां मनोमयं कथंचिन्मनसैव गम्यम् अन्येषां सूक्ष्ममज्ञेयं यद्रूपं प्रकाशस्तदुपेत्य ॥ १७ ॥

तत्र प्रथमेऽर्थे यथानल इति तथैव मम व्यक्तिरूपा वाणी चेत्यर्थः द्वितीयेऽर्थे प्रकटलीलाविष्कारं च सदृष्टान्तं स्पष्टयति । यथेति हि यस्मात् इयं स्वरहस्यैकवेद्यविज्ञस्य ममैव वाणी नात्रासंभावनाविधेयेत्यर्थः । दृष्टान्तोऽयं गर्भादिक्रमेणाविर्भावमात्रांशे तृतीयस्कन्धेऽपि श्रीमदुद्धवेनैव तदुक्तम् अजोऽपि जातो भगवान् यथाग्निरिति ॥ १८ ॥

तदेवं देवस्य स्वाविर्भावत्वं दर्शयित्वा तदर्थद्वारा जीवानां जगदावेशं त्याजयितुं जगति लौकिकवागादिवृत्तीनामपि तत उद्भवं दर्शयति । एवं गादिरिति । यथा पराख्यादिक्रमेण वैदिकी वाग्वृत्तिरुत्पन्ना तथा गादिर्लौकिक्यप्युत्पन्ना किन्तु पूर्वा स्वरूपशक्त्या परा तु माययेति ज्ञेयमित्यर्थः । ततश्च यथा गादिस्तथा कर्मादयोऽपीत्यर्थः ॥ १९ ॥

तथैव दर्शयति । अयं हीति सार्द्धकं बीजानीति बीजानां मध्ये यदेकमपीत्यर्थः ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

भो प्रियसखोद्धव ! मैवं मंस्थाः सर्वेषामेव जीवानामुपकारार्थं भक्तिज्ञानवैराग्ययोगतपोधर्मादीनि मत्प्राप्त्युपायरत्नानि तत्त्वतस्त्वदनन्यज्ञेयानि त्वयि न्यासत्वेनैवार्पयामि त्वन्तु तत्र तत्र वस्तुनि स्वत्वमारोप्य ममैव तादित्यभिमन्यमनो लज्जामपि किन्न भजसि अहन्तु भो उद्धव ! त्वया ज्ञानमभ्यस्यतां कर्माणि क्रियन्तां भक्तिः कर्त्तव्या योगा अनुष्ठेयास्तपश्चरणीयमित्यादिकं सर्वजीवानुद्दिश्यापि त्वामेकमेव लक्ष्यीकृत्य यदवोचं यच्चिम वक्ष्यामि वा तेनैव किं त्वं तत्तदनुष्ठानाधिकारी स्वलत्वभूस्त्वं तु मे योऽसि सोऽस्येव साम्प्रतं तु न ते क्वापि साधकतेति सनर्माश्वासमभिव्यञ्जयन् कस्यापि जीवस्य दशाभेदेन कर्माधिकारो ज्ञानाधिकारो भक्त्यधिकारश्च यतो ज्ञायते तस्य वेदस्यार्थं सम्यगहमेव जानामि नान्यो यतो देवस्वरूपेण चतुर्मुखवक्त्रेभ्योऽहमेव प्रादुरभूवमित्याह । स इति । जीवयतीति जीवः परमेश्वरः स प्रसिद्धः एष मल्लक्षणः पुरुष एवेति स्वतर्जन्या स्वहृदः स्पृशति विवरेषु चतुर्मुखशरीरस्थाधारादिचक्रेषु प्रसूतिरिव प्रसूतिरभिव्यक्तिर्यस्य सः नामध्वनिव्यक्तिमाह । घोषेण पराख्येन नादेन नादवता प्राणेन सह गुहामाधारचक्रं प्रविष्टः सन् मनोमयं सूक्ष्मं रूपं पश्यन्त्याख्यं मध्यमाख्यं च पूरकचक्रे विशुद्धचक्रे च उपेत्य प्राप्य वक्त्रेषु मात्रा ह्रस्वादिः स्वर उदात्तादिः वर्णश्चाकारादिरित्येवं वैखर्याख्यः स्थविष्ठोऽतिस्थूलः नानावेदशाखात्मको भवति ॥ १७ ॥

क्रमेणाभिव्यक्तौ दृष्टान्तः । यथेति । यथा अग्निः खे दारुगताकाशे ऊष्मा प्रथममथने अव्यक्तोष्मरूपः ततो दारुण्यधिकं मथ्यमानः अनिलसहायः सन् अणुः सूक्ष्मविस्फुलिङ्गादिरूपो भवति ततश्च प्रजातः प्रकर्षेण स्थूलतया जातः हविषा समिध्यते प्रवर्द्धते तथैव मे व्यक्तिर्मदाविर्भावरूपा इयं वेदलक्षणा वाणी अतोऽस्या अतिगूढमर्थं मां विना को ज्ञास्यति ज्ञात्वा च जीवस्य संसारनिस्तारणार्थान् भक्तिज्ञानकर्माद्युपायान् को व्यवस्थास्यतीत्यतस्त्वयि परमयोग्ये पात्रे स्वतुल्ये तानुपायान् साम्प्रतं कृपया न्यस्यामि त्वत्तो बदरिकाश्रमस्था मुनयः प्राप्य कृतार्था भविष्यन्तीति भावः ॥ १८ ॥

किञ्च मत्स्वरूपभूता वेदलक्षणा वाणी यथा ब्रह्मशरीरादुद्भूता तथैव प्राकृत्यपि वाणी प्राकृतलोकशरीरादपभ्रंशादिरूपा समुद्भवतीत्याह । एवं गादिर्वागिन्द्रियव्यापारो भाषणं तथा च श्रुतिः—

चत्वारि वाक् परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः
गुहायां त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्तीति

अस्या अर्थः वाक् वचनानि चत्वारि परिमितानि पदानि सुप्तिङन्तानि तत्र त्रीणि परापश्यन्तीमध्यमाख्यानि प्राणमनोबुद्धिस्थानि आधारनाभिहृदयेषु स्फुरन्त्यपि नेङ्गयन्ति स्वरूपं न प्रकाशयन्ति तुरीयं वैखर्याख्यं वागिन्द्रियगतं वाचो वचनमिति यथा गादिरेवमेव समष्टिव्यष्टीनां सर्वेन्द्रियव्यापारो ममैव प्राकृती व्यक्तिरित्याह । कर्म हस्तयोर्व्यापारः गतिः पादयोः विसर्गः पायूपस्थयोरिति कर्मेन्द्रियाणां घ्राणोऽवघ्राणः रसो रसनं दृक् दर्शनं स्पर्शः स्पर्शनं श्रुतिः श्रवणमिति ज्ञानेन्द्रियाणां सङ्कल्पो मनसः विज्ञानं बुद्धिचित्तयोः अभिमानोऽहङ्कारस्य सूत्रं प्रधानस्य रजःसत्त्वतमसां विकारोऽध्यात्मादिस्त्रिविधः प्रपञ्चः मे व्यक्तिर्मायिकीति पूर्वेणान्वयः ॥ १९ ॥

तस्मादीश्वराभिव्यक्तिरूपः प्रपञ्चो नेश्वराद्भिन्न इति वक्तुं प्रथममीश्वरमाह । अयमिति ईश्वरस्त्रिवृता त्रिगुणमायाश्रयः त्रिवृद्रूपत्वेनैव अब्जयोनिः अब्जस्य लोकपद्मस्य कारणभूतः प्रथमं सृष्टेः पूर्वमव्यक्त एक एव वयसा कालेन स एव आद्य ईश्वरः प्रपञ्चात्मको भवतीत्याह । विश्लिष्टशक्तिर्विश्लिष्टाः पृथक् पृथक् विभक्ता वागादीन्द्रियरूपाः शक्तयो यस्य तथाभूतः सन् बहुधा देवमनुष्या-

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

द्विबहुप्रकारको भाति एकस्य बहुधा भाने दृष्टान्तः योनिं क्षेत्रं प्रतिपद्य प्राप्य बीजानि यद्वत् एकैकस्यापि बीजस्य बहुशः उद्गमा भवन्तीत्यर्थः ॥ २० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

संशयनिवारणाय सर्वकारणत्वादिना सर्वात्मत्वमाह । स इत्यादिना । "सर्वाणि नामानि यमाविशन्ति सर्वे वेदा यत्रैकीभवन्ति एकमेवाद्वितीयम् ऐतदात्म्यमिदं यः सर्वज्ञः सर्ववित् यतो वा इमानि भूतानि जायन्ते" इत्यादिषु प्रसिद्धो यः स एव त्वदग्रचरोऽहं जीवः सर्वचेतनाचेतनचेतयिता विवरे हृत्पद्मे प्रसूतिराभिव्यक्तिर्यस्य सः अयस्त्ररूप इत्यर्थः । घोषेण परावस्थारूपशब्दवता प्राणेन स्वशक्तिलेशात्मना गुहामाधारचक्राख्यां प्रविष्टः सन् मनोमयं पश्यन्त्याख्यं सूक्ष्मं रूपं मध्यमाख्यं च मणिपूरकचक्रे विशुद्धिचक्रे चोपेत्य प्राप्य मुखे मात्रा ह्रस्वादिः स्वर उदात्तादिः वर्णः ककारादिरित्येवं वैखर्याख्यः स्थविष्ठः अतिस्थूलः पदवाक्यादिरूपो भवति अत्र—

चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः । गुहां त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्तीति श्रुतिरनुसन्धेया ॥ १७ ॥

अव्यक्तस्य सतः सूक्ष्ममध्यमक्रमेणाभिव्यक्तिं दृष्टान्तेन स्पष्टयति । यथेति । यथा दारुण्यनलोऽग्निरव्यक्तो बलेन मथ्यमानः सन् प्रथमसूक्ष्मात्मकः तदनन्तरमणुस्वरूपस्तदनन्तरं प्रकृष्टो जातः अनिलबन्धुः वायुसहायः खे हविषा समिध्यते तथैवेयं वाणी मे व्यक्तः ममाभिव्यक्तिः ॥ १८ ॥

गदिः वागेन्द्रियव्यापाररूपं गदनं भाषणं यथा मे व्यक्तिः पूर्वत्र प्रतिपादिता एवं कर्म हस्तेन्द्रियस्य गतिः पादेन्द्रियस्य विसर्गः पायूपस्थयोः घ्राणः अवघ्राणं घ्राणेन्द्रियस्य रसः रसनं रसनेन्द्रियस्य दृक् दर्शनं चक्षुरिन्द्रियस्य स्पर्शस्त्वगिन्द्रियस्य श्रुतिः श्रवणं श्रोत्रेन्द्रियस्य संकल्पः मननं मनसः विज्ञानं बोधनं चिन्तनं च बुद्धिश्चित्तस्य च अभिमानः देहादावहंकारस्य व्यापारः । ममाभिव्यक्तिः किम्बहुना सूत्रं महतः पूर्वरूपं रजःसत्त्वतमोविकारः सर्वोऽपि संसारः मे चिदाचिच्छक्तिमतोऽभिव्यक्तिः "आत्मकृतेः परिणामात्" इति सूत्रात् "तदात्मानं स्वयकुरुतेति" श्रुतेश्च सर्वनिमित्तोपादानकारणत्वात्सर्वात्माहमित्यर्थः ॥ १९ ॥

संसाराभिव्यक्तिं प्रपञ्चयन् तर्हि सर्वात्मनस्तव विकारित्वबहुत्वादिप्रसङ्गः इति शङ्कां निराकरोति । अयमिति । अयं त्वत्पुरःस्थितः एकः अद्वैतरूपः बहुधा द्वैतरूपश्च भाति "उभयव्यपदेशादहिकुण्डलवत्" इत्यादिसूत्रेभ्यः हि यतः विश्लिष्टशक्तिः विशेषतः श्लिष्टाः संश्लिष्टाः चिदचिद्रूपाः शक्तयो यस्मिन्स शक्तिशक्तिमदद्वयविवक्षया द्वैतरूपसमानाधिकपदार्थान्तराभावात् अद्वैतरूपः एवं स्वाभाविकद्वैतरूपः विकारित्वाद्याः अचिच्छक्तिधर्माः बहुत्वादयश्चिच्छक्तिधर्माः अतो नोक्तदोषप्रसङ्गः आद्यः कारणरूपः अव्यक्तः अनभिव्यक्तनामरूपः वयसा कालेन त्रिवृत् त्रिसर्गरूपः जगदाकारः बीजानि इव यथा एकैकानि योनिं क्षेत्रं प्रतिपद्य वृक्षरूपाणि भवन्ति तद्वत् तत्र चेतनाचेतने जगति प्रविष्टः अब्जयोनिः ब्रह्मादिजनकः जीवः सर्वप्राणप्रदः परमेश्वरः ॥ २० ॥

भाषा टीका ।

श्रीभगवान् उवाच ।

यह आत्मा शब्दरूप से प्रगट होता है आधारादिक चक्रों में से प्रगट होने वाला है तिस में पहिले नाद वाले प्राण के सहित आधार चक्र में प्रवेश करता है तब परा नाम से कहा जाता है फिर सूक्ष्म मनो मय रूप को प्राप्त होकर पश्यन्ती रूप मध्यमा रूप हो जाता है फिर विशुद्ध चक्र में जाकर मुख में से वैखरी रूप होता है तब ह्रस्वादि मात्रा उदात्तादि स्वर ककारादिवर्ण रूप से स्थूलाकार से प्रगट होता है ॥ १७ ॥

जैसे कि अग्नि पहिले अत्यन्त सूक्ष्म रूप से काष्ठ के आकाश में रहता है फिर काष्ठ के मन्थन करने से वायु के सहायता से बल पडने से सूक्ष्म चिनगारी रूप से पैदा होता है छोटा हो कर भी फिर घृत हविष के डालने से अच्छे प्रकाश हो कर जलने लगता है तिसी प्रकार से हमारी वाणी प्रगट होती है ॥ १८ ॥

इसी प्रकार से भाषण प्रगट होता है फिर क्रिया होती है फिर चलना होता है फिर मलादि त्याग क्रिया होती है ऐसे कर्मेन्द्रिय होते हैं घ्राणेन्द्रिय फिर रस फिर दर्शन फिर श्रवण ऐसे ज्ञानेन्द्रिय फिर सङ्कल्प फिर विज्ञान फिर अभिमान फिर प्रधान का सूत्र फिर रज सत्त्व तम इन का विकार अधि दैवादिक होता है ऐसे सब प्रपञ्च होता है ॥ १९ ॥

यह आत्मा पहिले आद्य एक रहता है फिर काल से उस की शक्तियों का विभाग होता है तब तीनों गुणों के आश्रय होने से लोक पद्म का कारण होता है तब बहुत प्रकार से भान होता है जैसे कि धान्यादिक बीज खेत में पडने से नाना अंकुर रूपी हो जाता है तैसे ॥२०॥

यस्मिन्निदं प्रोतमशेषमोतं पटो यथा तन्तुवितानसंस्थः ।
य एष संसारतरुः पुराणः कर्मात्मकः पुष्पफले प्रसूते ॥ २१ ॥
द्वे अस्य बीजे शतमूलस्त्रिनालः पञ्चस्कन्धः पञ्चरसप्रसूतिः ।
दशैकशाखो द्विसुपर्णनीडस्त्रिवल्कलो द्विफलोऽर्कं प्रविष्टः ॥ २२ ॥
अदन्ति चैकं फलमस्य गृध्रा ग्रामेचरा एकमरण्यवासाः ।
हंसा य एकं बहुरूपमिज्यैर्मायामयं वेद स वेद वेदम् ॥ २३ ॥
एवं गुरूपासनयैकभक्त्या विद्याकुठारेण शितेन धीरः ।
विवृश्च्य जीवाशयमप्रमत्तः सम्पद्य चात्मानमथ त्यजास्त्रम् ॥ २४ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यामेकादशस्कन्धे द्वादशोऽध्यायः ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तस्मात्तन्मायाविलसितत्वात्तदाश्रयमिदं जगन्न ततः पृथगिति सदृष्टान्तमाह । यस्मिन्निति । तन्तुवितानै संस्थास्थितिर्यस्य स पटो यथा यस्मिन्निदं विश्वमोतं दीर्घतन्तुषु पट इव प्रोतन्तिर्यक्तन्तुष्विव एवं भूतं समष्टिव्यष्ट्यात्मकं विश्वमाविद्याऽऽत्मन्यध्यस्तं वृक्षरूपं जीवस्य कर्तृत्वादिसंसारहेतुरतस्तद्विवेकज्ञानेन कर्मादिसर्वं त्याज्यमित्युक्तमित्याशयेनाऽऽह । य एष इति सार्धैस्त्रिभिः । पुराणोऽनादिः कर्मात्मकः प्रवृत्तिस्वभावः पुष्पफले भोगापवर्गौ कर्मतत्फले वा प्रसूते जनयति ॥ २१ ॥

वृक्षरूपकं प्रपञ्चयति । द्वे इति । द्वे पुण्यपापे अस्य बीजे स च शतमूलः शतमपरिमिता वासना मूलानि यस्य त्रयो गुणा नालानि प्रकाण्डा यस्य पञ्च भूतानि स्कन्धा यस्य पञ्च रसाः शब्दादिविषयास्तेषां प्रसूतिर्यस्मात् दश च एका च शाखा इन्द्रियाणि यस्य द्वयोः सुपर्णयोर्जीवपरमात्मनोर्नीडं यस्मिन् त्रीणि वल्कलानि त्वचो वातपित्तश्लेष्माणो यस्य द्वे सुखदुःखे फले यस्य सः अर्कं प्रविष्टः सूर्यमण्डलपर्यन्तं व्याप्तः तं निर्भिद्य गतस्य संसाराभावात् ॥ २२ ॥

तत्फलभोक्तॄनाह । गृध्यन्ति अभिकाङ्क्षन्त इति गृध्राः कामिनो ग्रामे चरा गृहस्था अस्य वृक्षस्यैकं फलं दुःखमदन्ति । परिणामतः स्वर्गादेरपि दुःखरूपत्वात् हंसा विवेकिनोऽरण्यवासाः संन्यासिन एकं फलं सुखमदन्ति । एकं परमात्मानं मायामयमेव बहुरूपमिज्यैर्गुरुभिः कृत्वा यो वेद स वेदं वेद तत्त्वार्थं वेद ॥ २३ ॥

त्वञ्चैवं ज्ञात्वा कृतकृत्यः सर्वं साधनं त्यजेत्याह । एवमिति । एकान्तभक्त्या शितेन तीक्ष्णेन विद्याकुठारेण स्वतन्त्रता वा द्वयोर्ज्ञानभक्त्योर्जीवोपाधिं त्रिगुणात्मकं लिङ्गशरीरं विवृश्च्य छित्त्वा परमात्मानञ्च सम्पद्य प्राप्याथास्त्रं साधनं त्यजेति ॥ २४ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे श्रीधरस्वामिकृतभावार्थदीपिकायाम् द्वादशोऽध्यायः ॥ १२ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी ।

समष्टिर्वनवत् सर्वं जगत् व्यष्टिर्वृक्षवत् प्रत्येकं शरीरं तदात्मकं तद्विवेकज्ञानेन तस्मादध्यस्ताद्विश्वस्मात् पृथक्त्वज्ञानेन य एष इति सार्द्धकम् ॥ २२ ॥

विश्वात्मकवृक्षफलभोजनकर्तॄन् ॥ २३ ॥

अथानन्तरं शीघ्रमित्यर्थः ॥ २४ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धीये श्रीराधारमणदासगोस्वामिकृतदीपिकादीपने टिप्पणे द्वादशोऽध्यायः ॥ १२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

यस्मिन् जीवे इदं मनुष्यादिशरीरं पटवत् पोतं वस्त्रमिव शरीरं बिभात्त स इति पूर्वश्लोकान्वयः इति।संसरतीति संसारः संसरत्यनेनेति वा शरीरं कर्मात्मनः कर्मशीलस्य जीवस्य स एष संसारतरुः ।

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

पुराणः अनादिः पुष्पस्थानीयं कर्म फलस्थानीयं सुखदुःखं पुष्पफले प्रसूते ॥ २१ ॥

अस्य संसारतरोः द्वे पुण्यपापे बीजे अयं तरू रागादिदोषशतमूलः गुणत्रयनालः त्रिनालः पञ्चतन्मात्रस्कन्धः शब्दादिविषयजन्यपञ्चविधरसप्रसूतिः एकादशेन्द्रियशाखः जीवपरमात्मरूपपक्षियुगलान्वितहृत्पद्मनीडः तेजोऽबन्नरूपत्रिवल्कलः द्विफलः भोगमोक्षफलः अर्के प्रविष्टः आध्यात्मिकादितापाविष्टः ॥ २२ ॥

गृध्राः फलं गृध्यन्तः हंसाः संन्यासिनः बहुविधरूपनिष्ठाः यस्य तं मायामयं प्रकृतिपरिणामरूपं वृक्षं यो वेद स वेदविदित्यर्थः ॥ २३ ॥

एकभक्त्येति उपासना विशेष्यते एकारूपा स्थिरा भक्तिर्यस्याः तथा जीवाशयं जीवेष्ववस्थितमिति वृक्षविशेषणं विवृश्च्य छित्त्वा अस्त्रं शस्त्रं विद्याख्यम् आत्मानं सम्पद्य परमात्मानं प्राप्य अस्त्रं त्यज नतु प्रागेव आमोक्षाद्विद्यामनुवर्त्तयेत्यर्थः ॥ २४ ॥

इति श्रीमद्भागवतव्याख्याने एकादशस्कन्धीये

श्रीसुदर्शनसूरिकृतशुकपक्षीये

द्वादशोऽध्यायः ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

कस्तर्हीन्द्रियाद्यधिष्ठानामित्यादिसंशयं निराकरोति । यस्मिन्निति अशेषमिदमिन्द्रियप्राणजालं यस्मिन्नोतं प्रोतं च स एष संसारतरुरिति सम्बन्धः सर्वेन्द्रियगणोतप्रोतस्य दृष्टान्तः पटो यथा तन्तुवितानसंस्थ इति । तन्तुवितानस्य तन्तुविततेरोतप्रोतरूपा संस्था सम्यक् स्थितिर्यस्मिन् स पटो वस्त्रं यथा तद्वत् संसारयतीति संसारः संसरत्यनेनेति वा संसारो देहः पुराणः प्रवाहतोऽनादिः कर्मात्मकः प्रवृत्तिस्वभावः पुष्पफले पुष्पस्थानीयं कर्म फलस्थानीयं सुखं दुःखं च प्रसूते जनयति कर्मात्मन इति पाठे कर्मशीलस्य जीवस्य भोगार्थं सुखदुःखे जनयतीत्यर्थः ॥ २१ ॥

तामेव संसारस्य तरुरूपतां प्रपञ्चयति । द्वे अस्येति श्लोकेन । अस्य संसारतरोर्द्वे पुण्यपापे बीजे शतं रागद्वेषभयादीनि मूलानि यस्य सः त्रिनालः गुणत्रयं नालाः प्रकाण्डानि यस्य सः पञ्च भूतानि स्कन्धा यस्य सः पञ्चानां रसानां शब्दादिविषयाणां प्रसूतिर्यस्मिन् दश ज्ञानकर्मोभयेन्द्रियाणि एकं मनस्तान्येव शाखा यस्य सः द्विसुपर्णनीडः जीवपरमात्मरूपपक्षियुगलान्वितहृत्पद्मरूपनीडयुक्तः त्रिवल्कलः त्रीणि वल्कलानि त्वचो वातपित्तश्लेष्माणो यस्य सः द्विफलः भोगमोक्षफलः जीवरूपिणः पक्षिणः प्रवृत्तिकर्मासक्तत्वे भोगफलकः निवृत्तिधर्मासक्तत्वे तु मुक्तिफलक इत्यर्थः । अर्के प्रविष्टः आध्यात्मिकादितापत्रयालवाले प्रतिष्ठितः ॥ २२ ॥

द्विफलत्वमेव प्रपञ्चयति । अदन्तीति । ग्रामेचरा गृध्राः शब्दादिविषयाभिलाषिणो जीवा अस्य संसारतरोरेकं सुखदुःखात्मकं फलमदन्ति भुञ्जते एकं मोक्षाख्यं फलं त्वरण्यवासा हंसा अदन्ति ज्ञानकर्मयोगयोरपि शरीरसाध्यत्वं तत्फलयोर्भोगमोक्षयोरपि तद्द्वारा तत्साध्यत्वाभिप्रायेणास्य फलमित्युक्तं यः पुमानेकं संसारतरुं मायामयं प्रकृतिपरिणामात्मकं बहुरूपं देवत्वमनुष्यत्वाद्यनेकरूपम् इज्यैः पूज्यैर्गुरुभिः कृत्वा वेद स एव वेदं वेद वेदविदित्यर्थः । बहुरूपरूपमिति पाठे बहुरूपाणि देवमनुष्यत्वादीनि तान्येव रूपं यस्य तमित्यर्थः ॥ २३ ॥

त्वं चेत्थमिमं ज्ञात्वा एका एकरूपा स्थिरा भक्तिर्यस्यां तया गुरूपासनया लब्धेन शिक्षितेन शितेन विद्याकुठारेण उपदिष्टन्यासोपासनान्यतरविद्यात्मककुठारेण परशुना स्वशक्त्यनुगुणेन धीरः अकुतोभयः जीवाशयं जीवे व्यवस्थितं वृक्षं छित्त्वा निःशेषशरीरसम्बन्धमपोह्येत्यर्थः । तत्र न्यासयोगपक्षेऽप्रमत्तः महाविश्वासविषयकप्रमादरहितः आत्मानं मां सम्पद्याथास्त्रं त्यज महाविश्वासात्मकं शस्त्रं यावन्मत्प्राप्त्यनुवर्तस्वेत्यर्थः ॥ २४ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्

द्वादशोऽध्यायः ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

नन्वेवं तर्हि चतुर्मुख एव जगदाकारेण विवर्तत इति किं न स्यादत्राह । यस्मिन्निति । यस्मिन्विरिञ्चे तन्तूनां वितानस्य पद्माद्याकारस्य संस्थावस्थितिः पटाधारतया तन्तुविरचितपद्माद्याकारस्य पटाद्यथा भेदः प्रत्यक्षसिद्धस्तथा विरिञ्चाधारं जगत् विरिञ्चाद्भिन्नम् उपलक्षणमेतत् । विरिञ्चश्च श्रीश्चैव महाधारो मद्भिन्नाविति । तदुक्तम्—

यथैव वस्त्रे दीर्घे च तिर्यग्वापि सुसंस्थिता ।
तन्तुभिः क्रियमाणैव पद्माद्याकारसंस्थितिः ॥
यथा जीर्णानि वस्त्राणि तन्त्वाधाराणि वा पुनः ।
कन्थावयवभूतानि तद्वदेतच्चतुर्मुखे ॥
सोऽपि तद्वद्धरौ नित्यं संश्रिता श्रीरपि स्फुटमिति ।

उक्तं विशिनष्टि । य एष इति । य एष संसारतरुर्जगद्वृक्षः पुष्पफले स्वर्गमोक्षौ प्रसूते स विरिञ्चे ओतप्रोतश्च इति शेषः ॥ २१ ॥

जगद्वृक्षस्य ब्रह्म बीजमित्युक्तं तद्विवृणोति । द्वे अस्येति—

जगद्वृक्षस्य बीजे द्वे ब्रह्मा चैव सरस्वती ।
मूलभूतानि कर्माणि मनोबुद्धिरहङ्कृतिः ॥
नालत्वेन समुद्दिष्टाः खमाद्याः स्कन्धसंज्ञिताः ।
एकादशेन्द्रियाण्येव शाखास्तु त्रिगुणास्त्वचः ॥
प्रवृत्तं च निवृत्तं च फले अस्य प्रकीर्तिते ।
पुष्पमैहिकमुद्दिष्टं रसाः शब्दादयस्तयोः ॥
प्रवृत्ताश्च निवृत्ताश्च पक्षिणस्तत्र संस्थिताः ।
वृक्षस्य पृथिवी लक्ष्मीर्विष्णुराकाशवायुवत् ॥
तस्या अपि सदाधार एवं ज्ञात्वा विमुच्यते ।

इत्यनेन व्याख्यातोऽयं श्लोकः तथापि स्पष्टत्वाय किञ्चिदुच्यते अस्य जगद्वृक्षस्य जलवच्च भूमिवच्च ब्रह्मसरस्वत्यौ द्वे बीजे व्यञ्जके न तु वटबीजादिवदङ्कुरोत्पत्त्यनन्तरं नाशिशरस्के अत एव स्वकार्यतो गुणतो रूपतश्च महत्यौ शतमित्युपलक्षणमनेकवि-

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

धान्यसङ्ख्यातानि कर्माणि मूलानि यस्य शतमूलो जगत्तरुः त्रयो नाला अहङ्कारबुद्धिमनोऽभिमानिनो रुद्रेन्द्रचन्द्रा यस्य स त्रिनालः पञ्चाकाशादिभूतानि स्कन्धा यस्य स पञ्चस्कन्धः पञ्चानां शब्दादीनां प्रसूतिर्यस्मात्स पञ्चरसप्रसूतिः दश एकश्चेन्द्रियाणि शाखा यस्य स एकादशेन्द्रियशाखः द्विविधाः सुपर्णाः प्रवृत्तिमार्गस्था निवृत्तिमार्गस्थाश्च पक्षिणः पुण्यपापलक्षणपक्षवन्तस्तेषां नीडं यस्मिन् स द्विसुपर्णनीडः त्रीणि सत्त्वरजस्तमोलक्षणानि त्रिवल्कलानि त्वचो यस्य त्रिवल्कलः द्वे प्रवृत्तिनिवृत्तिलक्षणे फले यस्य स द्विफलः खं विष्णवाख्यमाकाशं प्रविष्टः अत्रेदं तात्पर्यं लक्ष्म्यादेरव्यापनात् ब्राह्मोदकद्धादेरपि स्वयकर्तृत्वादग्निवदाधारत्वात्सुखदत्वाच्च वायुवदवकाशदत्वाच्च व्योमवद्विष्णुः—

बीजभूतावपि ह्यस्य ब्रह्मा चैव सरस्वती ।
न दिश्येते जगत्सृष्टौ वटवृक्षादिबीजवत् ॥
स्वकार्यतो महान्तौ च गुणतो रूपतस्तथा ।
पृथिव्युदकवत्तस्माद्बीजत्वं न तु बीजवत् ॥
व्यञ्जकत्वाच्च चालत्वान्महाक्ष्माथद्रमा स्मृता ।
अण्डो महाक्ष्मा सम्प्रोक्तस्ततः पृथ्व्युदकं तथा ॥
जायते नित्यशस्तस्माद्भुक्तं भुक्त न हीयते ।
तत्राप्युदकवद्ब्रह्मा मृद्वच्चापि सरस्वती ॥
जलाधारा यतो मृच्च सर्वाधारा व्यवस्थिता ।
अन्यथा तु रजोभूता नीयते वायुनाखिला ।
अथवा सर्वनाशः स्याज्जलाधारा ततः स्मृता ॥
घटादि बीजवत्तस्य पुण्यापुण्यमुदीरितम् ।
वाह्योदश्चाग्निवच्च विष्णुरेवं प्रकीर्तितः ॥

इत्येतत्—

ब्रीह्यादिवत्तु मूलत्वं कर्मणां जगतः स्मृतम् ।
उदवत्पृथिवीवच्च ब्रह्मणो वाच एव च ॥
मूलभूयाच्छिद्यश्चैव मूलभूरण्डमुच्यते ।
वाह्योदाग्नीरसं वस्तु विष्णोर्बीजत्वमुच्यते ॥

इत्येतच्च प्रोक्तार्थे प्रमाणं तत्तज्जीवदेहादिषु स्थित्वा तत्तन्मनआदीन्द्रियगणं तत्तद्योग्यतानुसारेण श्रीहरिगुणोपसंहारे प्रेरयित्वा हरिभक्त्यादिसाधनसामग्रीसम्पादनेन हरेः प्रीतिसमुद्रमग्नो ब्रह्मा सर्वाधिकारिस्य उत्तमोत्तम इति ज्ञायते तदुक्तम्—

देहेन्द्रियमनश्चक्षुःस्थितो भक्त्यादिसाधकः ।
सुपर्णशेषरुद्रादेरपि ब्रह्मा चतुर्मुखः ॥
अतो भक्त्यादिकाः सर्वे गुणास्तस्यैव सर्वगाः ।
अतिरिक्ताश्च सम्पूर्णाः सुपर्णादेः शताधिकाः ॥
सुपर्णादिभिरज्ञातास्तदभिमानवर्जिताः ।
ब्रह्मणस्तु पुनः सन्ति तेषां कर्ता जनार्दनः ॥
तस्मात्सर्वाधिको ब्रह्मा गुणैः सर्वैर्न संशयः ।
वर्णस्थो वर्णनामासौ स्वरस्थः स्वरनामकः ॥
मनःस्थश्च मनोनामा तन्नामा चक्षुरादिगः ।
तस्य सर्वाणि नामानि मुख्यतः कवयो विदुः ॥
तत्स्थानत्वादिन्द्रियादेर्वर्णादेश्चोपचारतः ।
एवमन्योपचारेण विष्णोः साक्षात्तु मुख्यतः ॥

इति अनेन मात्रा स्वरो वर्ण इति क्रमेणेत्यादिना वर्णस्वरादीनां विष्णोरनन्तरं चतुर्मुखे मुख्यत्वमुक्तमिति ज्ञातव्यं किञ्च—

कृष्णप्रियाभ्यो गोपीभ्यो भक्तितो द्विगुणाधिकाः ।
महिष्योऽष्टौ विना याश्ताः कथिताः कृष्णवल्लभाः ॥
ताभ्यः सहस्रसमिता यशोदानन्दगेहिनी ।
ततोऽप्यभ्यधिका देवी देवकी भक्तितस्ततः ॥
वसुदेवस्ततो जिष्णुस्ततो रामो महाबलः ।
न ततोऽभ्यधिकः कश्चिद्भक्त्यादौ पुरुषोत्तमे ॥
विना ब्रह्माणमीशानं स हि सर्वाधिकः स्मृतः ।

इत्यनेन सर्वाधिकारिभ्यो ब्रह्मणोऽधिकभक्तिमत्त्वं गोपिकादिष्वपि भक्तितारतम्यमस्तीत्युक्तम् अतो रामेण सार्धं मथुरामयासीत् श्वाफल्किरित्यादौ प्रतीयमानभक्तितारतम्याभावशङ्कानिरस्ता—

पापद्वेषादिका दोषा अवराणां न संशयः ।
भक्त्यादिगुणपूगस्तु पराणामाविरिञ्चतः ॥
स्वातन्त्र्यात्सर्वदेहेषु स्थितानामपि सर्वशः ।
स्पृश्यन्ते नैव दोषैस्ते गुणादानैकतत्पराः ॥

यदु किञ्चेमाः प्रजाः शोचन्त्यमेवसान्तद्भवति पुण्यमेवामुं गच्छति नह वै देवान् पापं गच्छतीति श्रुतिस्मृतिभ्यां प्रजार्जितभक्त्यादिगुणपूगस्पर्श एव मनआदीन्द्रियाणामभिमानिदेवानां नतु तदर्जितपापादिस्पर्श इति निर्णीतत्वान्नात्र शङ्का कार्येति ॥ २२ ॥

अस्य जगद्वृक्षस्यैकं फलं प्रवृत्तकर्मफलं स्वर्गादिलक्षणं ग्रामेचरा गृध्राः विषयलोलुपाः कामिनोऽश्नन्ति एकं निवृत्तिलक्षणं कर्मफलं मोक्षम् अरण्यवासा हंसाः श्रीनारायणाख्यसूरिपालितो ज्ञानिनो भुञ्जत इति एतद्वृक्षज्ञानफलमाह । य इति । यः पुरुषः एवं बहुरूपं बहुविधमिष्टं भोगायतनत्वेनाभीष्टं मायामयं भगवदिच्छानिमित्तमूलप्रकृत्युपादानकर्तृकं जगद्वृक्षं वेद स पुरुषो वेदं वेद यतः प्रसूता जगतः प्रसूतिरित्यादिवेदार्थं वेदेति ॥२३॥

एतद्विद्याफलमाह । एवमिति । एवमुक्तप्रकारेण सद्गुरूपासनया प्रधानभक्त्या निशितेन विद्याकुठारेण प्राकृतान्तःकरणजन्याज्ञानपरशुना जीवाशयं बाह्यान्तःकरणं विवृश्च्य छित्वा निर्मलीकृत्य प्राकृतान्तःकरणजन्यज्ञानमस्त्रं संसारनिरासकरं त्यज अथ तज्ज्ञानत्यागानन्तरं निजज्ञानेनात्मानं परमात्मानं सम्पद्य मुक्तौ यथायोग्यसुखमनुभवसि चेति भावः—

प्राकृतान्तःकरणजं ज्ञानमस्त्रं सृतिच्छिदम् ।
तदेव तेन सञ्छेद्यं चित्तप्रकृतिसम्भवम् ॥
तेनैव सह सन्त्यज्य नैव पूर्वङ्कदाचन ।
ज्ञानं प्रकृतिजं चापि मूलनाशे विनश्यति ॥
ततः परं स्वरूपेण ज्ञानेनैव जनार्दनम् ।
वेत्ति मुक्तस्तथात्मानं जीवानन्यांश्च सर्वशः ॥

इति वाक्याच्च ज्ञानमात्रोच्छेदो विवक्षितः किन्तु प्राकृतस्येति ॥ २४ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्

द्वादशोऽध्यायः ॥ १२ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ॥

अतएव यस्मिन्निति विशेषबोधार्थं जगदेव रूपकेण वर्णयति । स एष इति सार्द्धकेन ॥ २१ ॥ २२ ॥

तदेवं वेद्यं जगच्च निरूप्य तस्मात्त्वमुद्धवोत्सृज्येति पर्यवसानं पूर्वोक्तं वेदार्थमेव समासेन दर्शयति द्वाभ्यां तत्र वेदोक्तसाध्येष्वधिकारिभेदमाह । अदन्तीत्येकेन । तत्र सन्यासिनः सुखमिति तत्फलेन ब्रह्मलोकगतानां तत्रैव ब्रह्मणा सह मोक्षं प्राप्स्यतां पाताभावात् एकमेव स्वरूपशक्तिवैचित्र्या बहुरूपं चतुर्व्यूहादिलक्षणं कञ्चिन्मायामयं मायाशक्त्या जगद्रूपञ्च यो वेद मामिति शेषः स वेदं वेद तत्त्वार्थं वेदेति ॥ २३ ॥

तदेवं वेदार्थं प्रदर्श्य तस्मात्त्वमुद्धवोत्सृज्येत्यादिवाक्यैकार्थ्येन निगमयति । एवमिति। एवं पूर्वोक्तप्रकारेण मद्भक्तस्य श्रीवृन्दावनस्य गुरूपासनया जातेन तेन विद्याकुठारेण शुद्धजीवात्मज्ञानस्वरूपेण परशुना जीवाशयं भवमयसंसारतरुरूपं मद्वैमुख्यबाधकं विवृश्च्य छित्त्वा गुरूपासनयैव जातया प्रेमलक्षणयैकान्तभक्त्या आत्मानं सर्वाश्रयस्वरूपं मां सम्पद्य साक्षात्कृत्य अथानन्तरमथास्त्रं तद्रूपत्वेन कृतरूपकं विद्याकुठारं त्यज तस्य तद्वृश्चनमात्रप्रयोजनत्वात् त्यागो युक्तः भक्तेस्तु इहैव सदा तत्साक्षात्कारे हेतुत्वान्न युक्त इति भावः । वक्ष्यते च सञ्छिद्य हार्दमनुमानसदुक्तितीक्ष्णज्ञानासिना भजत माखिल संशयाधिमिति॥२४ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे

द्वादशोऽध्यायः ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तन्मायारचितत्वात् सदाभयमिदं जगन्न ततः पृथगिति सदृष्टान्तमाह । यस्मिन्निति । तन्तुवितानं संस्था स्थितिर्यस्य स पटो यथा तथा यस्मिन्निदं विश्वम् ओतं दीर्घतन्तुषु प्रोतं तिर्यक् तन्तुषु पट इव एवं भूतं समष्टिव्यष्ट्यात्मकं शरीरमेव संसारहेतुत्वात् संसारवन्तं तरुरूपकेण वर्णयति । स इति । पुराणः अनादिः कर्मात्मकः कर्मप्रवाहमयः पुष्पं फलस्यादिमो भागः शुभाशुभदृष्टे फले सुखदुःखे ॥ २१ ॥

रूपकं विवृणोति । द्वे इति । द्वे पुण्यपापे अस्य बीजे शतमपरिमिता वासना मूलानि यस्य त्रयो गुणा नालानि प्रकाण्डा यस्य पञ्च भूतानि स्कन्धा यस्य पञ्च रसाः शब्दादिविषयास्तेषां प्रसूतिर्यस्मात् दश एका च शाखा इन्द्रियाणि यस्य द्वयोः सुपर्णयोर्जीवपरमात्मनोर्नीडं वासो यस्मिन् त्रीणि वल्कलानि त्वचो वातपित्तश्लेष्माणो यस्य द्वे सुखदुःखे फले यस्य सः अर्क प्रविष्टः सूर्यमण्डलपर्यन्तं व्याप्तः तं निर्भिद्य गतस्य संसाराभावात् ॥ २२ ॥

तत्फलभोक्तृनाह । गृध्यन्तीति गृध्राः कामिनः ग्रामेचराः गृहस्थाः अस्य वृक्षस्यैकं फलमविद्यामयं दुःखमदन्ति अविद्यामयस्य नरकस्वर्गादेरपि दुःखस्वरूपत्वात् अरण्यवासाः सन्यासिनः हंसा विवेकिनः एकं फलं विद्यामयं सुखमदन्ति ज्ञानवस्तुनः सर्वथा सुखरूपत्वात् एवं बहुरूपं मायाशक्त्या समुद्भूतत्वान्मायामयम् इज्यैः पूज्यैर्गुरुभिः कृत्वा यो वेद स वेदं वेद तत्त्वार्थं वेद ॥ २३ ॥

त्वं चैवं ज्ञात्वा कृतकृत्यः सन् सर्वसाधनं सन्त्यजेत्याह । एकया गुणभूतयापि मुख्यया भक्त्या शितेन तीक्ष्णीकृतेन ज्ञानकुठारेण जीवोपाधिं त्रिगुणात्मकं लिङ्गशरीरं विवृश्च्य छित्त्वा परमात्मानं च सम्पद्य प्राप्य अथास्त्रं ज्ञानरूपं साधनं त्यजेति सर्ववाक्यानां मया त्वमेव लक्षीक्रियसे यथा गीता शास्त्रे पूर्वमर्जुन इत्यतः स्वस्यानिष्टं नाशङ्कनीयमिति भावः ॥ २४ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।

एकादशे द्वादशोऽयं सङ्गतः सङ्गतः सताम् ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तन्तुविताने संस्था स्थितिर्यस्य स पटो यथा तद्वत् यस्मिन्परमेश्वरे इदमशेषं जगदोतं दीर्घतन्तुषु पट इव प्रोतं तिर्यक तन्तुष्विव इदं पदार्थं विवृणोति तरुरूपकेण । स इत्यादिना । पुरापि कारणे ब्रह्मणि सूक्ष्मरूपेण सद्रूपतया स्थितः असत उत्पत्त्यसम्भवात् कर्मात्मकः अनादिकर्मनिर्मितः पुष्पफले कर्मतत्फलं प्रसूते जनयति ॥ २१ ॥

अस्य बीजे द्वे पुण्यपापे शतमूलः बहुवासनामूलः त्रिनालः त्रयो गुणाः नालानि यस्य सः पञ्च भूतानि स्कन्धा यस्य सः पञ्चरसानां श्रोत्रादिविषयाणां शब्दादीनां प्रसूतिरुत्पत्तिर्यस्मात्सः दशेन्द्रियाणि च एकमन्तःकरणं च शाखा यस्य सः द्विसुपर्णयोः जीवपरमात्मनोर्नीडं यस्मिन् सः त्रीणि वातपित्तकफलक्षणानि वल्कलानि यस्य सः द्वे सुखदुःखे फले यस्य स तथा अर्कं प्रविष्टः सर्वप्रकाशकपरमेश्वरप्रकाशितः ॥२२॥

गृध्यन्तीति गृध्राः बुभुक्षवः ग्रामेचराः ग्राम्यधर्मरताः मायामयं प्राकृतं फलं दुःखोदर्कं संस्पर्शजमित्यर्थः "ये हि संस्पर्शजा भोगाः दुःखयोनय एव ते" इति गीतोक्तेः अरण्यवासाः विविक्तवासाः हंसाः तत्त्वविदः मुमुक्षवस्ते एकं परमात्मध्यानसुखमदन्ति तेषां तत्त्ववेत्तृत्वमभिनन्दति इज्यैर्गुरुभिः एकं बहुरूपमुक्तप्रकारेण विश्वाभिन्नाभिन्नं ब्रह्म यो वेद स वेदं वेदार्थं वेद ॥ २३ ॥

अहं किं कुर्यामित्यत आह । एवमिति । त्वं तु धीरः अप्रमत्तश्च सन् एवं विद्याकुठारेण जीवाशयं जीवस्य आशयो यस्मिंस्तं संसारं विवृश्च्य निराकृत्य गुरूपासनया लब्धया एकस्य सर्वात्मभूतस्य मम भक्त्या आत्मानं सर्वात्मानं मां सम्पद्य अस्त्रं साधनं त्यज ॥ २४ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धीये

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे

द्वादशाध्यायार्थप्रकाशः ॥ १२ ॥

भाषा टीका ।

जिस परमेश्वर में यह जगत आढेटेढे तंतुओं में जैसे पट पोहा रहता है तैसे पोहा है यही एक संसार रूपी वृक्ष है सो केवल त्रिगुण से निर्मित है इसी से पुण्य पाप रूप दो फलों को पैदा करता है ॥ २१ ॥

इस संसार वृक्ष के पुण्य पाप दो बीज हैं कर्म वासना रूप सैकडों इस के मूल हैं तीन गुण इसके पोधा हैं पांच भूत इसके छोटे पोधा हैं शब्दादिक पांच इस के रस हैं ग्यारा इन्द्रिय इस के शाखा हैं जीव ईश्वर दो पक्षियों का इस में खोंतर है वात पित्तादिक तीन इस में वल्कल हैं सुख दुःख दो इस के फल हैं इहां से सूर्य मण्डल पर्यंत यह वृक्ष व्याप्त हो रहा है ॥ २२ ॥

फलों की आकांक्षा करने वाले ग्रामवासी गृहस्थ लोग इसके एक दुःख रूपी फल को भक्षण करते हैं जंगल में वास करने वाले विरक्त परमहंस लोग इसके मोक्ष सुख रूप दूसरे फल को भोगते हैं इस प्रकार से एकही परमेश्वर को अपनी माया शान से नाना रूप भये पूज्य गुरु जनों से जो जानता है सोई वेद को जानता है ॥ २३ ॥

तुम तो इस प्रकार गुरुकी उपासना से मेरी एकान्त भक्ति से विद्या रूपी तीक्ष्ण कुहाडी से सावधान होकर लिङ्ग शरीर संसार रूप इस वृक्षको काट कर फिर परमात्म स्वरूप को प्राप्त होकर उस साधन रूपी अस्त्र को त्याग दो ॥ २४ ॥

इति श्रीमद्भागवत एकादशस्कन्ध में द्वादशाध्याय
भाषा टीका समाप्त ॥ १२ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे द्वादशोऽध्यायः ॥ १२ ॥

अथ त्रयोदशोऽध्यायः ।

———:*:———

सत्त्वं रजस्तम इति गुणा बुद्धेर्नचात्मनः ।
सत्त्वेनान्यतमौ हन्यात् सत्त्वं सत्त्वेन चैव हि ॥ १ ॥
सत्त्वाद्धर्मो भवेद्(१)वृद्धात् पुंसो मद्भक्तिलक्षणः ।
सात्त्विकोपासया (२)सत्त्वं ततो धर्मः प्रवर्त्तते ॥ २ ॥
धर्मो रजस्तमो हन्यात् सत्त्ववृद्धिरनुत्तमः (३) ।
आशु नश्यति तन्मूलो ह्यधर्म उभये हते ॥ ३ ॥
आगमो(४)ऽपः प्रजा देशः कालः कर्म च जन्म च ।
ध्यानं मन्त्रोऽथ(५) संस्कारा दशैते गुणहेतवः ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

त्रयोदशेऽथ सत्त्वस्य वृद्ध्या विद्योदयक्रमः ।
हंसेतिहासतश्चित्तगुणाविश्लेषवर्णनम् ॥

विद्याकुठारेण जीवाशयं विवृश्च्य साधनं त्यजेत्युक्तम् ननु तत्र तमआदिगुणत्रयवृत्तिप्रतिबन्धे सति कथं विद्योत्पत्तिरित्याशङ्क्य तन्निवृत्त्या विद्योत्पत्तिप्रकारमाह । सत्त्वमिति सप्तभिः । यद्यानन्दादिवदात्मधर्मा गुणाः स्युस्तर्हि तत्स्वरूपत्वात्तेषामनिवृत्त्या विद्योत्पत्तिर्न स्यान्न त्वेतदस्तीत्याह । बुद्धेः प्रकृतेरेते गुणा नत्वात्मन इति अतः सत्त्वेन सत्त्ववृद्ध्याऽन्यतमौ हन्यात् रजस्तमोवृत्तीर्जयेदित्यर्थः । सत्त्वं च सत्यदयादिवृत्तिरूपमुपशमात्मकेन सत्त्वेनैव हन्यात् ॥ १ ॥

ननु गुणत्रयवृत्तीनां परस्परोपमर्दनरूपत्वात्कथं सत्त्ववृत्त्यैवेतरवृत्तयो नियमेन हन्तव्यास्तत्राऽऽह । सत्त्वादिति । मद्भक्तिं लक्षयति यो धर्मः स मद्भक्तिरूप एव वा सत्त्वमेव कथं वर्धेत तत्राऽऽह । सात्त्विकानां पदार्थानामुपासया सेवया सत्त्वं वृद्धं भवतीत्यर्थः ॥ २ ॥

स च धर्मो रजस्तमश्च हन्यात् कुतः न विद्यते उत्तमो यस्मात्स सर्वोत्तमः यतः सत्त्ववृद्धिः सत्त्वस्य वृद्धिर्यस्मिन् कारणे सः अत एव तत्कार्यो धर्मप्रतिबन्धोऽपि नास्तीत्याह । तस्मिन्नुभयस्मिन् हते तन्मूलः ते रजस्तमसी रागद्वेषादिना प्रमादालस्यादिना च मूलं यस्य सः ॥ ३ ॥

सात्त्विकोपासया सत्त्वं वर्धेत इत्युक्तं तानेव सत्त्ववृद्धिहेतून् दर्शयितुं सामान्यतो गुणत्रयवृद्धिहेतूनाह । आगमः शास्त्रम् अपः आपः क्वचिदागमोऽर्थ इति पाठः ॥ ४ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी ।

अथ द्वादशाध्यायानन्तरं चित्तस्य गुणानां च परस्परं विश्लेषस्य विभागस्य वर्णनं कथनं पूर्वाध्यायार्थेन सह निर्वाह्यनिर्वाहकसङ्गतिमवतारयति । विद्याकुठारेणेति । तत्र विद्योत्पत्तौ गुणत्रयप्रतिबन्धे गुणत्रयलक्षणे विघ्ने सति तन्निवृत्त्या गुणत्रयनिरासेन तत्र गुणत्रयप्रतिबन्धे तत्स्वरूपत्वात् धर्मत्वेनात्मस्वरूपत्वात् एतत् गुणानामात्मधर्मत्वम् अतः गुणानामात्मधर्मत्वाभावात् अन्यतमौ रजस्तमसी तत्र तयोरागमापायित्वाद्धननासम्भवाल्लक्षणया तयोस्तत्तद्वृत्तिजयो व्याख्यातः अत एव इत्यर्थं इत्युक्तं तत्र कामेहामदाद्या वक्ष्यमाणाश्चतुर्दश रजोवृत्तयः क्रोधलोभानृताद्याः षोडशतमोवृत्तयस्ता जयेत् उपशमात्मकेन चित्तसमाध्यात्मकेन ॥ १ ॥

लक्षयति ज्ञापयति धर्मो मदर्पितवर्णाश्रमादिलक्षणः द्वितीयेऽर्थे मद्भक्तिरूप एवेति धर्मः स्वनुष्ठितः पुंसामित्यादिदिशा श्रवणादरादिभक्तिरूपः सात्त्विकानां पदार्थानां वक्ष्यमाणनिवृत्तिशास्त्रादीनाम् ॥ २ ॥

स च सत्त्वेन वृद्धः यस्मात् कारणादिति यद्यपि सत्त्वाद्धर्मो भवति तथापि मिथः सम्वर्द्धकत्वाद्धर्मादपि सत्त्वस्य वृद्धिः सम्भवतीति तथा व्याख्यातं यस्मिन् कारणमिति पाठे कारणपदस्याध्याहारकल्पनेति ज्ञेयम् अत एव रजस्तमोनाशादेव तत्कार्यः रजस्तमोजन्यः उभयस्मिन् रजस्तमोद्वये ॥ ३ ॥

अर्थं इति पाठेऽभिधेयः तत्र निवृत्तिपरत्वेन व्याख्याने सात्त्विकोऽर्थः प्रवृत्तिपरत्वेन तद्राजसः वेदबाह्यपरत्वेन तत्तामस इति ज्ञेयम् अर्थं इत्यत्राम्भ इति च पाठः क्वचिदेव ॥ ४ ॥

---

(१) शुद्धाद्धा (२) ज्ञानं (३) मनुत्तमा (४) यजनं देशः (५) संस्कारो नवैते इति वि० पाठः ।

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

बुद्धेः अन्तःकरणस्य अन्यतमौ रजस्तमोगुणौ सत्त्वं सत्त्वेन हन्यादिति सत्त्वोत्पादितेन ज्ञानेन त्रैगुण्यनिवृत्तौ सत्त्वमपि निवृत्तं भवतीत्यर्थः । मद्भक्तिलक्षणः प्रकाशकः भगवद्भक्तेरन्तरङ्गतया तद्दीपकः चिन्हभूतः ॥ १ ॥

सात्त्विकोपासया सात्त्विकपुरुषसेवया सात्त्विकाहारसेवयाच च रजस्तमोहन्यात् पूर्वभीषवुत्पन्नो भगवद्भक्तिचिन्हभूतो धर्मः उत्तरोत्तररजस्तमोऽनुद्भवहेतुरित्यर्थः । उभये रजसि तमसि च हते तन्मूलः रजस्तमोमूलः अधर्मः नश्यति नोत्पद्यत इत्यर्थः ॥ २ ॥ ३ ॥

आगमः शास्त्रं प्रजाः पुत्रादयः कर्म सदाचारः सन्ध्योपासनादिः जन्म ब्राह्मणादिजन्म ध्यानं देवताविषयं मन्त्रस्तत्स्मारकः संस्कारः उपनयनादिः गुणहेतवः ॥ ४ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अयं हि जीवस्त्रिवृदित्यनेन जीवस्य गुणत्रयपारवश्यकृतो गुणत्रयपरिणामात्मकदेहसम्बन्धरूपः संसारस्तन्निवृत्तिश्च यथा त्मशक्त्यनुगुणन्यासोपासनान्यतरयोगेनेत्युक्तम् ननु सत्येव गुणपारवश्ये कथमनुष्ठितोपायस्याप्युपायविषयप्रमादादिराहित्यमतोऽवश्यं गुणजयेन भवितव्यं तत्रापि यदि सत्त्वादयो गुणा ज्ञानानन्दामलत्वादिवदात्मनः स्वाभाविकास्तर्हि न जेतुं शक्यास्ततः कथं गुणजयः कथंतरामप्रमत्तत्वादिकमित्यभिप्रायमालक्ष्याह । सत्त्वमिति । बुद्धेः प्रकृतिपरिणामात्मकमनसो गुणाः सत्त्वादयो न त्वात्मनोजीवस्यातःप्राकृतान्तःकरणसम्बन्धनिमित्तत्वात्सत्त्वादिगुणानामौपाधिकत्वेन निरसितुं शक्यन्त एवेति भावः। तन्निरसनोपायमेवाह।सत्त्वेनेति।प्रवृद्धेनेति शेषः । अन्यतमौ रजस्तमोगुणौ हन्यान्निरसेदित्यर्थः एवमपि निरासकसत्त्वस्यावस्थानाद्गुणपारवश्यं स्थितमेवेत्यत्राह। सत्त्वं सत्त्वेन चैव हीति । सत्त्वेनैव सत्त्वमपि हन्यात् सत्त्वोत्पादितेन ज्ञानेन मुक्त्यात्मकत्रैगुण्यनिवृत्त्या सत्त्वमपि निवृत्तं भवतीत्यर्थः ॥ १ ॥

सत्त्वप्रवृद्धौ पूर्वोदितभक्तियोगः सुकर एवेत्याह।सत्त्वादिति। मद्भक्तिलक्षणो धर्मः पुंसः सत्त्वाद्विवृद्धाद्वृद्धःसमृद्धोभवेद्भवेत इत्यर्थः । कुतस्तर्हि सत्त्ववृद्धिरित्यत आह । सात्त्विकोपासयेति । सात्त्विकानामाहाराणां जात्याश्रयनिमित्तादुष्टानामुपासया सेवया सत्त्वमृद्धं भवेदितिलिङ्गविपरिणामेन सम्बन्धः ततः वृद्धात्सत्त्वाद्धर्मः मद्भक्तिलक्षणः प्रवर्तते अहरहरभ्यासाहितातिशययुक्तो भवति॥२॥

प्रवृद्धस्यापि सत्त्वस्य न साक्षाद्रजस्तमउपघातकत्वमपि तु मद्भक्त्यादिलक्षणधर्मद्वारैवेत्याह । धर्म इति । सत्त्वाद्वृद्धो धर्मः रजस्तमश्च हन्यादतः सत्त्ववृद्धिरनुत्तमः नास्त्युत्तम उपायो यस्मात्तथाविधमोक्षोपाय इत्यर्थः। ननु रजस्तमसोरुपघातेऽपि तन्मूलयोरनादिपुण्यपापयोर्मुक्तिप्रतिबन्धकयोस्सत्त्वात्कथं सत्त्ववृद्धेरनुत्तमत्वमत आह । आश्विति । उभये रजसि तमसि च हते सति तन्मूलः उभयमूलः अधर्मः पुण्यपापात्मकः आशु नश्यति पापवत्पुण्यस्यापि स्वफलजननद्वारा मुक्तिप्रतिबन्धकत्वान्मुमुक्षोरिष्टफलप्रतिबन्धकत्वानिष्टफलसाधनत्वादिरूपाधर्मशब्दप्रवृत्तिनिमित्तयोगात् ॥ ३ ॥

न केवलं सात्त्विकोपासनैव सत्त्वविवृद्धिहेतुरपि त्वन्येऽपीत्याह । आगम इति । आगमादयो दशैते गुणहेतवः सत्त्वगुणविवृद्धिहेतवः तत्रागमो वेदपञ्चरात्रादिरूपो भगवद्धर्मप्रकाशकेतिहासपुराणादिरूपश्च सात्त्विकागमानेव सेवेत नच राजसतामससङ्कीर्णानित्यर्थः।'महान् प्रभुर्वै पुरुषः सत्त्वस्यैषप्रवर्तक' इति श्रुत्रज्ञानामपि प्रकृष्टसत्त्वगुणसम्पत्तेर्भगवत्कटाक्षाधीनत्वश्रवणादप्राकृतशुद्धसत्त्वसमाश्रयत्वाद्भगवतस्तत्प्रतिपादकानां सात्त्विकत्वमितरेषां राजसतामसत्वादिकमवगन्तव्यं तथा च स्मरति भगवान् मनुः—

या वेदबाह्याः स्मृतयो याश्च काश्च कुदृष्टयः ।
सर्वास्ता निष्फलाः प्रेत्य तमोनिष्ठा हि ताः स्मृता इति ॥

कुदृष्टयः कुत्सितदर्शनानि कुमतानीत्यर्थः । तेषां वेदविरुद्धत्वं वेदान्तसिद्धभगवद्धर्माप्रतिपादकत्वदेवतान्तरपारम्यप्रतिपादकत्वेन पुराणेषु सात्त्विकादिविभागा मात्स्ये प्रोक्ताः—

सङ्कीर्णास्तामसाश्चैव राजसाः सात्त्विकाः स्मृताः ।
कल्पाश्चतुर्विधाः प्रोक्ता ब्रह्मणो दिवसाश्च ते ॥
यस्मिन् कल्पे तु यत्प्रोक्तं पुराणं ब्रह्मणा पुरा ।
तस्य तस्य तु माहात्म्यं तत्स्वरूपेण वर्ण्यते ॥
अग्नेः शिवस्य माहात्म्यं तामसेषु प्रकीर्तितम् ।
राजसेषु च माहात्म्यमधिकं ब्रह्मणो विदुः ॥
सङ्कीर्णेषु सरस्वत्याः पितॄणां च निगद्यते ।
सात्त्विकेषु च कल्पेषु माहात्म्यमधिकं हरेः ॥
तेष्वेव योगसंसिद्धा गमिष्यन्ति परां गतिमिति ।

तथा कौर्मे च —

असंख्यातास्तथा कल्पा ब्रह्मविष्णुशिवात्मकाः ।
कथिता हि पुराणेषु मुनिभिः कालचिन्तकैः ।
सात्त्विकेष्वपि कल्पेषु माहात्म्यमधिकं हरेः ।
तामसेषु शिवस्योक्तं राजसेषु प्रजापतेरिति ।

यच्चेदं सात्त्विकपुराणादिविभागप्रकरणं तत्सात्त्विकमित्यवगन्तव्यं बाधकाभावात् परस्पराविरुद्धार्थपुराणबलाबलविवेकापेक्षायां तद्व्यवस्थापकतयैव प्रवृत्तत्वाद्गुणस्वभावौचित्याच्च प्रजाः साधुजनास्तानेव सेवेत नतु विषयलम्पटानिति भावः । अप आपः गङ्गादिपुण्यजलानि नतु गन्धोदकसुरोदकादीनि देशो विविक्तदेशः नतु यत्र पानस्त्रीद्यूतादीनि स देशः कालो ब्राह्ममुहूर्तादिरूपः नतु निशीथादिरूपः कर्म फलाभिसन्धिरहितं नत्वभिसंहितफलं जन्म शौक्लं सावित्रं याज्ञिकं च"स हि विद्यातस्तं जनयति तच्छ्रेष्ठंजन्मे"त्युक्तविधं नतु शैवदीक्षादिलक्षणं ध्यानं विष्णुविषयकं नतु देवतान्तरविषयकं मन्त्रो विष्णुस्मारकः नतु देवतान्तरस्मारकः संस्कारः—

तापः पुण्ड्रं तथा नाम मन्त्रो यागश्च पञ्चम इत्युक्तपञ्चविधः नतु

मुद्रिकाषट्कतत्त्वज्ञः परमुद्राविशारदः ।
भगासनस्थमात्मानं ध्यात्वा निर्वाणमृच्छति ।
कुण्डिका रुचकं चैव कुण्डलं च शिखामणिः ।
भस्म यज्ञोपवीतं च मुद्राषट्कं प्रचक्षते ।
आभिर्मुद्रितदेहस्तु न भूय इह जायते ।
रुद्राक्षकङ्कणं हस्ते जटा चैका च मस्तके
कपालं भस्मना स्नानम् ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इत्यादिशैवागमप्रसिद्धमुद्राषट्करुद्राक्षकङ्कणादिधारणात्मकः । विवक्षितागमादिविपरीतानामुक्तागमादीनां रजस्तमोऽभिवृद्धिद्वारा सत्त्वविरोधित्वादिति भावः ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

संसारच्छेदकरम्बाह्यान्तःकरणजं ज्ञानं स्वधर्मिणमपि विनाश्य स्वयं च नश्यतीत्युक्तं तत्प्रपञ्चयन् भक्तेरुत्पत्तिप्रकारादिकं कथयत्यस्मिन्नध्याये। तत्र सत्त्वादिगुणा आत्मनो बुद्धेः किं वेति संशये भगवान्निर्धारयति। सत्त्वमिति। बुद्धेरन्तःकरणस्य विद्यमाना इति शेषः नात्मनो जीवस्य तत्र सात्त्विकादिभेदेन नानेति सत्त्वेन सत्त्वगुणविशिष्टेनान्तःकरणेनान्यतमौ राजसतामसौ भावौ हन्यात् सत्त्वं सात्त्विकमन्तःकरणं सत्त्वेन तज्जनितज्ञानेन हन्यात् ॥ १ ॥

सत्त्वेनान्यतमौ हन्यादित्येतद्विवृणोति । सत्त्वादिति । शुद्धात् सत्त्वात्पुंसो मद्भक्तिलक्षणो धर्मो भवेत् धर्मः किमुद्रेचयतीति तत्राह । सात्त्विकेति । ततो धर्मात्पुनः सत्त्वोद्रेकः तस्मादुद्रिक्तसात्त्विकोपासया बुद्ध्या भक्त्या ज्ञानं ततः पुनः सत्त्वोद्रेकः तस्मात्पुनः धर्मोद्रेकः प्रवर्तते उद्रिक्तभक्तिधर्मपूरितान्तःकरणो ब्रह्मार्पणबुद्ध्या धर्ममेव करोतीत्यर्थः ॥ २ ॥

धर्मफलमाह । धर्म इति । स धर्मो रजस्तमश्च हन्यात् पुनः कथमस्य वृत्तिरिति तत्राह । सत्त्ववृत्तिरिति । सत्त्वेन भक्तिस्वभावेन वृत्तिर्वर्तनं भवति भक्तिमयो वर्तत इत्यर्थः। भक्तिप्रतिबन्धकेऽधर्मे सति कथं तद्वृत्तिरिति तत्राह। आश्विति। उभये रजसि तमसि च हते तन्मूलस्त्वधर्म आशु नश्यतीति अतो युक्तमुक्तमिति ॥ ३ ॥

भक्तिज्ञानसाधनान्यागमादयोऽत्र सत्त्वादिगुणकृता इत्याह । आगम इति। सत्त्वादयो गुणा एव हेतवो येषां ते तथा अनेनैव च सात्त्विकादिभेदेन त्रिविधा इत्युक्तं भवति ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

पूर्वोक्तरीत्या सत्संगलब्धो मद्भक्तिलक्षणो धर्मो वृद्धात् वृद्धिं प्राप्तात्सत्त्वाद्भवेत् मालाकारेणाप्तं चम्पकबीजविशेषः क्षीरसेकेन जाताद्वीर्यादिवेति भावः ॥ १ ॥ २ ॥

सत्त्ववृद्धिरिति मिथो वर्द्धनात् ॥ ३ ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

त्रयोदशे गुणांस्त्यक्तुमुपायं हंसगुह्यतः।
इतिहासाद्धरिर्ध्यानादूचे चित्ताद्गुणच्युतम् ॥

विद्याकुठारेण छित्त्वेत्युक्तमतो विद्योत्पत्तिप्रकारमाह । सत्त्वमिति सप्तभिः। नचात्मनः नैव जीवस्य मतो बन्धका अविद्याया गुणास्ते हन्तव्या इति भावः । अन्यतमौ रजस्तमोभागौ सत्त्वं सत्यदयादिरूपम् उपशमात्मकेन सत्त्वेन हन्यात् ॥ १ ॥

सत्त्वस्येतरगुणपराभावकत्वे बलमाह । सत्त्वादिति । मद्भक्तिर्गुणभूता लक्षणं चिन्हं यत्र सः यद्वा मद्भक्त्यैव लक्षणं यस्य सः तां विना त्वलक्षणो विगीत एव धर्म इत्यर्थः । सत्त्वमेव कथं वर्द्धेत तत्राह । सात्त्विकानां वस्तूनामुपासया सेवया सत्त्वं वृद्धं भवतीत्यर्थः ॥ २ ॥

उभयं हते रजस्तमसोर्हतयोः सतोः तन्मूलः रजस्तमोमूलः ॥ ३ ॥

सात्त्विकोपासनयेत्युक्तमतः सात्त्विकानि वस्तूनि ज्ञापयितुमाह द्वाभ्याम् । आगमः शास्त्रम् अपः आपः प्रजा जनः त्रिगुणाहेतवः गुणत्रयजन्याः आगमादयः सात्त्विका राजसास्तामसाश्च स्युरित्यर्थः ॥ ४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

विद्योत्पत्त्यर्थमत्रादौ सत्त्ववृद्ध्यान्यनाशनं गुणचित्तवियोगार्थं हंसेतिहासवर्णनं पूर्वाध्यायान्ते अप्रमत्तो विद्याकुठारेण जीवाशयं संछिद्यात्मानं संपद्य साधनं त्यजेत्युक्तम् इदानीं लोभप्रमादादिकारणयोरजस्तमसोः सतोः कथमप्रमत्तत्वं कथं वा विद्योत्पत्त्याऽऽशयसंछेदनं कथं वात्मसंपत्तिरित्याशङ्कायां सत्त्ववृद्ध्या रजस्तमःप्रहाणेन विद्योत्पत्तिमाह। सत्त्वमित्यादि षड्भिः।तत्र सत्त्वादयो गुणा यद्यात्मनो ज्ञानेच्छादिवत् स्वरूपनिबन्धनाः स्युस्तर्हि न निवर्तेरन् नत्वेतदस्तीत्याह । सत्त्वमिति । सत्त्वं रजस्तम इति गुणाः बुद्धेः सन्ति नत्वात्मनः यद्यप्येते गुणाः प्रकृतेरेव तथापि सर्वस्य कार्यस्य प्राकृतगुणत्रयकार्यत्वाद्बुद्धेरपि तत्कार्यत्वेन तथात्वात् बुद्धेरेव ज्ञानलोभप्रमादादिवृत्तय उत्पद्यन्तेऽतो बुद्धेरित्युक्तम् एवं च सगुणत्रयकार्यत्वाद्बुद्धेरपि तत्कार्यत्वेन तथात्वात् बुद्धेरेव ज्ञानलोभप्रमादादिवृत्तय उत्पाद्यत्वेन सत्त्ववृद्ध्यान्यतमौ रजस्तमसी हन्यात् तद्वृत्तीर्जयेदित्यर्थः।ननु स्यादेतत् तथापि सत्त्वे तिष्ठति सति तत्कार्यस्य सुखज्ञानसंगस्य सत्त्वात् तद्बन्धे सति काञ्चनायसोरिव पादबन्धने को विशेषः स्यात् तस्माद्विद्योत्पत्तावपि जीवाशयच्छेदनं न स्यादेवेत्याशङ्कायामाह। सत्त्वमिति। सत्त्वमपि सत्त्वेन शमदमदयाकारुण्यादिरूपतद्वृत्त्युदयेन हन्यात् उपशमयेन्निवृत्तं कुर्यादिति यावत् ॥ १ ॥

सत्त्ववृद्धिः कथं भवेदित्यपेक्षायामाह। सत्त्वादिति। वृद्धात्सत्त्वात्पुंसो जीवस्य धर्मो भवेत् धर्मोत्पत्तिकार्यद्वारा सत्त्ववृद्धिर्ज्ञातव्येत्यर्थः। ननु धर्मोऽपि शैवशाक्तसौरगाणपत्यस्मार्तजैनादिभेदाद्विविध एव दृश्यते एतेषु कतमो विवक्षित इति चेत्तत्राह। मद्भक्तिलक्षण इति। मद्भक्तिरेव लक्षणं यस्य सः येन धर्मेण मद्भक्तिः स्यात्स एव सात्त्विकः वैष्णवो धर्म इत्यर्थः। नोदाहृतेषु कश्चिदपि सात्त्विकः रजस्तमोमूलकत्वादित्यवधारय सत्त्वमेव कथं वर्धेतेत्यपेक्षायामाह । सात्त्विकोपासयेति । सात्त्विकानां पदार्थानामुपासया सेवनेन सत्त्वं भवेत् ततो वृद्धात्सत्त्वाद्धर्म उक्तलक्षणः प्रवर्तते वृद्धः प्रकर्षेण मच्छ्रवणकीर्तनपूजनजन्मव्रतोत्सवयज्ञादिरूपो वर्तते ॥ २ ॥

ततः किं तत्राह । धर्म इति । तथाभूतो धर्मः रजस्तमो हन्यादाभिभवेत् तत्कुतः यतोऽनुत्तमः न उत्तमो यस्मात्स तथा पुनः कथ-

तत्तत्सात्त्विकमेवैषां यद्यद्वृद्धाः प्रचक्षते ।
निन्दन्ति तामसं तत्तद्राजसं तदुपेक्षितम् ॥ ५ ॥
सात्त्विकान्येव सेवेत पुमान् सत्त्वविवृद्धये ।
ततो धर्मस्ततो ज्ञानं यावत् स्मृतिरपोहनम् ॥ ६ ॥
वेणुसंघर्षजो वन्हिर्दग्ध्वा शाम्यति तद्वनम् ।
एवं गुणव्यत्ययजो देहः (१)शाम्यति तत्क्रियः ॥ ७ ॥

उद्धव उवाच ।

विदन्ति मर्त्याः प्रायेण विषयान् पदमापदाम् ।
तथाऽपि भुञ्जते कृष्ण ! तत्कथं श्वखराजवत् ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

भूतः सत्त्ववृद्धिः पुनर्यस्मात्सत्त्ववृद्धिर्भवेत् ततश्चोभये उभौ गुणौ रजस्तमसी अयवनौ यस्य तस्मिन्नुभयास्मिन् हते सति तन्मूलोऽधर्म आशु शीघ्रमेव नश्यति एतेन सत्त्ववृत्त्यभिभवे रजस्तमसोर्दर्शनं तत्राधर्मोऽप्युद्भवेदेव कारणस्य सत्त्वादिति ज्ञेयम् ॥ ३ ॥

ननु न केवलं वृद्धं सत्त्वमेवान्यगुणावभिभवति किन्तु रजस्तमसोरपि बद्धं तदन्यगुणौ हन्यादेव कथं सात्त्विकोपासया सत्त्वमित्येवोक्तं तस्माद्यद्यत्सेव्यैते त्रयो गुणा वर्धन्ते ते पदार्था निर्देष्टव्या इति चेत्तथा श्रुतिवत्स्वङ्गीकृत्याह । आगम इति । आगमः शास्त्रम् अपो द्रव्यम् अप इति वा पाठः प्रजा जनाः जन्म दीक्षा स्पष्टार्थमन्यत् एते दश पदार्था गुणहेतवस्त्रयाणां गुणानां वृद्धिहेतवो भवन्ति त्रिविधा दश पदार्था इति भावः ॥ ४ ॥

भाषा टीका ।

श्रीभगवान् उवाच सत्व रजः तम ये सब गुण बुद्धि के हैं आत्मा के नहीं हैं तिस से सत्वगुण की वृद्धि करके रजोगुण तमोगुण का नाश करै सत्व के कार्य भी सत्वही से निवृत्त हो जाँयगे ॥ १ ॥

पुरुष के सत्वगुण के बढने से मेरी भक्ति के जनाने वाला धर्म उत्पन्न होता है और सात्विक पदार्थों के सेवा से सत्व की वृद्धि होती है तब धर्मही बढता है ॥ २ ॥

धर्म रजोगुण तमोगुण को नाश करता है उसी से सत्व की वृद्धि होती है फिर अधर्म के मूल दोनों गुणों के नाश होने से अधर्म शीघ्रही नष्ट हो जाता है ॥ ३ ॥

शास्त्र जल मनुष्य देश काल कर्म जन्म ध्यान मंत्र संस्कार ये दश पदार्थ गुणों के बढने मे हेतु हैं ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एषु सात्त्विकादिनिर्णयमाह । एषामेव मध्ये यद्यद्वृद्धाः शास्त्रज्ञाः प्रचक्षते प्रशंसन्ति तत्तत्सात्त्विकम् यच्च निन्दन्ति तत्तामसम् यत्तैर्वृद्धैरुपेक्षितं न स्तुतं नच निन्दितं तद्राजसम् ॥५॥

सात्त्विकान्येवेति । निवृत्तिशास्त्राण्येव सेवेत न प्रवृत्तिपाखण्डशास्त्राणि तीर्थाप एव न गन्धोदकसुराद्याः प्रजा जनाः निवृत्तान् जनान्न प्रवृत्तदुराचारान् विविक्तदेशं न रथ्याद्यूतदेशान् कालं ब्राह्ममुहूर्तादिकं ध्यानादौ न प्रदोषनिशीथादीन् कर्म च नित्यं न काम्याभिचारादीनि । जन्म च वैष्णवशैवदीक्षालक्षणं न शाक्तक्षुद्रदीक्षारूपम् ध्यानं श्रीविष्णोर्न कामिनीविद्विषाम् मन्त्रं प्रणवादिकं न काम्यक्षुद्रान् संस्कारमात्मनः शोधकं नतु केवलं देहगृहादीनाम् ननु ज्ञानं महावाक्यश्रवणादेवोत्पद्यते किं तत्र सत्त्वसंवृद्ध्या धर्मेण वाऽत आह यावत्स्मृतिरात्मापरोक्ष्यम् यावच्च देहद्वयतत्कारणभूतगुणापोहस्तावत्पर्यन्तं ज्ञानं भवतीत्यर्थः ॥ ६ ॥

ननु गुणव्यतिकराज्जातो देहः कथं स्वाश्रयभूतान् गुणान् स्वत एवोत्पन्नया विद्ययाऽपोह्य स्वयमप्युपरमेत्तत्राऽह । वेणूनां संघर्षाज्जातोऽग्निर्यथा स्वत एवोत्पन्नाभिर्ज्वालाभिस्तद्वनं सर्वं दग्ध्वा पश्चात्स्वयं शाम्यति एवं देहोऽपि तत्क्रियस्तस्याग्नेरिव क्रिया व्यापारो यस्य सः ॥ ७ ॥

ननु नियतेन्द्रियतया सात्त्विकसेवायामियानस्ति पुरुषार्थस्तथाऽपि राजसादीन् विषयान् दुःखमिति जानन्तोऽपि कथं सेवन्त इति पृच्छति । विदन्तीति । पदं स्थानं श्वानो यथा भर्त्स्यमाना अपि खरा यथा पद्भ्यां ताड्यमाना अपि खरीमनुधावन्तः अजा यथा निर्लज्जा हन्तुमानीता अपि तद्वत् ॥ ८ ॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

एष्वागमादिषु वृद्धाः व्यासादयः सात्त्विकादीनां गुणदोषौ पाद्मोत्तरखण्डे दर्शितौ स्तः ॥ ५ ॥

(१) वेद इति शुकपक्षीय विज० पाठः ।

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी ।

महावाक्यानि तत्त्वमसीत्यादिद्वादश तेषां श्रवणात् तदुक्तं तैरेव "ऐक्यज्ञानं यदा जातं महावाक्येन चात्मनः । तदाऽविद्या स्वकार्यैश्च नश्यत्येव न संशय" इति तावत् पर्यन्तमिति तथाच शास्त्रादैक्यज्ञानं परोक्षात्मकमेव स्यात् तत्त्वपरोक्षम् आत्माऽपारोक्ष्यन्तु सात्त्विकपदार्थजनितभक्तिलक्षणधर्मादेव "प्रीतिर्न यावन्मयि वासुदेवे न मुच्यते देहयोगेन तावत्" इत्याद्युक्तेरित्यर्थः ॥ ६ ॥ ७ ॥

इयानात्मापारोक्ष्यपर्यन्तः प्रायेणेति ये तावन्न विदन्ति ते श्वादितुल्याः भुञ्जतां नामेत्यर्थः । तत्र श्वा मैथुनान्ते शुन्यां बन्धं न जानाति खरश्च रजकदर्शिततृणमुष्टिभोगान्ते महाभारवहनं न जानाति अजस्तु नित्यनानाभोजनाद्यन्ते शिरश्छेदं न जानाति इति त एव दृष्टान्तिताः ॥ ८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

तत्तत्सात्त्विकमिति फलाभिसन्धिरहितं नित्यं नैमित्तिकं विवक्षितं तामसमभिचारादिजं राजसम्पुत्रपश्वन्नादिप्रदम् कर्म ॥ ५ ॥

धर्मः अपूर्वशब्दवाच्य ईश्वरानुग्रहः स्मृतिः अविच्छिन्नस्मृतिसन्ततिः अपोहनं शब्दादिविषयस्मृत्यभावश्च यावज्ज्ञानमुत्पद्यते "परमात्मनि यो रक्तो विरक्तो ऽपरमात्मनी"तिन्यायेन विषयान्तरविमुखभगवदेकस्मृतिसन्ततिरूपज्ञानं भवतीत्यर्थः ॥ ६ ॥

उत्पाद्यस्य स्वोत्पादकविनाशेन स्वनिवृत्तौ दृष्टान्तमाह । वेणिवति । वेदः वेदनम् । अतिक्रियः बन्धहेतुभूततत्क्रिया शून्यं स्मृतिरूपमुपायभूतं हि ज्ञानं मोक्षदशायां निवर्तते ॥ ७ ॥

श्वखराजवत् श्ववत्खरवदजवच्च ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सात्त्विकाहारागमादीनां विभाजकं लक्षणमाह । तत्तदिति । वृद्धाः भगवद्भक्ता भगवद्भक्तियोगस्यैव प्रकृतत्वात्तन्निष्ठा एवात्र वृद्धशब्दविवक्षिताः प्रचक्षते प्रकृष्टं वदन्ति तत्तदेवैषामाहारागमादीनां मध्ये सात्त्विकं यद्यत् ते निन्दन्ति तत्तामसं यद्यत्तैरुपेक्षितं न स्तुतं न निन्दितं च तद्राजसमिति ॥ ५ ॥

ततः किमत आह । सात्त्विकान्येवेति । ततो विवृद्धात्सत्त्वाद्धर्मः मद्भक्तिलक्षणः ततो धर्मात् ज्ञानं मत्स्वरूपस्वभावयाथात्म्यगोचरज्ञानं स्मृतिः मद्विषयकस्मृतिसन्ततिः यावत्कालस्थैर्येनापोहनं शब्दादिविषयान्तरस्मृत्यभावनिश्चयश्च भवेत् "परमात्मनि यो रक्तो विरक्तोऽपरमात्मनी"ति न्यायेन विषयान्तरविमुखभगवदेकस्मृतिसन्ततिरूपज्ञानं भवतीत्यर्थः ॥ ६ ॥

नन्वाशु नश्यति तन्मूलो ह्यधर्म उभये हते इत्यनेन गुणत्रयपरिणामात्मकदेहसाध्यसात्त्विकाहारागमादिसेवागणाद्युत्पादितसत्त्ववृद्धिनिमित्तभक्तियोगात्मकविद्यया निरवशेषं रजस्तमसोरपहतयोर्देहसम्बन्धिनामत्तपुण्यपापात्मकाऽधर्मोपहतिरुक्ता तत्र गुणत्रयोत्पाद्यो देहः कथं स्वोत्पाद्यसत्त्ववृद्ध्युपचितभक्तिद्वारा स्वमूलभूतगुणत्रयं निवर्तयन् स्वयमपि निवर्तते इत्यभिप्रायमालक्ष्य उत्पाद्यस्य स्वोत्पादकविनाशेन स्वनिवृत्तौ दृष्टान्तमाह । वेणुसंघर्षज इति । यथा वेणूनां संघर्षाज्जातः वह्निः स्वस्मादेवोत्पन्नाभिर्ज्वालाभिः स्वहेतुभूतं वनं दग्ध्वा स्वयमपि शाम्यति एवं गुणव्यत्ययजः गुणवैषम्यजो देहोऽपि तत्क्रियः तद्वेणुवह्निवत्क्रिया व्यापारो यस्य सः तद्वदात्मोत्पादकयोरुभयोरपि निवर्तक इत्यर्थः । अतत्क्रिय इति पाठान्तरं तत्रातत्क्रियः स्वसजातीयदेहान्तरसम्बन्धरूपबन्धहेतुतत्क्रियाशून्यः स्वयमपि शाम्यति स्वमूलभूतगुणत्रयं शमयन् स्वयमपि शाम्यति उपरमते स्मृतिरूपमुपायभूतं ज्ञानं हि मोक्षदशायां निवर्तते अतो यावन्मोक्षमुपायनिष्पत्त्यनुगुणं व्याप्रियमाणो देहः स्वमूलभूतगुणकर्मसम्बन्धादिकमात्मनो निवर्तयन् स्वयमपि निवर्तेत इत्यर्थः ॥ ७ ॥

सात्त्विकान्येव सेवेत पुमान् सत्त्वविवृद्धय इत्यनेनासात्त्विकसेवया रजस्तमसोर्विवृद्धिस्ततः पुण्यपापात्मको ऽधर्मस्ततो देहात्माभिमानाद्यज्ञानं शब्दादिविषयस्मृतिसन्ततिस्ततोऽन्ततो दुःखावाप्तिश्चेति सूचितं तत्र पृच्छत्युद्धवः । विदन्तीति । यद्यपीत्थं प्रायेण केचिन्मर्त्याः विषयानापदां दुःखानां पदं स्थानं विदन्ति अथापि हे कृष्ण ! भुञ्जते विषयानेवानुभवन्ति नतु तेभ्यो विरज्य मुक्तये यतन्त इत्यर्थः । श्वखराजवत् श्ववत् खरवत् अजवत् श्वानो यथा भर्त्स्यमाना अपि खरा यथा पद्भ्यां ताड्यमाना अपि शुनीं खरीं चानुधावन्ति अजा यथा निर्लज्जा हन्तुमानीता अपि तद्वदित्यर्थः । ततः किमत आह । तत्कथमिति । विषयाणामापत्पदत्वविदः पुनर्विषयानेव भुञ्जते इत्येतत्कथं नहि कश्चित् श्वभ्रपतनस्यानर्थहेतुतां जानन्नपि तत्र पततीति अतस्तत्र किंकारणमिति प्रश्नः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तत्तद्भेदज्ञानं कथमत्राह । तत्तदिति । ज्ञानवृद्धा एषामागमादीनां मध्ये यद्यत् सात्त्विकमिति प्रचक्षते तत्तत्सात्त्विकं यद्विनिन्दन्ति तत्तामसं यदुपेक्षितं प्रचक्षते तद्राजसमिति जानीहीति शेषः ॥ ५ ॥

किमर्थमेवं विभागवचनं येनोपयोग्यं स्यादत्राह । सात्त्विकानीति । सत्त्वं सत्त्वस्वभावस्तद्विवृद्धये किं तत इति तत्राह । तत इति । ततः सत्त्वाद्भक्तिसाधनं धर्मः ततो धर्मात् ज्ञानं स्यात् किञ्च हरिविषयवाचो हरिविषया स्मृतिरपोहनं भगवद्विरुद्धत्यागः इत्येते भवन्ति ॥ ६ ॥

एवमुत्पन्नवृत्तिज्ञानस्य नाशं सदृष्टान्तमाह । वेणिवति । तन्मूलनिर्वाणं यथा तथा कथयामः तथाहि । यस्मिन्वने वेणवः सन्ति तेषां वेणूनां संघर्षाज्जातो वह्निस्तद्वनं दग्ध्वा स्वयमपि शाम्यत्येवं गुणव्यत्ययजः सत्त्वादिगुणानां व्यत्ययादन्योऽन्यनाशात्पृथक्स्थितादुद्रिक्तात्सत्त्वाज्जातो वेदो वृत्तिज्ञानं स्वकारणमन्तः करणं विनाश्य निर्मूलं स्वयं च विनश्यतीत्यन्वयः "विनिषेधे पृथग्भाव इति अलिङ्गादधिकार्थौ क्रौ प्रशंसायामलि क्रमे" इति यादवः वेदशब्दस्य प्रसिद्धार्थं परित्यज्याप्रसिद्धकल्पने किं नियामकम् उच्यते उपक्रमं ब्रूमः—

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

मुक्ताश्चाधीयते वेदान् जडज्ञानविवर्जिताः ।
स्वरूपभूतज्ञानेन पश्यन्तः सर्वमञ्जसेति ॥

वाक्यं च विद ज्ञान इति धातोश्च । "अविनाशी वा अरेऽयमात्मानुच्छित्तिधर्मे"ति श्रुतेः न स्वरूपज्ञाननाश उपपन्नः स्वरूपहानिप्रसङ्गात् एतत्साम गायन्नास्ते इत्यादिश्रुतिविरोधाच्च वेदोपशमो नोपपन्न इति ॥ ७ ॥

विषयाणामापदां पदत्वं जानन्तोऽपि तानेव सेवन्ते तत्र किङ्कारणमिति भावेन पृच्छति । विन्दन्तीति । श्वा च खरश्च अजश्च श्वखराजाः तद्वत् ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

वृद्धाः श्रीव्यासादयः सात्त्विकादीनां गुणदोषौ पाद्मोत्तरखण्डे दर्शितौ वर्त्तेते ॥ ५ ॥

सात्त्विकान्येवेत्यस्य टीकायां तावत्पर्यन्तं ज्ञानं भवतीत्यर्थः इति तावच्छास्त्रोत्थपरोक्षज्ञानमेवानुवर्त्तते तत आत्मापरोक्षार्थं सात्त्विकान्येव सेवेतेत्यर्थः ॥ ६ ॥ ७ ॥

यद्यपि विदन्ति तथापि श्वादयो ये न विदन्ति तद्वत्कथं भुञ्जते प्रायेणेति । ये न विदन्ति ते श्वादिनिर्विशेषास्तावद्भुञ्जतामित्यर्थः । विषयांस्त्वादीन् आपदां भाविदुःखानां पदमव्यभिचारिस्थानं दुःखोदर्काणि संपश्यन्निति वक्ष्यमाणात् तत्र श्वा मैथुनान्ते शुन्याः बन्धं खरा रजकदर्शिततृणमुष्टिभोगान्ते महाभारवहनम् अजो नित्यनानाभोजनाद्यन्ते शिरश्छेदं न जानन्तीति तथा दृष्टान्तितम् ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

एषां मध्ये प्रचक्षते प्रशंसन्ति तदुपेक्षितं तैर्न स्तुतं नापि निन्दितमित्यर्थः ॥ ५ ॥

सात्त्विकानि निवृत्तिशास्त्राण्येव नतु राजसतामसानि प्रवृत्तिपाखण्डशास्त्राणि सेवेत तीर्थाप एव न गन्धोदकसुरोदकाद्याः जनान् निवृत्तानेव न प्रवृत्तदुराचारान् देशान् विविक्तानेव नतु रथ्याद्यूतसदनानि कालान् ब्राह्ममुहूर्त्तप्रातरादीन् न प्रदोषनिशीथान् कर्माणि नित्यनैमित्तिकानि न काम्याभिचारादीनि जन्मानि प्रणवदीक्षादिलक्षणानि न शाक्तक्षुद्रमन्त्रदीक्षालक्षणानि ध्यानानि परमेश्वरस्यानिधार्मिकाणां नतु कामिनीविद्विषां मन्त्रान् प्रणवादीन् नतु काम्यक्षुद्रान् संस्कारान् आत्मशोधकान् नतु देहगेहसूनास्थानादिशोधकान् ततः सत्त्ववृद्धेर्हेतोः धर्मः धर्माच्च ज्ञानं किंपर्यन्तं स्मृतिरात्मापारोक्ष्यं यावत् देहद्वयाध्यासतत्कारणभूतगुणापोहश्च यावत् तावत्पर्यन्तं भवेत् तदेव ज्ञानं विद्या सैव जीवोपाधिं दग्ध्वा निरिन्धनाग्निवदन्ते स्वयमपि शाम्यतीत्यर्थः ॥ ६ ॥

ननु गुणव्यतिकरभववुद्धीन्द्रियादिभ्य एव साधनाभ्यासेनोत्पन्नं ज्ञानं कथं स्वहेतुभूतान् गुणान् निरस्येतद् आह । वेणूनां संघर्षाज्जातोऽग्निर्यथा तद्वनं वेणुवनं दग्ध्वा शाम्यति एवमेव गुणव्यत्ययजो देहः देहोत्थं ज्ञानं तत्क्रिमः तस्याग्नेरिव क्रिया यस्य सः जीवोपाधिं दग्ध्वा पश्चात् स्वयं शाम्यति ॥ ७ ॥

ननु ये न जानन्तस्ते दुर्विषयान् भुञ्जतां सात्त्विकास्तथा स्यान् पुरुषार्थः स्यादिति जानन्तोऽपि तान् कथं भुञ्जत इत्याह । विन्दन्तीति । श्वानो यथा भर्त्स्यमाना अपि उच्छिष्टग्रासं खरा यथा पदूभ्यां ताड्यमाना अपि खरीम् अजा यथा हन्तुमानीता अपि तद्वत् ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ननूक्तशास्त्रादिदशकस्य गुणत्रयहेतुत्वमित्युक्तं तत्स्यात्तथापि सात्त्विकादिनिर्देशेन ते विवेचनीया इत्यपेक्षायामाह । तत्तदिति । एषामागमादिदशानां मध्ये यद्यद्वृद्धाः प्रचक्षते प्रशंसन्ति तत्तदेव सात्त्विकं ज्ञेयमिति शेषः । यद्यन्निन्दन्ति तत्तत्तामसं यद्यदुपेक्षितं तैर्वृद्धैरुपेक्षितं न स्तुतं न वा निन्दितं तत्तद्राजसं ज्ञेयम् अत्र वृद्धा ज्ञानवृद्धा विवक्षिता नतु वयोवृद्धाः ज्ञानप्रकरणत्वात् नहि ज्ञाने वयसः कारणत्वम्—

न तेन स्थविरो भवति येनास्य पलितं शिरः ।
यो वा युवाप्यधीयानस्तं देवाः स्थविरं विदुः ॥
विप्राणां ज्ञानतो ज्यैष्ठ्यं क्षत्रियाणां तु वीर्यतः ।
वैश्यानां धान्यधनतः शूद्राणामेव जन्मतः ॥

इति मनुवचनात् ॥ ५ ॥

सात्त्विकानीति । एवं तत्र मुमुक्षुः सत्त्वविवृद्धये सात्त्विकान्येव वस्तूनि सेवेत तत्र शास्त्रं भगवज्ज्ञानभक्तिप्रतिपादकतया मोक्षफलकं सात्त्विकम् । प्रवृत्तिमार्गेण बहुधनायाससाध्यनश्वरस्वर्गादिफलकं राजसं प्रमादमोहाज्ञानद्वाराभिचारादिकर्मप्रतिपादकतया नरकफलकं तामसं च न सेवेतेत्यर्थः । एवं सर्वत्र योजनीयम् अथ मन्त्रधनादिकं द्रव्यं शुद्धाचारकुलादिभ्य एव नतु राजान्त्यजगणिकादिभ्यः अपः आपः जलं शुद्धं तीर्थादिकं भगवदर्पितमेव नतु गन्धादियुक्तं सुरादि वा जनान्निष्कामधर्मचारिणो ज्ञानिभक्तानेव नतु सकामधर्मनिष्ठान् लुब्धान् प्रमादिनो दुराचारिणो वा देशं भगवद्भजनध्यानाद्यनुकूलतीर्थक्षेत्रादिविविक्तिमेव नतु मार्गसंसदादि अन्त्यजवेश्यादिस्थानं वा कालं ध्यानाद्युपयोगि ब्राह्ममुहूर्त्तादिकं न मध्याह्नादिनिशीथादिरूपम्वा कर्म नित्यनैमित्तिकंविष्णवर्चनादिकं नतु काम्यान्यदेवार्चनादि अभिचरादि वा जन्म दीक्षालक्षणं सा च वैष्णवी एव न सौरशैवशाक्तक्षुद्रदेवतासम्बन्धिदीक्षारूपा अत्र मायावादिना जन्म च वैष्णवशैवदीक्षालक्षणं न शाक्तक्षुद्रदीक्षारूपमिति व्याख्यातं तत्र शिवदीक्षाया अपि सत्त्ववृद्धिहेतुत्वग्रहणं तच्छास्त्रविरुद्धत्वादसङ्गतं शैवदीक्षायाः सात्त्विकत्वं केनापि शास्त्रज्ञेन वक्तुमशक्यत्वात् यदि शिवस्यैव सर्वत्रेतिहासपुराणादिषु तामसत्वाभिधानं किं पुनस्तद्दीक्षायाः तथोक्तं वाराहे अगस्त्यरुद्रसम्वादे—

यत्सत्त्वं तद्धरिर्देवो यो हरिस्तत्परम्पदम् ।
सत्त्वं रजस्तम इति त्रितयं चैतदुच्यते ॥
तमः शिवो रजो ब्रह्मा सत्त्वं नारायणात्मकम् ।

श्रीभगवानुवाच ।

अहमित्यन्यथा बुद्धिः प्रमत्तस्य यथा हृदि ।
उत्सर्पति रजो घोरं ततो वैकारिकं मनः ॥ ६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

रजसा सत्त्वयुक्तेन भवेच्छ्रीमान् यशोऽधिकः ॥
तच्च वै तामसं वृत्तं सर्वशास्त्रेषु पठ्यते ।
यत्रेश्वाह्यकर्म स्यात् मामुद्दिश्योपसेवते ॥
तद्रौद्रमिति विख्यातं निकृष्टगतिदं नृणाम् ।
यद्धीनतपसा युक्तं केवलं तामसं तु यत् ॥
तद्दुर्गतिप्रदं नृणामिह लोके परत्र चेति ।

लिङ्गे चतुर्दशाध्याये

हिरण्यगर्भो रजसा तमसा शङ्करः स्वयम् ।
सत्त्वेन सर्वगो विष्णुः स चात्मा सहशम्मयः

तत्रैव चतुर्विंशेऽध्याये—

त्वत्कोपसम्भवो रुद्रस्तमसा च समावृतः ।
त्वत्प्रसादाज्जगद्धाता रजसा च पितामहः ॥
सत्त्वरूपः स्वयं विष्णुः पुरुषः पुरुषोत्तमः ।

।कश्चात्रापि प्रथमस्कन्धे—

मुमुक्षवो घोररूपान् हित्वा भूतपतीनथ ।
नारायणकलाः शान्ताः भजन्ति ह्यनसूयवः ॥

भूतपतीन् शिवादीन् भूतपतित्वं शिवस्यैव भूतेशः खण्डपरशुः पिनाकी प्रमथाधिप इत्यमरकोशात् दशमेऽपि परीक्षित्प्रश्नः——

देवासुरमनुष्येषु ये भजन्त्यशिवं शिवम् ।
प्रायस्ते धनिनो भोजा नतु लक्ष्म्याः पतिं हरिमिति ॥

अशिवमिति तामसमित्यर्थः तामसत्वं प्रश्नोत्तराभ्यां प्रतिपाद्य—

हरिर्हि निर्गुणः साक्षात् पुरुषः प्रकृतेः परः ।
ससर्वदृगुपद्रष्टा तं भजन्निर्गुणो भवेदित्युक्तम् ॥

ध्यानं श्रीविष्णोरेव न सूर्याग्निरुद्रभैरवादीनां मन्त्रं रामकृष्णनारायणविष्णुनृसिंहसम्बन्धिनमेव न तु हैरण्यगर्भसौरादिशैवशाक्तादिकं वा संस्कारं स्वरूपशोधकं भगवत्स्वरूपादिविषयकज्ञानभक्तिरूपमेव—

क्षेत्रज्ञस्येश्वरज्ञानाद्विशुद्धिः परमा मतेति ।

याज्ञवल्क्यस्मृतेः भक्तिः पुनाति मन्निष्ठा श्वपाकानपि संभवादिति भगवदुक्तेः न तु देहगेहादीनामेव ततो शुद्धात्सत्त्वादुक्तलक्षणो धर्मो भवेत्ततो ज्ञानं भवेत्ननु“तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेने” ति श्रुतिविहितस्वस्ववर्णाश्रमोचितवेदाध्ययनयज्ञादिधर्मेणैव ज्ञानं भवेदेवं किंत्वद्भक्तिलक्षणधर्मेण किम्वा सत्त्ववृद्ध्यर्थमुक्तशास्त्रादिदशकेनेति तत्राह । यावत्स्मृतिरित्यादि । फलरूपा भक्त्यपरपर्याया ध्रुवा स्मृतिर्यावत्पर्यन्तं स्यात्तावत् “आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृति”रिति श्रुतेः पुनः कथम्भूतं ज्ञानम् अपोहनं संसृतिहेतुभूतगुणकार्यदेहः सकारणोऽपोह्यतेऽपसार्यतेऽनेनेत्यपोहनं तत्सम्बन्धापाय कारणमित्यर्थः । एवम्भूतं ज्ञानं भक्तिलक्षणधर्मेणैव जायते नतु यज्ञादिरूपसाधारणधर्मेणेति भावः ॥ ६ ॥

ननु गुणतत्कार्यापोहेऽपि सूक्ष्मदेहस्य विद्यमानत्वात् पुनस्तत्सम्बन्धः स्यादितिचेत्सोऽपि नश्यतीत्याह । वेणिवति । वेणूनां सङ्घर्षाज्जातो वन्हिर्यथा स्वस्मान्निर्गतज्वालाभिस्तद्वनं दग्ध्वा शाम्यति एवं गुणव्यतिकराज्जातो देहः सूक्ष्मशरीरं स्वोत्पन्नज्ञानेन स्वकारणं विनाश्य स्वयमपि शाम्यति कथम्भूतः तत्क्रियः तस्याग्नेरिव क्रिया यस्य सः ॥ ७ ॥

एवं सात्त्विकपदार्थानां सेवनस्य परम्परया सर्वानर्थनिवृत्तिपूर्वकनिरतिशयफलकत्वे सिद्धे सति सर्वानर्थहेतून् राजसतामसान् विषयान् जानन्तोऽपि बहवो जनाः कथं सेवन्ते इति सन्दिह्य पृच्छति उद्धवः । विदन्तीति । मर्त्याः विषयानापदास्पदं दुःखरूपं स्थानं प्रायेण बहुधा प्रत्यक्षानुमानशास्त्रद्वारा विदन्ति जानन्ति तथापि तान् भुञ्जते तत्र दृष्टान्तः श्वखराजवत् श्ववत् खरवत् अजवत् हे कृष्ण ! तत्कथं केन हेतुनेत्यर्थः ॥ ८ ॥

———

भाषा टीका ।

इन पदार्थों मे जिन जिन पदार्थों को शिष्ट जन प्रशंसा करैं वेही सात्विक पदार्थ हैं जिनकी वे निंदा करते हैं वे तामस हैं जिसको उनने नहीं कहा है वह राजस है ॥ ५ ॥

पुरुष को चाहिये कि सत्वकी वृद्धि के लिये सात्विकही पदार्थों का सेवन करै तिस से धर्म वढैगा फिर ज्ञान वढैगा यावत्पर्यंत अज्ञान रहैगा ऐसा करने ही से ठीक होगा ॥ ६ ॥

जैसे कि वांसों के घिसने से पैदा हुआ अग्नि सब वन को जला कर आप भी शांत हो जाता है तैसे ही गुणों के व्यतिक्रम से भया देह भी उसी के क्रिया की नांई शांत हो जाता है ॥ ७ ॥

उद्धव उवाच ।

हे श्रीकृष्ण ! प्रायः करके सब मनुष्य इन विषयों को दुख का ही हेतु जानते हैं तो भी कुत्ता बकरी गधा सरीके फिर भी उनहीं विषयों को भोगते हैं इसका क्या कारण है सो कहिये ॥ ८ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

मिथ्याऽभिनिवेशन भुञ्जत इति सहेतुकमाह । अहमिति त्रिभिः । प्रमत्तस्य विवेकशून्यस्य देहादावहमिति मिथ्याबुद्धि-

रजोयुक्तस्य मनसः संकल्पः सविकल्पकः ।
ततः कामो गुणध्यानाद्दुःसहः स्याद्धि दुर्मतेः ॥ १० ॥
करोति कामवशगः कर्माण्यविजितेन्द्रियः ।
दुःखोदर्काणि सम्पश्यन्रजोवेगविमोहितः ॥ ११ ॥
रजस्तमोभ्यां यदपि विद्वान् विक्षिप्तधीः पुनः ।
अतन्द्रितो मनो युञ्जन् दोषदृष्टिर्न सज्जते ॥ १२ ॥
अप्रमत्तोऽनुयुञ्जीत मनो मय्यर्पयन् शनैः ।
अनिर्विण्णो यथा कालं जितश्वासो जितासनः ॥ १३ ॥
एतावान् योग आदिष्टो मच्छिष्यैः सनकादिभिः ।
सर्वतो मन आकृष्य मय्यद्धा वेश्यते यथा ॥ १४ ॥

उद्धव उवाच ।

यदा त्वं सनकादिभ्यो येन रूपेण केशव! ।
योगमादिष्टवानेतद्रूपमिच्छामि वेदितुम् ॥ १५ ॥

श्रीभगवानुवाच ।

पुत्रा हिरण्यगर्भस्य मानसाः सनकादयः ।
पप्रच्छुः पितरं सूक्ष्मां योगस्यैकान्तिकीं गतिम् ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

हृदि यथावदुत्सर्पति ततोऽहंबुद्धेश्च वैकारिकं सत्त्वप्रधानमपि मनः अतिघोरं दुःखात्मकं रज उत्सर्पति मनो व्याप्नोतीत्यर्थः ॥ ९ ॥

इदमेवमिदमेवं भोग्यमिति सविकल्पः सङ्कल्पः स्यात्ततश्च अहोरूपमहोभाव इति गुणाभिध्यानाद्दुर्धरः कामः स्यात् ॥ १० ॥

ततो विषयान् भोक्तुं कर्माणि करोति ॥ ११ ॥

एवं चेन्न कस्यापि दुःखनिवृत्तिः स्यादित्याशङ्क्याऽऽह । यदपि यद्यपि रजस्तमोभ्यां विक्षिप्तधीर्मूढधीश्च तथापि विद्वान्विवेकी पुनर्मनो निरुन्धन्न सज्जते ॥ १२ ॥

विषयदोषदृष्ट्याऽपि मनोनिरोधाशक्तौ सुखं तन्निरोधोपायमाह । अप्रमत्त इति । अनिर्विण्णोऽनलसः यथाकालं त्रिषवणम् मयि परमानन्दरूपेऽर्पयन्समादध्यात् ॥ १३ ॥

विषयैः संग्रथितस्य मनसस्तद्वियोगेनेश्वरनिष्ठत्वमसम्भावितं मन्यमानं प्रति तन्निरूपणायेतिहासमुपाक्षिपति । एतावानिति । यथा यथावन्मय्यावेश्यते एतावानित्यर्थः ॥ १४ ॥

मच्छिष्यैरित्युक्ते तेषामतिज्ञायसामनेन रूपेण निरूपणासम्भवात्पृच्छति । यदेति । तं कालं तदेतद्रूपं च वेदितुमिच्छामि तत्कथयेति ॥ १५ ॥

मानसाः पुत्राः सूक्ष्मां दुर्ज्ञेयाम् ऐकान्तिकीं गतिं परां काष्ठाम् ॥ १६ ॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

मिथ्याभिनिवेशो नाम ज्ञात्वापि स्वीकृतस्य पुनस्त्यागाऽसहिष्णुत्वं तेनैव भुञ्जते इति सयुक्तिकमाहेत्यर्थः । युक्तिश्चैवं विषयाणां दुःखरूपत्वज्ञानेऽपि मनुष्या देहादौ यथावन्मिथ्याज्ञानवन्तः यथावद्विवेकशून्यत्वात् पश्वादिवदित्याद्याकारा ज्ञेया विवेकशून्यस्येति पूर्वकर्मविशेषणेति शेषः ॥ ९ ॥

एवमिदमित्यादिविशेषचिन्तनस्याभिनयः ततश्च सङ्कल्पविकल्पविशेषानन्तरं गुणध्यानाच्छ्रेष्ठत्वारोपात् दुर्धरोऽसह्यः ॥ १० ॥

दुःखोदर्काणि दुःखोत्तरफलानीति सम्पश्यन् जानन्नपि ॥ ११ ॥

एवं चेदिति चेद्यदि दुःखोदर्कत्वज्ञानेऽपि कर्मकरणं तर्हि विरक्त्यभावान्न कस्यापि दुःखनिवृत्तिः स्यादित्यर्थः ॥ १२ ॥

सुखं मयि मनोऽर्पणेनानायासं यथा स्यात्तथा तन्निरोधोपायं मनोनिरोधसाधनं स्वस्मिन् परमसुन्दरे तद्धारणाम् ॥ १३ ॥

तद्वियोगेन विषयविच्छेदेन असम्भावितमघटितं तन्निरूपणाय ईश्वरनिष्ठत्वोपपादनाय उपाक्षिपति आरभते अद्धा साक्षात् इति वैराजधारणा व्यावृत्ता ॥ १४ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी ।

अतिउदायसामतिवृद्धानाभनेन कृष्णाख्येन त्वं नित्यनराकृतिपरब्रह्मरूपः सर्वावतारी येन रूपेणावतारेण तत् कथयादि ॥ १५—१६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

प्रमत्तस्य आत्मन्यनभिसंहितस्य उष्णाजलमितिवद्देहात्मनोः संसर्गात् स्थूलोऽहं कृशोऽहमित्यहङ्कारो भवति तेन रजोमयं रजो युक्तम् आहङ्कारिकं मनउत्सर्पति व्याप्रियते ममकारं जनयति रजःशब्दः रजोयुक्तपरः रजोयुक्तस्येत्यनन्तरोक्तेः ॥ ९ ॥

मनसः प्रवृत्तिं विवृणोति रजोयुक्तस्येति । सङ्कल्पः मनुष्योऽहं पशुरहमित्यात्माभिमानानुगुणेषु ओदनवसनादिषु भेदेषु भोग्यताबुद्धिः सङ्कल्पः स्रक्चन्दनस्त्र्यादिगताकारवैविध्यप्रतिपत्तियुक्तः ततः कामः भोग्यताबुद्धिलक्षणात्सङ्कल्पात् कामः भोगेष्विच्छा सच कामः भोग्यगतसौन्दर्यमाधुर्यादिगुणध्यानात् सुदुःसहः स्यात् अलब्ध्वा स्थातुमशक्तः पुरुषः स्यादित्यर्थः ॥ १० ॥ ११ ॥

सम्पश्यन्नपि रजस्तमोभ्यामिति रजः कर्महेतुः तमस्तदनुबन्धिदोषदर्शननिवारकं कामविजयोपायमाह । अतन्द्रित इति आत्मानुगुणेषु वस्तुषु भोग्यताबुद्धिरूपात्सङ्कल्पाद्धि कामो भोग्यताबुद्धिश्च गुणध्यानादिना सा तु दोषदर्शनान्निवर्त्तते मधुरतरे फले विषमिति श्रुत्वा ज्ञानाद्भोग्यताबुद्धिर्निवर्त्तते इत्यर्थः ॥ १२ ॥

दोषदृष्ट्या विषयान्तरेभ्यो निवृत्तस्य मनसः अविक्षेपोपाययोगमाह अनिर्विण्णः अन्तरायैरविषण्णः जितश्वास इति मनसो मय्यर्पणमेव योगशरीरं प्राणायामादयो मनसो मय्यर्पणस्योपकारका इत्यभिप्रायः ॥ १३—१६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सकृदित्थं विषयाणामापातरदत्वज्ञानवतोऽपि देहात्माभिमानरजस्तमोभिवृद्धं मन एव प्रसह्य भोजयतीत्युत्तरमाह श्रीभगवान् । अहमिति । यथा प्रमत्तस्यात्मन्यनवहितस्य इदमहमित्यन्यथा बुद्धिर्जायते उष्णं जलमिति वद्देहात्मनोः संसर्गात्स्थूलोऽहं कृशोऽहमित्यहङ्कारो भवतीत्यर्थः । ततोऽन्यथाबुद्धेर्हेतोः रजो वैकारिकशब्दौ तत्कार्यवोर्वर्तेते वैकारिकं सात्त्विकाहङ्कारकार्यं मनः मनो वैकारिकाज्जज्ञ इति द्वितीयेऽभिधानात् घोरं महाशनं महापाप्मानं रजः रजोगुणकार्यं कामं तद्विरोधे सति क्रोधं चोत्सर्पति अनुवर्तते कामक्रोधाविष्टं भवतीत्यर्थः कामक्रोधयोः रजोगुणप्रभवत्वं भगवतैव गीतम्—

> काम एष क्रोध एष रजोगुणसमुद्भवः ।
> महाशनो महापाप्मा विद्ध्येनमिह वैरिणमिति ॥ ९ ॥

उत्सर्पणं न साक्षात्किन्तु सङ्कल्पद्वारेणाह । रजोयुक्तस्येति । मनसो रजोगुणयोगस्तु राजसाहङ्कारसहकृतवैकारिकाख्यसात्त्विकाहङ्कारकार्यत्वादवगन्तव्यः अतो विकल्पसहितः सङ्कल्पो भवति । रजोगुणस्य विक्षेपापादकत्वात्तद्योगाच्च मनसः सङ्कल्पविकल्परूपव्यापारौ भवत इत्यर्थः । रजः कर्महेतुस्तमस्तु तदनुबन्धिदोषदर्शनवारकं तत्र सङ्कल्पो नाम मनुष्योऽहमित्यात्माभिमानानुगुणेष्वोदनस्त्र्यादिषु द्रव्येषु भोग्यताबुद्धिः विकल्पस्तु स्रक्चन्दनस्त्र्यादिगताकारवैविध्यप्रतिपत्तिरूपः ततश्च कामः भोग्यताबुद्धिलक्षणात्संकल्पात्कामः भोगेष्विच्छा स च कामः दुर्मतेर्देहात्माभिमानिनो जीवस्य गुणाध्यानाद्भोग्यगतसौन्दर्यमाधुर्यादिगुणध्यानात् दुःसहः स्यात् अलब्ध्वावस्थातुमशक्तः स्यादित्यर्थः ॥ १० ॥

ततः किमत आह । करोतीति । कामस्य दुःसहस्य वशङ्गतः प्राप्तः संपश्यन् जानन्नपि कर्माणि भोगफलकत्वाभिमानविषयाणि वस्तुतः दुःखोत्तरफलानि करोति कुतः यतोऽयमविजितेन्द्रियः रजोवेगेन कामवेगेन मोहितश्च एवं जानन्तोऽपि कथं भुञ्जते इत्यस्योत्तरमुक्तम् ॥ ११ ॥

एवं चेद्विषयाणामापातरदत्वानुचिन्तनेऽपि तद्विरागपूर्वकमुक्त्युपायानुष्ठानाधिकारो न कस्यापि स्यादित्यत आह । रजस्तमोभ्यामिति । यद्यपि यद्यपि रजस्तमोभ्यां विक्षिप्तधीर्मूढधीश्च तथापि विद्वान् विवेकी पुनः मनो रुन्धन् सङ्कल्पविकल्पाप्रवणं कुर्वन् विषयेषु सदा दोषदृष्टिः तेषामापातरदत्वदर्शनस्वभावः अतन्द्रितः तद्विषयप्रमादरहितः न सज्जते विषयानुभव इति शेषः एवंविधेनापि एवमभिक्रिया सम्पाद्येति भावः ॥ १२ ॥

आत्मानुगुणेषु वस्तुषु भोग्यताबुद्धिरूपात्सङ्कल्पाद्धि कामः भोग्यताबुद्धिश्च गुणध्यानादिना सा तु दोषदर्शनान्निवर्तते मधुरेऽपि पयसि विषमिश्रत्वज्ञानाद्भोग्यताबुद्धिनिवृत्तिर्दृष्टा दोषदृष्ट्या विषयान्तरेभ्यो निवृत्तस्य मनसो विषयं दर्शयन्नधिकारिणं विशिंषन् योगं विदधाति । अप्रमत्त इति । दोषदृष्ट्येत्थं विषयभोगानासक्तः अप्रमत्तः अतन्द्रितश्च यथाकालं तत्तत्प्रातर्मध्यन्दिनसायंकालानतिक्रमेण जितासनः चिरमुपविष्टस्यापि श्रमराहित्यापादनात्मकाभ्यासविशेषरूप आसनजयः श्वासजयो नाम पूरणरेचनकुम्भनाद्युपायैः प्राणवशीकारः अनिर्विण्णः अनलसः शनैर्मनो मयि शुभाश्रयभूतेऽर्पयन् धारयन्नियुञ्जीत युज समाधौ ध्यानपूर्वकसमाधिनिष्ठो भवेदित्यर्थः । अविषण्ण इति पाठान्तरेऽन्तरायैरविषण्णचित्त इत्यर्थः । तत्र मनसो मय्यर्पणेन समाधिर्योगस्वरूपं प्राणायामादयस्तु तस्योपकारकास्ते यमनियमादीनामपीतराङ्गानामुपलक्षकाः ॥ १३ ॥

एवं योगस्य स्वरूपमुक्तम् अथ निष्कृष्य योगस्वरूपमेव दर्शयन्नुक्तप्रश्नोत्तरानुसन्धानादिहंससनकादिसम्वादं वक्तुं तत्पिपृच्छिषामुत्पादयति । एतावानिति । मच्छिष्यैः हंसरूपेणावतीर्णस्य मे शिष्यतां प्राप्तैः सनकादिभिरेतावानेव योग आदिष्ट उपदिष्टः मदुपदेशलब्धो योगोऽन्येभ्योऽप्युपदिष्ट इत्यर्थः । कियान्सर्वतः सर्वेभ्यो विषयेभ्यो मन आकृष्य मय्यद्धा मय्येव अद्धेत्यवधारणार्थको निपातः यथा यथावाभिवेश्यते इत्येतावानित्यर्थः ॥ १४ ॥

तत्र लब्धावसरः पृच्छति । यथा त्वमिति । येन रूपेण किंप्रकृतश्रीकृष्णरूपेण किम्वा रूपान्तरेण यथा यादृशं योगमादिष्टवान् उपदिष्टवानेतद्रूपं तद्योगोपदेष्टृरूपं योगं चेत्यपि वोध्यं वेदितुमिच्छामि ॥ १५ ॥

विवक्षितं सम्वादं वक्तुं प्रस्तौति । पुत्रा इति । पितरं हिरण्यगर्भं प्रति सूक्ष्मां दुर्ज्ञेयामैकान्तिकीमसाधारणां योगस्य गतिं प्रकारं पप्रच्छुः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अकर्तर्यात्मनि महङ्कृतीति कर्तृत्वाभिमानमेति तन्मूलरागोत्सिक्तमनः कारकः कामः कारणमित्युत्तरमाह । अहमितीति । अयमत्रार्थः यदा प्रमत्तस्य हृद्यहङ्कृतिरन्यथा बुद्धिरुत्सर्पति । उत्कर्षति तथा घोरं रज उत्सर्पति उदेति ततो रागोदयादुच्छ्वसितं मनो वैकारिकं विविधविकाराकरो भवति ॥ ९ ॥

रजसा विकारस्य मनसो विविधकल्पनया पुनः सङ्कल्प इदमित्थं करिष्यामि इदमेवं करिष्ये इत्यादिलक्षण उदेति एवंविविधसङ्कल्पेन दुर्मतेरशोभनबुद्धेः गुणानां शब्दादीनां ध्यानाद्दुःसहः कामः स्यादित्यन्वयः ॥ १० ॥

कामस्य दुःसहत्वमुपपादयति । करोतीति । रजोवेगविमोहितत्वेन कामवशङ्गतः तस्मादविजितेन्द्रियस्तस्मात्कर्माणि दुःखोदर्काणि सम्पश्यन्नपि पुनः कर्माणि करोतीत्यन्वयः यद्वा काममयत्वेन अविजितेन्द्रियो भवति तेन चक्षुरादीन्द्रियजयाभावेन वनितादिरूपं पश्यन् रजोवेगेन वीर्योद्रेकेण विमोहितः विवेकज्ञानशून्यत्वेन विह्वलिताङ्गो दुःखफलानि कर्माणि करोति कामसौख्याय विषयान् भुङ्क्ते इति ॥ ११ ॥

ननु विषयाणां समुद्रतरङ्गवदावर्तमानत्वान्न संसारादस्योत्थानं स्यात् पुरुषायुषसहस्रेणापि तस्मान्मोक्षशास्त्रविधानं व्यर्थमित्याशङ्क्य प्रज्ञस्यैवं न तत्त्वज्ञस्येत्याह । रजस्तमोभ्यामिति । विद्वच्छब्दाविवरणं दोषदृष्टिरिति । पुनःशब्दो वीप्सार्थो दोषदृष्टिरित्यनेन सम्बध्यते विद्वान् यदपि यद्यपि रजस्तमोभ्यां विक्षिप्तधीः तथाप्यतन्द्रितो भूत्वा हरौ मनो युञ्जन् पुनर्दोषदृष्टित्वाद्विषयेषु न सज्जते शरीरयात्रार्थं विषयान् सेवमानोऽपि तैः प्रतिबद्धो न भवतीति ॥ १२ ॥

एतदेव विवृणोति । अप्रमत्त इति । हिशब्दः सर्वशास्त्रप्रसिद्धत्वद्योतकः मनो विषयेभ्य आकृष्य शनैर्मय्यर्पयन् स्थापयन् युञ्जीत ध्यायेत् योगः संहननोपायध्यानसङ्गतिमुक्तिष्विति यादवः मामिति शेषः अनिर्विण्णः अनालस्यः * अलमितिबुद्धिवैराग्यशून्यो वा ॥ १३ ॥

सनकादियोगीन्द्रयोगसम्पत्त्यभावान्नायं योगः साधीयानत्राह । एतावानिति । यथा मनो मय्येव चाविश्यते तादृशो योगः एतावान्नान्य इति सनकादिभिरादिष्ट इत्यद्धा सत्यम् अद्धा प्रत्यक्षसत्ययोरिति च ॥ १४ ॥

लोकोपकाराय मेरुशृङ्गोपरिस्थितौषधोपदेशवत्सनकाद्यादिष्टयोगोपदेशनमित्यश्रद्धेयमिति भावेन पृच्छति । यदेति ॥ १५ ॥

दृष्टसाधनावबोधकत्वेनाप्तिमूलकत्वेन वेद एव प्रमाणमिति अङ्गेपमित्याशयेन परिहर्तुमितिहासमाह । पुत्रा इति । योगस्य ज्ञानस्य गतिम् ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

प्रमत्तस्य पूर्वकर्मविशेषेण लुप्तविवेकस्य देहादावहमित्यन्यथा बुद्धिर्हृदि यथोत्सर्पति प्रतिशेते तथा रजोऽप्युत्सर्पति ततो हेतोर्वैकारिकं सात्त्विकमपि मनः उत्सर्पति दुष्टं भवति ॥ ९ ॥

तदेवाह । रजोयुक्तस्येत्यर्धकेन ॥ १० ॥

दुःखोदर्काणीति जानन्नपि ॥ ११—१३ ॥

अद्धा साक्षात् ॥ १४ ॥

त्वं नित्यनराकृतिपरब्रह्मरूपः सर्वावतारी यदा येन रूपेणावतारेण तं समयं तद्रूपं च वेदितुमिच्छामि ॥ १५—१७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ये दुर्विषयान् भुञ्जते ते विद्वांस एव नोच्यन्ते किंतु विद्वन्मानिन एव ते विषयान् निन्दन्तोऽपि यथाभुञ्जते तत्र प्रकारं श्रावयितुमाह । अहमिति त्रिभिः । प्रथमं देहादावहमिति हृदि मिथ्या बुद्धिरुत्कर्षेण सर्पति ततः प्रमत्तस्य तस्य घोरं रजः कर्तृ वैकारिकं सात्त्विकमपि मनः प्रति उत्सर्पति मनो व्याप्नोतीत्यर्थः ॥ ९ ॥

प्रथममिदं भोग्यमिति सविकल्पः ततश्च इदमेवं भोग्यमिदमेवं भोग्यमिति सविशेषः संकल्पः स्यात् ततश्च अहो रूपमहोभाव इति दुर्निरोधः कामः स्यात् ॥ १० ॥

ततस्तद्विषयप्राप्त्यर्थं कर्माणि दृष्टादृष्टफलानि तानि च दुःखोदर्काणि पश्यन् जानन्नपि ॥ ११ ॥

विद्वांस्तु यद्यपि रजस्तमोभ्यां विक्षिप्तधीः परतन्त्रधीश्च कथंचित् स्यात्तदपि ॥ १२ ॥

अतन्द्रित इत्यस्यार्थमाचष्टे । अप्रमत्त इति । कुत्र मनो युञ्ज्यादित्यत आह । मयि अनुयुञ्जीतेति अनिर्विण्ण इति तदपि मनोनिरोधो यदि न स्यात् तदपि तत्प्रयत्नान्न विरमेदिति भावः ॥ १३ ॥ १४ ॥ १५ ॥

ऐकान्तिकीं गतिं परां काष्ठाम् ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

विपर्ययज्ञानादित्युत्तरमाह । अहमिति त्रिभिः।प्रमत्तस्य परमार्थविषयेऽनवहितस्यान्यथाज्ञानवत इत्यर्थः । देहेऽहमित्यन्यथा बुद्धिर्यथा यथावत् हृदि उत्सर्पति आरोहतीत्यर्थः । ततोऽहम्बुद्धेर्हेतोर्वैकारिकं सत्त्वकार्यमपि मनः. घोरं रजो रजोगुणम् उत्सर्पति व्याप्नोति मनोरथे प्रतिहते मातृपितृगुर्वादिहननमपि स करोतीत्यतो घोरमित्युक्तम् ॥ ९ ॥

रजोयुक्तस्येति । ततो रजोगुणयुक्तस्य मनसः सविकल्पकः इदं रूपादिमद्वस्तु मे स्यात्कथं वा स्यादित्यादिरूपः सङ्कल्पो भवेत् ततः सङ्कल्पानन्तरं तस्य दुर्मतेरिदमेवातिभोग्यं भाग्येनेदमेव मे भवेदिति गुणध्यानात् एतत्प्राप्त्यैव मम जीवनमित्येवं रूपः दुःसहः कामः स्यात् ॥ १० ॥

करोतीति । यतोऽविजितेन्द्रियस्तत्कामवशगः विषयान्भोक्तुं दुःखोदर्काणि विषयिणां दुःखमेवोत्तरोत्तरं येभ्यस्तथा भूतानि कर्माणि पश्यन्नपि करोति तत्कुतः यतो रजोवेगविमोहितः ॥११॥

*हारिलेघमेति शेषपूरणम् ।

सनकादय ऊचुः ॥
गुणेष्वाविशते चेतो गुणाश्चेतसि च प्रभो ! ।
कथमन्योऽन्यसंत्यागो [(१)] मुमुक्षोरतितितीर्षोः ॥ १७ ॥
श्रीभगवानुवाच ॥
एवं पृष्टो महादेवः स्वयंभूर्भूतभावनः ।
ध्यायमानः प्रश्नबीजं नाभ्यपद्यत कर्मधीः ॥ १८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ननु स्यादेतत्प्रमत्तस्य दुर्मतेर्विपर्ययज्ञानाद्दुःखावाप्तिरेवेति विदुषोऽपि रजस्तमोयोगविक्षेपप्रमादाद्दिश्लेषस्तर्हि का गतिरित्यत आह।रजस्तम इति । विद्वान् गुणदोषविवेकज्ञः केनचिदनादिकर्मणा। रजस्तमोभ्यां यद्यपि यद्यपि विक्षिप्तधीर्भवेत्तथापि पुनर्विदित्वा संसारे दोषदृष्टिः अतन्द्रितः अनलसः सन्मनो ध्येयवस्तुनि युञ्जन् सन् विषयेषु न सज्जते ॥ १२ ॥

ननु दोषदर्शी सत्यामपि मनोनिरोधो दुःशक इति चेत्तत्राह । अप्रमत्त इति । त्वया सत्यमुक्तं तथापि अप्रमत्तः कर्त्तव्यविषये सावधानः अनिर्विण्णः कतिवारं नियुक्तमपि मनो वशं नापद्यतेऽतः परं न नियोक्ष्यामीत्येवं निर्वेदमकुर्वन् अनुयुञ्जीत पुनः पुनर्नियुञ्ज्यात् यथा कालं नियमेन कालमनतिक्रमणेन यथा स्यात्तथा शनैर्मनः शुभाश्रये मय्यर्पयेत् जितासनो जितश्वासश्च भवेत् ॥ १३ ॥

स्यादेतद्यथा कथं त्वदुक्तप्रकारेण त्वयि मनसि नियुक्ते तदनन्तरं किङ्कर्तव्यमित्यपेक्षायामियमेव योगकाष्ठेति द्रढयितुमेवं भूतयोगकर्तुरुपदेष्टारं प्रमाणयितुं स्वतोऽधिकस्याभावादेवं विधयोगसम्प्रदायं च प्रवर्तयितुं सर्वयोगाधीशान् स्वशिष्यानेव प्रमाणत्वेनोदाजहार।एतावानिति।सर्वविषयेभ्यो मनआकृष्य यथावत् परमानन्दरूपे सर्वपुरुषार्थदातरि मयि अद्धा साक्षादावेश्यते मच्छिष्यैः सनकादिभिरेतावान् योग आदिष्टः नह्यतोऽधिक इत्यर्थः अद्धेत्यनेन भगवदंशविभूतिभूतब्रह्मरुद्रेन्द्रादिव्यावृत्तिः सूचिता मुमुक्षुणा न ते ध्येया इत्यर्थः । आवेश्यते इत्यस्य यथाविषयिणां रूपादिविषयेष्वत्यन्तावेशो भवति तद्वदित्यर्थः । मच्छिष्यैरित्यनेन तद्वचने मदनुवर्तिनां सर्वेषां प्राप्ताप्ततरत्वं तदनङ्गीकारिणां दुर्याग्यावहिर्भूतत्वमिति दर्शितम् ॥ १४ ॥

सर्वर्षिदेवादीनामपि पूर्वेषां सनकादीनामनेन रूपेणोपदेशमसम्भावितं मन्वानः पृच्छत्युद्धवः । यदेति । हे केशव ! यदा यस्मिन्काले येन रूपेण त्वं सनकादिभ्यो योगमुपादिष्टवानेतदहं वेदितुमिच्छामि कृपया वद ॥ १५ ॥

यदर्थं प्रार्थितो भगवांस्तत्कालं तद्रूपं च ज्ञापयितुमितिहासमवतारयति। श्रीभगवानुवाच पुत्रा इति। हिरण्यगर्भस्य मानसाः पुत्राः सनकादयः योगस्य सूक्ष्मां दुरूहाम् एकान्तिकीमेकस्मिन् भगवत्येवान्तोऽवसानं यस्यास्तां गतिं गम्यते ऽनयेति गतिः साधनमित्यर्थः पितरं पप्रच्छुः ॥ १६ ॥

भाषा टीका ।

श्रीभगवान् उवाच ।

प्रमादी पुरुष के मैं देहादिक हूं ऐसी बुद्धि होती है एस हृदय में होते ही सात्त्विक बुद्धिवाले का मन भी घोर रजोगुण युक्त हो जाता है ॥ ६ ॥

मनमे रजोगुण के होते ही विषयों का संकल्प विकल्प होता है फिर गुणों के ध्यान होनें से काम होता है दुर्मति पुरुष को अति दुःसह होने से वह काम छूटता नहीं है ॥१०॥

फिर अजितेंद्रिय होने से काम के वश होकर रजोगुण के वेग से मोहित होने से दुःख के फल दायक उन कर्मों को देखता हुआ भी फिर करता ही रहता है ॥ ११ ॥

जो विवेकी है सो तो रजोगुण तमोगुण से बुद्धि के विक्षेप होने पर भी उनमें दोष की दृष्टि करने से सावधान होकर मनको रोकता है तथ उन विषयों में बंधता नहीं है ॥ १२ ॥

इस कारण से सावधान होकर आलस को छोडकर प्रात आदि काल मे दृढ आसन लगाकर प्राणायाम से श्वास को रोक कर मनको धीरे मेरे मे अर्पण करता हुआ रोकने का अभ्यास करै ॥ १३ ॥

मेरे शिष्य सनकादि कों ने भी इतना ही योग का उपदेश किया है जोकि सब तरफ से मनको खैंचकर मेरे मे अर्पण करना हो जावै ॥ १४ ॥

उद्धव उवाच हे केशव ! आपने जिस समय मे जिस रूप से सनकादिकों को योगका उपदेश किया है उस रूप को मैं जानने चाहता हुं ॥ १५ ॥

श्रीभगवान् उवाच ब्रह्मा के मानस पुत्र जो सनकादिक हैं उनने अपने पिता ब्रह्माजी से योगकी एकांत सूक्ष्म गतिको पूछा ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तदेवाऽऽह । गुणेष्विति । विषयेषु स्वभावतो रागादिवशाच्चेतः प्रविशति ते चानुभूता विषया वासनारूपेण चेतसि प्रविशन्ति । अतितितीर्षोर्विषयानतिक्रमितुमिच्छोः ॥ १७ ॥

एवमिति । महान् देवोऽपि स्वयम्भूरपि भूतानां स्रष्टापि ध्याय-

(१) मुमुक्षोः सेतितीर्षतः इति वि० पाठः ।

स मामचिन्तयद्देवः [१] प्रश्नपारतितीर्षया ।
तस्याहं हंसरूपेण सकाशमगमं तदा ॥ १९ ॥
दृष्ट्वा मां त उपव्रज्य कृत्वा पादाभिवन्दनम् ।
ब्रह्माणमग्रतः कृत्वा पप्रच्छुः को भवानिति ॥ २० ॥
इत्यहं मुनिभिः पृष्टस्तत्त्वजिज्ञासुभिस्तदा ।
यदवोचमहं तेभ्यस्तदुद्धव ! निबोध मे ॥ ॥ २१ ॥
वस्तुनो यद्यनानात्वमात्मनः प्रश्न ईदृशः ।
कथ घटेत वो विप्रा ! [२]वक्तुर्वा मे क आश्रयः ॥ २२ ॥
पञ्चात्मकेषु भूतेषु समानेषु च वस्तुतः ।
को भवानिति वः प्रश्नो वाचारम्भो [३]ह्यनर्थकः ॥ २३ ॥
मनसा वचसा दृष्ट्या गृह्यतेऽन्यैरपीन्द्रियैः ।
अहमेव न मत्तोऽन्यदिति बुध्यध्वमञ्जसा ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

मानो विचारयन्नपि प्रश्नस्य बीजं यदज्ञानादयं प्रश्नस्तन्नाविन्दत् यतः कर्मविक्षिप्तधीः ॥ १८ ॥

प्रश्नस्य पारमुत्तरमभिप्रायो वा तस्य तितीर्षया जिज्ञासया हंसरूपेणेति यथा हंसो नीरं क्षीरं च पृथक्कर्तुं शक्त एवमहं गुणांश्चेतश्चेति द्योतयितुं हंसरूपेण गतोऽस्मीति ॥ १९—२० ॥

इत्यहं मुनिभिः पृष्ट इति पृथक् वाक्यम् यदवोचमिति च पृथक् अतोऽस्मच्छब्दावृत्तिरदोषः तेभ्यो यदवोचं तन्मे वचनं निबोध ॥ २१ ॥

देहादिविविक्तात्मज्ञाने सति तन्निष्ठस्य रागाद्यसंभवात्स्वयमेव विषयचेतसोर्विश्लेषो भवतीति वक्तुं प्रश्नखण्डनमिषेणैव तावदात्मानात्मविवेकमाह । वस्तुन इति त्रिभिः । किमात्मनोऽयं प्रश्नस्तदुपाधेर्भूतसंघस्य वा यद्यात्मनस्तर्हि तस्य वस्तुनः परमार्थरूपस्यानानात्वे सति हे विप्रा ! वो युष्माभिः कृतः प्रश्न ईदृशो बहुषु निर्धारणरूपः कथं घटते वक्तुरुत्तरदातुर्वा मे मम क आश्रयः अविशेषे आत्मनि कं जातिगुणादिविशेषमाश्रित्योत्तरं वक्ष्यामीत्यर्थः ॥ २२ ॥

भूतसंघविषयत्वेऽप्ययं वः प्रश्नो वाचारम्भो वाङ्मात्रेणारब्धः यतोऽनर्थकः कुतः भूतेषु देवमनुष्यादिदेहेषु पञ्चभूतात्मकेष्वतः समानेष्वभिन्नेषु पुनश्च वस्तुतः परमकारणात्मना अभिन्नेषु 'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति श्रुतेः ॥ २३ ॥

तत्र पञ्चात्मकत्वं प्रत्यक्षादिसिद्धमेवेति परमकारणाभेदमेवोपपादयति । मनसेति । मनआदिभिर्यद्गृह्यते तत्तदहमेवेत्यर्थः अञ्जसा तत्त्वविचारेण एतेनैव सर्वात्मकोऽहमित्यञ्जसाप्युत्तरमुक्तं भवति ॥ २४ ॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

तदेवैकान्तिकगतेः प्रश्नकरणमेव । स्वभावतः स्वरसत एव रागादिस्थाविति अनुकूलेषु रागः प्रीतिः आदिना प्रतिकूलेषु द्वेषस्तद्वशात् वासनारूपेण संस्काररूपेण ॥ १७ ॥

यदज्ञानात् यस्यात्मस्वरूपस्याज्ञानात् भवमन्योऽन्यत्यागरूपः प्रश्नः तत् आत्मरूपम् ॥ १८ ॥

सकाशं समीपम् ॥ १९ ॥

कृतपादाभिवन्दनत्वान्नाज्ञानजोऽयं को भवानितिप्रश्नः किन्तु प्रश्नेनैव हंसाभिप्रायज्ञानेन पूर्वप्रश्नोद्धारणार्थः अत एवाग्रे तत्त्वजिज्ञासुभिरित्युक्तम् ॥ २० ॥

अतः पृथग् वाक्यत्वात् ॥ २१ ॥

तदुपाधेः आत्मोपाधेः भूतसंघस्य देहादेः यद्यात्मनः आत्मसम्बन्धी प्रश्नः अनानात्वे एकत्वे सति ॥ २२ ॥

प्रश्नस्य भूतसङ्घातविषयत्वे देहविषयत्वे अनर्थकः विचारे सति अभिधेयशून्यः अतः पञ्चभूतात्मकत्वात् कारणेनाभिन्नत्वे श्रुतिः प्रमाणं वाचारम्भणमिति व्याख्यातं च भगवद्भाष्यकृद्भिः यतो वाचारम्भणं विकारो नामधेयं वाचैव केवलमस्तीत्यारभ्यते विकारो घटः शराव उदञ्चनश्चेति नतु वस्तुवृत्तेन विकारो नाम कश्चिदस्ति नामधेयमात्रमेतदनृतं मृत्तिकेत्येव सत्यमिति एष ब्रह्मणो दृष्टान्तः आम्नातः तत्र श्रुताद्वाचारम्भणशब्दात् दार्ष्टान्तिकेऽपि ब्रह्मव्यतिरेकेण कार्यजातस्याभाव इति गम्यते इति ॥ २३ ॥

तत्र पञ्चात्मकपरमकारणाभेदयोर्मध्ये उपपादयतियुक्त्या साधयति युक्तिश्चात्रार्थापत्तिरूपा मनआदिग्राह्यस्याधिष्ठानाभेदमन्तरा प्रतीत्यनुपपत्त्या कल्पितस्याधिष्ठानाभेदः

(१) प्रश्नपारविनिश्चयम् (२) वक्तुं वा (३) निरर्थकः इति वि० पाठः ।

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी।

कल्प्यते इति यत्तच्छब्दयोर्गम्यत्वादित्यर्थ इत्युक्तम् एतेनैव परमकारणाभेदोपपादनेनैव उत्तरमप्युक्तमित्यर्थपरन्तयः ॥ २४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्।

गुणाश्चेतांसि माविशन्ति शब्दादिगुणाः स्मर्यमाणाः चेतसो नापगच्छन्तीत्यर्थः। अन्योऽन्यसन्त्यागः चेतसा गुणत्यागः गुणैश्चेतस्त्यागः ॥ १७ ॥

प्रश्नबीजं प्रश्नविषयं काव्यस्य बीजमितिवत् ॥ १८—२१ ॥

वस्तुनो यदीति। प्रश्नस्य साक्षादुत्तरमुत्तरत्र वक्ष्यन् प्रथमं प्रश्नं खण्डयन्निव समस्तचिदचिद्वस्तुनि व्याप्तिं दर्शयति तत्र सर्वान्तरात्मानमीश्वरं जानतां ज्ञानिनां केवलमचिन्मात्रदेहमेव पश्यतामज्ञानिनां च नैवं प्रश्नो घटत इत्याभिप्रायः प्रथममीश्वरव्याप्यत्वज्ञानवतां प्रश्नप्रतिवचनानुपपत्तिमाह। वस्तुनो यदीति। कस्यचिदपि वस्तुनः नानात्वं पृथक्त्वं मया विनाभावोऽस्तिचेत् एवं प्रश्नः स्यात् प्रष्टारो भवन्तोऽप्यस्मदविनाभूता मम सर्वजीवशरीरकत्वात् तदा युष्मच्छरीरकोऽहमेव प्रष्टा स्यां शरीरमात्रस्य वक्तृत्वादर्शनात् ततश्च प्रतिवक्तृतयाभिमतो ऽहमेव प्रष्टेत्यत्यन्तमनुपपन्नं मम वक्तुर्वा क आश्रयः को विषयः वक्तव्यस्य सर्वस्य मदात्मकत्वादहमेव वक्तव्यः स्यामतः प्रष्टा प्रतिवक्ता वक्तव्यश्चैक एवेति प्रश्नप्रतिवचने अनुपपन्ने इत्यर्थः॥२२॥

एवं प्रष्टॄणां युष्माकमप्यहमन्तरात्मेत्युक्तं भवति अचेतनं शरीरमेव जानतामपि एवं प्रश्नोऽनुपपन्न इत्याह। पञ्चात्मकेष्विति। अहं तावद्धंसरूपेण प्रत्यक्षः अतो न जातिः प्रष्टव्या। मत्सजातीयानां भूतानां सर्वेषां पाञ्चभौतिकत्वं समानमिति न कारणमपि प्रष्टव्यं तस्मादस्मत्प्रतिवचनरूपवाग्व्यवहारारम्भकं वचः प्रश्नप्रतिवचननिरपेक्षत्वादनर्थकमित्यर्थः ॥ २३ ॥

एवं प्रश्नखण्डनव्याजेनोपदिष्टं समस्तचिदचिद्वस्तुनः स्वान्तरात्मत्वं स्फुटमेवाह। मनसेति। मनसा योगपरिशुद्धेन देहादिव्यावृत्ततया ग्राह्यमात्मस्वरूपं चक्षुरादिभिर्ग्राह्यमचेतनं तत्सर्वं मच्छरीरतया मदात्मकं नतु स्वनिष्ठमतः सर्वान्तरात्माहमेव सर्वशब्दवाच्य इति बुध्यध्वमित्यर्थः ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

प्रश्नमेवाह। गुणेष्विति। गुणेषु शब्दादिविषयेषु चेतः आविशते तेषु भोग्यत्वबुद्ध्या आविष्टं भवतीत्यर्थः। तथा गुणाः स्मर्यमाणाश्चेतस्याविशन्ति ततो नापगच्छन्ति तद्विषयतां न त्यजन्ति इत्यर्थः। अनेनाहमित्यन्यथा बुद्धिरित्यादेर्मोहित इत्यन्तस्योत्तरस्यार्थो निष्कृष्य प्रदर्शितः अन्योऽन्यसन्त्यागः चेतसा गुणत्यागः गुणैश्चेतसस्त्यागः मुमुक्षोः प्रकृतिसम्बन्धस्यानर्थहेतुत्वाध्यवसायेन तस्मान्मोक्तुमिच्छोरत एवात्यन्तं तितीर्षोर्विषयानतिक्रमितुमिच्छोः कथं स्यादित्यर्थः। अनेन रजस्तमोऽभ्यामित्यादिनोक्तस्योपायभूतस्य योगस्य प्रश्न उक्तः ॥ १७ ॥

सनकादीनां प्रश्नस्य ब्रह्मणाप्यविज्ञातप्रतिवचनतामाह। एवमिति। भूतभावनः भूतानि व्यष्टिभूतानि भावयत्युत्पादयतीति तथा अनेन कृत्स्नब्रह्माण्डान्तर्गतभूतसृष्ट्युपयुक्तज्ञानशक्त्यादिसम्पन्नोऽपीत्युक्तं महादेव इत्यनेन सृज्यरुद्रादिभ्योऽप्यतिशयितज्ञानादिसम्पत्त्या दीव्यमानत्वं विवक्षितं प्रश्नबीजं प्रश्नो बीजं कारणं यस्य तत्प्रतिवचनं सत्येव प्रश्ने प्रतिवचनोदयात्तस्य तत्कारणत्वं ध्यायमानः विचारयन्नपि नाभ्यपद्यत नाविन्दत यतः सोऽपि कर्मधीः कर्मणा सङ्कुचितज्ञानः असर्वज्ञ इत्यर्थः ॥ १८ ॥

तर्हि स तेषां प्रश्नः किमप्रतिवचनरहित एवासीदित्यत आह। स मामिति। सः अनभिपन्नप्रश्नबीजो ब्रह्मा प्रश्नपारतितीर्षया प्रश्नस्य पारमुत्तरं तस्य तावदेवानुवृत्तेः तितीर्षा जिज्ञासा तया मां सर्वज्ञमचिन्तयत् हंसरूपेणेत्यनेन यथा हंसः क्षीरं नीरं च पृथक्कर्तुं शक्तः एवमहं गुणांश्चेतश्च समीचीनोपायोपदेशेन पृथक्कर्तुमवतीर्णोऽस्मीति द्योतयितुमित्यवगम्यते। तस्येति। तस्य चिन्तयतो ब्रह्मणः सकाशं समीपगमं गतवानस्मि ॥ १९ ॥

ततः किन्तदाह। दृष्ट्वेति। तदा ते सनकादयः ब्रह्माणमग्रतः कृत्वा मामुपव्रज्य प्रत्युत्थानप्रणामादिभिः उपच्छन्द्य प्रष्टव्यमपृष्ट्वैव तावत्को भवानिति पप्रच्छुरित्यर्थः ॥ २० ॥

तत्र हेतुं वदन् इत्थमापृष्टोऽहं यत्तावदुक्तवानस्मि तद्ब्रवीमि शृणुतेत्याह। इतीति। तावत्तत्त्वजिज्ञासुभिः किं परिदृश्यमानचिदचित्सजातीयस्त्वमुत तद्विलक्षणस्तर्हि के ते वैलक्षण्यावहधर्मा इत्येवं परमात्मयाथात्म्यं ज्ञातुमिच्छद्भिः को भवानिति पृष्टः ॥ २१ ॥

तत्र तावत् सर्वज्ञो हंसरूपी भगवानपृष्टमपि प्रष्टव्यं तदभिप्रायमालक्ष्य प्रतिवक्ष्यंस्तावत्प्रश्नं खण्डयन्निव जिज्ञासितं तत्त्वं निरूपयितुमात्मनः समस्तचिदचिद्व्याप्तिं दर्शयति। वस्तुन इति त्रिभिः। तत्र तावत्सर्वान्तरात्मानमीश्वरं जानतां ज्ञानिनां केवलमचिन्मात्रमेव पश्यतामज्ञानां च नैवं विधः प्रश्नो घटते इत्यभिप्रेत्य प्रथममीश्वरव्याप्तिं जानतां प्रश्नानुपपत्तिमाह। वस्तुन इति। वस्तुनः चिदचिद्वस्तुनः अनानात्वं मदपृथक्सिद्धत्वं तेनात्मायत्तसत्तास्थितिप्रवृत्तित्वं शरीरत्वं चाभिप्रेतं युष्माभिर्यदि ज्ञातमित्यर्थः। तर्ह्यात्मनो मम मद्विषयक इत्यर्थः। ईदृशः को भवानित्येवं विधो वो युष्माकं प्रश्नः हे विप्राः! कथं घटेत अयम्भावः यदि कस्यचिदपि चिदचिद्वस्तुनो मत्पृथक्त्वं तदैवं प्रश्नः स्यात् प्रष्टारो भवन्तोऽप्यस्मदविनाभूताः मम सर्वजीवशरीरकत्वात् तदा युष्मच्छरीरकोऽहमेव पृष्टवानस्मि शरीरमात्रस्य वक्तृत्वादर्शनात् ततश्च प्रतिवक्तृतयाभिमतोऽहमेव प्रष्टेत्यनुपपन्नमिति किञ्च वक्तुर्मे क आश्रयः विषयः वक्तव्यस्य सर्वस्य मदात्मकत्वादहमेव वक्तव्यः स्याम् अतः प्रष्टा प्रतिवक्ता च वक्तव्यश्चैक एवेति प्रश्नप्रतिवचने अनुपपन्ने इत्यर्थः। एवं प्रष्टॄणां युष्माकमप्यहमन्तरात्मेत्युक्तं भवति ॥ २२ ॥

अचेतनं शरीरमेव जानतामप्येवं प्रश्नोऽनुपपन्न इत्याह। पञ्चात्मकेष्विति। अहं तावद्धंसरूपेण प्रत्यक्षः अतो न जातिः प्रष्टव्या मत्सजातीयानां सर्वेषां पाञ्चभौतिकत्वेन समानानां

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सतां न कारणमपि प्रष्टव्यं तस्माद्वाचारम्भः प्रतिवचनरूपवाग्व्यवहारारम्भो वः प्रश्नः प्रतिवचननिरपेक्षत्वादनर्थक इत्यर्थः ॥ २३ ॥

इत्थं प्रश्नखण्डनव्याजेनोपदिष्टं यच्चिदचिद्वस्तुनः सकाशादात्मनो वैलक्षण्यावहं समस्तचिदचिद्वस्तुनः स्वान्तरात्मकत्वं तत्स्फुटमेवाह । मनसेति । मनसा योगपरिशुद्धेनापि मनसा तत्र योगपरिशुद्धेन मनसा देहादिव्यावृत्ततया ग्राह्यमात्मस्वरूपमपरिशुद्धेन तेन चक्षुरादिभिश्च ग्राह्यमचेतनं च तदेतत्सर्वमहमेव शरीरात्मभावनिबन्धनमिदं सामानाधिकरण्यं मच्छरीरतया मदात्मकं नतु स्वनिष्ठमतः सर्वान्तरात्माहमेव सर्वशब्दबुद्धिविषयः न मत्तोऽन्यत् इत्यञ्जसा तत्त्वविचारेण बुध्यध्वम् ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

किं ज्ञानविषयोऽयं प्रश्न इति तत्राह । गुणेष्विति।पुंसां चेतो गुणेषु शब्दादिष्वाविशते गुणाः शब्दादिविषयाश्चेतसि संस्काररूपेण वर्तन्ते तत्र संतितीर्षोः संसारनदीं तर्तुकामस्य मुमुक्षोर्मुक्तियोग्यस्याधिकारिणः कथमन्योऽन्यसंत्यागः विषयेभ्यश्चेतसः आकर्षणं चेतसा विषयाणामाकर्षणं पृथक्करणमित्यर्थः तदुच्यतामितिशेषः ॥ १७ ॥

तत्र ब्रह्मणा किमुक्तमिति तत्राह । एवमिति । प्रश्नो बीजं यस्य सः प्रश्नबीजः तत्परिहारम् अन्यमनस्क इव स्थितत्वादित्याह। कर्मधीरिति । अस्यार्थः गुणानां चेतसश्च कर्मकारणमिति मन्वानः अन्यमनस्कत्वे किङ्कारणमित्यस्येदमेवोत्तरं कर्मणि सर्वकर्तरि हरौ धीर्यस्य कर्मणा हरिणैव परिहारो वक्तव्य इति धीर्यस्य स तथा कर्म भगवन्तमेव ध्यायतीति वा तदेतदुक्तम्—

ब्रह्मा पृष्टस्तु योगीन्द्रैः सनकाद्यैर्मनोगतैः ।
कारणं विषयेष्वद्धा कर्मेति प्रत्यपद्यत ॥
हेतुरन्योऽपि तत्रास्तीत्येवं जानन्नपि प्रभुः ।
विशेषतो मनस्तत्र नाभाज्जानन् हरेः प्रियम् ॥
स्वात्मन्यपरिहारोक्तिस्तदा ह्यासीद्धरेः प्रिया ।
अतः स तत्प्रियं जानन्नाकरोत्तद्विचारणम् ॥
तमेवाचिन्तयद्देवः प्रश्ननिर्णयकारणात् ।
भ्रमतीव मनः क्वापि ब्रह्मणो विष्णुमायया ॥
सर्वज्ञस्यापि यत्रात्मा वक्तुमिच्छञ्जनार्दनः ।
तज्ज्ञात्वा चिन्तितं तस्य चिन्तयत्यमुमेव तु ॥
न स्वयं चिन्तयत्यर्थं स हि तद्भाववित्सदा ।
अन्ये त्वज्ञानसंयुक्ता मोहमीयुर्यथाक्रमम् ॥
तस्य मध्यन्दिने सूर्ये क्षोभवत्क्षोभमात्रकम् ।
नैवाज्ञानं यथा सूर्ये तमो नास्ति कदाचनेति ॥

एतस्मिन्वाक्ये ॥ १८ ॥

नन्वेवं तर्हि सनकादीनां प्रश्नो निरर्थो बालप्रश्नवदिति शङ्कामाभूदिति भावेनाह स मामिति । प्रश्नस्य पारः पूरणं परिहार इति यावत्तस्मिन्निश्चयो यस्य स तथा तम् ॥ १९—२१ ॥

ज्ञानविधुरयोनित्वेन संशयविषयेण स्वेनोक्तार्थं प्रामाण्यजननाय को भवानिति तत्प्रश्नं विघटयति । वस्तुन इति । आत्मनो वस्तुनः परमात्मवस्तुनो भवत्पक्षे यद्यनानात्वमेकत्वं विवक्षितं तर्हि अनानात्वे एकत्वपक्षे को भवानितीदृशः प्रश्नः कथं घटते सिद्धविषयत्वादिति शेषः । हे विप्राः वः प्रश्नो यद्यनेकाश्रयः नानात्वाश्रयः तर्ह्यपि को भवानिति वक्तुं कथं घटते अनेकस्मिन् बहुत्वसंख्याविशिष्टे वस्तुनि एकत्वसंख्याविशिष्टत्वेन वक्तुमनुपपन्नत्वात् ॥ २२ ॥

सिद्धविषयत्वं कथमत्राह । 'पञ्चात्मकेष्विति । देवमनुष्यपितृगन्धर्वासुरभेदेन पञ्चविधेषु भूतेषु जीवेषु हिरण्यगर्भावरत्वाद्यन्यत्वाभावापेक्षया वस्तुतो वस्तुवृत्त्या समानेषु सत्सु ब्रह्मादिवन्दितचरणारविन्दं मामुद्दिश्य को भवानिति वाचारम्भो यस्य स तथा वाचारब्ध इत्यर्थः वः प्रश्नो निरर्थकः निर्विषय इति ॥ २३ ॥

कुतो निरर्थक इति तत्राह । मनसेति । मनआदीन्द्रियैर्यद्गृह्यते तदहं न भवाम्येवेति यस्मात्तस्मान्निर्विषय इत्यन्वयः । नतु त्वमपि त्वत्प्रसादाद्गृह्यसे तस्मात्प्रश्नः कृत इति तत्राह । मत्तोऽन्यदिति नेत्यनुषज्यते अन्यदिति भावनिर्देशः यन्मनआदिभिर्विचार्य मत्तोऽन्यत्वेनैव ज्ञायते तदहं न भवाम्येवेति बुध्यध्वमिति अञ्जसा तत्त्वम् अञ्जसा त्वरिते तत्त्वमित्यभिधानम् विचार्य निर्णीतस्यापि पुनः संशयकार्यं परिकल्प्यात्मसंशयो न कर्तव्यः अतः को भवानिति प्रश्नो नारब्धव्यः किन्तु गुणेष्वाविशते चेत इत्येव प्रश्न आरब्धः इति भावः --

न युष्माकं मयि प्रश्नो घटतेऽयं कथंचन ।
मामृते न हि वन्द्योऽस्ति विरिञ्चेः क्वापि कश्चन ॥
अभिवन्दितपादं मां विरिञ्चेन कथं पुनः—
पृच्छथान्ये समा यस्मादवरास्ते चतुर्मुखात्।
देवा मनुष्याः पितरो गन्धर्वा असुरास्तथा ॥
इति पञ्चात्मकं सर्वं ब्रह्मणस्त्ववरं यतः ॥
यन्मदन्यद्विचारेण गृह्यते तन्न चास्म्यहम् ।
इति जानीध्वमद्धैव मत्प्रसादाद्धि मद्दृशिः ॥
अन्यस्त्वभावतो इत्थं मम प्रेरणयैव तु ।
तस्माद्धिर्विचितार्थे तु प्रश्नारम्भो न मद्गतः ॥

इति समाख्यानबलादुक्त एवार्थो नान्यः स्वकपोलकल्पित इति किञ्च इदं हि विश्वं भगवानिवेतर इत्यतश्च हरेर्जगतो भेदः सिद्ध इति सकलशास्त्राणां मोक्षे हि तात्पर्यं मोक्षश्च प्रकृतिप्राकृतविवेकज्ञानाद्विष्णोः तदुक्तम्—

प्रकृतेर्व्यतिरिक्तो यः पुरुषश्चेति कथ्यते ।
तं विद्वान् परमात्मानं ते यान्ति परमं पदम् ॥
नैतदिच्छन्ति पुरुषमेकं कुरुकुलोद्वह ! ।
बहूनां पुरुषाणां हि यथैका योनिरुच्यते ॥
तथा तं पुरुषं विश्वमाख्यास्यामि गुणाधिकमिति ।

बहुप्रमाणेषु ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

एवमिति—

यावानहं यथाभावो यद्रूपगुणकर्मकः।
तथैव तत्त्वविज्ञानमस्तु ते मदनुग्रहादिति ॥
एतन्मतं समातिष्ठ परमेण समाधिना।
भवान्कल्पविकल्पेषु न विमुह्यति कर्हिचित् इति ॥

ऋषिमाद्यं न बध्नाति पापीयांस्त्वां रजोगुण इतिलब्धभगवद्वरत्वेऽपि न भारती मेऽङ्ग मृषोपलक्ष्यते इत्यादिना व्यञ्जितताहशस्वानुभवत्वेऽपि योऽन्तर्हित इत्यादौ पित्रानुवर्णितरहोत श्रीभगवन्तं प्रति सनकादीनां वाक्यत्वेऽपि च ब्रह्मणः कर्मधीत्वं सम्प्रति स्वमहिमव्यञ्जनाय श्रीभगवदिच्छयैव ज्ञेयं हंसोपनिषदि वाय्वादिशक्तिस्तम्भनंतिहासवत् ॥ १८ ॥

हंसरूपेण गतोऽस्मीत्यभिप्राय इति शेषः ॥ १९–२० ॥

कृतपादाभिवन्दनत्वात्को भवानिति प्रश्नोनाज्ञानजः किन्तु तेनैव तदभिप्रायज्ञानार्थः अत एवाह तत्त्वजिज्ञासुभिरिति ॥२१॥

किं माञ्जीवं ज्ञात्वायं को भवानिति प्रश्नः क्रियते भौतिकदेहं ज्ञात्वा वा किम्वेश्वरं ज्ञात्वेति विकल्पः जीवपक्षं दूषयति आत्मनो जीवरूपस्य वस्तुनो यद्यनानात्वं सर्वस्यापि तस्य चिदेकरूपतया विशेषांशनिर्देशायोग्यत्वं तर्हीदृशः प्रश्नः कथं घटेत यदीति निश्चये तस्मात् हे विप्राः! वो युष्माकं प्रष्टुर्वा वक्तुर्वा मम क आश्रयः युष्माभिः किं जात्यादिविशेषमाश्रित्य क इति प्रयुक्तं मया चोत्तरयितव्यमित्यर्थः ॥ २२ ॥

देहपक्षं दूषयति। पञ्चेति। वस्तुतो वस्तुविचारे सति भूतानां पञ्चात्मकत्वात्को भवानित्येकत्वेन प्रश्नोऽयं नार्थवान् यदि च देहरूपाणां तेषां मिलितत्वेनैकत्वं मन्यध्वे तथाप्यात्मवत्समानत्वात् प्रश्नोऽयं नार्थवान् ननु विदुषामपि व्यवहारोऽयं दृश्यते यतो भवतापि विप्रा इति व इति चोक्तमित्याशङ्क्याह। वाचारम्भ इति वाङ्मात्रेणारभ्यते मद्विधेन तदपोहार्थमेव तदनुवादः क्रियते भवद्भिश्च मद्विधवदितिचेत् ज्ञातमेव तत्त्वं किं पृच्छ्यत इति भावः ॥ २३ ॥

ईश्वरपक्षं दूषयति। मनसेति। मनआदिभिर्यद्गृह्यते तत्सर्वमहमेव कुतः यतो न मत्तोऽन्यत् परमकारणं मां विना तन्नास्त्येवेत्यर्थः। तथापि प्रश्नोऽयं न घटत इति भावः ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

गुणेषु विषयेषु स्वभावतो रागादेव चेतः प्रविशति ते चानुभूता विषयाः चेतसि प्रविशन्ति अतितितीर्षोः विषयानतिक्रमितुमिच्छोः ॥ १७ ॥

महान् देवोऽपि स्वयंभूरपि भूतानां स्रष्टापि ध्यायमानः विचारयन्नपि प्रश्नस्य बीजं यदज्ञानादयं प्रश्नस्तत् शुद्धं स्वरूपार्थं तत्त्वं नाभ्यपद्यत ज्ञातुं नाशक्नोदित्यर्थः। यतः कर्मधीः स्वीयसृष्टिमात्रकर्मासक्तबुद्धिः ॥ १८ ॥

हंसरूपेणेति। यथा हंसो नीरं क्षीरं च पृथक्कर्त्तुं शक्तस्तथाहं गुणांश्चेतश्चेति विवेचयितुमिति भावः ॥ १९—२० ॥

अहन्त्वेश्यः अहन्ता अभिमानस्तस्या ईश्यः स्वामी तन्नियन्ता नतु तन्नियम्यः ईश्य आढ्यो धनी स्वामीत्यमरः ॥ २१ ॥

किं मां जीवं ज्ञात्वा को भवानिति प्रश्नः क्रियते भौतिकदेहं ज्ञात्वा वा परमेश्वरं ज्ञात्वा वेति विकल्प्य प्रथमं जीवपक्षं दूषयति। वस्तुनो वस्तुभूतस्य आत्मनो जीवस्य यदि प्रश्नस्तदा सर्वस्यापि तस्य चित्कणैकरूपतया जातिगुणादिविशेषाभावेन च वस्तुनः खलु नानात्मकस्याप्यनानात्वे सति को भवानिति वः प्रश्नः कथं घटेत वक्तुरुत्तरदातुर्वा क आश्रयः कञ्जातिगुणादिविशेषमाश्रित्यामुकोऽहमित्युत्तरं दास्यामीत्यर्थः ॥ २२ ॥

देहपक्षं दूषयति। पञ्चेति। वस्तुतो वस्तुविचारे सति देहस्थानां भूतानां पञ्चात्मकत्वात् को भवानित्येकत्वेन प्रश्नो न घटते तस्मात्के यूयं पञ्चेत्युच्यतामिति भावः। ननु तेषां पञ्चानां मिलितत्वेनैकत्वं मन्यामहे इत्यत आह। समानेषु सर्वत्रापि मनुष्यादिदेहेषु तेषु पञ्चसु समानेषु सत्सु समानत्वादेव पूर्वोक्तजीववदैक्यात् को भवानिति पुनरपि प्रश्नो न घटते ननु च विदुषामपि प्रश्नोत्तरेष्वेवमेव व्यवहारो दृश्यते यतो भवतापि वो विप्रा इति चोक्तमित्याशङ्क्याह। वाचारम्भ इति मम त्वयं वाचारम्भो ह्यनर्थक एव मया तु वाङ्मात्रेणारभ्यते युष्मत्प्रश्नवदघटमानत्वादनर्थः वचनानुवादरीत्या तथैवास्माभिरपीति चेद्ब्रूध्वे तर्हि यूयमज्ञानिन एव कथं तत्त्वं जिज्ञासध्वे किमत्र न लज्जध्वे इति भावः ॥ २३ ॥

परमेश्वरपक्षं दूषयति। मनसेति। अयमर्थः परमेश्वरान्तराभावान्मम सजातीयभेदो नास्त्येव यच्च मनआदिभिर्गृह्यते तदहमेव नतु मत्तोऽन्यत् मच्छक्तिकार्यत्वादिति विजातीयभेदोऽपि नास्त्यतः को भवानिति प्रश्नो न घटत इति भावः ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

प्रश्नमेवाह। सनकादय ऊचुः गुणेष्विति। गुणेषु विषयेषु अनादितत्संस्कारविशिष्टं चेतो विशति ते गुणाश्च वासनावद्धाश्चेतसि प्रविशन्ति हे प्रभो! जगत्पते अतितितीर्षोः संसारमतिक्रम्य गन्तुमिच्छोर्मुमुक्षोरन्योऽन्यसन्त्यागो विश्लेषः कथं स्यात्तद्ब्रूहीति शेषः ॥ १७ ॥

तदा तेन किमुक्तमित्यत आह श्रीभगवानुवाच। एवमिति। एवमुक्तप्रकारेण पृष्टः महादेवः सर्वदेवाधिपः स्वयम्भूर्भूतभावनः जगत्स्रष्टा ध्यायमानः एकाग्रीभूतोऽचिन्तयत् केन हेतुना एतैः प्रश्नः कृतस्तं प्रश्नबीजं नाभ्यपद्यत न निश्चितवान् तत्कुतः यतः कर्मधीः कर्मसु धीर्यस्य तथाभूतत्वाच्चिन्ताव्याकुलचित्त एवासीदित्यर्थः ॥ १८ ॥

ततः किंवृत्तमित्यपेक्षायामाह। स इति। स देवः ब्रह्मा प्रश्नपारतितीर्षया प्रश्नस्योत्तरं दातुमिच्छया मामचिन्तयत्तदा तस्मिन्काले हंसरूपेण तस्य सकाशमगमं हंसरूपेणाविर्भावे यथा हंसो मिश्रितक्षीरनीरे पृथक्कर्तुं समर्थस्तथाहं गुणचेतसोर्विश्लेषं कर्तुमनेन रूपेणागतोऽस्मीति भावः ॥ १९ ॥

दृष्ट्वेति ततश्च ते ब्रह्मपुत्रा मां दृष्ट्वा समीपमागत्य पादा-

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

भिवन्दनं कृत्वा ब्रह्माणमग्रतः कृत्वा को भवानिति पप्रच्छुः हंसस्य विशिष्टतेजस्त्वादीश्वरभावनया पादाभिवन्दनं चक्रुः अस्मत् पितृवाहनवद्धंसमान ईश्वरो जीवो वेति सन्दिह्य पितृद्वारैव निर्णयो भविष्यतीत्यभिप्रायेण ब्रह्माणमग्रतः कृत्वाभिप्रायः ततस्तच्चिन्तया तूष्णीमासीनं दृष्ट्वा स्वयमेव पप्रच्छुरिति भावः॥२०॥

तदा भवता किमुक्तमित्यत आह। इतीति। यदा तत्त्वजिज्ञासुभिर्मुनिभिरित्युक्तप्रकारेणाहं पृष्टः तदा तेभ्योऽहं यदवोचं तन्मे मत्तो निबोध ॥ ॥ २१ ॥

तत्र तदभिप्रायं जानन् तांश्च परमतत्त्वस्योत्तमाधिकारिणो ज्ञात्वा "एतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो ! सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत अन्तः प्रविष्टः शास्ता जनानां सर्वात्मा—

योऽयं तदा गतो देवसमीपे देवतागणः ।
स त्वमेव जगत्स्रष्टा यतः सर्वगतो भवान् ॥
सर्वं समाप्नोषि ततोऽसि सर्वः ।
सर्वगत्वादनन्तस्य स एवाहमवस्थितः ॥
ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।
भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ॥

इत्यादि श्रुतिस्मृतिप्रतिपादितसर्वचेतनाचेतनवस्तुन आत्मत्वेन सर्वोत्पत्तिलयजीवनहेतुत्वेन सर्वनियन्तृत्वेन सर्वव्यापकत्वेन च सर्वसामानाधिकरण्याहंस्वरूपोऽहमित्युत्तरं दातुं तत्प्रश्नखण्डनपूर्वकं तत्त्वोपदेशेन तान् शिष्यत्वेन स्थापयितुं च प्रश्नस्योत्तरं चेतनाचेतनोभयवस्तुपक्षे निक्षिप्य तस्यासम्भवमाह । वस्तुन इति द्वाभ्याम्। भो विप्रा वः युष्माकमात्मनः आत्मसम्बन्धी ईदृशः बहूनां मध्ये एकस्य निर्धारणरूपः को भवानिति प्रश्नः कथं घटेत सम्भवेत् प्रयुक्त इत्यर्थः । अघटनामेवाह प्रश्नः किञ्चेतनात्मविषयः प्रकृतिकार्यभूतदेवतिर्यङ्मनुष्यरूपभौतिकदेहात्मविषयो वेति विकल्पद्वयेन प्रतिपादयति यदीति। यद्यात्मनश्चेतनस्य तर्हि तस्य वस्तुनः सदैकरसस्य ज्ञानस्वरूपत्वेनाविकारत्वेन चानानात्वे एकजातिमत्त्वे सति । कथं घटेत युक्तः स्यात् वक्तुरुत्तरदातुर्वा मे मम क आश्रयः केतकीपुष्परेणूनामिव विशेषाभावात्कं विशेषमाश्रित्योत्तरं वक्ष्यामीति भावः। चेतनात्मनो जातिमत्त्वं च आचार्यप्रोक्ता या जातिः सा नित्या सा जरामरेति उद्योगपर्वणि सनत्सुजातवचनात् सिद्धम् आचार्येण शिष्यायोपशिष्टा या जातिरात्मत्वजातिः सा नित्या कालत्रयाबाध्या जरामरणरहिता च नित्यो नित्यानां न जायते म्रियते वा नत्वेवाहं जातु नासं नत्वं नेमे "अंशो नानाव्यपदेशादि"त्यादिश्रुतिस्मृतिसूत्रेभ्यः ॥ २२ ॥

द्वितीयपक्षोऽपि न सम्भवतीत्याह। पञ्चेति। देहात्मविषयत्वेऽपि को भवानिति वः प्रश्नो वाचारम्भः केवलवाग्व्यवहारः न तूपपत्तियुक्तः हि यतोऽनर्थकः अनुपपत्तिमाह। भूतेषु देवतिर्यगादिदेहेषु पञ्चात्मकेषु पञ्चमहाभूतकार्येषु सत्सु अतएव समानेषु सत्सु विशेषाभावादित्यर्थः। ननु बहुपुण्यलभ्यक्षुत्पिपासाजराक्लेशादिदोषवर्जितब्रह्मेन्द्रादिदेहानां मनुष्यादिदेहेभ्योऽत्यन्तवैलक्षण्यात् कथं समानत्वमतआह। वस्तुत इति। वस्तुशब्देन—

गौरनाद्यन्तवती जनित्री भूतभाविनी ।
अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः
जनयन्तीं सरूपाः दैवी ह्येषा गुणमयी मम माया दुरत्यया ॥

इत्यादिश्रुतिस्मृतिप्रतिपादितसर्वविकारोपादानभूता भगवच्छक्तिः प्रकृतिरुच्यते "तदनन्यत्वमारम्भणशब्दादिभ्य" इतिसूत्रात्कारणानन्यत्वमेव कार्यस्यातः प्राकृतत्वात्तेषामपि समानत्वमेव तस्माद्वस्तुतो विशेषाभावात्प्रश्नोऽनुपपन्न इत्यर्थः ॥ २३ ॥

एवं केवलचेतनात्मविषये देहात्मविषये च प्रश्नस्यानुपपन्नत्वे सति यद्यपि देहविशिष्टस्य प्रत्यगात्मनोऽपि भेदसम्भवादीश्वरस्य च स्वरूपगुणशक्तिभिरेव सर्ववैलक्षण्यादित्युभयविषयस्य प्रश्नस्यौचित्यं तथापि विविक्तात्मतत्त्वज्ञानस्य सम्प्रदायं प्रवर्तयितुं तेषां तज्जिज्ञासुत्वभावनया हंसे चेश्वरगुरुबुद्धया गुरोः सकाशात्स्वपराजये न क्षतिरिति मत्वा तूष्णीं भूतेषु भगवान् स्वरूपं ज्ञापितवान् इत्याह। मनसेति। मनसा वचसा बुद्धयाऽन्यैरपीन्द्रियैर्यद्गृह्यते तदहमेव मत्तोऽन्यन्नेति यूयमञ्जसा बुध्यध्वमित्यन्वयः मनोवचोदृक्श्रोत्रादिभिरिन्द्रियैर्वैदिकलौकिकसूक्ष्मस्थूलनित्यानित्यैहिकामुष्मिकं यद्गृह्यते तत्सर्वमहमेव सर्वस्य चेतनाचेतनपदार्थस्य मदात्मकत्वान्मद्व्याप्यत्वान्मदधीनत्वादहमेव सर्वं मत्तोन्यत्पृथक्स्थितिप्रवृत्तियोग्यं नास्तीत्यञ्जसा बुध्यध्वं जानीत एवं निरन्तरानुसंधानेन सुखेन मज्ज्ञानं स्यादिति भावः तथा सर्वत्र मद्दृष्ट्या गुणचेतसोर्विश्लेषोऽप्ययत्नत एव स्यादित्यपि ध्वनितं बुध्यध्वमित्यनेन सनकादीनुपलभ्य भगवता सर्वजिज्ञासून्प्रत्युपदिष्टं सनकादीनां तु सदा भगवत्तत्त्वानुसंधानं गुणचेतसोर्ग्रन्थ्यभावात् अतएव प्रश्नेऽपि कथमन्योऽन्यसंत्यागो मुमुक्षोरतितितीर्षोरिति मुमुक्षुपदग्रहणं नत्वस्मत्पदग्रहणं मुमुक्षुत्वं च बद्धस्यैव संभवति तेषां बद्धत्वाभावात् मुमुक्षुत्वाभावः तत्त्वज्ञानोपदेष्टृसंप्रदायप्रवर्त्तनाय भगवदंशावतारत्वात् तदुक्तं द्वितीयस्कन्धे ब्रह्मणावतारवर्णने—

तप्तं तपो विविधलोकसिसृक्षया मे ।
आदौ सनात् स्वतपसः स चतुः सनोऽभूत् ॥
प्राक्कल्पसंप्लवविनष्टमिहात्मतत्त्वम् ।
सम्यग्जगाद मुनयो यदचक्षतात्मन्निति ॥

विष्णुपुराणे च भृग्वाद्युत्पत्तिमुक्त्वा—

सनन्दनादयो ये च पूर्वसृष्टास्तु वेधसा।
न ते लोकेषु सज्जन्ते निरपेक्षाः प्रजासु ते ॥
सर्वे ते चागतज्ञाना वीतरागा विमत्सराः इति ॥ २४ ॥

भाषा टीका।

सनकादयऊचुः हे प्रभो ! ब्रह्माजी गुणों मे चित्त का प्रवेश होता है और गुणों का प्रवेश चित्त मे होता है तब जो संसार से छुटने की इच्छा वाला है उसके चित्त से गुणों का त्याग कैसे होवैगा ॥ १७ ॥

श्रीभगवान् उवाच सब सृष्टि के रचने वाले सब देवों के देव स्वयंभू ब्रह्माजी ऐसे पूछते मात्र ध्यान करने लगे तौ भी कर्मों मे वुद्धि के लगे रहने से प्रश्न के उत्तर को नहीं प्राप्त हो सके ॥ १८ ॥

उस प्रश्न के पार जाने की इच्छा से उन ब्रह्माजी ने

गुणेष्वाविशते चेतो गुणाश्चेतसि च प्रजाः ! ।
जीवस्य देह उभयं गुणाश्चेतो मदात्मनः ॥ २५ ॥
गुणेषु चाविशच्चित्तमभीक्ष्णं गुणसेवया ।
गुणाश्च चित्तप्रभवा मद्रूप उभयं त्यजेत् ॥ २६ ॥
जाग्रत्स्वप्नः सुषुप्तं च गुणतो बुद्धिवृत्तयः ।
तासां विलक्षणो जीवः साक्षित्वेन विनिश्चितः ॥ २७ ॥
यर्हि संसृतिबन्धोऽयमात्मनो गुणवृत्तिदः ।
मयि तुर्ये स्थितो जह्यात्त्यागस्तद्गुणचेतसाम् ॥ २८ ॥

भाषा टीका ।

मेरा चिंतन किया तब हंस के रूप से उस समय उनके पास हम गये ॥ १९ ॥

मेरे को देख कर वे सनकादिक चरणों मे नमस्कार करके ब्रह्माजी को आगे खडे करके पूछते भये कि आप कौन हो ॥ २० ॥

हे उद्धवजी ! तत्वकी जिज्ञासा करने वाले उन मुनियों ने जब मेरे को ऐसे पूछा तब मैने जो उन से कहा तिस बात को तुम सुनो ॥ २१ ॥

हे विप्रो हो ! यदि तुमारे मन मे वस्तु एकही मानी है तब तो एक आत्मा जानने वाले का यह प्रश्न कैसे हो सकता है और कहने वाला मै भी किस आधार से कहूंगा ॥ २२ ॥

यदि सब का सरीर पंचभूत का है तो यथार्थता से बरोबरही हैं तब आप कौन हो यह प्रश्न आप का अनर्थक वाग्जाल मात्रही है ॥ २३ ॥

यदि यथार्थ ज्ञान से देखो तो मैं सब जगत्का शरीरी हूं व्यापक हूं तब मन से वचन से दृष्टि से तथा और भी इन्द्रियों से जो गृहीत होता है सो हम से पृथक् कुछ नहीं है ऐसे सीधा आप लोग समुझ जाओ ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एवं प्रश्नखण्डनमिषेणैवाऽऽत्मस्वरूपं सामान्यतो निरूप्य ब्रह्मणोऽपि दुष्परिहरं यत्पृष्टं तत्रोत्तरमाह । गुणेष्वित्यादिना-ध्यायसमाप्ति । अयमभिप्रायः यदि कर्तृत्वभोक्तृत्वादिरूपतया विषयैः संग्रथितं चित्तं बुद्ध्यादिशब्दवाच्यमेव जीवस्य स्वरूपं भवेत्ततस्तद्वियोगो न घटेत तस्य तु स्वरूपमहंब्रह्मैव चित्ताध्यासेन तु तत्स्वभावतया विषयैः संग्रथितम् अतः स्वस्य ब्रह्मत्वभावनया विषयाणां च मिथ्यात्वानुसन्धानेन सर्वतो निर्विद्य भगवन्तं भजतो भवत्येव परिपूर्णस्वरूपावस्थानमिति हे प्रजाः ! पुत्रकाः सत्यं गुणेषु चेत आविशति गुणाश्च चेतसि एवं गुणाश्चेतश्चोभयं ग्रथितं मदात्मनो ब्रह्मस्वरूपस्य जीवस्य देहोऽध्यस्ते उपाधिर्न तु स्वरूपम् ॥ २५ ॥

तस्मादभीक्ष्णं पुनःपुनर्गुणसेवया तत्संस्कारेण गुणेष्वाविशच्चित्तं ते च पुनर्वासनारूपेण चित्ते प्रकर्षेण भवन्तीति तथा ते गुणाश्चेतश्च एवं यदुभयं तन्मद्रूपः संत्यजेत् ॥ २६ ॥

ननु जाग्रदाद्यवस्थावतः कुतः कूटस्थस्वरूपता तत्राह । जाग्रज्जागरः स्वप्नः सुषुप्तं चेति बुद्धेरेता वृत्तयो न तु जीवस्य ताश्च न स्वाभाविक्यः किंतु —

सत्त्वाज्जागरणं विद्याद्रजसा स्वप्नमादिशेत् ।
प्रस्वापं तमसा जन्तोस्तुरीयं त्रिषु सन्ततमिति ॥

वक्ष्यमाणक्रमेण गुणत एव जीवस्तु विलक्षणस्तदवस्थारहित एव विनिश्चितः कुतः तासां साक्षित्वेन ॥ २७ ॥

ननु तर्हि कथमहं जागर्मीत्यादिप्रतीतिस्तत्राह । यर्हि यस्मात्सम्यक् सृतिः सरणमनयेति संसृतिर्बुद्धिस्तया बन्धोऽयमात्मनो गुणवृत्तीर्ददाति तस्मान्मयि तुर्ये स्थितः सन्निमं संसृतिबन्धं जह्यात् तत्तदा गुणचेतसां गुणानां चेतसश्चान्योऽन्यं त्यागो भवति ॥ २८ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी ।

दुष्परिहरमशक्योत्तरं गुणचित्तयोरन्योऽन्यत्यागः कथमिति यत् पृष्टं तत्र प्रश्ने बुद्ध्यादिशब्दवाच्यं लिङ्गशरीरमेव । ततः चित्तादूयुपाधेर्जीवस्वरूपत्वे तद्वियोगो विषयवियोगः । तस्य जीवस्य । चित्ताध्यासेन चित्तमेवाहमित्यभिमानेन । तत्स्वभावतया चित्तस्वभावत्वात् । चित्तस्य संग्रथितत्वे जीवस्वरूपमपि संग्रथितमिवेत्यर्थः । अतः जीवस्य ब्रह्मस्वरूपत्वात् ॥ २५ ॥

तस्मात् अध्यस्तोपाधित्वात् एवमन्योऽन्यसङ्ग्रथितं यदुभयं तत्पादसंयुक्तान्योऽन्यग्रथिततन्तुद्वयवत् परित्यजेदित्यर्थः ॥२६॥

बुद्धेर्वृत्तयोऽवस्थाविशेषाः तासां बुद्धिवृत्तीनां साक्षित्वेन साक्षाद्द्रष्टृत्वात् यो यद्द्रष्टा स तद्भिन्न इति व्याप्तेर्यथा तरुद्रष्टा तरोर्भिन्न इत्यर्थः ॥ २७ ॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी।

तथा बुद्ध्याध्यस्तया अयमध्यासनिबन्धनो बन्ध आत्मनो जीवस्य गुणवृत्तीर्जाग्रदाद्यवस्थाः आत्मन्यसतीरपि ददाति प्रत्याययति तदा स्वरूपानुसन्धानेनाध्यासपरित्यागकाले स्वत एवाचेतनानां तेषां मिथस्त्यागो भवतीत्यर्थः ॥ २८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

अथ चेतसो गुणानां चान्योऽन्यसन्त्यागः कथमित्याद्यप्रश्नस्य साक्षादुत्तरं वक्तुमारभते । गुणेष्विति । महात्मनः अहमन्तरात्मा यस्येति स महात्मा महात्मकस्य जीवस्य देह उभयं चेतश्च स्मर्यमाणा गुणाश्च भवन्तीत्यर्थः ॥ २५ ॥

स्मर्यमाणतया शब्दादिगुणानां चेतसि प्रतीयमानत्वं विवक्षितं चित्तप्रभवाः पूर्वसंस्कारवशाच्चित्ते प्रकाशमानाः मद्रूप इति सप्तमी मद्रूपे चिन्त्यमाने उभयं त्यजेत् चित्तं गुणांस्त्यजति गुणाश्च चित्तं त्यजन्तीत्यर्थः । कथमन्योऽन्यसन्त्याग इत्युपक्रमवशादयमेवार्थः एवं मद्रूपध्यानं शब्दादिगुणपरित्यागोपाय इत्युक्तम् ॥ २६ ॥

अथ जीवस्य देहाद्विलक्षणत्वानुसन्धानं च गुणपरित्यागोपाय इति वक्ष्यन् जाग्रदाद्यवस्थात्रयस्य प्रकृतिसम्बन्धोपाधिकत्वं प्रपञ्चयति । जाग्रदादिबुद्धिवृत्तयः ॥ २७ ॥

तुरीयेऽवस्थात्रयातीते जीवशरीरके मयि स्थितत्वमेव गुणचेतसामन्योऽन्यत्यागः स्यात् यद्वा गुणचित्तानां त्यागः स्यात्॥२८॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथाभिप्रायमालक्ष्य ब्रह्माणं प्रतिपृष्टं प्रति वक्ति । गुणेष्वित्यादिना । प्रजाः ! हे पुत्राः अहमन्तरात्मा यस्य स महात्मा तस्य देहे देहसम्बन्धे सति चेतो गुणेष्वाविशते ते च तस्मिन्नाविशन्तेऽतो गुणाश्चेतश्चेत्युभयं मिथो न त्यजतीति शेषः इति प्रश्नानुवादः देह इत्यनेन परस्परात्यागो देहसम्बन्धनिमित्त इतिद्योतितम् ॥ २५ ॥

अनूदितं प्रश्नमेवोपपादयति । गुणेषु चेति । सति देहसम्बन्धेऽभीक्ष्णं पुनः पुनः गुणसेवया चित्तं गुणेष्वाविशदाविष्टं भवति चकाराद्गुणाश्च तस्मिन्नाविशन्तो भवन्ति कथं बाह्याभ्यन्तरयोर्गुणचेतसोर्मिथ आवेश इत्यत आह । गुणाश्च चित्तप्रभवा इति । प्रभवत्वमत्र प्रतीयमानत्वं पूर्वसंस्कारवशाच्चित्ते प्रकाशमाना भवन्ति चित्तमपि तत एव तान् विषयीकुर्वदेवावतिष्ठत इत्यर्थः । गुणाः पुनः चित्तप्रभवाः चित्ते प्रकर्षेण भवन्ति ततो नापगच्छन्ति कश्च तर्हि परस्परत्यागोपायः येन देहसम्बन्धोऽपि निवर्तत इत्यत आह । मद्रूपे चिन्त्यमाने सत्युभयं गुणाश्चेतश्चेत्युभयं कर्तृ त्यजेत् अन्योऽन्यमिति कर्मपदमध्याहर्तव्यं चित्तं गुणाँस्त्यजति गुणाश्च चित्तं त्यजन्तीत्यर्थः । कथमन्योऽन्यसन्त्याग इत्युपक्रमवशादयमेवार्थः ॥ २६ ॥

एवमात्मस्वरूपध्यानं शब्दादिगुणपरित्यागोपाय इत्युक्तम् अथ जीवस्य देहाद्विलक्षणत्वानुसन्धानं च गुणपरित्यागोपाय इति विवक्षुस्तावज्जीवस्य प्रकृतिविलक्षणत्वज्ञापनाय तं ततो विविनक्ति । जाग्रदिति । जाग्रच्छब्दस्य कर्तरि शत्रन्तस्य व्युत्पन्नत्वेऽपि तदाश्रितजाग्रदाद्यवस्थायामत्र लक्षणया वृत्तिः जाग्रदादयस्तिस्रोऽवस्था गुणतः प्रकृतिर्गुणेभ्यः सत्त्वादिभ्यः हेतुभ्यः बुद्धेरन्तःकरणस्य वृत्तयः प्रवृत्तयः तद्व्यापारनिमित्ता इत्यर्थः तथाच विविच्य वक्ष्यति--

सत्त्वाज्जागरणं विद्याद्रजसा स्वप्नमादिशेत् ।
प्रस्वापं तमसा जन्तोस्तुरीयं त्रिषु सन्ततमिति ॥

यद्यपि सुषुप्तरन्तःकरणेष्विन्द्रियेषु निर्व्यापारेषु सत्स्वहमहमित्यवभासमात्ररूपत्वान्न तस्या बुद्धिवृत्तित्वं तथापि निर्व्यापारे सत्येवान्तःकरणे मनुष्यत्वब्राह्मणत्वसुखित्वदुःखित्वादिबाह्याभ्यन्तराद्यवभासविधुरकेवलतथाविधोऽवभास इति तावन्मात्रेण तस्माद्वृत्तित्वव्यवहार इति बोध्यम् अनेन जीवस्य जागराद्यवस्थात्रयान्वयः प्रकृतिसंबन्धप्रयुक्तत्वेनौपाधिको न स्वाभाविक इति प्रकृतितत्कार्यतत्सबन्धतत्प्रयुक्तादिभ्योऽतिरिक्तं प्रत्यगात्मस्वरूपमित्युक्तं भवति तदाह । तासां विलक्षण इति । साक्षिविलक्षपदद्वयान्वयाभिप्रायेण तासामित्यपादानस्य शेषत्वविवक्षया षष्ठी ताभ्यो विलक्षण इत्यर्थः । कथं ताभ्यो विलक्षणस्य तदन्वय इत्यत आह । साक्षित्वेन विनिश्चित इति । तासां साक्षित्वेनेति सम्बन्धः साक्षित्वं च साक्षाद्द्रष्टृत्वं तदेवावस्थात्रयान्वयात्मकमिति विलक्षणस्याप्यवस्थात्रयान्वय उपपद्यत इति भावः ॥ २७ ॥

ततः किमत आह । यर्हीति । यर्हि यतोऽयं संसृतिबन्धः देहसम्बन्धरूपसंसारबन्धः आत्मनो जीवस्य गुणवृत्तिदः गुणानां शब्दादिविषयाणां चेतसश्च परस्परावेशेन या वृत्तयः सङ्कल्पविकल्पात्मिकाः ता ददातीति तथा यद्वा आत्मनो मनसः गुणवृत्तिदः गुणेषु शब्दादिषु वृत्तीर्भोग्यतादिबुद्ध्यात्मिकाः ददातीति तथाऽतस्तुर्ये स्वतोऽवस्थात्रयरहिते जीवशरीरके मयि स्थितः मनः परस्यात्मन इत्यस्य प्रथमान्ततया विपरिणामेन कर्तृतयान्वयः मयि स्थित आत्मा मनः जह्यात् गुणवृत्तीस्त्यजेदित्यर्थः प्रकृतिविविक्ते महात्मक स्वभावतोऽवस्थात्रयरहिते जीवस्वरूपेस्थितः तद्याथात्म्यानुसन्धानपर आत्मा गुणवृत्तीर्जह्यादित्यर्थः । ततः गुणवृत्तित्यागाद्गुणचेतसां त्यागः स्यात् परस्परावेशत्यागः स्यात् प्रकृतिविलक्षणमहात्मकजीवस्वरूपयाथात्म्यानुसन्धानेन चेतोवृत्तित्यागस्ततो गुणचेतसां त्यागः ततो देहसम्बन्धत्यागः ततो निरवशेषवैषयिकसुखदुःखनिवृत्तिर्निरतिशयानन्दप्राप्तिश्चेत्युक्तं भवति अवस्थात्रयरहितजीवस्वरूपानुसन्धानेऽप्यात्मनो विशेष्यतयानुसन्धानमपि कार्यमिति द्योतनाय मयीति विशेष्यत्वनिर्देशः जीवस्य परमात्मानं प्रति नियतविशेषणता हि तत्स्वरूपनिरूपणोपयुक्ता ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इदानीं सनकादीनां प्रश्नं परिहरति । गुणेष्वित्यादिना । हे प्रजाः ब्रह्मजत्वेन प्रकृष्टजन्मत्वात्तथा सम्बोधनं वः चेतो गुणेष्वाविशते गुणाश्चेतसीति प्रश्नस्यायं परिहारः मय्येव आत्मा मनः यस्य स इत्यस्योभयपदित्वे एतद्रूपं सिध्यति ॥ २५ ॥

यश्च धातुवद्गुणचित्तभस्मीभावो ज्ञानाग्निनेत्युक्तं तत्र स केन प्रकारेणेदेतीत्यत्राह । गुणेष्विति । अभीक्ष्णं निरन्तरं गुणानां विषयाणां सेवया चित्तं चेतो गुणेषु विषयेष्वाविशदाविष्टं

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कानेषु वर्तन्ते गुणाश्च चित्तप्रभवाः चित्ते प्रभवो येषां ते तथा चित्ते संस्काररूपेण वर्तन्ते हरिस्मरणमतिक्रम्य प्रतीयन्त इत्यर्थः। ततः किमत्राह। मद्रूप इति। तत्र विद्वान्मद्रूपे मम स्वरूपे चेतो गुणाश्चेत्युभयं त्यजेत् इदमुक्तं भवति मनआदीन्द्रियाणि मदन्तर्यामिणि हरौ स्थितानि तदाधाराणि तत्प्रेरितानि विषयेषु वर्तन्ते विषयाश्च विष्णुस्था विष्णवाधारा विष्णुप्रेरिता मम भोगसाधनानीत्ययं विष्णौ गुणादित्याग इति—

विष्णुस्था विषयाः सर्वे विष्णावेव मनो मम।
इति मयपर्यं तत्सर्वं त्यजेत्तत्र बाधतः॥

इति वचनात् मुमुक्षुभिरेवमेव नित्यमनुसन्धेयम् ॥ २६ ॥

नन्वस्य गुणसङ्गस्य स्वाभाविकत्वे पुरुषायुषानन्त्येनापि त्यागो न सुलभ इति तत्राह। जाग्रदिति। जाग्रदाद्यवस्था गुणतो गुणद्वारेण बुद्धिवृत्तयः बुद्ध्या प्रकृत्या वृत्तिर्वर्तनं यासां तास्तथा प्रकृतिगुणसम्बन्धाज्जीवस्य जाग्रदाद्यवस्थावर्तित्वं न स्वाभाविको गुणसङ्ग इत्यर्थः। तात्पर्यमाह। तासामिति। तासां जाग्रदाद्यवस्थानां साक्षित्वेन वर्तमानो जीवः स्वतस्ताभ्यो विलक्षणो विनिश्चित इत्यन्वयः॥ २७॥

नन्वयमस्वाभाविकः स्वत एव निवर्तते न तत्साधनप्रयत्नापेक्षेत्याशङ्क्यां परिहर्तुमुक्तानुवादपूर्वकं तत्साधनं कथयति। यर्हीति। आत्मनो जीवस्यायं संसृतिबन्धः सत्त्वादिगुणप्रवृत्तितः इति यर्हि यस्मात्यस्मात्तुर्ये गुणत्रयातीते मयि स्थितं स बन्धं जह्यात् मदुपासनात्समुद्रेकसमुद्भूतज्ञानाविर्भूतमत्प्रसादेन बन्धं त्यजतीत्यर्थः। कोऽयं बन्धत्यागो नाम येन हेयत्वेन वर्ण्यते इति तत्राह। त्याग इति। विषयारूढबाह्यान्तःकरणत्याग एव बन्धत्यागो नाम नान्यदिति॥ २८॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

नन्वेवं सति गुणाश्चेतश्च मिथः प्रसज्यैव स्थितानि भवन्त्यपि प्रसजन्ति, किमुत जीवे इत्यस्माकं त्रिगुणीभूयैव प्रश्नो जात इत्याशङ्क्य जीवे तेषामस्वाभाविकसम्बन्धं कथयन् स्वस्मिंस्तत्कैमुत्यं दर्शयति। गुणेष्विति। गुणेष्वित्यादिकं सत्यमेव किन्तु जीवस्य तदुभयमपि देह उपाधिमात्रेणैव जीवे सम्बद्धमित्यर्थः यतो मदात्मनः अहमेवात्मा परमांशिरूपो यस्य तस्य मदंशस्य ततो मयि तु तत्सम्बधः सुतरामेव नास्तीत्यर्थः। अयं भावः यथा सूर्यांशानां रश्मीनां सूर्यकार्यभूतेन मेघेन स्वाभाविकसम्बन्धो नास्ति सूर्यस्य तु दूरत एव तद्वार्त्ता तथा जीवानां मम च सम्बन्ध इति ॥ २५॥

तदेवमपि जीवस्तु स्वशक्त्या तान् वियोजयितुं न शक्नोति किन्तु मदभेदोपासनादिलब्धमच्छक्त्यंशेनैवेत्याह। गुणेषु चेति। मद्रूपः मदभेदभावनाविष्टः इति ज्ञानानुसारेणोक्तं भक्तिरूपोपासना चेत् मम रूपं मत्र स ध्यातेति ज्ञेयम् ॥ २६॥

जीवस्य तैः स्वाभाविकसम्बन्धाभावं दर्शयति। जाग्रदिति तैः॥ २७॥

जीवस्य स्वतो ऽशक्तिं दर्शयंस्तदेव द्रढयति। यर्हीति। मयि तुर्ये इति "विराट् हिरण्यगर्भश्च कारणं चेत्युपाधयः। ईशस्य यत्त्रिभिर्हीनं तुरीयं तत्पदं विदु"रिति न्यायेन एतदेव मूलप्रश्नस्योत्तरमित्याह। त्याग इति। ततः स्वत एवाचेतनानां तेषां मिथस्त्यागो भवतीति भावः॥ २८॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

नन्वेवं चेत् सत्यमज्ञानिन एव वयं स्म किन्तु भवानेव चेत् सर्वं तर्हि चेतश्च गुणाश्च त्वमेवातश्चेतो वृत्तिषु विषयाः प्रविष्टा विषयेष्वपि चेतोवृत्तयः प्रविष्टा इत्युभयेषामेषामन्योऽन्यसन्त्यागं भवानेवास्माभिः प्रष्टव्योऽभूत्तः कृपयोत्तरं देहीत्यत आह। गुणेष्विति।हे प्रजाः!हे पुत्रकाः! सत्यं गुणेषु चेत आविशति गुणाश्च चेतसि एवं गुणाश्चेतश्चोभयं मदात्मनश्चिन्मयत्वेन ब्रह्मस्वरूपस्य जीवस्य देह अध्यस्तम् उपाधिरेव नतु स्वरूपम् एवं च चेतसो गुणानां च परस्परसन्त्यागार्थं कथं यतध्वे उभयमेव तदनर्थकारि दूरतस्त्यक्त्वा कथं न निर्द्वन्द्वीभवतेति ध्वनिः॥ २५॥

तदुभयपरस्परसंत्यागश्च दुर्घट एवेत्याह। गुणेष्विति। अनादित एवाभीक्ष्णं गुणसेवया दृढतरेण तत्संस्कारेण गुणेष्वाविशदेव चित्तं वर्त्तते कथं तांस्त्यक्तुं प्रभवत्विति भावः। गुणाश्च पुनः पुनर्वासनारूपेण चित्ते प्रकर्षेण भवन्ति सदा तत्र वर्त्तन्त इति ते गुणाश्च कथं वा तत्त्यक्तुं प्रभवन्त्विति भावः। किञ्च ज्ञानिनां कष्टेन परस्परतदुभयत्याजना च निष्प्रयोजनैव तैरुभयैरपि प्रायः प्रयोजनं तेषां नास्तीत्याह। मद्रूपः मदभेदभावनावेशान्मन्मयः सन् ज्ञानी उभयं त्यजेत् भक्तानां तु मत्सेवामेव परमपुरुषार्थत्वेन निश्चितवतांमद्रूपगुणलीलारसनिमग्नचेतसः सकाशात् स्वत एव गुणा अपयान्तीति न तेषाञ्चेतोगुणयोः परस्परसन्त्यागो दुर्घटो मन्मयीभावस्तु तेषां नेष्ट इति ज्ञेयम्॥ २६॥

वस्तुतस्तु निर्लेपजीवस्य गुणैश्चित्तादिभिश्च सम्बन्ध एव नास्ति मिथ्याध्यासत्याग एव तत्याग उच्यत इत्याह। जाग्रदिति जाग्रत् जागरः—

सत्त्वाज्जागरणं विद्याद्रजसा स्वप्नमादिशेत्।
प्रस्वापं तमसा जन्तोस्तुरीयं त्रिषु सन्ततमिति॥

वक्ष्यमाणगुणात एव हेतोर्बुद्धिवृत्तयः जीवस्तु विलक्षणः स्तत्तदवस्थारहित एव कुतस्तासां साक्षित्वेनैव विनिश्चितः॥ २७॥

किञ्च यद्यपि गुणाः सर्वथैव जीवस्य न भवन्ति तदापि देहाध्यासप्रसादाद्गुणवृत्तीः सः प्राप्नोति ततश्च देहाध्यासमङ्क्त्यैव तान् स त्यजतीत्याह। यर्हि आत्मनो जीवस्यायं देहाध्यासरूपः संसारबन्धोऽभूत्तर्हीव स गुणवृत्तिदः जीवाय नरमै गुणवृत्तिप्रदोऽभूत् यर्हि च मयि तुर्ये स्थितः सन् जह्यात् इमं संसृतिबन्धं त्यजेत् तदा गुणचेतसां गुणानां चेतसश्चान्योऽन्यं स्वत एव त्यागो भवति॥ २८॥

अहंकारकृतं बन्धमात्मनोऽर्थविपर्ययम् ।
विद्वान्निर्विद्य संसारचिन्तां तुर्ये स्थितस्त्यजेत् ॥ २९ ॥
यावन्नानार्थधीः पुंसो न निवर्तेत युक्तिभिः ।
जागर्त्यपि स्वपन्नज्ञः स्वप्ने जागरणं यथा ॥ ३० ॥
असत्त्वादात्मनोऽन्येषां भावानां तत्कृता भिदा ।
गतयो हेतवश्चास्य मृषा स्वप्नदृशो यथा ॥ ३१ ॥
यो जागरे बहिरनुक्षणधर्मिणोऽर्थान् भुङ्क्ते समस्तकरणैर्हृदि तत्सदृक्षान् ।
स्वप्ने सुषुप्त उपसंहरते स एकः स्मृत्यन्वयात्त्रिगुणवृत्तिदृगिन्द्रियेशः ॥३२॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

एवं स्वस्वरूपं निर्दिश्य ब्रह्मणोऽपि यद्दुरूहं पृष्टं तस्योत्तरमाह। गुणेष्वित्यादिभिः। हे प्रजाः! पुत्राः गुणेषु विषयेषु चेतो विशते गुणाश्च चेतसि विशन्तीति सत्यं गुणाश्चेतश्चोभयं मदात्मनो मदंशस्य जीवस्य देहः देहस्य हेतुत्वात् गुणवासनामयं चेत एव जीवस्य विविधदेहधारणे हेतुरित्यर्थः ॥ २५ ॥

कथं तर्हि तत्त्यागस्तत्राह। गुणेषु चेति। चित्तमभीक्ष्णं गुणसेवया पुनः पुनस्तत्संस्कारेण गुणेषु आविशत् गुणाश्च चित्तप्रभवा अभीक्ष्णं तद्वासनायुक्ताच्चित्तात्प्रकर्षेण भवन्त्युत्पद्यन्ते तथा यद्यपि परस्परं ग्रथितमेतदुभयं तथापि जीवो मद्रूपः सन् त्यजेत् अहं सच्चित्स्वरूपो भगवदात्मकः सदा निर्विकारः गुणचेतसी मम स्वरूपनिबन्धने न भवतः किन्त्वनित्ये इति भगवत्स्वरूपवद्गुणादिवैलक्षण्यज्ञानवान् सन् त्यजेदित्यर्थः "धर्मो नित्यः सुखदुःखे त्वनित्ये जीवो नित्यो हेतुरस्याप्यनित्य" इति भारते व्यासवचनात् ॥ २६ ॥

ननु जाग्रदाद्यवस्थावतो जीवस्य कुतो निर्विकारत्वं कुतो वा गुणादिवैलक्षण्यमिति चेत्तत्राह। जाग्रदिति। जाग्रदाद्यवस्था गुणतो गुणैः सत्त्वादिभिर्हेतुभूतैर्बुद्धिवृत्तयो भवन्ति नतु जीवस्वरूपे स्वतो भवन्ति यतो जीवस्तासां वृत्तीनां साक्षित्वेन साक्षाद्द्रष्टृत्वेन विनिश्चितः विवेकिभिरितिशेषः अहं स्वप्नानद्राक्षं सुखमहमस्वाप्सं न किञ्चिदवेदिषमित्यादिप्रत्यभिज्ञानात् तस्मात्ताभ्यो ऽवस्थाभ्यो विलक्षणो जीवः ॥ २७ ॥

ननु यद्येवमवस्थाविलक्षण एव जीवस्तर्हि अहमस्वाप्समहं जागर्मीत्याद्यवस्थावत्त्वप्रतीतिः कथं कदा वा तद्राहित्यमिति चेत्तत्राह। यर्हीति। संसरणेनानात्मन्यात्मानं बध्नातीति संसृतिबन्धोऽहङ्कारः स आत्मनो गुणवृत्तिदः आत्मनो जीवस्य गुणकार्यवृत्तीः स्वप्नाद्यवस्था ददातीति तथा तस्मादयं जीवात्मा तुर्ये मयि अवस्थात्रयातीते मयि वर्त्तमाने तुर्ये शुद्धस्वरूपे जीवेऽवस्थितस्तुष्टः तुरीयस्वरूपानुसन्धानवानिति यावत् यर्हि यदा जह्यात् तं संसृतिबन्धनमहङ्कारं त्यजेत् तस्मिन् काले गुणचेतसां त्यागः गुणानां चेतसश्च त्यागो विश्लेषो भवेत् ॥ २८ ॥

भाषा टीका ।

हे पुत्रो हो! गुणों मे चित्त प्रविष्ट होता है चित्त मे गुण प्रविष्ट होते हैं हमारा शरीर भूत जो आत्मा है तिसके देह मे गुण चित्त ए दोनों विद्य मान हैं ॥ २५ ॥

निरन्तर गुणों की सेवा करने से चित्त गुणों मे प्रविष्ट होता है चित्तकी वासनाओं से गुण भी चित्तमे प्रविष्ट होते हैं जिसका चित्त मेरे रूप मे आसक्त होजाता है वह इन दोनों को छोड देता है ॥ २६ ॥

जाग्रत् स्वप्न सुषुप्ति ए तीनों वृत्ति जीव के त्रिगुणों से होती हैं और जीव तो इन का साक्षी होने से इन अवस्थाओं से भिन्न ही है यह निश्चित है २७ ॥

जब पर्यन्त यह बुद्धि गुणों की वृत्तियों से युक्त है तब पर्यन्त यह संसार बन्ध है जब मेरे शरीर तुर्य रूप जीव मे मनको युक्त करै तब तो उन वृत्तियों के छूटने से चित्त तथा गुण दोनों का वियोग होजाता है ॥ २८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

कथं संसृत्या बन्धः कथं च तं जह्यात्तदाह। अहंकारेण कृतं बन्धमात्मनोऽर्थविपर्ययमानन्दाद्यावरणेनानर्थहेतुं विद्वान् जानन् सन्निर्विद्य दुःखमेतदिति ज्ञात्वा तुर्ये स्थितो भूत्वा संसारचिन्तां संसारोऽबुद्धिस्तस्मिंश्चिन्तामभिमानं तत्कृतां भोगचिन्तां च त्यजेदिति ॥ २९ ॥

यावदेव न त्यजेत्तावत्तस्य कर्मज्ञानादिसर्वं व्यर्थमित्याह। यावदिति। यद्यपि जागर्ति कर्मादिषु तथाऽपि स्वपन्स्वप्नान्पश्यन्निव भवति यतोऽज्ञः असम्यग्दर्शी अज्ञजागरस्य स्वप्नत्वे दृष्टान्तः स्वप्न इति ॥ ३० ॥

ननु कथं वेदप्रमितवर्णाश्रमकर्मादिनानार्थधीर्निवर्तेत तत्राऽऽह। असत्त्वादिति। भावानां देहादीनां तत्कृता भिदा वर्णाश्रमादिरूपा गतयः स्वर्गादिफलानि हेतवः कर्माणि चास्याऽऽत्मनो मृषा अविद्यावद्विषयो वेद इति भावः ॥ ३१ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

युक्तिभिरित्युक्तं ता युक्तीराह । य इति । सर्वान्स्थूलान्देहादीन्समस्तकरणैश्चक्षुरादिभिर्भुङ्क्ते कथंभूतान् अनुक्षणधर्मिणः क्षणिकबाल्यतारुण्यादिधर्मवतो यश्च स्वप्ने हृदि जागरदृष्टसदृशान्वासनामयान्भुङ्क्ते यश्च सुषुप्ते तान् सर्वानुपसंहरति स एकः कुतः त्रिगुणवृत्तिदृगवस्थात्रयद्रष्टा ननु जाग्रदवस्थां सर्वेन्द्रियाणि पश्यन्ति स्वप्नं मनः सुषुप्तिं तत्संस्कारशेषा बुद्धिः कथमात्मा तद्द्रष्टा तत्राऽऽह । इन्द्रियेशः ननु इन्द्रियेशा अपि विश्वतैजसप्राज्ञा भिन्नाः न कुतः स्मृत्या प्रतिसंधानेन सर्वावस्थास्वन्वयात् यः स्वप्नानद्राक्षं यश्च तदनन्तरं न किंचिदवेदिषं स एवेतर्हि जागर्मीत्युपाधिभेदेन विश्वादिव्यवहार इति भावः । एतेन बाल्ययुवाद्यवस्थास्वपि प्रतिसन्धानेनाऽऽत्मैक्यं द्रष्टव्यम् ॥ ३२ ॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

तं बन्धं संसारे बुद्धौ चिन्तामध्यासमभिमानं श्लेषेण बुद्ध्याऽध्यस्तया चिन्तां भोगचिन्तां तथाच तत्कृतां भोगचिन्तामिति व्याख्यातम् ॥ २९ ॥

एवं निर्वेदप्रकारेण यावदभिमानकृतनानात्वं न त्यजेत् युक्तिभिर्यो जागर इत्यत्र वक्ष्यमाणाभिः ॥ ३० ॥

शङ्कते । नन्विति । वेदप्रमिता वेदप्रमाणज्ञापिता वर्णाश्रमकर्मादिरूपा नानाधीर्भेदबुद्धिः कथं निवर्त्तेत आदिना फलग्रहः आत्मनोऽन्येषाम् आत्मव्यतिरिक्तानां भावानां देहादीनामसत्त्वान्मिथ्यात्वात् तत्कृता देहादिकृता भिदा वर्णाश्रमादिरूपो भेदः एवं गतयः स्वर्गादिफलानि हेतवस्तत्साधनानि कर्माणि च अस्यात्मनः सम्बन्धे मृषैव स्वप्नद्रष्टुः स्वप्ने दृश्यमानराजादिभेदवत् नन्वष्टवर्षं ब्राह्मणमुपनयीत स्वाराज्यकामो राजा राजसूयेन यजेतेत्यादिभेदप्रतिपादकवेदस्य का गतिरिति चेत्तत्राहाविद्यावद्विषय इति । अविद्या स्वरूपाज्ञानं तद्वन्त एव विषया अधिकारिणो यस्य तादृशो वेदः तथाच त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुनेतिवदात्मानुभविनो न तत्राधिकार इत्यर्थः ॥ ३१ ॥

देहादीनित्यादिना गेहपुत्रादिपरिग्रहः वासनामयान् सूक्ष्मान् तान् सर्वान् स्थूलान् सूक्ष्मांश्च सर्वान् विषयानुपसंहरते अज्ञाने लीनान् करोति न पश्यतीत्यर्थः । तत्संस्कारशेषा तस्यावस्थाद्वयस्य संस्कारः शेषो यस्यां सा तथा इन्द्रियेशः बहिरिन्द्रियाणामन्तरिन्द्रिययोर्मनोबुद्ध्योश्चेशः स्मृत्यान्वयं दर्शयति । यश्चेति अनुस्मृत्यनुभूत्योस्सामानाधिकरण्यात् योऽहं स्वप्नसुषुप्त्योर्द्रष्टाऽभवं स एवाहमिदानीं जागर्मीत्येकस्यैव स्मृत्या सर्वावस्थान्वयान्न विश्वादयो भिन्नाः किन्तु विशेषणभेदेन विश्वादिव्यवहार औपाधिक एव न वास्तव इत्यर्थः । एतेन जाग्रदाद्यवस्थासु स्मृत्यात्मन ऐक्येन बालयुवाद्यवस्थास्विति योऽहं बाल्ये क्रीडासक्तो यश्च तारुण्ये तरुणीसक्तः स एवाहमिदानीं वृद्धोऽस्मीति स्मृत्यात्मैक्यं द्रष्टव्यमित्यर्थः ॥ ३२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

अर्थविपर्ययम् अस्वे स्वमिति बुद्धिरूपं ममकारम् अहङ्कारानन्तरं पठितत्वात् प्रयोजनं विघातं वा निर्विद्येत्युक्तत्वात् तुर्ये स्थितः इति अवस्थात्रयातीतपरिशुद्धजीवात्मस्वरूपानुसन्धाता ॥ २९ ॥

नानार्थधीर्देवमनुष्याद्यभिमानबुद्धिः युक्तिभिः देहात्मभेदप्रतिपादकयुक्तिभिः यद्यपि जागर्ति तथापि स्वपन् स्वपिति जाग्रद्दशायामप्ययं इत्यर्थः । भ्रान्तिदशायामेव जागराभिमाने दृष्टान्तमाह । स्वप्न इति ॥ ३० ॥

भावानां देवमनुष्याद्याकाराणामात्मन्यसत्त्वात् किं कृता भिदा देवादिभेदः किं कृत इत्यर्थः । तत्कृतेति पाठे देवादिशरीरकृतो भेदः गतयस्तद्बुद्धयः तद्धेतवो दोषाश्च मृषा स्वप्नज्ञानादय इव विनाशिन इत्यर्थः ॥ ३१ ॥

अनुक्षणधर्मिणः प्रतिक्षणपरिणामिनः समस्तकरणैः अपास्तोपरतबाह्यकरणैः सुप्तः सुषुप्तःविषयाश्रामिति शेषः स एकः अवस्थात्रयेऽप्येकः अन्वयात्प्रत्यभिज्ञानादित्यर्थः त्रिगुणवृत्तिदृक् गुणत्रयकलुषज्ञानः ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथ तुर्ये स्थित इत्यनेन यथावस्थितस्वात्मपरमात्मयाथात्म्यानुसन्धानविधुरस्यानादिदेहात्माभिमानस्वतन्त्रात्माभिमानप्रयुक्तो देहसम्बन्धात्मको बन्धस्ततश्च गुणचेतसां परस्परावेश इति सूचितं तत्स्फुटमेवाह । अहङ्कारकृतमिति । अहङ्कारो ज्ञानैकस्वरूपे आत्मनि देवत्वमनुष्यत्वादिभेदाभिमानरूपः स्वतन्त्रत्वाभिमानरूपश्च तेनानादिना कृतमात्मनो बन्धमर्थविपर्ययमर्थस्य परमपुरुषार्थस्य विपर्ययो विघातो यस्मात्तथाभूतं विद्वान् जानन्निर्विद्य संसारबन्धनादिति शेषः । तुर्ये स्थितः अस्य पूर्ववदर्थः संसारचिन्तां संसृतिबन्धात्कथं मुच्येयमिति चिन्तां त्यजेत् ॥ २९ ॥

अहङ्कारस्य सर्वानर्थनिदानतामाह । यावदिति । नानार्थधीः देवत्वमनुष्यत्वाद्यभिमानबुद्धिः युक्तिभिर्देहात्मभेदप्रतिपादकयुक्तिभिः यावन्न निवर्तेत तावज्जागर्त्यपि यद्यपि जागर्ति तथाप्ययं स्वपन्निति जाग्रद्दशायामपि सुप्त इवायं इत्यर्थः भ्रान्तिदशायामेव जागराभिमाने दृष्टान्तमाह । स्वप्ने जागरणं यथेति । नहि स्वप्नं प्रपश्यन् तं स्वप्नमिति जानाति किन्तु जागरमेवाभिमन्यते एवमज्ञानेन देहमात्मत्वेन पश्यन्न तद्भ्रमात्मकमिति जानाति किन्तु यथार्थमेवेति अतो यावद्देहविलक्षणमात्मानं यथावन्न जानाति तावन्निपुणोऽप्ययं एवात्रानर्थ इति भावः ॥ ३० ॥

ननु तुर्यस्थितिमात्रेण कथमनादिकालानुवृत्ताहङ्कारादित्याग इत्यत आह । असत्त्वादिति । आत्मनः सततं ज्ञानैकरूपस्यान्येषां भावानां देवमनुष्याद्याकाराणामौपाधिकत्वेन नित्यमस-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

त्वादभावात् मुक्तात्मस्वदर्शनादिति भावः । तत्कृता भिदा देवादिशरीरकृतो बालत्वयुवत्वब्राह्मणत्वादिभेद गतयस्तद्धेतवः तदन्ये इतरे दोषाश्च कर्मवश्यत्वादयो मृषाभूता इवानित्या इत्यर्थः । मृषाभूतस्य हि शुक्तिरजतादेरधिष्ठानासाधारणाकाराग्रहणप्रयुक्तप्रतीतेस्तद्ग्रहणरूपनिवृत्तिसामग्रीसमवधाने सति निवृत्तिदर्शनादनित्यत्वं तद्वदहङ्कारप्रयुक्तानां देवाद्याकारतत्कृतभेदतद्धेतुभूतदोषाणामनादित्वेऽपि मुक्तात्मस्वदर्शनेनात्मतत्त्वनिश्चयादनित्यत्वात् अनित्यानां विनाशसामग्रीसमवधाने सति विनाशदर्शनात्तुर्यास्थितिमात्रेण तत्त्यागः सम्भवतीति भावः । यद्वा देवाद्याकाराणामात्मनोऽसत्त्वात्तेषां प्रकृतिपरिणामरूपत्वेनातद्गतत्वादात्मस्वरूपेऽभावात्तत्कृतभेदादयो मृषा आत्मस्वरूपे न सन्ति असतां च कथञ्चिदन्यत्र प्रतीयमानानां प्रतीतिमूलभूतदोषनिवृत्तौ निवृत्तिर्दृष्टा यथा परमार्थभूताङ्गुलप्रष्टम्भजतिमिरादिनिवृत्तौ चन्द्रे द्वित्वनिवृत्तिः यथा पित्तोपहतचक्षुषः सम्यक्चिकित्सया पित्तोपहतौ तन्निमित्तस्य शङ्खगततया प्रतीतस्य पीतिम्नो निवृत्तिः तद्वत्तुरीयस्थित्यात्मकसमीचीनोपायेन निरवशेषमहङ्कारनिवृत्तौ तत्प्रयुक्तदेवाद्याकारतत्कृतभेदादिविनिवृत्तिः निरवशेषमहङ्कारनिवृत्तिश्च मुक्तिदशायामेव ब्रह्मविदामप्युपायदशायां तिमिरापित्तादिसद्भावदशायां द्वित्वपीतिमादिरिवाहङ्कारस्यानुवृत्तिदर्शनात् देवाद्याकारतत्कृतभेदादीनां मिथ्यात्वमभ्युपेयत इति न भ्रमितव्यम् अन्यत्र सतां ततोऽन्यत्र तेषां मिथ्यात्वेऽपि स्वाश्रये सत्यत्वात् यद्वा आत्मन इति पञ्चम्यन्तं ज्ञानैकस्वरूपस्वभावादात्मनोऽन्येषां भावानामसत्त्वादसच्छब्दवाच्याचेतनकार्यत्वात्तत्कृता भेदादयः गतीनामसत्त्वं प्रकृतिपरिणामात्मकान्तःकरणव्यापारत्वेनेत्यवगन्तव्यं मृषा आत्मस्वरूपे मिथ्या न सन्तीत्यर्थः । अतो निवर्त्तन्ते इतिभावः । यथा स्वप्नदृशः स्वप्नदर्शनानि सम्यक्प्रबोधेन निवर्तन्ते तद्भेदादयोऽप्यामोक्षानुवृत्तां तुर्यस्थित्या निवर्तन्त इत्यर्थः ॥ ३१ ॥

तदेवं सत्त्वरजस्तमोगुणनिमित्तजागराद्यवस्थारूपबुद्धिवृत्तिसाक्षित्वेऽपि वस्तुतस्तदन्वयरहितस्य जीवस्वरूपस्य ब्रह्मात्मकत्वेनोपासनमपि गुणचेतसां भिथस्त्यागहेतुरिति सूचितं तदेव स्फुटमाह । य इति त्रिभिः । यो जीवः । जागरे समस्तैः करणैरिन्द्रियैरनुक्षणः प्रतिक्षणपरिणामात्मको धर्मः स्वभावो येषामस्ति इति तथा तानर्थान् शब्दादिविषयान् भुङ्क्ते शब्दादिविषयाणां हि—

तदेव प्रीतये भूत्वा पुनर्दुःखाय जायते ।
तदेव कोपाय यतः प्रसादाय च जायते ॥

इत्युक्तरीत्या सुखदुःखाद्यापादनरूपानुक्षणधर्मित्वं यतश्च स्वप्ने तत् सदृशान् जागरावस्थानुभुक्तविषयसमानान् स्वप्नद्रष्टृकानुभाव्यत्वतत्कालमात्रावस्थायित्ववैधर्म्यसद्भावात्तत्सदृशानित्युक्तं साधर्म्यस्य वैधर्म्यगर्भत्वादन्यथा तत्तदेव स्यादिति न साम्यम् अर्थान् भुङ्क्ते इत्यनुषज्यते अथ यः स्वप्ने सुषुप्तौ उपसंहरते विषयभोगानिति शेषः स एकः एकरूपः ज्ञानैकस्वरूपस्वभाव इत्यर्थः । यद्वा सः अवस्थात्रयान्वयी जीवः एक एव नतु प्रत्यवस्थं भिन्नः अनेन 'स एव तु कर्मानुस्मृतिशब्दविधिभ्यः' इत्यधिकरणपूर्वपक्षनिरासः तत्र हि किं सुप्त एव पुनर्जागरसमये उत्तिष्ठति उतान्य इति संशय्य तस्य सकलोपाधिविनिर्मुक्तस्य ब्रह्मणि सम्पन्नस्य मुक्तादविलक्षणत्वेन प्राचीनशरीरेन्द्रियसम्बन्धाभावादन्य एवेत्याशङ्कनम् एकस्य हेतुः । स्मृत्यन्वयादीन । स्मृतिरनुस्मृतिः प्रत्यभिज्ञा प्रत्यभिज्ञानादित्यर्थः स्मृतिग्रहणं कर्मशब्दविधीनामप्युपलक्षणं तत्र स्मृतिं एवाह सुप्तः स एव प्रतिबुद्धोऽस्मीत्येवरूपा कर्म तु सुषुप्तेन पूर्वकृतं पुण्यपापरूपं तत्त्वज्ञानात्प्राक् तेनैव भोक्तव्यं शब्दोऽपि सुप्तः प्रबुद्धः स एवेति दर्शयति "त इह व्याघ्रो वा सिंहो वे"त्यादिना यद्यद्भवन्ति तथा भवन्तीत्यनेन विधयश्च मोक्षार्थाः सुषुप्तस्य मुक्तत्वेऽनर्थकाः स्युरिति तदधिकरणसिद्धान्तार्थहेतवः । त्रिगुणवृत्तिदृक् त्रिगुणवृत्तीनां जागरादीनां द्रष्टा तत्र हेतुरिन्द्रियेशः कर्मनिमित्तप्राकृतेन्द्रियप्रवर्तनवान् इत्यर्थः ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

नन्वनेनोपायेन गुणनिमित्तबन्धत्यागोऽस्तु अहङ्कारनिमित्तबन्धत्यागस्य क उपाय इतिमन्दाशङ्कामहङ्कारकृतबन्धोऽपि गुणहेतुक एवेत्येकएव नामान्तरेणोच्यते उपायोऽप्ययमेवेत्याशयेन परिहरति । अहङ्कारकृतमिति । अस्वरूपेऽप्यहङ्कारममकाराभ्यां रजोगुणोत्कर्षिताभ्यां कृतमिमं बन्धमात्मनो जीवस्यार्थविपर्ययं दुःखलक्षणमर्थं विद्वान् निर्विद्यानित्यासारता बुद्धिं कृत्वा तुर्ये भगवति स्थितः संसारचिन्तां त्यजेदित्यन्वयः ॥ २९ ॥

ननु कियन्तं कालं संसारानुवृत्तिरत्राह । यावदिति । हरेः स्वातन्त्र्यादियुक्तिभिर्जीवस्यास्वातन्त्र्यादियुक्तिभिरनयोर्जीवपरयोरेकत्वबुद्धिः एकस्य हरेर्भिन्नत्वबुद्धिरिति नानार्थधीर्मिथ्याज्ञानं यावन्न निवर्तेत तावदसौ जाग्रत्यपि स्वपन् निद्रालुरज्ञः संसार्येव स्वप्ने जागरणं यथा जाग्रत्त्वबुद्धिः—

भिन्नस्य त्वेकभावेन तथैकस्य च भेदतः ।
ज्ञानं नानार्थधीः प्रोक्ता नानात्वादर्थतद्धियोरिति

वचनात् उक्त एवार्थो नान्य इति ॥ ३० ॥

अभेदज्ञानस्य श्रुतियुक्तिसिद्धत्वात्तस्यैव मुक्तिहेतुत्वात्तस्य च ग्राह्यत्वाच्चेतनाद्भिन्नस्य जडस्य तदेकत्वकल्पनमद्वितीयस्यात्मनो भेदकल्पनं नानार्थधीरित्यर्थकल्पनोपपत्तेरुक्तज्ञानस्यात्मेतरस्य मिथ्यात्वेन सर्वस्योपपत्तेरिति तत्राह । असत्त्वादिति । आत्मनो ज्ञानादिगुणपूर्णस्य हरेरन्येषां भावानां ब्रह्मादिसर्वपदार्थानामसत्त्वादशक्तत्वात्तेषां सर्वशक्तिमता हरिणा अभिदा किं कृत्वा कया युक्त्या केन मानेन वा कृता सिद्धा केनापि न सिद्धेत्यर्थः । तत्त्वमस्यात्माद्वितीयः बीभत्वादित्यादिमानसद्भावादत्राह । गतय इति । गमयन्त्यवगमयन्त्यभीष्टमर्थमिति गतयो वचनानि हेतवो लिङ्गज्ञानानि चास्याभिमतानि मृषा न साधकानि स्वप्नदृशो यथा स्वप्नस्य जाग्रत्त्वज्ञानानि यथा अविद्यमानानि न स्वाभीष्टसाधकानि स्वमतरीत्या चैवमित्यभिप्रायः—

अभिदा किंकृतैतेषां भावानां परमेश्वरे ।
यतो सत्त्वमशक्तत्वाद्भावानां तस्य शक्तता ॥
ततः सत्त्वं साधुभावः सत्त्वमित्युच्यते बुधैः ।
साधुभावश्च शक्तस्य ततोऽन्या साधुता कुतः ।
अभेदे जगतो विष्णोर्या वाचो ये च हेतवः ॥
स्वप्नजाग्रत्कल्पनवत्सर्वे ते भ्रमदर्शिनः ।

इतिवचनात् ॥ ३१ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

ननु परमात्मभेदस्याप्राप्तत्वेन तद्भेदस्य भ्रमत्वं कथमापाद्यत इत्याशङ्क्य प्राप्तिमापाद्य प्रतिषेधति। यो जागर इति। यो जीवस्य दक्षिणाक्षिस्थितो विश्वाख्यो हरिर्जागरे जाग्रदवस्थायां क्षणधर्मिणः क्षणकालवर्तित्वलक्षणधर्मवतो बहुविधानर्थान् भुङ्क्ते अस्वतन्त्रजीवस्य दर्शयति स्वप्ने च कण्ठस्थः समस्तकरणः सम्यग्वशीकृतेन्द्रियः तैजसाख्यो विष्णुः हृदि मनसि संस्काररूपेण स्थितांस्तत्सदृशान् जाग्रदर्थसदृशान् पदार्थान् जीवस्य दर्शयति। यश्च सुप्ते सुप्त्यवस्थायां हृदि स्थितः प्राज्ञाख्यः परः उपसंहरते इन्द्रियाणीति शेषः विषयेभ्य इन्द्रियाण्याहृत्य जीवानन्दं पश्यति तञ्च स्वरूपानन्दं भोजयति स्वयं च विहितानन्दं भुङ्क्ते स विश्वादित्रिरूपः एकः भेदरहितः कुत इति तत्राह। स्मृत्यन्वयादिति। स्मृतीत्युपलक्षणं श्रुतिस्मृतिमानेभ्य इत्यर्थः भुङ्क्ते इत्यस्यानुभवतीत्यर्थं परित्यज्य दर्शयति इत्यर्थकथने कान्तयामकमत्राह। त्रिगुणेति त्रिगुणवृत्तीः जाग्रत्स्वप्नसुषुप्तीः पश्यतीति त्रिगुणवृत्तिदृक्—

दक्षिणाक्षिस्थितो विष्णुर्भुङ्क्तेऽर्थान् जाग्रति स्थितान्।
कण्ठसंस्थस्तथा स्वप्नान् जीवानन्दं च सुप्तिगः॥
श्रुत्यन्वयात्स्मृतिभ्यश्च स एकः परमेश्वरः।
अस्वतन्त्रस्य जीवस्य स्वतन्त्रो जाग्रदादिदः॥
स्वयं स्वप्नादिहीनः सन् क्रीडते पुरुषोत्तम इति।

स्वप्ने शारीरमभिप्रहत्यासुप्तः सुप्तानभिचाकशीतीत्यादिश्रुतिस्मृतिभ्य उक्त एवार्थः अत्र हरेः साक्षित्वं सुखैकभोक्तृत्वं च तात्पर्यार्थः नत्वनानन्दानुभवस्तदधीनत्वात् कुत इति तत्राह। इन्द्रियेश इति। इन्द्रियप्रवृत्तिसमर्थस्य तद्भोग्यदुःखानुभवस्यानुचितत्वात् अनेन तुर्यस्य विश्वाद्येकत्वमुक्तं भवति॥ ३२॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

पुनर्विशिष्य तस्यागमेव शिक्षयति। अहमिति। तुर्यं मय्येवेति ज्ञेयम्॥ २९—३२॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

उक्तमेवार्थं स्पष्टयन्नाश्वासयति। अहंकारेण देहे अहम्बुद्ध्यैव कृतम्बन्धं विद्वान् जानन् कीदृशम् आत्मनोऽर्थविपर्ययं आनन्दाद्यावरणेनानर्थहेतुं निर्विद्य तं त्यक्त्वा तुर्ये मय्यानन्दरूपे स्थितः सन् संसारभयभावनां त्यजेत्॥ २९॥

किञ्च यावन्नानार्थधीः नानाविषयग्रहणं न ममेयमित्याकारकयुक्तिभिर्न निवर्तते तावत् जागर्त्यपि संसारबन्धान्मुक्तोऽपि स्वपन् संसारबद्ध एव अज्ञः सः अज्ञान्येवोच्यते स्वप्नमध्ये एव स्वप्नाद्यथा जागरणं तथैव तस्य अज्ञानमध्ये एव ज्ञानमित्यर्थः॥ ३०॥

ननु कथं वेदप्रमितवर्णाश्रमकर्मादिनानाधीर्ज्ञानिनो निवर्तते तत्राह असारत्वादिति। अन्येषां भावानां देहाद्यभिमानानाम् असत्त्वान्मिथ्यात्वात् तत्कृता देहाद्यभिमानकृता वर्णाश्रमादिरूपा भिदा गतयः स्वर्गादिफलानि च हेतवः कर्माणि च अस्य जीवात्मनो मृषा मिथ्यैवेत्यर्थः देहादीनां तदभिमानानां स्वर्गादीनां फलानां तत्साधनानां च प्राधानिकत्वेन सत्यत्वेऽपि जीवस्य तत्सम्बन्धाभावात्ते मिथ्यैव शृङ्गस्य सत्यत्वेऽपि शशस्य शृङ्गसम्बन्धाभावात् शशशृङ्गं मिथ्यैवेत्यर्थः स्वप्नदृशः स्वप्नं द्रष्टुर्जीवस्य स्वाप्निकवस्तूनां मिथ्यात्वं पुनश्च स्वप्नजन्ये स्वप्ने परमान्नभोजनस्य तत्साधनस्य दुग्धतण्डुलाद्याहरणस्य च मिथ्यात्वं यथा॥ ३१॥

युक्तिभिरित्युक्तं ता एव युक्तीराह। यः खल्वर्थान् देहादीन् समस्तकरणैश्चक्षुरादिभिर्भुङ्क्ते कथं भूतान् अनुक्षणधर्मिणः क्षणिकबाल्यतारुण्यादिधर्मवतः यश्च स्वप्ने हृदि जागरदृष्टसदृशान् वासनामयान् भुङ्क्ते यश्च सुषुप्ते तान् सर्वानुपसंहरति स एकः कुतः त्रिगुणवृत्तिदृक् अवस्थात्रयद्रष्टा ननु जाग्रदवस्थां सर्वेन्द्रियाणि पश्यन्ति स्वप्नं मनः सुषुप्तिं तत्संस्कारशेषा बुद्धिः कथमात्मा तद्द्रष्टा तत्राह। इन्द्रियेशः। ननु इन्द्रियेशा अपि विश्वतैजसप्राज्ञा भिन्ना एव न स्मृत्या प्रतिसन्धानेन सर्वावस्थास्वन्वयात् योऽहं स्वप्नानद्राक्षं पश्चात् न किञ्चिदवेदिषं स एवेतर्हि जागर्मीत्यत उपाधिभेदेनैव विश्वादिव्यवहार इति भावः। एतत्क्रमेणैव देहादात्मनः पार्थक्यं द्रष्टव्यम्॥ ३२॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

इममेवार्थं स्पष्टयति। अहंकारेति। अहङ्कारेण कृतं बन्धमनात्मन्यात्माभिनिवेशम् आत्मनोऽर्थविपर्ययं सुखत्वानुकरणेन दुःखत्वापादकं विद्वान् जानन् सन् निर्विद्य अहं ममास्पदेभ्यो निर्विद्य दुःखहेतुज्ञानेन वैराग्यं कृत्वा संसारचिन्तां संसरणहेतुभूतविषयचिन्तनं तुरीयस्वरूपे स्थितः संत्यजेत्॥ २९॥

एवं विचारेण मुमुक्षुर्यावद्विषयान्न त्यजेत्तावत्तस्य संसारनिवृत्तिर्नेत्याह। यावदिति। पुनाति पवित्रयत्यात्मानं संसाराग्निः सारयतीति पुमान्पुरुषार्थोऽहं "पुरुषत्वे चाविस्तरामात्मा सहि विज्ञानेन संपन्नतमो विज्ञानं वदति" त्यादिश्रुतेः तस्य पुंसः यावन्नानार्थधीः नानाविषयेषु पुरुषार्थबुद्धिः युक्तिभिर्विषयाननर्थरूपत्वेन प्रतिपादिकाभिर्न निवर्तेत तत्र दोषबुद्धिर्न जायते तावत्स विषयेषु जागर्त्यपि स्वपन् स्वापित्येव यतोऽज्ञः तत्र दृष्टान्तमाह। स्वप्ने जागरणं यथेति। यथा कश्चित्पुरुषः स्वप्ने जागरित्वा कं चिद्व्यापारं करोति पुनः परमार्थतो जागरणे तद्व्यवहारो मृषा भवति तथा नानार्थे अर्थबुद्धिर्यस्य न निवर्तेत तस्य सर्वङ्कर्म ज्ञानादिकं श्रवणं व्यर्थमेव॥ ३०॥

ननु रूपरसादिमन्नानापदार्थानां प्रत्यक्षादिप्रमाणसिद्धत्वाद्बहुधनप्रयत्नसाध्यत्वाच्च कथं तद्विषया बुद्धिर्निवर्तेतेति चेत्तत्र युक्तिभिरित्युक्तं ताभिरेव समाधानमाह। असत्त्वादिति। आत्मनोऽन्येषां भावानां रूपरसादिमत्कार्यद्रव्याणाम् असत्त्वात्परिणामित्वात्तत्कृता भिदा तादृशगुणविशिष्टपदार्थकृता भिदा भेदः इयं स्त्री सुन्दरी इयं कुरूपा इदमन्नं सुरसगन्धस्पर्शादिमत्त्वात्प्रियं इदं सुर·

एवं विमृश्य गुणतो मनसस्त्र्यवस्था मन्मायया मयि कृता इति निश्चितार्थाः ।
संछिद्य हार्दमनुमानसदुक्तितीक्ष्णज्ञानासिना भजत माऽखिलसंशयाधिम् ॥ ३३ ॥
ईक्षेत विभ्रममिदं मनसो विलासं दृष्टं विनष्टमतिलोलमलातचक्रम् ।
विज्ञानमेकमुरुधेव विभाति माया स्वप्नस्त्रिधा गुणविसर्गकृतो विकल्पः ॥ ३४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

स्रगन्धादिविरहितत्वादप्रियमेवं वस्त्रगृहादिषूहनीयं तथा तेषां गतयो हेतवश्च गम्यन्ते प्राप्यन्ते विषया आभिरिति गतयः साधनभूताः क्रियाः तथा तेषां हेतवः कारणानि वयोऽवस्थाधनादयः यद्यप्यज्ञस्य प्रवृत्तिनिष्ठस्य सत्या नित्यसुखरूपाः प्रतीयन्ते तथाप्यस्य मुमुक्षोर्विदुषः परमार्थोपयोगित्वाभावात्स्वप्नमेव न श्वरत्वाच्च किञ्चित्करत्वेन मृषैव तत्र दृष्टान्तः स्वप्नदृशो यथा स्वप्नान् पश्यतः पुरुषस्य तत्काले स्वाप्निकाः पदार्थाः सत्या अपि तस्यैव प्रबुद्धस्य ते मृषा न किञ्चिदप्यर्थं कुर्वन्तीत्यर्थः । तत्र तावत् मुमुक्षोर्विदुषः स्त्रीमात्रप्रसङ्गः "स्त्रीणां तत्सङ्गिनां सङ्गं त्यजेद्दूरत आत्मवानि"ति वाक्यात्त्याज्य एव परन्तु तस्यापि तत्त्वविचारार्थं भगवद्भजनार्थं वा देहनिर्वाहमात्रमपेक्षितं वस्तु प्रारब्धप्राप्तेन यादृशतादृशान्नवस्त्रनिवासस्थानेन भवत्येव नतु रसगन्धादिमद्द्रव्यस्यावश्यकत्वं तथोक्तं महाभारते—

शरीरं व्रणवत्पश्येदन्नं च व्रणलेपवत् ।
व्रणशोधनवत्पानं वस्त्रं च व्रणपट्टवदिति ॥

अत्र मायावादिनः ननु कथं वेदप्रतिपादितवर्णाश्रमकर्मभिर्नानायोनिर्वर्तितत्वाच्छिद्य भावानां देहानामसत्त्वात्तत्कृता भिदा वर्णाश्रमादिरूपा गतयः स्वर्गादिफलानि कर्माणि चास्यात्मनो मृषा अविद्यावद्विषयो वेद इति व्याचक्षुस्तदसत् "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ती"त्यादिश्रुत्या तत्त्वविविदिषार्थं वर्णाश्रमादिकर्मणो सर्वैर्विद्वद्भिरङ्गीकृतत्वात्तद्विरोधापत्तेः किञ्च वेदस्याविद्यावद्विषयत्वे वर्णाश्रमाणां तद्धर्माणां च वेदविहितत्वेन मृषात्वे सति सन्न्यासाश्रमतद्धर्मस्यापि तदन्तःपातित्वेन कर्मत्यागपूर्वकशिखामुण्डनं दण्डधारणं भिक्षाटनमिताहारोपनिषदादिवेदान्तविचारप्रणवजपादिरूपसन्न्यासिधर्मानुष्ठातॄणां भूतभविष्यद्वर्तमानानां संन्यासिनामप्यविद्यावत्त्वाविशेषात्संसारिधर्मवत्त्वेन मुमुक्षुद्वेष्यत्वापत्तेः अपि च मोक्षफलस्य श्रवणमनननिदिध्यासनज्ञानभक्त्यादिरूपसाधनस्यापि वेदप्रतिपाद्यत्वात्तस्यापि मृषात्वापत्त्या वेदवेदान्तादिसर्वशास्त्रस्य मृषात्वेन तद्व्याकोपाद्वलं विस्तरेण तस्मान्नश्वरफलस्य स्त्रीपशुपुत्रादिकामुकमभिकृत्य तत्फलविधायकवेदभागस्य तथात्वमुच्यते चेत्तद्भवतु तथा नतु सर्ववेदस्य तथात्वं वक्तुमुचितमुक्तदोषप्रसङ्गात् ॥ ३१ ॥

पूर्वमात्मनोऽवस्थात्रयवैलक्षण्यं तत्साक्षित्वं चोक्तं तदेवोपपादयति । य इति । यो जागरे जाग्रदवस्थायां बहिरर्थान् बाह्यविषयान् रूपरसगन्धादिमद्द्रव्याणि समस्तकरणैश्चक्षुरादिभिः सर्वेन्द्रियैर्भुङ्क्ते कथं भूतान् अनुक्षणधर्मिणः क्षणे क्षणे परिणामित्वादन्तवतः यश्च स्वप्ने हृदि तत्सदृशान् तत्सदृशान् जाग्रदनुभूतसदृशसंस्कारात्मना हृदि मनसि स्थितान् यश्च सुषुप्ते सुषुप्त्यवस्थायां तान् सर्वानुपसंहरते स एकः तत्र हेतुः इन्द्रियेशः चक्षुरादिबाह्येन्द्रियाणां मनसो बुद्धेश्चेशः स्वामी प्रेरक इत्यर्थः यद्यपि जाग्रदाद्यवस्थानां विश्वतैजसप्राज्ञा अधिष्ठातारः प्रसिद्धास्तेषामवस्थाभेदेन भिन्नत्वान्नास्त्येकरूपता तथाप्यात्मनोऽवस्थानां साक्षित्वेनैकत्वमाह । त्रिगुणवृत्तिदृगिति त्रिगुणवृत्तीनामवस्थानां द्रष्टा एक इत्यर्थः । आत्मन एकत्वे प्रत्यभिज्ञाप्रमाणमाह । स्मृत्यन्वयादिति । यः स्वप्नानद्राक्षं यश्च तदनन्तरं सुखमस्वाप्सं न किञ्चिदवेदिषं स एव जागर्मीति प्रतिसन्धानेन सर्वावस्थास्मृत्यन्वयात् अनुगतत्वात् अवस्थानां व्यभिचारात्सिद्धमवस्थावैलक्षण्यं तत्साक्षित्वं चात्मन इति ॥ ३२ ॥

भाषा टीका ।

देहादिकों मे अहंकार के करने से यह बन्धन है जिससे कि आत्मा के अर्थका विपरीत भाव होरहा है तिससे विद्वान् पुरुष उसको दुःख रूप जानकर मेरे शरीर जीव तुर्य रूप मे आश्रित होकर संसार की चिन्ता को त्याग देवै ॥ २९ ॥

जब तक शब्दादि विषयों मे पुरुषकी नाना प्रकारकी बुद्धि युक्तियों से निवृत्त नहीं होती है तब तक वह पुरुष जगा हुआ भी सोताही सरीखा है जैसे कि स्वप्न मे अपने को जगा हुआ देखने से भी जागना नहीं होता है ॥ ३० ॥

आत्मा के साथ मे और देहादि पदार्थों का यथार्थ संबन्ध न होने से गुण कृत होने से उन सबों से आत्मा मे देवादि भेद प्रतीत होता है तथा इसकी कर्म कृत जो गति है औ जो उसके हेतु हैं वे सब इसके कर्म कृत अज्ञान से हो रहे हैं जैसे कि स्वप्न मे क्षणिक पदार्थ भी चिरस्थायी मालूम पडते हैं ॥ ३१ ॥

जो आत्मा जाग्रत अवस्था मे बाहिर के क्षणिक पदार्थों को सब इन्द्रियो से भोगता है और स्वप्न मे उसी प्रकार के पदार्थों को हृदय मात्र मे भोगता है और स्वप्न मे सब भोगों को समेट लेता है वह आत्मा एकही है क्यों कि वह सब इंद्रियो का प्रेरक है और जागरण मे उसको तीनो अवस्थाओं के भोगों का स्मरण होता है ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ततः किमत आह । एवमिति । गुणतो या एता मनसस्त्र्यवस्थास्ता मदाविद्यया मयि कृता न तत्त्वतः सन्तीति निश्चित

दृष्टिं ततः प्रतिनिवर्त्य निवृत्ततृष्णस्तूष्णीं भवेन्निजसुखानुभवो निरीहः ।
संदृश्यते क्व च यदीदमवस्तुबुद्ध्या त्यक्तं भ्रमाय न भवेत् स्मृतिरानिपातात्॥ ३५ ॥
देहं च नश्वरमवस्थितमुत्थितं वा सिद्धो न पश्यति यतोऽध्यगमत्स्वरूपम् ।
दैवादपेतमुत दैववशादुपेतं वासो यथा परिकृतं मदिरामदान्धः ॥ ३६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

आत्मरूपोऽर्थो यैस्ते यूयमखिलसंशयानामाधिम् आधीयन्तेऽस्मिन्नित्याधिरहंकारस्तं सञ्छिद्य हार्दं हृदि स्थितं मां भजत केन च्छित्त्वा तदाह । अनुमानैः सद्युक्तिभिः सतामुपदेशैः श्रुतिभिश्च तीक्ष्णेन ज्ञानखड्गेन ॥ ३३ ॥

अनुमानानि दर्शयति । ईक्षेतेति । इदं जगद्विभ्रममीक्षेत तत्र हेतवः मनोविजृम्भितत्वात् दृष्टत्वाद्विनाशित्वाच्च स्वप्नवत् अतिचञ्चलत्वाच्चालातचक्रवत् । ननु, भ्रमोऽपि निर्विषयः कथं स्यात् तत्राह । विज्ञानमिति । निगमनम् तस्मात्त्रिधा योऽयं गुणपरिणामकृतो विकल्पो भेदः स मायेति ॥ ३४ ॥

तस्मात्ततो दृश्याद्दृष्टिं प्रतिनिवर्त्य निजसुखानुभवो भवेत् तन्नैश्चल्यार्थं च निवृत्ततृष्णस्तूष्णीं निरीहश्च भवेत् मनोवाक्कायव्यापाररहित इत्यर्थः । ननु, देहवतः सर्वथा द्वैतदृष्टिप्रतिनिवर्तनायोगात्पुनः संसारः स्यादेव तत्राह । संदृश्यत इति । क्व चदावश्यकाहारादिषु यद्यपीदं संदृश्यते तथापि पूर्वमवस्तुबुद्ध्या यत्त्यक्तं तत्पुनर्मोहाय न भवेदेव किंतु देहपातपर्यन्तं स्मृतिरिव स्मृतिः संस्कारमात्रेणावभासो भवेदित्यर्थः ॥ ३५ ॥

एतदेवोपपादयति । देहमिति । आसनादुत्थितमुत्थाय तत्रैव स्थितं ततः क्वचिदपेतं निर्गतं पुनस्तत्रैवोपेतं वा देहमपि नानुसन्धत्ते कुतोऽन्यत् यतो येन देहेन स्वरूपमध्यगमज्ज्ञातवांस्तं देहं यतः कारणादिति वा परिकृतं परिहितं वासो गतं स्थितं वा यथा न वेत्ति तद्वत् ॥ ३६ ॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

ततः सर्वावस्थास्वात्मनः ऐक्यज्ञानानन्तरम् एवं विमृश्य मननं कृत्वा । मदविद्यया मम स्वरूपविषयकाज्ञानेन । कृताः कल्पिताः तदाह तत्र छेदनसाधनमाहेत्यर्थः ॥ ३३ ॥

अनुमानानि ज्ञानोत्पत्तौ सहकारीणि । तत्र विभ्रमत्वे । निर्विषयाः निराश्रयाः । निगमनमिति । अयं भावः परार्थानुमाने हि पञ्चावयववाक्यं तत्र जगद्विभ्रममीक्षेतेति प्रतिज्ञा (१) दृष्टत्वादि हेतुः (२) यद्यद्दृष्टत्वाद्यवच्छिन्नं तत्तद्भ्रममात्रं यथा स्वप्नादि इत्युदाहरणम् (३) यथा भ्रमत्वव्याप्यदृष्टत्वादिमान् स्वप्नादिस्तथाचेदं जगदित्युपनयः (४) तस्मात् त्रिधा योऽयं गुणपरिणामकृतो विकल्पः स माया मिथ्येति साध्योपसंहारलक्षणं निगमनमिति ५) ॥ ३४ ॥

तन्नैश्चल्यार्थं सुखानुभवस्य स्थिरत्वार्थं निवृत्ततृष्ण इत्यादिपदत्रयस्य यथा सङ्ख्यं मनोवाक्कायव्यापाररहित इत्यर्थः संस्कारेति । प्रारब्धजसंस्कारमात्रेण जीवन्मुक्तस्य दग्धपटवत् छिदलादिवदवभासो बाधितानुवृत्तिमात्रं भवेदित्यर्थः ॥ ३५ ॥

एतदेव संस्कारमात्रेणावभासनमेव । तत्र आसन एव ॥ ३६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

मायामयं प्रकृतिकार्यम् अखिलसंशयरूपमाधिं संछिद्य मां भजतेत्यन्वयः ॥ ३३ ॥

ईक्षेतेति । इदं स्थूलोऽहमित्याद्यनुसन्धानं मनसो विलासं मनःकार्यं विभ्रममीक्षेत तदेवोपपादयति । दृष्टं मनुष्यादिशरीरं हि अलातचक्रवत् प्रतिक्षणध्वंसि तद्वत्स्यादनित्यं शरीरं नित्य आत्मा भवति माया स्वप्ने प्रकृतिकार्यं स्वप्ने भ्रमे ज्ञानस्वरूपात्मा बहुधा देवादिरूपेणाभाति जाग्रदादिरूपेण त्रिधा विकल्पश्च गुणविसर्गकृत इत्यर्थः ॥ ३४ ॥

ततः शरीरादिभावाच्च दृष्टिं प्रतिनिवर्त्येति ज्ञानेन्द्रियनियमनमुक्तं निवृत्ततृष्ण इति मनोनियमनं तूष्णीमिति वागादिकर्मेन्द्रियनियमनमुक्तं निजसुखानुभव इति समाधिरुक्तः भ्रमाय न भवेत्समाधिं न गलयेदित्यर्थः आनिपातात् आमरणात्स्मृतिर्भगवद्ध्यानं कर्तव्यम् अन्यथा मनः कालुष्यात्समाधिरेव गलितः स्यादिति भावः ॥ ३५ ॥

समाधिदशायां देहाकारो न प्रतिभातीत्याह । देहं चेति । अवस्थितमासीनमुत्थितं वेत्यतिशयोक्तिः तिष्ठतोऽपि कदाचित्समाधिसम्भवात् तद्युक्तः सिद्धः निष्पन्नसमाधिः अध्यगमत् साक्षात्कृतवान् स्वरूपं निष्कृष्टस्वरूपं दैवादुपेतमित्यादि वासोविशेषणम् ॥ ३६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं मनसस्तिस्रोऽवस्थाश्च मन्मायया स्वस्वकर्मानुगुणमदीयसङ्कल्परूपज्ञानेन गुणतः सत्त्वादिमनोनिष्ठगुणेभ्यो निमित्तेभ्यो मयि कृता इत्येवमित्थं विमृश्य विचार्येति सम्बन्धः आत्मनः कृत्स्नचिदचिदुपादानकारणत्वाच्चिदचिद्गतावस्थानां तद्द्वारा स्वात्मपर्यन्तत्वाभिप्रायेण मयीत्युक्तं निश्चितोऽर्थः सकलानर्थनिवारकमत्प्राप्तिसाधनं मदुपासनमेव परमप्रयोजनं यैस्ते यूयं हार्दं हृद्गतमखिलसंशयाधिमनुमानसद्युक्तितीक्ष्णज्ञानासिना सञ्छिद्य मां भजतेत्यन्वयः संशयाः किमहं देहाकार उत तद्विलक्षणः किं स्वतन्त्रः किंवा परतन्त्र इत्यादिरूपाः त एवाधिः पीडा ज्ञानमत्र यथावस्थितात्मपरमात्मस्वभावानुसन्धानात्मकम् अनुमानं देहेन्द्रियविषयाणामन्ततो दुःखावहत्वानित्यत्वहेयत्वादिव्याप्तिग्रहणं तेन तन्मूलं वैराग्यं विवक्षितं सद्युक्तयः

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

शारीकन्यायात्मिकाः वेदान्तार्थविचारवैराग्याभ्यां निशितेन तीक्ष्णेन ज्ञानरूपेणासिना इत्यर्थः ॥ ३३ ॥

अनुमानमेव दर्शयति । ईक्षेतेति। विशेषेण भ्रमः आत्मत्वभोग्यत्वादिभ्रमो यस्मिन् मनसो विलासो यस्मिन्सङ्कल्पविकल्पविषयमित्यर्थः। इदं देवादिशरीरतदुपभोग्यविषयादिकं सर्वमिति धर्मिणो निर्देशः विनष्टमिति साध्यस्य दृष्टमिति साधनस्यालातचक्रमिति दृष्टान्तस्य तद्विशेषणमतिलोलमिति ईक्षेत इत्थमनुमिनुयादित्यर्थः अथ सयुक्तिविचारात्मकज्ञानाकारं दर्शयति । विज्ञानमिति।विज्ञानं जीवस्वरूपं"विज्ञानं यज्ञं तनुते,यो विज्ञाने तिष्ठन्" इति श्रुतेः तदेकं ज्ञानैकस्वरूपस्वभावम् उरुधेव देवमनुष्यादिरूपेण बहुधेव विभाति न तत्स्वरूपेऽस्ति देवमनुष्यादिभेद इति भावः। स च विकल्पो देवमनुष्यादिभेदः त्रिधा त्रिप्रकारा ये गुणाः सत्त्वादयस्तेषां विसर्गः परिणामः तेन कृतः मायास्वप्नः सर्वज्ञस्य सर्वशक्तेर्मम मायया प्रकृत्या सङ्कल्परूपज्ञानेन वा निमित्तेन स्वप्नः स्वप्न इव कृतः यथा स्वप्नः सङ्कल्पविकल्पप्रवणमनसः प्रतीयमानः पुनः प्रबोधेन निवर्तते तद्वत् स्वात्मपरमात्मयाथात्म्यानुसन्धातुरात्मगतत्वेन प्रतीयमानः पुनरामोक्षानुवृत्तात्मोपासनान्निवर्तेत इति ॥ ३४ ॥

दृष्टिमिति ततः शब्दादिभ्यः दृष्टिं प्रतिनिवर्त्य शब्दादिबाह्यविषयानगृह्णन्नित्यर्थः निवृत्ता तृष्णा विषयाभिलाषो यस्य सः निरीहः निर्व्यापारो तत्र दृष्टिं प्रतिनिवर्त्येति बाह्यज्ञानेन्द्रियाणां चक्षुरादीनां नियमनमुक्तं निवृत्ततृष्ण इति मनसः निरीह इति कर्मेन्द्रियाणां निजसुखानुभव इति समाधिरुक्तः तूष्णीं भवेदिति देहानुचिन्तननिषेधः एवं विधस्य पुंसः पूर्वमवस्तुबुद्ध्या अनात्मबुद्ध्या—

> यत्तु कालान्तरेणापि नान्यसंज्ञामुपैति वै ।
> परिणामादिसम्भूतां तद्वस्तु नृप ! तच्च किम् ॥

इत्यात्मन्येव वस्तुशब्दस्य मुख्यवृत्तत्वस्मरणात् त्यक्तमिदं देहादिकं क्वच समाधिव्यतिरिक्तशयनासनभोजनादिदशासु यद्यपि संदृश्यतेऽनुसन्धीयते तथापि तद्भ्रमाय समाधितश्चलनाय न भवेत् यद्वा पुनर्देहान्तरसम्बन्धनिमित्तदेहात्माभिमानादिरूपभ्रमाय न भवेत्। ननु, तुर्ये स्थितः अनुमानसयुक्तितीक्ष्णज्ञानासिना निजसुखानुभव इति तुर्यस्थितिज्ञानानुभवशब्दविवक्षितं ज्ञानं किं तत्त्वमस्यादिवाक्यजन्यरूपं किं वा ध्यानोपासनादिशब्दवाच्यं ध्यानादिशब्दवाच्यत्वेऽपि किं द्वित्रिरावृत्तिरूपं किं वा यावच्छरीरपातानुवृत्तिरूपमित्यत्राह । स्मृतिरानिपातादिति । स्मृतिः भगवद्ध्यानं आशरीरपातात्कर्त्तव्यमित्यर्थः । अन्यथा मनःकालुष्यात्समाधिरेव गलितः स्यादिति भावः। आनिपातादित्यनेन द्वित्रिरावृत्तज्ञानव्युदासः स्मृतिशब्देन वाक्यजन्यस्य ॥३५॥

तूष्णीं भवेदित्युक्तं तूष्णींभावं विवृणोति—देहं चेति। सिद्धः निष्पन्नसमाधिमान् देहमवस्थितमासीनमुत्थितं वा न पश्यति नानुसन्धत्ते तत्र हेतुत्वेन देहं विशिनष्टि। नश्वरमिति। हेयत्वादिति भावः । किञ्च, यतः स्वरूपं निष्कृष्टात्मस्वरूपमध्यगमत्साक्षात्कृतवान् अतः समाधिदशायां देहो न प्रत्येतव्य इत्यर्थः । दैवादुपेतमिति वासोविशेषणं यथा मदिरामदेन मद्यपानमदेनान्धो विवेकरहितः पुमान् परिकृतं परिधृतं वासो वस्त्रं दैववशादुपेतं प्राप्तमथ तस्मादपेतं वा नानुसन्धत्ते तद्वदित्यर्थः ॥ ३६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

उक्तार्थानुवादपूर्वकमुक्तज्ञानफलं विधत्ते । एवमिति । एवमुक्तविधं विमृश्यालोच्य कथमित्युक्तं स्मारयति । गुणात इति । सत्त्वादिगुणात उद्भूता मननान्मन उद्दिष्ट इति मनसो जीवस्य जाग्रदाद्यवस्था मन्मायया मदिच्छया मयि मदाधारत्वेन कृता विहिताः पर्याप्ता इति निश्चितार्थाः यूयमनुकूलश्रुत्यादिमानेन सतां महताम् उक्त्या वचनेन तीक्ष्णेन निशितधारेण ज्ञानाख्यासिना हार्दे हृदि रूढमखिलसंशयाधिं संछिद्य मा मां भजतेत्यन्वयः अनेन मुक्तिरप्युक्ता भवतीति ज्ञातव्यम् ॥ ३३ ॥

ननु, जाग्रदादिषु प्रवर्तकत्वेन वर्तमानस्य हरेः विश्वादिरूपाणां भेदो नास्तीत्युक्तं तत्र वृत्तिभेदेन प्रतीयमानो भेदः कथं प्रत्येतव्य इत्यत्राह । ईक्षेतेति । जाग्रदादिषु प्रतीयमानमिमं परमात्मभेदं विभ्रमज्ञानमूलं वीक्षेत—

> जाग्रदादिकरो देवः परमात्मैक एव तु ।
> इति वीक्षेत सततं मुच्यते संसृतेरतः ॥

इतिवचनात् अज्ञाननिमित्तहेतुमाह । मनस इति । मनसो विलासं मनोविकाररूपत्वात् एतत्कुतोऽत्राह । दृष्टमिति । गुरूपदिष्टशास्त्रदृष्ट्या यदा विभ्रमोऽयमिति दृष्टस्तदैव नष्टो भवति यत्तस्मात् इतोऽपि मनोविलास इत्याह । अतिलोलमिति । श्रुत्यादिविचारे क्षिप्रविनाशित्वात् अत्र लुप्तोपममाह । अलातचक्रमिति । अलातचक्राकारभ्रमवत् परमात्मभेदभ्रमं विद्यादित्यर्थः । एवं सुरनराद्याहिततत्तन्नियन्तृभेदोऽपि भ्रान्त इत्याशयेनाह । विज्ञानमिति । विज्ञानमानन्दं ब्रह्मेति श्रुतेः । एकं स्वगतभेदशून्यं ब्रह्म नानारूपमिव भाति । अज्ञानामिति शेषः । यथा स्वप्न एकैव गजादिमाया बहुधा प्रतीयते तथेति।मिथ्याज्ञानकारणमाह । त्रिगुणेति । सत्त्वादिभिस्त्रिभिर्गुणैस्तत्सर्गैस्तत्कार्यैः पापादिभिश्च कृतः पर्याप्तो विकल्पो मिथ्याज्ञानं कारणमिति शेषः। तमआदिगुणनिमित्तपापादिदुष्कर्मकलुषितान्तःकरणानामज्ञानामासुरप्रकृतीनां सच्चिदानन्दरूपमेकं बह्विव प्रतीयत इति भावः । "देहभेदेष्ववस्थासु प्रादुर्भावेषु केवलं । ज्ञानानन्दैकसद्रूपं भ्रान्त्या भिन्नं प्रपश्यति । सा च भ्रान्तिर्विनश्येत यदा भ्रान्तित्ववेदनम् । भातिक्षिप्रं विनश्येच्च न स्थिरं दिग्भ्रमादिवत् । त्रिगुणैर्बाधिता जीवा ज्ञप्तिमात्रं जनार्दनम् । पश्यन्ति बहुधा स्वप्ने यथैकं बहुधा क्वचित् । अभिन्नोऽपि विभिन्नेषु व्यवहारो यथा भवेत् तथैव व्यवहाराय शक्तत्वान्नैव दूषणम् । ईशस्य तु तदन्येषामपि यच्छक्तिदायकः" इत्यनेन मानेन—

> अशक्योऽप्यतिशक्योऽयं विनिवर्तयितुं भ्रमः ।
> ईशस्थो गुरुसम्पत्त्या यदि शुद्धमनाः पुमान् ॥

इत्यनेन मानेन निर्णीतत्वादिदमेव तात्पर्येण ज्ञातव्यम् अन्यद्दुःशास्त्रमिति सिद्धम् ॥ ३४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

एवंविधं मिथ्याज्ञानं मोक्षार्थिना हेयमिति भावेनाह । दृष्टिमिति । यतो पापफलं मिथ्याज्ञानं ततो निवृत्ततर्षः विषयाभिलाषरहितः दृष्टिं मिथ्याज्ञानं प्रतिनिवर्त्य परमात्मभेदादिदर्शनरहितो भूत्वा तूष्णीं भवेत् निरन्तरध्यानमन्तरेण प्रवृत्त्यन्तरविधुरः स्यात् किमनेन पाषाणावदवस्थानेनेति तत्राह । निजेति । अनेन स्वरूपसुखस्यानुभवो यस्य स तथा । ननु, नित्यनैमित्तिकादिक्रियादर्शनात् प्रवृत्त्यन्तरशून्यः कथमत्राह । निरीह इति । निषिद्धचेष्टाविधुरो भवति न तु क्रियामात्रशून्यः । ननु, संसारवशात् वर्तन् मूढजनस्थितं भ्रमं दृष्ट्वा स्वयं मुह्यतीति किं न स्यादित्यत्राह । संदृश्यत इति । यदि क्वचिन्मूढजने स्थितमिदं परमात्मभेदज्ञानं ज्ञानिना संदृश्यते तथाप्यवस्तुबुद्ध्या अविद्यमानोऽयं भेदभ्रम इति ज्ञानेन त्यक्तं मिथ्याज्ञानं पुनर्भ्रमाय भ्रमजननाय न भवेत् तत्र निमित्तमाह । स्मृतिरानिपातादिति । न्यक्भावेन पातो यस्मिन् तन्निपातमन्धन्तमः मोक्षमारभ्य तावत्पर्यन्तं स्मृतिर्यस्मात् ज्ञानिनो निपातपर्यन्तं स्मृतिर्ज्ञानमस्तीति यत्तस्मादित्यर्थः । ज्ञानफलं मोक्षः कर्मफलं स्वर्गः एवं मिथ्याज्ञानफलमन्धन्तमः इति स्मरति ज्ञानीति " निन्यग्भावनिकामयोः " इति यादवः ॥ ३५ ॥

ननु, त्रिगुणसर्गकृतो विकल्प इत्यत्र त्रिगुणबद्धानां विकल्प इत्युक्तम्, तत्र ज्ञानिनोऽपि देहवत्त्वेन त्रिगुणत्वाद्विकल्पः स्यादित्यत्राह । देहञ्चेति । निरन्तरं भगवन्तं ध्यायन् जीवस्वरूपमारभ्य परमात्मपर्यन्तानि तत्त्वानि तत्तत्स्वरूपं यथावदभ्यगमद्देहादिविलक्षणतया तारतम्येनापरोक्षीचकारेति यत्तस्माद्देहाभिमानरहितो ध्यानरूढो वावस्थितमुत्थितं वा देहं नानुपश्यति कीदृशं देहम् ? दैवादुपेतं प्राप्तं दैववशाद्भगवत्प्रेरितकर्मवशात् वियुक्तं च मदिरामदान्धः मद्यपानजातमदविस्मृतात्मज्ञानः पुरुषः परिवृतम् आच्छादितं वासो यथा दृढीकरणादियत्नं न करोतीत्यतः त्रिगुणाकृतदेहाभिमानाभावात्तत्कृतविकल्पो नास्तीति भावः ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

पूर्वं तस्मात्त्वमुद्धवोत्सृज्येत्यादिना यदुक्तं तदेव खलु एवं गुरूपासनयेत्यादिना स्थापितं तदेव पुनः श्रीहंसवाक्येन द्रढयति । एवं विमृश्येति । एवं विमृश्य मननं कृत्वा भजत ध्यायत यूयम् ॥ ३३ ॥

ततश्च ज्ञानोत्पत्तिप्रकारमाह । ईक्षेतेति । इदं जगत् विभ्रमं विशेषेण भ्रमो यत्र तद्रूपमीक्षेत यतो मनोविलासमयं तथा दृष्टं यद्घटादि तत्तद्विनष्टं नश्वरमिति सर्वमीक्षेत अलातचक्रवदतिलोलं सन्ततभ्रमणानुकूलं चेक्षेत । यस्माद्विज्ञानं परमात्मचैतन्यं सर्वैकमेव । मायैव तु उरुधेव भाति इवशब्दस्तस्याः स्वातन्त्र्यं वारयति परमात्मसान्निध्यमात्रबलत्वात् तस्मा दुगुणविसर्गकृतो विकल्पः स्वप्न इव मायामात्रलब्धस्फूर्तिरित्यर्थः ३४—३५ ॥

जीवन्मुक्तमाह । देहं चेति द्वाभ्याम् ॥ ३६—३७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ततः किमत आह—एवमिति । गुणतो या एता मनसो बुद्धेऽवस्थास्ता मदविद्यया मयि कृता न तत्त्वतः सन्तीति निश्चित आत्मरूपोऽर्थो यैस्ते यूयम् अनुमानैः सद्युक्तिभिः सतामुपदेशैः श्रुतिभिश्च तीक्ष्णेन ज्ञानखड्गेन हार्दं हृद्भवमवस्थात्रयं सञ्छिद्य मा माम् अखिलसंशयानामाधिं पीडकं नाशकं भजत ॥ ३३ ॥

एवमवस्थात्रयाभिःसम्बन्धस्यात्मनः पार्थक्यमनुभूय पूर्वं यदहन्तास्पदं ममतास्पदीभूतं वस्त्वासीत्तदिदं जगत् विभ्रमं विशिष्टो भ्रमो यत्र तथा भूतमीक्षेत कोटिकोटिजन्मसु तत्र भ्रमादेवाहंताममतयोरारोपितत्वात् मनसो विलासं कौतुकास्पदं मनसो विशिष्टो लासो नृत्यं यत्र तदिति वा विनष्टमानत्वं तत्राप्यलातचक्रवदतिलोलम् । ननु, तर्ह्येवंभूतद्वैतदर्शनान्निर्भेदब्रह्मानुभवो नोपपद्येत ? तत्राह । विज्ञानमेकं यद्ब्रह्म तदेव उरुधेव विभाति न तु परमार्थत उरुधा यतो माया माययैव त्रिधा गुणविसर्गकृतो विकल्पः स्वप्नः स्वप्नवदचिरस्थायी ॥ ३४ ॥

यस्मादेवं तस्मात्ततो दृश्यात् दृष्टिं प्रतिनिवर्त्य तस्मिन् निवृत्ततृष्णस्तूष्णीं च भवेत् । मनोवाग्व्यापाररहित इत्यर्थः तत्र सामर्थ्यमाह । निजसुखानुभव इति । अतो निरीहः कायिकव्यापाररहितश्च ननु देहवतः सर्वथाद्वैतदृष्टिप्रतिबन्धनायोगात् पुनः संसारः स्यादेव तत्राह । संदृश्यते इति । क्वचिदावश्याहारादिषु यद्यपीदं संदृश्यते तथापि पूर्वमवस्तुबुद्ध्या यत्त्यक्तं तत्पुनर्मोहाय न भवेदेव किन्तु देहपातपर्यन्तस्मृतिरिव स्मृतिः संस्कारमात्रेणावभासो भवेदित्यर्थः ॥ ३५ ॥

ज्ञानसिद्धस्य जीवन्मुक्तस्य दशामाह । देहमिति द्वाभ्याम् । आसनादुत्थितम् उत्थाय पुनस्तत्रैव वा स्थितं न पश्यति नानुसन्धत्ते यतः स्वरूपं ब्रह्मानुभवम् अध्यगमत् प्राप्तः अत्र दृष्टान्तः दैवादपेतं केनाचिन्निष्काशनादपगतं केनाचित्परिधापनादुपेतं वा वासः परिकृतं परिहितं मदिरामदान्धो नानुसन्धत्ते ॥ ३६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अवस्थावैलक्षण्ये तस्माच्चित्त्वनिरूपणस्य प्रयोजनमाह । एवमिति । एवमुक्तप्रकारेण विमृश्य विचार्य गुणतः सत्त्वादिगुणहेतो मनसो निमित्तभूतस्य तिस्रोऽवस्था व्यवस्था । अयम्भावः यद्यपि जाग्रदवस्था बाह्येन्द्रियैः स्वप्नो मनसा सर्वलयेन सुषुप्तिरिति सर्वसम्मता प्रक्रिया तथापि जाग्रदवस्थायामपि सर्वव्यवहाराणां मन एव निमित्तभूतं मनस्युपात्ते सर्वेन्द्रियाणां वा न सर्वकार्यं निष्पद्यते सुषुप्तिरपि नेन्द्रियमात्रस्य लयेन जायते किन्तु मनस एवातः सर्वत्र मनसः प्रधाननिमित्तत्वान्मनस इत्युक्तम् ता मन्मायया ममानादिकर्मरूपाविद्यापरपर्यायभूतमायया मयि जीवे कृता इत्येवं निश्चितार्थाः सर्वमुमुक्षूपदेशार्थं निश्चितोऽर्थ आत्मावस्थादिरूपो यैस्ते तथाभूताः सन्तः अनुमानसद्युक्तितीक्ष्णीकृतज्ञानासिना अखिलसंशयाधिं सञ्छिद्य हार्दं मा भजतेत्यन्वयः । तत्र श्रुत्यनुकूलस्तर्कोऽनुमानं न तु शुष्कतर्कः सद्युक्तयः सतो वेदस्य

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

मम वा मतामनुवर्त्तिनां वोक्तयो वचनानि ताभिरनुमानश्रुतिस्मृतिभिरित्यर्थः । तीक्ष्णीकृतो ज्ञानरूपोऽसिस्तेनाखिलाश्च ते संशयाश्च अखिलजीवानां संशयो वा स एवाधिमानसीठवत् "पुंस्याधिर्मानसीठवत्" इत्यमरः हृदि वर्त्तमानं मां भजत अनुमानसद्युक्तिभिः संशये छिन्ने सति मद्भजनान्मत्साक्षात्कारात्सर्वकर्मात्मिकमायानिवृत्तिः स्वत एव भवतीत्यर्थः । अयम्भावः अनाद्यविद्यानिरूपितत्रिगुणात्मकमनस एव संसारहेतुत्वात् तस्य पूर्वोक्तप्रकारेण सात्त्विकत्वे सम्पादिते सति सत्सङ्गे च परिप्रश्नसेवादिना शास्त्रजन्यपरोक्षज्ञानेन संशये छिन्नेऽपि कर्मात्मिकाविद्याप्रयुक्तगुणसम्बन्धस्य सत्त्वे पुनर्न भ्रश्येत तदर्थं मां भजतेत्युक्तं मनसि भगवत्प्रावण्ये सति सर्वानर्थनिवृत्तिपूर्वकं सर्वकर्मादिबन्धनिवृत्तिर्भवतीति भूयश्चान्ते विश्वमायानिवृत्तिः "मच्चित्ता मद्गतप्राणाः

तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥
तेषामहं समुद्धर्त्ता मृत्युसंसारसागरात् ।
भवामि न चिरात्पार्थ ! मय्यावेशितचेतसाम् ॥

इत्यादिस्मृतिभ्यः ॥ ३३ ॥

ज्ञानासिना संशयं सञ्छिद्येत्युक्तं तज्ज्ञानं दर्शयति । दृश्यतेति । मनसो विलासमिदं जगत् विभ्रममीक्षत मद्भजनं विना स्वर्गं गच्छेयं ब्रह्मलोकं गच्छेयं नागलोकं गच्छेयमित्येवं मनसो विलासं तत्सङ्कल्पविषयं चतुर्दशभुवनात्मकमिदं विश्वं शुभाशुभकर्मभिरूर्ध्वाधो भ्रमति जीवोऽस्मिन्निति विभ्रमं पश्येदित्यर्थः । तच्चापातलोलं कीदृशं अलातचक्रं अलातचक्रवत्संवत्सरात्मकचक्रेण गच्छदागच्छच्च स्वप्न आयते अत एव दृष्टं विनष्टं दृश्यमानमपि विशेषेण नष्टमदृश्यं भवति किंच विज्ञानं प्रत्यगात्मानं ज्ञानस्वरूपत्वेनैकमीक्षेत । ननु, देवोऽयं मनुष्योऽयं पशुरयं पाषाणोऽयमिति बहुधा प्रतीयते कथमेकमिति चेत्तत्राह । उरुधेव विभाति या सा माया प्रकृतिरेव "मायां तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरम्" इतिश्रुतेः नन्वजामेकामिति श्रुतेर्मायया अप्येकत्वात्कथमुरुधा भानमिति चेत्तत्राह । त्रिधा विकल्पः देवमनुष्यतिर्यगादिरूपो भेदः गुणविसर्गकृतः सत्त्वादिगुणत्रयस्य विविधसर्गेण सर्जनेन सत्त्वादिगुणप्रधाना देवादयो भवन्ति सर्वमायाशब्दवाच्यप्रकृतिकार्यत्वान्मायैव "तदनन्यत्वमारम्भणशब्दादिभ्यः" इतिसूत्रात् अयं भेदोऽपि न नित्य इत्याह । स्वप्ने यथा स्वप्नोऽनित्यस्तथा देवादिदेहस्तल्लोकभोगाश्चेत्यर्थः ॥ ३४ ॥

ज्ञाननिरूपणे जगत्स्वरूपनिरूपणस्य प्रयोजनमाह । दृष्टिमिति । यतः स्वप्नवदनित्योऽयं प्रपञ्चः तस्मात्ततो दृष्टिं प्रतिनिवर्त्य मनोवृत्तिमाकृष्य निवृत्ततृष्णः सन् तूष्णीं निरीहश्च निर्व्यापारो भवेत् देहादिभोगसुखान्निवर्त्तने हेत्वन्तरमाह । निजसुखानुभवः । निजस्य स्वरूपसुखस्यानुभवो यस्य तथाभूतः सन् नतूक्तप्रकारेण जगत्यनित्यताबुद्ध्या ततो दृष्टिनिवृत्तौ सत्यामपि देहयात्रार्थं सञ्चारे क्वचित्सङ्गेन पुनस्तत्र प्रसक्तिश्चेत्तर्हि साधनश्रमो व्यर्थ एव स्यादिति चेत्तत्राह । संदृश्यते इति । क्वचित् कुत्रचित् यदृच्छया यदीदं तुच्छसुखहेतुरिदं प्राकृतं द्रव्यं दृश्यते तथापि येन यद्वस्तुबुद्ध्या ममेदं सुखदं न किन्त्वनर्थकरमिति ज्ञात्वा त्यक्तं पुनस्तस्य भ्रमाय तद्विपरीतज्ञानाय न भवेत् परन्तु पूर्वानुभूतस्य संस्कारेण स्मृतिरानिपाताद्देहपाताविधिः स्यात् ॥ ३५ ॥

ननु, यदि ज्ञानिनोऽपि पूर्वानुभूतपदार्थस्य देहावधिस्मृतिः स्यात्तर्हि अज्ञानस्य को विशेषः प्रतीयेतत्याशङ्कायां ततोऽप्यधिकज्ञानारूढदशायां विशेषः सर्वैरनुभूयत इति समाधानमाह । सिद्धः यथास्वदूज्ञानारूढः नश्वरं देहमासने ऽवस्थितं तत उत्थितमन्यत्र गतं च न पश्यति च पुनर्देहयात्रार्थं दैवाद्भोजनादिउपेतं प्राप्तम् अथ दैववशादपेतं वा न पश्यति देहाननुसन्धाने दृष्टान्तमाह । यथा मदिरामदान्धः परिकृतं कटिबद्धं वासः स्थितं गतं वा नानुपश्यति तद्वत् एतत्कुतः यतः स्वरूपमध्यगमत् स्वरूपानन्दतुष्टत्वादित्यर्थः। यद्येवं भूतो देहमपि नानुसन्धत्ते तर्ह्यन्यं न पश्यतीति किमु वक्तव्यं तदा तस्य सर्ववैलक्षण्यमिति भावः ॥ ३६ ॥

भाषा टीका ।

इस प्रकार विचार करके गुणों से मन की तीन अवस्थाओं को जान कर सब भी परमेश्वर की इच्छा से निर्मित है ऐसा निश्चय करके सत् शास्त्रों की युक्ति तथा अनुमान रूपी तीक्ष्ण खड्ग से संपूर्ण संशय रूपी जो हृदय में स्थित आधि हैं तिनको छेदन करके आप लोग मेराही भजन करो ॥ ३३॥

इस संपूर्ण जगत् को मन का विलास देख मन के मानने से सब पदार्थ नित्यप्रिय दीखते हैं नहीं तो जो प्राकृत पदार्थ दीखते हैं नाशमान परिणामी हैं वे जैसे कि बनेठी की आग चंचल होती है तैसा चंचल है एक विज्ञान रूप परमात्मा ही नाना प्रकार से अपनी ज्ञान शक्ति से स्थित है जैसे कि स्वप्न के पदार्थ सत्य होने पर भी चंचल हैं तैसे जाग्रत के भेदों को देखो ॥ ३४ ॥

तिस हेतु से तिस जगत् से बुद्धि को हठाकर तृष्णा को छोड कर अपने मे स्थित परमात्मा का अनुभव करता हुआ और चेष्टाओं को छोड देवै जो कुछ जगत् मे यह दीखता है उसको जब अवस्तु बुद्धि से छोड देवै तब फिर उस मे मोह नहीं होता है परन्तु उन पदार्थों का स्मरण तो शरीरपात पर्यन्त रहैगाही ॥ ३५ ॥

देह जो है सो नाश होने वाला है वह चाहे बैठा होवै चाहै खड़ा होवै उसको सिद्ध पुरुष नहीं देखता है जिससे कि उसको स्वस्वरूप परस्वरूप का ज्ञान हो गया है वह शरीर चाहै कहीं जावै या कहीं आवै उसको ज्ञानी नहीं जानता है जैसे कि मदिरा के मद से अन्धा पुरुष शरीर पर के वस्त्र को रहने से या गिरने से नहीं जानता है ॥ ३६ ॥

देहोऽपि दैववशगः खलु कर्म यावत्स्वारम्भकं प्रतिसमीक्षत एव सासुः ।
तं सप्रपञ्चमधिरुढसमाधियोगः स्वाप्नं पुनर्न भजते प्रतिबुद्धवस्तुः ॥ ३७ ॥
मयैतदुक्तं वो विप्रा ! गुह्यं यत्साङ्ख्ययोगयोः ।
जानीत माऽऽगतं यज्ञं युष्मद्धर्मविवक्षया ॥ ३८ ॥
अहं योगस्य साङ्ख्यस्य सत्यस्यर्तस्य तेजसः ।
परायणं द्विजश्रेष्ठाः ! श्रियः कीर्तेर्दमस्य च ॥ ३९ ॥
मां भजन्ति गुणाः सर्वे निर्गुणं निरपेक्षकम् ।
सुहृदं प्रियमात्मानं साम्यासङ्गादयोऽगुणाः ॥ ४० ॥
इति मे छिन्नसन्देहा मुनयः सनकादयः ।
सभाजयित्वा परया भक्त्याऽगृणत संस्तवैः ॥ ४१ ॥
तैरहं पूजितः सम्यक् संस्तुतः परमर्षिभिः ।
प्रत्येयाय स्वकं धाम पश्यतः परमेष्ठिनः ॥ ४२ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां
संहितायां वैयासिक्यामेकादशस्कन्धे
त्रयोदशोऽध्यायः ॥ १३ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु च यः परिपाल्यमानोऽपि मुमूर्षति तं चेन्न पश्यति तर्हि पतेदेव नेत्याह । देहोऽपीति । देहो दैववशेन गच्छन् स्वारम्भकं कर्म यावदस्ति तावत्पर्यन्तं प्रतिसमीक्षत एव जीवत्येव सासुः प्राणेन्द्रियसहितः । ननु, तर्हि तस्मिन्कदाचिदासज्जेतापि? नेत्याह । तमिति । स्वाप्नं स्वप्नतुल्यम् अधिरूढः प्राप्तः समाधिपर्यन्तो योगो येनात एव प्रतिबुद्धं ज्ञातं परमार्थवस्तु येन सः तथाच श्रुतिः "तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ सम्पत्स्ये" इति ॥ ३७ ॥

उक्तार्थे तेषां विश्वासार्थं स्वस्वरूपमाह । मयेति । साङ्ख्यमात्मानात्मविवेको योगोऽष्टाङ्गस्तयोर्गुह्यं रहस्यं यज्ञं विष्णुम् "यज्ञो वै विष्णुः" इति श्रुतेः । युष्मद्धर्मविवक्षयेत्यनेन धर्मा अप्युपदिष्टा इति ज्ञेयम् । अत एव "येन हंसरूपेण ब्रह्मणोऽभ्यात्थ माधव" इत्यनुवादो भविष्यति ॥ ॥ ३८ ॥

ऋतं प्रमीयमाणो धर्मः सत्यमनुष्ठीयमानो धर्मः तेजः प्रभावः एतेषां परमयनम् ॥ ३९ ॥

किंच । मामिति । कथम्भूताः अगुणाः गुणपरिणामरूपा न भवन्ति किन्तु नित्या इत्यर्थः ॥ ४० ॥

मे मया अगृणत मां तुष्टुवुः ॥ ४१ ॥

प्रत्येयाय प्रत्यागतोऽस्मि ॥ ४२ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
त्रयोदशोऽध्यायः ॥ १३ ॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी।

स्वारम्भकं देहजनकं कर्म प्रारब्धलक्षणं तस्मिन् प्रारब्धरक्षिते देहे। अत एव आरूढसमाधियोगत्वादेव तथाच जीवन्मुक्तौ प्रमाणं श्रुतिः । तस्य जीवन्मुक्तस्य तावदेव चिरं विलम्बो यावत् प्रारब्धजदेहान्न विमोक्ष्यते अथ देहपतनानन्तरं संपत्स्ये ब्रह्मत्वं सम्पद्यते विदेहमुक्तो भवतीत्यर्थः ॥ ३७ ॥

उक्तार्थे ज्ञानभक्तियोगे । अत एव धर्माणामुपदिष्टत्वादेव ॥ ३८ ॥

स्वज्ञानस्यान्तर्भूतसर्वज्ञानत्वं दर्शयन् स्वस्य सर्वोत्कृष्टत्वं दर्शयति । अहमिति ॥ ३९ ॥

प्रियं निरुपाधिसर्वप्रेमास्पदम् । अतः सर्वोत्कृष्टे मयि तादृशगुणानुभवेन प्रेमभक्तिरेव साध्येति पर्यवसानवाक्यार्थः ॥ ४० ॥

परया भक्त्या प्रेमलक्षणया ॥ ४१ ॥

स्वकं धाम वैकुण्ठलोकम् ॥ ४२ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धीये
श्रीराधारमणदासगोस्वामिकृतदीपिकादीपने टिप्पणे
त्रयोदशोऽध्यायः ॥ १३ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

सकृत्समाधिलाभादेव मुक्त्यभावे हेतुमाह । देहोऽपीति । सासुः सप्राणः ज्ञानिनः इतरस्य च को भेद इत्यत्राह—तमिति । तं देहं स्वाप्नं स्वप्नपदार्थवदनित्यं सप्रपञ्चम् इतरपदार्थजातैः सह समाधिकाले प्रतिबुद्धवस्तुः साक्षात्कृतात्मवस्तुः पुरुषो न पश्यतीति देहस्य कर्मानुवर्त्तित्वं सर्वसाधारणं समाधिकाले स्वरूपसाक्षात्कारस्तादितरादर्शनं च योगिन इतरेभ्यो वैषम्यमित्यर्थः ॥ ३७ ॥

यज्ञं यज्ञशरीरकम् ॥ ३८ ॥

मोक्षोपयिकानां ज्ञानविशेषाणां धर्मविशेषाणामात्मगुणानां च प्रवर्त्तकोऽहमित्याह । अहं योगस्येति ॥ ३९ ॥

गुणाः कल्याणगुणा निर्गुणं हेयगुणरहितं के पुनस्ते कल्याणगुणगणा इत्यत आह । साम्येति । हितैषित्वादौ सर्वेषु समस्तत्साम्यम् असङ्गः स्वगतचिकीर्षितप्रतिघातरहितः ॥ ४०-४२ ॥

इति श्रीमद्भागवतव्याख्याने एकादशस्कन्धीये

श्रीसुदर्शनसूरिकृतशुकपक्षीये

त्रयोदशोऽध्यायः ॥ १३ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ननु, यदा समाधिर्निष्पद्यते किंतदैव कृत्यान्तराभावाद्योगिनो देहो नश्यति किम्वा कञ्चित्कालमनुवर्तत इति संशयाविष्टान्मुनीन् प्रत्याह—देहोऽपीति । दैववशगः दैवस्यान्तरात्मनो मम वशं गतः दैवायत्तसत्तास्थितिप्रवृत्तिकः अनेन निरन्तरसमाधिनिष्ठस्य कथं देहधारणमित्याशङ्काव्युदासः अपिशब्देन समाधिनिष्पत्तिरपि मत्सङ्कल्पायत्तेति विवक्षितं यावत्स्वारम्भकं कर्म तावत्सासुः सप्राणः प्रतिसमीक्षत एवावतिष्ठत एवेत्यर्थः । स्वस्य देहस्यारम्भकमभ्युपगतप्रारब्धात्मकमित्यर्थः । तथा च श्रूयते । तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथसम्पत्स्ये” इति । ननु, ज्ञानिनस्तदितरस्य च देहो यावत्स्वारम्भककर्मावस्थाय्येव तत्र को विशेष इत्यत आह—तमिति । सप्रपञ्चं सानुबन्धिनं स्वाप्नं स्वाप्नार्थवदनित्यं तं देहमधिरूढसमाधियोगः अधिरूढः प्राप्तः समाध्यात्मको योगो येन सः अत एव प्रतिबुद्धवस्तुः साक्षात्कृतवस्तुः पुमान् पुनर्न भजते इतरस्तु पुनर्देहान्तरं प्रतिपद्यत इतिभावः ॥ ३७ ॥

उपसंहरति। मयेति। साङ्ख्यं तत्त्वत्रयविभागपूर्वक ब्रह्मात्मकस्वात्मोपासनं योगो भगवदुपासनं तयोः सम्बन्धि यद्गुह्यं गोप्यं तदेतत् हे विप्राः!वो युष्मभ्यं मयाभिहितं सत्यमुक्तं किंतु दुष्कराविमौ साङ्ख्ययोगौ इत्यभिप्रायमालक्ष्य दुष्करोऽपि मां शरणं गतस्य मत्प्रसादात्सुकर एवेत्यत्र हेतुतया मोक्षोपयुक्तानां ज्ञानविशेषाणां च प्रवर्तकोऽहमेवेति विवक्षुस्तावदात्मन आत्माश्रयणीयत्वोपयुक्तनिरतिशयवात्सल्यादिगुणयोगितामाविष्करोति। जानीतेति।यज्ञं यज्ञनिर्वाहकं श्रीविष्णुं “यज्ञो वै विष्णुः” इति श्रुतेः “यज्ञायाचरतः कर्म समग्रं प्रविलीयते”इति स्मृतेश्चामां हंसरूपिणं युष्माकं धर्मो मोक्षधर्मः तद्विवक्षया आगतं जानीत ॥ ३८ ॥

अहमिति । हे द्विजश्रेष्ठाः! योगादीनामहं परायणमाश्रयः प्रवर्तक इत्यर्थः।तत्र सत्यं भूतहिताचरणम् ऋतं पुण्यं कर्म तेजः बाह्यकरणवशीकारप्रभावः श्रीर्वैराग्यादिसंपत् कीर्तिस्तत्प्रभवा प्रथा शमोऽन्तः करणनियमः ॥ ३९ ॥

किं बहुनेत्याह—मामिति । गुणाः कल्याणगुणाः निर्गुणं हेयगुणरहितं निरपेक्षकं स्वार्थनिरपेक्षपरदुःखनिराचिकीर्षुम् आत्मानमत एव प्रियं सुहृदं हितैकावहं भजन्त्याश्रयन्ति के पुनस्ते कल्याणगुणा इत्यत्राह—साम्येति । साम्यं वैषम्यराहित्यमानन्त्यश्चादिर्येषां ते ॥ ४० ॥

हंससनकादिसम्वादमुपसंहरति—इतीति । इतीत्थं मे मत्तो हंसरूपाच्छिन्नाः सन्देहा गुणचेतस्त्यागादिविषया येषां ते सनकादयः परयोत्कृष्टया भक्त्या मां सभाजयित्वा सम्यगाराध्य संस्तवैः स्तोत्रैरगृणात तुष्टुवुः अदादेश आर्षः ॥ ४१ ॥

तैः सनकादिभिरहं हंसरूपः परमेष्ठिनः पश्यतः सतः स्वकं धाम स्थानं वैकुण्ठाख्यं प्रतीयाय प्रत्यागतोऽस्मि प्रत्ययायेति पाठस्तु चिन्त्यः ॥ ४२ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्

त्रयोदशोऽध्यायः ॥ १३ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

दैवादुपेतमित्येतत्स्पष्टयति—देहोऽपीति । ननु, स्वयं देहपोषणादिप्रयत्नोदासीनश्चेत् कथं तिष्ठति इत्यतो वाऽऽह—देह इति । दैववशगः स्वादृष्टप्रेरकश्रीहर्यधीनो देहोऽपि तावत्प्रतिसमीक्षते प्रतीक्ष्यावतिष्ठते कार्यस्य जडस्य कारणावस्थानमन्तरणावस्थानं कथमत्राह । सासुरिति । प्राणवृत्तिसहितत्वात् । कियन्तं कालमत्राह । कर्मेति । यावत्स्वारम्भकं स्वोत्पादकादृष्टलक्षणं कर्मास्ति तत्समाप्तौ पततीत्येवार्थे खलुशब्दः तथाप्यभिमानो भवत्येवेत्यत्राह । तमिति । अधिरूढसमाधियोगः असम्प्रज्ञातसमाधिस्थः सप्रपञ्चं तं देहं पुनर्न भजेत् पूर्वं यथा तथाहतं न करोतीत्यन्वयः ।

“आदरो भजनं भक्तिर्बहुमानं च सेवनम् ।
पर्यायवाचकाः सर्वे स्मृतिस्तज्जन्यकर्म च” इति

वचनात् कथमिव प्रतिबुद्धवत् यथा स्वप्नादुत्थितः स्वाप्नं स्वप्नदृष्टं देहं न भजेत्तथेति ॥ ३७ ॥

इति हासं निगमयति—मयैतादिति ॥ ३८ ॥

कर्मयोगस्य साङ्ख्यस्य यथार्थज्ञानस्य सत्यस्य यथार्थभाषणस्य ऋतस्य भूतहितोपदेशिवेदस्य तेजसो बलस्य ब्रह्मवर्चसस्य वा श्रियः सम्पदः ॥ ३९ ॥

सर्वे गुणा असम्पूर्णगुणरूपा अप्रधानाः ब्रह्मादिदेवा एवंविधं मां भजन्ति । किंगुणाश्च मांभजन्ति कीदृशं । निर्गुणं प्रकृतिगुणवर्जितम् आत्मानं संपूर्णगुणरूपकम् अतएव निरपेक्षकम् अपूर्णगुणस्य हि गुणापेक्षा नच साऽस्यास्तीति अतएव सुहृदम् आनामत्तबन्धुम् अत एवाहमेव सेव्य इत्युक्तं प्रियं “तदेतत्प्रेयते” इति श्रुतेः “अपूर्णगुणरूपास्तु सम्पूर्णगुणरूपकम् । भजन्ति परमं ब्रह्म

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

देवास्त्रिगुणावर्जितम्" इति वचनात् के अगुणा इति तत्राह—साम्यासङ्गादय इति । ज्ञानादिगुणानां तारतम्येऽपि सर्वसामान्यादनभिधानं साम्यादीनां मद्भावाद्विशेषोक्तिरिति ज्ञातव्यम् ॥ ४० ॥

सनकादीनां भगवदुक्त्या छिन्नसंदेहत्वस्य किंलक्षणमित्यत्राह—इतीत्यनेन समाप्तिः ॥ ४१ ॥

पूजितः सम्यक् संस्तुतः इत्येताभ्यां संछिन्नसंशयत्वं लक्षयति ॥ ४२ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
त्रयोदशोऽध्यायः ॥ १३ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ॥

अत्र निजोक्तमादरयति—मयेत्यर्द्धेन । आदरे कारणविशेषत्वेन स्वपरिचयविशेषं करोति—जानीतेति । यं विष्णुं तत्त्वीश्वरत्वेन ज्ञापितमपि शिवादिरूपं युष्मद्धर्मविवक्षयेत्यनेन धर्मा अप्युपदिष्टा इति ज्ञेयम् ॥ ३८ ॥

स्वज्ञानस्यान्तर्भूतसर्वज्ञानत्वं दर्शयन् सर्वोत्कृष्टत्वं दर्शयति—अहमिति ॥ ३९ ॥

तथैव स्वज्ञानमुपदिशति—मामिति । ये त्वगुणाः गुणपरिणामा न भवन्ति ते प्रथमस्कन्धे पृथिव्या सत्यं शौचमित्यादिना बहुधा वर्णिताः साम्यासंगादयोऽनन्तगुणाः सर्वं एव मां भजन्ते तत्र हेतुः आत्मानं सर्वेषामाश्रयस्वरूपम् अतः सर्वोत्कृष्टस्वरूपास्ते सर्वोत्कृष्टस्वरूपं मां विना कथं वान्यं भजन्त्विति भावः। किञ्च, तादृशात्मत्वादेव निर्गुणम् । नतु जीववदविद्यया गुणसम्बद्धम् । निरपेक्षकं स्वेच्छयापि तदसम्बद्धम् अतश्चागुणपरिणामास्ते मां विनेत्यादिपूर्ववत् । किञ्च । तादृशात्मत्वादेव सुहृदं निरुपाधिसर्वहितकारिणं प्रियं निरुपाधिसर्वप्रेमास्पदम् अतो ममैव तादृशगुणावासत्वं युक्तमिति भावः । सर्वोत्कृष्टे मयि प्रेमभक्तिरेव साध्येति पर्यवसानवाक्यार्थः ॥ ४० ॥

ततश्च ते सन्देहं त्यक्तवन्तस्तां च भक्तिं मयि प्राप्तवन्त इत्याह—इतीति । परया भक्त्या प्रेमलक्षणया ॥ ४१–४२ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
त्रयोदशोऽध्यायः ॥ १३ ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

यावत् स्वारम्भकं कर्म तावत् साधुः सप्राणः सन् प्रतिसमीक्षते मुक्तस्यापि तस्य कर्मभोगप्रतीक्षां कुर्वन् जीवेदित्यर्थः ननु तर्हि तस्मिन् कदाचिदासज्जेदपि तत्र नेत्याह—तं देहं सप्रपञ्चम् इन्द्रियविषयभोगादिसहितमपि न भजते यथा प्रतिबुद्धवस्तुः प्राप्तजागरो जनः स्वाप्नं देहं पुनर्न भजते ॥ ३७ ॥

उक्तेऽर्थे तेषां विश्वासार्थं स्वस्वरूपमाह—मयेति । साङ्ख्यमात्मानात्मविवेकः योगोऽष्टाङ्गः धर्मस्य विवक्षया अनेन धर्मा अप्युपदिष्टा इति ज्ञेयम् । अतएव "यत्तेन हंसरूपेण ब्रह्मणोऽभ्यात्थ माधव" इत्यनुवादो भविष्यति ॥ ३८ ॥

अहो अद्भुतं ज्ञानमश्रौष्मेत्यतिचमत्कारवतस्तानालक्ष्याह—अहमिति । "ऋतं च सूनृता वाणी सत्यं च समदर्शनम्" इत्यग्रे वक्ष्यते तेजः प्रभावः एतेषां परायणं परमाश्रयः ॥ ३९ ॥

नन्वहं परायणमिति त्वद्वाक्यादेव तवास्मिन् देहेऽभिमानो दृश्यत इत्यतः कथं ज्ञानमस्मानशिक्षयद्भवानित्याशङ्क्य चेत् सत्यं नेदं मम शरीरं जीवस्येव स्वस्माद्भिन्नं भौतिकं नाप्यत्राहङ्कारादिकमपि प्राधानिकं किन्तु मत्स्वरूपभूतं सच्चिदानन्दमयमेवेत्याह । मां निर्गुणं मायिकगुणातीतं सर्वे गुणा भजन्ति निरपेक्षकं मायिकगुणापेक्षाशून्यं किन्तु सुहृदं स्वभक्तजनानां हितकारिणं यतः प्रियं तेषां प्रेमविषयीभूतं तेषु प्रीतिकर्त्तारं च "इगुपधज्ञाप्रीकिरः कः" इति कर्त्तरि कप्रत्ययविधेः के ते गुणाः साम्यं सर्वत्र प्राकृतवस्तुष्वौदासीन्यात् समत्वं च अप्राकृतेषु स्वभक्तेषु आसङ्ग आसक्तिश्च तदाद्याः आदिशब्दात् प्रथमस्कन्धे पृथिव्युक्ताः सत्यशौचादयश्चानन्ताः कीदृशाः अगुणाः गुणपरिणामरूपा न भवन्ति किन्तु नित्या इत्यर्थ इति श्रीस्वामिचरणाः "इमे चान्ये च भगवन्नित्या यत्र महागुणाः" इति । प्रथमे च अतः स्वरूपभूता एव गुणा आत्मानं स्वरूपमेव भजन्ति "न तस्य कार्य्यं करणं च विद्यते" इत्यादौ "स्वाभाविकी ज्ञानबलक्रिया च" इति श्रुतेः ॥ ४० ॥

अगृणात अगृणन्त मां तुष्टुवुः ॥ ४१ ॥
प्रत्ययाय प्रत्यागतोऽस्मि ॥ ४२ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
एकादशे सङ्गतः सत्सङ्गतोऽभूत्त्रयोदशः ॥ १३ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

नन्वेवं भूतज्ञानिनो देहोऽपाल्यमानः शीघ्रमेव पतेत्कथं तिष्ठेदिति चेत्तत्राह—देहोऽपीति । दैवं प्रारब्धं कर्म तद्वशगस्तदधीनः खल्विति निश्चये स्वारम्भकं स्वकारणं कर्म यावत् स्वस्मिंस्तिष्ठति तावत्प्रति साधुः प्राणसहितः समीक्षते तथाच प्रतीक्षंस्तिष्ठत्येवास्यापेक्षयापि न पतति चेत्तर्हि तस्य पालनमेव किं न कुर्याद्दोषाभावादिति चेत्तत्राह । तं देहं सप्रपञ्चं पुनर्न भजते मम सुखहेतुरयमित्येवं न पालयति नचान्यद्वस्तु तदर्थं सङ्गृह्णाति कुतः अधिरूढसमाधियोगः अधिरूढः प्राप्तः समाधिना योगो ध्येयभूतपरमात्मनः संयोगो येन सः सर्वव्यवहारहेतुत्वेन तस्य च ध्येयवस्तुनि लग्नत्वान्न वाह्यवस्तुनि प्रवृत्तिरित्यर्थः । तत्र दृष्टान्तः यथा प्रतिबुद्धः पुनःस्वाप्नं वस्तु न भजते तथेत्यर्थः । अत्र यथापदमध्याहृत्य योजनीयं प्रतिबुद्ध इत्यत्र सुब्लोप आर्षः प्रतिबुद्धवस्तुरित्येकपदकरणे तु अध्यगमत्स्वरूपम् अधिरूढसमाधियोग इति विशेषणाभ्यामुक्तार्थत्वात्पुनरुक्तचापत्त्या व्यर्थमेव स्यात् ॥ ३७ ॥

उपदिष्टं ज्ञानं सर्वशास्त्रसारभूतं तस्योपदेष्टृत्वं च परमेश्वरादन्यस्य न सम्भवतीत्यतः स्वस्य परमेश्वरत्वं व्यक्तमाह । मयेति । विप्रा ! इति सम्बोधनेन वेदाभ्यासवतां तत्त्वज्ञाने मुख्योऽधिकारः सूचितः साङ्ख्यमात्मानात्मविवेकः योगः पातञ्जल-

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

शास्त्रोक्तोऽष्टाङ्गयोगः तयोर्यद्गुह्यमतिरहस्यं तदेतन्मया वो युष्मभ्य मुक्तं किंच यज्ञं विष्णुमागतं मां जानीत नतु ब्रह्मणो वाहनमिति "यज्ञो वै विष्णुः" इतिश्रुतेः । तर्हि विष्णोर्हंसरूपेण किमर्थमागमनमिति चेत्तत्राह । युष्मद्धर्मविवक्षयेति । युष्मादृशानां परमहंसानां धर्मविवक्षयेति युष्मादृशानां परमहंसानां धर्मः आत्मानात्मविवेकेन सर्वसङ्गनिवृत्तिपूर्वकपरतत्त्वैकनिष्ठत्वं तस्य विवक्षया एतेन परमहंसधर्मोपदेष्टृत्वं विष्णोरपि हंसरूपेणैवोपपद्यते नान्यथेति दर्शितम् ॥ ३८ ॥

यज्ञमागतं मां जानीतेत्युक्तमिदानीं विष्णुत्वज्ञापकगुणानाह—अहमिति । सत्यं समदर्शनं निर्दोषरूपान्तर्यामिब्रह्मदर्शनमित्यर्थः ऋतं सत्यं प्रियवचनं तेजः परैरनभिभूयमानत्वे सति पराभिभवनसामर्थ्यं दमोऽन्तरिन्द्रियसंयमः भो द्विजश्रेष्ठाः एतेषां गुणानामहं परममयनमव्यभिचरिताश्रयं श्रियो लक्ष्म्याः शोभाया वा कीर्तेश्च तथेत्यर्थः ॥ ३९ ॥

पुनः सर्वगुणाश्रयत्वं दृढीकरोति । मामिति । साम्यासङ्गादयः सर्वे गुणा मां भजन्ति तत्र ब्रह्मादिपर्यन्तानां साधारणोपायोपेयत्वं साम्यं चराचरान्तः स्वरूपेणावस्थितत्वेऽपि तद्धर्मास्पृष्टत्वमसङ्गत्वं तौ आदी येषां ते कथम्भूतं मां निर्गुणं मायिकगुणशून्यं निरपेक्षकं किंचिद्वस्त्वपेक्षारहितं कथं तर्हि क्वाचिदन्यभूमिनवनीतादियाच्ञाकरणमितिचेत्तत्राह । सुहृदं प्रियं च भक्तसुहृत्त्वात् प्रियत्वादकृत्यमपि करोमीति भावः । ननु तर्हि, सक्तपक्षपातात् कथं साम्यं कथम्वाऽसङ्गत्वमिति चेत्तत्राह । आत्मानं सर्वेषामात्मानम् आत्मत्वात्समोऽपि सुरतरुवद्भजतामेव मनोरथपूरको नान्येषामतो न वैषम्यमत एवासङ्गत्वमपि सिद्धं कथम्भूता गुणा अगुणाः प्राकृतगुणविलक्षणा दिव्या इत्यर्थः ॥ ४० ॥

हंसोपदेशस्य समाप्तिमाह—भगवान्—इतीति । इत्युक्तगुह्यतत्त्वोपदेशेन हंसरूपेण मया कर्त्रा छिन्नसंदेहाः सनकादयो मुनयः परया भक्त्या मां सभाजयित्वा पूजयित्वा संस्तवैः समीचीनस्तोत्रैरगृणत तुष्टुवुः ॥ ४१ ॥

तैरिति । तैः परमर्षिभिः सम्यक्पूजितः संस्तुतश्चाहं परमेष्ठिनः पश्यतः स्वकं धाम वैकुण्ठं प्रति एवाय आगच्छम् ॥ ४२ ॥

"कृष्णहंसः स्वशिष्येभ्यो गुह्यतत्त्वमुवाच यत् ।
तदादरेण तद्भक्ताः प्रीत्या शृणुत धत्त च" ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
त्रयोदशाध्यायार्थप्रकाशः ॥ १३ ॥

भाषा टीका ।

देह भी प्रारब्ध के वश होने से जब तक उसके आरंभ कर्म समाप्त न होंगे तब तक प्राणों के सहित प्रतीक्षा करैगा हि नष्ट नहीं होगा, परन्तु जो पुरुष समाधियोग मे आरूढ होगया है सो तो वस्तु के बोध हो जाने से स्वप्नकी नाई प्रपंच सहित उस देह को फिर नहीं भजता है ॥ ३७ ॥

हे विप्रो ! मैंने तुम से सांख्य तथा योग मे गुप्त जो अर्थ सो कहा है मैं यज्ञ पुरुष नारायण हूँ तुमको धर्मोपदेश करने को आया हूँ ऐसा जानो ॥ ३८ ॥

हे द्विजश्रेष्ठो ! मैं योग सांख्य सत्य सुंदर वचन तेज शोभा कीर्ति दम इन सब गुणों का आश्रय हूं ॥ ३९ ॥

मैं प्राकृत गुणों से रहित हूं इसी से निरपेक्ष हूं सब भूतों का सुहृद हूं प्रिय हूं अन्तरात्मा हूं इसी से साम्य असङ्ग आदिक सब गुण मेरे को भजते हैं ॥ ४० ॥

इस प्रकार से सनकादिक मुनि लोगों का जब मेरे से सन्देह के छूट गया तब परमभक्ति से हमारा पूजन करके स्तोत्रों से स्तुति करने लगे ॥ ४१ ॥

उन परम ऋषियों से हम पूजित होकर तथा स्तुति पाकर ब्रह्माजी के देखते ही अपने धाम वैकुण्ठ को चले गये ॥ ४२ ॥

इति श्रीमद्भागवत एकादशस्कन्ध में तेरमां अध्याय की
श्री वृन्दावनस्थ पं० लक्ष्मणाचार्यकृत
भाषा टीका समाप्त ॥ १३ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे त्रयोदशोऽध्यायः ॥ १३ ॥

अथ चतुर्दशोऽध्यायः ।

———:*:———

उद्धव उवाच ।

वदन्ति कृष्ण ! श्रेयांसि बहूनि ब्रह्मवादिनः ।
तेषां विकल्पप्राधान्यमुताहो एकमुख्यता ॥ १ ॥
भवतोदाहृतः स्वामिन् ! भक्तियोगोऽनपेक्षितः ।
निरस्य सर्वतः सङ्गं येन त्वय्याविशेन्मनः ॥ २ ॥

श्रीभगवानुवाच ।

कालेन नष्टा प्रलये वाणीयं वेदसंज्ञिता ।
मयाऽऽदौ ब्रह्मणे प्रोक्ता धर्मो यस्यां मदात्मकः ॥ ३ ॥
तेन प्रोक्ता च पुत्राय मनवे पूर्वजाय सा ।
ततो भृग्वादयोऽगृह्णन् सप्त ब्रह्ममहर्षयः ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

चतुर्दशे परं श्रेयो भक्तिरेव नचेतरत् ।
इत्येतद्वर्ण्यते ध्यानयोगश्च सह साधनैः ॥

एवं तावद्भगवता भक्त्या मोक्ष इत्युक्तमन्ये त्वन्यानि साधनानि वदन्ति तत्र विशेषनिर्धारणाय पृच्छति—वदन्तीति । श्रेयांसि श्रेयःसाधनानि किं विकल्पेन प्राधान्यमुताहो किं वा एकस्यैव मुख्यता ॥ १ ॥

एकमुख्यतापक्षोत्थाने कारणम् भवतेति न अपेक्षितमपेक्षा यस्मिन्सोऽहैतुकः अयमर्थः भवता यो भक्तियोग उक्तः अन्ये च यानि श्रेयःसाधनानि वदन्ति तेषां किं साक्षात्फलसाधनत्वेन प्राधान्यमेव सर्वेषामुताङ्गाङ्गित्वम् प्राधान्येऽपि किं विकल्पेन सर्वेषां तुल्यफलत्वं यद्वा कश्चिदस्ति विशेष इति ॥ २ ॥

तत्र भक्तिरेव महाफलत्वेन मुख्या अन्यानि तु स्वस्वप्रकृत्यनुसारेण पुष्पस्थानीयस्वर्गादिफलबुद्धिभिः प्राणिभिः प्राधान्येन परिकल्पितानि क्षुल्लकफलानीति विवक्तुं प्रकृत्यनुसारेण बहुधा वेदार्थप्रतिपत्तिमाह—कालेनेति सप्तभिः । मदात्मकः मय्येवाऽऽत्मा चित्तं येन सः ॥ ३ ॥

भृग्वादयः भृगुश्च मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुरित्येते च सप्त ब्रह्माणः प्रजापतयस्ते च ते ब्रह्मर्षयश्च ॥४॥५॥

———

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी ।

परमुत्तमं श्रेयःसाधनं भक्तिरेव इतरद् धर्मयज्ञादिकन्तु, परं श्रेयो न भवति इत्येतच्चतुर्दशेऽध्याये श्रीकृष्णेन वर्ण्यते । अन्ये तु मीमांसकादयः अन्यानि धर्मादीनि । तत्र तेषु साधनेषु मध्ये । विशेषनिर्धारणाय गौणमुख्यनिर्णयाय । विविधः कल्पो विकल्पः एवं वा एवं वेति यावत् तेन प्राधान्यम्॥१॥

ननु, निरपेक्षो भक्तियोगो मयोक्तश्चेदलमन्यसाधनप्रश्नेनेति चेत्तत्रोच्यते—अयमर्थ इति । तेषां धर्मादिसाधनानां साक्षात् फलसाधनत्वेन अव्यवहितमुक्तिफलोपधायकत्वेन । उत किम्वा । अङ्गाङ्गित्वं यथा दर्शपौर्णमासादीनां परमापूर्वं प्रत्यङ्गत्वेऽपि प्रयाजाद्यपेक्षयाङ्गित्वं तथा केषामङ्गित्वं केषां चाङ्गत्वमित्यर्थः । कश्चिदस्ति विशेष इति प्राधान्येऽपि । क्लेशोऽधिकतरस्तेषां कृच्छ्रो महानिव भवार्णवमप्लवेशामित्यादिन्यायेन क्लेशाक्लेशलक्षणो विशेषः कश्चिदस्ति वेत्यर्थः ॥ २ ॥

तत्र तेषु साधनेषु मध्ये । अन्यानि धर्मादीनि क्षुल्लकफलानि तुच्छफलानि । कालेनेति सन्दंकम् । आदौ ब्राह्मकल्पादौ ३

तत इति युग्मकम् । ततो मनुं प्रति कथनानन्तरं ब्रह्माणश्च ते महर्षयश्चेति विशेषणयोः कर्मधारयः तत्र प्रजापतयः प्रजास्रष्टारः महर्षयो वेदज्ञाः ॥ ४ ॥ ५ ॥

———

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

श्रेयांसि पुरुषार्थसाधनानि विकल्पप्राधान्यं विकल्पेनैकस्य

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

तुल्यफलं प्रति निरपेक्षसाधनतया प्राधान्यमेकमुख्यता एकस्यैव प्राधान्यम् ॥ १ ॥

अनपेक्षितः अपेक्षितान्तररहितः अननुमतइतिवत् येन भक्तियोगेन ॥ २—६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अधिरूढसमाधियोगः "स्वाप्नं पुनर्न भजते प्रतिबुद्धवस्तुः" इति परब्रह्मोपासनमेव मोक्षाख्यश्रेयःसाधनमित्युक्तं तत्र मोक्षाख्यपुरुषार्थस्य स्वेतरव्यावृत्तत्वानिर्दिधारयिषया पृच्छति । वदन्तीति-ब्रह्म वेदमधीयतेऽध्यापयन्ति चेति ब्रह्मवादिनः अनेन सर्वेषां वादानां वेदमूलत्वं वेदस्यानादित्वं च ज्ञापितं श्रेयांसि धर्मार्थकामरूपाणि इदं तत्साधनानामप्युपलक्षणं वदन्ति किं तेषां विकल्पः उत प्राधान्यमहो किं वा एकस्यैव मुख्यता भवतीति शेषः ॥ १ ॥

भवता तु हे स्वामिन् ! अनपेक्षितः फलापेक्षारहितः इत्यर्थः भक्तियोग उदाहृतः मोक्षसाधनत्वेन कथितः तत्र तेषां ब्रह्मवादिभिरुक्तानां श्रेयसां तत्साधनानां च त्वदभिहितमोक्षतत्साधनाभ्यां सह विकल्पः मोक्षशब्दाभिलपनीयस्य श्रेयसो ब्रह्मवाद्युक्तश्रेयोऽन्तरान्तर्भूतत्वे तदुक्तसाधनैः सह त्वदुक्तभक्तियोगस्य विकल्पेनानुष्ठानप्रसङ्गः फलस्य धर्माद्यनतिरिक्तत्वात् व्रीहियवयोश्चानतिरिक्तसाध्ययोर्व्रीहिभिर्यजेत यवैर्यजेतेति विकल्पः प्रसिद्ध इति भावः । यदि धर्मादिभ्यो विजातीयो मोक्षः स्यात्तदा धर्मादीनां मोक्षस्य च तारतम्यं निश्चेतव्यं किं सर्वेषां श्रेयःसाधनानां प्राधान्यं परस्परमङ्गाङ्गिभाववैधुर्येण स्वस्वफलं प्रति प्रधानोपायतयानुष्ठेयत्वमिति द्वितीयविकल्पार्थः यद्येषां मध्ये कस्यचिदेवोत्कृष्टत्वं तदा सत्युत्कृष्टे फले निकृष्टलिप्सानुदयात्तस्यैवेप्सिततमत्वात् तल्लिप्सोः तत्साधनस्यैवानुष्ठेयत्वात् तस्यैव प्राधान्यादितरेषाम् उपयोग विशेषविवेकेन समभिहितसाधनाङ्गतयानुष्ठानं स्यादित्याशयेन तृतीयकोट्युदयः तदुक्तं भक्तियोगं विशिनष्टि । निरस्येति । येन भक्तियोगेन सर्वतः सर्वेभ्यः सङ्गं निरस्यापोह्य मनस्त्वय्येवाविशेदिति ननु यद्यपि भगवत्येव मनःस्थैर्यसाधनत्वकथनेन भक्तियोगस्य धर्मादिभ्यो विलक्षणश्रेयःसाधनत्वज्ञानसद्भावावगमाद्विकल्पानुपपत्तिस्तथापि मनसस्त्वय्यावेशेन साध्यो मोक्षः किं धर्माद्यन्तर्भूत उत तद्व्यतिरिक्तः अतिरिक्तत्वेऽपि किस्वा तत्साध्यमस्त्युत नेति तारतम्येऽप्यङ्गाङ्गिभावोऽस्त्युत नेति संशयेन तदुपपत्तिः ॥ २ ॥

तत्र ब्रह्मवादिनो वदन्तीत्यनेन यज्ज्ञापितं वेदस्यानादित्वं तदङ्गीकुर्वन्नाह । कालेनेत्यादिना । प्रलये प्राकृतप्रलये वेदसञ्ज्ञितेयं मम वाणी कालेनाध्येत्रध्यापयितृरहितेन नष्टा विप्लुतयथावस्थितवर्णपरंपरा बभूव सैव पुनर्मया सर्वज्ञेन जगत्सिसृक्षुणा आदौ कल्पादौ ब्रह्मणे चतुर्मुखाय प्रोक्ता अविप्लुतानुपूर्वीविशिष्टतया आविष्क्रियमाणा उपदिष्टेत्यर्थः तां विशिनष्टि । धर्मो यस्यां मदात्मक इति । अहमात्मा स्वरूपं यस्य स धर्मः यस्यां वाण्यामभिव्यक्तः —

ये च वेदविदो विप्रा ये चाध्यात्मविदो जनाः ।
ते वदन्ति महात्मानं कृष्णं धर्मं सनातनम् इति ॥

श्रीकृष्णस्य धर्मत्वं श्रीमन्महाभारते प्रसिद्धं धैर्यत्वे सत्यलौकिकश्रेयःसाधनत्वं हि धर्मत्वं तच्च भगवत्यस्ति अमृतस्यैषसेतुरिति श्रवणात् अतो मदात्मक इत्युक्तम् अनेन मदात्मकधर्मप्राधान्यपरैवेयं कृत्स्ना वेदसंज्ञिता वाणी यागादीनां धर्मत्वप्रतिपादनपरः पूर्वभागोऽप्यनभिसंहितफलयज्ञादिसाध्यमत्प्रीतियुक्तमत्प्राप्तिप्रतिपादनपर एवेति सोऽपि मदात्मकधर्मप्रतिपादनपर एवेति फलितम् ॥ ३ ॥

किञ्च तेन ब्रह्मणा प्रथमजाय पुत्राय मनवे स्वायम्भुवाख्याय सा वाणी प्रोक्ता तत्रेति तत्र स्वायंभुवे मन्वन्तरे तत इति पाठेऽपि स एवार्थः भृग्वादयः भृगुमरीच्यत्र्यङ्गिरः पुलस्त्यपुलहक्रतवः सप्त ब्रह्ममहर्षयः प्रतिमन्वन्तरं सप्तर्षिभेदः प्रतिपादितोऽष्टमे स्कन्धेऽवगन्तव्यः ततो ब्रह्मणः सकाशादगृह्णन् गृहीतवन्तः वाणीमिति शेषः ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भगवत्साक्षात्काराय सर्वस्मादुत्तमसाधनं भक्तिरेव तद्भूताचेत्थं ध्येयो हरिरिति द्वयमस्मिन्नध्याये विधत्ते तत्रोद्धवप्रश्नपूर्वकं प्रश्नाम्नायं कथयति । वदन्तीति । श्रेयांसि प्रशस्तानि साधनानि तेषां साधनानां यवाग्वा पयसावेति यदिदं भवतीदं वेति विकल्पो वा सम्भूय सर्वेषां प्राधान्यमुतैकस्य मुख्यता अन्येषां च तदुपसर्जनत्वं चेति ॥ १ ॥

भवतानपेक्षितः अन्यापेक्षारहितोऽखिलसाधनोत्तमो भक्तियोग उदाहृतः तथापि ब्रह्मवादिमतानां का गतिरिति शेषः येन भक्तियोगेन ॥ २ ॥

वेदमूलान्येव श्रेयांसि तत्र मत्प्रीतिसाधनं भक्तिलक्षणो धर्मः श्रेयसामुत्तम इति दर्शयितुं श्रद्धाजननाय वेदोक्तपरंपरामाह । कालेनेत्यादिना । कालेन कालशक्त्या मदात्मको मद्विषयः ॥ ३ ॥

मनवे स्वायम्भुवाय कीदृशोऽयं तद्धितप्रत्ययः इत्येतत्स्पष्टयति । पुत्रायेति । स्वयम्भुवः पुत्रत्वात्स्वायम्भुव इत्यर्थः अत्र मनोः पूर्वजत्वं रुद्रेन्द्रकुमारान्विनेति ग्राह्यम्—

रुद्रमिन्द्रं कुमारञ्च विनैवान्याग्रजो मनुः ।
ब्रह्मपुत्रेष्वादिसृष्टावन्यथात्वं पुनर्जनेः ॥
इति वचनात्——
आदिसृष्टौ पूर्वजा ये तेऽधिकाः सर्वतो गुणैः ।
अनाद्यनन्तकालेषु मुक्तावपि यथाक्रमम् ॥

इति च ॥ ४—५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

पूर्वं यत् तस्मात्त्वमुद्धवोत्सृज्येत्यादिभिर्भक्तियोगस्य नैरपेक्ष्यमभ्यस्तं तदेव मतान्तरनिरासेन द्रढयितुं पृच्छति । वदन्तीति ॥ १ ॥

निरस्येति फलान्तरसापेक्षत्वमपि निरस्तम् ॥ २ ॥

कालेनेति सार्द्धकम् । कालेन नष्टा तत्रापि प्रलये कल्पान्ते बहुनष्टेत्यर्थः । इयमिति भवतेत्यादिना यथा भवताऽनूद्यते तथा

तेभ्यः पितृभ्यस्तत्पुत्रा देवदानवगुह्यकाः ।
मनुष्याः सिद्धगन्धर्वाः सविद्याधरचारणाः ॥ ५ ॥
किं देवाः किन्नरा नागा रक्षःकिम्पुरुषादयः ।
बह्व्यस्तेषां प्रकृतयो रजःसत्त्वतमोभुवः ॥ ६ ॥
याभिर्भूतानि भिद्यन्ते भूतानां मतयस्तथा ।
यथाप्रकृति सर्वेषां चित्रा वाचः स्रवन्ति हि ॥ ७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

निरूपिकेत्यर्थः । एतेन ज्ञानादिकं ज्ञानादिभिरत्वं महावैशाग्य-फलत्वञ्च नमन्मतमिति बोधितम्, आदौ ब्राह्मकल्पादौ मदात्मको मत्स्वरूपभूतो ह्लादिनी सारूपत्वात् ॥ ३ ॥

तत इति युग्मकं तेभ्यस्तत्पुत्रास्तत्परम्परायामेवान्येभ्यश्च पितृभ्योऽन्य इत्यर्थः ॥ ४—६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

भक्तेः कृष्णवशीकारसर्वोत्कर्षश्चतुर्दशे ।
तद्भृताञ्च मुमुक्षोः सम्मतं ध्यानं च वर्णितम् ॥

श्रुतानां श्रोतव्यानां च श्रेयःसाधनानां तारतम्यादिकं पृच्छति । वदन्तीति । श्रेयांसि श्रेयःसाधनानि किंविकल्पेन प्राधान्यम् इदं प्रधानमिदं वा प्रधानमिति उताहो एकस्यैव मुख्यता इदमेव प्रधानमिति ॥ १ ॥

भवन्मते तु भक्तियोग एव मुख्य इत्याह । भवतेति । अनपेक्षितः निष्कामो भक्तियोग एव भवता उदाहृतः उत्कर्षेण आहृतः आनीतः येन मनस्त्वदाविष्टं स्यात् स किं सर्वेषामपि श्रेष्ठ्ये सम्मतः उत तवैवेति निर्द्धार्य्य उच्यतामिति भावः ॥ २ ॥

भो उद्धव !,सर्व्वमतानि वेदोत्थितानि तस्य वेदस्य तु मद्भक्तियोग एव तात्पर्य्यमित्याह । कालेनेति । मदात्मकः मत्स्वरूपभूतः भक्तियोगस्य ह्लादिनीसारभूतत्वात् यद्वा मय्येव आत्मा चित्तं यतः चित्तस्य मदाविष्टता मद्भक्त्यैव भवेत् भक्त्याहमेकया ग्राह्य इति मद्वचनात् भक्त्यैवाहमिन्द्रियैर्ग्रहीतुं शक्यो नान्यथेति तत्रार्थो द्रष्टव्यः ब्रह्मवादिभिरुक्तानां मद्भक्तियोगादन्येषां श्रेयसां मत्प्रापकत्वाभावात् श्रेयस्त्वमेव वस्तुतो नास्तीत्यतस्तेषां विकल्पतः प्राधान्येन एकस्य मुख्यत्वेन वा जिज्ञास्येन तव किम्प्रयोजनमिति भावः ॥ ३ ॥

कथं ततो नाना मतान्युद्भूतानि तत्राह । तेनेति सार्द्धैरष्टाभिः । भृग्वादयः भृगुश्च मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुरित्येते च सप्त ब्रह्मणः प्रजापतयः ते च ते महर्षयश्च किन्देवाः कुमस्वेदर्दौर्गन्ध्याविराहित्येन किन्देवा मनुष्या वेति संदेहास्पदीभूताः द्वीपान्तरमनुष्या एव किन्नराः किञ्चिन्नरा इव मुखतः शरीरतो वा किम्पुरुषाः किञ्चित् पुरुषा इव वनारादयः ॥४॥५॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

भगवता ज्ञानवैराग्यविजृम्भितया स्वभक्त्यैव स्वप्राप्तिरूपा मुक्तिरुक्ता अन्ये त्वन्यथा वदन्ति तेषां मोहितत्वं ज्ञानवैराग्यभक्तिदार्ढ्यं च भगवन्मुखादेव श्रोतुं पृच्छति । वदन्तीति द्वाभ्याम् । हे कृष्ण ! सदानन्द ब्रह्मवादिनः वेदवादिनः श्रेयांसि बहूनि वदन्ति तेषां विकल्पेन प्राधान्यम् उताहो एकस्यैव मुख्यता ॥ १ ॥

अनपेक्षितः नास्ति अपेक्षा फलापेक्षा यस्मिन् सः ॥ २ ॥

नष्टा अन्तर्हिता मदात्मकः मद्ममात्मा आश्रयो यस्य सः अनेन वेदस्य मदात्मकधर्मपरत्वमस्ति मत्सम्बन्धवर्जितकर्मादिषु वेदसमन्वयकल्पनमयुक्तमित्युक्तम् ॥ ३ ॥

मनवे स्वायम्भुवाय ततः मनुतः भृग्वादयः भृगुश्च मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुरित्येते सप्त ब्रह्मणः प्रजापतयस्ते च ते महर्षयः अगृह्णन् तामिति शेषः ॥ ४ ॥

भाषा टीका ।

उद्धव उवाच हे कृष्ण ! ब्रह्मवादि लोग बहुत से साधन मोक्ष के कथन करते हैं क्या वे साधन सबही अलग २ श्रेष्ठ हैं अथवा उन मे कोई एक श्रेष्ठ प्रधान है ॥ १ ॥

हे स्वामिन् ! आपने तो केवल निरपेक्ष भक्ति योगही कहा है जिस मे कि सब तरफ से संग को छोड कर आप के विषय मे मन का योग हो जावै ॥ २ ॥

श्रीभगवान उवाच वेद नामकी यह वाणी जिसको की कि मैने सृष्टि के आदि मे ब्रह्माजी से कहा था जिसमे मेरा प्रतिपादक धर्म है वह वेद वाणी बहुत काल पाकर नष्ट प्राय हो गई ॥ ३ ॥

तिन ब्रह्माजी ने पूर्वज मनुजी के अर्थ कही तिसके पीछे सप्त महर्षि भृगु आदिकों ने ग्रहण किया ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

किं देवाः कलमस्वेददौर्गन्ध्यादिराहित्येन किं देवा मनुष्या वेति सन्देहास्पदद्वीपान्तरमनुष्याः एवं किन्नराः किञ्चिन्नरा इव मुखतः शरीरतो वा किम्पुरुषाः किञ्चित्पुरुषा इव वानराः

एवं प्रकृतिवैचित्र्याद्भिद्यन्ते मतयो नृणाम् ।
पारंपर्येण केषांचित्पाखण्डमतयोऽपरे ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

द्यः प्रकृतयो वासना बह्व्यः कुतः रजः सत्त्वतमांसि भुवः जन्मस्थानानि यासां ताः ॥ ६ ॥

भूतानि देवासुरमनुष्यादीनि चित्रा वाचो वेदार्थव्याख्यानविषयाः ॥ ७ ॥

एवमित्युक्तोपसंहारः केषाञ्चिदध्ययनादिशून्यानामप्युपदेशपारम्पर्येण अपरे पाखण्डमतयो वेदविरुद्धार्थमतयः ॥ ८ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी ।

किं देवकिन्नरयोर्देवत्वनरत्वांशप्राधान्येन विशेषो न ॥ ६ ॥

याभिर्वासनाभिः यथेत्यर्थकम् । यथाप्रकृति वासनानुसारेण चित्राः व्याख्याने विविधप्रकारावच्छिन्नाः स्रवन्ति निःसरन्ति॥ ७ ॥

अध्ययनादिशून्यानामपीत्यत्र यद्यपि मतिभेदेन तेषां व्यक्त्यभावस्तथापि उपदेशपारम्पर्येणेत्यपेरर्थः ॥ ८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

भूतानि भिद्यन्त इति जात्याभेदोविवक्षितः ॥ ७—८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तेभ्यः सप्तर्षिभ्यः पितृभ्यः स्वस्य पितृभ्य इत्यर्थः । सकाशात्तत्पुत्रा देवादयोऽगृह्णन्निति पूर्वेण सम्बन्धः तत्र गुह्यकाः यक्षाः ॥ ५ ॥

किन्देवकिन्नरकिम्पुरुषा देवादिवज्जातिविशेषाः एवं वेदस्यानादिनिधनत्वं प्रतिपादितमथ यत्सर्वेषां वादानां वेदमूलकत्वमिति तत्प्रतिक्षेप्तुम्—

> अधर्मं धर्ममिति या मन्यते तमसावृता ।
> सर्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ ! तामसी ।
> तत्र सत्त्वं निर्मलत्वात्प्रकाशकमनामयम् ।
> सत्त्वात्सञ्जायते ज्ञानम् ॥

इत्यादि । प्रमाणप्रतिपन्नरजःसत्त्वतमोगुणानुगुणस्वभावत्वादीनां तत्र सात्त्विकस्वभावानां यथावस्थितवेदार्थावगमे सत्यपीतरस्वभावानां विपरीतबुद्धित्वात्स्वस्वबुद्ध्युत्प्रेक्षितार्थमूलकाः सर्वे वादा नतु वेदैकमूलका इत्याह।बह्व्य इति । तेषां ब्रह्मादिकिम्पुरुषादिपर्यन्तानाम् प्रकृतयः रजःसत्त्वतमांसि भुवः जन्मस्थानानि यासां ताः ॥ ६ ॥

प्रकृतीर्विशिनष्टि याभिरिति । याभिः प्रकृतिभिर्भूतानि भिद्यन्ते भिद्यन्त इति जात्यादिभेदो विवक्षितः तथाभूतानां मतयश्च भिद्यन्ते प्रकृतिरत्र स्वभावः सच कर्मानुगुणज्ञानप्रयत्नचिकीर्षाक्रियाद्युत्पत्तिरन्तःकरणगतः सत्त्वादिगुणकार्यविशेषात्मकः यथा प्रकृति यथास्वभावं स्वस्वभावानतिक्रमेण सर्वेषां चित्रा वाचः स्रवन्ति प्रवहन्ते प्रवर्तन्त इत्यर्थः ॥ ७ ॥

एवं यथा यथावाचश्चित्राः स्रवन्ति तथा तथा प्रकृतिवैचित्र्यान्मतयो भिद्यन्ते नृणामिति देवादीनामपि प्रदर्शनार्थं मतिवैचित्र्ये निदर्शनाभिप्रायेणाह । पारंपर्येणेति । तथाहि केषांचित्तमःस्वभावानामनादिनिधनमपि वेदं पौरुषेयमत एव तत्रापि भ्रमविप्रलम्भादिपौरुषदोषसम्भावनयाप्रमाणं मन्यमानानाम् स्वस्वभावानुगुणबुद्ध्युत्प्रेक्षितवेदार्थविरुद्धार्थस्मर्तॄणां मूलपुरुषाणां पारम्पर्येणोपदेशपरंपरया इतरे तदनुयायिनः केचिदर्वाचीनाः पुरुषाः हे पुरुषर्षभ! पाखण्डमतयः यथावस्थितवेदविरुद्धार्थमतयः दृश्यन्त इतिशेषः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

रजःसत्त्वतमोभुव इति पाठः ॥ ६ ॥

याभिः प्रकृतिभिः भूतानामतिभेदेऽपि वेदस्यैकत्वेन तदर्थोऽप्येकविषय एवेति तत्राह । यथा प्रकृतीति । वेदवाचः चित्राः स्रवन्ति धर्माद्यशेषार्थप्रतिपादका वाचः स्वमनीषार्थे प्रमाणवत् प्रतिभान्तीत्यर्थः ॥ ७ ॥

ततः किन्तत्राह । एवमिति । यथा प्रकृतिवैचित्र्याद्वेदवागर्थप्रतीतिवैचित्र्यमेवं मतयोऽपि विचित्राः । ननु श्रुतिमूलत्वेन गुरुपरम्परागतत्वेन सर्वेषामपि मतानां प्रामाण्यमवगतं स्यादत्राह पारम्पर्येणेति । अनेन मनुक्तपारम्पर्येणागतानि केषांचिद्वादीनामेव तानि प्रमाणान्यन्यानि राजसादीनीत्यर्थः, विरलत्वापेक्षया केषाञ्चिदित्युक्तं वामशैवादीनि तामसत्वेन पाखण्डानीत्याह । पाखण्डेति ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

यथेत्यर्थकम् ॥ ७—६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

प्रकृतयो वासना बह्व्यः कुतः रजःसत्त्वतमांसि भुवो जन्मस्थानानि यासां ताः भूतानि देवासुरमनुष्यादीनि ॥ ६ ॥

चित्रा वाचः वेदार्थव्याख्यानरूपाः ॥ ७ ॥

पारम्पर्येण गुरूपदेशपरम्परया पाखण्डमतयः अतितमःप्रकृतित्वाद् वेदविरुद्धार्थमतयः तेन भागीरथ्या जलं शुद्धं मधुरमपि तत्तटवर्त्यैरण्डनिम्बनिम्बाककपित्थविल्वविषवृक्षादिभिः

मन्मायामोहितधियः पुरुषाः पुरुषर्षभ ! ।
श्रेयो वदन्त्यनेकान्तं यथाकर्म यथारुचि ॥ ९ ॥
धर्ममेके यशश्चान्ये कामं सत्यं दमं शमम् ।
अन्ये वदन्ति स्वार्थं वा ऐश्वर्यं त्यागभोजनम् ॥
केचिद्यज्ञतपोदानं व्रतानि नियमान् यमान् ॥ १० ॥
आद्यन्तवन्त एवैषां लोकाः कर्मविनिर्मिताः ।
दुःखोदर्कास्तमोनिष्ठाः क्षुद्रानन्दाः शुचाऽर्पिताः ॥ ११ ॥
मय्यर्पितात्मनः सभ्य ! निरपेक्षस्य सर्वतः ।
मयाऽऽत्मना सुखं यत्तत्कुतः स्याद्विषयात्मनाम् ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

स्वस्वमूलद्वारा गृहीतं विरसं विरुद्धरसं च यथा भवेत्तथैव,तेषां तेषां व्याख्यातॄणां मुखं प्राप्य वेदार्थोऽपि विरसो विरुद्धफलप्रदश्च भवेदिति भावः ॥ ८ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तेभ्यो ब्रह्ममहर्षिभ्यो देवादयोऽगृह्णन्निति पूर्वेणान्वयः ॥ ५ ॥

रजःसत्त्वतमांसि भुवः उत्पत्तिभूमयो यासां ताः ॥ ६ ॥

भूतानि राजससात्त्विकतामसरूपाणि मनुष्यदेवादीनि मतयः पुनस्तेषां तादृशजन्मादिहेतुभूताः बुद्धयः यथाप्रकृति राजसत्वादिस्वभावानुरूपं स्रवन्ति जपयज्ञादिपरतया तत्तद्बुद्धौ प्रवर्त्तन्ते ॥ ७ ॥

केषांचित्पारंपर्येण वेदावलम्बिपरंपरागतोपदेशेन अपरेतु पाखण्डमतयो वेदावलम्बिपरंपरागतोपदेशनिरपेक्षबुद्धयः ॥ ८ ॥

———

भाषा टीका ।

उन पितरों से उनके पुत्रों ने ग्रहण किया फिर देवता दान व गुह्यक मनुष्य सिद्ध गंधर्व विद्याधर चारण इनों ने ग्रहण किया ॥ ५ ॥

फिर किंदेव किन्नर नाग रक्षः किंपुरुष आदिक उन सर्वों के रजसत्वतमोगुणकी प्रकृति हैं ॥ ६ ॥

जिन प्रकृतियों से भूतों की मति नाना प्रकारकी भिन्न होती हैं जैसी जिनकी प्रकृति है तैसे तिन के वचन निकलते हैं ॥ ७ ॥

इस प्रकार प्रकृतियोंकी विचित्रता से मनुष्यों की मतियों के भेद होते हैं इनके परंपरा से और कोई दुसरे पाखंड मति वाले हो जाते हैं ॥ ८ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

तत्प्रकृतीनां मायागुणमूलत्वान्मन्मायामोहितधियः अनेकान्तं नानाविधम् ॥ ९ ॥

तदेवाऽऽह—धर्ममिति सार्धेन । धर्मं कर्ममीमांसकाः यदुक्तम्

मोक्षार्थी न प्रवर्तेत तत्र काम्यनिषिद्धयोः ।
नित्यनैमित्तिके कुर्यात्प्रत्यवायजिहासया ॥

इत्यादि यशः काव्यालङ्कारकृतः यथाऽहुः—

यावत्कीर्तिर्मनुष्यस्य पुण्या लोकेषु गीयते ।
तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥

इति कामं वात्स्यायनादयः सत्यं दमं शमं च योगशास्त्रकृतः अन्ये दृष्टार्थवादिनो दण्डनीतिकृतो वै प्रसिद्धम् ऐश्वर्यमेव स्वार्थं पुरुषार्थं वदन्ति अतः सामाद्युपाया एव श्रेयःसाधनमिति तेषां मतम् तथैव त्यागं भोजनं च लोकायतिकाः यज्ञतपोदानं यज्ञो देवतानां पूजनं तपश्च दानं च ॥ १० ॥

तेषां तुच्छफलत्वमाह । आद्यन्तवन्त इति । एषां लोका एतैः साध्यानि फलानि तमोनिष्ठा मोहावसानाः भोगकालेऽप्यसूयादिभिः शुचार्पिता व्याप्ताः ॥ ११ ॥

भक्तेर्मुख्यत्वमाह । मयीति यावत्समाप्ति । हे सभ्य ! मया परमानन्दरूपेणाऽऽत्मना स्वरूपत्वेन स्फुरता ॥ १२ ॥

———

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

तत्प्रकृतीनां तद्वासनानाम् । मायागुणमूलत्वात् सत्त्वादिहेतुकत्वात् । श्रेयः श्रेयःसाधनम् ॥ ९ ॥

तदेव नानाविधमतवदनमेव । कर्म नित्यनैमित्तिकलक्षणम् । तत्र चतुर्विधकर्मसु मध्ये । काम्यमग्निहोत्रादि, निषिद्धं कलञ्जभक्षणादि, नित्यं सन्ध्यावन्दनादि, नैमित्तिकं जातेष्ट्यादि । प्रत्यवायस्तदकरणे निषिद्धकरणे च यो दोषस्तस्य जिहासया परिहारेच्छया । काव्यालङ्कारकृतः भरतदण्डिमम्मटादिप्रभृतयः । सत्यं यथार्थभाषणम् । दमं बहिरिन्द्रियनियमनम् । शममन्तरिन्द्रियनियमनं च श्रेयो वदन्ति केचित् कर्मनिष्ठाः ॥ १० ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपनी टिप्पणी ।

एषां धर्मादीनां लोका लोक्यन्ते प्राप्त्यर्थं चिन्त्यन्ते इति तथाच फलानीति व्याख्यातम् ॥ ११ ॥

स्वरूपत्वेन रश्मीनां रविवन्मूलरूपत्वेन स्फुरता विषयात्मनामिति मदतिरिक्तपुरुषार्थिनः सर्व एव विषयात्मान इति भावः ॥ १२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

यथाकर्म यथारुचि रुचिभेदनियामकं कर्मवैविध्यमित्यभिप्रायः ॥ ९ ॥

यशश्चान्य इति । लोकयशो यथाविहितं भवति तादृशाचरितं श्रेय इत्यभिप्रायः यद्वा यावत्कीर्तिस्तावत्परलोकावस्थानमिति शास्त्रार्थयुक्तं कामं प्रजातन्तुमित्यर्थः ॥ १० ॥

दुःखोदर्काः दुःखफलाः ॥ ११ ॥

मयात्माना सुखमन्तरात्मनानुभूतं मदनुभवाधीनं सुखम् ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

स्वतो विवेकशून्यतां व्यञ्जयितुं विशिनष्टि । मन्मायामोहितधिय इति । मन्मायामोहितमतित्वात्तत्पारंपर्यानादरेण स्वतोऽपि यथावत्तत्त्वं न जानन्तीति भावः । ते पुनः पाखण्डमतयः सन्तो न तूष्णीमवतिष्ठन्ते किन्तु यथाकर्म यथारुचि अनेकान्तं नानाविधं श्रेयो वदन्ति रुचेर्नियामकं कर्मवैविध्यमित्यभिप्रायेण यथाकर्मेत्युक्तम् ॥ ९ ॥

यथाप्रकृति सर्वेषां चित्रा वाचः स्रवन्ति हीत्येतत्प्रपञ्चयति । धर्ममिति । एके पूर्वमीमांसकाः धर्मं यागदानहोमादिरूपं श्रेयःसाधनं वदन्ति इति सम्बन्धः । एवमुत्तरत्रापि स्वर्गादिरेव श्रेयस्तत्साधनं धर्म एवेति वदन्तीत्यर्थः । अन्ये काव्यालङ्कारादिकृतः यशः कीर्तिमेव स्वर्गादिरूपश्रेयःसाधनं वदन्ति तथाच तत्परिपाटिः—

> यावत्कीर्तिर्मनुष्यस्य पुण्या लोकेषु गीयते ।
> तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥

इति कामतन्त्रप्रणेतारस्तु काममेव पुरुषार्थं वदन्ति तदुपायास्तु तैरेवोक्तास्तत एव द्रष्टव्याः । योगिनस्तु सत्यं दमं शमं च कैवल्याख्यश्रेयः साधनं वदन्तीत्यर्थः । अन्ये नीतिशास्त्रविदः ऐश्वर्यमेव स्वार्थं पुरुषार्थं वदन्ति तदुपायास्तु सामादयस्तैरेवोक्ता इति भावः । लोकायतिकास्तु । त्यागभोजनम् विभवभोजनं वदन्ति —

> भस्मीभूतस्य देहस्य पुनरागमनं कुतः ।
> तस्मात्सर्वप्रयत्नेन ऋणं कृत्वा घृतं पिबेत् ॥

इत्यादिरूपा हि तेषां परिपाटिरित्यर्थः । केचित्त्रयीमतानुसारिणः यज्ञादीन् पुरुषार्थोपायान् वदन्ति तत्र व्रतान्येकादश्युपवासादीनि नियमाः शौचाचमनादयः यमाः इन्द्रियनिग्रहादयः तैर्हि यज्ञादिप्रयुक्तचित्तशुद्ध्युपजातविविदिषाधिकृतशमदमाद्यङ्गकतत्त्वमस्यादिवाक्यजन्यब्रह्मस्वरूपाभिन्नप्रत्यगात्मापरोक्षज्ञानं निःशेषाविद्यानिवृत्तिरूपमुक्तिसाधनमित्युक्तम् ॥ १० ॥

एवं वादानां वैचित्र्यमभिधायाथ विकल्पादिविकल्पप्रतिपाद्य स्वाभिमतमोक्षाख्यश्रेयस्तत्साधनभूतब्रह्मोपासनयोरितरेभ्यो व्यावृत्तत्त्वज्ञापनाय तेषां स्वरूपमाह । आद्यन्तवन्त इति । एतेषां धर्मादीनां लोक्यन्त इति लोकाः फलान्याद्यन्तवन्तोऽनित्या इत्यर्थः । तत्र हेतुः कर्मविनिर्मिताः कर्मसम्पादिताः कृष्यादिकर्मफलवदिति भावः । दुःखोदर्काः दुःखोत्तरफलाः स्वर्गादिसाधनधर्मादिक्षये सति पुनर्दुःखावाप्तेरिति भावः । तमोनिष्ठाः मोहावसानाः क्षुद्रा आनन्दा येभ्यस्तेऽत एव शुचा शोकेनार्पिताः संगताः अनुभवदशायामपि पतनभयशङ्कानिमित्तदुःखगर्भा इत्यर्थः ॥ ११ ॥

अथ भक्तियोगसाध्यं तु मोक्षसुखं मदनुभवात्मकं नित्यं दुःखासम्भिन्नं निरवधिकं चेत्यभिप्रेत्य तद्विषयासक्तमनसां दुर्लभमित्याह । मयीति । हे सभ्य ! मयि नित्यनिरतिशयानन्दैकस्वरूपेऽर्पित आत्मा मनो येन तस्यात एव सर्वतः सर्वेषु वैषयिकेषु क्षुद्रसुखेषु निरपेक्षस्य पुंसो यन्मया आत्मना निमित्तभूतेन सुखं तद्विषयात्मनां कुतः स्यात् आत्मनेत्यनेन विषयवैलक्षण्यमभिप्रेतम् आत्मा हि निरतिशयप्रीतिविषयः सुखात्मकज्ञानं प्रतिविषयभूतस्यैवात्मनः तत्प्रतिहेतुत्वविवक्षया आत्मनेति तृतीया निरतिशयानन्दरूपात्मविषयज्ञानस्य विषयवैलक्षण्येन निरतिशयसुखात्मकस्य विषयात्मालभ्यत्वोक्त्या तदनुभाव्यालोकविपरीताकारत्वलाभान्नित्यत्वसुखोदर्कत्वसत्त्वनिष्ठत्वप्रभूतानन्दत्वनिरन्तरहर्षार्पितत्वादयो लभ्यन्ते ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अत्र नानामतत्वे मुख्यकारणं किमिति तत्राह । मन्मायेति । अनेकान्तं नानाविधं यथारुचि यथेच्छम् ॥ ९ ॥

एतदेव विशदयति । धर्ममेक इति । त्यागोऽभिमानत्यागः भोजनं वायवादेः ॥ १० ॥

एतत्साधनसाध्यान् लोकानाह । आद्यन्तवन्त इति । एषां कर्मनिर्मिता लोकास्तेषामाद्यन्तवत्त्वेऽपि यावल्लोकं सुखमस्ति किमेत्याह । दुःखोदर्का इति । तमोनिष्ठाः अन्धकारप्रचुराः भक्तिवर्जितं श्रेयो ये मन्यन्ते दुराशयाः तेषामन्ते तमो घोरमनन्तं प्राप्यते ध्रुवमिति वचनात् असन्मतनिष्ठानां तम एव बृहस्पत्युक्तत्वेऽपि हरिभक्तिराहित्यात् अल्पानन्दत्वे शुचार्पितत्वं हेतुः ॥ ११ ॥

भगवद्धर्मसाध्यलोकसुखवत्तल्लोकसुखमपि निर्दुष्टं किं न स्यादविशेषादत्राह । मयीति । अहमात्मा प्रापको यस्य तन्मदात्मकं मय्यर्पित आत्मा मनो यस्य सत्ये साधुगुणपूर्णो ममात्मास्वभावो यस्य तथेति वा यथाहं निर्दोषस्वभावः तथेदमपीत्यनयोक्त्याविशेषो दर्शितः इतीतरानुमानस्य तर्काभावेन दौर्बल्यान्नोत्थातुमलमित्यर्थः ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

धर्ममिति सार्द्धकम् ईश्वराननाज्जैमिन्यादीनामपि तदात्प्रवर्त्तकत्वमेवेति भावः । धर्मं स्वधर्मं नित्यनैमित्तिकम् एके निवृत्तकर्मनिष्ठाः सत्यादित्रयमद्वैता योगिनश्च केचित्कर्मनिष्ठाः स्वार्थमिति स्थानभेदेन साधनं साध्यं वोच्यते उभयोरपि स्वनाथ्यमात्रत्वात् तत्र कामैश्वर्यत्यागभोजनानि साध्यानि अन्यानि तु साधनानि ॥ १० ॥

अकिञ्चनस्य दान्तस्य शान्तस्य समचेतसः।
मयासन्तुष्टमनसः सर्वाः सुखमया दिशः॥ १३ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

एषां मध्ये ये वा कर्मणा वेदविधिना विनिर्मिता लोकाः सुखदफलानि भवन्ति तेऽप्याद्यन्तवदादिरूपा एव वेदार्वमुखत्वे तु नरका एवेति भावः॥ ११॥

आत्मना पूर्णसच्चिदानन्दलक्षणपरमात्मतया परमप्रेष्ठरूपेण तत्रापि मया सर्वाश्चर्यरूपगुणादिविशिष्टमद्रूपेण स्फुरतेत्यर्थः विषयात्मनामिति मदतिरिक्तपुरुषार्थिनः सर्वे एव विषयात्मान इति भावः॥ १२॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

अनेकान्तं नानाविधम्॥ ९॥

तदेवाह। धर्ममिति सार्द्धेन धर्मं मीमांसकाः तदुक्तं
मोक्षार्थी न प्रवर्त्तेत तत्र काम्यनिषिद्धयोः।
नित्यनैमित्तिके कुर्य्यात्प्रत्यवायजिहासया॥
इत्यादि यशः काव्यालंकारकृतः यथाहुः
यावत्कीर्त्तिर्मनुष्याणां पुण्या लोकेषु गीयते।
तावद्वर्षसहस्राणि स्वर्गलोके महीयते इति॥
कामं वात्स्यायनादयः सत्यं दमं शममिति शान्तिशास्त्रकृतः अन्ये दृष्टार्थवादिनः दण्डनीतिकृतः वै प्रसिद्धम् ऐश्वर्य्यमेव स्वार्थं वदन्ति अतः सामाद्युपाया एव श्रेयःसाधनमिति तेषां मतं तथैव त्यागं भोजनं च लोकायतिकाः यज्ञादिकं वैदिकाः नियमान् यमान् तपोव्रतादिनिष्ठाः॥ १०॥

एषां लोकाः एतैः साध्यानि फलानि तमोनिष्ठाः मोहावसानाः॥ ११॥

तस्माद्भक्तावेव वेदस्य तात्पर्यं सैव सर्वश्रेष्ठेति निर्द्धार्य्य तयैव मां प्राप्नोतीत्याह। मयीत्यादिना उद्धव प्रश्न पर्य्यन्तेन ग्रन्थेन। मया-रूपगुणसमुद्रेण आत्मना प्रेमास्पदेन हेतुना विषयेषु मायिकवस्तुषु शमदमज्ञानादिष्वपि मनो येषां तेषां ज्ञानादीनामपि सात्त्विकत्वेन मायिकत्वात् नच तत्प्राप्यं ब्रह्मैवेत्यपि वाच्यम्।
किं वा योगेन सांख्येन न्यासस्वाध्याययोरपि।
किंवा श्रेयोभिरन्यैश्च न यत्रात्मप्रदो हरिरिति॥
नारदोक्तेः॥ १२॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

त्रिगुणया मदीयया मायया मोहिता मदात्मकधर्म्मदर्शनाद्बहिःकृता धीर्येषां ते अतएवानैकान्तं नैकस्मिन् मय्यन्तःपर्यवसानं यस्य तन्मम सम्बन्धशून्यं श्रेयो वदन्ति॥ ९॥

तदेव प्रपञ्चयति। धर्ममिति सार्द्धेन। एके मीमांसकाः धर्मं कर्म अन्ये काव्यालङ्कारकृतः यशः कीर्तिम् अन्ये वात्स्यायनादयः कामम् अन्ये योगिनः सत्यं दमं समं अन्ये नीतिकुशलाः ऐश्वर्य्यं स्वार्थं पुरुषार्थम् अन्ये लोकायतिकाः त्यागं भोजनं च श्रेयो वदन्ति केचित्तु यज्ञं देवताविशेषपूजनं केचित्तपः केचिद्दानं केचिद्व्रतानि केचिन्नियमान् केचित् यमानिति स्वस्वानुरूपं श्रेयो वदन्ति॥ १०॥

एतेषां धर्मादिश्रेयोवादिनां कर्मविनिर्मिताः स्वस्वधर्म्माद्यनुष्ठाननिर्मिताः दुःखोदर्काः दुःखावसाना यतः तमसि प्रधाने निष्ठा समाप्तिर्येषामनित्या इत्यर्थः। भोगकालेऽपि क्षुद्रानन्दाः तथात्वेऽपि शुचार्पिताः शोकेन व्याप्ताः॥ ११॥

तेषां मोक्षानर्हत्वं ज्ञानवैराग्यभक्तिमतस्तु परमानन्दभाक्त्वमाह। मयीति यावत्समाप्ति। सर्वतः प्राकृतपदार्थप्राप्तिप्रयत्नतत्फलभोगादितः निरपेक्षस्य मयि परमात्मनि अर्पितः आत्मा सर्वज्ञः श्रीकृष्णो मम मुक्तिद इति बुद्धिर्येन तस्य मया आत्मना निखिलाभिज्ञेन यत्सुखं मोक्षाख्यं तद्विषयेषु अनात्मसु आत्मा मनो येषां तेषां धर्मादिपराणां कुतः स्यात् जीवाः अल्पज्ञाः तत्र यो मद्भक्तस्तस्याहं सर्वज्ञः परमसुखदः इतरेषां मद्विमुखानां मत्सम्बन्धवर्जितधर्मादिकारिणां कुतोऽपि न परमं सुखं कर्तॄणामज्ञत्वविषयवश्यत्वादिनाऽसमर्थत्वात् धर्मादीनां जडत्वाच्चेत्यर्थः॥ १२॥

———

भाषा टीका।

हे पुरुषर्षभ। उद्धवजी हमारी माया से जिनकी बुद्धि मोहित है वे पुरुष जिनकी जैसी रुची है जैसे जिनके कर्म हैं तैसे अनेक प्रकार के साधनों को कहते हैं॥ ९॥

कोइ कर्मकांड को साधन कहते हैं कोइ यश को कोइ काम को कोई शम दम सत्य को कोइ ऐश्वर्य को ही कोइ शरीर पोषण भोजन ही को पुरुषार्थ बताते हैं कोइ यज्ञ को तपको दानको कोइ व्रत नियम यम इनको कल्याण का साधन कहते हैं॥ १०॥

इन सबों में जिनके कर्मकांड से स्वर्गादि जो लोक मिलते हैं वेकर्मार्जित होने से उत्पत्तिनाश वाले हैं और दुःख फल देने वाले तमोगुण वाले थोड़े सुख वाले शोक से युक्त वे लोक हैं॥ ११॥

हे सभ्य। उद्धवजी जो पुरुष सब तरफ से निरपेक्ष है और मेरे में आत्मा के अर्पण करने वाला है उसको मेरे में आत्माके अर्पण करने वाला है उसको मेरे अन्तर्यामी के अनुभव करने से जो सुख होता है सो विषयी पुरुषों को कहां से होगा॥ १२॥

———

श्रीधरस्वामिकृतभावार्थदीपिका।

किञ्च अन्येषां तत्तल्लोकादिपरिच्छिन्नं सुखं भक्तस्य तु परिपूर्णमित्याह। अकिञ्चनस्येति॥ १३॥

न पारमेष्ठ्यं न महेन्द्रधिष्ण्यं न सार्वभौमं न रसाधिपत्यम् ।
न योगसिद्धीरपुनर्भवं वा मय्यर्पितात्मेच्छति मद्विनान्यत् ॥ १४ ॥
न तथा मे प्रियतम आत्मयोनिर्न शङ्करः ।
न च सङ्कर्षणो न श्रीर्नैवाऽऽत्मा च यथा भवान् ॥ १५ ॥
निरपेक्षं मुनिं शान्तं निर्वैरं समदर्शनम् ।
अनुव्रजाम्यहं नित्यं पूयेयेत्यङ्घ्रिरेणुभिः ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

परिपूर्णतामेवाऽऽह । न पारमेष्ठ्यमिति । रसाधिपत्यं पातालादिस्वाम्यम् अपुनर्भवं मोक्षमपि मद्विना मां हित्वाऽन्यन्नेच्छति अहमेव तस्य प्रेष्ठ इत्यर्थः ॥ १४ ॥

ममापि स एव प्रेष्ठ इत्याह । न तथेति द्वाभ्याम् । आत्मयोनिर्ब्रह्मा पुत्रोऽपि शङ्करो मत्स्वरूपभूतोऽपि सङ्कर्षणो भ्राताऽपि श्रीर्भार्याऽपि आत्मा मूर्तिरपि यथा भक्त इति वक्तव्ये अतिहर्षेणाऽऽह । भवानिति ॥ १५ ॥

पूयेय मदन्तर्वर्तिब्रह्माण्डानि पवित्रीकुर्यामिति भावेनेत्यर्थः ॥१६॥

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी ।

अन्येषां धर्माद्यनुष्ठातृणां सत्यलोकादि इन्द्रवरुणलोकादि आदिना पशुपुत्रादिपरिग्रहः । परिच्छिन्नं परिमितमनित्यं च । परिपूर्णं देशकालापरिच्छिन्नम् । अकिञ्चनस्य भगवद्व्यतिरेकेण त्यक्तसर्वपरिग्रहस्य । शान्तस्य भगवन्निष्ठबुद्धिविशिष्टस्य । शमो मन्निष्ठता बुद्धेरित्युक्तेः । समचेतसः स्वर्गापवर्गादौ तुल्यादृष्टेः सुखमयाः भगवदनुभवमयसुखैकव्याप्ताः सर्वत्र तत्स्फूर्तेः सर्वभूतेषु यः पश्येद्भगवद्भावमात्मन इत्यादेः ॥ १३ ॥

परिपूर्णतां भक्तसुखस्याऽपरिच्छिन्नत्वं सार्वभौमं श्रीप्रियव्रतादीनामिव महाराज्यम् अप्यर्थे वाशब्द इति मोक्षसुखस्याप्यपरिपूर्णत्वं व्यञ्जितम् । अत्र पारमेष्ठ्यादिचतुष्टयस्योत्तरोत्तरन्यूनक्रमः । एवञ्च यदि पारमेष्ठ्यं नेच्छति तदा कुतो महेन्द्रधिष्ण्यमित्याद्युत्तरोत्तरकैमुत्यमपि ज्ञेयं योगसिद्ध्यादिद्वयस्य तु पूर्वन्यूनत्वमिति ॥ १४ ॥

स एव शुद्धभक्त एव अत्र पुत्रोऽपीत्यादि व्याख्ययात्मयोन्यादीनां परमभक्तत्वेऽपि पुत्रादित्वेनैवाऽप्रियतमत्वोक्तिरिति भक्तत्वांशेनैव प्रियतमत्वमभ्युपेतम् ॥ १५ ॥

ज्ञानिनं गौरवविशेषपात्रत्वेन ज्ञानिभक्तविशेषम् । निरपेक्षं निष्कामम् अतएव शान्तं क्षोभरहितम् अतएव निर्वैरं मात्सर्यादिरहितम् । किञ्च समं सर्वत्र भगवद्दृष्ट्या हेयोपादेयबुद्धिरहितं मुनिं श्रीनारदादिमनुव्रजामि सदा पवित्रस्यात्मन पावित्र्यासम्भवात् स्वान्तःस्थितब्रह्माण्डपवित्रीकरणमेवोपचारेणात्मनः पवित्रीकरणमिति भावेनाभिप्रायेण पूयेयेत्युक्तम् ॥ १६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

मया सन्तुष्टमनसो मत्तः प्रकृष्टप्राप्यान्तराभावात् सन्तोषमयाः सर्वा दिशः ॥ १३ ॥

सन्तोषमेव विवृणोति । न पारमेष्ठ्यमिति । रसाधिपत्यं पातालैश्वर्यम् ॥ १४—१५ ॥

पूयेयेत्यतिवादः पावयेयमिति वार्थः ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदेवं मोक्षाख्यपुरुषार्थस्य तत्साधनभूतभक्तियोगस्य च निरतिशयसुखरूपस्य धर्मादितल्लोकेभ्यो निरतिशयत्वख्यापनात्तारतम्यलाभेन तस्यैव उत्कृष्टत्वावगमादेकमुख्यत्वपक्षः स्थापितः अथ किं वक्तव्यं फलभूतमोक्षसुखस्य निरतिशयत्वमित्यभिप्रेत्य तत्साधनभूतभक्तियोगस्य स्वस्वरूपरूपगुणानुस्मृत्यात्मकस्य निरतिशयसुखरूपतामाह । अकिञ्चनस्येत्यादिना । मया निरतिशयानन्दरूपेण विषयभूतेन च मया सन्तुष्टं मनो यस्य तस्यात एव समचेतसस्सर्वत्र मद्भावैकचेतसः निरन्तरं मय्येवासक्तचित्तत्वादिति भावः । अत एवाकिञ्चनस्याभिलषणीयान्तररहितस्य तत्र हेतुर्दान्तस्य जितबाह्यकरणस्य शान्तस्य जितान्तःकरणस्य सर्वा दिशः सुखमयाः सुखप्रचुराः दिग्ग्रहणं कालावस्थयोरप्युपलक्षणम् ॥ १३ ॥

सन्तोषमेव विवृणोति । न पारमेष्ठ्यमिति । मय्येवार्पित आत्मा मनो येन सः मत् मत्तो विनान्यत्पारमेष्ठ्यादिकमपि नेच्छति पारमेष्ठ्यं ब्रह्माधिपत्यं महेन्द्रधिष्ण्यम् इन्द्रस्थानं सार्वभौमं कृत्स्नभूमण्डलाधिपत्यं रसाधिपत्यं पातालैश्वर्यं योगसिद्धयोऽणिमाद्याः किं बहुना अपुनर्भवं मोक्षमपि नेच्छति पारमेष्ठ्यादिभ्यः सर्वेभ्योऽप्यहमेव मय्यर्पितात्मनो निरतिशयप्रीतिविषय इति सः मदन्यत्तुच्छत्वान्नेच्छतीत्यर्थः ॥ १४ ॥

न केवलमहमेव तस्य निरतिशयप्रियः किन्तु सोऽपि मम तथैवेत्याह । न तथेति । भवानिति ज्ञानिमात्रोपलक्षणं यथा भवान्मम प्रियतमः तथा आत्मा स्वीयमूर्तिः आत्मयोनिप्रभृतयो न प्रियतमाः

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

पुत्रपौत्रभ्रातृभार्याशरीरत्वादिरूपा अपि अनेन "प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रिय" इति गीतावचनार्थ उक्तः यद्यप्यात्मयोन्यादीनामपि ज्ञानित्वान्निरतिशयप्रियत्वाच्च तथा मे प्रियतम इत्युक्तं तथापि तेषामपि यदि मयि भक्तिर्न स्यात्तदा प्रिया इत्यर्थपर्यवसानेन तथोक्तमिति बोध्यम् ॥ १५ ॥

प्रेमातिशयपारवश्यप्रयुक्तामात्मनो वृत्तिमाह। निरपेक्षमिति मदतिरिक्तविषयनिरपेक्षं मुनिं मत्स्वरूपगुणादिमननैकशीलमत एव समदर्शनं सर्वत्र मद्भावयुक्तचेतसमत एव निर्वैरं क्वापि वैररहितमहं नित्यमनुव्रजामि अनुव्रजनस्य प्रयोजनमाह। पूयेतेत्यङ्घ्रिरेणुभिरिति। तदीक्षितं तत्स्पृष्टं च सर्वमपि वस्तु मदङ्घ्रिरेणुभिः पूतं भवेदिति बुद्ध्या तमनुगच्छामीत्यर्थः। पूयेयेत्युत्तमपुरुषपाठे मदन्तर्वर्तिब्रह्माण्डमपि पवित्रीकुर्यामिति भावेनेति तन्माहात्म्यातिशयस्तुतः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

एवंविधस्य मदर्पितात्मनो न केवलममुत्र सुखित्वम् इहापि सुखित्वं स्यादित्याह। अकिञ्चनस्येति। अकिञ्चनस्येत्यत्र एकैकोऽपि सुखित्वे हेतुः किमुत समुदिता इति भावेनोक्तं सर्वाः सुखमया इति ॥ १३ ॥

त्वय्यर्पितात्मनोऽपि पारमेष्ठ्याद्याकाङ्क्षायां तत्पदानां दुःखमिश्रसुखरूपत्वात्सर्वत्र सुखित्वं कथमित्याशङ्क्याह। न पारमेष्ठ्यमिति। मय्यर्पितात्मा मामेव सुखमिच्छति मदन्यत्किमपि नेच्छतीति यतस्तस्मात्तस्य निराकाङ्क्षत्वेन सर्वत्र सुखमेवेति भावः ॥ १४ ॥

अत्र भक्तेषु प्रीतिविशेषोऽस्तीति दर्शयितुं भक्तेः कर्तव्यत्वं च निदर्शयन्निव उद्धवमतिस्तौति। न तथेति। अनेन मनुष्यादिभक्तेषु भिक्षान्नप्रदानवत्कृपानिमित्तप्रीतिर्लक्ष्म्यादिषु प्रियापुत्रादिप्रीतिवत्सार्वकालिकयान्तरा प्रीतिरस्तीति सूचितम्—

कृपानिमित्ता या प्रीतिर्नीचभक्तेषु साधिका।
आन्तरैव तु या प्रीतिः सा तूच्चेषु यथाक्रमम् ॥
यथा कश्चित्स्वमात्मानं प्रियां पुत्रमथापि वा।

अतिहाय कृपायुक्तो भिक्षवेऽन्नं ददात्यपि। कदाचिदेव न पुनः स्वात्मादेः सार्वकालिकम्। योगक्षेमवहत्वं च नित्यं स्वात्मादिषु स्फुटम्। एवमेव परेशस्य भक्तेषु श्रिय*जादिषु इति वचनात्—

यादवेभ्यस्तु सर्वेभ्य उद्धवो भगवत्प्रियः।
उद्धवाच्च प्रियतमः प्रद्युम्नस्तु महारथः ॥
तस्मादपि प्रियतमो रामः कृष्णस्य सर्वदा ॥
नैव तस्मात्प्रियतमो निर्विकं चतुर्मुखम्।
सर्वेभ्योऽपि प्रियतमा हरेः श्रीरेव वल्लभा ॥
नैव तस्याः प्रियतमो विना स्वात्मानमेव तित्यतोऽपि।

सर्वयादवेभ्यो विशिष्टभक्त उद्धव इति प्रकटनाय विशिष्य स्तुत उद्धव इति भावः ॥ १५ ॥

ननु प्रतीतार्थं परित्यज्यान्यार्थविशेषकल्पने को हेतुरित्याशङ्क्यातिदेशो हेतुरिति भावेनाह। निरपेक्षमिति। स्वाङ्घ्रिरेणुभिस्तं पूयेय शोधयामीत्यनुव्रजामि अनुगच्छामि मम पादधूलयो वायुना पुरतो गच्छन्ति भक्ते निपतन्त्योऽतितरां शोधयन्तीदं सजलभूमिपादविक्रमे सिद्धं भवतीति ततः पूयेय शुद्धो भवानीत्येवमर्थो न युक्तः यत्सेवया माहात्म्यमाप्तः स हरिस्तदनुगमनेन तत्पादरेणुसम्पर्केण शुद्धो भवतीति न युज्यते सदोषस्य शुद्धिप्रार्थनं दृष्टं निर्दोषस्य न घटत इत्युक्त एवार्थः—

अनुगच्छति विष्णुस्तु स्वभक्तं तस्य शुद्धये।
तस्याङ्घ्रिरेणुभिर्वातनीतैरग्रेसरः शुचिः ॥
अग्रतो गमने विष्णोः पादस्पृष्टं रजो भवेत्।
अतः स्वभक्तं पूयेयेत्यनुव्रजति केशवः ॥

इति वचनात् अनेन निष्कामत्वादिगुणसम्पन्नत्वेन सेवमानेषु भक्तेषु त्वत्यतिशयिता प्रीतिरस्तीत्युक्तं भवति ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ॥

स्वानुभवसुखमाहात्म्यमेव दर्शयति। अकिञ्चनस्येति द्वाभ्याम् ॥ १३ ॥

सार्वभौमं श्रीप्रियव्रतादीनामिव महाराज्यम् अप्यर्थे वाशब्द इति मोक्षसुखस्याप्यपरिपूर्णत्वं दर्शितं पारमेष्ठ्यादिचतुष्टयस्यानुक्रमश्चाधोऽधोविवक्षया न्यूनत्वविवक्षया च ततश्चोत्तरोत्तरं कैमुत्यमपि योगसिद्ध्यादिद्वयं तु सार्वत्रिकमिति पश्चान्निर्दिष्टं अपुनर्भवस्तूत्तरश्रैष्ठ्यम् ॥ १४ ॥

अत्रात्मयोनित्वेन पुत्रत्वं शङ्करत्वेन सुखकरत्वसूचनया साहचर्यं सङ्कर्षणत्वेन गर्भसङ्कर्षणसूचनया भ्रातृत्वं श्रीत्वेनाश्रयविशेषसूचनया भार्यात्वं व्यज्यते आत्मा श्रीमूर्त्तिरपि ततश्च पुत्रत्वादिना न ते प्रियतमाः किन्तु भक्त्यैव अतो भक्त्याधिक्यात् यथा भवान् प्रियतमस्तथा न ते इत्यर्थः इतिभक्तानां प्रियतमत्वे निदर्शनम् ॥ १५ ॥

तदेवं प्रेमविशेषपात्रत्वेन तादृशं भक्तं स्तुत्वा गौरवविशेषपात्रत्वेन भक्तविशेषं स्तौति। निरपेक्षं निष्कामभक्तम् अतः क्षोभरहितं मात्सर्यादिरहितम अन्यत्र हेयोपादेयभावनारहितं च मुनिं श्रीनारदादिमनुव्रजामि यतस्तादृशनिष्कपटभक्तिमयसाधुत्वदर्शनेन ममापि भक्तिविशेषो जायते कथं गोपनीय इत्याह। पूयेयेति। तद्भक्त्यनिष्कृतिदोषात् पविभ्रितः स्यामिति भावेनेत्यर्थः ॥ १६—१७ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

भक्तस्य सुखं सुखस्यानुभावं च विवृणोति। अकिंचनस्येति द्वाभ्याम्। मया ध्यानप्राप्तेनैवालौकिकशब्दस्पर्शरूपरसगन्धलीलाकृपादिमहामाधुर्यवता सन्तुष्टानि मनःप्रभृतिसर्वेन्द्रियाणि यस्य तस्य सर्वा इति स च यां दिशो याति ता एव सुखमयः यथा ग्रन्थिनिबद्धानश्वरमहाधनो मनुष्यो यं देशं याति तत्रैव तस्य भोगैश्वर्यसुखानीत्यर्थः। अतएवाकिंचनस्य मल्लक्षणसंपूर्णानश्वरमहाधनप्राप्त्यैव किंचनशब्दवाच्यपरिमितनश्वरप्राकृतधनजनादिग्रहणाविमुखस्य बाह्याभ्यन्तरविषयेष्विन्द्रियाणां स्वयगोचरत्वेनैव निवृत्तेः दान्तस्य शान्तस्य शमो मन्निष्ठता बुद्धेरित्यभिमोक्तेर्मदेक-

---

* श्रीश्च अजश्च श्रियजौ तौ आदी येषां ते श्रियजादयः तेषु प्रयोगस्य साधुत्वं तु व्याख्यानान्तरे दर्शितम्।

निष्किञ्चना मय्यनुरक्तचेतसः शान्ता महान्तोऽखिलजीववत्सलाः ।
कामैरनालब्धधियो जुषन्ति यत्तन्नैरपेक्ष्यं न विदुः सुखं मम ॥ १७ ॥
बाध्यमानोऽपि मद्भक्तो विषयैरजितेन्द्रियः ।
(१)प्रायः प्रगल्भया भक्त्या विषयैर्नाभिभूयते ॥ १८ ॥
यथाऽग्निः सुसमृद्धार्चिः करोत्येधांसि भस्मसात् ।
तथा मद्विषया भक्तिरुद्धवैनांसि कृत्स्नशः ॥ १९ ॥
न साधयति मां योगो न साङ्ख्यं धर्म उद्धव ! ।
न स्वाध्यायस्तपस्त्यागो यथा भक्तिर्ममोर्जिता ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

निष्ठबुद्धेः अत एव समचेतसः स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिनः ॥ १३ ॥

तस्य किंचनशब्दवाच्यपदार्थेषु स्पृहाराहित्यमाह । नेति । पारमेष्ठ्यं ब्रह्मपदम् अपुनर्भवं सायुज्यसुखं च । मय्यर्पितात्मेति । ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहमिति मत्कृतनियमादहमपि तस्मिन्नर्पितात्मा भवामीत्यतएव मद्विनेति अहमेव तस्य सर्वेन्द्रियग्राह्यतया सदैव वर्त्त एव नहि निरन्तरदिव्यामृतरसास्वादिने जनाय मृत्तिका रोचत इति भावः ॥ १४ ॥

सच भक्तस्तव कीदृक् प्रिय इत्यत आह । न तथेति । आत्मयोनिर्ब्रह्मा पुत्रोऽपि शङ्करो मत्स्वरूपभूतोऽपि सङ्कर्षणो भ्रातापि श्रीर्भार्य्यापि आत्मा मूर्त्तिरपि यथा भक्त इति वक्तव्ये अतिहर्षेणाह भवानिति श्रीस्वामिचरणाः अत्र ब्रह्मादीनां भक्तत्वेऽपि तेषु भक्तत्वांशादपि पुत्रत्वाद्यंशा अधिका वर्त्तन्ते अतः प्राधान्येन व्यपदेशा भवन्तीति न्यायेन ते पुत्रादित्वेनैव व्यपदिश्यन्ते नतु भक्तत्वेन नन्दयशोदादिषु तु महाप्रेमवत्त्वात् पितृत्वाद्यंशेभ्योऽपि भक्तत्वलक्षणोंऽशोऽधिकतर इति तेषु भक्तत्वमेवेति ते कृष्णस्यातिप्रियतमा एव यदुक्तं दर्शयंस्तद्विदां लोके आत्मनो भक्तवश्यतामिति तेषां भक्तशब्दवाच्यत्वं स्वातिवशीकारकत्वं च नेमं विरिञ्चो न भवो न श्रीरप्यङ्गसंश्रया प्रसादं लेभिरे गोपीति सर्वोत्कर्षश्च यद्वा एतादृशभक्तेष्वपि मध्ये भवान् यथा मे प्रियतमस्तथा मन्मुखादेव शृणवित्याह । न तथेति । तेन सर्वभक्तेषु मध्ये उद्धवः श्रेष्ठस्तस्मादपि गोप्यः श्रेष्ठास्तेनापि तासां चरणधूलिप्रार्थनादिति वैष्णवसिद्धान्तः ॥ १५ ॥

किं बहुना भक्तो यथा सदा मामनुचरति तथा अहमपि भक्तः परोक्षः सन् भक्तमनुचरामि भगवान् भक्तभक्तिमानिति मदीयशुकोक्तेरित्याह । निरपेक्षमिति । मुनिं मद्रूपगुणलीलापरिकरादिमननपरं पूयेय मदन्तर्वर्त्तिब्रह्माण्डानि पवित्रीकुर्य्यामिति भावनयेत्यर्थ इति स्वामिचरणाः तद्भक्त्यबिष्कृतिदोषात् पवित्रितः स्यामिति भावेनेत्यर्थं इति संदर्भः वस्तुतस्तु भक्तचरणधूलिग्रहणं विना भक्तिर्न स्यात् भक्त्या विना मन्माधुर्य्यरसानुभवो न स्यादिति मयैव मर्य्यादा स्थापिता अतोऽहमपि भक्त इव भक्त्या पूर्णमन्माधुर्य्यरसानमग्नो भवेयामिति भावः ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

किञ्चास्मिल्लोकेऽपि मज्ज्ञानभक्तियुक्तस्य संसाराद्विरक्तस्य पुंस एव सर्वत्र सुखमित्याह । अकिञ्चनस्येति ॥ १३ ॥

अपुनर्भवं मोक्षमपि नेच्छति मद्विना अन्यत नेच्छतीति किमुत वक्तव्यम् ॥ १४ ॥

ममापि भवादृशाः मज्ज्ञानभक्तियुक्ता एवातिप्रिया इत्याह । नेति द्वाभ्याम् । चकारोऽनुक्तसमुच्चयार्थः ॥ १५ ॥

पूयेयेति । स्वगतब्रह्माण्डानि पवित्रीकुर्यामित्याशयेनानुव्रजामि एतावत्प्रयोजनसिद्धिस्त्वेकदैवानुव्रजनेनापि भवति अहन्तु नित्यमनुव्रजामि सर्वथा स्वभक्तवश्योऽस्मीत्याशयः ॥ १६ ॥

भाषा टीका ।

जो निष्किचन है वाहिर भीतर की दोनों इन्द्रियों का जीत ने वाला है समबुद्धि वाला है मेरेही से जिसका मन सन्तुष्ट है तिस पुरुष के तो सब दिशा: सदा काल सुख रूप ही हैं ॥ १३ ॥

जिसने मेरे विषै मन अर्पण कर रखा है वह तो मेरे विना ब्रह्म लोक इंद्र लोक सार्वभौम राज्य पाताल राज्य योगों की सिद्धि अथवा मोक्ष भी अन्य किसी पदार्थ को नहीं चाहता है ॥ १४ ॥

मेरे को जैसे तुम भक्त प्रिय हो तैसे न ब्रह्मा हैं न शिव हैं न बलदेवजी हैं न लक्ष्मी है न अपना आत्मा भी है ॥१५॥

जो निरपेक्ष है शांत है मुनि है निर्वैर वैर रहित है सम दृष्टि वाला है उसके चरण रेणु से पवित्र होने की इच्छा से मैं उस भक्त के पीछे पीछे चलता रहता हूं ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

किञ्च मद्भक्तानां सुखमेतावदेवंभूतमिति वा को वक्तुं समर्थो यतस्तत्स्वसंवेद्यं निरुपममित्याह । निष्किञ्चना इति । महान्तो निरभिमानाः अनालब्धधियोऽस्पृष्टचित्ताः निष्किञ्चनत्वादीनां यथेष्टं हेतुहेतुमद्भावः एवंभूता मम मदीया यत्सुखं

(१) प्रायस्तत्रापि मद्भक्त्या इति वि० पाठः ।

भक्त्याऽहमेकया ग्राह्यः श्रद्धयाऽऽत्मा प्रियः सताम् ।
भक्तिः पुनाति मन्निष्ठा [१]श्वपाकानपि सम्भवात् ॥ २१ ॥
धर्मः सत्यदयोपेतो विद्या वा तपसान्विता ।
मद्भक्त्याऽऽपेतमात्मानं न सम्यक् प्रपुनाति हि ॥ २२ ॥
कथं विना रोमहर्षं द्रवता चेतसा विना ।
विनानन्दाश्रुकलया शुध्येद्भक्त्या विनाऽऽशयः ॥ २३ ॥
वाग्गद्गदा द्रवते यस्य चित्तं रुदत्यभीक्ष्णं हसति क्वचिच्च ।
विलज्ज उद्गायति नृत्यते च मद्भक्तियुक्तो भुवनं पुनाति ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

जुषन्ति सेवन्ते तत्सुखं त एव विदुर्लभन्ते नान्ये कुतः नैरपेक्ष्यं नास्त्यपेक्षणीयं येषां ते निरपेक्षयाःतैरेव लभ्यं नतु मोक्षापेक्षैरपीत्यर्थः। यद्वा एवम्भूताः सन्तो ये मम मामित्यर्थः जुषन्ति प्रीणन्ति त एव यन्नैरपेक्ष्यं सुखं तद्विदुर्नान्य इत्यन्वयः ॥ १७ ॥

अपिच आस्तां तावदुत्तमभक्तकथा यतः प्राकृतोऽपि भक्तः कृतार्थ एवेत्याह । बाध्यमान इति द्वाभ्याम् । विषयैराकृष्यमाणोऽपि प्रगल्भया समर्थया ॥ १८ ॥

पाकाद्यर्थं प्रज्वालितोऽग्निर्यथा काष्ठानि भस्मीकरोति तथा रागादिनापि कथञ्चिन्मद्विषया सती भक्तिः समस्तपापानीति भगवानपि स्वभक्तिमहिमाश्चर्येण सम्बोधयति अहो उद्धव विस्मयं शृणु वेति ॥ १९ ॥

अत एवम्भूतं श्रेयो नान्यदस्तीत्याह । न साधयतीति द्वाभ्याम् ॥ २० ॥

श्रद्धया या भक्तिस्तया सम्भवाज्जातिदोषादपीत्यर्थः ॥ २१ ॥

भक्त्यभावेऽन्यत्साधनं व्यर्थमित्याह द्वाभ्याम् । धर्म इति ॥२२॥

रोमहर्षादिकं विना कथं भक्तिर्गम्यते भक्त्या विना च कथमाशयः शुध्येदिति ॥ २३ ॥

किञ्च भक्तिः स्वाश्रयं शोधयतीति किंवक्तव्यं यतो गद्गदवागादिलक्षणमद्भक्तियुक्तो लोकं सर्वं पुनातीत्याह । वागिति ॥ २४ ॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी।

एतावत् एतत्परिमाणकम् । एवम्भूतमेवंजातीयम् । तत् सुखं स्वसम्वेद्यं स्वेन भक्तेनैवानुभवनीयम् । मय्यनुरक्तचेतस इत्यनेनैव मदीयत्वमागतं पुनर्ममेत्यधिकमतो यद्वेति । प्रीणयन्ति प्रसन्नीकुर्वन्ति ॥ १७ ॥

यतो हेतोः प्राकृतोऽपि प्रकृतिः प्रारम्भः आरब्धभक्तिरित्यर्थः । समर्थया समर्थप्रभावया । भक्त्या शरणागतिमात्रात्मिकया । प्राय इत्यनेन स्वापराधो व्यावर्त्यते । नाभिभूयत इति तद्बाधायां भगवति स्वदैन्यस्पर्शात् ॥ १८ ॥

रागादिनेति आदिना क्रोधलोभादिपरिग्रहः । भक्तिः श्रवणादिलक्षणा समस्तपापानि प्रारब्धपर्यन्तानि भक्तप्रारब्धविध्वंस इत्याद्यचिन्त्याशक्तितेत्युक्तेः ॥ १९ ॥

अतो भक्तेराश्चर्यमहिमत्वात् एवम्भूतं भक्तिसदृशम् अन्यच्छ्रेयः साधनं नास्ति । तत्साधनार्थं प्रयुक्तोऽपि योगादिस्तथा मां न साधयति वराय नोन्मुखं करोति यथोर्जिता भक्तिः साधनात्मिका ॥ २० ॥

श्रद्धया विश्वासेन या भक्तिस्तया केवलया शुद्धया भक्त्या त्वहमेव ग्राह्यः प्रेमद्वारा वशीकार्यः सैव मन्निष्ठा मयि दार्ढ्यं गता सती ॥ २१ ॥

विद्या ज्ञानम् । तपसा चित्तैकाग्र्येण । मद्भक्त्या मत्प्रीतिलक्षणया अपेतं रहितम् आत्मानं चित्तं सम्यक् न प्रपुनाति उक्तपारमेष्ठ्याद्यपुनर्भवपर्यन्तसर्ववासनातो न शोधयति ॥ २२ ॥

रोमहर्षादिकम् अष्टसात्त्विकविकारं भक्त्यनुभावरूपं विना तत्कारणीभूता भावभक्तिः कथं ज्ञायेत । शुद्ध्येत् साद्यां विवासनातः पवित्रः स्यात् ॥ २३ ॥

स्वाश्रयं तादृशभक्तिमन्तं जनम् ॥ २४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

मम सुखं न विदुः मदधीनमोक्षसुखमपि न गणयन्ति नाद्रियन्त इत्यर्थः ॥ १७—२४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अपुनर्भवमपि नेच्छन्तीत्युक्तं तत्रानादर एव कारणमित्यभिप्रेत्याह । निष्किञ्चना इति । निष्किञ्चना मद्व्यतिरिक्ताभिलषणीयान्तररहिताः तत्र हेतुर्मय्येवानुरक्तं चेतो येषां ते तत्र हेतुः शान्ताः

(१) सकामानपि इति विज० पाठः

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

जितान्तःकरणाः अखिलेषु जीवेषु मदात्मकत्वभावेन वत्सलाः दयालवः महान्तः साधवः कामैरनालब्धाऽस्पृष्टा धीर्येषां ते तथाभूताः सन्तो यन्मम मदनुभवजं सुखं जुषन्तेऽनुभवन्ति नैरपेक्ष्यं निरपेक्षाः निष्कामास्तेलभ्यं मोक्षसुखं नैरपेक्ष्यं तदपि तत्र विदुः तत्समं न विदुः अतो नैरपेक्ष्यं नाद्रियन्ते इति भावः ॥ १७ ॥

अस्त्वेवंविधं सुखमेवंविधानां यः पुनरुपक्रान्तमद्भक्तियोगोऽविजितेन्द्रियश्च स किं विषयाभिभूतः संसरेदेवेत्यत्राह । बाध्यमानोऽपीति । मद्भक्तः प्रारब्धमद्भक्तियोगः प्रायः प्रगल्भयाऽहरहरेधमानया भक्त्या हेतुभूतया विषयैर्नाभिभूयते मद्भक्तिरहरहरेधमाना विषयविस्मृतिं करोतीति भावः ॥ १८ ॥

ननु सा प्रगल्भा चेत् विषयाभिभवाभिभावुका स्यात् तत्प्रागल्भ्यप्रतिबन्धके पापे सति कथं सा प्रगल्भ्या स्यादित्यत आह । यथेति । यथाल्पोऽप्यग्निस्तावत्काष्ठेषु निहितः क्रमेण सुसमिद्धार्चिरेधांसि दारूणि भस्मसात्कुरुते तथा मद्विषया भक्तिरपि हे उद्धव ! तावदुपक्रान्ताहरहरभ्यासाहितोत्कर्षा कार्त्स्न्येनैनांसि पापानि स्वप्रागल्भ्यप्रतिबन्धकानि च नाशयतीत्यर्थः । यद्यपि धर्मेण पापमपनुदतीति धर्मस्यैव भक्त्युत्पत्तिप्रतिबन्धकापनोदकत्वं श्रुतं तथापि प्रारब्धभक्तियोगसहचरितस्यैव धर्मस्य तदपनोदकत्वमिति भगवदाशयः ॥ १९ ॥

अनुव्रजाम्यहं नित्यमिति निरतिशयप्रीतिरूपात्मविषयकभक्तियोगस्यैवात्मवशीकारकारणत्वं सूचितं तत्स्फुटमेवाह । न साधयतीति । ऊर्जिता एधिता मम भक्तिर्यथा मां साधयति वशीकरोति तथा योगादिर्न साधयति ॥ २० ॥

न केवलं मद्भक्तिर्मद्वशीकारमात्रहेतुरपि तु यथावस्थितमत्स्वरूपस्वभावादिज्ञानहेतुरपीत्याह । भक्त्येति । यथावस्थितस्वरूपस्वभावोऽहं शुद्धया निष्कामया एकया एकरूपयाऽविच्छिन्नयेति यावत् ग्राह्यः ग्रहीतुं शक्यः भक्त्या त्वनन्यया शक्यः अहमेवं विधोऽर्जुन ज्ञातुमिति वचनार्थं उक्तः तत्र हेतुत्वेनात्मानं विशिनष्टि । सतां प्रिय इति । सतां भक्तानामहं प्रियः निरतिशयप्रीत्यात्मकभक्तिविषयः अतोऽहमपि सद्भिः प्रियैर्भक्त्या ग्राह्यो भवेयमिति भावः । प्रियत्वे हेतुरात्मेति आत्मा हि निरतिशयप्रिय इति भावः । पूर्वेनेत्य–ग्निरेणुभिरिति भक्तियोगस्य नितरां पावनकरत्वं सूचितं तदुपपादयति । भक्तिरिति । मन्निष्ठा मद्विषया भक्तिः श्वपाकानपि सम्भवाज्जातिदोषात्पुनाति । यद्यप्युक्तबहुरूपभक्तियोगे न श्वपाकस्याधिकारोऽस्ति तथाप्यस्मिन्प्रकरणे भक्तिशब्देन प्रपत्तिश्च विवक्षितेति तस्यां सर्वाधिकारो बहुप्रमाणप्रतिपन्नः ॥ २१ ॥

यथा भक्तिः पुनाति न तथेतर इत्याह । धर्मेति । धर्मादिभिरुपेतः सत्येनान्वितो विद्यया चान्वितोऽपि मद्भक्त्याऽपेतं रहितमात्मानं सम्यक् न प्रपुनाति ॥ २२ ॥

रोमहर्षादिकमन्तरेण कथं भक्तियोगनिष्पत्तिरवगम्यते भक्त्या च विना कथं शुध्येदित्याह । कथमिति । आनन्दाश्रुकलयेत्यनन्तरं भक्तिनिष्पत्तिः कथमवगम्यत इति वाक्यशेषः भक्त्या विना कथमाशयोऽन्तःकरणं शुद्ध्येदिति तत्र रोमहर्षो रोमाञ्चः चेतसो द्रवो नाम शुभाश्रयानुध्यानकृतो मनोविकारविशेषः आनन्दाश्रुकला आनन्दाश्रुबिन्दुसन्ततिः ॥ २३ ॥

किञ्च भक्तिः स्वाश्रयं पुनातीति किमु वक्तव्यं यतो गद्गदवागादिमद्भक्तिनिष्पत्तिलक्षणयुक्तः कृत्स्नं जगत्पुनातीत्याह । वागिति । यस्य वाग्गद्गदा यस्य चित्तं च द्रवते यश्च कदाचिद्रोदिति अभीक्ष्णं पुनःपुनर्हसति क्वचिच्च निर्लज्जः सन्नुद्गायति । क्वचिच्च नृत्यति च स एवं मद्भक्तियुक्तः भुवनमीक्षणस्पर्शनादिभिः पुनाति पवित्रीकरोतीत्यर्थः ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

एवं भजतां निर्दुःखानन्दानुभवो भविष्यतीत्यत्र किंमानमित्याशङ्क्य ब्रह्मादिज्ञानिप्रत्यक्षं प्रमाणमिति निदर्शयति । निष्किञ्चना इति । ये निष्किञ्चनाः निष्किञ्चनत्वादिगुणपूर्णाः कामैर्विषयैरनालब्धधियोऽप्रतिहतबुद्धयः अजुषश्च विषयानसेवमानाश्च ते मम सकाशान्नैरपेक्ष्यं विषयानपेक्षं स्वरूपसुखं स्यादिति विदुर्हीत्यन्वयः ननु बिम्बभूतस्य विष्णोः स्वरूपसुखसद्भावे मानमस्ति चेत्प्रतिबिम्बजीवस्वरूपसुखाविर्भावे भक्त्यादिसाधनसामग्रीसम्पादनयत्नो नितरां सफलः स्यात्तत्र किंमानमित्यत्रापीदमुत्तरम्भवतीत्याह । निष्किञ्चना इति । मम नैरपेक्ष्यं सुखमस्तीति विदुरित्यन्वयः हिशब्द उभयत्रापि प्रमाणमस्तीति सूचयति ज्ञानिप्रत्यक्षलक्षणप्रमाणसद्भावाद्भक्त्यादिसाधनमवश्यमापादनीयमिति भावः ॥ १७ ॥

ननु त्वद्भक्तस्यापि विषयग्राहग्रस्ततया भक्तिलोपेनाधःपातः सम्भाव्यत इति भक्तिविधानं व्यर्थमिति तत्राह । बाध्यमान इति । विषयैर्बाध्यमानत्वेनाजितेन्द्रियोऽपि प्रशस्तया मद्भक्त्या विषयैर्नाभिभूयते विषयनिषेवया प्राप्तदोषेणाधो न पततीत्यन्वयः ॥ १८ ॥

कथमिवेति तत्राह । यथेति । एनांसि पापानि ॥ १९ ॥

भक्त्यनुपहितबुद्धिनानुष्ठितधर्मादयो मत्परोक्षं न जनयन्तीत्याह । नेति ॥ २० ॥

भक्तिप्रधानधर्मादीनां तत्साधनवद्भक्तेरपि तत्सहिताया एव तत्साधत्वमत्राह । भक्त्येति । भक्तेः प्राधान्ये गुणादर्शनात् कथं तदुन्नतिरुच्यते इति तत्राह । भक्तिरिति । सम्भवाज्जननादिरूपसंसारात् यद्वा सोत्पत्त्यनन्तरमेव पुनाति न तु कालापेक्षया ॥ २१ ॥

भक्तिनायकहीनानां धर्मादीनामप्रयोजकत्वमर्थादुक्तम् अधुना तत्प्रकाशयति । धर्म इति । हिशब्दो "नायमात्मा प्रवचनेन लभ्य" इति श्रुतिं सूचयति ॥ २२ ॥

यद्यपि महान्तो वैष्णवसिद्धान्ताचलनत्वादिव्रतेनास्य भक्तिरस्तीति जानते तथापि बाह्यानां सुबोधाय भक्तेः प्रत्यक्षलक्षणान्याह । कथमिति ॥ २३ ॥

समीचीनभक्तियुक्तः पुरुषोऽपि सर्वं पुनाति किं पुनर्भक्तिरित्याशयेनाह । वाग्गद्गदेति । अत्र—

> चित्तद्रवस्तथा धैर्यं प्रसादो भक्तिलक्षणः ।
> आधिक्येन तु तत्रापि स्थैर्यमेव विशेषतः ॥
> दम्भस्य चलभक्तेश्च यस्माद्धर्ष्यादिकं भवेत् ।
> दम्भादिपरिहारार्थं निगृह्णीयाच्च धीरधीः ॥
> अत आध्यात्मिकैः क्लेशैराधिभूताधिदैवतैः ।
> वाक्यैश्च वेदतन्त्राद्यैरुपदेशैश्च तादृशैः ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

यवच्छासनैर्वापि यस्य भक्तिर्न चाल्यते।
स एव परमो भक्तो विष्णोर्हृदयवल्लभः॥
इति विशेषाश्च ग्राह्याः॥ २४॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

प्रायेणाभिभूयते तद्बाधायां श्रीभगवति स्वदैन्यनिवेदनरूपत्वात् यतः प्रगल्भया समर्थप्रभावया भक्त्या शरणागतमात्मिकया॥ १८॥

अतः सर्वानेव भक्तिभेदान् प्रशंसति। यथेत्यष्टभिः। यथा मद्विषया भक्तिर्यथा कथं चिच्छ्रवणादिलक्षणा समस्तानि पापानीति॥ १९॥

तत्साधनार्थं प्रयुक्तोऽपि योगादिस्तथा मां न साधयति वशयन्नोन्मुखं करोति यथा ऊर्जिता भक्तिः साधनात्मिका॥२०॥

भक्त्या भक्त्या श्रद्धापूर्विकया केवलया भक्त्या त्वहमेव ग्राह्यः क्रमाच्छ्रीकार्यः सैव मन्निष्ठा मयि दार्ढ्यं गता सती॥ २१॥

विद्या ज्ञानं तपसा चित्तैकाग्र्येण मद्भक्त्या मत्प्रीतिलक्षणया न सम्यक् प्रपुनाति उक्तपारमेष्ठ्याद्यपुनर्भवपर्यन्तसर्ववासनातो न शोधयति॥ २२॥

तदेव व्यतिरेकेणाह। कथमिति। रोमहर्षस्तावद्यत्किञ्चिच्चेतोद्रवस्य चिह्नम् आनन्दाश्रुकला तु विशिष्टस्य तस्य चिह्नं चेतोद्रवस्तु भक्तेरन्तरङ्गस्वभाव इति तथा तथोक्तं रोमहर्षेणानन्दाश्रुकलया च विना कथं तारतम्येन चेतोद्रवोऽवगम्यते द्रवता चेतसा च विना कथं भक्तिर्भवति भक्त्या च विना कथमाशयः शुध्येदिति॥ २३॥

मद्भक्तियुक्तो मत्प्रेमातिशयपात्रश्चेत् भुवनमपि पुनाति किमुताश्रयं संगिनो ग्रामं देशं मण्डलं वर्षं द्वीपादिकं चेत्यर्थः॥ २४॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

यतो मद्रूपगुणादिमाधुर्यानुभवसुखं मद्भक्त्यैव लभ्यं नान्येनेत्याह। निष्किञ्चना इति। निष्किञ्चना ज्ञानिनोऽपि भवन्तीति केचिदाहुस्तद्व्यावृत्त्यर्थमाह। मय्यनुरक्तचेतस इति। अखिलजीववत्सला अखिलेभ्योऽपि जीवेभ्यो भक्तिरसदित्सावन्तः अतएव महान्तस्तत्संज्ञयैव लोकैरुच्यमानाः कामैर्यादृच्छिकापतितैरपि भोगैर्न आलब्धा स्पृष्टा धीर्येषां ते यन्मम सुखं जुषन्ति आस्वादयन्ति तत्सुखं त एव विदुर्नान्ये कुतः नैरपेक्ष्यं नास्ति अपेक्ष्यं मोक्षादिकमपि येषां ते नैरपेक्ष्यास्तैरेव ज्ञातम्॥ १७॥

अपि च आस्तान्तावज्जातप्रेमभावभक्तकथा यतो भक्तौ प्रथमं प्रवर्त्तमानोऽपि भक्तः कृतार्थ एवेत्याह। बाध्यमान इति। प्रायः प्रगल्भया प्रायेणैव प्रबलीभवन्त्या किम्पुनः प्रगल्भया ज्ञानिप्रकरणे यथा दुराचारो ज्ञानी निन्दिष्यते ज्ञानित्वं च तस्य निषिध्यते यस्त्वसंयतषड्वर्ग इत्यादिना तथा तत्र भक्तप्रकरणे दुराचारो भक्तो न निन्द्यो भक्तत्वं च तस्य न निषिद्धमित्याह। बाध्यमान इति। यदुक्तम् "अपि चेत् सुदुराचारो भजते मामनन्यभाक् साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः" इति किञ्चात्र विषयैर्बाध्यमानोऽपि विषयैर्नाभिभूयत इत्युभयत्रापि वर्त्तमाननिर्देशात् विषयबाध्यत्वदशायामपि विषयाबाध्यत्वं भक्तिसद्भावात् यथा वैरिकर्त्तृकिञ्चित् शस्त्राघातं प्राप्तस्यापि न पराभविष्णुता शौर्यसद्भावादिति यथा वा पीतज्वरघ्नमहौषधस्य तद्दिवसे आयातोऽपि ज्वरोऽबाधकोऽप्यबाधक एव तस्य विनश्यदवस्थत्वात् दिनान्तरे च सम्यग्विनष्टीभावित्वाच्च॥ १८॥

तस्याजितेन्द्रियताजन्यपापस्य भक्तिरेव विनाशिकास्तीत्यत्र दृष्टान्तः यथाग्निरिति हे उद्धवेति त्वमत्रोद्धवमेव लभस्वेति भावः॥ १९॥

ननु भक्तिर्यथा त्वत्प्राप्तिसाधनं तथा ज्ञानयोगादिकमपीति केनांशेन भक्तेरुत्कर्ष इत्यत आह। नेति द्वाभ्याम्। न साधयति न मत्प्राप्तिसाधनं भवति यथाभक्तिः ऊर्जिता ज्ञानकर्माद्यनावृतत्वेन प्रबला तीव्रेत्यर्थः॥ २०॥

यथेति स्ववाक्येन प्राप्तं योगादीनामपि स्वप्राप्तिसाधनत्वमाशङ्क्याह। भक्त्येति। एकया नत्वन्येन योगादिनेत्यर्थः। तेन यदन्यत्र ज्ञानादीनामपि ब्रह्मप्राप्तिसाधनत्वं श्रूयते तत्रस्था गुणभूता भक्तिरेव तत्प्रापिकेति ज्ञेयं तदेवं ज्ञानसत्कर्मादिकम् भगवन्तं साधयितुमसमर्थं केवलं पापनाशकतयैव सार्थकमभूदिति स्थितं तत्रापि भक्तेर्यथा पापनाशकता न तथा ज्ञानादीनामित्याह। भक्तिरिति सार्द्धेन। सम्भवात् जातिदोषादपीति श्रीस्वामिचरणाः तेन प्रारब्धपापनाशकतापि भक्तेर्बुद्ध्यते॥२१॥

किञ्च धर्मज्ञानादीनां पापनाशकत्वमपि भक्तिसाहित्येनैव भक्तिराहित्येन तु किञ्चिन्मात्रमेवेत्याह। धर्म इति। विद्या ज्ञानम्॥२२॥

अन्तःकरणं तु सम्यक्तया भक्तिरेव शोधयति नान्यत्साधनं सा च भक्ती रोमाञ्चाद्यनुभावगम्येत्याह। कथमिति। भक्त्या हेतुना यदुद्रवच्चेतस्तेन विना कथं साधनान्तरेण रोमहर्षः कथं वा आनन्दाश्रुकला रोमहर्षं विना आनन्दाश्रुकलया च विना कथमाशयः शुध्येदित्यन्वयः। यदुक्तं कलियुगपावनावतारेण श्रीभगवता ...

श्रुतमप्यौपनिषदं दूरे हरिकथामृतात्।
यन्न सन्ति द्रवच्चित्तकम्पाश्रुपुलकादय इति॥

तेन निष्कामकर्मयोगादयो बहुप्रमाणसिद्धा अन्तःकरणस्य शोधकास्तावद्भवन्तु किन्तु तस्य येन कषायेण भगवदपरोक्षानुभवो न भवति तं कषायं तु प्रेमभक्तिरेव ज्वालयति नतु ज्ञानाग्निरपीति भावः॥ २३॥

प्रेमभक्तियुक्तो जनस्तु स्वमुद्धरतीति किञ्चित्रं यतो भूर्लोकमप्युद्धरतीत्याह। वागिति। यस्य वाक् गद्गदा गद्गदाकारा अस्पष्टाक्षरेत्यर्थः। द्रवते द्रवति यतश्चित्तद्रवाच्चित्तमभीक्ष्णम् रुदति रोदिति अभीक्ष्णमीत्कण्ठ्येन जाज्वल्यमानत्वादिति भावः क्वचिच्चेति सर्वत्रान्वेति चित्तद्रवस्तु सार्वदिक एव॥ २४॥

———

यथाऽग्निना हेम मलं जहाति ध्मातं पुनः स्वं भजते च रूपम् ।
आत्मा च कर्मानुशयं विधूय मद्भक्तियोगेन भजत्यथो माम् ॥ २५ ॥
यथा यथाऽऽत्मा परिमृज्यतेऽसौ मत्पुण्यगाथाश्रवणाभिधानैः ।
तथा तथा पश्यति वस्तु सूक्ष्मं चक्षुर्यथैवाञ्जनसंप्रयुक्तम् ॥ २६ ॥
विषयान् ध्यायतश्चित्तं विषयेषु विषज्जते ।
मामनुस्मरतश्चित्तं मय्येव प्रविलीयते ॥ २७ ॥
तस्मादसदभिध्यानं यथा स्वप्नमनोरथम् ।
हित्वा मयि समाधत्स्व मनो मद्भावभावितम् ॥ २८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अपुनर्भवं यद्यपि नेच्छन्ति तथापि निष्किंचनाः मद्व्यतिरिक्ते देहगेहादिके विरक्ताः मय्यनुरक्तचेतसो मद्भक्ताः यन्नैरपेक्ष्यं निरपेक्षैरेव लभ्यं मम माधापात्तिलक्षणं जुषन्ति सेवन्ते तत्काम्यन्ते इति कामाः भोगास्तैर्न आलब्धा न पूर्णीकृता श्रीयेषां बुभुक्षूणां ते न विदुः ॥ १७ ॥

शान्तानां महतामास्तां तावत्कृतार्थताकथा यतोऽशान्तोऽपि मद्भक्तः कृतार्थ एवेत्याह । बाध्यमान इति द्वाभ्याम् ॥ १८ ॥

यथा किञ्चिदप्यग्निः एधःसु निःक्षिप्तः ततः सुसमृद्धः एन्धांसि काष्ठानि ॥ १९ ॥

अतो मद्भक्तेरन्यच्छ्रेयो नास्तीत्याह । न साधयतीति द्वाभ्याम् ॥ २० ॥

श्रद्धया कृतया भक्त्या अहं ग्राह्यः सम्यक्भवः सम्भवः सुघोरः संसारस्तस्मात् मन्निष्ठान् श्वपाकानपि पुनाति पवित्री करोति मज्ज्ञानं प्रापयतीत्यर्थः ॥ २१ ॥

मद्भक्तिं विना धर्मादिकमकिञ्चित्करमित्याह । धर्म इति द्वाभ्याम् ॥ २२ ॥

भक्तेर्ज्ञापकं रोमहर्षादिकं विना कथं भक्तिर्ज्ञायते भक्त्या विना आशयः अनादिकाम्यकर्मविदूषितमन्तःकरणं कथं शुध्येत ॥ २३ ॥

मद्भक्तियुक्त आत्मानं पुनातीति किम्वक्तव्यमपि तु सर्वं लोकं पुनातीत्याह । वागिति ॥ २४ ॥

भाषा टीका ।

जो निष्किंचन हैं मेरे में जिनके चित्तका अनुराग है जो शांत हैं महान् सब जीवों पर दयालु हैं कामों से जिनकी बुद्धि लिप्त नहीं है उन लोगों को निरपेक्ष होने से जो मेरा सुख है तिसको दूसरे कोइ नहीं जानते हैं ॥ १७ ॥

मेरा भक्त अजितेंद्रिय होने से विषयों से बाधित होवै तौ भी प्रायः करके मेरी भक्ति के सामर्थ्य से विषयों के परवश नहीं होता है ॥ १८ ॥

हे उद्धवजी ! जैसे अच्छे प्रकार जलता हुआ अग्नि सब काष्ठों को भस्म करदेता है तैसे ही मेरे विषय की भक्ति संपूर्ण पापों को नाश करती है ॥ १९ ॥

हे उद्धवजी ! जैसे मेरे को वढी हुई भक्ति वश करती है तैसे न योग वश करता है न सांख्य न धर्म न वेदाध्ययन न तप न त्याग वश करते हैं ॥ २० ॥

मैं सत्पुरुषों का आत्मा हूं प्रिय हूं एक केवल भक्ति से श्रद्धा से ग्रहण करने में आता हूं मेरे में परम निष्ठा वाली भक्ति चांडालादिकों को भी जात्यादि दोषों से पवित्र कर देती है २१

सत्य दया से युक्त जो धर्म तप के सहित जो विद्या ये दोनों भी मेरी भक्ति से रहित आत्मा को अच्छी तरह से पवित्र नहीं करसके हैं ॥ २२ ॥

विना रोमों के हर्ष होने से विना चित्त के द्रवित होने से विना आनंद के आंसुओं से विना ऐसी भक्ति से कैसे अन्तःकरण शुद्ध होसकता है ॥ २३ ॥

जिस की वाणी गद्गदहोजातीहै जिसका चित्तद्रवित होजाताहै जो हर समय रोताहै कहीं हँसताभी है निर्लज्ज होकर गाताहै और नाचता है ऐसी मेरी भक्ति से युक्त वह पुरुष संसार को पवित्र कर देता है ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अपिच भक्त्यैवाऽऽत्मशुद्धिर्नान्यत इति सदृष्टान्तमाह । यथेति । यथाऽग्निना ध्मातं तापितमेव हेम सुवर्णमन्तर्मलं जहाति न त्वालनादिभिःस्वं निजं रूपं च भजते कर्मानुशयं कर्मवासनाम् मां भजते मद्रूपतामापद्यते ॥ २५ ॥

ननु ब्रह्मविदाप्नोतिपरम् तमेव विदित्वाऽतिमृत्युमेतीत्यादिश्रुतिभ्यो ज्ञानादेवाविद्यानिवृत्त्या त्वत्प्राप्तिरवगम्यते कुतो भक्तियोगेनेत्युच्यते तत्राऽऽह । यथा यथेति । आत्मा चित्तं परिमृज्यते शोध्यते मत्पुण्यकथानां श्रवणैरभिधानैश्च भक्तेरेवावान्तरव्यापारो ज्ञानं न पृथगित्यर्थः ॥ २६ ॥

किंच ज्ञानं नाम चित्तस्य मदाकारपरिणामः स च मां

स्त्रीणां स्त्रीसंगिनां संगं त्यक्त्वा दूरत आत्मवान् ।
क्षेमे विविक्त आसीनश्चिन्तयेन्मामतन्द्रितः ॥ २९ ॥
न तथाऽस्य भवेत्क्लेशो बन्धश्चान्यप्रसङ्गतः ।
योषित्संगाद्यथा पुंसो यथा तत्संगिसंगतः ॥ ३० ॥

उद्धव उवाच

यथा त्वामरविन्दाक्ष ! यादृशं वा यदात्मकम् ।
ध्यायेन्मुमुक्षुरेतन्मे ध्यानं मे वक्तुमर्हसि ॥ ३१ ॥

श्रीभगवानुवाच ।

सम आसन आसीनः समकायो यथासुखम् ।
हस्तावुत्सङ्ग आधाय स्वनासाग्रकृतेक्षणः ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

भजतः स्वभावत एव भवति न च यत्नान्तरमपेक्षत इति सदृष्टान्तमाह । विषयानिति ॥ २७ ॥

यस्मादन्यत्साधनं तत्फलं च स्वप्नमनोरथवदसदभिध्यानमात्रं तस्मात्तद्विहाय मय्येव मनः समाहितं कुर्विति प्रकरणार्थमुपसंहरति । तस्मादिति । मद्भावभावितं मद्भावेन भजनेनैव शोधितम् ॥ २८

विशेषतो वात्स्यायनाद्युक्तकाममार्गाः परित्याज्या इत्याह । स्त्रीणामिति । आत्मवान् धीरः सन् क्षेमे निर्भये देशे विविक्ते विजने ॥ २९ ॥

एतदुपपादयति । न तथेति । अस्य पुंसो यथा तत्संगिसंगतः क्लेशो भवेत् यथा च बन्धो योषित्सङ्गतस्तथाऽन्यप्रसंगतो न भवेदिति ॥ ३० ॥

मां चिन्तयेदित्युक्तं तत्प्रकारं पृच्छति । यथेति ध्यानाङ्गप्रश्नः यादृशमिति ध्येयविशेषणप्रश्नः यदात्मकमिति यस्य तानि विशेषणानि तत्स्वरूपप्रश्नः एतन्मे ध्यानं मे वक्तुमर्हसीति पाठः तत्रायमर्थः मुमुक्षुस्त्वां यथा ध्यायेत्तन्मे वक्तुमर्हसीति जिज्ञासोः कथनाय मे पुनरतस्त्वद्दास्यमेव पुरुषार्थो नतु ध्यानेन कृत्यमस्तीति तदुक्तम् त्वयोपभुक्तस्रग्गन्धेत्यादि त्वं वक्तुमर्हसीति पाठः सुगमः ॥ ३१ ॥

तत्र ध्यानाङ्गत्वेनाऽऽसनप्राणायामप्रकारमाह। सम इति चतुर्भिः। समे नात्युच्छ्रिते नातिनीचे आसने कम्बलादौ समकायः सन् यथासुखमासीन इति नास्ति स्वस्तिकादिनियम इत्युक्तम् नासाग्रनिरीक्षणं च चित्तस्थैर्याय “अन्तर्लक्ष्यो बहिर्दृष्टिः स्थिरचित्तः सुसंयत” इतियोगशास्त्रोक्तेः ॥ ३२ ॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

साधनादिभिरित्यादिना तक्षणघर्षणादिग्रहः आत्मा चित्तम्

मद्भक्तियोगेन मत्प्रीत्या । अथो कात्स्न्र्येन । मद्रूपतां मद्प्रेमावेशेन स्त्रीमयोऽयं कामुक इति वन्मदेकमयताम् ॥ २५ ॥

सूक्ष्मं वस्तु मदीयस्वरूपरूपगुणलीलायाथार्थ्यम् । भक्तेरेवान्तरव्यापार इति । यथा चक्षुषः करणत्वेऽपि संयोगादिरवान्तरव्यापारस्तथा ज्ञानमपि । नहि काष्ठैः पचतीत्युक्ते ज्वालानामसाधनत्वं प्रतीयते इति तस्य तत्परिकरत्वमभिप्रेतम् ॥ २६ ॥

यत्नान्तरं प्राणायामसमाध्यादिरूपम् । मूलेऽनुस्मरत इति स्मरणोपलक्षितभक्तेरभ्यास एवोपदिष्ट इति ज्ञेयम् ॥ २७ ॥

तद्विहाय अन्यत् साधनादिकं परित्यज्य । स्वप्नमनोरथभित्येकवद्भावः यथा स्वप्नो मनोरथश्चासन् तथा कर्मादिसाधनम् । तत्फलञ्च स्वर्गादि । असत् मिथ्या । अभिध्यानं मनोमात्रविलसितं हित्वा मयि मनः समाधत्स्वेत्यन्वयः ॥ २८ ॥

काममार्गाः परित्याज्या इति साधकेभ्यः पूर्वा प्रक्रियोक्ता॥२९॥

एतत् काममार्गपरित्यजनम् । यद्यपि क्लेशो बन्धश्चेत्युभावुभयत्र तथापि अन्यन्वेषणादिक्लेशस्य तत्सङ्गिसङ्गः कारणम् । बन्धस्य च स्त्रीसङ्गः इति प्राधान्याद्व्यत्ययेन व्याख्यातमिति ज्ञेयम् ॥ ३० ॥

तत्प्रकारः तस्य चिन्तनस्येतिकर्तव्यतादिकम् । ध्यानाङ्गप्रश्नः ध्यानस्येतिकर्त्तव्यताप्रश्नः । एवमितिकर्त्तव्यताध्येयविशेषणतत्स्वरूपप्रश्नास्त्रयः । तत्र मत्पदस्य पुनरुक्तिपाठे । कथम्भूतस्य मे त्वद्दास्यैकपुरुषार्थस्य । तथाच परार्थ एवायं प्रश्नो न स्वार्थ इति । तथा व्याख्यातम् त्वं वक्तुमर्हसीति पाठस्य सुगमत्वं पुनरुक्त्यभावादेव ॥ ३१ ॥

तत्र प्रश्नत्रयमध्ये ध्यानाङ्गत्वेन ध्यानसाधनत्वेन । सम इति सार्द्धकम् । चित्तस्थैर्यायेति लयविक्षेपाभावात् । अन्तर्लक्ष्यः हृदि लक्ष्यैकदृष्टिरित्यर्थः । अबहिर्दृष्टिः बाह्यविषयानुसन्धानशून्यः ॥ ३२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

यथाऽध्मातमिति दृतिमुखेन आध्मातमित्यर्थः । रूपमौज्ज्वल्यम् ॥२५॥

सूक्ष्मं तत्त्वं प्रकृतेः सूक्ष्मो जीवः जीवात्सूक्ष्मः परमात्मा ॥२६॥

प्रलीयते प्रकर्षेण श्लिष्यति अन्यानुभवाक्षमं भवति ॥ २७ ॥

असदभिध्यानम् अशुद्धाभिध्यानं यथास्वप्नमनोरथम् अस्थिर-विषयमित्यर्थः । मद्भावभावितं मद्विषयभावबन्धेन भक्त्या-वासितम् ॥ २८—३० ॥

यथेति ध्यानक्रियाविशेषणं यादृशमिति विग्रहसंस्थान-प्रश्नः यदात्मकमिति दिव्यात्मस्वरूपप्रश्नः ॥ ३१–३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

किञ्च भक्त्यैवात्मशुद्धिर्नान्यत इति सदृष्टान्तमाह । यथेति । यथाग्निना ध्मातं धमनीमुखेन ध्मातं हेम सुवर्णं कर्तृ मलं जहाति स्वं स्वासाधारणं रूपमौज्ज्वल्यं भजते तथात्मा जीवोऽपि मद्भक्तियोगेन कर्मानुशयमिति पदद्वयं व्यस्तम् अनुशयं भुक्तावशिष्टं ज्ञानावरकं कर्म विधूयाथो ततः मां भजति प्राप्नोति मां प्राप्य स्वस्वरूपं भजत इत्यर्थः । तथा च श्रुतिः "परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यत" इति ॥२५॥

ननु भक्त्युत्पत्तिप्रतिबन्धके कर्मणि विधूते सति भक्ति-स्तया च कर्मविधूतिरितीतरेतराश्रयमेतत् एवं च कदा यथा-वस्थिततत्त्वत्रयविवेकः येन तत्पूर्वकभक्तियोगः स्यादित्यत आह । यथा यथेति । मत्पुण्यगाथाश्रवणैस्तदभिधानैश्चासावात्मा परिमृज्यते विशोध्यते कर्मविधूननेनेति भावः । तथा तथा तत्त्वसूक्ष्मं सूक्ष्मं तत्त्वं तत्त्वमिहानारोपिताकारः प्रकृतेः सूक्ष्मो जीवः जीवात्सूक्ष्मः परमात्मा तदन्तरात्मतया व्याप-नस्वभावत्वात् यथा रोगादिदुष्टं चक्षुस्तावद्रूपग्रहणासमर्थं सदञ्जनसम्प्रयुक्तं निवृत्तदोषं सद्रूपं गृह्णाति तद्वत्तावत् मत्पुण्यगाथाश्रवणाभिधानेनात्मशुद्धिस्ततस्तत्त्वत्रयविवेकः ततो भक्तिरित्यर्थः ॥ २६ ॥

श्रवणादिभिरेव चित्तं मत्प्रवणं स्यादिति सदृष्टान्तमाह । विषयानिति । अस्य यथेत्यादिः मामित्यस्य तथेति । अनुस्मरतः श्रवणाभिधानादिभिर्मां स्मरतः पुंसः चित्तं प्रविलीयते प्रक-र्षेण श्लिष्यति ॥ २७ ॥

दृष्टान्तत्वेनोक्तस्य विषयध्यानस्य त्याज्यत्वमभिप्रेतं विवृण्वन् दार्ष्टान्तिकत्वेनोक्तमात्मानुस्मरणं विधत्ते । तस्मादिति । तस्माच्छ्रव-णाभिधानादिक्रमेणैव मद्भक्त्युदयात्स्वप्नमनोरथं तत्तुल्यं तद्वद-स्थिरविषयमित्यर्थः असदभिध्यानं शब्दादिविषयध्यानं त्यक्त्वा मद्भावभावितं यथा मद्विषयभावबन्धनेन भक्त्योपानीतं भवति तथेति समाधिविशेषणं मनो मय्येव समाधत्स्व श्रवणाभिधाना-दिक्रमेण समाहितं कुर्वित्यर्थः ॥ २८ ॥

न केवलमसदभिध्यानमेव हेयमपि त्वभिधातृसङ्गोऽपि इत्याह । स्त्रीणामिति । स्त्रीसङ्गिनां चेति चशब्दोऽध्याहर्तव्यः त्यागो दुष्कर इत्यतो विशिनष्टि । आत्मवान् यतैर्वशीकृतेन्द्रियः क्षेमे निर्भये विविक्ते निर्जने च देशे आसीनः अतन्द्रितोऽनलसः मां चिन्तयेदिति ॥ २९ ॥

स्त्रीसङ्गादिस्त्याज्यत्वे कारणमाह । न तथेति । यथाऽस्य पुंसः योषित्सङ्गात्तत्सङ्गिसङ्गतः योषित्सङ्गिनां सङ्गतश्च बन्ध-स्तादधीन्यं तत्प्रयुक्तः क्लेशश्च भवेत्तथाऽन्यप्रसङ्गतस्तौ न भवतः अतो योषित्तत्सङ्गिसङ्गौ त्याज्याविति भावः ॥ ३० ॥

चिन्तयेन्मामतन्द्रित इत्युक्तां चिन्तां तद्विषयप्रकारजिज्ञा-सया पृच्छति । यथेति । यथा ध्यायेदिति सम्बन्धः यथेति ध्यानाङ्गप्रश्नः यादृशमिति विग्रहसंस्थानप्रश्नः यदात्मकमिति दिव्यात्मस्वरूपप्रश्नः एतत्सविषयं ध्यानं तत्प्रकारं च वक्तु-मर्हसि त्वदभिमतं त्वमेव वक्तुं शक्तो नान्य इति भावः ॥३१॥

तावद्ध्यानाङ्गान्याह । सम इति चतुर्भिः । समे देशे आस्ती-र्णोपयुक्ते आसने चैलाजिनकुशोत्तरम् इत्युक्तविधे यथासुख-मासीनः स्वस्तिककमलाद्यन्यतमासनेनोपविष्टः समकायः ऋजु-कायः हस्तौ उत्सङ्गे आधाय स्वस्य नासाग्रे कृतं निहि-तमीक्षणं दृष्टियेन सः ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भक्तिः पुनातीत्युक्तं तत्र शुद्धिप्रकारं सदृष्टान्तमाह । यथेति । अग्निना मुखवायुसंयोगेनोज्ज्वलितेन ध्मातं दाहविशेषं प्राप्तं हेम मलमष्टादशदोषलक्षणं स्वरूपं निर्दोषभास्वरलक्षणम् आत्मा सत्स्वभावो जीवोऽनाद्यविद्याकामकर्मकलिलं कर्मानुशयमन्तः-करणं भक्तियोगेन विधूय निर्मलीकृत्य अथो मङ्गलमूर्तिं मां भजत इत्यन्वयः ॥ २५ ॥

छित्रादिगुणाधिकं ध्मातहेमवत् भक्तियोगोद्रेकक्रमेण शुद्ध आत्मा मनः भगवत्सूक्ष्मतत्त्वं पश्यतीत्याह । यथेति । परिमृज्यते शोध्यते तत्त्वं सूक्ष्मं सूक्ष्मतत्त्वम् अत्र दृष्टान्तान्तरं चाह चक्षुरिति ॥ २६ ॥

कर्मसाचिव्यराहित्येन भक्तिपूर्वकध्यानमात्रेण चित्तं कथं त्वयि निरन्तरं विलग्नं भवतीत्यत्राह । विषयानिति । आत्मानुभव एवात्र मानं न मानान्तरमन्वीक्षणीयमिति भावेन विषयनिदर्शनमुक्तं चित्तं स्वरूपचैतन्यमित्यर्थः ॥ २७ ॥

मथितमाह । तस्मादिति । यथा स्वप्नमनोरथं स्वप्नवन्मनोर-थवच्चासदभिध्यानम् अशुभं विषयध्यानं हित्वा नन्वेवं तर्हि त्वदासक्तिवाञ्छितस्य विषयासक्तिरपि ग्राह्या किमित्यतो वा मन्दा-शङ्कां परिहरन्नुपसंहरति । तस्मादिति । अज्ञानामपि बुद्ध्यवता-रार्थं विषयासक्तिनिदर्शनमुक्तं न तु ग्राह्यार्थत्वेनेति यस्मा-द्भावो भक्तिः मयि भक्त्या भावितं तन्मयीकृतम् ॥ २८ ॥

स्वरूपवाह्यान्तःकरणभोग्यत्वभेदेन द्विविधा विषयाः तत्र पूर्वे मुक्तापेक्षणीया द्वितीयाः सांसारिकाः अनर्थजनकत्वान्मुमु-क्षुणा अवश्यं हेयाः तथाहि तत्स्वेवातिरेकेणेश्वरोऽहमित्यादिल-क्षणा केशवेऽन्यथा बुद्धिर्जायते जन्मप्रभृतिपुरुषेण सह वर्तमान-त्वात् सुखक्षयहेतुत्वेन स्त्र्यादिशब्दवाच्या रीङ् क्षय इति धातोः तस्याः संगो येषां ते स्त्रीसंगाः तत्संगानां संगो येषामिति स्त्रीसंगसंगिनः तेषां संगं दूरतः परिहृत्य मत्सेवैव कर्तव्या

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ईश्वरो मम स्वामी तत्किङ्करोऽहमित्यादिलक्षणेति भावेन विषयास्त्यक्तव्या इत्याशयेनाह । स्त्रीसंगेति । अनेन स्त्रीसंगिसंगोऽपि परिहर्तव्य इत्युक्तं भवति "केशवे त्वन्यथा बुद्धिः सैव स्त्रीसम्प्रकीर्तिते"त्यादिवाक्यमत्र प्रमाणं क्षेमे मङ्गलस्थले ॥ २६ ॥

नन्वन्येषु हत्यादिषु अधःपातहेतुषु हेयेषु सत्सु किंविशेषस्य स्त्रीसङ्गसङ्गिसङ्गो दूरतस्त्याज्य इत्युच्यत इत्यत आह । 'न तथेति । यथास्य पुंसः योषित्सङ्गाद्विषयिभिर्जुष्टत्वाद्योषिच्छब्दवाच्याया ईश्वरोऽहमित्याद्यनेकविधान्यथाबुद्धेरधिकरणलक्षणसङ्गाद्यथा तत्सङ्गिसङ्गतः मिथ्याज्ञानिसेवालक्षणसङ्गात्क्लेशो बन्धश्चान्धन्तमो लक्षणश्च भवेत् तथान्यप्रसङ्गतः पिपीलिकादिवधलक्षणाच्च भवेदित्यन्वयः अत्र पातकविशेषास्तत्फलानि च—

परदारदृशिः प्रोक्ता क्षुद्रपातकसंज्ञिता ।
उपपातकं सद्गतिश्च वर्णबाह्येषु पातकम् ॥
महापातकसंज्ञं तु पित्रादेर्दारधर्षणम् ।
दारदृष्टिः स्वोत्तमानां मानुषाणां स्वभावतः ॥
सुमहापातकं प्रोक्तं तद्गतिस्तु महत्तमः ।
ऋषिदारेषु मनसो गतिरेव ततोऽधिकम् ॥
देवदाराभिकामानां सङ्गिसङ्गस्ततोऽधिकः ।
किमु विष्णोस्ततो योषित्सङ्गस्य व्यत्ययस्थितेः ॥
न समं पातकं क्वापि न स्वरूपाभिकामिनः ।
अवज्ञाता माधवादेस्तस्मात्तं दूरतस्त्यजेत् ॥
मानुषेषु तु दुःखित्वं क्षुद्रपापफलं स्मृतम् ।
पापं तु वर्णबाह्यत्वं तिर्यग्योनिगतिस्तथा ॥
सहस्रवर्षं नरकं क्षुद्रपातकजं फलम् ।
तथोपपातकाच्चापि नरकं युगमात्रकम् ॥
चतुर्युगावसानं तु पातकस्य फलं स्मृतम् ॥
महापातकजन्यं च कल्पावधिसमीरितम् ।
सुमहापातकाच्चापि यावद्ब्रह्मलयो भवेत् ॥
तत्पराणां पातकानां फलमन्धतमः स्मृतम् ।
अधोऽधो दुःखमतुलं विष्णुदाराभिमर्शनात् ॥
वधादपि हि दाराणां धर्षणं कोपकारणम् ।
तस्माद्धेयः सदा वन्द्या अग्निवत्साभिकामत इति ॥

एतत्स्ववचनाद्विशेषः पातकानां फलानां च द्रष्टव्यः ॥ ३० ॥

ध्यायेन्मामतन्द्रित इत्यत्रोक्तं ध्यानप्रकारं पृच्छति । यथेति यादृशं कीदृशं यदात्मकं किमात्मकम् ॥ ३१ ॥

समाहितेन मनसा ध्यानं कर्तव्यम् एतदुपायं प्रथमतो वक्ति । सम आसन इत्यादिना ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तया प्रीत्या तस्य महाप्रेम्णः प्राप्तिक्रमं सदृष्टान्तमाह- यथेति । तथा मद्भक्तियोगेन मत्प्रीत्या कर्मानुशयं विधूय शोधयित्वा अथो कार्त्स्न्येन भजति महाप्रेमाविर्भावात् पूर्णां सेवापद्धतिं प्राप्नोतीत्यर्थः ॥ २५ ॥

आदिभजनमारभ्य क्रमस्वदन् महाप्रेमपर्यन्ताविर्भावे पूर्ववत्तत्रापेक्षमेव कारणमाह । यथा यथेति । तत्र सूक्ष्मं मदीयस्वरूपगुणलीलाद्याश्चर्यं पश्यतीति । तद्दर्शनक्रमातिशयेन महाप्रेमाप्याविर्भवतीति भावः ॥ २६ ॥

तस्माद्भक्तिरेवाश्रयणीयेत्युपसंहरन्नाह । विषयानिति द्वाभ्याम् ॥ २७ ॥ २८ ॥

तत्र पूर्वोक्तप्रक्रियामाह । स्त्रीणामिति ॥ २९ ॥

क्लेशो बन्धश्चेति उभावपि उभयोर्ज्ञेयौ तत्सङ्गिसङ्गोऽपि ह्यादिकारणमिति ॥ ३० ॥

तत्र मुमुक्षूणां तत्प्रकारं पृच्छति । यथेति । परार्थः प्रश्नः सर्वेषां मार्गाणां तारतम्यज्ञानेन स्वमार्गोत्कर्षज्ञानं भवतीति भावेन यथाग्रे सिद्धीनामपि एवमन्यत्रापि ॥ ३१ ॥

सम इति सार्द्धकम् । सुखमासीन इति तदङ्गभूतस्वस्तिकादिषु मध्ये एकं कुर्यादित्युक्तम् ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

किञ्च भक्त्यैवात्मशुद्धिः नान्यत एवेति सदृष्टान्तमाह । यथेति । यथाग्निना ध्मातं ध्मापितमेव हेम सुवर्णम् अन्तर्मलं जहाति न क्षालनादिभिः स्वं निजं रूपं च भजते तथैवात्मा जीवः कर्मानुशयं कर्मवासनात्मकं मलं विधूयाथो मदीयलोके मां भजति साक्षादेव सेवते ॥ २५ ॥

आदिभजनमारभ्य केवलया भक्त्यैवात्मशोधनतारतम्येन श्रवणकीर्तनस्मरणादितारतम्यात् मन्माधुर्यानुभवतारतम्यम् प्राप्नोतीत्याह । यथा यथेति । तत्त्वसूक्ष्मं तत्त्वं मद्रूपलीलादिस्वरूपम् सूक्ष्मं तन्माधुर्यानुभवविशेषं तयोर्द्वन्द्वैक्यम् । यद्वा सूक्ष्मम् तत्त्वं पूर्वनिपाताभाव आर्षः चक्षुर्यथेति । प्रथममन्धात् काणोऽप्युत्तमस्तस्माच्चक्षुष्मान् चक्षुष्मतोऽपि सिद्धाञ्जनरसाञ्जितनेत्रः सूक्ष्मम् पश्यति ॥ २६ ॥

एतादृशश्रवणकीर्तनस्मरणादिनिष्ठानां त्वद्भक्तानां चित्तम् त्वयि कीदृशं स्यादित्यत आह । विषयानिति । विषयध्यानासक्तं चित्तं यथा विषयमाधुर्यनिमग्नं दृष्टं तथैव मदीयध्यानासक्तं मन्माधुर्यमात्रनिमग्नं स्यात् ॥ २७ ॥

तस्मादन्यत् साधनं तत्फलं च स्वप्नमनोरथवदसदभिध्यानमात्रं तस्मात्तद्विहाय केवलयैव भक्त्या मय्येव मनः समाहितं कुर्विति प्रकरणार्थमुपसंहरति । तस्मादिति श्रीस्वामिचरणाः मद्भावेन मद्भावनयैव भावितं भावयुक्तीकृतम् ॥ २८ ॥

विशेषतो वात्स्यायनाद्युक्ताः कामर्मार्गास्त्याज्या इत्याह । स्त्रीणामिति । यत आत्मवान् धृतियुक्तः तेषां सङ्गे सति धृतिर्न तिष्ठेदिति भावः । क्षेमे निर्भयदेशे विविक्ते निर्जने ॥ २९ ॥

यथा तत्सङ्गत इति योषित्संगिसङ्गत्यागे भूयानेव यत्नः कर्तव्यो यतो योषित्सङ्गे लज्जा स्वीयाप्रतिष्ठा च बाधिकास्ति तत्संगिसंगे तु प्रायस्ते अपि न बाधिके परंच योषित्संगो यथा तत्कथाभिस्तस्यामासञ्जयति लज्जाभयादिकमपि त्याजयति न तथा योषिदपीत्यत उत्तरत्र तन्निर्देशः ॥ ३० ॥

भक्तिं विना किमपि साध्यं न सिद्ध्यतीति भगवद्वाक्यान्निश्चित्य सर्वेषां मार्गाणां प्रकारज्ञानं विना स्वमार्गोत्कर्षज्ञानमतिसुखदं न भवतीति भावेन मोक्षाकाङ्क्षिणो ध्यानभक्तेः प्रकारादीन् पृच्छति । यथेति तत्र प्रकारप्रश्नः यादृशमिति ध्येयविशेषप्रश्नः यदात्मकमिति ध्येयस्वरूपप्रश्नः अत्र मे इत्यस्य

प्राणस्य शोधयेन्मार्गं पूरकुम्भकरेचकैः ।
विपर्ययेणापि शनैरभ्यसेन्निर्जितेन्द्रियः ॥ ३३ ॥
हृद्यविच्छिन्नमोङ्कारं घण्टानादं बिसोर्णवत् ।
प्राणेनोदीर्य तत्राथ पुनः संवेशयेत्स्वरम् ॥ ३४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

पौरुक्त्यादेवं व्याख्येयं यथा मुमुक्षुस्त्वां ध्यायेत्तन्मे वक्तुमर्हसि ननु मुमुक्षोर्ध्यानेन पृष्टेन तवैकान्तिकभक्तस्य किं तस्मात् यथा त्वामहं ध्यायामि तद्वदेत्येवं पृच्छ्यतामित्यत आह । मे मम तु एतत् ध्यानमिति संहतपाणिद्वयेन तस्य चरणद्वयं दर्शयति ध्यानं त्वं वक्तुमर्हसीति पाठः सुगमः ॥ ३१ ॥

स्वनासाग्रेक्षणः इति चित्तस्थैर्याय । "अन्तर्लक्षो वहिर्दृष्टिः स्थिरचित्तः सुसंयत" इतियोगशास्त्रोक्तेः ॥ ३२ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

किंच मद्भक्तश्चैव निर्मलो भूत्वा मद्भावं प्राप्नोति नान्यत इति सदृष्टान्तमाह । यथेति । यथा हेम सुवर्णमग्निना ध्मातम् सन्तापितमेव मलं जहाति नतु क्षालनादिभिः स्वरूपञ्च भजते तद्वदात्मा जीवात्मा कर्मानुशयं संसारहेतुभूतानादिकर्माशयनं ध्यानं हृदयं विधूय मां मद्भावापत्तिं "निरञ्जनः परमं साम्यमुपैती"तिश्रुतिरत्रानुसन्धेया भजते आपद्यते च ॥ २५ ॥

ननु त्वत्प्राप्तिसाधारणहेतुभूतैवंविधा भक्तिः केनोपायेन स्यादित्यत आह । यथेति । असौ आत्मा जीवः मत्पुण्यगाथानां श्रवणैरभिधानैश्च यथा यथा मृज्यते देहात्माभिमानादिमलवियुक्तो भवति तथा तथा तत्त्वसूक्ष्मं तत्त्वेषु प्राकृतेषु देहेन्द्रियादिषु सूक्ष्मं ज्ञानस्वरूपं कर्मफलं भुञ्जानं जीवात्मानं तस्मिंश्च सूक्ष्मं नियन्तारं मां पश्यति तदनन्तरं स्वतः मद्भक्तो भवतीत्यर्थः ॥ २६ ॥

गङ्गाप्रवाहवदखण्डितवृत्तिरूपा यानुरक्तिः सा ज्ञानादेव जायते इति सदृष्टान्तमाह । विषयानिति । मम परमात्मनः अनुस्मरतः गुणस्वरूपादिचिन्तनं कुर्वतः मुमुक्षोश्चित्तं दृढतरानुरक्तिरूपम् मय्येव प्रविलीयते ॥ २७ ॥

यस्माद्विषयध्यानाद्विषयेषु चित्तं विलीयते मम ध्यानान्मयि च तस्माद्धेतोः अभिध्यानं देहगेहादिविषयकमहंममाभिमानं हित्वा मद्भावैः मद्गाथाश्रवणाभिधानैः भावितं शुद्धतां नीतं मयि समाधत्स्व ॥ २८ ॥

ज्ञानं विना परा भक्तिर्नोपपद्यते अतो ज्ञानार्थं मां चिन्तयेदित्याह । स्त्रीणामिति ॥ २९ ॥

स्त्रीणां तत्सङ्गिनां च सङ्गत्यागे हेतुमाह । नेति ॥ ३० ॥

चिन्तयेन्मामतन्द्रित इत्युक्तं तत्प्रकारं पृच्छति । यथेति । यथेति ध्यानाङ्गप्रश्नः यादृशमिति ध्येयविग्रहप्रश्नः यदात्मकमिति स्वरूपप्रश्नः ॥ ३१ ॥

उत्तरमाह । सम इत्यादिना । ध्यानाङ्गभूतासनानरूपणम यमनियमयोरुपलक्षणम् ॥ ३२ ॥

———

भाषा टीका ।

जैसे अग्नि से धौंकने से सुवर्ण अपने मैल को छोड देता है फिर अपने शुद्धरूप को प्राप्त होजाता है तैसे आत्मा भी मेरे भक्ति योग से कर्म विषयवासनाओं को छोडकर शुद्ध होकर फिर मेरे को भजता है ॥ २५ ॥

यह आत्मा जैसे जैसे मेरे कथा श्रवण नामग्रहण आदिकों से पवित्र होता है तैसे तैसे प्रकृति पुरुष ईश्वर इन सूक्ष्म तत्त्वों को जानता है जैसे कि दोष युक्त नेत्र में अञ्जन के लगाने से यथार्थ पदार्थ दीखते हैं ॥ २६ ॥

विषयों के स्मरण करनेवाले पुरुष का चित्त विषयों में लगा रहता है मेरे को स्मरण करनेवाले का चित्त मेरे मे हीं लीन होजाता है ॥ २७ ॥

तिससे असत्पदार्थों को स्वप्न के तुल्य क्षणिक समुझ कर छोडकर मेरी भावना से शुद्ध किये हुये मन को मेरे मे स्थापन करो ॥ २८ ॥

आत्मज्ञानी पुरुष स्त्रियों के तथा स्त्री सङ्गवालों के संग को दूर से छोडकर निर्भय एकांत स्थान में बैठकर स्थिर चित्त होकर मेरा चिंतन करै ॥ २९ ॥

पुरुष को जैसे स्त्रियों के संग से और उनके संगियों के संग से बन्धन और क्लेश होता है तैसा और किसीके संग से क्लेश नहीं होता है ॥ ३० ॥

उद्धव उवाच हे कमलनेत्र ! श्रीकृष्ण जी आप जैसे हो जिसप्रकार से स्थित हो मुमुक्षु पुरुष जिसप्रकार से आप का ध्यान करै मेरे करने के अर्थ उस ध्यान को आप मेरे से कहिये ॥ ३१ ॥

श्रीभगवान उवाच साधक पुरुष बरोबर आसन के ऊपर सुख पूर्वक बैठकर शरीर को सीधा रक्खे दोनों हाथों को गोद पर रखलेवै नासा के अग्रभाग मे नेत्रों को करलेवे ॥३२॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

विपर्ययेण रेचकपूरककुम्भकक्रमेणापि यद्वा वामनाड्या पूरितं दक्षिणया त्यजेत्तया वा पूरितं वामयेत्येवं विपर्ययेण यथोक्तं योगे—

एवं प्रणवसंयुक्तं प्राणमेव समभ्यसेत् ।
दशकृत्वस्त्रिषवणं मासादर्वाग्जितानिलः ॥ ३५ ॥
हृत्पुण्डरीकमन्तःस्थमूर्ध्वनालमधोमुखम् ।
ध्यात्वोर्ध्वमुखमुन्निद्रमष्टपत्रं सकर्णिकम् ॥ ३६ ॥
कर्णिकायां न्यसेत्सूर्यसोमाग्नीनुत्तरोत्तरम् ।
वन्हिमध्ये स्मरेद्रूपं ममैतद्ध्यानमङ्गलम् ॥ ३७ ॥
समं प्रशान्तं सुमुखं दीर्घचारुचतुर्भुजम् ।
सुचारुसुन्दरग्रीवं सुकपोलं शुचिस्मितम् ॥ ३८ ॥
समानकर्णविन्यस्तस्फुरन्मकरकुण्डलम् ।
हेमाम्बरं घनश्यामं श्रीवत्सश्रीनिकेतनम् ॥ ३९ ॥
शङ्खचक्रगदापद्मवनमालाविभूषितम् ।
नूपुरैर्विलसत्पादं कौस्तुभप्रभया युतम् ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

इडया पूरयेद्वायुं त्यजेत्पिङ्गलया ततः ।
पिङ्गलापूरितं वायुमिडया च परित्यजेदिति ॥

निर्जितेन्द्रिय इति प्रत्याहार उक्तः ॥ ३३ ॥

प्राणायामो द्विविधः सगर्भोऽगर्भश्चेति तत्र श्रेष्ठत्वात्प्रणवगर्भमाह । हृदीति द्वाभ्याम् । मूलाधारादारभ्याविच्छिन्नं संततं घण्टानादतुल्यमोङ्कारं हृदि संस्थितं प्राणेनोदीर्योर्ध्वं द्वादशान्तपर्यन्तं नीत्वा कथम् विसोर्णावत्कमलनालतन्तुवत् तत्र मात्रातीते स्वरं पञ्चदश बिन्दुं संवेशयेत् अथ पुनरिस्वस्य तं च बिन्दुशिरस्कं कुर्यादित्यर्थः । यद्वा मूलाधारादारभ्य मूर्धान्तपर्यन्तं बिसतन्तुवत्सूक्ष्ममविच्छिन्नं सन्ततं हृदि मनसि प्राणेनोदीर्याभिव्यज्याथ पुनस्तत्रोङ्कारे घण्टानादतुल्यं स्वरमुदात्तं नादं स्थिरीकुर्यादिति ॥ ३४ ॥

मासादर्वाक् जितानिलो भवति ॥ ३५ ॥

एवं ध्यानाङ्गमुक्त्वा यादृशमित्यस्योत्तरं वक्तुं ध्येयपीठमाह- हृत्पुण्डरीकमिति सार्धेन। अन्तःस्थं देहान्तर्वर्ति ऊर्ध्वनालमधोमुखं मुकुलितं च कदलीपुष्पसङ्काशं यदस्ति तद्विपरीतं ध्यात्वेत्यर्थः ॥ ३६ ॥

ध्यसेच्चिन्तयेत् सविशेषणं ध्यानमाह । वह्निमध्य इति षड्भिः ध्यानमङ्गलं ध्यानस्य शुभं विषयम् ॥ ३७ ॥

सममनुरूपावयवम् दीर्घाश्चारवश्चत्वारो भुजा यस्मिंस्तत् सुचारु अतिरम्यम् ॥ ३८ ॥

समानयोः कर्णयोर्विन्यस्ते स्फुरती मकराकारे कुण्डले यस्मिंस्तत् श्रीवत्सश्रियो निकेतनं वक्षसि दक्षिणवामतः ताभ्यां युक्तमित्यर्थः ॥ ३९ ॥ ४० ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी ।

विपर्ययेणेत्यर्द्धकम् । पूर्वार्थे निरुक्त विपर्यये मानाभावोऽतो यद्वेति । इडयेत्यादि योगशास्त्रवाक्ये तु तदनुरूपमेवावृत्त्य योजना कार्या ॥ ३३ ॥

सगर्भो मन्त्रसहितः । अगर्भस्तच्छून्यः । तत्र द्विविधप्राणायामयोर्मध्ये । द्वादशाङ्गुलपर्यन्तमनाहतचक्रं प्रति नीत्वा । अतएव हृदि सन्तमित्युक्तम् हृदये स्यादनाहतमित्युक्तत्वात् मात्रातीत इति घण्टानादे यथा मात्रा नास्ति तथा मात्राशून्य इत्यर्थः । तञ्च ओङ्कारम् बिन्दुः शिरसि यस्य तथाभूतं कुर्यात् । सार्थसमाजेन व्याख्यातत्वात् पौनरुक्त्याच्च यद्वेति । वस्तुतस्तु नादशिरस्कमित्येव वाच्यं नादस्य तदङ्गत्वेनावश्यवाच्यत्वात् । प्राणेन प्राणायामेन मनसि भावनयाऽभिव्यक्तं कृत्वा ॥ ३४ ॥

प्राणं प्राणायामम् । त्रिषवणं त्रिकालम् । दशकृत्वः दशवारं प्रत्येकम् ॥ ३५ ॥

ध्यानाङ्गमासनप्राणायामप्रकारम् । ध्येयपीठं ध्येयस्य भगवतः पीठं सिंहासनं हृत्पुण्डरीकमिति सार्द्धकम् उन्निद्रमित्यस्य प्रतियोगित्वेन मुकुलितं चेत्यध्याहृतम् । तद्विपरीतं तस्मात् कदलीपुष्पसङ्काशाद्विपरीतम् उत्तरोत्तरं क्रमेणान्तरन्तः सूर्यसोमाग्नीन् तत्तन्मण्डलानि ॥ ३६ ॥

वन्हीत्यर्द्धकम् । ध्यातुरस्यैश्वर्योपासकत्वाद्वन्हिमध्येऽपि रूपध्यानं नानुचितम् अतएव ध्यानमङ्गलमिति तद्विशेषणम् ॥३७॥

अनुरूपा अन्यूनाधिका अवयवा यस्मिन् रूपे ॥ ३८ ॥

श्रीवत्सो वक्षसो दक्षिणभागे रोम्णां दक्षिणावर्त्तः भृगुलतासंज्ञकः श्रीश्च वामभागे रोम्णामावर्त्तस्तयोर्निकेतनं स्थानं शङ्खेति सार्द्धयुग्मकम् ॥ ३९—४१ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

विपर्ययेण रेचकपूरककुम्भकक्रमेण इह प्राणायामदशायां मनस आलम्बनम् ॥ ३३ ॥

प्रणवस्य स्वरूपमाह । ओङ्कारमिति घण्टानादविमनन्तू मविच्छिन्नत्वे दृष्टान्तौ प्राणेनोद्घाट्य तत्र हृदि पुनः स्वरमोङ्कारं सम्वेशयेत् पुनः पुनः प्राणायामेष्वनुसन्दध्यादित्यर्थः ॥ ३४ ॥

त्रिषवणं त्रिसन्ध्यं जितानिलो भवतीति शेषः ॥ ३५ ॥ ३६ ॥

तस्य मध्ये महानग्निरित्यग्निः प्रत्यक्षश्रुतिसिद्धः सूर्यसोमौ श्रुत्यन्तरसिद्धत्वादिह स्मृतौ ज्ञातव्यौ ॥ ३७ ॥

सुचारुभ्यः सुन्दरतरग्रीवा यस्य तत्सुचारुसुन्दरग्रीवम् ॥ ३८—४० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

किञ्च पूरकादिभिः प्राणस्य मार्गमिडापिङ्गलाख्यनाडीविशेषरन्ध्ररूपं प्राणवायुसञ्चारमार्गं शोधयेत् विपर्ययेण रेचकपूरककुम्भकक्रमेण वा शनकैरभ्यसेत्प्राणमार्गशोधनमिति शेषः जितप्राणस्य हि मनोजयः "प्राणबन्धनं हि सौम्य ! मन" इति श्रुतेः मनसि जित एव सति ध्यानं सुकरमतस्तस्य तदङ्गत्वं मार्गशोधनं त्वप्रतिबन्धेन प्राणवायुसञ्चारार्थं मार्गो हि श्लेष्मादिभिरापूरितोऽवतिष्ठतेऽतस्तदर्थं शोधनम् स्वनासाग्रकृतेक्षणत्वमपि चित्तस्थैर्यहेतुत्वाभिप्रायेणोक्तम् निर्जितेन्द्रिय इति यम उक्तः नियमस्त्वर्थतो द्रष्टव्यः ॥ ३३ ॥

प्राणस्येत्यादिना प्राणायाम उक्तः सच प्रणवाख्यमन्त्रानुसन्धानयुक्त एव कर्त्तव्य इति वक्तुं तदनुसन्धानप्रकारमेवाह । हृदीति । घण्टानादमिवाविच्छिन्नमविच्छिन्ननादमित्यर्थः । बिसोर्णावत्कमलतन्तुवत् हृद्यवस्थितं तमिमं सूक्ष्मेण नादेन युक्तमित्यर्थः । तावदोङ्कारमेवंविधमनुसन्धायेत्यर्थः ततः प्राणेन प्राणाख्यवायुना उदीर्योत्थाप्य तेनोत्थितं ध्यात्वेत्यर्थः । पुनस्तत्र हृदि स्वरमुच्चस्वरविशिष्टमोङ्कारं सम्वेशयेत्सम्प्रविष्टं ध्यायेदित्यर्थः ॥ ३४ ॥

एवमित्थं प्रणवसंयुक्तं प्रणवानुसन्धानयुक्तं यथा भवति तथा त्रिषवणं त्रिसन्ध्यं दशकृत्वः दश वारान् प्राणसंयममभ्यसेदेवं चेन्मासादर्वागेव जितोऽनिलः प्राणो येन तथा भूतो भवति ॥ ३५ ॥

एवं ध्यानाङ्गानि उक्त्वा मथाहष्टमपि ध्येयस्थानध्यानप्रकारमाह । हृत्पुण्डरीकमिति सार्द्धेन । अन्तःस्थं शरीरान्तर्वर्ति हृदयकमलमूर्ध्वनालमधोमुखं मुकुलितं च कदलीपुष्पसङ्काशमवलम्बते तदूर्ध्वमुखमधोनालमुन्निद्रं विकसितमष्टपत्रं सकर्णिकं सकोशं च ध्यात्वा तत्र कर्णिकायां सूर्यसोमाग्नीन् तन्मण्डलान्युत्तरोत्तरं न्यसेत् चिन्तयेदित्यर्थः । तस्य मध्ये महानग्निरित्यग्निः प्रत्यक्षश्रुतिसिद्धः सूर्यसोमौ तु श्रुत्यन्तरसिद्धत्वादिह स्मृताविल्याचार्याः ॥ ३६ ॥

अथ ध्येयमात्मनो रूपं वदन् ध्यानं विधत्ते । वह्निमध्य इत्यादिना । वह्निमण्डलमध्ये अमेतवक्ष्यमाणविधं ध्यानमङ्गलं ध्यानस्य शुभाश्रयं रूपं स्मरेत् रूपं विशिनष्टि । श्याममिति । प्रशान्तं प्रसन्नं शोभनं मुखं यस्य तत् दीर्घाः सुन्दराश्चत्वारो भुजा यस्य तत् ॥ ३७ ॥

सुचारुभ्योऽपि सुन्दरा ग्रीवा यस्य शोभनौ कपोलौ यस्य शुचि शुभ्रं स्मितं मन्दहासो यस्य तत् ॥ ३८ ॥

समानयोः कर्णयोर्विन्यस्ते स्फुरन्ती मकराकारे कुण्डले यस्य तथा भूतं श्याममित्युक्तं किमिव श्याममित्यत आह । घनश्याममिति । हेमवत्पीतमम्बरं यस्य तत् श्रीवत्सश्रीमहालक्ष्म्योर्निकेतनमुरो यस्य यस्मिंस्तदिति वा ॥ ३९ ॥

शङ्खादिभिर्विभूषितं नूपुरैर्विलसन्तौ पादौ यस्य ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

विपर्ययेण रेचकादिक्रमेण ॥ ३३ ॥

अत्र प्राणशब्दो श्रिरावर्त्तनीयः हृदि निरन्तरं प्राणेनोच्चार्यमाणमोङ्कारं घण्टानादवत् कर्णरमणीयं बिसोर्णावत् पद्मनालतन्तुवदविच्छिन्नं वायुद्वारा प्रेर्यमाणं प्राणशक्त्योदीर्य उत्थाप्य तत्र स्वहृदि स्थिते प्राणे स्वरमुदात्तलक्षणं पुनर्व्यावृत्तं यथा संवेशयेत् समीचीनं कुर्यादित्यन्वयः ऊर्णां भ्रूमध्यमावर्त्ते तन्तौ मेषादिलोमास्त्रिति यादवः । पुनरप्रयमे प्रश्ने व्यावृत्तावधारणा इति ॥ ३४ ॥

प्रणवेन संयुक्तं प्राणसंयमं प्राणायामं मासादर्वाक् मासात्पूर्वमेवानिलो जितः प्राणप्रसादं प्राप्त इत्यर्थः—

> उपास्य प्राणतोऽनुज्ञां हृदि स्थात्प्राप्य सेवकः ।
> अनुज्ञानन्तरं मासाद्धरो प्राणो भविष्यति ॥
> प्रसादभाक्त्वं सम्प्रोक्तं प्राणविष्णोर्जयस्त्विति ।
> नहि सर्वविजेतारौ विजेयौ केन चित्क्वचित् ॥
> अपेक्षितं फलं तेन दीयते तज्जितं त्विति ।
> यथा जिता वसुमती यथा मोक्षपदं जितमिति ॥

प्रभञ्जनप्रमाणवचनात्युक्तम् ॥ ३५ ॥

कथं स्थितं त्वामिति प्रश्नं परिहरति । हृत्पुण्डरीकेति ॥ ३६ ॥

यादृशमिति प्रश्नं परिहरति । वन्हिमध्य इति ॥ ३७ ॥

यदात्मकमित्यस्य परिहारः प्रशान्तमित्यनेन सूचितः निर्दोषप्रकृष्टानन्दस्वभावमित्यर्थः ॥ ३८—४१ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

विपर्ययेणोत्क्रमेणैकम टीकायामिडयेत्यादिवाक्ये च तदनुरूपमेवावृत्य योजना कार्या ॥ ३३ ॥

हृदीति तैः तत्र द्वादशान्तं द्वादशाङ्गुलपर्यन्तम् अनाहतमित्यर्थः । बिन्दुशिरस्कमित्यत्र नादशिरस्कमित्येव वाच्यं पौनरुक्त्यात् नादस्य तदङ्गत्वेनावश्यवाच्यत्वाच्च ॥ ३४—४३ ॥

द्युमत्किरीटकटककटिसूत्राङ्गदायुतम् ।
सर्वाङ्गसुन्दरं हृद्यं प्रसादसुमुखेक्षणम् ॥ ४१ ॥
सुकुमारमभिध्यायेत्सर्वाङ्गेषु मनो दधत् ।
इन्द्रियाणीन्द्रियार्थेभ्यो मनसाऽऽकृष्य तन्मनः ।
बुद्ध्या सारथिना धीरः प्रणयेन्मयि सर्वतः ॥ ४२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

विपर्य्ययेण रेचकपूरककुम्भकक्रमेण ॥ ३३ ॥

हृदीति मूलाधारादारभ्य अविच्छिन्नं सन्ततं घण्टानादतुल्यमोङ्कारं हृदि स्थितं प्राणेनोदीर्य्य ऊर्ध्वं द्वादशाङ्गुलपर्य्यन्तम् नीत्वा कथं बिसोर्णावत् कमलनालतन्तुवत् अथ पुनस्तत्र स्वरं नादं बिन्दुं वा सन्वेशयेत् स्थिरीकुर्य्यात् ॥ ३४ ॥

मासादर्वाक् सामाद्बहिरेव ॥ ३५ ॥

हृत्पुण्डरीकं मन एव कमलं तच्च बहिरपि यातीति व्यावर्त्तयति अन्तःस्थं देहान्तर्वर्ति ऊर्ध्वनालमधोमुखं मुकुलितञ्च कदलीपुष्पसंकाशं वदन्ति तद्विपरीतं ध्यायेदित्यर्थः न्यसेत् सञ्चिन्तयेत् ॥ ३६ ॥

ध्यानमङ्गलं ध्यानस्य शुभं विषयम् ॥ ३७ ॥

समम् अनुरूपावयवं प्रशान्तमनुपमम् ॥ ३८॥३९ ॥

श्रीवत्सश्रियौ वक्षोदक्षिणवामस्थे नितरां केतने असाधारणचिन्हे यस्य तत् आयुतं समन्तादलङ्कृतम् ॥ ४० ॥ ४१ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

प्राणायाममाह । प्राणस्येति त्रिभिः वामनासारन्ध्रक्रमेण पूरककुम्भकरेचकैः विपर्य्ययेणापि रेचकपूरककुम्भकक्रमेणापि वा दक्षिणनासारन्ध्रक्रमेणापीत्यर्थः ॥ ३३ ॥

हृदि बिसोर्णावत् कमलतन्तुवत् सूक्ष्मं घण्टानादमिव अविच्छिन्नं सन्ततमोङ्कारं प्राणेनोदीर्य्योङ्कुरितं कृत्वा पुनः प्राणेनैव संयुक्तं स्वरं प्रणवम् तत्र प्राणायामकर्मणि सन्वेशयेत्संयोजयेदित्यर्थः ॥ ३४ ॥

एवमुक्तप्रकारेण प्रणवः संयुक्तो येन मासादर्वाग्जितानिलो जितप्राणो भवति ॥ ३५ ॥

ध्येयपीठकथनपूर्वकं श्रीविग्रहध्यानमाह । हृत्पुण्डरीकमिति सार्द्धैःषड्भिः अन्तःस्थं स्वशरीरान्तर्गतम् उन्निद्रं विकासितम् ३६

पुण्डरीकस्य कर्णिकायां सूर्य्यादीन्न्यसेच्चिन्तयेत् एतद्रूपमायां ध्यानमात्रेणैव मङ्गलं यस्मात्तत्स्मरेत् ध्यायेत् ॥ ३७ ॥

समं समानावयवं मया रमया सह वर्तमानं वा सुचारु अतिकमनीयम ॥ ३८ ॥

समाने समानयोर्वा कर्णयोर्विन्यस्ते स्फुरन्ती मकराकारे कुण्डले यस्मिन् तत् वक्षसि दक्षिणभागे श्रीवत्सयुक्तं श्रियः शोभायाः निकेतनम् ॥ ३९ ॥ ४० ॥

भाषा टीका ।

फिर पूरक कुम्भक रेचकों को करके अथवा विपरीत से प्राण के मार्ग का शोधन करै जितेन्द्रिय होकर धीरे धीरे प्राणायाम का अभ्यास करै ॥ ३३ ॥

हृदय के मध्य में कमल के सूत्र सरीका घण्टा सरी के नाद का निरन्तर अनुसन्धान करके प्राण वायु से उस ओंकार को उठाकर फिर उस मे नाद बिन्दुस्वर का संयोग करै ॥३४॥

इसी प्रकार ओंकार के सहित सदा प्राणायाम का अभ्यास करै ऐसे त्रिकाल दश दश प्राणायाम के करने से एक महीने के अन्दर में पवन वश हो जावैगा ॥ ३५ ॥

फिर हृदय में कमल ध्यान करै जिसका कि ऊपर को नाल है नीचे को मुख है उसको ऊर्ध्व मुख करै उस में आठ पत्र हैं और कर्णिका भी हैं ॥ ३६ ॥

उसकी कर्णिका के मध्य मे बाहिर में सूर्य मण्डल फिर चन्द्र मण्डल फिर अग्नि इनको स्मरण करै उस अग्नि मण्डल के मध्य गें ध्यान करने से मंगल दायक इस मेरे स्वरूप का स्मरण करै ॥ ३७ ॥

जिस रूप के सब अवयव समान हैं जो शान्त है जिस के सुन्दर मुख है जिस के लम्बे सुन्दर चार भुजा हैं जो अति सुन्दर है जिस के सुन्दर ग्रीवा है जिस के सुन्दर कपोल हैं जिसका सुन्दर मन्द हास है ॥ ३८ ॥

बरोबर दोंनों कानों में धारण किये प्रकाशमान मकराकृत कुंडल जिस में हैं सुवर्ण पीताम्बर है जो रूप मेघ सरी का श्याम है जिस में श्री वत्स का चिन्ह है जो लक्ष्मी का निवास स्थान है ॥ ३९ ॥

शंख चक्र गदा पद्म तथा वनमाला इन से भूषित है नूपुरों से चरण जिस के शोभित हैं जो कौस्तुभ मणि के प्रभा से युक्त है ऐसे रूप का ध्यान करै॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

द्युमद्भिः किरीटादिभिरासमन्ताद्युतमलंकृतम् प्रसादेन शोभनं मुखमीक्षणं च यस्मिंस्तत् ॥ ४१ ॥

सुकुमारमतिकोमलम् सविशेषणं ध्यानमुपसंहरति । इन्द्रियाणीति । प्रकर्षेण नयेत् सर्वतः सर्वाङ्गयुक्ते ॥ ४२ ॥

तत्सर्वव्यापकं चित्तमाकृष्यैकत्र धारयेत् ।
नान्यानि चिन्तयेद्भूयः सुस्मितं भावयेन्मुखम् ॥ ४३ ॥
तत्र लब्धपदं चित्तमाकृष्य व्योम्नि धारयेत् ।
तच्च त्यक्त्वा मदारोहो न किंचिदपि चिन्तयेत् ॥ ४४ ॥
एवं समाहितमतिर्मामेवाऽऽत्मानमात्मनि ।
विचष्टे मयि सर्वात्मन् ज्योतिर्ज्योतिषि संयुतम् ॥ ४५ ॥
ध्यानेनेत्थं सुतीव्रेण युञ्जतो योगिनो मनः ।
संयास्यत्याशु निर्वाणं द्रव्यज्ञानक्रियाभ्रमः ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां
संहितायां वैयासिक्यामेकादशस्कन्धे
चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

बाह्यमित्यनयोरुत्तरत्वेन सविशेषणमुक्त्वा यदात्मकमित्यस्योत्तरतया शनैर्विशेषणत्यागेन ध्यानमेव समाधिपर्यन्तमाह । तदिति त्रिभिः । एकत्राङ्गे अन्यान्यङ्गानि न चिन्तयेत् एकत्रेति यदुक्तं तदेवाङ्गं दर्शयति । सुस्मितमिति ॥ ४३ ॥

व्योम्नि सर्वकारणरूपे तच्च कारणत्वमपि त्यक्त्वा मदारोहो मयि शुद्धे ब्रह्मण्यारूढः सन् किञ्चिदध्यातृध्येयविभागमपि न चिन्तयेत् ॥ ४४ ॥

मामेवाऽऽत्मनि विचष्टे आत्मानं च सर्वात्मनि मयि संयुतं विचष्टे ज्योतिर्ज्योतिषि संयुक्तमिवेत्यन्वयः ॥ ४५ ॥

एवंभूतसमाधिपर्यन्तध्यानस्य फलमाह । ध्यानेनेति । मनो युञ्जतः समादधतः द्रव्यज्ञानक्रियाभ्रमोऽधिभूताधिदैवाध्यात्मरूपो दृश्यद्रष्टृदर्शनरूपो वा भ्रमो निर्वाणं शान्तिं सम्यग्यास्यतीति ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

इन्द्रियार्थेभ्यः इन्द्रियाणि श्रोत्रादीनि । सारथिना सहायरूपया ॥ ४२ ॥

सर्वव्यापकं सर्वाङ्गाभिनिविष्टम् ॥ ४३ ॥

तत्रैकस्मिन्नङ्गे मुखे ॥ ४४ ॥

मां तत्पदार्थमेव चिद्रूपत्वेनानुगतमात्मनि त्वम्पदार्थे विचष्टे आत्मानं त्वंपदार्थं ज्योतिः किरणमिव ज्योतिषि किरणमालिनि संयुतं नित्याश्रितं विचष्टे ॥ ४५ ॥

एवम्भूतेति । एवम्भूतः परस्परं व्यतिहारेणैक्यभावनाभूतो यः समाधिस्तत्पर्यन्तस्य ध्यानस्य । द्रव्यादिपदानां यथासंख्यमर्थत्रयं ज्ञेयम् ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धीये
श्रीराधारमणदासगोस्वामिकृतदीपिकादीपने टिप्पणे
चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

द्युमत् द्युतिमत् ॥ ४१ ॥

बुद्ध्या भगवद्रूपमेव ध्येयं नान्यच्चिन्त्यमित्यध्यवसायेन सर्वव्यापकं शब्दादिसर्वविषयप्रवणम् एकत्र भगवद्विग्रहे अन्यानि रूपाणि विशेषतो मनोहारित्वादाह । सुस्मितमिति । आकृष्य विषयान्तरेभ्यः आकृष्य ॥ ४२ ॥ ४३ ॥

तत्र विग्रहे लब्धपदमित्यन्वयः व्योम्नि व्योमवदपरिच्छिन्ने दिव्यात्मस्वरूपे कं ब्रह्म खं ब्रह्मेति हि श्रुतिः मदारोहः मत्स्वरूपानुसन्धाननिष्ठः तच्च धारणामपि त्यक्त्वा न किञ्चिदपि चिन्तयेत् समाधौ ध्येयमेव पश्यति ध्यानक्रियामपि न जानाति कुतो विषयान्तरज्ञानमित्यर्थः ॥ ४४ ॥

समाधिदशायां परिशुद्धे जीवात्मन्यन्तरात्मतयावस्थित एव भगवाननुसंध्येयः न तु केवल इत्याह । एवं समाहितेति ॥ ४५ ॥

ध्यानेनेति । द्रव्यज्ञानक्रियाभ्रमं द्रव्यं तमः ज्ञानं सत्त्वं क्रिया रजः तत्कृतभ्रमान्वितमनः उक्तलक्षणं ध्यानेन निर्वाणं मुक्तिं विषयान्तरावगाहनाक्षमत्वं यास्यतीत्यर्थः ॥ ४६ ॥

इति श्रीमद्भागवतव्याख्याने एकादशस्कन्धीये
श्रीसुदर्शनसूरिकृतशुकपक्षीये
चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

द्युमद्भिर्द्युतिमद्भिः । किरीटादिभिरासमन्तात् सुतरामलंकृतं तत्र सूत्रं ब्रह्मसूत्रं कटिसूत्रं च सर्वेष्वङ्गेष्ववयवेषु सुन्दरं हृद्यं मनोहरं प्रसादसुमुखेक्षणमनुग्रहसूचकशोभनमुखेक्षणयुक्तं सुकुमारमतिकोमलं तदेवंभूतं मम रूपं सर्वेषु पादादिमूर्धान्तेष्वङ्गेषु मनो दधद्धारयन्नभिध्यायेदिति धारणाध्याने उक्ते ॥ ४१ ॥

इन्द्रियार्थेभ्यः शब्दादिविषयेभ्यो मनसा करणभूतेनेन्द्रियाणि श्रोत्रादीन्याकृष्य प्रत्याहृत्य सारथिना सहायभूतया भगवद्रूपमेव ध्येयं नान्यत्किञ्चिदपि चिन्तयितव्यमित्यध्यवसायात्मिकया बुद्ध्या तन्मनोऽप्याकृष्य सङ्कल्पविकल्पात्मकव्यापारादुपरतं कृत्वा एवं प्रत्याहार उक्तः तन्मानसमाकृष्यमाणं मयि निरतिशयानन्दावहे मयि प्रणयेत्समादध्यादिति समाधिरुक्तः एवं यादृशं येति प्रश्नस्योत्तरमुक्तं भवति ॥ ४२ ॥

धारणां प्रपञ्चयति। तदिति। तस्ततः सर्वव्यापकं सर्वं कृत्स्नं विग्रहं व्याप्नोतीति तथा कृत्स्नदिव्यविग्रहगोचरमित्यर्थः—चित्तमाकृष्य एकत्र एकस्मिन्नङ्गे धारयेत् नान्यान्यङ्गानि चिन्तयेत् किन्तदेकमङ्गं यत्र धार्यं मनोऽत आह । भूयः सुस्मितं भावयेन्मुखमेवेति। विशेषतो मनोहारित्वादिति भावः । आकृष्येत्यस्य विषयान्तरेभ्य इतिशेषः ॥ ४३ ॥

तत्र सुस्मिते मुखे लब्धपदं लब्धं चिरमनुभूतं पदं मुखरूपविषयं येन तच्चित्तं तत आकृष्य व्योम्नि व्योमवन्निर्मलेऽपरिच्छिन्ने च निरस्तनिखिलदोषे समस्तकल्याणानन्तत्वादिगुणगणयुक्ते च दिव्यात्मस्वरूपे धारयेत् दिव्यात्मस्वरूपस्य व्योमोपमत्वं कं ब्रह्म खं ब्रह्मेति श्रुतिप्रसिद्धम् । व्योम्नि धारयेदित्यनेन यदात्मकमित्यस्योत्तरमुक्तं भवति समाधिस्वरूपमाह । तच्चेति । मदारोहः मत्स्वरूपरूपानुसन्धाननिष्ठः तच्च धारणामपि त्यक्त्वा न किञ्चिदपि चिन्तयेत् समाधिर्हि ध्येयैकदर्शनरूपः अतो ध्यातृध्यानक्रियादिकमपि नानुचिन्तयेदित्यर्थः ॥४४॥

समाधिदशायां परिशुद्धे जीवात्मन्यन्तरात्मतयाऽवस्थित एव भगवाननुसन्धेयो नतु केवल इत्याह । एवं समाहितमतिः सर्वात्मान्तर्यामित्वात्सप्तम्या लुक् सर्वेषामात्मन्यन्तः प्रविश्य धारके मय्यात्मानं प्रत्यगात्मानम् आत्मनि प्रत्यगात्मनि च माम् अन्तरात्मानं विचष्टे पश्यति ज्योतिः सूर्यादिप्रभा ज्योतिषि दीपादौ संयुतमिवेत्यन्वयः ॥ ४५ ॥

एवंभूतसमाधिपर्यन्तध्यानस्य फलमाह । ध्यानेनेति । सुतीव्रेणान्तरायानुपहतेन ध्यानेनेत्थं मनो युञ्जतः समादधतो योगिनः द्रव्यज्ञानक्रियाभ्रमः भूतपञ्चकज्ञानेन्द्रियाणि कर्मेन्द्रियाणि द्रव्यज्ञानक्रियाशब्दैर्विवक्षितानि तेषां भ्रमः भूतेन्द्रियसङ्घातात्मकदेहसम्बन्धप्रयुक्तो देहात्मभ्रमः स्वतन्त्रात्मभ्रमश्च स आशु निर्वाणं लयं संयास्यति भ्रममिति पाठे द्रव्यं तमः ज्ञानं सत्त्वं क्रिया रजस्तत्कृतभ्रमान्वितं मनः उक्तलक्षणेन निर्वाणमरति विषयान्तरावगाहनात्क्षमत्वं यास्यतीत्यर्थः ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

विषयपाशाकृष्टत्वेन विवशेन्द्रियैर्ध्यानं कथमुपपद्यत इत्यतस्तदुपायमाह । इन्द्रियाणीति। तस्मिन् ध्येय एव स्थितमनाः ॥ ४२ ॥

सर्वव्यापकं सर्वाङ्गविषयं चित्तमाकृष्यैकत्र एकस्मिन्मुखाद्यवयवे सर्वावयवस्मरणाशक्तावेकस्मिन्नवयवे धारयेदित्यर्थः ॥ ४३ ॥

तत्र मुखादौ लब्धपदमाकृष्य व्योम्नि सर्वाङ्गेषु धारयेदित्यर्थः। "व्योमेति व्याप्तशब्दः स्याद्विशेषादोमतो यत" इति वचनात् विशेषादस्तत्त्वमव्ययवानामित्यर्थः। मय्येव मनस आरोहो यस्य स मदारोहः पुरुषः तच्च धारणालक्षणं ध्यानं त्यक्त्वा स्वत एव मनसस्तत्रैव समाहितत्वादयत्नेन जलधौ गाङ्गप्रवाहगमनवच्चिन्तयेत् तदुक्तम्—

यावत्समग्रस्मरणमचलं केशवे भवेत्।
समग्रं चिन्तयेत्तावद्यदा तु विचलेत्ततः ॥
प्रत्यङ्गधारणां कुर्यान्मनो यावत्समग्रगम्।
प्रत्यङ्गाभ्यासतो यावत्समग्रेषु स्थिरं मनः ॥
तदा पुनः समग्रन्तु धारयेद्यत्नतो बुधः।
यदा तु धारणोत्साहं विना तत्राचलं मनः।
तिष्ठेत्त्यक्त्वा तमुद्योगं शङ्खचक्राम्बुजाङ्किते ॥
आरूढचेताः परमे शृङ्गाराद्यैकधामनि।
नैवान्यच्चिन्तयेत्तस्मात्पूर्णानन्दाच्चतुर्भुजात् ॥
ततोऽन्यस्मरणे तस्मान्मनश्चलति सुस्थिरम्।
धारणार्थं प्रयत्नेन तस्मात्तदुभयं त्यजेत् ॥
यावत्स्वारूढचेताः स्याद्विष्णोरूपे चतुर्भुजे।
॥ इति ४४ ॥

उपासनाफलमाह। एवमिति। एवं निरन्तराभ्यासरतं प्रतिदिनं प्रवृद्धप्रेम्णा मय्येव समाहितमतिस्तत्परिपाके सत्यात्मनि देहे आत्मानं ज्ञानाद्यभीष्टदातृत्वेन स्वामिनं मामेव विचष्टे जीवात्पृथक्स्थितं पश्यति। विनिषेधे पृथग्भाव इति यादवः सर्वात्मन् सर्वस्वामिनि ज्योतिषि ज्योतिर्मये मयि संयुतं मदाधारतया स्थितं तस्माज्जातं तस्मिन्नेवोतमिति ज्योतिर्जीवं च पश्यति तारतम्येन बिम्बभावेन स्थिताक्षत्वाभिमानिन्यो देवताः दृष्ट्वा सर्वाधारं मामन्ते पश्यतीति भावः—

समाधियोगे सम्पूर्णं हृदि पश्यति केशवम्।
जीवं तत्प्रतिबिम्बं च तेनैव सह संस्थितम् ॥
तदाधारं तदन्तःस्थं तेनैव सदृशं सदा।
आनन्दज्ञानशक्त्याद्यैः सदा तदवरं गुणैः ॥
जीवन्मुक्तौ च मुक्तौ वा सततं तद्वशे स्थितम्।
इत्येतदत्र मानम्—
स्वयंप्रकाशरूपत्वाज्जीवोऽपि ज्योतिरुच्यते।
इति च ॥ ४५ ॥

दर्शनफलमाह। ध्यानेनेति। सुतीव्रेण निशितेन इत्थमुत्पन्नध्यानेन निदिध्यासेन दर्शनेन युञ्जतः सर्वस्माच्छ्रेष्ठोऽयमिति ध्यायतो योगिनो ज्ञानिनो द्रव्यज्ञानक्रियाभ्रमः महीयोऽयमिति

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

देहादिषये ज्ञानेन्द्रियकर्मेन्द्रियविषये च भ्रमतीति भ्रमरूपं प्राकृतमनो निर्वाणं नाशम् आशु संयास्यति यातीत्यन्वयः ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्

चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ॥

तत्र लब्धपदमित्यादिकं मुमुक्षुध्यानत्वात् यद्वा तदनन्तरं ब्रह्मानुसन्धानं मायावृत्तिलेशावशेषलोपेच्छया तल्लोपे च स्वतः श्रीभगवत्स्फूर्तिर्भवतीति ब्रह्मभूतः प्रसन्नात्मेतिवत् ॥ ४४ ॥

ज्योतिः किरणं ज्योतिषि किरणमालिनीव संयुतं निस्याभितमित्यन्वयः ॥ ४५–४६ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे

चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

सान्द्रध्यानार्थं मनस ऐकाग्र्यप्रकारमाह । इन्द्रियाणि । चक्षुरादीनि विषयेभ्यो रूपादिभ्यः सकाशात् मनसा आकृष्य मनस्येव प्रणयेत् तन्मनः बुद्ध्या आकृष्य मयि सर्वतः सर्वाङ्गयुक्ते प्रणयेत् प्रकर्षेण नयेत् ॥ ४२ ॥

सर्वव्यापकं सर्वाङ्गेषु सञ्चरत् चित्तम् आकृष्य एकत्र एकस्मिन्नङ्गे तदेवाह । मुखमिति ॥ ४३ ॥

लब्धपदं ततोऽन्यत्रागच्छत्तत्रैव स्थिरीभूतमित्यर्थः । ततश्च तत्र मुखध्यान एव लब्धपदं मुखध्यानमजहदेवेत्यर्थः । आकृष्य देहेन्द्रियादिभ्यः पृथक् कृत्य नतु ध्यानभक्तेरपि पृथक्कुर्वेत्यर्थः । व्योम्नि आकाशे धारयेत् ततश्च तच्च चित्तमपि त्यक्त्वा मदारोहः मयि ब्रह्मण्यारूढः सन् न किञ्चिदपि चिन्तयेत् किन्तु भक्तिकणिकायुक्तो जीवो ब्रह्मैवानुभवेदिति भावः श्रीहंसदेवेन गुणाचेतसोस्त्यागो य उक्तस्तस्यायमेवप्रकार इति ज्ञेयं भक्त्यार्द्रयार्पितमना न पृथग्विदधीतेति श्रीकपिलदेवोक्तेः कर्मज्ञानादित्यागस्येव ध्यानभक्तित्यागस्य तत्त्यागेच्छायाश्च निषिद्धत्वात् ॥ ४४ ॥

किन्तु ध्यानमयीभवेदित्याह । एवमिति । समाहिता समाधियुक्ता मतिर्यस्य सः मामेव ब्रह्म आत्मनि जीवात्मनि विचष्टे आत्मानं च सर्वात्मनि मयि संयुतं विचष्टे ज्योतिर्ज्योतिषि संयुतमिति ब्रह्मजीवयोरप्राकृतस्वीयपूर्णज्योतिर्ज्योतिः कृतार्थं ज्ञापितम् ॥ ४५ ॥

एवम्भूतसमाधिपर्यन्तध्यानस्य फलमाह । ध्यानेनेति । युञ्जतः समादधतः द्रव्यज्ञानक्रियासु अधिभूताधिदैवाध्यात्मसु भ्रमः अध्यासरूपः निर्वाणं शान्तिं सम्यक् याति यास्यति॥४६॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।

एकादशे सङ्गतः सतसङ्गतोऽभूच्चतुर्दशः ॥ १४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

द्युमद्भिः किरीटादिभिः आ समन्तात् युतं युक्तं प्रसादेन शोभनं मुखमीक्षणं च यस्मिन् तत् ॥ ४१ ॥

इन्द्रियार्थेभ्यः मनसाकृष्येति प्रत्याहारो दर्शितः क्रमोऽत्र न विवक्षितः प्रणयेन्मयि सर्वतः इत्यनेन धारणापि सूचिता ॥४२॥

एकत्र धारयेदित्युक्तं तदेवाह । सुस्मितमिति । मुखमिति चरणाद्युपलक्षणम् ॥ ४३ ॥

श्रीविग्रहध्यानमुक्त्वा स्वरूपध्यानं यदात्मकमित्यस्योत्तरमाह । तत्रेति । तत्र श्रीविग्रहैकदेशे सुस्मितमुखादौ लब्धपदं चित्तम् व्योम्नि व्योमवत्सूक्ष्मे स्वरूपे धारयेत् मदारोहः ध्यानेन मयि आरूढः तच्च स्वरूपध्यानमपि त्यक्त्वा किञ्चिदपि न चिन्तयेत् ध्येयदर्शनजानन्दसंप्लुते निमग्नो भवेदित्यर्थः ॥ ४४ ॥

उपसंहरति । एवमिति द्वाभ्याम् । एवमुक्तप्रकारेण समाहितमतिः आत्मनि ध्यातरि मां ध्येयम् आत्मानं ध्यातारं सर्वात्मन् सर्वात्मनि ज्योतिर्ज्योतिषि सर्वावभासके मयि विचष्ट पश्यत ॥ ४५ ॥

द्रव्ये देहादौ अहमित्यादिरूपः ज्ञाने स्वपरयोः स्वरूपैकत्वादिरूपः क्रियायां कर्मणि स्वर्गादिपरत्वरूपश्च भ्रमः निर्वाणं लयं संयास्यति ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धीये

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे

चतुर्दशाध्यायार्थप्रकाशः ॥ १४ ॥

भाषा टीका ।

प्रकाशमान किरीट कडा कौधनी बाजूबंध इनों से सुंदर शोभित सब अंगों से सुंदर मनोहर कृपा करने को सुंदर मुख नेत्र युक्त का ध्यान करै ॥ ४१ ॥

ऐसे सुकुमार रूप को सब अंगों में मन को लगाकर ध्यान करै उस मूर्त्ति में तन्मय होकर सब विषयों से मन के द्वारा इंद्रियों को खैंच कर मनको उसी में लगा देवे ऐसा धीर पुरुष बुद्धि का साहाय लेकर चारों ओर से मेरे में मन को लगावै ॥ ४२ ॥

सब तरफ चले जाने वाला जो मन है तिसको खैंच कर एक ठिकाने मूर्त्ति में धारणा करै फिर भी और अंगों की चिंता न करके केवल मंद हास युक्त भगवन्मुख की भावना करै ॥ ४३ ॥

उस मुखारविंद में जब चित्त स्थिर होजावै तब

भाषा टीका ।

वहां से उस मन को खैंचकर आकाश सरी के निर्मल समस्त कल्याण गुण युक्त हेय गुण रहित परमात्मस्वरूप में धारण करै फिर उसको भी छोडकर मेरे में दत्त चित्त होकर फिर कुछ भी चिन्त न नहीं करै इहां (तच्च त्यक्त्वा) इसके कहने से परमात्मा के स्वरूप के छोडने का अर्थ नहीं है क्योंकि आगे (मदारोहः) यह भी तो कहा है तिससे इहां ऐसा क्रम है कि पहिले से यम नियम आसन प्राणायाम प्रत्याहार ए छै अंग योग के कह आये हैं अब मुखके ध्यान करने में धारणा का कथन किया है उस धारणा का छोडना कहा है तिसके पीछे समाधि लगा कर हमारे स्वरूप के विना दूसरे पदार्थों का स्मरण न करै यह कहने का तात्पर्य है नहीं तो भगवत्स्वरूप को छोडदेगा तो समाधि ही क्या होगा ॥ ४४ ॥

इस प्रकार से सावधान बुद्धि होजाने से अपने आत्मा के विषे हम परमात्मा को सर्वात्मरूप से देख लेता है जैसे कि अग्नि के कण और अग्नि का भेद है तिस प्रकार जीवात्मा परमात्मा प्रकाश रूपका भेद है ॥ ४५ ॥

इस प्रकार से अतिशय ध्यान के करने से योगिका मन युक्त होता है तब शीघ्र ही सत्व रजतम तीनों गुणों का भ्रम शांत होजाता है ॥ ४६ ॥

इति श्रीमद्भागवत एकादशस्कन्ध में चौदहवां अध्याय की

श्री वृन्दावनस्थ पं० लक्ष्मणाचार्यकृत

भाषा टीका समाप्त ॥ १४ ॥

———

इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे चतुर्दशोऽध्यायः ॥ १४ ॥

—:*:—

अथ पञ्चदशोऽध्यायः ।

---:*:---

श्रीभगवानुवाच ।

जितेन्द्रियस्य युक्तस्य जितश्वासस्य योगिनः ।
मयि धारयतश्चेत उपतिष्ठन्ति सिद्धयः ॥ १ ॥

उद्धव उवाच ।

कया धारणया कास्वित्कथंस्वित्सिद्धिरच्युत ! ।
कति वा सिद्धयो ब्रूहि योगिनां सिद्धिदो भवान् ॥ २ ॥

श्रीभगवानुवाच ।

सिद्धयोऽष्टादश प्रोक्ता धारणायोगपारगैः ।
तासामष्टौ मत्प्रधाना दशैव गुणहेतवः ॥ ३ ॥
अणिमा महिमा मूर्तेर्लघिमा प्राप्तिरिन्द्रियैः ।
प्राकाम्यं श्रुतदृष्टेषु शक्तिप्रेरणमीशिता ॥ ४ ॥
गुणेष्वसंगो वशिता यत्कामस्तदवस्यति ।
एता मे सिद्धयः सौम्य ! अष्टावौत्पत्तिका मताः ॥ ५ ॥
अनूर्मिमत्वं देहेऽस्मिन् दूरश्रवणदर्शनम् ।
मनोजवः कामरूपं परकायप्रवेशनम् ॥ ६ ॥
स्वच्छन्दमृत्युर्देवानां सह क्रीडानुदर्शनम् ।
यथासंकल्पसंसिद्धिराज्ञाप्रतिहता गतिः ॥ ७ ॥
त्रिकालज्ञत्वमद्वन्द्वं परचित्ताद्यभिज्ञता ।
अग्न्यर्काम्बुविषादीनां प्रतिष्टम्भोऽपराजयः ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ततः पञ्चदशे प्रोक्ताः सिद्धयो धारणानुगाः ।
श्रीविष्णुपदसप्राप्तावन्तरायतया मताः ॥

एवं मनो युञ्जतो योगिनोऽन्तराविर्भवन्त्यः सिद्धयोऽप्यन्तरायप्राया एवातस्ताः परिहृत्य परमेश्वरपर एव भवेदिति वक्तुं सिद्धीराह । जितेन्द्रियस्येति । युक्तस्य स्थिरचित्तस्य ॥ १ ॥

स्विदिति वितर्के कास्वित्किनामा कथंस्वित्कीदृशी वा धारणाश्च कतीति प्रश्नान्तरे वाशब्दः त्वमेवैतज्जानासि नान्य इत्याशयेनाह । योगिनामिति ॥ २ ॥

धारणाश्चाष्टादशेत्यनुषङ्गः । योगपारगैरिति । त्रिकालज्ञत्वादिक्षुद्रसिद्धीरन्येऽपि जानन्तीति भावः । अहमेव प्रधानं मुख्यः स्वभावत आश्रयो यासां ताः मत्सारूप्यं प्राप्तेषु किंचिन्न्यूना भवन्तीति भावः । गुणहेतवः सत्त्वोत्कर्षहेतुकाः ॥ ३ ॥

ताः स्वरूपेणोपदिशति । अणिमेति सार्धैः पञ्चभिः । अणिमा महिमा लघिमा च मूर्तेर्देहस्य तिस्रः सिद्धयः प्राप्तिर्नाम सिद्धिः सर्वप्राणिनामिन्द्रियैः सह तत्तदधिष्ठातृदेवतारूपेण सम्बन्ध इत्यर्थः । श्रुतेषु पारलौकिकेषु दृष्टेषु दर्शनयोग्येष्वपि सर्वेषु भूविवरादिपिहितेष्वपि प्राकाम्यं भोगदर्शनसामर्थ्यं सिद्धिः शक्तीनां मायातदंशभूतानां प्रेरणम् तत्रेश्वरे मायया अन्येषु तदंशानां प्रेरणमीशिता नामसिद्धिः ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

विषयभोगेष्वसंगो वशिता सिद्धिः यत्कामो यद्यत्सुखं कामयते तत्तदवस्यति तस्य तस्य सीमानं प्राप्नोतीति अष्टमी सिद्धिः औत्पत्तिकाः स्वाभाविक्यो निरतिशयाश्चेत्यर्थः ॥ ५ ॥

गुणहेतुसिद्धीराह । अनूर्मिमत्त्वं क्षुत्पिपासादिराहित्यम् दूरे श्रवणं दर्शनं चेति द्वे सिद्धी मनोवेगेन देहस्य गतिः कामितरूपप्राप्तिः परकाये प्रवेशः ॥ ६ ॥

स्वेच्छामृत्युः अप्सरोभिः सह देवानां याः क्रीडास्तासामनुदर्शनं प्राप्तिः संकल्पानुरूपप्राप्तिः अप्रतिहता आसमन्ताद्गतिर्यस्याः सा आज्ञा चेत्येता दश ॥ ७ ॥

क्षुद्रसिद्धीश्च पञ्चाऽऽह । त्रिकालज्ञत्वमिति । अद्वन्द्वं शीतोष्णाद्यनभिभवः अग्न्यादीनां स्तम्भनम् ॥ ८ ॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

ततश्चतुर्दशाध्यायानन्तरम् । धारणानुगास्तत्तद्धारणाऽनुवर्तिन्यः अन्तरायतया विघ्नतया । अन्तरायप्राया एव विघ्नप्राय। एव कर्दमादिविधानान्तु, तावन्न योगगतिमिर्यतिरप्रमत्तो यावद्व्रजकथासु रतिं न कुर्यादित्यनुसारेण सिद्धिमत्त्वेऽपि नान्तराया इति प्रायग्रहणम् । मयि चेतो धारयत इति स्वास्मिश्चित्तधारणं मे तत्र मुख्यो हेतुरिति सूचितं तथैवाग्रे व्याख्यास्यते ॥ १ ॥

कीदृशी किंलक्षणा ॥ २ ॥

धारणाश्चेति चकारोऽध्याहृतः । मत्प्रधाना इति प्रधानलक्षणाविशेषणेन विशेष्याश्रयोपस्थितिः मुख्याश्रयत्वञ्च भगवत एव स्वरूपशक्त्यंशभूतानां तासां तत एवान्यत्रोपासकेष्वाविर्भावात् योगिषु तु तदाभास एवेति ज्ञेयं तेषां सम्यक् भगवत्परत्वाभावात् यत्किञ्चित् तत्परत्वाभावे तु तदाभासोऽपि दुर्लभः एतावान् सांख्ययोगाभ्यामित्यादेः । अतएव किञ्चिन्न्यूना भवन्तीति व्याख्यातम् ॥ ३ ॥

स्वरूपेण लक्षणसहितसंज्ञामात्रेण । अणिमेति युग्मकम् । योगिदेहस्य शिलादावपि प्रवेशप्रयोजकोऽणुत्वलक्षणो गुणोऽणिमा । तथा तस्यैव सर्वव्यापनलक्षणो महिमा । येन सूर्यमरीचीरवलम्ब्य देहस्य सूर्यलोकप्राप्तिर्भवति स लघुत्वलक्षणो गुणो लघिमा भोगदर्शनसामर्थ्यं पारलौकिकेषु विषयेषु तथा भूविवरादिपिहितेषु द्रव्येषु यद्भोगदर्शनं भोगप्राप्तिस्तत्सामर्थ्यं प्राकाम्यमित्युच्यते । न च दर्शनशब्दस्य प्राप्त्यर्थकत्वं कथमिति वाच्यम् । स्वार्मिभिरपि सहक्रीडानुदर्शनमित्यत्रानुदर्शनं प्राप्तिरिति व्याख्यातत्वात् । परत्र सूत्रोपाधिकोपासनायास्तत्प्राप्तिसाधनत्वेन वक्ष्यमाणत्वाच्च । तस्मात् प्राकाम्यमित्येव पाठः प्राचीनः । वाचस्पतिप्रभृतिभिः प्राकाम्यमिच्छानभिघात इति व्याख्यानात् सिद्धिप्रसङ्गे सर्वत्र कोषादौ प्राकाम्यशब्द एव श्रूयते न तु प्राकाश्यमिति तस्माद्दर्शनसामर्थ्यमिति व्याख्यानस्य हृदयमबुद्ध्वा केनाचित् प्राकाश्यमिति पाठः कल्पित इति गम्यते । तत्र मायातदंशभूतशक्तिषु मध्ये ॥ ४-५ ॥

अनूर्मिमत्त्वमिति सार्द्धत्रिकम् । कामितरूपप्राप्तिः कामितस्याभीष्टस्य रूपस्य देवादिरूपस्य प्राप्तिः ॥ ६ ॥

सहेति । तद्दर्शनादप्सरोभिरित्यध्याहृतम् ॥ ७ ॥

संस्तम्भनमग्न्यादीनां दाहादिशक्तिप्रतिबन्धनम् ॥ ८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

॥ १-३ ॥

प्राप्तिः अङ्गत्वेन विदूरस्थस्पर्शादिः प्राकाम्यं धारणादिव्यापारेष्वन्येभ्यः प्रभूतव्यापारक्षमत्वम् ॥ ४ ॥

यत्कामस्तदवस्यति यत्र कामना तं देशं तदानीमेव प्राप्य स्थितो भवति यद्वा वृष्ट्याद्यभिमतसाधको भवति ॥ ५ ॥

अनूर्मिमत्त्वं पलितादिराहित्यम् अशनायाद्यतीतत्वं वा दूरश्रवणं सर्वभूतरुतज्ञानम् ॥ ६-६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

न केवलमस्य समाधिपर्यन्तस्य परिनिष्पन्नध्यानयोगस्य निरवशेषद्रव्यज्ञानक्रियाभ्रमलयात्मकमुक्तिरेव फलमपि त्वणिमादिसिद्धयोऽपीत्याह । जितेन्द्रियस्येति । युक्तस्य स्थिरचित्तस्य तत्र हेतुः जितबाह्येन्द्रियस्य जितप्राणस्य च मय्येव चेतो धारयतो योगिनः सिद्धयः उपतिष्ठन्ति उपस्थिता भवन्ति केवलमुपतिष्ठन्ते न त्वन्तरायभूतासु तासु सक्तो भवेदित्यनेन सूच्यते तदेतदग्रे स्पष्टमेव वक्ष्यति । अन्तरायान् वदन्त्येतानिति ॥ १ ॥

धारयतः सिद्धय उपतिष्ठन्तीत्युक्तं तत्र धारणाप्रकारतत्प्रयुक्तसिद्ध्युपस्थितिविशेषबुभुत्सया पृच्छति । कयेति । कया कथंप्रकारयेति धारणाप्रकारप्रश्नः किंस्विदिति वितर्के किंस्वित्किकामाः कथं वा सिद्धिरिति सिद्धिप्रकारप्रश्नः कति वेति तत्संख्याप्रश्नः ब्रूहीत्यत्र हेतुत्वेन विशिनष्टि । सिद्धिद इति । तत्तद्धारणानुगुणसिद्धिरूपफलप्रदः अतस्तत्स्वरूपप्रकारज्ञस्त्वमेवेति भावः ॥ २ ॥

तावत्कति वेति प्रश्नस्योत्तरमाह । सिद्धय इति । धारणात्मको यो योगस्तस्य पारं साकल्येन स्वरूपप्रकारादिकं गच्छन्ति जानन्तीति तथा तैः प्रोक्ताः तत्रावान्तरविभागमाह । तासामष्टादशसंख्यानां सिद्धीनां मध्येऽष्टौ सिद्धयः मत्प्रधानाः अहमेव प्रधानं मुख्यप्रयोजनभूतो यासां ताः मत्प्राप्त्येकमुख्यप्रयोजना इत्यर्थः । अन्यास्तु दश गुणहेतव एव विषयानुभवहेतव एव पुनः संसारहेतव इति यावत् ॥ ३ ॥

ताः स्वरूपकथनपूर्वकमुद्दिशति । अणिमेति सार्द्धैः पञ्चभिः । मूर्तदेहस्याणिमाऽणुत्वं सूक्ष्मत्वमिति यावत् महिमा महत्त्वं मूर्तेः सूक्ष्मतापत्त्या सूक्ष्मवस्तुप्रवेशसामर्थ्यमणिमा तथा महद्भ्योऽपि तथा महत्त्वापत्तिर्महिमेत्यर्थः लघिमा लघुभ्योऽपि तस्या लघुत्वापत्तिः प्राप्तिर्नाम सिद्धिः सर्वप्राणिनामिन्द्रियैः सह तत्तद्विषयसम्बन्धरूपा तत्तदधिष्ठातृदेवतारूपेण सम्बन्धरूपेति केचित् प्राकाम्यमिति श्रुतेषु पारलौकिकेषु दृष्टेषु

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

दर्शनयोग्येष्वपि दृष्टादृष्टार्थव्यापारेष्वन्येभ्योऽतिशयितरूपं प्राकाम्यं पञ्चमी सिद्धिरित्यर्थः । ईशित्वं शक्तिप्रेरणां सर्वविषयकस्वपरसामर्थ्योपादनमीशित्वं नाम षष्ठी सिद्धिरित्यर्थः ॥ ४ ॥

विषयभोगेऽप्यसङ्गो वशित्वं सप्तमी सिद्धिरित्यर्थः । यत्कामस्तदवस्यति । यद्यत्र सुखे कामः अवश्यत्यवसानं वयं प्राप्नोति । समुद्रे विप्रुडिव तत्सुखमष्टमी सिद्धिरित्यर्थः । यद्यप्यमरकारेण अणिमा महिमा चैव गरिमा लघिमेति गरिमा सिद्धिस्तृतीया सिद्धिरुक्ता भगवता तु गरिमाणमनुक्त्वा निरतिशयसुखमष्टमी सिद्धिरुक्ता तथापि वक्तुर्वैलक्षण्याद्भगवदुक्तमेव ग्राह्यं हे सौम्य ! एता अष्टौ सिद्धयः औत्पत्तिकाः अग्नेरूर्ध्वज्वलनमिव वायोस्तिर्यग्गमनमिव निष्पन्नसमाधियोगपर्यन्तयोगस्य स्वभावतः सिद्धा इत्यर्थः । अनेनासां वक्ष्यमाणमुक्त्यन्तरायत्वमिति सूचितं तेन तासामष्टौ मत्प्रधना इत्युक्तमात्मप्राधान्यं स्पष्टीकृतम् ॥ ५ ॥

अथ गुणहेतून् दश सिद्धीराह । अनूर्मिमत्त्वमिति त्रिभिः । अस्मिन् योगिनः शरीरेऽनूर्मिमत्त्वं वलीपलितादिराहित्यमशनायाद्यतीतत्वं वा दूरश्रवणं नाम दूरस्थसर्वभूतशब्दज्ञानं दूरदर्शनं नाम दूरस्थसर्ववस्तुसाक्षात्कारः मनोजवः यत्र मनस्तत्र देहस्य वेगेन गतिः कामरूपं यथाभिमताकारापत्तिः परकायप्रवेशनं मृतराजादिशरीरानुप्रवेशः तत्र कामरूपतानाम तस्यैव शरीरस्याभिमताकारान्तरापत्तिः परकायप्रवेशनं नाम देहं त्यक्त्वेन्द्रियैः सह परशरीरानुप्रवेश इति विभागः ॥ ६ ॥

अप्सरोभिः सह देवानां याः क्रीडास्तासामनुदर्शनं प्राप्तिः यथासङ्कल्पसंसिद्धिः सङ्कल्पानुसारिणी सिद्धिः अप्रतिहता आज्ञा गतिश्चेति दश ॥ ७ ॥

त्रिकालज्ञत्वम्भूतभविष्यद्वर्त्तमानकालगत्यभिज्ञत्वम् अद्वन्द्वम् शीतोष्णादिभिरनभिभवः परचित्तादीत्यादिशब्देन तच्चेष्टादिसंग्रहः । अग्न्यादीनां स्तम्भनमपराजयः । कुतश्चिदपि पराजयराहित्यम् ॥ ८ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

परं ज्ञानफलभूतमेव न किन्त्वणिमादिसिद्धिरप्यैहिकीत्येतदस्मिन्नध्याये निरूपयति । तत्रादौ नापृष्टः कस्यचिद्ब्रूयादित्यतः प्रश्नबीजमुत्थापयति । जितेन्द्रियस्येति ॥ १ ॥

सिद्धय इति शुश्रुवानुद्धवः कीदृश्या धारणया का का सिद्धिः ताश्च कति संख्याताः सन्तीति पृच्छति । कयेति ॥ २ ॥

कतिवेति प्रश्नं परिहरति । सिद्धय इति । धारणायोगपारगैः धारणाख्ययोगपारङ्गतैरत्रोत्पन्नज्ञानस्यापि तत्तद्योगसिद्धये तत्तदधिष्ठानगततत्तद्भगवद्रूपविशेषानुस्मरणं धारणेत्युच्यते तस्मात् सिद्धीनां मुख्यतो ज्ञानफलत्वेऽपि धारणाफलत्वमुपचारोऽन्यथानुत्पन्नज्ञानस्यापि धारणामात्रेण तत्सिद्धिप्रसङ्ग इति असुराणां तु भगवत्कलृप्तमायाहेतव इति च तासामष्टादशसिद्धीनां मूलभूता अष्टौ सिद्धयो मय्येव प्रधाना मुख्या अन्येषु देवेषूपचरिता इति मत्प्रधानाः—

सर्वाधिका अणिमाद्याः विष्णोर्नान्यस्य कस्य चित् ।
स्वाभाविका विरिञ्चस्य मत्प्रसादात्पराधिका इति ॥

स्वाभाव्येऽपीति वचनात् ता एव अष्टैव गुणभूतानामनूर्मिमत्त्वाद्यानामपि हेतवः—

निःसीमाष्टगुणाभावात्सिद्धयोऽष्टादश स्मृताः ।
देवेभ्योऽन्यत्र देवानां सिद्धयोऽष्टैव सम्मताः ॥

इति ॥ ३ ॥

कास्ता अष्टेति तत्राह । अणिमेत्यादिना मूर्तेः स्वरूपस्याणिमादिसिद्धिः इन्द्रियैरन्येन्द्रियैर्विषयप्राप्तिः श्रुतेषु दृष्टेषु वस्तुषु प्राकाश्यशक्तिप्रेरणमेवेशितृत्वं गुणेष्वसङ्ग एव वशित्वं यस्मिन् कामो यस्य स यत्कामस्तत्काममवाप्नोति इति यत्प्राकाम्यम्—

यादृशानन्दकामः स्यात्तादृशानन्दसम्भवः ।
भोगान्विनैव प्राकाम्यमणिमादेः पृथग्यत इति

वचनात् ॥ ४—५ ॥

इदानीमष्टादश सिद्धीरुद्दिशति । अनूर्मिमत्त्वमित्यादिना । अणिमामहिमालघिमाप्राप्तिप्राकाश्येशितावशिताप्राकाम्यमित्यष्टमहासिद्धयः अनूर्मिमत्त्वं दूरश्रवणम् दूरदर्शनं मनोजवः कामरूपं परकायप्रवेशनम्—

स्वच्छन्दमृत्युर्देवानां सह क्रीडानुदर्शनम् ।
यथासङ्कल्पसंसिद्धिराज्ञाप्रतिहता गतिः ॥

अद्वन्द्वं त्रिकालज्ञत्वं परचित्ताद्यभिज्ञता अग्निस्तम्भः अर्कस्तम्भः जलस्तम्भो विषादिस्तम्भः अत्रादिशब्देन शस्त्रास्त्रनखदन्तताडनशापादिभिरप्रतिहतिर्गृहीता इयं सम्भूय सप्तदशी सिद्धिः अपराजय इत्यष्टादशसिद्धयः अणिमाद्यष्टसिद्धिभ्यो जाताः एवमुभये सम्भूय षड्विंशाः गरिम्णा सह सप्तविंशाः अथान्तर्भावभेदेनाष्टादशसिद्धयोऽष्टसिद्धय इति केषाञ्चित्पक्षः तथाहि । अनूर्मिमत्त्वस्य प्राकाम्यान्तर्गतत्वेन ते उभे एका दूरश्रवणदूरदर्शनत्रिकालज्ञत्वपरचित्ताद्यभिज्ञतानां प्राकाश्यान्तर्भावेन चतस्र एका कामरूपत्वस्याणिमामहिमालघिमान्तर्भावेनैका अग्निस्तम्भार्कस्तम्भजलस्तम्भविषस्तम्भशस्त्रास्त्रशापादिस्तम्भानामीशित्ववशित्वान्तर्भावेन पञ्च अपराजयोऽपि ईशित्वान्तर्गत इति षट् मनोजवकामरूपपरकायप्रवेशस्वच्छन्दमृत्यूनां देवैः सहिततत्क्रीडानुदर्शनाज्ञाप्रतिहतानां प्राप्त्यन्तर्भावेन षट् अत्र कामरूपत्वस्य द्विवारोक्तिः रूपभेदेन न विरुध्यते—

गरिम्णः सैव हेतुः स्यान्महिमा हेतुधारणात् ।
प्रायोऽष्टसिद्धिकथनेऽवतो न पृथगुच्यत इति ॥
प्राप्तिप्रकाश्ययोश्चापि धारणैकापि सम्भवेत् ।
अत ऐक्येन तावुक्त्वा गरिमाणं पृथक् क्वचित् इति ॥
मूलभूतास्तु सिद्धीनां देवानामष्टसिद्धयः ।
सर्वसिद्धिप्रधानास्तास्तज्जा अष्टादश स्मृताः ॥
अष्टस्वन्तर्गतास्तास्तु तदपेक्षतयाल्पका इति ।
अनूर्मिमत्त्वसिद्धिस्तु प्रकाम्यान्तर्गता स्मृता ।
दूरश्रुतिर्दूरदृष्टिस्त्रिकालज्ञत्वमेव च ॥
परचित्ताद्यभिज्ञानं प्राकाश्यान्तर्गतानि च ।
अणिमादित्रयान्तश्च कामरूपत्वमिष्यते ॥
अग्न्यर्काम्बुविषादीनां प्रतिष्टम्भो वशित्वगः ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

मनोजवः कामरूपं परकायप्रवेशनम् ॥
स्वच्छन्दमृत्युना देवैः सहक्रीडेष्टसाधनम् ।
प्राप्तावन्तर्गतान्याहुराज्ञाप्रतिहतिस्तथा ॥
अग्निस्तम्भो रविस्तम्भ उदकस्तम्भ एव च ।
विषस्तम्भस्तथा शस्त्रशापादिस्तम्भ एव च ॥
ईशित्वान्तर्गतान्याहुरपराजयमेव च ।
एवमष्टादशाष्टभ्यो जायन्ते सिद्धयः क्रमात् ॥
अष्टादशाभ्यश्चान्यास्तु जायन्ते सिद्धयोऽमिताः ।
अनूर्मिमत्त्वं दुःखस्याभावमात्रमुदाहृतम् ॥
यथेष्टानन्दसम्प्राप्तिः प्राकाम्यमिति कीर्त्यते ।
दुःखाभावोऽपि प्राकाम्ये नेतरे सुखितेष्यते ॥
प्राकाश्यं सर्ववेदादिज्ञानमेव विदो विदुः ।
सहस्रयोजनान्तं तु दूरदर्शनमिष्यते ॥
दूरश्रवणमप्येवं तस्मिन्नेव युगे स्थिते ।
वेदादिकं विना प्रोक्ता त्रिकालज्ञानिता बुधैः ॥
शरीरस्थं विना देहे परचित्ताद्यभिज्ञता ।
अन्येन्द्रियैर्दर्शनादियथासङ्कल्पवेगिता ॥
प्राप्तिरित्युच्यते सद्भिः स्वमनः समवेगिता ।
मनोजव इति प्रोक्तः पश्वाद्याकारता तथा ॥
कामरूपत्वमुद्दिष्टं स्वदेहत्यागतः परे ।
परकायप्रवेशः स्याद्युगादर्वाक्तनः स्मृतः ॥
स्वच्छन्दमृत्युता देवैः क्रीडा चेन्द्रादिभावना ।
यथा सङ्कल्पसिद्धिश्चाप्यन्नपानसुतादिषु ॥
चक्षुर्दृश्येष्वणुत्वञ्च अणिमा सम्प्रकीर्तिता ।
महिमा चापि सम्प्रोक्ता त्रिलोकान्तरपूरणा ॥
चक्षुर्दृश्यैर्विवाह्यत्वं लघिमा चापि कीर्तिता ।
त्रिलोकसमभारस्तु गरिमा चापि कीर्तिता ॥
पूर्वशक्तेः कोटिगुणशक्त्युद्रेकस्तथेशिता ।
भुविस्थैः प्राणिभिः प्रोक्तकरणं चापि कीर्त्यते ॥
आज्ञाप्रतिहतिर्ब्राह्मादर्वागस्त्रविबाधनम् ।
विना महातपस्वींश्च शापाप्रतिहतिः स्मृता ॥
अपराजयो मनुष्येभ्यो वशित्वं चाल्पलोभता ।
दाहादिसहनञ्चापि प्रतिष्टम्भ इतीर्यते ॥
इति षड्विंशतिः प्रोक्ता गरिम्णा सह सप्त च ।
विंशतिस्तु सुरेभ्योऽन्यदेवेष्वष्टैव सिद्धयः ॥
यतो निःसीमकास्तेषां देवानामष्टसिद्धयः ।
अतोऽष्टादशसिद्धीनां तदन्तर्भाव इष्यते ॥
देवेष्विन्द्रेशवायुश्रीविष्णूनामुत्तरोत्तरम् ।
सिद्धयः परिपूर्णास्तु विष्णोरेकस्य नान्यगा इति ॥
श्रुतेषु तु यथायोगं चिरग्रहणमेव तु ।
उक्तं प्राकाश्यमन्येषां देवानामश्रुतेष्वपि ॥
ऋषीणां मिश्रभावेन भासते किञ्चिदश्रुतम् ।
विषयेभ्योऽधिकसुखव्यक्तिः प्राकाम्यमेव तु ।
इतरेषां सुराणान्तु निःसीमानन्दभोजनम् ॥
एवमेवतु निःसीमा देवानामष्टसिद्धयः ।
उत्तरोत्तरमत्रापि यावद्विष्णुः सुपूर्णभागिति ॥

अगम्यादिशक्तिसंस्तम्भश्चाग्निसंस्तम्भ इष्यते इति ।
एकस्मात्सिद्धयो विष्णोः स्थानभेदात्पृथग्विधाः ॥
एकस्थानगता याः स्युः सुस्थिरोपासना यदीति ।

नानाकोशगतवाक्यबलादुक्ता एवान्तर्भावाः संख्याश्च नान्याः शुकतीर्थाद्युक्ताविधा इति ॥ ६ ॥

अप्रतिहता आसमन्ताद्गतिर्यस्या आज्ञायाः सा तथा आज्ञा अप्रतिहता गतिः ॥ ७ ॥ ८ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

मत्प्रधाना इति । स्वरूपशक्तिवृत्तिविशिष्टत्वेनोपास्यमानान्मत्त एव मत्पार्षदवत् स्वरूपशक्त्यंशानां तेषामाविर्भावात् अन्यत्र तु तदाभासानामेवेति ज्ञेयम् । गुणहेतव इति । मदुपहिततत्वेनोपास्यमानेभ्योऽपि तत्कार्येभ्य एव तदंशानां तेषां प्रापञ्चिकजनेष्वाविर्भावात् ॥ १—३ ॥

अणिमेति युग्मकम् । अणिम्ना भवत्यणुः यतः शिलामपि प्रविशति महिम्ना महान् भवति यतः सर्वं व्याप्नोति लघिम्ना लघुर्भवति यतः सूर्यमरीचीरवलम्ब्य सूर्यलोकं याति प्राप्त्या अङ्गुल्यग्रेण स्पृशति चन्द्रमसं प्राकाम्यमिच्छानभिघातः यतो भूमावुन्मज्जति निमज्जति यथोदके ईशित्वं यतो भूतभौतिकानां प्रभवस्थितिव्ययानामीष्टे व्यूहो मेलनं वशित्वमुपस्थितेषु दृष्टानुश्राविकविषयेषु यतमानादिसंज्ञादिक्रमं वैराग्याणां कामावसायित्वं सत्यसङ्कल्पता यथास्य सङ्कल्पो भवति तथैव भूतानि भवन्तीति सांख्यकौमुद्यां वाचस्पतिमिश्राः अस्माच्छ्रीभगवन्मतं तु यद्विलक्षणं लक्ष्यते तत्प्राकृताप्राकृतयोर्भेदादिति गम्यते टीकायां भोगदर्शनेन भोगप्राप्तिरुच्यते अनुदर्शनं प्राप्तिरित्युत्तरानुरोधात् क्रियामयसूत्रोपाधिसाधनत्वेन वक्ष्यमाणात् अतः प्राकाम्यमित्येव पाठः सङ्गच्छते प्राकाश्यमिति तु चिन्त्यः । यत्काम इति । कामावसायितानाम्न्याः सिद्धेरर्थः समौत्पत्तिकत्वाभिरतिशयाश्चेति ज्ञेयम् ॥ ४—५ ॥

अनूर्मिमत्त्वमिति सार्द्धत्रिकम् ॥ ६—८ ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अणिमाद्याः सिद्धयोऽष्टौ दश गौणास्तथापराः ।
धारणोत्थाः पञ्चदशे योगविघ्नतयोदिताः ॥

एवं योगाभ्यासिनः सिद्धयोऽप्याविर्भवन्ति तास्वपि निस्पृहो भवेदिति ज्ञापयितुमाह । जितेन्द्रियस्येति । युक्तस्य स्थिरचित्तस्य ॥ १ ॥

स्वित् प्रश्ने वितर्के वा ॥ २ ॥

धारणाश्चाष्टादशेत्यनुषङ्गः मत्प्रधाना अहमेव प्रधानं मुख्यः स्वभावत आश्रयो यासां ताः मयि ताः पूर्णा एव मत्स्वरूपशक्त्युत्थत्वादस्माविध्यः अन्यत्र साधनवशात् किञ्चिन्न्यूना मायिक्य एव प्रायो भवन्तीति भावः । अन्या ऊर्मिराहित्यादयो दश गुणहेतवः सत्त्वादिगुणहेतुका एव ॥ ३ ॥

तास्वष्टसु मध्ये अणिमा महिमा लघिमा चेति तिस्रः

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

सिद्धयो मूर्त्तेर्देहस्य इन्द्रियैः स्वेन्द्रियैः सर्व्वेन्द्रियप्रविष्टैरभीष्टसर्वविषयप्राप्तिरिति प्राप्तिर्नाम सिद्धिः श्रुतेषु दर्शनायोग्येषु दृष्टेषु दर्शनयोग्येष्वपि सर्वेषु भूविवरादिपिहितेष्वपि भोगदर्शनसामर्थ्यं प्राकाम्यं नामासिद्धिः शक्तिप्रेरणं जीवेषु स्वशक्तिसञ्चारणमीशितानामसिद्धिः ॥ ४ ॥

गुणेष्वसंगः विषयभोगेऽप्यनासक्तिर्वशिता नाम सिद्धिः यत्कामः यद्यत् सुखं कामयते तत्तदवस्यति तस्य सीमानं प्राप्नोतीत्यष्टमी कामावसायिता नाम सिद्धिः औत्पत्तिकाः स्वाभाविक्यः निरतिशयाश्च ॥ ५ ॥

गुणनिबन्धना दश सिद्धीराह । अनूर्मिमत्त्वं क्षुत्पिपासादिषडूर्मिराहित्यं दूरश्रवणादर्शनमिति दूरदर्शनं दूरश्रवणमिति द्वे सिद्धी इत्येके एकैवेत्यन्ये मनोजवः मनोवेगेन देहस्य गतिः कामरूपं कामितरूपप्राप्तिः ॥ ६ ॥

अप्सरोभिः सह देवानां याः क्रीडास्तासामनुदर्शनं प्राप्तिः यथा सङ्कल्पसंसिद्धिः सङ्कल्पितपदार्थप्राप्तिः । इयं किञ्चित् कायिकादिप्रयत्नसापेक्षेति कामावसायितातो भेदः कल्पः अप्रतिहता आज्ञा गतिश्चेत्येकैव सिद्धिरित्येके । अप्रतिहताज्ञत्वमप्रतिहतगतित्वमिति द्वे सिद्धी इत्यपरे ॥ ७ ॥

क्षुद्रसिद्धीश्च पञ्चाह । त्रिकालज्ञत्वमिति । अद्वन्द्वं शीतोष्णाद्यनभिभवः अग्न्यादीनां स्तम्भनम् ॥ ८ ॥ ९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सर्वासामपि सिद्धीनां साध्यसाधनयोः प्रभुः ।
श्रीकृष्ण आत्मनामात्मा चेति पञ्चदशे स्थितम् ॥

ध्यानेन मोक्षप्रतिबन्धकनानाभ्रमनिवृत्तिः पूर्वाध्यायान्ते उक्ता पञ्चदशे तु नानोपायसाध्याः सिद्धयोऽपि ध्यानेनैव लभ्यन्ते इत्येवं ध्यानमाहात्म्यमुच्यते । जितेन्द्रियस्येति ॥ १ ॥

काश्चित् किंनामा कथं वा कीदृशी सिद्धिः कया धारणाविशेषया जायते कति संख्याकाः वा सिद्धयः सन्ति हे अच्युत ! नित्यगुणस्वरूपविग्रह यतो भवानेव योगिनां सिद्धिदः अतो ब्रूहि ॥ २ ॥

सिद्धयो धारणाश्च योगपारगैरष्टादश प्रोक्ताः तासां मध्ये अष्टौ मत्प्रधानाः अहंप्रधानः स्वामी यासां ताः योगिषु तु मदिच्छयैव ताः लेशमात्रेण इति प्रकरणाज्ज्ञेयम् गुणहेतवः गुणो योगगुणो हेतुः साधको यासां ताः साफल्येन पुरुषप्रयत्नसाध्याः दशैव ॥ ३ ॥

एताः स्वरूपतो दर्शयति । अणिमेति सार्द्धैः पञ्चभिः । मूर्त्तेः अणिमाणुत्वम् महिमा महत्वापत्तिः लघिमा लघुत्वापत्तिः प्राणिनामिन्द्रियैः सह प्राप्तिः सम्बन्धः श्रुतेषु आमुष्मिकेषु दृष्टेष्वैहिकेषु प्राकाश्यं दर्शनसामर्थ्यम् शक्तिप्रेरणं सर्वपदार्थसामर्थ्योद्बोधनमीशिता ईशित्वम् ॥ ४ ॥

गुणेष्वसङ्गो वशिता वशित्वं यत्कामः तदवस्यति तदवसानं प्राप्नोति इत्यवस्यतिः सिद्धिः एताः अष्टौ मे मदीया एव यतः औत्पत्तिकाः स्वाभाविक्यः निरतिशयाश्च साफल्येन पुरुषप्रयत्नसाध्या नेत्यर्थः । किंबहुना मत्प्रधानाः सिद्धयोऽपि यथासंभवं योगेनोपातिष्ठन्तीति तद्वर्णनाभिप्रायः ॥ ५ ॥

दश गुणहेतुसिद्धीराह । अनूर्मिमत्त्वमक्षुत्पिपासादिमत्त्वम् दूरे श्रवणं दर्शनं चेति सिद्धिद्वयम् ॥ ६ ॥

देवानां सह क्रीडायाः समाजलीलायाः अनुदर्शनमनुप्रविश्य दर्शनमित्यर्थः । यथासङ्कल्पसंसिद्धिः सङ्कल्पमनतिक्रम्य प्राप्तिः अप्रतिहता आसर्वतो गतिर्यस्याः सा आज्ञा ॥ ७ ॥

पञ्च क्षुद्रसिद्धीश्चाह । त्रिकालज्ञत्वमिति । अद्वन्द्वं शीतोष्णादिद्वन्द्वानभिभवः अग्न्यादीनां प्रतिष्टम्भः संस्तम्भनम् ॥ ८ ॥ ९ ॥

भाषा टीका ।

श्रीभगवान् उवाच ॥

जो जितेन्द्रिय है योग में युक्त है श्वासका जीतनेवाला है और मेरे में चित्तको धारण करता है उसके पास में सिद्धि बहुत उपस्थित होती हैं ॥ १ ॥

उद्धव उवाच

हे अच्युत ! आप योगियों के सिद्धि देनेवाले हो सो मेरेसे यह कहिये कि सिद्धि कितनी हैं कौन सिद्धि किस प्रकारकी है और किस धारणा से कौन सिद्धि प्राप्तहो सकती है ॥ २ ॥

श्रीभगवान् उवाच

धारणाके योग के जाननेवाले पुरुषों ने सिद्धि अठारा प्रकारकी कहीहैं तिन में आठ तो मेरी स्वाभाविक सिद्धि हैं और दश तो गुणोंके हेतुसे होती हैं सो गुणों से संसार में लगाने वाली हैं ॥ ३ ॥

छोटा होजाना, वडा होजाना ये दो सिद्धि शरीरकी हैं तैसे हलका होजाना और इन्द्रियों से छिपीहुई वस्तुको जान जाना सुनी देखी सब वस्तुओं में इच्छा से व्यवहार करना शक्ति से सबकी प्रेरणा करदेना ये सिद्धि क्रमसे अणिमा महिमा, गरिमा, लघिमा, प्राप्ति, प्राकाम्य, ईशित्व इन नामों से कही जाती हैं ॥ ४ ॥

गुणो में आसक्ति नहीं होना इसका नाम वशिता सिद्धि है इनसे जो कामना करै सो होजाता है हे सौम्य ! उद्धवजी ये आठ हमारी स्वाभाविकी सिद्धि हैं ॥ ५ ॥

और इस शरीर में भूख प्यास नहीं लगना दूरकी वात को सुनलेना देखलेना मनसरीका वेग होजाना इच्छाका रूप धारण करना दूसरेके शरीर में प्रवेश होजाना ॥ ६ ॥

इच्छा से मृत्युहोना देव अप्सरों के साथ क्रीडादेखना जैसा सङ्कल्प तैसी सिद्धि होजाना अपनी आज्ञा तथा गति कहीं नहीं रुकना ॥ ७ ॥

तीनों कालकी वातों को जानजाना शीतोष्णादिकोंका नहीं लगना दूसरेके मनकी वातको जानजाना अग्नि सूर्य जल विष इनकी सक्तिका रोकना किसी से पराजय नहीं होना ॥ ८ ॥

एताश्चोद्देशतः प्रोक्ता योगधारणसिद्धयः ।
यया धारणया या स्याद्यथा वा स्यान्निबोध मे ॥ ९ ॥
भूतसूक्ष्मात्मनि मयि तन्मात्रं धारयेन्मनः ।
अणिमानमवाप्नोति तन्मात्रोपासको मम १०
महत्यात्मन् मयि परे यथासंस्थं मनो दधत् ।
महिमानमवाप्नोति भूतानां च पृथक् पृथक् ॥ ११ ॥
परमाणुमये चित्तं भूतानां मयि रञ्जयन् ।
कालसूक्ष्मार्थतां योगी लघिमानमवाप्नुयात् ॥ १२ ॥
धारयन्मय्यहंतत्त्वे मनो वैकारिकेऽखिलम् ।
सर्वेन्द्रियाणामात्मत्वं प्राप्तिं प्राप्नोति मन्मनाः ॥ १३ ॥
महत्यात्मनि यः सूत्रे धारयेन्मयि मानसम् ।
प्राकाश्यं पारमेष्ठ्यं मे विन्दते ऽव्यक्तजन्मनः ॥ १४ ॥
विष्णौ त्र्यधीश्वरे चित्तं धारयेत्कालविग्रहे ।
स ईशित्वमवाप्नोति क्षेत्रक्षेत्रज्ञचोदनाम् ॥ १५ ॥
नारायणे तुरीयाख्ये भगवच्छब्दशब्दिते ।
मनो मय्यादधद्योगी मद्धर्मा वशितामियात् ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तत्तद्धारणाभिः सह विशेषतो निरूपयति । ययेति यावत्समाप्ति ॥ ९ ॥

भूतसूक्ष्मोपाधौ मयि तन्मात्रं भूतसूक्ष्माकारम् स तन्मात्रोपासकः मम मदीयमणिमानम् ॥ १० ॥

ज्ञानशक्तिमहत्तत्त्वोपाधौ मयि यथासंस्थं महत्तत्त्वाकारम् भूतानां चेति । आकाशादिभूतोपाधौ च मयि मनो धारयंस्तत्तद्भूतमहिमानं प्राप्नोतीत्यर्थः ॥ ११ ॥

वाय्वादिभूतानां ये परमाणवस्तन्मये तदुपाधौ मयि चित्तं रञ्जयन् योगी कालसूक्ष्मार्थतां कालपरमाणुपाधिरूपतामिति लघुत्वविवरणम् तदुक्तम् स कालः परमाणुर्वै यो भुङ्क्ते परमाणुताम् इति ॥ १२ ॥

वैकारिकाहङ्कारोपाधौ मयि अखिलमेकाग्रम् आत्मत्वमधिष्ठातृत्वम् अत्र हेतुः मन्मनाः मयि मनो धारणप्रभावादेवं भवति नात्रातीव हेतुरनुसन्धेय इतिभावः । एवं मद्धारणानुभावेन मद्योगबलमाश्रय इत्यादिषु द्रष्टव्यम् ॥ १३ ॥

क्रियाशक्तिप्रधानं महत्तत्त्वमेव सूत्रं तदुपाधौ मयि स मे पारमेष्ठ्यं सर्वोत्कृष्टं प्राकाश्यं विन्दते कथम्भूतस्य अव्यक्ताज्जन्म यस्य तस्य सूत्रस्य तदुपाधेर्ममेत्यर्थः ॥ १४ ॥

त्र्यधीश्वरे त्रिगुणमायानियन्तरि अत एव कालविग्रहे भाकलयितृरूपेऽन्तर्यामिणि ईशित्वं विशिनष्टि । क्षेत्रज्ञानां जीवानां क्षेत्राणां तदुपाधीनां च चोदनां प्रेरणां नतु विश्वसृष्ट्यादिकर्तृत्वलक्षणमित्यर्थः ॥ १५ ॥

तुरीयाख्ये—

विराट् हिरण्यगर्भश्च कारणं चेत्युपाधयः ।
ईशस्य यत्त्रिभिर्हीनं तुरीयं तत्पदं विदुः ॥ इत्येवं लक्षणे
'ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः ।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गना' ॥

तद्वति भगवच्छब्दशब्दिते ॥ १६ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी ।

उद्देशतः लक्षणपूर्वकसंज्ञामात्रतः । ययेत्यर्द्धकम् । ययेति तत्साधनधारणाप्रश्नोत्तरम् । यथेति तत्प्रकारप्रश्नोत्तरम् ॥ ९ ॥

मदीयमणिमानमित्यणिम्नो मदीयत्वमेकांशेनैव ज्ञेयं "जगद्व्यापारवर्जम्" इति न्यायेन सर्वथा तत्प्राप्त्यभावात् ॥ १० ॥

महिमानं तादृशज्ञानशक्त्यलङ्कृतमूर्तित्वम् । आकाशादिभूतोपाधौ आकाशादिशरीरके मयि तत्तद्भूतमहिमानं तत्तद्भूतशक्त्यालङ्कृतमूर्तित्वम् आकाशादिभूतोपधौ चेत्यध्याहारादित्यर्थ इत्युक्तम् ॥ ११ ॥

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी ।

वाय्वादिभूतानां ये परमाणवः भारशून्यपरमसूक्ष्मांशास्त-दुपाधौ तदन्तर्यामिणि मयि चित्तं रञ्जयन् योगी लघिमानं भारशून्यत्वमवाप्नोति । कालपरमाणूपाधिरूपतामिति । कालस्य यः परमाणुरूपोपाधिः परमसूक्ष्मदेशावच्छिन्नाकाशस्तद्रूपताम् । तद्वदतिलघुतामिति भारशून्यत्वलक्षणस्य लघुत्वस्य विवरणम् । कालसूक्ष्मार्थतामिति पाठेऽर्थशब्द उपाधिपरः आत्मेति पाठे तु आत्मा देह उपाधिरित्यर्थः ॥ १२ ॥

अत्र इन्द्रियाधिष्ठातृत्वप्राप्तौ । एवं भवति इन्द्रियाधिष्ठातृत्वं भवति । अत्र प्राप्तिलक्षणसिद्धौ मद्धारणादन्योऽतीव हेतुर्नानुसन्धेयः किन्तु मद्धारणैवात्र हेतुरित्यर्थः ॥ १३ ॥

प्राकाम्यमिच्छानभिघातः दृष्टादृष्टभोगप्राप्तिसामर्थ्यम् ॥१४॥

तदुपाधीनां जीवोपाधीनां शरीराणां नत्विति "जगद्व्यापारवर्जम्" इति न्यायात् ॥ १५ ॥

वशितां वशित्वं वशीकारवैराग्यम् ऐहिकामुष्मिकविषयजिहीर्षाम् । तदुक्तं पातञ्जले । "दृष्टानुश्राविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यम्" इति । विराट् स्थूलोपाधिः हिरण्यगर्भः सूक्ष्मोपाधिः कारणमविद्या । ऐश्वर्यस्येति समग्रस्येति सर्वत्रान्वितम् । त्रिपात् पादविभूत्यधिष्ठातृत्वमैश्वर्यम् । वीर्यं पराक्रमः यशः सत्कीर्तिः । श्रीः सौन्दर्यं सम्पत्तिश्च । ज्ञानं स्वविषयं परविषयं च । वैराग्यं प्राकृतभोगसम्बन्धाभावः इत्यना संज्ञा ॥ १६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

तन्मात्रं तन्मात्रविषयं विषयान्तरनिवृत्तं तन्मात्रोपासकः मच्छरीरभूतभूतसूक्ष्मोपासकः ॥ १० ॥

भूतानां पृथिव्यादिस्थूलभूतानामात्मनि मयीत्यन्वयः ॥ ११ ॥

परमाणुमये भूतानां सूक्ष्मावयवव्यापिनां कालसूक्ष्मात्मतां सूक्ष्मकालावस्थितत्वं च ध्यायन्निति शेषः ॥ १२ ॥

इन्द्रियाणामात्मत्वमिन्द्रियाणि दूरदेशव्यापीनि भवन्ति तं भावं तथाभावं तदेव प्राप्तिः ॥ १३ ॥

पारमेष्ठ्यं परमेष्ठिचिन्हमीश्वरेण सृष्ट्यादिनिर्वाहक इति ॥ १४-१६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

स्वरूपकथनगर्भमुद्देशं निगमयति । एताश्चेति । अथ ता एव सिद्धीस्तत्साधनभूतधारणाभिः सह विशेषतो निरूपयितुम् तच्छुश्रूषामुत्पादयति । ययेत्यर्धेन ॥ ९ ॥

निरूपयति । भूतसूक्ष्मनीत्यादिना उपासकस्य मामेवमित्यतः प्राक्तनेन । यः भूतसूक्ष्मात्मनि भूतसूक्ष्मशरीरके मयि । तन्मात्रं तावन्मात्रविषयं विषयान्तरनिवृत्तमित्यर्थः । तत्र मनो धारयेत्सः मम तन्मात्रोपासकः मच्छरीरभूतसूक्ष्ममात्रोपासकः अणिमानमवाप्नुयात् ॥ १० ॥

महतीति । महति महत्तत्त्वशरीरके परे आत्मन् परमात्मानं मयि यथासंख्यं विषयान्तरेभ्यो निवृत्तं सम्यक् स्थितं यथा स्यात्तथा मनो दधद्धारयन् भूतानामाकाशादीनां पृथक् पृथग्यथा स्व योगमहिमा तथा तं प्राप्नोतीत्यर्थः ॥ ११ ॥

परमाणुमय इति । भूतानां परमाणुमये सूक्ष्मावयवव्यापिनि मयि चित्तं रञ्जयन्नासञ्जयन् कालसूक्ष्मार्थतां स कालः परमाणुर्वै यो भुङ्क्ते परमाणुतामित्युक्तविधः सूक्ष्मकालः । स एवार्थो वस्तु तस्य भावस्तत्ता तां सूक्ष्मकालावस्थितत्वं च ध्यायन्निति शेषः लघिमानमवाप्नुयात् ॥ १२ ॥

धारयेदिति । वैकारिकेऽहंतत्त्वे । वैकारिकाहङ्कारशरीरके मय्यखिलमेकाग्रं यथा तथा मनो धारयेत् एवं मय्येव मनो यस्य स मन्मनाः सर्वेन्द्रियाणां सर्वेषां प्राणिनां यानीन्द्रियाणि तेषामात्मा स्वभावः तत्तद्विषयव्याप्तिस्वभावस्तस्य भावस्तत्त्वमाधिष्ठातृत्वं वा प्राप्नोति ॥ १३ ॥

सूत्रे बहुमणीनां सूत्रे इव स्वकार्याणां बहूनामधारभूते महति महत्तत्त्वशरीरके मयि मानसं धारयेत् सः प्राकाश्यं इष्टार्थव्यापारोपयुक्तज्ञानातिशयं परमेष्ठिनो भावः पारमेष्ठ्यम् परमेष्ठिन इन्द्रादिभ्योऽतिशयितव्यापारक्षमत्वं चेत्यर्थः । अव्यक्तात्प्रधानाज्जन्म यस्य तस्मान्महत्तत्त्वान्मद्विशेषणत्वेनोपास्यमानात्स्वतोर्विन्दते इत्यर्थः । केवलमहत्तत्त्वशरीरकभगवद्विषयधारणयाऽणिमत्वप्राप्तिरुक्ता अत्र तु सूत्रत्वाव्यक्तजन्मत्वादिगुणविशेषयुक्तमहत्तत्त्वशरीरकभगवद्विषयकधारणया प्राकाश्यलाभ उच्यते ततश्च गुणविशेषयोगतदभावकृतधारणाभेदात्सिद्धिभेद इत्यवगन्तव्यम् ॥ १४ ॥

विष्णाविति विष्णौ सर्वव्यापके त्र्यधीश्वरे सृष्ट्यादिव्यापारत्रयनिर्वाहके कालशरीरके मयि यश्चित्तं धारयेत् स ईशित्वमवाप्नोति ईश्वरत्वं विवृणोति । क्षेत्रेति । शक्तिप्रेरणमीशितेत्युक्तं सर्वेषां क्षेत्रक्षेत्रज्ञानां देहानामात्मनां च चोदनां प्रेरणं सर्वविषयकसामर्थ्योपादनामित्यर्थः ॥ १५ ॥

नारायण इति । तुरीयाख्ये जागरस्वप्नसुषुप्त्यवस्थात्रयरहिततुरीयशब्दवाच्ये परिशुद्धजीवात्मस्वरूपशरीरके नाराणां जीवानां प्राप्ये प्रापके आधारभूते च भगवच्छब्दवाच्ये ज्ञानशक्तिबलैश्वर्यवीर्यतेजोरूपषाड्गुण्यपूर्णे मयि मन आदधद्धारयन् योगी मद्धर्मो मम एव धर्मो यस्य सः वशितां गुणेष्वसङ्गरूपामियात्प्राप्नुयात् यथाहं गुणेष्वसङ्गमेमि तथैव मयि चेतो धारयन्नपि यातीत्यर्थः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

मनोयोगेन यद्धारणं ध्यानं तेन जायमानाः सिद्धयो योगधारणासिद्धयः सङ्ख्याविषयं प्रश्नं परिहृत्य इदानीं कया धारणया इत्यादिप्रश्नं परिहरति । ययेति ॥ ९ ॥

तत्र तावत्प्रथमोद्दिष्टाणिमासिद्धिप्रापकं ध्यानप्रकारमाह । भूतसूक्ष्मेति । भूतसूक्ष्माणां पार्थिवादिपरमाणूनामात्मनि नियामके परमाणुषु स्थिते मयि तन्मात्रपरिमितत्वेन मनो धारयन् ध्यायन्नणिमानमेवाप्नोति । अनेन यद्यद्वस्तूपमितं रूपं स्वयमपि तत्तत्परिमितो भवतीत्युक्तं भवति—

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

तन्मात्रावयवे सूक्ष्मे परमाण्वभिधानके।
प्रत्येकमणुरूपं तु विष्णुं ध्यायन्नणुर्भवेदिति॥

वचनात् प्रकारान्तरेणाणुत्वप्राप्तिप्रतिपत्तिमाह। तन्मात्रेति। मम तन्मात्रोपासकः तस्याकाशादिगुणस्य शब्दादेर्यत्सूक्ष्ममात्रं परिमाणं तत्परिमाणस्य मम स्वरूपस्योपासकोऽपि तत्परिमितरूपो भवतीत्यर्थः—

आकाशवत्सूक्ष्मतां यो व्यापित्वेनैव मन्यते।
तन्मात्रव्यापिनं विष्णुं चिन्तयन्स तथा भवेदिति॥

वचनात् अणुत्वं च चक्षुरदृश्यत्वमणुत्वन्तु अणिमा सम्प्रकीर्तिता इत्युक्तविधं च॥ १०॥

व्याप्तस्य हरेरेकैकावयवध्यानं परिच्छिन्नवस्तुमहत्त्वकारणमाह। महतीति। महति व्याप्ते आत्मन् आत्मनि स्वामिनि मयि यथासंख्यं यथावस्तुपरिमाणं तथा स्थिते मनो दधत्पुरुषो महिमानं महत्त्वमवाप्नोति तदेव विशिनष्टि। भूतानामिति। अस्मात् स्थूलतां प्राप्नुयामित्यपेक्षायां तस्मात् स्थूलतां प्राप्नोति ततोऽन्यस्मान्महत्त्वमाप्नुयामित्यपेक्षायां तस्मादिति पृथक् पृथक् भूतानां सकाशान्महत्त्वमाप्नोतीत्यर्थः। परे परमात्मनि सर्वनामसंज्ञाविकल्पात् नास्त्यस्य॥ ११॥

लघिमासिद्धिप्राप्तिप्रतिपत्तिमाह। परमाणुमय इति। कालसूक्ष्माणां कालपरमाणूनामात्मके आत्मनि व्यापके तत्स्वरूपं विशिनष्टि। परमाणुमये भूतानां सकाशादतिशयेनाणुस्वरूपे मयि चित्तं रञ्जयन् अनुरक्तं कुर्वन् तदेकनिष्ठत्वेन कुर्वन् लघिमानमाप्नोति॥ १२॥

प्राप्तिसिद्ध्यापादिकां धारणामाह। धारयन्निति। वैकारिके महत्तत्त्वे व्याप्ते मयि मनो धारयन्नखिलं निवृत्तबहिर्वृत्ति यथा तथा धारयन् सर्वेन्द्रियाणामात्मत्वं स्वामित्वेन स्वेच्छानियतत्वमाप्नोति। ततः किमत्राह। प्राप्तिमिति। अन्येन्द्रियैर्विषयदर्शनादिलक्षणप्राप्तिमाप्नोति अन्येन्द्रियैर्दर्शनादि यथासङ्कल्पवेगिता। प्राप्तिरित्युच्यते सद्भिरिति च मन्मना इत्यनेनान्तराले अन्यमनस्कत्वं निवारयति॥ १३॥

प्राकाम्यप्राप्तिप्रकारङ्कथयति। महतीति। महति महत्तत्त्वे सूत्रे मुख्यप्राणे वात्मनि व्याप्ते मयि मानसं धारयन्नव्यक्तजन्मनः अव्यक्तस्यापि विकारलक्षणस्थूलत्वापादनकर्तुर्मे प्रसादात्पारमेष्ठ्यं परमेष्ठिनो ब्रह्मणः प्रसादलभ्यं प्राणभारत्योः प्रसादाच्च सर्ववेदादिज्ञानश्रैष्ठ्यापादकं प्राकाम्यं विन्दत इत्यन्वयः—

प्राकाम्यं सर्ववेदादिज्ञानमेव विदो विदुः।
सर्वे गुणास्तु प्राणस्य परमात्मप्रसादतः॥
प्राणविष्णोः प्रसादेन भारत्याः सम्प्रकीर्तिताः।
प्रसादात्तु त्रयाणां चाप्यानन्दादिः सदा गुणा इति॥ १४॥

ईशित्वप्राप्तिप्रकारमाह। विष्णाविति। परमाण्वादिरूपः कालो विग्रहः प्रतिमा यस्य स कालविग्रहः तस्मिन्नधीश्वरं सर्वाधीश्वरत्वगुणविशिष्टे अनेन यो यो गुण उपासकस्याभिलषितः तं तं गुणं तस्मिन्नुपसंहृत्योपासनङ्कर्तव्यमित्युक्तं भवति सर्वत्राधीश्वरत्वादौ विद्यमानेऽपीत्यादि विष्णौ व्याप्ते मयि चित्तं धारयन्नीशित्वमवाप्नोति कीदृशं क्षेत्रं शरीरं स्थावरादिपदार्थसमूहो वा क्षेत्रज्ञा जीवा एषां चोदनं नियमनं यस्मात्तत् क्षेत्रज्ञचोदनं भुवि स्थितैः प्राणिभिरुक्तकारकत्वं पूर्वशक्तेः कोटिगुणशक्त्युद्रेकश्चेत्युक्तमनेन॥ १५॥

वशिताप्राप्त्युपायमाह। नारायण इति। नारायणे तुर्याख्ये भगवच्छब्दशब्दिते ऐश्वर्यादिषड्गुणानुपसंहृत्य मयि मन आदधद्योगी वशितामियादवाप्नोति असङ्गत्वादिलक्षणो मम धर्मो यस्य स मद्धर्मः॥ १६॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

यथेत्यर्थकम्॥ ९॥

भूतसूक्ष्मादयो वैकुण्ठादिगताः स्वरूपशक्तिविलासाः ज्ञेयाः तासामष्टाविल्यादावुभयेषां भेदेनावश्यव्यवस्थाप्यत्वात् तन्मात्रोपासको ममेति पुनरुक्तेस्तदवधारणार्थत्वाच्च अणिमानमित्यत्रापि ममेत्यन्वयः किन्त्वणिमादिकमिदमंशेनैव ज्ञेयं "जगद्व्यापारवर्जम्" इति न्यायेन सर्वथा तद्धर्मप्राप्त्यसम्भवात्॥ १०॥

महिमानं तत्तच्छक्त्यलंकृतमूर्तित्वमित्यर्थः भूतानां चेति महत्त्वधारणायामेतदपीच्छावान्तरफलं भवतीत्यभिप्रायात्॥ ११॥

भूतानां मध्ये यः परमाणुर्भारशून्याकाशपरमसूक्ष्मांशस्तदुपाधिके मयि चित्तं रञ्जयन् योगी लघिमानं भारशून्यत्वमवाप्नोति तमेव दर्शयति। कालस्य यः सूक्ष्मांशः परमाणुस्तस्यार्थे उपाधिः परमसूक्ष्मदेशावच्छिन्नाकाशः तद्रूपतां तद्वदतिलघुतामित्यर्थः। आत्मेति पाठे आत्मा देह उपाधिरित्यर्थः॥ १२॥

वैकारिके शुद्धसत्त्वमये॥ १३॥

अव्यक्तमिन्द्रियागम्यं जन्म प्रादुर्भावो यस्य तस्य मम यद्वा व्यक्तं जगति च प्रकटमित्यादि॥ १४—१६॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

भूतसूक्ष्मात्मनि भूतसूक्ष्मोपाधौ मयि तन्मात्रं भूतसूक्ष्माकारं स तन्मात्रोपासकः मम मदीयमणिमानं परमाण्वाकारतां सिद्धिं यया शिलामपि प्रवेष्टुं शक्नोति॥ १०॥

महत्यात्मनि ज्ञानशक्तिमहत्तत्त्वोपाधौ मयि यथासंख्यं महत्तत्त्वाकारं महिमानं परममहदाकारतां यया सर्वमपि व्याप्तुं शक्नोति भूतानां चेति आकाशादिभूतोपाधौ च मयि मनो धारयन् तत्तद्रूपं महिमानं प्राप्नोतीत्यर्थः॥ ११॥

परमाणुमये वाय्वादिभूतानां ये परमाणवस्तन्मये तदुपाधौ च मयि चित्तं रञ्जयन् कालसूक्ष्मार्थतां कालस्य यः सूक्ष्मांशः परमाणुः स एवार्थ उपाधिर्यस्य तत्तां तद्वदतिलघुत्वरूपं लघिमानं तदुक्तं स कालः परमाणुर्वै यो भुङ्क्ते परमाणुतामिति॥ १२॥

वैकारिकाहङ्कारोपाधौ मयि अखिलमेकाग्रं सर्वेन्द्रियाणां सर्वेषामेवेन्द्रियाणामभीष्टविषयग्राहकाणामात्मत्वमात्मस्वरूपस्य भोक्तृत्वमित्यर्थः॥ १३॥

क्रियाशक्तिप्रधानं महत्तत्त्वमेव सूत्रं तदुपाधौ मयि प्राका-

निर्गुणे ब्रह्मणि मयि धारयन् विशदं मनः ।
परमानन्दमाप्नोति यत्र कामोऽवसीयते ॥ १७ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

स्यमैश्वर्यं विन्दते तदेव किम्पारमेष्ठ्यं परमेष्ठिनो भावः पारमेष्ठ्यं कथम्भूतस्य मे अव्यक्तजन्मनः अव्यक्ताज्जन्म यस्य तस्य सूत्रस्य सूत्रोपाधेरित्यर्थः ॥ १४ ॥

अधीश्वरे त्रिगुणमायानियन्तरि कालविग्रहे कालः कालयिता द्रष्टा तत्स्वरूपे ईशित्वं विशिनष्टि । क्षेत्रज्ञानां जीवानां क्षेत्राणां तदुपाधीनां च चोदनं प्रेरणं तत्र तत्र स्वशक्तिसञ्चारणमित्यर्थः ॥ १५ ॥

तुरीयाख्ये—

विराट् हिरण्यगर्भश्च कारणं चेत्युपाधयः ।
ईशस्य यत्त्रिभिर्हीनं तुरीयं तत्पदम्विदुः

इत्येवं तुरीय आख्या यस्य तस्मिन्नित्यनेन भगवच्छब्दशब्दित इत्यनेन च नारायणस्य तुरीयत्वे षडैश्वर्यवत्त्वे च मनसा धार्यमाणे सत्येवेति भावः । अयमर्थः यस्य स्थूलं सूक्ष्मं चेति कार्यद्वयं नोपाधिः कारणं माया च नोपाधिः किन्तु तुर्यं सच्चिदानन्दवस्तु आख्या आख्यागस्य आकारो यस्य तस्मिन् नारायणे स च केन शब्देनोच्यते तत्राह । भगवच्छब्दशब्दित इति । वशितां गुणेष्वसङ्गम् ॥ १६ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अथ तत्तद्धारणया तां तां निरूपयत्यासमाप्तेः । भूतेति । भूतसूक्ष्मात्मनि भूतसूक्ष्मरूपे भूतसूक्ष्मावस्थापन्ने मयि तन्मात्रं तन्मात्रविषयं मनो धारयन् तन्मात्रोपासकः भूतसूक्ष्मरूपमात्रोपासकः मम भूतसूक्ष्मरूपिणः अणिमानं सूक्ष्मतामवाप्नोति भूतसूक्ष्मादिकार्यरूपेण स्वयमेवावस्थितस्तदैक्षत बहुस्यामित्यादिश्रुतेरतो मयीत्याद्यभेदःसूपपन्नः ॥ १० ॥

महत्यात्मनि मयि महत्तत्त्वरूपे मयि यथासंख्यं तन्मात्रविषयं मनो दधत् महिमानं तादृशरूपिणो मम महत्त्वमवाप्नोति परे इति विशेषणं कार्यरूपे परिच्छिन्नस्य कारणस्यैव दृष्टिः कर्तव्येति ज्ञापयति आकाशादिभूतानां च पृथक् पृथगुपासनया तत्तद्रूपिणो मे ममाप्नोतीत्यर्थः ॥ ११ ॥

भूतानां परमाणुमये सूक्ष्मावयवरूपे मयि मनो रञ्जयन् कालसूक्ष्मार्थतां कालस्य परमाणुरूपस्य ज्ञाप्यस्य सूक्ष्मो योऽर्थः ज्ञापकः भूम्यादिपरमाणुरूपस्तस्य भावस्तत्ता तां लघिमानं स कालः परमाणुर्वै यो भुङ्क्ते परमाणुतामित्यत्र दर्शितामित्यर्थः ॥ १२ ॥

वैकारिके महत्तत्त्वे वैकारिकाहङ्कारावस्थापन्ने मयि अखिलं तदेकविषयम् आत्मत्वमधिष्ठातृत्वम् ॥ १३ ॥

महत्तत्त्वस्यैवावस्थाभेदेन सूत्रमिति संज्ञा तस्मिन् पारमेष्ठ्यं परमेष्ठितुल्यं प्राकाश्यम् अव्यक्ताज्जन्म यस्य तस्य सूत्रात्मनो मम ॥ १४ ॥

एवमचेतनेषु स्वशक्तिपरिणामेषु स्वकार्येषु स्वदृष्ट्या धारणामुपदिश्य काले स्वदृष्ट्या धारणामुपदिशति । विष्णाविति । ईश्वरत्वं विवृणोति । कालविग्रहे इति । भूतभविष्यद्वर्त्तमानव्यवहारनिर्वाहके कालमूर्त्तौ विष्णौ मयि क्षेत्राणां क्षेत्रज्ञानां देहदेहिनां चोदनां प्रेरणालक्षणामीशित्वमीशितामवाप्नोति ॥ १५ ॥

अथ त्वम्पदार्थे स्वदृष्ट्या धारणामुपदिशति । नारायणे इति तुरीयाख्ये तुरीयं त्रिषु सन्ततमित्येवं नामके—

उत्पत्तिं प्रलयञ्चैव भूतानामगतिं गतिम् ।
वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति

इति स्मृत्या भगवच्छब्देनापि शब्दिते मद्धर्मः मद्दृष्ट्यैव मनोधारणालक्षणो धर्मो यस्य सः वशितामियात् प्राप्नुयात् ॥ १६ ॥

———

भाषा टीका ।

यह योग धारणा की सिद्धि मैंने तुमारे आगे नाम से कही हैं अब जिस धारणा से औ सिद्धि जैसी होगी तिसको तुम मेरे से सुनो ॥ ९ ॥

भूत सूक्ष्मरूप मेरे में भूत तन्मात्रा के मन को स्थापन करै तो मेरे शरीररूप तन्मात्रा का उपासन करने वाला अणिमा सिद्धि को प्राप्त होता है ॥ १० ॥

महाभूत स्वरूप मेरे विषै यथा योग मन को स्थापन करने से अलग अलग सब भूतों की महिमा सिद्धि को प्राप्त होता है ॥ ११ ॥

सब भूतों के परमाणु स्वरूप मेरे में चित्त का रंजन करै तब योगी काल की सूक्ष्मता रूप लघिमा सिद्धि को प्राप्त होता है ॥ १२ ॥

मेरे मे मन को लगा कर सात्विक अहं तत्त्व रूप मेरे मे अच्छे प्रकार से मनको धारण करै तौ सब प्राणि मात्र के इन्द्रियों से भोगरूप प्राप्ति नामक सिद्धि को प्राप्त होता है ॥ १३ ॥

सूत्रसंज्ञक क्रियाप्रधान महत्तत्त्वरूप मेरे विषै मनको धारण करै तो अव्यक्त जन्मा सूत्रात्मा के पारमेष्ठ्य सर्वोत्तम पदवी को प्राप्त होता है ॥ १४ ॥

कालस्वरूप उत्पत्त्यादितीनों के ईश विष्णु के विषै चित्त को धारण करै तब वह योगी सब शरीर सब आत्माओं के प्रेरणा करनेकी सिद्धी को प्राप्त होता है ॥ १५ ॥

भगवत्शब्द से जो कहे जाते हैं ऐसे तुरीय संज्ञक नारायण मेरे विषै मनको धारण करै तो मेरे धर्म वाला हो जाता है औ वशिता सिद्धि को प्राप्त होता है जिससे कि सब उसके वश मे रहते हैं ॥ १६ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

यत्र परमानन्दरूपे सवाऽपि कामस्तदंशभूतोऽवसीयते समाप्यते तम् ॥ १७ ॥

श्वेतद्वीपपतौ चित्तं शुद्धे धर्ममये मयि ।
धारयन् श्वेततां याति षडूर्मिरहितो नरः ॥ १८ ॥
मय्याकाशात्मनि प्राणे मनसा घोषमुद्वहन् ।
तत्रोपलब्धा भूतानां हंसो वाचः शृणोत्यसौ ॥ १९ ॥
चक्षुस्त्वष्टरि संयोज्य त्वष्टारमपि चक्षुषि ।
मां तत्र मनसा ध्यायन् विश्वं पश्यति सूक्ष्मदृक् ॥ २० ॥
मनो[१] मयि सुसंयोज्य देहं तदनु वायुना ।
मद्धारणानुभावेन तत्राऽऽत्मा यत्र वै मनः ॥ २१ ॥
यदा मन उपादाय यद्यद्रूपं बुभूषति ।
तत्त[२]द्भवेन्मनोरूपं मद्योगबलमाश्रयः ॥ २२ ॥
परकायं विशन् सिद्ध आत्मानं तत्र भावयेत् ।
पिण्डं हित्वा विशेत्प्राणो वायुभूतः षडङ्घ्रिवत् ॥ २३ ॥
पार्ष्ण्याऽऽपीड्य गुदं प्राणं हृदुरःकण्ठमूर्धसु ।
आरोप्य ब्रह्मरन्ध्रेण ब्रह्म नीत्वोत्सृजेत्तनुम् ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अतः परं गुणहेतुकाः सिद्धीराह । शुद्धे सत्त्वात्मके श्वेततां शुद्धरूपताम् ॥ १८ ॥

आकाशात्मा यः प्राणः समष्टिरूपस्तद्रूपे मयि मनसा घोष नादं चिन्तयन्नसौ हंसो जीवस्तत्राऽऽकाश उपलब्धा आत्मा संस्तत्रस्था विचित्रा वाचः शृणोति यद्वा तत्राऽऽकाशे उपलब्धा अभिव्यक्ता या वाचस्ता दूरतः शृणोतीति ॥ १९ ॥

त्वष्टा आदित्यस्तस्मिन्नपरिच्छिन्ने चक्षुः संयोज्य तं च चक्षुषि संयोज्य तत्रोभयसंयोगे मां ध्यायन् विश्वं दूरतः पश्यति ॥ २० ॥

मनो देहं च तदनुवर्तिना वायुना सह मयि सुसंयोज्य मद्धारणा क्रियते तस्याः प्रभावेण यत्र मनो याति तत्रात्मा देहो यातीत्यर्थः । यद्वा मनः कर्तृ आत्मानं वायुना सह देहं च मयि सुसंयोज्य यत्र याति तदनु तत्र देहो यातीति ॥ २१ ॥

मन उपादाय उपादानकारणं कृत्वा यद्यद्देवादिरूपं भवितुमिच्छति तत्तन्मनोरूपं मनसोऽभीष्टरूपं योगी भवेत् कुतः यतो मद्योगबलम् योऽहमचिन्त्यशक्तिर्नानाकारस्तस्मिन्मयि मनसो योगो धारणा तस्य बलं प्रभावः स एवाऽऽश्रयः कारणम् ॥ २२ ॥

यत्र प्रविविक्षति तत्राऽऽत्मानं चिन्तयेत् ततः पिण्डं स्वदेहं हित्वा प्राणः प्राणप्रधानलिङ्गशरीरोपाधिर्वायुभूतो बाह्यवायौ भूतः प्रविष्टस्तेन मार्गेणेत्यर्थः । षडङ्घ्रिवत् भृङ्गो यथा पुष्पात् पुष्पान्तरमनायासेन प्रविशति तद्वत् ॥ २३ ॥

पिण्डं हित्वेत्युक्तं तत्प्रकारं कथयन् स्वच्छन्दमृत्युमाह । पार्ष्ण्या पार्ष्णिना गुदं निरुध्य प्राणं प्राणोपाधिमात्मानम् ब्रह्मरन्ध्रेण मूर्धद्वारेण ब्रह्मेत्युपलक्षणं ब्रह्म वा अन्यद्वा अपेक्षितं स्थानं मनसा नीत्वा ॥ २४ ॥

श्रीराधारमणदासगोस्वामिविरचिता
दीपिकादीपिनी टिप्पणी ।

निर्गुणे निर्विशेषब्रह्मणि । परमानन्दं ब्रह्मसायुज्यम् । तदंशभूतः ब्रह्मानन्दांशभूतः । "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ती"ति श्रुतेः । एवञ्च ब्रह्मसायुज्यमपि सिद्धिमध्ये एव गणितम् ॥ १७ ॥

अतः परम् अष्टसिद्ध्यनन्तरम् । प्राकृतधर्मोपाधितयोपास्यमानत्वाद्गुणहेतुका इत्युक्तम् । धर्ममये प्राकृतसत्त्वजधर्माधिष्ठातरि । शुद्धस्वरूपतां रजस्तमोहीनसत्त्वात्मताम् ॥ १८ ॥

तद्रूपे समष्टिप्राणोपाधौ मयि तत्रस्था आकाशस्था भूतानां विचित्रा विविधा वाचः शृणोतीति प्रथमोऽर्थः । तत्राकाशे ज्ञातृत्वं तद्गुणं शब्दज्ञानेन प्राप्तमेवेति तत्रोपलब्धेत्याधिक्यमपुष्टार्थत्वादतो यद्वेति । दूरत इति तु प्रकरणबलादध्याहृतम् ॥ १९ ॥

अपरिच्छिन्ने नेत्रगोलकपरिच्छेदशून्ये । उभयसंयोगे त्वष्टृचक्षुःसंयोगे तत्तन्नियन्तारं मां ध्यायन्निति स्वध्यानप्रभाव एव तत्र हेतुत्वेनोक्त इति ज्ञेयम् ॥ २० ॥

(१) मनो मनसि । (२) तत्तद्व्रजेत् इति वि०

श्रीराधारमणदासगोस्वामिविरचिता दीपिकादीपिनी टिप्पणी ।

तदनुवर्तिना मनोऽनुकूलेन मयि मनआद्यधिष्ठातरि । मद्धारणा योगिकर्तृकं मद्धारणम् । एवमेवाभिप्रेत्य मद्धारणा क्रियत इति व्याख्यातम् । तथाच क्त्वाप्रत्ययस्य समानकर्तृकत्वं निर्वहति । तथापि या मद्धारणा क्रियत इति कष्टकल्पनैवातो यद्वेति । आत्मानं मन एव कर्मभूतम् तदनु तस्य मनसः पश्चात् तत्र मनः प्राप्ये स्थाने देहोऽपि वेगेन यातीति मनोजवसिद्धिर्व्याख्याता ॥ २१ ॥

यद्यद्देवादिरूपं यद्यद्देवादिरूपकत्वेन भवितुं योगीच्छति तत्तच्छरीरात्मको योगी भवतीति कामरूपसिद्धिर्व्याख्याता ॥२२॥

तत्र प्रवेष्टुमीप्सिते परकाये आत्मानं मदधिष्ठितप्राणाद्युपाधिमिति शेषः । ततस्तादृशधारणासामर्थ्यात् तेन वाय्वनुकूलेन ॥ २३ ॥

पार्ष्णिना पादपश्चाद्भागेन । गुदं निरुद्ध्येति सम्पीड्य सीविनीं सूक्ष्मामित्याद्युक्तं मुक्तासनं सूचितम् ॥ २४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

निर्गुणे गुणत्रयातीते ॥ १७—१८ ॥

भूतानां वाच इत्यन्वयः ॥ १९ ॥

त्वष्टा आदित्यः ॥ २० ॥

वायुना सह देहं मयि संयोजयेत्यन्वयः ॥ २१ ॥

मन उपादाय मयि निधायेत्यर्थः । मनोरूपं भवेत् अभिमतरूपवान् भवेत् ॥ २२ ॥ २३ ॥

उत्सृजेत्तनुमिति छन्दत इत्यर्थः ॥ २४-२५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

निर्गुणे इति । निर्गुणे हेयगुणरहिते ब्रह्मणि कल्याणगुणबृहत्त्वशालिनि मयि विशदं योगपरिशुद्धं मनो धारयन् परमानन्दं प्राप्नोति । यत्र परमानन्दे कामः सर्वोऽप्यवसीयते समाप्यते ॥ १७ ॥

अथ गुणहेतून् सिद्धीस्तत्साधनभूता धारणाश्च विशेषतो निरूपयति । श्वेतद्वीपपतौ इति । शुद्धे शुद्धसत्त्वात्मके धर्ममये धर्मनिर्वाहके तन्निर्वाहकत्वेन तत्प्रचुरत्वात्तत्र भवद् मयि चित्तं धारयन्, षडूर्मिरहितः अशनायाद्यतीतः श्वेततां श्वेतरूपतां याति ॥ १८ ॥

मयीति । आकाशात्मन्याकाशवन्निर्मलः सर्वव्यापकः आत्मा स्वरूपं यस्य तस्मिन्प्राणे प्राणशरीरके मयि मनसा घोषं प्राणघोषम् उद्वहन् चिन्तयन् तत्र धारणायां या उपलब्धिस्तयोपलक्षितः इत्यर्थः उपलब्ध्या इति पाठे वाग्विशेषणम् असौ हंसो योगी दूरस्थानामपि भूतानामुपलब्धाः अभिव्यक्ता वाचः शृणोतीति दूरश्रवणमुक्तम् ॥ १९ ॥

अथ साधारणां दूरदर्शनं निरूपयति । चक्षुरिति । त्वष्टा आदित्यः चक्षुरिन्द्रियाधिष्ठाता तस्मिन् चक्षुः संयोज्य तं च चक्षुषि संयोज्य संयुक्तं ध्यात्वा इत्यर्थः । तत्रोभयसंयोगे मां मनसा ध्यायन् सू
दृग् यस्य तथाभूतः सन् विश्वं दूरस्थमपि सर्वं पश्यति ॥ २० ॥

अथ साधारणां मनोजवं निरूपयति । मन इति । मयि त
न्मनः तदनु ततः वायुना प्राणवायुना सह देहं च संयो
संयुक्तं ध्यात्वा यत्र मनस्तत्रात्मा देहोऽपि मद्धारणानुभ
मद्विषयकधारणाप्रभावेण उपतिष्ठतीति शेषः ॥ २१ ॥

अथ कामरूपमाह । यदेति । मनः उपाधाय मयि नि
येत्यर्थः । यद्यद्देवादिरूपं बुभूषति भवितुमिच्छति । यादृग्रूपयुग्
भवितुमिच्छतीत्यर्थः । तत्तन्मनोरूपं मनसोभीष्टरूपं भवेत्प्राप्नुया
इति शेषः । तत्र हेतुर्मद्योगबलं मद्विषयकधारणात्मकयोगबलमा
श्रितः ॥ २२ ॥

परकायमिति । परकायं परशरीरं विशन् प्रविविक्षन् तत्र परका
आत्मानं धारयेत् स्थितं चिन्तयेत् ततः पिण्डं स्वदेहं हि
प्राणः प्राणसहितः प्राणशब्देनेन्द्रियाणि मुख्यप्राणश्चोच्यन्ते द
मत्वर्थीयोऽच् वायुभूतो वायुसदृशो भूत्वा वायुर्यथा व
नासिकारन्ध्रेणान्तः प्रविशति तद्वत्प्रविशेत्परकायमित्यनुषङ्
षडङ्घ्रिवद्भृङ्गो यथा पुष्पात्पुष्पान्तरमनायासेनैव प्रविश
तद्वत् ॥ २३ ॥

अथ स्वच्छन्दमृत्युमाह । पार्ष्ण्येति । पार्ष्ण्या पादमू
गुदं मूलाधारमापीड्य प्राणं क्रमेण हृदुरःकण्ठमूर्द्धस्वा
ब्रह्मरन्ध्रेण प्रभिन्नशीर्षकपालरन्ध्रेण ब्रह्म नीत्वा प्रापय्य
देहमुत्सृजेत्स्वच्छन्दतस्त्यजेत् ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

प्राकाम्यसिद्धिकारणमाह । निर्गुण इति । यत्र यस्मिन्ब्रह्मानन्द
प्राप्तकामोऽन्येच्छावसीयते समाप्तो भवति । कामः काम्यः कम
नीयो विषयो नास्तीति वा यथेष्टानन्दसम्प्राप्तिः प्राकाम्यमि
कीर्त्यते इति च प्रगतमासमन्तात्काम्यं यस्मात्तस्तथा मत्र निर्गु
णत्वब्रह्मत्वगुणावुपसंहार्यौ ॥ १७ ॥

अनूर्मिमत्त्वसमाधिमाह । श्वेतद्वीपपताविति । शुद्धे निर्दुःख
धर्ममये धर्मफलदातरि श्वेतद्वीपपतौ मयि मनो धारयन्
श्वेततां याति निर्दुःखत्वमाप्नोति । शुद्धः श्वेतः सुखी श्वेतः श्वेतवर्णः कश्चिद्भवेत् इति । कथं निर्दुःखत्वमाप्तं स्यादत्राह ।
षडिति । षडूर्मिराहित्यं विवृतमभर इत्यनेन मनूर्मिमत्त्वं दुःखस्याभावमात्रमुदाहृतमिति ॥ १८ ॥

दूरश्रवणसिद्ध्युपायमाह । मयीति । आकाशात्मनि आका
शव्यापिनि प्राणे स्थिते मयि मनसा घोषं शब्दमुद्वहन्नाका
शस्थप्राणस्थो हरिः शब्दप्रवर्तकस्तस्याधारश्चेति । ध्यायन् हंसः
शरीराभिमानविधुरो जीवोऽसौ तत्राकाशे उपलब्धस्तामासमन्तात
स्थितानां भूतानां वाचः शृणोतीत्यन्वयः । त्यागात् पूर्वशरीराणां
नवानां सञ्चयेन च । जीवं हंस इति प्राहुस्तद्धेतुत्वाद्धरिः परमित्यतो
वा हंसो जीवः ॥ १९ ॥

दूरदर्शनोपायमाह । चक्षुरिति । त्वष्टा सूर्यश्चक्षुर्नियामक आश्र
यश्च तत्र चक्षुषि सूर्ये च स्थितं माम्–

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सहस्रयोजनान्तं तु दूरदर्शनमिष्यते ।
दूरश्रवणमप्येवं तस्मिन्नेव युगे स्थिते ॥

इति विशेषः ॥ २० ॥

मनोजवप्रापकधारणाप्रकारमाह । मन इति । यदा योगिनो मनोवेगेन गन्तुमिच्छा तदा मनो मनसि मनस्तत्त्वे वायुना संयोज्य तदनु मनोऽनु देहमपि वायुना संयोज्य मद्धारणानुभावेन मनस्तत्त्वान्तर्यामिणो मम ध्यानसामर्थ्येन यत्र मनस्तत्रात्मा शरीरमनुगच्छतीत्यन्वयः । स्वमनःसमवेगिता मनोजव इति प्रोक्त इति च ॥ २१ ॥

कामरूपावाप्त्युपायमाह । यदेति । यदा मन उपादाय स्थिरीकृत्य यद्यद्रूपं गजादिरूपं बुभूषति भवितुमिच्छति गजादिरूपः स्यामिति तदा गजाद्याकारस्य गजाद्यन्तर्यामिणो मम योगबलं ध्यानबलमाश्रितो योगी तत्तन्मनोगतगजादिरूपं व्रजेदित्यन्वयः—

गजादिरूपमाकाङ्क्षन् गजादिस्थितमीश्वरम् ।
ध्यायन् गजादिरूपः स्यात्पश्वाद्याकारता तथा ॥

कामरूपत्वमुद्दिष्टमिति च ॥ २२ ॥

परकायमित्यस्यायमर्थः परकायं विशन् सिद्ध आत्मानं स्वान्तःस्थं हरिं तत्र परकाये भावयेदेवं भावितः प्रकृष्टानन्दरूपत्वात्प्रणयनकर्तृत्वाच्च प्राणः परमात्मा वायुभूतो वायौ भूतो वाय्वन्तर्गतः पिण्डं हित्वा इतरदृष्ट्या स्वदृष्ट्या न त्यक्त्वा योगिनं समादाय परकाये प्रविशेदित्यन्वयः स्वदेहात्त्यागतः परे परकाये प्रवेशः स्यादिति । परकायस्थितं हरिं ध्यायन् विशेत् परे काये वाय्वन्तर्गतः पुमान् ॥

प्राणनामा हरिः प्रोक्तः तस्मिन्वायुः समाश्रितः ॥
वाय्वन्तर्गतो जीवो देहाद्देहं प्रयास्यतीति च ॥ २३ ॥

स्वच्छन्दमृत्युताप्रकारमाह । पाष्ण्येंति । प्राणं हृदुरःकण्ठमूर्द्धस्वारोप्य षडाधारस्थितं विष्णुं ध्यायन् ब्रह्मरन्ध्रेण तनुमुत्सृजेत् प्राणं ब्रह्मणि नीत्वा प्राणनामानं बहिःस्थे ब्रह्मनाम्नि उत्सृजेत्यर्थः । युग्मक्यांकृतना स्मृता स्वच्छन्दमृत्युतेति—

षडाधारस्थितं विष्णुं ध्यायन्नायुः क्षयं विना ।
यदि मृत्युमभीप्सीत तथा प्राप्नोत्यसंशयम् ॥
प्राणस्थं प्राणनामानं बहिःस्थे ब्रह्मनामके ।
विष्णुं विष्णावनुस्मृत्य विसृजेद्देहमञ्जसेति ॥
अनेयस्य हरेर्नीतिस्तद्वशस्य हरेः स्मृतिः ।
नहि नेयः क्वचित्क्वापि केनचित्स्ववशत्वतः ॥

इति च ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

निर्गुणे ब्रह्मणीति । ब्रह्मसायुज्यमपि सिद्धिमध्ये गणितम् ॥१७॥

अतः परं प्राकृतधर्मोपाधितयोपास्यमानत्व गुणहेतुत्वं स्वतः शुद्धे गुणातीते उपाधितस्तु धर्ममये सात्त्विकधर्माधिष्ठातरि श्वेततां शुद्धतां रजस्तमोहीनसत्त्वात्मताम् ॥ १८ ॥

मयीतितैः तत्र विचित्रा वाच इत्यत्र भूतानामिवेतिज्ञेयम्॥१९-२०॥

मन इति । तैः तत्र मयि मनोऽधिष्ठातरीति ज्ञेयम् ॥ २१-२२ ॥

आत्मानमिति । मदधिष्ठितप्राणाद्युपाधिमिति शेषः ॥२३-२४॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

सर्वोऽपि कामो यत्रावसीयते समाप्यते तं परमानन्दम् ब्रह्मसायुज्यमिति सन्दर्भः ॥ १७ ॥

अतः परं गुणहेतुकाः श्वेततां शुद्धरूपतामित्यनूर्मिमत्त्वनाम्नी सिद्धिः ॥ १८ ॥

आकाशात्मा यः प्राणः समष्टिव्यष्टिरूपस्तद्रूपे मयि मनसा घोषं नादमुद्वहन् चिन्तयन् तत्राकाशे उपलब्धा अभिव्यक्ता या भूतानां वाचस्ता दूरतः हंसः शुद्धः सन् शृणोतीति दूरश्रवणम् ॥ १९ ॥

त्वष्टा सूर्यस्तस्मिन् चक्षुः संयोज्य चक्षुषि च तं संयोज्य तत्रोभयसंयोगे मां ध्यायन् विश्वं सर्वं दूरस्थितमपि पश्यतीति दूरदर्शनम् ॥ २० ॥

मनो मयि संयोज्य तदनुवर्तिना वायुना सह देहं च संयोज्य या मद्धारणा क्रियते तस्याः प्रभावेण यत्र मनो याति तत्रैवात्मा स्थूलदेहोऽपि यातीति मनोजवः ॥ २१ ॥

मन उपादाय उपादानकारणं कृत्वा यत् यत् देवादिरूपम् भवितुमिच्छति तत्तत् मनोरूपं मनोऽभीष्टरूपं भवेत् तत्र मयि योगः योगधारणा तस्य बलं प्रभाव एवाश्रयः साधकमिति कामरूपम् ॥ २२ ॥

तत्र परकाये पिण्डं स्थूलदेहं हित्वा प्राणः प्राणप्रधानलिङ्गशरीरोपाधिः सन् वायुभूतः बाह्यवायुना भूतः प्राप्तः । विशेत् परकायं प्रविशेत् षडङ्घ्रिर्यथा पुष्पात् पुष्पान्तरं विशति मद्योगधारणाप्रभावेणेति योज्यमिति परकायप्रवेशः ॥ २३ ॥

पाष्ण्या पार्ष्णिना गुदं निरुद्ध्य प्राणं प्राणोपाधिमात्मानम् ब्रह्मरन्ध्रेण मूर्द्धद्वारेण ब्रह्म निर्विशेषं सविशेषं वा नीत्वा प्रापय्य तनुम् त्यजेदिति स्वच्छन्दमृत्युः ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एवमचेतनेषु त्वम्पदार्थे च मच्छक्तिरूपे मम दृष्ट्योपासनं कर्तव्यमित्युक्तमिदानीं तत्पदार्थधारणामाह । निर्गुण इति।निर्गुणे प्राकृतगुणरहिते ब्रह्मणि बृहद्गुणशक्तिके विश्वहेतौ मयि विशदं गम्भीरं मनो धारयन् यत्र सर्वोऽपि कामः अवसीयते समाप्यते एवम्भूतपरमानन्दमेव प्राप्नोति ॥ १७ ॥

अथ गुणहेतुकाः सिद्धीराह । शुक्ले शुद्धसत्त्वे धर्ममये धर्मप्रधाने धर्मरक्षके इत्यर्थः । षडूर्मिरहितः क्षुधापिपासादिरहितः श्वेततां शुद्धतां याति ॥ १८ ॥

असौ ध्याता हंसः सारासारवित् आकाशवदात्मा स्वरूपं यस्य तस्मिन्समष्टिरूपे प्राणे मयि प्राणरूपकार्यस्थे घोषम् नादमुद्वहन् ध्यायन् तत्राकाशे उपलब्धाः अभिव्यक्ताः वाचः शृणोति ॥ १९ ॥

विहरिष्यन् सुराक्रीडे मत्स्थं सत्त्वं विभावयेत्।
विमानेनोपतिष्ठन्ति सत्त्ववृत्तीः[1] सुरस्त्रियः ॥ २५ ॥
यथा सङ्कल्पयेद्बुद्ध्या यदा वा मत्परः पुमान्।
मयि सत्ये मनो युञ्जंस्तथा तत् समुपाश्नुते ॥ २६ ॥
यो वै मद्भावमापन्न ईशितुर्वशितुः पुमान्।
कुतश्चिन्न विहन्येत तस्य चाऽऽज्ञा यथा मम ॥ २७ ॥
मद्भक्त्या शुद्धसत्त्वस्य योगिनो धारणाविदः।
तस्य त्रैकालिकी बुद्धिर्जन्ममृत्यूपबृंहिता ॥ २८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

सूक्ष्मदृक् योगनिष्ठितैकाग्रदृष्टिः त्वष्टरि आदित्ये चक्षुरिन्द्रियं चक्षुषि च त्वष्टारं तत्रोभयसंयोगे मां ध्यायन् विश्वं पश्यति ॥ २० ॥

प्रथमं मनः तदनु वायुना प्राणेन सह देहं च मयि सुष्ठु संयोज्य मद्धारणानुभावेन यत्र मनस्तत्र आत्मा मनोदेहवायुयोजनकर्ता यातीत्यर्थः। अनेनैव तत्र देहोऽपि यातीति ज्ञेयम् ॥ २१ ॥ २२ ॥

सिद्धः परकायं विशन् तत्र परकाये आत्मानं भावयेत् चिन्तयेत् तदनन्तरं पिण्डं निजकायं हित्वा प्राणः प्राणप्रधानलिङ्गशरीरः वायुभूतः सन् तस्मिन्विशेत् तत्र दृष्टान्तः षडङ्घ्रिवत् यथा भ्रमरः पुष्पं हित्वा पुष्पान्तरमनायासेन प्रविशति तद्वत् ॥ २३ ॥

पिण्डत्यागप्रसङ्गात्स्वच्छन्दमृत्युप्रकारमाह। पार्ष्णिना गुदम् मूलाधारम् आपीड्य निरुध्य प्राणं क्रमेण हृदुरःकण्ठमूर्धसु आरोप्य ब्रह्मरन्ध्रेण ब्रह्म नीत्वा आत्मानमिति शेषः ब्रह्मप्रापित मनसोद्दिश्येति यावत् तनुमुत्सृजेत् ॥ २४ ॥

भाषा टीका।

निर्गुण प्राकृत गुण रहित मेरे मे निर्मल मन का धारणा करे तो वह ऐसे परम आनन्द स्वरूप को जानजाता है। कि जिसमे सब मनोरथ समाप्त होजावैं ॥ १७ ॥

शुद्ध धर्म मय श्वेतद्वीप के पति मेरे विषै जो चित्तको धारणा करता है वह क्षुधा तृषा आदिक छै ऊर्मियों से रहित होकर शुद्ध श्वेतगुण को प्राप्त हो जाता है ॥ १८ ॥

आकाश आत्मारूप मेरे मे मनसे शब्द को धारणा करे तो वह हंस योगी दिव्यज्ञान को प्राप्त होकर सब भूतों की वाणियें को सुन लेता है ॥ १९ ॥

अपने नेत्र मे सूर्यदेव को सूर्य मे नेत्र को संयुक्त करके उहां पर मेरा मन से ध्यान करे तो सूक्ष्मदृष्टि वाला होकर सब संसार को देखता है ॥ २० ॥

मेरे में मनको संयुक्त करै तिसके पीछे वायु के सहित देह को भी संयुक्त करै तब मेरे स्वरूप की धारणा के प्रभाव से जहां मन को पंहुचावै तहीं देह भी चला जाता है ॥ २१ ॥

जिस वखत मन को कारण करके जो जो रूप हो न चाहता है तब मेरे योग बल के प्रभाव से उसी उसी रूप को प्राप्त हो जाताहै ॥ २२ ॥

सिद्ध पुरुषको जब परके शरीर मे प्रवेश करना होवै तब अपने आत्मा का भावना करै फिर मेरे ध्यान करने से प्राण को साथ में लेकर शरीर को छोड कर वायुरूप हो कर अनायास से भ्रमर सरीका उस शरीर मे प्रविष्ट हो जाता है ॥ २३ ॥

जब इच्छा से देह छोडना हो तो पैरकी एडी से गुदा द्वार को रोक कर मुक्तासन लगा कर मूलाधार से प्राण को उठा कर नाभि हृदय कण्ठ आदि चक्रों में चढा कर फिर मस्तक के ब्रह्म रन्ध्र में प्राण को ले जाकर मूर्ध द्वार से निकाल कर शरीर को त्याग देवै ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

मत्स्थं मन्मूर्तिरूपं शुद्धं सत्त्वं चिन्तयेत् तदा सत्त्ववृत्तयः सत्त्वांशभूताः ॥ २५ ॥

यदा वा अकालेऽपि यदा वेति पाठे यथा वा येन केनापि प्रकारेण बुद्ध्या संकल्पयेत्तत्तथा यथा वत्प्राप्नोतीत्यर्थः। यद्वा यथा संकल्पयेद्यथा वा मत्परो मयि विश्वासवान् भवति तथा तदनुरूपं सर्वमाप्नोतीत्यर्थः किंकुर्वन् सत्ये सत्यसंकल्पे मयि मनो युञ्जन् ॥ २६ ॥

मदिति पृथक्पदम् ममेत्यर्थः। ईशितुः सर्वनियन्तुर्वशितुः स्वतन्त्रस्य मम भावं स्वभावं प्राप्तः एता गुणहेतवः ॥ २७ ॥

अतः परं क्षुद्राः धारणाविद् इति त्रिकालज्ञेश्वरधारणासूचिता त्रैकालिकी त्रिकालवस्तुविषया स्वजन्ममृत्युभ्यामुपबृंहिता तत्सहिता अनयैव परचित्ताद्यभिज्ञताऽपि व्याख्याता ॥ २८ ॥

---

(१) सत्त्ववृत्ति—इति वि० वीरराघ० पाठः।